1

श्रीगणेशायनमः॥श्रीरामायनमः॥युद्धेरक्षोगणान्हत्वापुष्पकेणनिजांपुरीं।सीतयासहचागत्यरेजे
रामोभिषेचितः॥१॥एवंहनूमतःसकाशात्सीतावृत्तांतंश्रुत्वाकृतकार्यंभृत्येस्वामिनंउचितांवृत्तिंलो
केभ्यउपदेष्टुंहनूमंतमस्तौषीत्याह॥श्रुत्वेतिउत्तरंप्रियश्रवणोत्तरकालयोगं॥१॥भुविदुर्लभं

श्रीरघुनाथायनम॥श्रुत्वाहनूमतोवाक्यंयथावदभिभाषितं॥रामःप्रीतिसमायुक्तोवाक्य
मुत्तरमब्रवीत्॥१॥कृतंहनूमताकार्यंसुमहद्भुविदुर्लभं॥मनसापियदन्येननशक्यंध
रणीतले॥२॥नहितंपरिपश्यामियस्तरेतमहोदधिं॥अन्यत्रगरुडाद्वायोरन्यत्रचहनूमतः॥३॥
देवदानवयक्षाणांगंधर्वोरगरक्षसां॥अप्रधृष्यांपुरींलंकांरावणेनसुरक्षितां॥४॥श्रीसीताय

भूलोकेदुःखेनलभ्यंयत्वस्तुसीतारूपंतद्विषयंयत्कार्यमन्वेषणरूपंतद्धनूमताकृतंयद्धरणीत
लेऽन्येनमनसापिनशक्यंकर्तुमितिशेषः अतएवदुर्लभत्वमुक्तं॥२॥अन्याशक्यत्वमेवाह॥नही
ति॥३॥देवदानवयक्षाणामितिकरणेशेषत्वेनविवक्षितेषष्ठी॥४॥ श्र

यस्तुयुक्तोबुद्ध्यासमर्थश्चसन्परंस्वामिसंदिष्टादधिकंनृपतेःप्रियंनकुर्यात्किंतुसंदिष्टमेवकुर्यात्तंमध्य
ममाहुः भृत्यस्तुयःपरंकार्यंनकुर्यान्नृपतेःप्रियंभृत्योभृत्यः समर्थोपितमाहुर्मध्यमंनरमितिपाठेयः स
मर्थोपिभृत्यःपरंकार्यंनकुर्यात्सभृत्यः उक्तमात्रकरणात् अधिकाकरणाच्चाभृत्योऽतस्तंमध्यममाहुः
योनियुक्तोनृपतेरुक्तमपिकार्यंनकुर्यात्तमधममाहुः॥९॥अथहनूमतउत्तमत्वंदर्शयति तदिति

योनियुक्तःपरंकार्यंनकुर्यान्नृपतेःप्रियं॥भृत्योयुक्तःसमर्थश्चतमाहुर्मध्यमंनरं॥८॥नियुक्तो
नृपतेःकार्यंनकुर्याद्यःसमाहितः॥भृत्योयुक्तःसमर्थश्चतमाहुःपुरुषाधमं॥९॥तन्नियोगेनि
युक्तेनकृतंकृत्यंहनूमता॥नचात्मालघुतांनीतःसुग्रीवश्चापितोषितः॥१०॥अहंचरघुवं
शश्चलक्ष्मणश्चमहाबलः॥वैदेह्यादर्शनेनाद्यधर्मतःपरिरक्षिताः॥११॥ ॥ ॥

2

नियोगेसीतान्वेषणमात्रेकृत्यंअधिकमपिकृत्यंकृतं अतउत्तमभृत्योयमितिभावः उत्तमत्वेयुक्तिंत
रमप्याह नचात्मेतिरक्षोभिरपराजितत्वात् सुग्रीवश्चापितोषितः अधिककार्यकरणादित्यर्थः॥१०
धर्मतः धर्मंप्राप्येत्यर्थः एतेनस्वाम्याज्ञापालनेनभृत्यस्यधर्मोपिसंरक्षितःमदादयः परिरक्षिताः सीता
समाचारालाभेनमन्नाशाच्चलक्ष्मणभरतादीनांनाशइति सर्वनाशप्रसंगइतिभावः॥११॥

तां॰ प्रविष्टः निष्क्रमेत्पुनः स्वदेशमागच्छेत्॥ प्रवेशोपि दुर्लभ इत्याह॥ क इति॥ यो हनूमतः समो न स्यात्स
को विशेदित्यन्वयः विक्रमस्य सदृशं स्वबलं स्वबलकार्यं समुद्रलंघनलंकाप्रवेशरूपं विधाय हनूम
ता महत्॥ उक्तादधिकमपि सुग्रीवस्य भत्यकार्यं सुग्रीवभत्यत्वोचितं कार्यं सीतादर्शनवनभंगादिरू

प्रविश्यस्सत्वमाश्रित्य जीवन्को नाम निष्क्रमेत्॥ को विशेत्सुदुराधर्षां राक्षसैश्च सुरक्षितां॥५॥
यो वीर्यबलसंपन्नो न समः स्याद्धनूमतः॥ भत्यकार्यं हनूमता सुग्रीवस्य कृतं महत्॥ एवं विधा
य स्वबलं सदृशं विक्रमस्य च॥६॥ यो हि भत्यो नियुक्तः सन् भर्त्रा कर्मणि दुष्करे॥ कुर्यात्त
दनुरागेण तमाहुः पुरुषोत्तमं॥७॥

पं कृतं॥५॥६॥ हनूमतो भत्योत्तमत्वं दर्शयितुं उत्तमादिभत्यानां लक्षणान्याह॥ यो हीति॥ यो भत्यो भर्त्रा
दुष्करे कर्मणि नियुक्तस्तत्कार्यं कृत्वा तदनुरागेणोक्तकार्याविरोधेन कार्यांतरमपि कुर्यात्॥ तं पुरु
षोत्तमं भत्यपुरुषेषु श्रेष्ठमाहुः॥७॥

रा·मा·यु·
३

सुकृतं अधिकस्यापिकरणादित्यर्थः समासाद्यदुस्तरत्वमालोच्य पुनर्नष्टं· सीतावृत्तांतश्रवणेन हृष्ट
मपि पुनर्विषादंप्राप्तं॥१६॥समागताः मिलिताः॥१७॥किंचैषवितर्कोनममैव किंतुसीतयाअपीत्याह
यद्यपीति· अप्यर्थे·एषतुवृत्तांतः ममवैदेह्यापिगदितः अतोहरीणांपारगमनेकिमिवोत्तरं·उत्तरका

सर्वथासुकृतंतावत्सीतायाःपरिमार्गणं॥सागरंतुसमासाद्यपुनर्नष्टंमनोमम॥१६॥कथं
नामसमुद्रस्यदुष्पारस्यमहांभसः॥हरयोदक्षिणंपारंगमिष्यंतिसमागताः॥१७॥यद्यप्येष
तुवृत्तांतोवैदेह्यागदितोमम॥समुद्रपारगमनेहरीणांकिमिवोत्तरं॥१८॥इत्युक्त्वाशोक
संभ्रांतोरामःशत्रुनिबर्हणः॥हनूमंतंमहाबाहुस्ततोध्यानमुपागमत्॥१९॥इत्यार्षेश्री
रामायणेयुद्धकांडेप्रथमःसर्गः॥१॥ तंतुशोकपरिद्यूनंरामंदशरथात्मजं॥उवाच
वचनंश्रीमान्सुग्रीवःशोकनाशनं॥१॥किंत्वयातप्यतेवीरयथान्यःप्राकृतस्तथा
मैवंभूस्त्यजसंतापंकृतघ्नइवसौहृदं॥२॥

3

लोन्वितंकर्ममित्यर्थः॥१५॥शोकसंभ्रांतःज्ञातेपिसी
तावृत्तांतेतस्मात्प्रतिवंधपर्यालोचनयाकलुषितांतःकरणइत्यर्थः ध्यानंध्यानमिवनरणोपायवि
षयचिंतामिव॥१९॥ध्येयमानः॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेप्रथमःसर्गः॥१॥
शोकपरिद्यूनशोकसंतप्तं॥१॥प्राकृतोयथातप्यतितथात्वयाकिंतप्यतेइत्यन्वयःएवंसंतप्तःकृत
घ्नोयथासौहृदंत्यजन्तितथात्वंसंतापंत्यज॥२॥

राम
३

एवंहनूमत्कर्मणः सुखजनकत्वेपितस्मैतदुपकाराकरणजोविषादःसीताश्रवणजमानंदमपितिरोधायमांसं
तापयतीत्याह इदंत्विति नकुर्मि नकरोमिसदृशं एतत्कृतप्रियसदृशंप्रियं १२ तत्तुल्यप्रियांतरमपश्यन्
आत्मपरिष्वंगमेव तथापश्यन्नाह एषइति सर्वस्वभूतः भगवद्देहस्यशुद्धानंदपूरत्वात्स्वालिंगनस्यसर्व
स्वभूतत्वंबोध्यं आनंदएवहिभगवतःसर्वस्वंआनंदएवहिरामादिदेहत्वेनभासतेइतिगीताभाष्यवि

इदंतुममदीनस्यमनोभूयःप्रकर्षति॥यदिहास्यप्रियाख्यातुर्नकुर्मिसदृशंप्रियं॥१२॥
एषसर्वस्वभूतस्तुपरिष्वंगोहनूमतः॥मयाकालमिमंप्राप्यदत्तस्तस्यमहात्मनः॥१३॥
इत्युक्त्वाप्रीतिहृष्टांगोरामस्तंपरिषस्वजे॥हनूमंतंकृतात्मानंकृतवाक्यमुपागतं॥१४॥
ध्यात्वापुनरुवाचेदंवचनंरघुसत्तमः॥हरीणामीश्वरस्यापिसुग्रीवस्योपशृण्वतः॥१५॥

ष्णुसहस्रनामभाष्ययोर्भगवत्पादैःस्पष्टमेवोक्तंब्रह्मांडपुराणादिषुच एवंपरिष्वंगद्वाराब्रह्मानंदा
र्पणमेवहनूमतेकृतमितिबोधितं तस्यहनूमनःउत्तमभृत्यस्यहनूमतः॥१३॥प्रीतिहृष्टांगःप्री
तिपुलकितगात्रःहनूमंतमित्यादिपूर्वान्वयि॥१४॥ध्यात्वासमुद्रतरणंकथंस्यादितिसंचिंत्येत्यर्थःसु
ग्रीवस्येतिसप्तम्यर्थेषष्ठी शृण्वतिसत्सुवाचेत्यन्वयः॥१५॥

श्र

मत्प्रियार्थमिमेरुतोत्साहाद् इतिकथंज्ञातंतत्राह· एषामिति· हर्षेण समुद्रतरण रावण प्रसंगेजायमाने
नतत्कार्यमुखविकासादिनानुमितेनेत्यर्थः ममापिहृष्टस्तर्कः समुद्रतरण रावण हननादिविषये
दृढनिश्चयइत्यर्थः तत्सर्वममेषत्करमितिभावः॥८॥ यदेवमतः यथारिपुंहत्वासीतांविक्रमेण

एषांहर्षेणजानामितर्कश्चापिदृढोमम॥८॥ विक्रमेणसमानेष्येसीतांहत्वायथारिपुं रा
वणंपापकर्माणंतथात्वंकर्त्तुमर्हसि॥९॥ सेतुरत्रयथाबध्येद्यथापश्येमतांपुरीं॥ तस्य
राक्षसराजस्यतथात्वंकुरुराघव॥१०॥ दृष्ट्वातांहिपुरींलंकांत्रिकूटशिखरेस्थितां॥ हतं
चरावणंयुद्धेदर्शनादवधारय॥११॥ अबध्वासागरेसेतुंघोरेचवरुणालये॥ लंका
नमर्दितुंशक्यासेंद्रैरपिसुरासुरैः॥१२॥

समानेष्येतथातदुचितमुत्साहंत्वंकर्त्तुमर्हसीत्यर्थः॥९॥ किंमयाकार्यंतत्राह· सेतुरिति· अत्र
समुद्रेयथातस्यराक्षसराजस्यतांपुरींपश्येमतथात्वंकुरु· दिव्यास्त्रालंबनेनेतिशेषः॥१०॥
त्रिकूटशिखरस्थांतांलंकांदृष्ट्वादर्शनात्· तद्दर्शनसमनंतरमेवयुद्धेरावणंहतंजानीहि॥११॥
सेतुबंधंविनाप्रकारांतरंलंकाप्राप्तौनास्तिसोपिकृतएवेतिनिश्चिन्वित्याह· अबध्वेति॥१२॥

स्थानंनिमित्तमेव नौजीवने ॥३॥ शास्त्रवित् नीत्यादिशास्त्रज्ञः मतिमान् भाव्यर्थज्ञानयोग्यबुद्धिः प्राज्ञो वि
चारकुशलः पंडितः विचारपूर्वं सिद्धांतप्रतिस्थापनसमर्थः सत्वमिमां प्रकृतां मत्यादिरहितप्राकृत
जनोचितां बुद्धिं दीनबुद्धिं त्यज कृतात्मा योगी यथा अर्थस्य स्वेष्टस्य योगस्य दूषिणीं दूषिकां कामादिवि

संतापस्य च ते स्थानं न हि पश्यामि राघव ॥ प्रवृत्तावुपलब्धायां ज्ञाते च निलये रिपोः ॥३॥
मतिमांछास्त्रवित्प्राज्ञः पंडितश्चासि राघव ॥ त्यजेमां प्राकृतां बुद्धिं कृतात्मेवार्थदूषिणीं ॥४॥
समुद्रं लंघयित्वा तु महानक्रसमाकुलं ॥ लंकामारोहयिष्यामो हनिष्यामश्च ते रिपुं ॥५॥
निरुत्साहस्य दीनस्य शोकपर्याकुलात्मनः ॥ सर्वार्था व्यवसीदंति व्यसनं चाधिगच्छति ॥६॥
इमे शूराः समर्थाश्च सर्वतो हरियूथपाः ॥ त्वत्प्रियार्थं कृतोत्साहाः प्रवेष्टुमपि पावकं ॥७॥

षयां बुद्धिं त्यजन्निति हत्त्वं त्यजेस्यर्थः ॥४॥ समुद्रलंघनेपि चिंता न कार्येत्याह समुद्रमिति वत्समा-
णो पाठे नेति शेषः । आरोहयिष्यामः । आरोद्यामः ॥५॥ निरुत्साहत्वादिगुणको व्यसनदुःपरंपरां अ-
धिगच्छति प्राप्नोति ॥६॥ ननु किं बलादस्माकमुत्साहः स्यादत आह इमे इति सर्वतः समर्था इत्यन्वयः ॥७॥

रामा·यु·
५

जयेपुष्कलंतेसामर्थ्यमस्तीत्याह·नहीति·तिष्ठेत्स्थातुंशक्नुयात्॥१८॥सहायसंपत्त्यापिजयंनिश्चिन्वित्याह·वानरेष्विति·वानरेषुमहाबलेष्वस्मादृशेषुसमासक्तंकर्त्तव्यत्वेनसंबद्धंकार्यंनविपत्स्यतेननंक्ष्यति॥१९॥तदिति·शोकमालंब्यालं·शोकंमालंबस्वेत्यर्थः क्रोधमालंबेतियथाप्राप्तंशत्रुविषयकमित्यर्थः॥अन्वयव्यतिरेकाभ्यांशत्रुविषयेकोपश्चावश्यकइत्याह·निश्चेष्टाइति·मदाःशत्रुविषयेक्रो

5

नहिपश्याम्यहंकंचित्त्रिषुलोकेषुराघव॥गृहीतधनुषोयस्तेतिष्ठेदभिमुखोरणे॥१८॥वानरेषुसमासक्तंनतेकार्यंविपत्स्यते॥अचिराद्रक्ष्यसेसीतांतीर्त्वासागरमक्षयं॥१९॥तदलंशोकमालंब्यक्रोधमालंबभूपते॥निश्चेष्टाःक्षत्रियामंदाःसर्वेचंडस्यबिभ्यति॥२०॥लंघनार्थंचघोरस्यसमुद्रस्यनदीपतेः॥सहास्माभिरिहोपेतःसूक्ष्मबुद्धिर्विचारय॥२१॥लंघितेतत्रतैःसैन्यैर्जितमित्येवनिश्चिनु॥सर्वंतीर्णंचमेसैन्यंजितमित्यवधारय॥२२॥

धहीनाःक्षत्रियानिश्चेष्टाभवंति·शत्रुकृतवधनादिनेतिशेषः चंडस्यउचितकोपस्यसर्वेबिभ्यति॥२०॥अस्माभिःसहनदीपतेर्लंघनार्थंलंघनेहेतुमस्माभिरुपेतःसन्सूक्ष्मबुद्धिस्त्वंविचारय॥२१॥सर्वंतीर्णंजितमितिचावधार्यतामवधारय·तत्रसागरेलंघितेसतितैर्मदीयैःसैन्यैर्जितमितिनिश्चिनु·पारंतरेसमुद्रेलंघितेतैर्वानरैस्तस्यरावणस्यसैन्यंजितमितिनिश्चिन्वित्यर्थः॥२२॥ ॥

राम·
५

लंकासमीपतः तत्समीपंयावत्सेतुबंधः कृतएवसर्वंसैन्यंतीर्णमेवास्माभिर्जितं चेत्युपधायनिश्चिंतु· तथा
निश्चयेहेतुमाहः तथाहीति· हियतस्तादृशशौर्यवंतोहरयइमेदृश्यंतेयतस्तेकामरूपिणः॥१३॥ त
त्तस्माद्विक्लवांसर्वार्थनाशनीं वुद्धिमवलंब्यालं· हियतः शौर्यापकर्षणस्तन्नाशकः॥१४॥ मनुष्येणतु

सेतुबंधःसमुद्रेचयावल्लंकासमीपतः॥सर्वंतीर्णंचमेसैन्यंजितमित्युपधारय॥१३॥ तथा
हिसमरेवीराहरयःकामरूपिणः॥ तदलंविक्लवांबुद्धिंराजन्सर्वार्थनाशनीं॥१४॥ पुरुष
स्यहिलोकेस्मिञ्छोकः शौर्यापकर्षणः॥ यत्तुकार्यंमनुष्येणशौंडीर्यमवलंब्यतां॥१५॥ त
दलंकरणायैवकर्तुर्भवतिसत्वरं॥ अस्मिन्कालेमहाप्राज्ञसत्वमातिष्ठतेजसा॥१६॥ शू
राणांहिमनुष्याणांत्वद्विधानांमहात्मनां॥ विनष्टेवाप्रनष्टेवाशोकः सर्वार्थनाशनः॥१७॥
नत्वंबुद्धिमतांश्रेष्ठः सर्वशास्त्रार्थकोविदः॥ मद्विधैः सचिवैः सार्धमरिंजेतुत्वमर्हसि॥१८॥

शौंडीर्यंतद्युक्तंयत्कार्यंकर्तुंयोग्यंतदेवावलंब्यतां· अवलंबयितुमुचितमित्यर्थः यतः सत्वरंक्रि
यमाणंतत्कर्तुरलंकरणायैवभवतिफलसाधनायसमर्थंभवति॥१५॥ अतोहेमहाप्राज्ञत्वंते
जसासहसत्वंगुणमातिष्ठः विनष्टेसीतावददर्शनंगतेप्रनष्टेदशरथवत्सर्वथाऽदर्शनंग
ते॥१६॥ उपसंहरतितदिति॥१७॥

परिमाणंसंख्यापरिच्छेदं· द्वारदुर्गक्रियां· द्वाराणांदुष्प्रवेशत्वसंपादनं· गुप्तिकर्मप्राकारादिषुयंत्रादिस्था
पनरूपं· गुप्तिक्रममितिपाठेप्राकारादिभिरक्षाक्रममित्यर्थः॥४॥ यथासुखंयथावद्दृष्टवानसितत्सर्वंत
त्त्वेनाचक्ष्व: सर्वथाकुशलोह्यसियथावद्दृष्टप्रतिपादनेइतिशेषः॥५॥ श्रुत्वाऽथाब्रवीदित्यन्वयः॥६॥

बलस्यपरिमाणंचद्वारदुर्गक्रियामपि॥गुप्तिकर्मचलंकायारक्षसांसदनानिच॥४॥ यथासुखं
यथावच्चलंकायामपिदृष्टवान्॥सर्वमाचक्ष्वतत्त्वेनसर्वथाकुशलोह्यसि॥५॥ श्रुत्वारामस्य
वचनंहनूमान्मारुतात्मजः॥वाक्यंवाक्यविदांश्रेष्ठोरामंपुनरथाब्रवीत्॥६॥ श्रूयतांसर्व
माख्यास्येदुर्गकर्मविधानतः॥गुप्तापुरीयथालंकारक्षिताचयथाबलैः॥७॥ राक्षसाश्चय
थास्निग्धारावणस्यचतेजसा॥परांसमृद्धिंलंकायाःसागरस्यचभीमतां॥८॥ विभागंचब
लौघस्यनिर्देशंवाहनस्यच॥एवमुक्त्वाकपिश्रेष्ठःकथयामासतत्त्ववित्॥९॥ हृष्टप्रमुदि
तालंकामत्तद्विपसमाकुला॥महतीरथसंपूर्णारक्षोगणनिषेविता॥१०॥ ॥ ॥

दुर्गकर्मविधानतः दुर्गत्वसंपादककर्मविधानेनयथागुप्ताबलैर्यथारक्षिताचतथाख्यास्ये॥७॥
रावणस्यतेजसासंपादितांपरांसमृद्धिमाख्यास्यइत्येवंक्रमेणान्वयः॥८॥ बलौघस्यपादातसं
घस्यवाहनस्यगजाश्वरथलक्षणस्य· निर्देशंसंख्यापरिच्छेदं॥९॥१०॥ श्र

तेषुजेतृत्वशक्तिमाह·इमेहीति॥२३॥कथंचित्केनाप्युपायेनवरुणालयंलंघितमेवपश्यामि॥२४॥निमित्तमेवा
ह·नमइति॥२५॥इतिश्रीरामाभिरामेश्रीरा॰रा॰ति॰युद्ध॰द्वितीयःसर्गः॥२॥ सुग्रीवस्येति·परमार्थ
वत्परमार्थभूतंस्वार्थैवतिः॥श्रुत्वाप्रतिजग्राहअंगीचकार·अथतदंगीकारानंतरं॥१॥तपसातपः

इमेहिहरयःशूराःसमरेकामरूपिणः॥तानरीन्विधमिष्यंतिशिलापादपवृष्टिभिः॥२३॥कथं
चित्परिपश्यामिलंघितंवरुणालयं॥ हतमित्येवतंमन्येयुद्धेशत्रुनिबर्हण॥२४॥किमुक्त्वा
बहुधाचापिसर्वथाविजयीभवान्॥निमित्तानिचपश्यामिमनोमेसंप्रहृष्यति॥२५॥इत्यार्षे
श्रीरा॰युद्ध॰द्वितीयःसर्गः॥२॥ सुग्रीवस्यवचःश्रुत्वाहेतुमत्परमार्थवत्॥प्रतिजग्राहका
कुत्स्थस्तदनंतमथाब्रवीत्॥१॥तपसासेतुबंधेनसागरोच्छोषणेनच॥सर्वथापिसमर्थो
स्मिसागरस्यास्यलंघने॥२॥कतिदुर्गाणिदुर्गायालंकायास्तद्ब्रवीषमे॥ज्ञातुमिच्छामित
त्सर्वंदर्शनादिववानर॥३॥

कार्यसंकल्पसिध्या·अतएवसकलस्वपुरवर्तिप्राणिनांब्रह्मलो
कनयनंवक्ष्यमाणंसंगच्छतेसेतुबंधनेन·गंगायांगांगेयेनशरैरिवसागरोच्छोषणेन·दिव्यास्त्रबल
तइतिशेषः·सर्वथासर्वप्रकारस्यलंघनोपायस्यविद्यमानत्वादित्याशयः॥२॥दुर्गायाःगंतुमशक्यायाः
कतिदुर्गाणिजलगिरिवनादिनानाप्रकारदुर्गेषुकतिप्रकाराणिदुर्गाणिसंतीत्यर्थः·दर्शनादिवअपरो
क्षानुभवादिव॥३॥

तत्र तेषु संक्रमेषु परसैन्यागमे सति ते संक्रमास्तैर्यंत्रैः प्राकारोपरि प्रनिस्थापितैर्यंत्रैस्त्रायंते रक्ष्यंते· ह्रियंते इति पाठे ते संक्रमा नाशं पत इत्यर्थः तैर्यंत्रैस्तासु परिखासु तत्समीपं प्राप्तानि परसैन्यानि समंततो वकीर्यंते क्षिप्यंते ॥१७॥ एको मुख्यः संक्रमः प्राकारमध्यवर्ती साक्षात्पुरप्रवेशसाधनभूतोऽकंप्यः दुर्भेदः तत्र हेतुर्बलवान् ॥ बहुलबलकृतरक्षः दृढो दृढप्रतिष्ठानः तदेव दर्शयति· कांचनैरिति ॥१८॥ एवं पुरस्वरूपमुक्त्वा पुरपतेः स्वरूपमाह· स्वयमिति· युयुत्सुरपि प्रकृतिमापन्नः अक्षुब्धांतःकरणो निधीर इति यावत्· बलानामनुदर्शने उत्थित उद्युक्तः अप्रमत्तः सावधानश्च ॥१९॥

त्रायंते संक्रमास्तत्र परसैन्यागमे सति ॥ यंत्रैस्तैरवकीर्यंते परिखासु समंततः ॥१७॥
एकस्त्वकंप्यो बलवान्संक्रमः सुमहादृढः ॥ कांचनैर्बहुभिस्तंभैर्वेदिकाभिश्च शोभितः ॥
॥१८॥ स्वयं प्रकृतिमापन्नो युयुत्सू राम रावणः ॥ उत्थितश्चाप्रमत्तश्च बलानामनुदर्शने ॥१९॥

परिघवंति· अर्गलवंतिपरिघोयोगभेदेस्यात्मुद्गरेर्गलघातयोरितिविश्वः ईदृशानिद्वाराणिसंतीत्य
न्वयः॥११॥ तत्रतेषुद्वारेषुइषवश्चउपलाश्चतत्क्षेपकयंत्राणि द्वारेरागतंपरसैन्यंतत्रतेषुद्वारेषुघ्नंति
निवार्यंते॥१२॥ उक्तयंत्रैःसंस्कृताःसज्जाः कालायसमयाःअयःसारमयाः शतमेकप्रयोगेणघ्नंतीतिश

दृढबद्धकपाटानिमहापरिघवंतिच॥ चत्वारिविपुलान्यस्याद्वाराणिसुमहांतिच॥११॥ तत्रे
षूपलयंत्राणिबलवंतिमहांतिच॥ आगतंप्रतिसैन्यंतैस्तत्रप्रतिनिवार्यते॥१२॥ द्वारेषुसं
स्कृताभीमाः कालायसमयाःशिताः॥ शतशोरचितावीरैः शतघ्न्योरक्षसांगणैः॥१३॥ सौवर्णः
सुमहांस्तस्याःप्राकारोदुष्प्रधर्षणः॥ मणिविद्रुमवैडूर्यमुक्ताविरचितांतरः॥१४॥ सर्वतश्चम
हाभीमाःशीततोयामहाशुभाः॥ अगाधाग्राहवत्यश्चपरिखामीनसेविताः॥१५॥ द्वारेषुतासांच
त्वारःसंक्रमाःपरमायताः॥ यंत्रैरुपेताबहुभिः महद्भिर्गृहपंक्तिभिः॥१६॥ ॥ ॥

तघ्न्यः चतुर्हस्तप्रमाणाल्लोहकंटकयुतामुद्गरविशेषाःशतघ्न्यः शतघ्नीचचतुर्हस्तालोहकंटकि
नीगदेतिवैजयंती॥१३॥ प्राकारोरत्नखचितइत्याहमणीति॥१४॥ परिखाःपुरोपांतखाताः॥१५॥ द्वारेषु
चतुर्षुतासांपरिखानांमध्येसंक्रमामंचरूपेणबद्धाःपरमायताः अतिविस्तृतमार्गाः गृहपंक्तिभिः
प्राकारशिरोगृहपंक्तिभिः उपेताइत्यनुकर्षः॥१६॥ अ

प्रयुतंदशलक्षं ॥२६॥ कुलपुत्राः किंकराः यद्वा योधसत्कुलप्रसूताः ॥२७॥ मध्यमंस्कंधंपुरमध्यसेनानि
वेशस्थानंसाग्राकोटिः सपादकोटिः ॥२८॥ यद्येवंदुर्गालंकाकथमस्मद्बलसाध्येतिशंकांनिराच
ष्टे· तेमयेति· तेसंक्रमाः परिखामार्गामयाभग्नाः परिखाश्चअवपूरिताः शिलेष्टकादिभिरितिशे

प्रयुतंरक्षसामत्रपश्चिमद्वारमाश्रितं ॥ चर्मखड्गधराः सर्वेतथासर्वास्त्रकोविदाः ॥२६॥
न्यर्बुदंरक्षसामत्रउत्तरद्वारमाश्रितं ॥ रथिनश्चाश्ववाहाश्चकुलपुत्राः सुपूजिताः ॥२७॥ श
तशोथसहस्राणिमध्यमंस्कंधमाश्रिताः ॥ यातुधानादुराधर्षाः साग्रकोटिश्चरक्षसां ॥२८॥
तेमयासंक्रमाभग्नाः परिखाश्चावपूरिताः ॥ दग्धाचनगरीलंकाप्राकाराश्चावसादिताः ॥२९॥
येनकेनतुमार्गेणतरामवरुणालयं ॥ हतेतिनगरीलंकावानरैरुपधार्यतां ॥३०॥ अंग
दोद्विविदोमैंदोजांववान्पनसोनलः ॥ नीलः सेनापतिश्चैवबलशेषेण किंतव ॥३१॥
प्लवमानाहिगत्वातांरावणस्यमहापुरीं ॥ सपर्वतवनांभित्वासखातांचसतोरणां ॥३२॥

षः· चेनबलैकदेशक्षयोपिकृतइत्यर्थः ॥२९॥ येनकेनस्वास्मुक्तेषुअन्यतमेनसमुद्रंतराम·
तत्रैवंसतिवानरैः स्वयमेवलंकाहतेतिउपधार्यतांनिश्चीयतां ॥३०॥ किंचाशेषनरेणापा
यचिंतावृथैवप्रवलैर्वक्ष्यमाणैरेवकार्यसिद्धेरित्याह· अंगदइत्यादि ॥३१॥३२॥

निरालंबा अतिश्लक्ष्णा महोच्चगिरिशिखरप्रतिष्ठितत्वेनारोहणालंबनरहिता देवदुर्गा देवनिर्मितदु
र्गरूपिणी अतएव भयावहा॰ नादेयं दुर्गं तत्पर्वतसंभूतनद्या चतुर्दिक्ष्वावरणात् पार्वतं त्रिकूटरूपं॰
कृत्रिमं प्राकाररूपं चतुः प्राकारवत्त्वेन प्राकाररूपं॰ चतुर्विधं दुर्गमस्तीति शेषः॥२०॥ तत्रान्यदप्याह॰

लंका पुनर्निरालंबा देवदुर्गा भयावहा। नादेयं पार्वतं चान्यं कृत्रिमं च चतुर्विधं॥२०॥ स्थिता
पारे समुद्रस्य दूरपारस्य राघव। नौपथश्चापि नास्त्यत्र निरुद्देशश्च सर्वशः॥२१॥ शैलाग्रे र
चिता दुर्गा सा पूर्देवपुरोपमा। वाजिवारणसंपूर्णा लंका परमदुर्जया॥२२॥ परिखाश्च श
तघ्न्यश्च यंत्राणि विविधानि च। शोभयंति पुरीं लंकां रावणस्य दुरात्मनः॥२३॥ अयुतं रक्ष
सामत्र पूर्वद्वारं समाश्रितं। शूलहस्ता दुराधर्षाः सर्वे खड्गाग्रयोधिनः॥२४॥ नियुतं र
क्षसामत्र दक्षिणद्वारमाश्रितं। चतुरंगेण सैन्येन योधास्तत्राप्यनुत्तमाः॥२५॥ श्र

स्थितेति॰ दुरपारस्य दूरे पारं परतीरं यस्य नौपथः नौमार्गः अत्र समुद्रे॰ सर्वशो निरुद्देशः प्रदेशविभाग
रहितः समुद्र इति शेषः निरादेशाद् इति पाठे निरादेशः सर्वविकृसंचाररहितप्रदेशः॥२१॥२२॥२३॥ शू
लहस्ताः एव न केवलं अपितु खड्गाग्रयोधिनः खड्गैरग्रे युध्यंतेतोदृशाः॥२४॥ नियुतं लक्षं चतुरंगेण
सैन्येनोपलक्षिता योधास्तत्रापि दक्षिणद्वारेपि संति अनुत्तमाः प्रशस्ताः॥२५॥ श्र

तदेवाह· अस्मिन्निति· सुग्रीवप्रयाणमिति षष्ठीतत्पुरुषः तमेवाह· यतो मध्यमन्हो दिवाकरः प्राप्तो विजये विजयप्रदेऽभिजिदाख्ये मुहूर्त्ते युक्तो मे निर्गम इति शेषः। तदुत्तरं· अस्मिन्मुहूर्त्ते विजये प्राप्ते मध्यं दिवाकर इत्यर्धमधिकं कतकस्वरसात्॥३॥ एतन्मुहूर्त्ते प्रस्थितस्य ध्रुवो विजय इत्याह· सीतामिति· न इतः सीतां हृत्वा कामं यातु स्वदेशमिति शेषः अयाप्यसौ जीवितः।

9 अस्मिन्मुहूर्त्ते सुग्रीव प्रयाणमभिरोचय। युक्तो मुहूर्त्ते विजये प्राप्तो मध्यं
दिवाकरः॥३॥ सीतां हृत्वा तु तद्यातु क्वासौ यास्यति जीवितः॥ सीतां श्रुत्वा·
भियानं मे आशामेष्यति जीविते॥४॥ जीवितान्ते मृतं स्पृष्ट्वा पीत्वा मृतमिवातुरः॥

सन्न कर्त्तरि निष्ठा जीवन्भूत्वा क्व यास्यति न क्वापि अविलंबयात्राप्रयोजनमाह· सीतेति·॥ श्रुत्वा सिद्धादिमुखतः जीविताशां प्राप्तौ दृष्टान्तः आतुरो जीवितान्ते जीवितनाशं प्राप्तौ अमृतं अमृतत्वसाधनं दिव्यौषधं स्पृष्ट्वा इव रूपममृतं पीत्वा च यथा जीविताशामेति तद्वत्। जीवितान्ते मृतं स्पृष्ट्वा पीत्वामृतमिवातुर इति पाठः॥४॥ श्र

राम·
६

एतेंगदादयएवलंकांभित्वासीतामानेष्यंतिकिंबलशेषेणतवेत्यन्वयः॥३२॥एवमिति॰एवंप्रधानैरेव
कार्यसाधनमिष्टंचेत्॰क्षिप्रमिदानीमेवानयतेत्याज्ञापय॰यदिबलानांसर्वसंग्रहंबलसंमेलन
मुद्दिश्यबलानामपिपारनयनमिष्टंतदायुक्तेनयात्रोचितेनमुहूर्त्तेनप्रस्थानंस्वयात्रामभिरो

सप्राकारांसभवनांआनयिष्यंतिराघव॥३३॥एवमाज्ञापयक्षिप्रंबलानांसर्वसंग्रहं॥मु
हूर्त्तेनतुयुक्तेनप्रस्थानमभिरोचय॥३४॥इत्यार्षेश्रीरामायणेयुद्धकांडेतृतीयःसर्गः॥३॥
श्रुत्वाहनुमतोवाक्यंयथावदनुपूर्वशःऽ।ततोब्रवीन्महातेजारामःसत्यपराक्रमः॥१॥
यन्निवेदयसेलंकांपुरींभीमस्यरक्षसः॥क्षिप्रमेतांवधिष्यामिसत्यमेतद्ब्रवीमिते॥२॥

चय॥३४॥वर्गमानः॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेतृतीयःसर्गः३
अनुपूर्वशः अनुक्रमेणतत्रांगदादिमुखेनकार्यनिर्वहणमशक्यंमत्वातत्प्ररोचनायतदं
गीकुर्वन्निवस्वमतमाह॥१॥यदिति॰रक्षसएनांपुरींक्षिप्रमेववधिष्यामीतियन्निवेदयसेत॰
त्सत्यमेवतथानेशक्तिरस्त्येवतथापिनेतुभ्यंस्वमतंब्रवीमीत्यर्थः॥२॥ ॥

दूषयेयुर्विषादिने तिशेषः नित्यमुद्यतः सदा सावधानः सन् ॥१०॥ वनदुर्गेषु वनात्मकेषु दुर्गेषु व
नेषु आदुर्गवनेषु च निम्नभूमौ निहितं गुप्तप्रहारार्थं लीनतया स्थापितं ॥११॥ यच्च फल्गु निःसारं ब

दूषयेयुर्दुरात्मानः पथि मूलफलोदकं ॥ राक्षसाः पथि रक्षेथास्तेभ्यस्त्वं नित्यमुद्यतः ॥१०॥
निम्नेषु वनदुर्गेषु वनेषु च वनौकसः ॥ अभिप्लुत्याभिपश्येयुः परेषां निहितं बलं ॥११॥
यत्तु फल्गुबलं किंचित्तदत्रैवोपपद्यतां ॥ एतद्धि कृत्यं घोरं नो विक्रमेण प्रयुज्यतां ॥१२॥
सागरौघनिभं भीममग्रानीकं महाबलाः ॥ कपिसिंहाः प्रकर्षंतु शतशोथ सहस्रशः ॥१३॥
गजश्च गिरिसंकाशो गवयश्च महाबलः ॥ गवाक्षश्चाग्रतो यातु गवां दृप्त इवर्षभः ॥१४॥ या
तु वानरवाहिन्या वानरः प्लवतां पतिः ॥ पालयन्दक्षिणं पार्श्वमृषभो वानरर्षभः ॥१५॥
गंधहस्तीव दुर्धर्षस्तरस्वी गंधमादनः ॥ यातु वानरवाहिन्याः सव्यं पार्श्वमधिष्ठितः ॥१६॥
यास्यामि बलमध्येहं बलौघमभिहर्षयन् ॥ अधिरुह्य हनूमंतमैरावतमिवेश्वरः ॥१७॥

10

लं वालवृद्धादिलक्षणं युद्धानर्हं तत् ॥ अत्रैव किष्किंधायामेवोपपद्यतां तिष्ठतु हि यस्मादे
तन्नः कृत्यं युद्धरूपं घोरमतो विक्रमेण विक्रमोपपन्नबलेन प्रयुज्यतां यात्रेतिशेषः ॥१२॥१३॥ क
पिसिंहानेवाह गजश्चेति ॥१४॥१५॥ यस्य मदगंधादन्ये गजाः पलायंते स गंधहस्ती ॥१६॥ ईश्वर इंद्रः ॥१७॥

मम्नताराबलमस्तीत्याहोत्तरेतिभ्यो त्पतेचं इड्इतिशेषः पुनर्वसुजातस्य हस्तोवधताराउत्तराचसीताया
जन्मताराः बद्धस्यजन्मतारायांतन्मोचनार्थंयात्रायामवश्यंतन्मुक्तिरितिभावः अथअभिमांतमानेन
मार्गशीर्षकृत्स्नास्यस्यांकृत्स्नासस्नस्यांवामार्गशीर्षपौर्णिमात्तरंतदन्यतरस्मिनुत्तरालाभात्ः॥अभि

उत्तराफाल्गुनीत्वद्यश्वस्तुहस्तेनयोक्ष्यते॥ अभिप्रयाममसुग्रीवसर्वानीकसमाव
त्ताः॥५॥ निमित्तानिचपश्यामियानिप्रादुर्भवंतिवै॥ निहत्यरावणंसीतामानयिष्या
मि जानकीं॥६॥ उपरिष्टाद्धिनयनंस्फुरमाणमिमंमम॥ विजयंसमनुप्राप्तंशंसती
वमनोरथं॥७॥ ततोवानरराजेनलक्ष्मणेनसुपूजितः॥ उवाचरामोधर्मात्मापुनरप्य
र्थकोविदः॥८॥ अग्रेयातुबलस्यास्यनीलोमार्गमवेक्षितुं॥ वृतः शतसहस्रेणवान
राणांतरस्विनां॥९॥ फलमूलवतानीलशीतकाननवारिणा॥ तथामधुमताचाशु॥
सेनांसेनापतेनय ॥१०॥

प्रयामेतिप्रश्नेलोट्॥५॥६॥ मनोरथंमनोरथविषयं विजयंसमनुप्राप्तमिवशंसतीत्यन्वयः॥७
८॥शीतानिकाननवारीणियस्मिन्तादृशेनपथासेनापतेनीलसेनांनयेत्यन्वयः॥१०॥

लीलार्थंमहावृत्तानुद्वहंतोमंजरीपुंजधारिणाश्चजग्मुरित्यनुकर्षः॥२६॥निर्वहंतिविनोदार्थमेकमेकेव
दंति·तथाक्षिपंतिच·खमारूढंभूमौपातयंति·पंतंतश्चभवंतिकेचत्लंगकुर्वंतीत्यर्थः अन्येउत्पतंति
आकाशमार्गेगच्छंति॥२७॥नोस्माकं अस्माभिरितियावत्·कृत्यानांकर्त्तरिवेतिषष्ठी॥२८॥पुरस्ता

भक्षयंतःसुगंधीनिमधूनिचफलानिच॥उद्वहंतोमहावृत्तान्मंजरीपुंजधारिणः॥२६॥
अन्योन्यंसहसादृप्तानिर्वहंतिक्षिपंतिच॥पतंतश्चोत्पतंत्यन्येपातयंत्यपरेपरान्॥२७॥
रावणोनोनिहंतव्यःसर्वेचरजनीचराः॥इतिगर्जंतिहरयोराघवस्यसमीपतः॥२८॥पुरस्ता
दृषभोनीलोवीरःकुमुदएवच॥पंथानंशोधयंतिस्मवानरैर्बहुभिःसह॥२९॥मध्येतुराजा
सुग्रीवोरामोलक्ष्मणएवच॥बलिभिर्बहुभिर्भीमैर्वृतःशत्रुनिबर्हणः॥३०॥हरिःशतब
लिर्वीरःकोटिभिर्दशभिर्वृतः॥सर्वामेकोह्यवष्टभ्यररक्षहरिवाहिनीं॥३१॥कोटीशत
परीवारःकेसरीपनसोगजः॥अर्कश्चबहुभिःपार्श्वमेकंतस्याभिरक्षति॥३२॥

दृषभइति·अयमृषभोदक्षिणपार्श्वविनियुक्तादन्योनीलसहकारी॥२९॥३०॥सर्वांवाहिनीम
वष्टभ्यैकोररक्षसमंततोभ्रमन्·रक्षतिस्मेत्यर्थः॥३१॥केसर्यादीनांचतुर्णांद्वौद्वौतस्यवलस्य
दक्षिणवामंचैकैकंपार्श्वमभिरक्षतिइत्यर्थइतिकतकः॥एषगजःपूर्वभागनियुक्तादन्यइतितीर्थः॥३२॥

अंगदेनवाहनभूतेनसार्वभौमः कुवेरदिग्गजः भूतेशः कुबेरः यक्षेशत्वात् ॥१८॥ ऋक्षराजो जांबवानित्य
न्वयः कुक्षिं कुक्ष्युपलक्षितंसेनापुच्छभागं ॥१९॥२०॥ गुहाभ्यः शिखरेभ्यः पूर्वं स्वस्थितिप्रदेशेभ्यः ॥२१

अंगदेनैषसंयातुलक्ष्मणश्चांतकोपमः ॥ सार्वभौमेनभूतेशोद्रविणाधिपतिर्यथा ॥१८॥ जां
बवांश्चसुषेणश्चवेगदर्शी चवानरः ॥ ऋक्षराजोमहाबाहुः कुक्षिंरक्षतुतेन्वयः ॥१९॥ राघव
स्यवचः श्रुत्वासुग्रीवोवाहिनीपतिः ॥ व्यादि[illegible]देशमहावीर्यान्वानरान्वानरर्षभः ॥२०॥ ते
वानरगणाः सर्वे समुत्पत्यमहौजसः ॥ गुहाभ्यः शिखरेभ्यश्चआशुपुप्लुविरेतदा ॥२१॥ त
तोवानरराजेनलक्ष्मणेनचपूजितः ॥ जगामरामोधर्मात्माससैन्योदक्षिणांदिशं ॥२२॥
शतैः शतसहस्रैश्चकोटिभिश्चायुतैरपि ॥ वारणाभैश्चहरिभिर्ययौपरिवृतस्तदा ॥२३॥
तंयांतमनुयांतीसामहतीहरिवाहिनी ॥ हृष्टाः प्रमुदिताः सर्वेसुग्रीवेणाभिपालिताः ॥२४॥
आप्लवंतः प्लवंतश्चगर्जंतश्चप्लवंगमाः ॥ क्ष्वेलंतोनिनदंतश्चजग्मुर्वैदक्षिणांदिशं ॥२५॥

२२॥२३॥ हृष्टप्रमोदयोर्वाह्याभ्यंतरकृतोभेदः ॥२४॥ आप्लवंतः समंतादुत्तरणार्थंप्लवमानाः प्ल
वंतः अग्रेशोधनार्थंगच्छंतः क्ष्वेलातु सिंहनादः स्यादितिनिघंटुः गर्जोमेघादिसदृशः शब्दः नि
नादः सामान्यशब्दः ॥२५॥

महद्भ्यांग्रहाभ्यांराहुकेतुभ्यांसंस्पृष्टौ अर्धभागेस्पृष्टौ चंद्रभास्कराविवमहद्भ्यामर्धसंस्पृष्टावि
तिपाठांतरं ॥४१॥४२॥ पूर्णार्थप्रतिभानवान् पूर्णस्य अर्थस्यकार्यस्यशकुनैः प्रतिभानवान् ज्ञानवा

महद्भ्यामिवसंस्पृष्टौग्रहाभ्यांचंद्रभास्करौ ॥ ततोवानरराजेनलक्ष्मणेनसुपूजितः ॥४१॥
जगामरामोधर्मात्माससैन्योदक्षिणांदिशं ॥ तमंगदगतोरामंलक्ष्मणःशुभयागिरा ॥४२॥
उवाचपरिपूर्णार्थंपूर्णार्थप्रतिभानवान् ॥ हृतामवाप्यवैदेहींक्षिप्रंहत्वाचरावणं ॥४३॥
समृद्धार्थसमृद्धार्थामयोध्यांप्रतियास्यसि ॥ महांतिचनिमित्तानिदिविभूमौचराघव ॥४४॥
शुभानितवपश्यामिसर्वाण्येवार्थसिद्धये ॥ अनुवातिशिवोवायुःसेनांमृदुहितःसुखः ॥४५॥
पूर्णवल्गुस्वराश्चेमेप्रवदंतिमृगाद्विजाः ॥ प्रसन्नाश्चदिशःसर्वाविमलश्चदिवाकरः ॥४६॥

न् करिष्यमाणकार्यस्यपूर्णत्वतत्त्वज्ञानवानित्यर्थः परिपूर्णार्थमितिरामविशेषणं ॥४३॥४४॥४५
सेनामनुवातिसेनापश्चभागेनवातिमत्त्वज्ञानवानित्यर्थः परिपूर्णार्थमितिरामविशेषणं
दुहितसुखप्रदैः क्रमेणमांद्यशैत्यसौरभ्याण्युक्तानि । पूर्णविच्छेदरहितावल्गवः श्रोत्रसुखास्वरायेषांते ॥४६॥

सुषेणजांबवंतौप्रायः सेनामध्येवर्त्तमानंसुग्रीवंपुरः कृत्वाजघनंसेनापुच्छभागंररक्षतुः ॥३३॥ पर्यवा
रयत्नगरादिपीडाराहित्यंयथाभवतितथापरिवार्यानयदित्यर्थः ॥३४॥ सर्वतः वेगातिशयादि

सुषेणो जांबवांश्चैव ऋक्षैर्बहुभिरावृतौ ॥ सुग्रीवंपुरतः कृत्वाजघनंपरिरक्षतुः ॥३३॥ तेषां
सेनापतिर्वीरोनीलोवानरपुंगवः ॥ संयतश्चरतांश्रेष्ठः तद्बलंपर्यवारयत् ॥३४॥ वलीमु
खाः प्रजंघश्च जंभोथरभसः कपिः ॥ सर्वतश्चययुर्वीरास्त्वरयंतः प्लवंगमान् ॥३५॥ एवंते
हरिशार्दूलागच्छंतिबलदर्पिताः ॥ अपश्यंतगिरिश्रेष्ठं सह्यंगिरिशतायुतं ॥३६॥ सरांसि
चसुफुल्लानितटाकानिवराणिच ॥ रामस्यशासनंज्ञात्वाभीमकोपस्यभीतवत् ॥३७॥ वर्जे
यन्नगराभ्याशांस्तथाजनपदानपि ॥ सागरौघनिभंभीमंतद्वानरबलंमहत् ॥३८॥ निः
ससर्पमहाघोरंभीमघोषमिवार्णवं ॥ तस्यदाशरथेः पार्श्वेशूरास्तेकपिकुंजराः ॥३९॥
तूर्णमापुप्लुवुः सर्वेसदश्वाइवचोदिताः ॥ कपिभ्यामुह्यमानौतौ शुशुभातेनरर्षभौ ॥४०॥

तिभावः ॥३५॥ गच्छंतिगच्छंतश्चसह्यमपश्यंत सरआदीनिचापश्यंतअत्रप्रथमदिनवासइति
ज्ञायते ॥३६॥ भीतवत् भीताः संत इत्यर्थः ॥३७॥ वर्जयन् वर्जयित्वागच्छत् ॥३८॥ भीमघोषमर्ण
वमिवअर्द्दचोदिरर्णवः ॥ निः ससर्पसह्यतोनिःसृतं ॥३९॥४०॥ श्र

अथनैर्ऋतनक्षत्रपीडामाह नैर्ऋतंनिर्ऋतिदैवातकं मूलः मूलमितियावत् आर्षंपुंस्त्वं अति
पीड्यते अत्यंतंपीड्यते केनतत्राह मूलवतेतिमूलवतोवैदेहीडाकारतयोत्थितेनधूमकेतुना
स्पृष्टोधूप्यते संजाततापोभवति ।५०। यतः कालेनकालेकालगृहीतानांमृत्युगृहीतानांनक्ष
त्रंग्रहपीडितंशन्यंगारराह्वादिग्रहपीडितंभवतीतिशेषः ॥५१॥ उशनाचेत्याद्येतदंतंस्पष्टं

नैर्ऋतंनैर्ऋतानांचनक्षत्रमतिपीड्यते ॥ मूलोमूलवतास्पृष्टोधूप्यतेधूमकेतुना ॥५०॥
सर्वंचैतद्विनाशायराक्षसानामुपस्थितं ॥ कालेकालगृहीतानांनक्षत्रंग्रहपीडितं ॥५१॥
प्रसन्नाःसुरसाश्चापोवनानिफलवंतिच ॥ प्रवांतिनाधिकागंधायथर्तुकुसुमद्रुमाः ॥५२॥
व्यूढानिकपिसैन्यानिप्रकाशंतेऽधिकंप्रभो ॥ देवानामिवसैन्यानिसंग्रामेतारकामये ॥ एव
मार्यसमीक्ष्यैनत्प्रीतोभवितुमर्हसि ॥५३॥

किंचित्कालंविश्रम्यफलमूलादिभुक्त्वापुनारा
त्रौगमनकालेलक्षणेनप्रदर्श्यते अतएववनस्पतिस्समयातिदिवारात्रमिति सुरसाआपः सर
सीष्वतिशेषः गंधाः अजंतः गंधवंतोवायवोऽधिकानप्रवांतिमंदंवांतीत्यर्थः द्रुमाः स्वस्वर्तुमन
तिक्रम्यजातकुसुमाः ॥ आमयशब्देनदुःखत्वाद्वधोल्लक्ष्यते तारकस्यतारकासुरस्यामयोविना
शोयस्मिन्तादृशेसंग्रामेदेवसेनान्याव्यूढानिदेवानांसैन्यानीवप्रकाशंते ॥५३॥

13

भार्गवोभृगुपुत्रउशनाः शुक्रोपिप्रसन्नार्चिस्त्वामनुगतोस्तिशुक्रमौढ्यं नास्तीत्युक्तं भवतियत्तु पुरःशुक्राभावोध्वनितइतितन्न दक्षिणोत्तरगंतॄणां कदापिपुरःशुक्रप्रसक्तेरभावात् ब्रह्मराशिर्ध्रुवः ब्रह्मणांराशिः॥ पुंजीभावोयस्मिन्सतथातस्मात् विशुद्धोऽभ्रादिमालिन्यरहितः तत्पुंजीभावमेवदर्शयति। शुद्धाअभ्रादिहीनाः शुद्धंध्रुवप्रदक्षिणांकुर्वाणा अर्चिष्मंतः प्रशस्तार्चिषोभू

उशनाचप्रसन्नार्चिरनुत्वांभार्गवोगतः॥ ब्रह्मराशिर्विशुद्धश्चशुद्धाश्चपरमर्षयः॥ अर्चिष्मंतः प्रकाशते ध्रुवंसर्वेप्रदक्षिणं॥४७॥ त्रिशंकुर्विमलोभातिराजर्षिः सपुरोहितः॥ पितामहः पुरोस्माकं इक्ष्वाकूणांमहात्मनां॥४८॥ विमलेचप्रकाशते विशाखेनिरुपद्रवे॥ नक्षत्रंपरमस्माकं इक्ष्वाकूणां महात्मनां॥४९॥ श्री राम

त्वाप्रकाशंते॥४७॥ सपुरोहितः भगवद्विश्वामित्रस्यस्वसमीपवर्त्तिसप्तर्षिमंडलमध्यवर्त्तिवसिष्ठसहितइत्यर्थः॥ ईदृशास्त्रिशंकुरस्माकं पितामहोस्माकंपुरोभातितस्यप्रदक्षिणादिकस्थत्वात् पितामहः पुरोस्माकमितिपांक्षः पा० इतिकतकः॥४८॥ इक्ष्वाकूणांपरंनक्षत्रंकुलनक्षत्रं विमले अंगारकादिदुष्टग्रहाक्रमणरहिते॥४९॥ श्री

समारोपितविक्रमाः एवमेवमयाकर्तव्यमित्यसाध्येप्यर्थे चित्तसंक्रमितविक्रमप्रकाराः ॥६१॥ विविधा
न्प्रकारान्तानेवाह तत्रेति ॥६२॥ वानराणां हर्षादिजनितः शब्दः किलकिला ॥६३॥ प्रास्फोटयन्पु

हरयो राघवस्यार्थे समारोपितविक्रमाः ॥ हर्षवीर्यबलोद्रेकान्दर्शयंतः परस्परं ॥६१॥ यौवनो
त्सेकजाद्दर्पात् विविधांश्चक्रुरध्वनिं ॥ तत्र केचिद्द्रुतं जग्मुरुत्पेतुश्च तथापरे ॥६२॥ केचित्कि
लकिलां चक्रुर्वानरा वनगोचराः ॥ प्रास्फोटयंश्च पुच्छानि संनिजघ्नुः पदान्यपि ॥६३॥ भुजान्वि
क्षिप्य शैलांश्च द्रुमानन्ये बभंजिरे ॥ आरोहंतश्च शृंगाणि गिरीणां गिरिगोचराः ॥६४॥ महानादा
न्प्रमुंचंति क्ष्वेडामन्ये प्रचक्रिरे ॥ ऊरुवेगैश्च ममृदुर्लताजालान्यनेकशः ॥६५॥ जृंभमाणाश्च वि
क्रांता विचिक्रीडुः शिलाद्रुमैः ॥ ततः शतसहस्रैश्च कोटिभिश्च सहस्रशः ॥६६॥ वानराणां सुघो
राणां श्रीमत्परिवृता मही ॥ सा समयातिदिवारात्रं महती हरिवाहिनी ॥६७॥ प्रहृष्टमुदिताः सर्वे
सुग्रीवेणाभिपालिताः ॥ वानरास्त्वरितायांति सर्वे युद्धाभिनंदिनः ॥ प्रमोक्षयिषवः सीतां मुहूर्त्तं
क्वापि नावसन् ॥६८॥

च्छानि भूमावताडयन् ॥६३॥ विक्षिप्य प्रसार्य ॥६४॥ ममृदुः मर्दितवंतः ॥६५॥
॥६६॥ श्रीमत्खलु तृतीयांतं श्रीमद्भिरित्यर्थः अयं तृतीयो वासः दिवारात्रं मध्यरात्रे एव याममात्रं वास इ
त्याशयः ॥६७॥ प्रमोक्षयिषवः मोक्षशब्दात्तत्करोतीणौ सन्यार्षेभ्यासलोपे उप्रत्यये चन्रूपं प्रमोचयितुमि

क्वचन इत्यर्थः नावसन् दिवेति शेषः ॥६८॥

सौमित्रिःस्वयंनिमित्तैराश्वस्यभ्रातुराश्वासायत्तदृष्टः सन्भ्रातरमब्रवीत् आश्वास्येतिपाठः ॥५४॥ कृत्स्ना
दयः कर्तारऽकराग्रादीनिकरणानि ॥५५॥ उद्धतंभीमंरजोलोकमंतर्दधे अंतर्हितमकरोत् दक्षि
णांदिशमितिशेषः ॥५६॥५७॥ सर्वाणिनदीस्रोतांसिविपरीतवत्वैपरीत्येनसस्यंदुः यथाभ्रेषुधा

इतिभ्रातरमाश्वस्यहृष्टः सौमित्रिरब्रवीत् ॥ अथावृत्यमहींकृत्स्नांजगामहरिवाहिनी ॥५४॥
ऋक्षवानरशार्दूलैर्नखदंष्ट्रायुधैरपि ॥ कराग्रैश्चरणाग्रैश्च वानरैरुद्धतंरजः ॥५५॥ भीममंत
र्दधेलोकंनिवार्यसवितुःप्रभां ॥ सपर्वतवनाकाशांदक्षिणांहरिवाहिनी ॥५६॥ छादयंती
ययौभीमाद्यामिवांबुदसंततिः ॥ उत्तरंत्याश्चसेनायाःसततबहुयोजनं ॥५७॥ नदीस्रोतांसि
सर्वाणिसस्पंदुर्विपरीतवत् ॥ सरांसिविमलाभांसिद्रुमाकीर्णांश्चपर्वतान् ॥५८॥ समानभू
मिप्रदेशांश्चवनानिफलवंतिच ॥ मध्येनचसमंताच्चतिर्यक्चाधश्चसाविशत् ॥५९॥ समावृत्य
महींकृत्स्नांजगाममहतीचमूः ॥ तेहृष्टवदनाःसर्वेजग्मुर्मारुतरंहसः ॥६०॥

वत्सुचंद्रोधावतीवतद्वत्सेनागतिर्नदीप्रवाहेषुभ्रांत्याभातिस्मेत्यर्थः इतिकतकः वस्तुतोन
दीषुवानराणांप्रवाहाभिमुखंतरणेनैराहतानिजलानिविपरीतवहनानीत्यर्थः ॥५८॥ सावि
शत् अयंहिनीयोवासइतिप्रतीयते ॥५९॥ पुनर्यात्रामाह समावृत्येति ॥६०॥ ॥

वंजुलोवानीरः॥७८॥कोविदारः॥पीतकुरंटकः॥७९॥८०॥प्रीयमाणैःउक्तपुष्पदर्शनेनेतिशेषः॥८१॥८२॥

चिरिविल्वामधूकाश्चवंजुलावकुलास्तथा॥रंजकास्तिलकाश्चैवनागवृक्षाश्चपुष्पिताः॥७८॥चूताः
पाटलिकाश्चैवकोविदाराश्चपुष्पिताः॥मुचुलिंदार्जुनाश्चैवशिंशपाःकुटजास्तथा॥७९॥हिंता
लास्तिमिशाश्चैवचूर्णकानीपकास्तथा॥नीलाशोकाश्चसरलाःअंकोलाःपद्मकास्तथा॥८०॥प्री
यमाणैःप्लवंगैस्तैःसर्वैःपर्याकुलीकृताः॥वाप्यस्तस्मिन्गिरौरम्याःपल्वलानितथैवच॥८१॥च
क्रवाकानुचरिताःकारंडवनिषेविताः॥प्लवैःक्रौंचैश्चसंकीर्णावराहमगसेविताः॥८२॥ऋ
क्षैस्तरक्षुभिःसिंहैःशार्दूलैश्चभयावहैः॥व्यालैश्चबहुभिर्भीमैःसेव्यमानाःसमंततः॥८३॥पद्मैः
सौगंधिकैःफुल्लैःकुमुदैश्चोत्पलैस्तथा॥वारिजैर्विविधैःपुष्पैःरम्यास्तत्रजलाशयाः॥८४॥त
स्यसानुषुकूजंतिनानाद्विजगणास्तथा॥स्नात्वापीत्वोदकान्यत्रजलेक्रीडंतिवानराः॥८५॥
अन्योन्यंप्लावयंतिस्मशैलमारुह्यवानराः॥फलान्यमृतगंधीनिमूलानिकुसुमानिच॥८६॥
बभंजुर्वानरास्तत्रपादपानांमदोत्कटाः॥द्रोणमात्रप्रमाणानिलंबमानानिवानराः॥८७॥

८३॥तत्रसत्यगिरिप्रांते॥८४॥तस्यसत्यस्यमलयस्यच॥८५॥अमृतगंधीनिअमृतोपमानि·
अयंचतुर्थोवासः॥८६॥८७॥

सह्यपर्वतंतत्पर्वतदक्षिणभागंतमासाद्यतेवानराःसमारुहन्तच्छिखरमितिशेषः॥६९॥सह्यपर्वतमासे
दुर्मलयंचमहीधरमितिपाठांतरंतीर्थसंमतं॥७०॥७१॥७२॥प्रस्तरेषुपाषाणेषुस्थितानितिशेषः॥७३॥ष

ततःपादपसंबाधंनानावनसमायुतं॥सह्यपर्वतमासाद्यवानरास्तेसमारुहन्॥६९॥काननानि
विचित्राणिनदीप्रस्रवणानिच॥पश्यन्नपिययौरामःसह्यस्यमलयस्यच॥७०॥चंपकांस्तिल
कांश्चूतान्प्रसेकान्सिंदुवारकान्॥तिमिशान्करवीरांश्चभजंतिस्मप्लवंगमाः॥७१॥अशोकांश्च
करंजांश्चप्लक्षान्न्यग्रोधपादपान्॥जंबूकामलकान्नागान्भजंतिस्मप्लवंगमाः॥७२॥प्रस्तरे
षुचरम्येषुविविधाःकाननद्रुमाः॥वायुवेगप्रचलिताःपुष्पैरवकिरंतितान्॥७३॥मारुतःसु
खसंस्पर्शीवातिचंदनशीतलः॥षट्पदैरनुकूजद्भिर्वनेषुमधुगंधिषु॥७४॥अधिकंशैलरा
जस्तुधातुभिःसुविभूषितः॥धातुभ्यःप्रसृतोरेणुर्वायुवेगेनघट्टितः॥७५॥सुमहद्वानरानी
कंछादयामाससर्वतः॥गिरिप्रस्थेषुरम्येषुसर्वतःसंप्रपुष्पिताः॥७६॥केतक्यःसिंदुवारा
श्चवासंत्यश्चमनोरमाः॥माधव्योगंधपूर्णाश्चकुंदगुल्माश्चपुष्पिताः॥७७॥

ट्पदैरनुकूजद्भि
रुपलक्षितोमारुतोवाति॥७४॥धातुभ्यःगैरिकादिभ्यः॥७५॥७६॥केपुष्पितास्तत्राहकेतक्यइत्या
दिगंधपूर्णागंधाढ्याःइदंसर्वविशेषणं·कुंदगुल्माःकुंदानांगुल्माः॥७७॥
श्च

अतारः अलभ्यपरतीरः अनुपायेन उपायरूपालंबनहीनेन ।९७। मंत्रो विचारः ।।९८।।९९।।१००।। स्वांस्वां
सेनामुत्सज्य कश्चिदपि कुतोपि हेतोर्मा व्रजेत् यतो नोस्माकं छन्नं रक्षोमायाकृतत्वात् गूढं भयमस्ती

अतःपरमतीरोयंसागरःसरितांपतिः।।नचायमनुपायेनशक्यस्तरितुमर्णवः।।९७।।तदिहै
वनिवेशोस्तुमंत्रःप्रस्तूयतामिह।।यथेदंवानरबलंपरंपारमवाप्नुयात्।।९८।।इतीवसमहा
बाहुःसीताहरणकर्शितः।।रामःसागरमासाद्यवासमाज्ञापयत्तदा।।९९।।सर्वाःसेनानिवेश्यं
तांवेलायांहरिपुंगव।।संप्राप्तोमंत्रकालोनःसागरस्योपलंघने।।१००।।स्वांस्वांसेनांसमुत्सृ
ज्यमाचकश्चित्कुतोव्रजेत्।।गच्छंतुवानराःशूराज्ञेयंछन्नंभयंचनः।।१।।रामस्यवचनंश्रु
त्वासुग्रीवःसहलक्ष्मणः।।सेनांन्यवेशयत्तीरेसागरस्यद्रुमायुते।।विरराजसमीपस्थं
सागरस्यचतद्बलं।।मधुपांडुजलःश्रीमान्द्वितीयइवसागरः।।३।।वेलावनमुपागम्यत
तस्तेहरिपुंगवाः।।निविष्टाश्चपरंपारंकांक्षमाणामहोदधेः।।४।।

तिज्ञेयं स्वावधानतया
स्थेयमिति बोधितं अतो यूयं शूराः सर्वे वानराः सेनारक्षार्थं गच्छंतु सेनायाश्चतुर्दिक्षु गत्वा तत्र
स्थित्वा तां रक्षंत्वित्यर्थः ।।१।।२।। मधुपांडवो मधुपिंगला वानरा एव जलं यस्य सः मधुशब्दस
मभिव्याहारात् । पांडुशब्दः पिंगलवर्णवाची ज्ञेयः ।।३।।४।।

श्री

८८।पीतमधुभिर्हरिभिरावृत्तभुवउपमा यथेति पक्वैः पक्वफलैः कलमकेदारैर्व्रीहिक्षेत्रैर्यथा भाति इवश
ब्दस्तथार्थे तथा तैः पूर्णा वसुधा बभूव॥९०॥९१॥९२॥ तत्रानुक्रमपि वासत्रयमन्पद्यो ध्यंज्ञाग्निवेश्या

ययुः पिबंतः स्वस्थास्ते मधूनि मधुपिंगलाः॥ पादपानवभंजंतो विकर्षंतस्तथा लताः॥८८॥ विधमं
तो गिरिवरान्मत्ता ययुः प्लवगर्षभाः॥ वृक्षेभ्योन्ये तु कपयो नर्दंतो मधुदर्पिताः॥८९॥ अन्ये वृक्षान्प्र
पद्यंते मत्ता पिबंत्यपि चापरे॥ बभूव वसुधा तैस्तु संपूर्णा हरिपुंगवैः॥ यथा कलमकेदारैः पक्वैरि
व वसुंधरा॥९०॥ महेंद्रमथ संप्राप्य रामो राजीवलोचनः॥ आरुरोह महाबाहुः शिखरं द्रुमभू
षितं॥९१॥ ततः शिखरमारुह्य रामो दशरथात्मजः॥ कूर्ममीनसमाकीर्णमपश्यत्सलिलाकु
लं॥९२॥ ते सह्यसमतिक्रम्य मलयं च महागिरिं॥ आसेदुरानुपूर्व्येण समुद्रं भीमनिस्वनं॥९३॥
अवरुह्य जगामाशु वेलावनमनुत्तमं॥ रामो रमयतां श्रेष्ठः ससुग्रीवः सलक्ष्मणः॥९४॥ अ
थ धौतोपलतलां तोयौघैः सहसोत्थितैः॥ वेलामासाद्य विपुलां रामो वचनमब्रवीत्॥९५॥ ए
ते वयमनुप्राप्ताः सुग्रीव वरुणालयं॥ इहेदानीं विचिंता सा या नः पूर्वमुपस्थिता॥९६॥

क्रैः ते सर्वे वानराः आनुपूर्व्येण सेनासंनिवेशक्रमेण॥९३॥ अवरुह्य महेंद्रादित्यर्थः॥९४॥ सहसोत्थितैः त
हरीरूपेणागतैस्तोयौघैर्धौतं क्षालितमुपलतलं यस्यां तां॥९५॥ या पूर्वमुपस्थिता चिंता तानरणविषया से
दानीमपि प्रवर्त्तत इति शेषः॥९६॥

दीप्तभोगैरुज्वलदेहैर्भुजंगैराकीर्णं वरुणालयं पातालमिव ॥११॥ सुदुर्गं शोभनानि लंकादीनि दुर्गाणि
यस्मिन् दुर्गमार्गं दुष्प्रापमार्गं दुष्प्रापपरपारप्राप्त्युपायमित्यर्थः ॥१२॥ जलराशयः ऊर्मिरूपाः
भास्वराः फणामणिनिर्भासमानाः अंबुमहोरगा जलसर्पा यस्मिन् तं अत एवाग्निचूर्णं विस्फु

दीप्तभोगैरिवाकीर्णं भुजंगैर्वरुणालयं । अवगाहं महासत्वैर्नानाशैलसमाकुलं ॥११॥
सुदुर्गं दुर्गमार्गं तमगाधमसुरालयं ॥ मकरैर्नागभोगैश्च विगाढा वातलोलिताः ॥१२॥ उत्पे
तुश्च निपेतुश्च प्रवृद्धा जलराशयः ॥ अग्निचूर्णमिवाविद्धं भास्वरांबुमहोरगं ॥ सुरारि
निलयं घोरं पातालविषयं सदा ॥१३॥ सागरं चांबरप्रख्यमंबरं सागरोपमं ॥ सागरं चांबरं
चेति निर्विशेषमदृश्यत ॥१४॥

लिंगरूपमाविद्धं क्षिप्तमिवात्र दृश्यत इति शेषः सदा पातालविषयं पातालगोचरं सागरं ॥१३॥ अंबर
प्रख्यं वैपुल्यान्नलत्वैः नैरेव चांबरं सागरोपमं उपमेयोपमालंकारः एवं सति यत्फलति तद्वाच्य
वृत्याह निर्विशेषं परस्परातिरिक्तसदृशरहितं ॥१४॥ ॥ श्र ॥

समुद्रशब्दमंतर्धाय सैन्यसंनाहस्य सैन्यसंचारस्य शब्दः शुश्रुवे॥५॥ त्रिधा निविष्टा· ऋक्षगोलांगूलवानररूपत्रियूथभेदेन· ऋक्षगोलांगूलानामपि वानरावांतरजातित्वात्सर्वेषां वानरत्वेनाप्युक्तिर्नासंगता· त्रिधा निविष्टा· त्रिवलायानिविष्टेत्यन्ये॥६॥ पश्यमाना पश्यंती हृष्टाभूदिति शेषः॥७॥ असंबाधं मध्ये गिर्याद्यभ्ययरहितं वक्ष्यमाणसकलविशेषणं वरुणावासं पश्यंतो निषेदुरित्यन्वयः॥८॥ चंडनक्ररूपैर्ग्रा

तेषां निविशमानानां सैन्यसन्नाहनिस्वनः॥ अंतर्धाय महानादमर्णवस्य प्रशुश्रुवे॥५॥
सा वानराणां ध्वजिनी सुग्रीवेणाभिपालिता॥ त्रिधा निविष्टा महती रामस्यार्थपराभवत्॥६॥
सा महार्णवमासाद्य हृष्टा वानरवाहिनी॥ वायुवेगसमाधूतं पश्यमाना महार्णवं॥७॥
दूरपारमसंबाधं रक्षोगणनिषेवितं॥ पश्यंतो वरुणावासं निषेदुर्हरियूथपाः॥८॥
चंडनक्रग्राहघोरं क्षपादौ दिवसक्षये॥ हसंतमिव फेनौघैर्नृत्यंतमिव चोर्मिभिः॥९॥
चंद्रोदये समुद्भूतं प्रतिचंद्रसमाकुलं॥ चंडानिलमहाग्राहैः कीर्णं तिमितिमिंगलैः॥१०॥

हैर्महाघोरं· क्षपादौ दिवसक्षये तेन प्रदोषकाले चंद्रोदये प्रवृद्धफेनौघैर्हसंतमिवस्थितं· उपलक्षणमिदं· ऊर्मिभिर्नृत्यंतमिवस्थितं॥९॥ समुद्भूतं वृद्धं· ऊर्मिस्थप्रतिचंद्रैः समाकुलं व्याप्तं· चंडानिलतुल्यवेगैर्जलचरैर्महाग्राहैः· तिमिः अस्ति मत्स्यस्तिमिर्नाम शतयोजनमायत इति लक्षितः तिमिंगिलस्तन्निगरणशक्तः तैः

स्वारक्षासुकृतमासमंताद्रक्षणं यस्याः सा सुसमाहिता सम्यग्रचिता॥१॥२३॥ अथ समुद्रवेलावनाद्युद्दीपक
दर्शनात्परतीरस्थसीतास्मृत्या शोचति शोकश्चेति· गच्छता कालेन दृष्टांतरवियोगजः शोकोपि
गच्छतीति न सिद्धिर्मम प्रियाविरहजे शोके तु विपरीतमित्याह·॥ममचेति च स्त्वर्थे॥४॥नन्वचि

सा तु नीलेन विधिवत्स्वारक्षा सुसमाहिता॥ सागरस्योत्तरे तीरे साधु सा विनिवेशिता॥१
मैंदश्च द्विविदश्चोभौ तत्र वानरपुंगवौ॥ विचेरतुश्च तां सेनां रक्षार्थं सर्वतो दिशं॥२॥ निवि
ष्टायां तु सेनायां तीरे नदनदीपतेः॥ पार्श्वस्थं लक्ष्मणं दृष्ट्वा रामो वचनमब्रवीत्॥३॥ शो
कश्च किल कालेन गच्छता ह्यपगच्छति॥ मम चापश्यतः कांतामहन्यहनि वर्द्धते॥४॥ न मे
दुःखं प्रिया दूरे न मे दुःखं हृतेति च॥ एतदेवानुशोचामि वयोस्या ह्यतिवर्त्तते॥५॥

रात्प्रत्याहरिष्यामः किं शोकेनेत्यत्र तत्रैव विघ्नचिंतया दुःखमित्याह· न मे इति· प्रियादूरे स्थि
ते ति मे दुःखं नास्ति स्त्रीधर्मे दिवसवत् तथा हृतेत्यपि न दुःखं प्रबल दुःकर्मवशं प्राप्तत्वात्·
अपि तु अस्या वयः प्राणावस्थितिकालो तिवर्त्तते मासमात्रं जीवनमित्युक्तेः तत्रापि वर्द्धं दिव
सात्ययात् यद्वा वयो यौवनमिति प्राकृतवद्वादः॥५॥ ॥ श्री ॥

तयोरेवसमानधर्मांतरमाहः संपक्तमितिः संसक्तं तुल्यमित्यर्थः नभोंभसोस्तुल्यरूपत्वात्तारारत्नसमाकुले मुक्ताओघैर्नक्षत्रओघैश्च समाकुले समुद्रनभसी तादृग्रूपे परस्परसदृशरूपे दृश्यंते॥१५॥ समुत्पातितमेघस्यांबरस्य वीचिमालाकुलस्य सागरस्येत्यन्वयः॥१६॥ सक्ताः निरंतराः॥१७॥ वायुना विषक्तसंबद्धं अत एव रत्नौघदीपकोर्मिमयजलसंनादवंतं अत एव क्रुद्धमुत्पतंतमिव स्थितं॥१८॥ जलाशयः समुद्रः॥१९॥ भ्रांतानां घूर्णितानामूर्मिजालानां सन्नादो यत्र तं अत एव प्रलोलं प्रचलमिव स्थितं॥२०॥ नरपमानः॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके युद्धकांडे चतुर्थः सर्गः॥४॥

संपक्तं नभसाप्यंभः संपक्तं च नभोंभसा॥ तादृग्रूपे स्मदृश्येते तारारत्नसमाकुले॥१५॥ समुत्पतितमेघस्य वीचिमालाकुलस्य च॥ विशेषो न द्वयोरासीत्सागरस्यांबरस्य च॥१६॥ अन्योन्यैराहताः सक्ताः सस्वनुर्भीमनिस्वनाः॥ ऊर्मयः सिंधुराजस्य महाभेर्य इवांबरे॥१७॥ रत्नौघजलसन्नादं विषक्तमिव वायुना॥ उत्पतंतमिव क्रुद्धं यादोगणसमाकुलं॥१८॥ ददृशुस्ते महात्मानो वाताहतजलाशयं॥ अनिलोद्धतमाकाशे प्रवल्गंतमिवोर्मिभिः॥१९॥ ततो विस्मयमापन्ना हरयो ददृशुः स्थिताः॥ भ्रांतोर्मिजलसन्नादं प्रलोलमिव सागरं॥२०॥ इत्यार्षे श्रीरामायणे युद्धकांडे चतुर्थः सर्गः॥४॥

यत्यस्मात् अहं साचवामोरूरेकांधरणीमाश्रितौ एतत्कामयमानस्य बहु। तेनजीवितुंशक्यंकामुक
एकशय्यासनेनयथाजीवतितथाएतेनापिजीवितुंशक्यं।कम्लोकस्थत्वेनलाभसंभवसत्वादि
तिभावः॥१०॥यथासोदकस्यकेदारस्योपस्नेहेनसंबंधेननिरूढकोऽपिकेदारस्तत्स्थंधान्यंजीवतिन

वक्तेतत्कामयानस्यशक्यमेतेनजीवितुं॥यदहंसाचवामोरूरेकांधरणीमाश्रितौ॥१०॥चै[illegible]ा
रस्येककेदारःसोदकस्यनिरूढकः॥उपस्नेहेनजीवामिजीवंतीयच्छृणोमितां॥११॥कदानु
खलुसुश्रोणींशतपत्रायतेक्षणां॥विजित्यशत्रून्द्रक्ष्यामिसीतांस्फीतामिवश्रियं॥१२॥कदानुचा
रुदंतोष्ठंतस्याःपद्ममिवाननं॥समुन्नाम्यप्रपास्यामिरसायनमिवातुरः॥१३॥तौतस्याःसहितौ
पीनौस्तनौतालफलोपमौ॥कदानुखलुसोत्कंपौहसंत्यामांभजिष्यतः॥१४॥सानूनमसिता
पांगीरक्षोमध्यगतासती॥मन्नाथानाथहीनेवत्रातारंनाधिगच्छति॥१५॥कथंजनकराजस्यदु
हितामम चप्रिया॥राक्षसीमध्यगाशेतेस्नुषादशरथस्यच॥१६॥अविक्षोभ्याणिरक्षांसिसा
विधूयोत्पतिष्यति॥विधूयजलदान्नीलाच्छशिलेखाशरत्स्विव॥१७॥

शृण्वतितद्वृत्तस्याः
जीवनवार्त्ताश्रवणेनाहमपिजीवामि॥११॥स्फीतांश्रियमिवसमृद्धांराजलक्ष्मीमिव॥१२॥रसाय
नंपारदादि॥१३॥१४॥१५॥१६॥अविक्षोभ्याणिदुराधर्षाणिरक्षांसिविधूयमद्वारातेषांविधूननंकृत्वो
त्पतिष्यतीतिसंबंधः॥१७॥

19

यतो यस्यां दिशि कांता तद्दिशि वाहि गच्छ तत्र स्थितां तां स्पृष्ट्वा मामपि स्पृश· किमेतावता न वेत्यत्राह· त्वयीति· कांतास्पर्शवति त्वयि मे गात्रसंस्पर्शो निदाघतप्तदृष्टेश्चंद्रे समागमो यथाऽखिलदृष्टितापशामक एवं त्वत्स्पर्शो गात्रीयाखिलतापशामक इत्यर्थः निदर्शनात्रालंकारः ॥६॥ अथ हेत्वंतरेणाशोकः तन्मे इति· ह्रियमाणा सनाप्येति यदब्रवीत्· तदेव अनुमानेन न मे आशये चित्ते स्थितमिति शेषः पीतं

वाहि वात यतो कांता तां स्पृष्ट्वा मामपि स्पृश । त्वयि मे गात्रसंस्पर्शश्चंद्रे दृष्टिसमागमः ॥६॥
तन्मे दहति गात्राणि विषं पीतमिवाशये । हा नाथेति प्रिया सा मां ह्रियमाणा यदब्रवीत् ॥७॥
तद्वियोगेंधनवता तच्चिंताविमलार्चिषा । रात्रिंदिवं शरीरं मे दह्यते मदनाग्निना ॥८॥ अव
गाह्यार्णवं स्वप्स्ये सौमित्रे भवता विना । एवं च प्रज्वलन्कामो न मां सुप्तं जले दहेत् ॥९॥

विषमिव मे गात्राणि दहति ॥७॥ रात्रिंदिवमिति निपातः ॥८॥ सौमित्रे त्वमत्रैव तिष्ठेति शेषः भवता विनाहमेक एवार्णवमवगाह्य स्वप्स्ये एवं सति प्रज्वलन्कामो जले सुप्तं न दहेत्· जलस्याग्निविरोधित्वात्· मनोमूलकामस्य सुप्तो मन उपरमेणोपरमाच्चेति भावः भवता विनेत्युक्तिरेकाकित्वेन निद्राप्राप्त्यै ॥९॥

अथकविनाहनुमत्प्रतिनिवृत्तिंसमुद्रतीरेरामानयनपर्यंतामुपवर्ण्यतन्निवृत्यनंतरकालिकः सभयरावणव्यापार उपवर्ण्यते वाचः क्रमवर्तित्वात्· लंकायामिति· हनूमताशक्रेणेवकृतं घोरं कर्मदृष्ट्वा राक्षसानब्रवीत्॥१॥ ह्रीबीजमाह· धर्षितेति· आक्रांतेत्यर्थः वानरमात्रेणएकेन निरायुधेनचेत्यर्थः॥२॥

लंकायांतुकृतंकर्मघोरंदृष्ट्वाभयावहं॥ राक्षसेंद्रोहनुमताशक्रेणेवमहात्मना॥ अब्र
वीद्राक्षसान्सर्वान्ह्रियाकिंचिदवाङ्मुखः॥१॥ धर्षिताचप्रविष्टाचलंकादुष्प्रसहापुरी
तेनवानरमात्रेणदृष्टासीताचजानकी॥२॥ प्रासादोधर्षितश्चैत्यः प्रवराराक्षसाहताः॥
आविलाचपुरीलंकासर्वाहनुमताकृता॥३॥ किंकरिष्यामिभद्रंवः किंवोयुक्तमनंतरं
उच्यतांनः समर्थंयत्कृतंचसुकृतंभवेत्॥४॥ मंत्रमूलंचविजयंप्रवदंतिमनस्विनः॥
तस्माद्वैरोचयेमंत्रंरामंप्रतिमहाबलाः॥५॥

आविलाक्षुभिता॥३॥ वोभद्रमस्तु किंकरिष्यामि अनंतरंवोयुष्माकं किंयुक्तं योग्यमनुष्ठानं किंरोचतइतिशेषः॥ यत्कर्मानुष्ठितंसन्नः समर्थंभवेत्· यच्चकृतंसुकृतंसम्यगनुष्ठितंश्लाघनीयंभवेत्तदुच्यतां॥४॥ सर्वतः समर्थस्यनवकोविचार इत्यत्रराजनीतिरियमित्याह· मंत्रमूलमिति· मनस्विनःसूराः॥५॥

स्वभावतनुका·प्रकृत्याकृशशरीरादेशकालविपर्ययात्प्राचीनदुष्कर्मवशप्राप्तदुःखसाधनदेशका
लसंबंधात्॥१८॥प्रत्याहरिष्यामिजानकाइतिशेषः मानसंमनऽसिवर्त्तमानंप्रत्याह·रणसंभाव

स्वभावतनुकानूनंशोकेनानशनेनच॥भूयस्तनुतरासीतादेशकालविपर्ययात्॥१८॥
कदानुराक्षसेंद्रस्यनिधायोरसिसायकान्॥शोकंप्रत्याहरिष्यामिशोकमुत्सृज्यमा
नसं॥१९॥कदानुखलुमेसाध्वीसीताऽमरसुतोपमा॥सोत्कंठाकंठमालंव्यमोक्ष्यत्या
नंदजंजलं॥२०॥कदाशोकमिमंघोरंमैथिलीविप्रयोगजं॥सहसाविप्रमोक्ष्यामि
वासःशुक्लेतरंयथा॥२१॥एवंविलपतस्तस्यतत्ररामस्यधीमतः॥दिनक्षयान्मंदव
पुःभास्करोस्तमुपागतः॥२२॥आश्वासितोलक्ष्मणेनरामसंध्यामुपासत॥स्मरन्क
मलपत्राक्षीसीतांशोकाकुलीकृतः॥२३॥इत्यार्षेश्रीरामायणेयुद्धकांडेपंचमःसर्गः॥५॥

नयाप्रागपिशोकोत्सर्गान्निकासाधुत्वं॥१९॥मेकंठमालंव्येत्यन्वयः॥२०॥शुक्लेतरंमलिनं॥२१॥विल
पतोरामस्यविलापंकृत्वेत्यर्थः॥२२॥सीतांस्मरन्हेतौशतृप्रत्ययःतत्स्मरणाद्धेतोःशोकाकुलीकृतो
रामोलक्ष्मणेनाश्वासितः॥२३॥गरमानः।इतिरामाभिरामेश्रीरामीयेरामायणतिलके·युद्धकांडेपंचमः
सर्गः॥५॥

यद्वशात्प्रभुत्रैविध्यमुक्तंतस्यमंत्रस्यापीदानींत्रैविध्यमाहयथेति ॥११॥ तानेवमंत्रप्रकारानाह ऐकमत्यमितिशास्त्रदृष्टेननीतिशास्त्रप्रतिपादितेनचक्षुषानयचक्षुषामंत्रिणोयत्रमंत्रेऐकमत्यमुपागम्यनिरताःप्रतिष्ठितास्तंमंत्रमुत्तममाहुः ॥१२॥ बह्वीर्मतीर्गत्वाबहुविरुद्धमतिविषयतांप्राप्येत्यर्थःपुनर्वैमत्यानंतरंराजभीत्याद्युपाधितोयत्रमंत्रेएकतामैकमत्यंप्राप्तःसमंत्रोमध्यमः ॥१३॥ अ

यथेमेपुरुषानित्यमुत्तमाधममध्यमाः ॥ एवंमंत्रोपिविज्ञेयउत्तमाधममध्यमः ॥११॥ ऐकमत्य
मुपागम्यशास्त्रदृष्टेनचक्षुषा ॥ मंत्रिणोयत्रनिरतास्तमाहुर्मंत्रमुत्तमं ॥१२॥ बह्वीरपिम
तीर्गत्वामंत्रिणामर्थनिर्णयः ॥ पुनर्यत्रैकतांप्राप्तःसमंत्रोमध्यमःस्मृतः ॥१३॥ अन्योन्यमतिमा
स्थाययत्रसंप्रतिभाष्यते ॥ नचैकमत्येश्रेयोस्तिमंत्रःसोधमउच्यते ॥१४॥ तस्मात्सुमंत्रितं।
साधुभवंतोमतिमत्तमाः ॥ कार्यंसंप्रतिपद्यतांएतत्कृत्यंमतंमम ॥१५॥

न्योन्यमतिंभिन्नभिन्नमतिमास्थाययत्रमंत्रेसंसमंतात्प्रतिप्रतिस्पर्द्धयाभाष्यतेकथंचित्कष्टेनैकमत्येपिश्रेयश्चनास्तिसमंत्रोऽधमः ॥१४॥ उपसंहरतितस्मादिति· यत्कार्यंसुमंत्रितंभवतितदेवसाधुभवतिभवंतश्चमंत्रेमत्यासत्तमाःश्रेष्ठाअतोयत्कार्यंसुमंत्रितंसाधुभवतितत्कार्यंसंप्रतिपद्यतांएकमत्येननिश्चित्वंतुयदेवभवद्भिर्निश्चितंतदेवममकृत्यंकर्तुंयोग्यंमतमिष्टं ॥१५॥ ॥

स्वस्पोनमप्रभुत्वप्रत्यायनशेषतयामंत्रत्रैविध्यात्प्रभुत्रैविध्यमाहः त्रिविधाइति॰ पुरुषाः मंत्रापेक्षिणः प्रभुपुरुषाः समवेतानां संकीर्णरूपाणां लक्षणज्ञानं विनाविवेक्तुमशक्यानां गुणदोषौ उत्तमानां गुणः मध्यमानां गुणदोषौ अधमानां दोषश्चेति विवेकः ॥६॥ यस्य मंत्र उच्यमानलक्षणैस्त्रिभिः संयुक्तो भवति

त्रिविधाः पुरुषा लोके उत्तमाधममध्यमाः ॥ तेषां तु समवेतानां गुणदोषौ वदाम्यहं ॥६॥ मंत्रस्त्रिभिर्हि संयुक्तः समर्थैर्मंत्रनिर्णये ॥ मित्रैर्वापि समानार्थैर्बांधवैरपि वाधिकैः ॥७॥ सहितो मंत्रयित्वा यः कर्मारंभान्प्रवर्तयेत् ॥ दैवे च कुरुते यत्नं तमाहुः पुरुषोत्तमं ॥८॥ एकोर्थं विमृशेदेको धर्मे प्रकुरुते मनः ॥ एकः कार्याणि कुरुते तमाहुर्मध्यमं नरं ॥९॥ गुणदोषौ न निश्चित्य त्यक्त्वा दैवव्यपाश्रयं ॥ करिष्यामीति यः कार्यमुपेक्षेत्स नराधमः ॥१०॥

यो वा मित्रादिभिस्त्रिभ्योधिकैरपि सहितो मंत्रयित्वा कर्मारंभान्प्रवर्त्तयेत्॰ दैवे दैवसहाये च यत्नं कुरुते तमुत्तमं पुरुषमाहुः ॥७॥८॥ एकोर्थमिति॰ विचारोस्य गुणः इतरनिरपेक्षता दोषः ॥९॥ गुणदोषौ युक्तायुक्तत्वहिताहितादिकमिश्रैः सह न निश्चित्य दैवव्यपाश्रयं त्यक्त्वा दैवोपेक्षां कृत्वा कार्यं करिष्यामीत्युपक्रम्य तदप्यंते उपेक्षेत॰ निवर्त्तयेत्स नराधमः ॥१०॥ श्र

तत्रादौदुर्मंत्रिणांदुर्मंत्रमाह· इत्युक्ताइति·यतोनीतिबाह्याअतएवाबुद्धयस्तेराक्षसाद्विषत्पक्षस्य
रामसुग्रीवादेर्बलमविज्ञायज्ञात्वापिमोहाद्विगणय्यवाप्रांजलयःसंतोरावणमूचुः तदेवाह·

इत्युक्ताराक्षसेंद्रेणराक्षसास्तेमहाबलाः॥ऊचुःप्रांजलयःसर्वेरावणंराक्षसेश्वरं॥१॥द्विषत्प
क्षमविज्ञायनीतिबाह्यास्त्वबुद्धयः॥राजन्परिघशक्त्यृष्टिशूलपट्टिशकुंतलं॥२॥सुमह
न्नोबलंकस्माद्विषादंभजतेभवान्॥त्वयाभोगवतींगत्वानिर्जिताःपन्नगायुधि॥३॥कैलास
शिखरावासीयक्षैर्बहुभिरावृतः॥सुमहत्कदनंकृत्वावश्यस्तेधनदःकृतः॥४॥समहेश्वरस
ख्येनश्लाघमानस्त्वयाविभो॥निर्जितःसमरेरोषाल्लोकपालोमहाबलः॥५॥विनिपात्यचय
क्षौघान्विक्षोभ्यविनिगृह्यच॥त्वयाकैलासशिखराद्विमानमिदमाहृतं॥६॥मयेनदा
नवेंद्रेणत्वद्भयात्सख्यमिच्छता॥दुहितातवभार्यार्थेदत्ताराक्षसपुंगव॥७॥ ॥ ॥

राजंनितिऋष्टिरसिः॥१॥२॥३॥उच्यमानगुणोधनदस्तेत्वयासुमहत्कदनंयुद्धंकृत्वावश्यःकृतः
४॥नदेवप्रपंच्यतेसइति·सधनदःमहेश्वरसख्येनहेतुनास्वयंश्लाघमानोपिलोकपालोपित्व
यासमरेरोषान्निर्जितः॥५॥नजयमात्रमपितुसर्वस्वापहारोपीत्याह·विनिपात्येति·इदंविमानं
पुष्पकं॥६॥मयदुहितामंदोदरी॥७॥

विचारप्रयोजिकाशङ्काभीतिश्च निश्चितास्माकमित्याह· वानराणामिति· अभ्येतीति वर्त्तमानसामीप्ये
लट्· अचिरादागमिष्यत्येवेत्यर्थः ॥१६॥ ननु कथं दुस्तरे सागरे स्थिते रामागमनशंकेत्यत्राह· तरि
ष्यतीति सुव्यक्तं· सुखं तरिष्यति प्रथमांतपाठे सगरस्य गोत्रापत्यं सागर इति रामविशेषणं तदा
सागरमिति द्वितीयांतमन्यत्पदमध्याहार्यं· को वानरणोपायस्तस्येत्यत्राह· तरसेति बलेन त

वानराणां हि धीराणां सहस्रैः परिवारितः ॥ रामोभ्येति पुरीं लंकामस्माकमुपरोधकः ॥१६॥
तरिष्यति च सुव्यक्तं राघवः सागरं सुखं ॥ तरसा युक्तरूपेण सानुजः सबलानुगः ॥१७॥
समुद्रमुच्छोषयति वीर्येणान्यत्करोति वा ॥ तस्मिन्नेवंविधे कार्ये विरुद्धे वानरैः सह ॥ हितं पु
रे च सैन्ये च सर्वं संमंत्र्यतां मम ॥१८॥ इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे षष्ठमः सर्गः ॥६॥

पो बलदिव्यास्त्राणामन्यतमेनेत्यर्थः बलैर्वानरबलैरनुगैः सुग्रीवादिभिश्च सहितः ॥१७॥ तदेवाह·
समुद्रमिति· अन्यत्सेतुबंधनं· तस्मिनेकस्मिन्वानरे एवंविधे एवंविधव्यापरि सति बहुभिर्वा
नरैः सह रामे विरुद्धे कार्ये विरुद्धं कर्तुमुद्युक्ते सति यन्मम पुरे सैन्ये च हितं तत्सर्वं संमंत्र्यतां ॥
१८॥ जयमानः ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके युद्धकांडे षष्ठः सर्गः ॥६॥

एवंदिव्यंजयमुक्त्वाभौमंजयमाहुः क्षत्रियैरिति· उच्यमानगुणैः क्षत्रियैर्वसुमतीपूर्णासीत् ॥१६॥ तेपिप्र
सह्यत्वयाहताः राघवस्तुरणे तेषांवीर्यादिभिर्नसमोस्तद्धेकार्चितेनेतिभावः ॥१७॥ एवंरावणाक्षे
पस्यतत्सुतैः स्तवेति· तिष्ठवेति· हेमहाराजतवमनुष्योत्लद्यं किंतस्मात्वंतूष्णीमेवतिष्ठतवश्र

क्षत्रियैर्बहुभिर्वीरैः शक्रतुल्यपराक्रमैः ॥ आसीद्वसुमतीपूर्णामहद्भिरिवपादपैः ॥१६॥ ते
षांवीर्यगुणोत्साहैर्नसमोराघवोरणे ॥ प्रसह्यतेत्वयाराजन्हताः समरदुर्जयाः ॥१७॥ तिष्ठ
वाकिंमहाराजश्रमेणतववानरान् ॥ अयमेकोमहाराजइंद्रजित्क्षपयिष्यति ॥१८॥ अने
नचमहाराजमाहेश्वरमनुत्तमं ॥ इष्ट्वायज्ञंवरोलब्धोलोकेपरमदुर्लभः ॥१९॥ शक्तितोम
रमीनंचविनिकीर्णान्त्रशैवलं ॥ गजकच्छपसंबाधमश्वमंडूकसंकुलं ॥२०॥ रुद्रादित्यम
हाग्राहंमरुद्वसुमहोरगं ॥ रथाश्वगजतोयौघंपदातिपुलिनंमहत् ॥२१॥ अनेनहि
समासाद्यदेवानांबलसागरं ॥ गृहीतोदैवतपतिर्लंकांचापिप्रवेशितः ॥२२॥ ॥

मेण किंफलं· वानरानेकएवेंद्रजित्क्षपयिष्यतिमहाराजेतिद्विरुक्तिरादरात् ॥१८॥ कथ
मस्यैवसामर्थ्यंतत्राहुः अनेनचेतिमाहेश्वरंमहेश्वरप्रीतिकरंइष्ट्वाकृत्वा ॥१९॥ देवबलं
सागरत्वेनरूपयतिशक्तीत्यादिविनिकीर्णानिव्याप्तानि ॥२०॥ महत्समहांतं ॥२१॥२२॥

कुंभीनसी॰ रावणस्वसेतिनीर्थः तस्याः सुखावहो भर्त्तेत्यर्थः॥८॥जटी नागविशेषः॥९॥दानवाः कालकेयाः
तत्रैतैः सहवासान्मायाश्चाधिगताः प्राप्ताः॥१०॥चातुर्विधबलं रथगजतुरगपादातरूपं॥११॥मृत्युदंडरू

दानवेंद्रो महावाहो वीर्योत्सिक्तो दुरासदः॥ विगृह्य वशमानीतः कुंभीनस्याः सुखावहः॥८॥ नि
र्जितास्ते महावाहो नागा गत्वा रसातलं॥ वासुकिस्तक्षकः शंखो जटी च वशमाहृताः॥९॥ अक्षया ब
लवंतश्च शूरा लब्धवराः पुनः॥ त्वया संवत्सरं युद्ध्वा समरे दानवा विभो॥१०॥ स्वबलं समुपाश्रित्य
नीता वशमरिंदम॥ मायाश्चाधिगतास्तत्र बहवो वै राक्षसाधिप॥११॥ शूराश्च बलवतश्च वरुण
स्य सुता रणे॥ निर्जितास्ते महाभाग चतुर्विधबलानुगाः॥१२॥ मृत्युदंड महाग्राहं शाल्मली
दुममंडितं॥ कालपाशमहावीचिं यमकिंकरपन्नगं॥१३॥ महाज्वरेण दुर्धर्षं यमलोकम
हार्णवं॥ अवगाह्य त्वया राजन् यमस्य बलसागरं॥१४॥ जयश्च विपुलः प्राप्तो मृत्युश्च प्र
तिषेधितः॥ सुयुद्धे न च ते सर्वे लोकास्तत्र सुतोषिताः॥१५॥ श्र ॥

पो महाग्राहो यस्मिंस्तं बलसागरं॰ शाल्मलीदुमैर्यातनावृक्षैर्मंडितं॰ सागरोपि द्वीपेषु वृक्षमं
डितो भवति कालपाशा एव महत्यो वीचयो यस्य तं॥१३॥१४॥ प्रतिषेधितः पराङ्मुखकृतः
ते त्वया सर्वे लोकाः सर्वे राक्षसाः सुतोषिताः प्रीणिताः॥१५॥ श्र

नन्विदानीमेववानरेणैकेनैवधर्षणेकृतेकथंधर्षयितुंशक्याइतिवचोतआह· सर्वेइति· प्रमत्ताः भोगादिपरवशाः विश्वस्ताः शत्रुधर्षणासंभवबुध्या निःशंकतयास्थिताः अतएवहनूमतावंचितास्म· आर्षोविसर्गलोपइतिकतकः प्रामादिकः परिभवोनन्यनतायैइतिभावः

सर्वेप्रमत्ताविश्वस्तावंचितास्महनूमता॥नहिमेजीवतोगच्छेज्जीवन्सवनगोचरः॥
॥३॥सर्वांसागरपर्यंतांसशैलवनकाननां॥करोम्यवानरांभूमिमाज्ञापयितुमांभवान्॥४॥
रक्षांचैवविधास्यामिवानराद्रजनीचर॥नागमिष्यतितेदुःखंकिंचिदात्मापराधजं॥५॥
अब्रवीत्तंसुसंक्रुद्धोदुर्मुखोनामराक्षसः॥इदंनक्षमणीयंहिसर्वेषांनःप्रधर्षणं॥६॥

मेजीवतइति· आर्षीषष्ठी· प्रमादाद्यभावविशिष्टेजीवनवतिमयिप्रहस्तेसतिसजीवन्नगच्छेदित्यर्थः॥३॥करोमिकरिष्यामि॥४॥आत्मापराधजंसीतापहरणापराधजं॥५॥नक्षमणीयंक्षमितुंनयुक्तंप्रतिक्रियैवकर्त्तव्येतिभावः॥इदंपदार्थमाहसर्वेषामिति॥६॥ ॥

पितामहस्यचतुर्मुखरुद्रस्ययदिज्यातोलब्धवरस्तन्नियोगात् तदाज्ञया· सर्वस्यजगतः प्रजापतिः पि
ताभगवांश्चतुर्मुखरुद्रः पितामहः भगवान्हिरण्यगर्भः प्रपितामहः एतएवादित्यरुद्रवसुप्रधाना:
सर्वश्राद्धदेवताः सर्वयज्ञदेवताः ससुरासुरसर्वप्रजोपास्यस्यसर्वस्वभूताश्चेतिकतकः शब

पितामहनियोगाच्चमुक्तः शंवरवन्नद्रा॥ गतस्त्रिविष्टपंराजन्सर्वदेवनमस्कृतः॥२३॥त
मेवत्वंमहाराजविसर्जेद्रजितसुतं॥ यावद्वानरसेनांतांसरामांनयतिक्षयं॥२४॥राज
न्नापदयुक्तेयमागतानाम्राकृताज्जनात्॥ त्दृदिनैवत्वयाकार्यात्ववधिष्यसिराघवं॥२५॥इ
त्यार्षेश्रीरामायणेयुद्धकांडेसप्तमःसर्गः॥७॥ ततोनीलांवुदप्रख्यःप्रहस्तोनामराक्षसः
अब्रवीत्प्रांजलिर्वाक्यंशूरःसेनापतिस्तदा॥१॥ देवदानवगंधर्वाः पिशाचपतगोरगाः सर्वे
धर्षयितुंशक्ताः किंपुनर्मानवौरणे॥२॥

रंवत्रहंतिसः॥२३॥ क्षयंयावन्नयतिनेष्यतीत्यर्थः॥२४॥ प्राकृतान्नरवानररूपाज्जनान् आगता
संभावितागमनाइयमापद्ही पत्तिश्चिंतातेप्रयुक्ताकर्तुमयोग्या· सर्वथैषाचिंतात्वयात्दृदिनैव
कार्यायतस्त्वंराघवंवधिष्यसेव॥२५॥ मरवमानः॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणति
लकेयुद्धकांडेसप्तमःसर्गः॥७॥ ततइति॥१॥२॥

रामा·यु·
२५

ततः किं तत्राहेति· कामरूपेति पुंस्त्वमार्षं ॥१३॥ ततोपि किं तत्राह· काकुत्स्थमिति विवृत्तं स्पष्टं· वपुःधत्ते
तिशेषः ॥१४॥ भरतप्रेषितत्व वचनेनापि किं तत्राह सहीतिसेनां वानरसेनां समुत्थाप्यत्पत्कास्वीय
बुध्या क्षिप्रमेवोपयास्यत्यस्मानिति शेषः ॥१५॥ ततः किमिति प्रश्ने मध्येमार्गं प्रहारामेतिवकधरण

कामरूपधराः शूराः सुभीमाभीमदर्शनाः । राक्षसानां सहस्राणि राक्षसाधिपनिश्चिताः ॥१३॥
काकुत्स्थमुपसंगम्य विवृत्तं मानुषं वपुः । सर्वैत्यसंभ्रमाभूत्वाब्रुवंतुरघुसत्तमं ॥१४॥ प्रेषिता
भरतेनैव भ्रात्रा तव यवीयसा । सहि सेनां समुत्थाप्य क्षिप्रमेवोपयास्यति ॥१५॥ ततो वयमित
स्तूर्णं मुसलशक्तिगदाधराः । चापबाणासिहस्ताश्च त्वरितास्तत्र यामहे ॥१६॥ आकाशेगणशः
स्थित्वा हत्वा तां हरिवाहिनीं । अश्मशस्त्रमहावर्षा प्रापयाम यमक्षयं ॥१७॥ एवं चेदुपसर्पे
तामभयं रामलक्ष्मणौ । अवश्यमपनीतेन जहतामेव जीवितं ॥१८॥ कौंभकर्णिस्ततो वीरो निकुं
भो नाम वीर्यवान् । अब्रवीत्परमक्रुद्धो रावणं लोकरावणं ॥१९॥

मंत्रमाह· ततइति· यामेति लोडुत्तमः
१६॥१७॥ उक्तमंत्रात्कार्यसिद्धिमाह· एवंचेदिति· एवमस्मदुक्तमुपकृत्ययद्येषोनुजानातितदासर्वे
घ्नाऽस्मदीयमनयं केनवसुपसर्पेतां प्राप्नुयातां ततश्चापनीतेन केनवकृतप्रहारेणावश्यमेवजी
वितं जहतां जहेतामितियावत् ॥१८॥ कौंभकर्णिः कुंभकर्णापत्यं ॥१९॥ श्री

राम·
२५

25

भूयःपुनःपुरस्यांतःपुरस्यचायंपरिभवोदाहरूपोनक्षमणीयइत्यनुषंगः वानरेंद्रप्रधर्षणंतज्जंराक्षसें
द्रस्यदुःखं अहमेकएवगत्वाभीत्यासागरादीनपिप्रविश्यवानरान्हत्वानिवर्त्तयिष्यामिप्रधर्ष
णदुःखंनिवर्त्तयिष्यामि॥७॥८॥मांसशोणिताभ्यांस्वसंबद्धाभ्यांदूषितंभयजनकं॥९॥कृपणेनदी

अयंपरिभवोभूयःपुरस्यांतःपुरस्यच॥श्रीमतोराक्षसेंद्रस्यवानरेंद्रप्रधर्षणं॥७॥अस्मि
न्मुहूर्त्तेगत्वैकोनिवर्त्तिष्यामिवानरान्॥प्रविष्टान्सागरंभीममंबरंवारसातलं॥८॥ततोब्रवी
त्सुसंक्रुद्धोवज्रदंष्ट्रोमहबलः॥प्रगृह्यपरिघंघोरंमांसशोणितदूषितं॥९॥किन्वोहनुमता
कार्यंकृपणेनतपस्विना॥रामेतिष्ठतिदुर्द्धर्षेसुग्रीवेपिसलक्ष्मणे॥१०॥अद्यरामंससुग्रीवं
परिघेणसलक्ष्मणं॥आगमिष्यामिहत्वैकोविक्षोभ्यहरिवाहिनीं॥११॥इदंममापरंवाक्यंशृ
णुराजन्यदिच्छसि॥उपायकुशलोह्येवजयेच्छत्रूनतंद्रितः॥१२॥ ॥ ॥

नेन·प्रकाशसंचारेभयाद्रात्रौकृतकार्येणवा·तपस्विनाशोच्येनहनूमताकिं॥अलक्ष्यस्यतस्य
हननेननप्रयोजनमितिभावः कृपणादिशब्दानांपारुष्यमात्रेतात्पर्यं·नत्वर्थे॥मान्तगाम्या
द्विगाल्लिदानवत्·॥तर्हिकोहंतव्यस्तत्राहरामेतिष्ठति॥अहतेतिष्ठतिसतिकिमनेनह
तेनेत्यर्थः॥१०॥यदेवमतोद्यराममिति॥११॥इदंपदार्थमाह·॥उपायेति॥१२॥ ॥

समुत्पत्योत्थाय ॥५॥ किमब्रवीत्तदाह अद्येति ॥६॥ विभीषणस्तान्सर्वान्वारयित्वा पुनः प्रत्युपवेश्य स्थापयित्वा रावणं प्रति प्रांजलिर्भूत्वा वाक्यमब्रवीत् ॥७॥ त्रिभिरुपायैः सामदानभेदरूपैः तस्यार्थस्य प्राप्त्यर्थमिति शेषः तान् नीतिशास्त्रकान् विक्रमकालान् आहुः मनीषिणः नीतिशास्त्रज्ञाः ॥८॥ तानेव कालान्

प्रगृह्य परमक्रुद्धाः समुत्पत्य च राक्षसाः ॥ अब्रुवन्रावणं सर्वे प्रदीप्ता इव तेजसा ॥५॥
अद्य रामं वधिष्यामः सुग्रीवं च सलक्ष्मणं ॥ कृपणं च हनूमंतं लंका येन प्रधर्षिता ॥६॥ तान्गृहीतायुधान्सर्वान्वारयित्वा विभीषणः ॥ अब्रवीत्प्रांजलिर्वाक्यं पुनः प्रत्युपवेश्य तान् ॥७॥
अप्युपायैस्त्रिभिस्तात योऽर्थः प्राप्तुं न शक्यते ॥ तस्य विक्रमकालांस्तान्युक्तानाहुर्मनीषिणः ॥८॥
प्रमत्तेष्वभियुक्तेषु दैवेन प्रहृतेषु च ॥ विक्रमास्तात सिध्यंति परीक्ष्य विधिना कृताः ॥९॥
अप्रमत्तं कथं तं तु विजिगीषुं बले स्थितं ॥ जितरोषं दुराधर्षं तं धर्षयितुमिच्छथ ॥१०॥

२४

नाहुः प्रमत्तेषु असावधानेषु अभियुक्तेषु शत्र्वंतराक्रांतेषु दैवेन प्रहृतेषु महारोगादिनेति शेषः परीक्ष्य उक्तविक्रमप्रवृत्तिनिमित्तसत्तां परीक्ष्येत्यर्थः ॥९॥ प्रकृते विक्रमानर्ह एव काल इत्याह ॥ अप्रमत्तमिति विजिगीषुं अनेन शत्र्वंतरराहित्यं· बले दैवबले स्थितं जितरोषमित्यनेन मौर्ख्यराहित्यं· दुराधर्षत्वेन दिव्यास्त्रसंपदुक्ता ॥१०॥ राम अ

२०॥अत्रवानरान् अस्यांसेनायांस्थितान्वानरानित्यर्थः॥२१॥सृक्कां ओष्ठोपांतं॥२२॥२३॥वारुणीं मधुम
द्यंएतेनक्षौद्रव्यावृत्तिः॥२४॥वरमानः॥७ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकां

सर्वेभवंतस्तिष्ठंतुमहाराजेनसंगताः॥अहमेकोहनिष्यामिराघवंसहलक्ष्मणं॥२०॥सुग्रीवं
सहनूमंतंसर्वांश्चैवात्रवानरान्॥ततोवज्रहनुर्नामराक्षसःपर्वतोपमः॥२१॥क्रुद्धःपरिलि
हन्सृक्कांजिह्वयावाक्यमब्रवीत्॥स्वैरंकुर्वंतुकार्याणिभवंतोविगतज्वराः॥२२॥एकोहंभक्ष
यिष्यामितांसर्वांहरिवाहिनीं॥स्वस्थाःक्रीडंतुनिश्चिंताःपिबंतुमधुवारुणीं॥२३॥अहमेको
वधिष्यामिसुग्रीवंसहलक्ष्मणं॥सांगदंचहनूमंतंसर्वांश्चैवात्रवानरान्॥२४॥इत्यार्षेश्री
रामायणेयुद्धकांडेअष्टमःसर्गः॥८॥ ततोनिकुंभोरभसःसूर्यशत्रुर्महाबलः॥सुप्तघ्नो
यज्ञकोपश्चमहापार्श्वमहोदरौ॥१॥अग्निकेतुश्चदुर्धर्षोरश्मिकेतुश्चराक्षसः॥इंद्रशत्रु
श्चबलवान्ततोवैरावणात्मजः॥२॥प्रहस्तोथविरूपाक्षोवज्रदंष्ट्रोमहाबलः॥धूम्राक्षो
थनिकुंभश्चदुर्मुखश्चैवराक्षसः॥३॥परिघान्पट्टिशान्शूलान्प्रासान्शक्तिपरश्वधान्॥
चापानिचसुबाणानिखड्गांश्चविपुलांबुभान्॥४॥

डेअष्टमःसर्गः॥८॥कतकरीत्यात्रसर्गविच्छे
दः॥ततइति कौंभकर्णिरेवायंनिकुंभपरैःसहितःपुनराह॥१॥२॥३॥सुबाणानीतिबहुव्रीहिः विपु

लांबुभान् निर्मलजलकांतीन्॥४॥

एतन्निमित्तंखरादिवधनिमित्तंआहृतावैदेहीयदितदाएतन्निमित्तमेववैदेत्याहरणनिमित्तमेवनः
सुमहद्भयंभवेत्भावि।एतन्निमित्तमित्यत्रतत्वंअतोभयहेतुः॥सापरित्याज्या·कलहार्थेकलहफ

एतन्निमित्तंवैदेहीभयंनःसुमहद्भवेत्॥आहृतासापरित्याज्याकलहार्थेकृतेनुकिं
॥१५॥नतुत्तमंवीर्यवतातेनधर्मानुवर्त्तिना॥वैरंनिरर्थकंकर्तुंदीयतामस्यमैथिली॥१६॥
यावन्नसगजांसाश्वांबहुरत्नसमाकुलां॥पुरींदारयतेबाणैर्दीयतामस्यमैथिली॥१७॥या
वत्सुघोरामहतीदुर्धर्षाहरिवाहिनी॥नावस्कंदतिनोलंकांतावत्सीताप्रदीयतां॥१८॥वि
नश्येद्धिपुरीलंकाश्शूराःसर्वेचराक्षसाः॥रामस्यदीयतांपत्नीनस्वयंयदिदीयते॥१९॥प्र
सादयेत्वांबधुत्वात्कुरुष्ववचनंमम॥हितंतथ्यंत्वहंब्रूमिदीयतामस्यमैथिली॥२०॥
पुराशरान्सूर्यमरीचिसन्निभान्नवाग्रपुंखान्सुदृढान्नृपात्मजः॥सृजत्यमोघान्विशिखा
न्वधायतेप्रदीयतांदाशरथायमैथिली॥२१॥

लकेकस्मिंश्चित्कर्मणिकृतेकिंनुफलमि
तिशेषः अनर्थएवेत्यर्थः॥१५॥१६॥१७॥१८॥१९॥बंधुत्वात्भ्रातृत्वात्॥२०॥नवाग्रपुंखान्न
वानुज्वलानिअग्राणिफलभागाः पुंखभागाश्चयेषांपुरासृजति·स्रक्ष्यतीतिततःपुराप्राक्मै
थिलीदीयतां॥२१॥

कोविद्यात्मनसापिकः प्राप्नुयात्तर्कयेत· हनूमतिएवंचेष्टांसंभावयेत्॥११॥एवमेवहनूमदादेर्व
लान्यपरिमेयानिवीर्याणिपराक्रमाश्चसर्वंलोकातिगाइतिजानथेतिशेषः अतोहेनिशाचराःप
रेषांसहसाह्यवज्ञानकार्या·॥१२॥किंचास्मास्वेवान्यायोनरामेइत्याह· किंचेति· यशस्विनोयस्य

समुद्रंलंघयित्वातुघोरंनदनदीपतिं॥गतिंहनूमतोलोकेकोविद्यात्तर्कयेतवा॥११॥बला
न्यपरिमेयानिवीर्याणिचनिशाचराः॥परेषांसहसावज्ञानकर्त्तव्याकथंचन॥१२॥
किंचराक्षसराजस्यरामेणापकृतंपुरा॥जहारचजनस्थानाद्यस्यभार्यांयशस्विनः॥१३॥
खरोयद्यतिवृत्तस्तुसरामेणहतोरणे॥अवश्यंप्राणिनाप्राणारक्षितव्यायथाबलं॥१४॥

भार्यांजनस्थानाद्याजहारतेनरामेणराक्षसराजस्यपुरापूर्वंकिमपकृतंकोपकारःकृतः नकोपि
॥१३॥ननुखरादिहननरूपोऽपकारःकृतइतिचेत्तत्राह· खरइति· खरोरामेणनिहतइतियदिउच्य
तेतदाश्रृणु· अतिवृत्तस्तुसइति स्वस्थानमतिक्रम्यातद्देशंगत्वातत्पीडायैप्रवृत्तइतितेनसह
तःतादृशस्यहननंचन्याय्यमेवेत्याह·॥अवश्यमिति॥१४॥ श्र

प्रजल्पितमहापथं आदिकर्मणि क्तः प्रातःकालत्वात्प्रारब्धजल्पमहामार्गं निर्यूहो द्वारं निर्यूहः शि
खरे द्वारे इति विश्वः ॥५॥६ तेजोभिर्विस्तृतारश्मयो येषां संति तादृशामणिमानित्यर्थः ॥७॥८॥ सु
मनोत्तमैः पुष्पाद्यैः पूजितान् दधिपात्रैः सर्पिभिश्च युक्तहस्तानिति शेषः मंत्रान्वेदं ब्राह्मणं

प्रमदाजनसंबाधं प्रजल्पितमहापथं ॥ तप्तकांचननिर्यूहं भूषणोत्तमभूषितं ॥५॥ गंध
र्वाणामिवावासमालयं मरुतामिव ॥ रत्नसंचयसंबाधं भवनं भोगिनामिव ॥६॥ तं महा
भ्रमिवादित्यस्तेजोविस्तृतरश्मिवान् ॥ अग्रजस्यालयं वीरः प्रविवेश महाद्युतिः ॥७॥ पुण्या
सुण्याहघोषांश्च वेदविद्भिरुदाहृतान् ॥ शुश्राव सुमहातेजा भ्रातुर्विजयसंश्रितान् ॥८॥
पूजितान्दधिपात्रैश्च सर्पिभिः सुमनोत्तमैः ॥ मंत्रवेदविदो विप्रान्ददर्श स महाबलः ॥९॥
स पूज्यमानो रक्षोभिर्दीप्यमानं स्वतेजसा ॥ आसनस्थं महाबाहुर्ववंदे धनदानुजं ॥१०॥ स
राजर्द्धिसंपन्नमासनं हेमभूषितं ॥ जगाम समुदाचारं प्रयुज्याचारकोविदः ॥११॥ स रा
वणं महात्मानं विजने मंत्रिसन्निधौ ॥ उवाच हितमत्यर्थं वचनं हेतुनिश्चितं ॥१२॥

विदंति तान् ॥९॥१०॥ राजर्द्धिसंपन्नं पुरःप्रदेशवर्त्ति राजर्द्ध्यसाबोधितपरिग्रहं च आसनं जगाम
प्राप तत्रोपविवेशेति यावत् समुदाचारं विजयी भवेत्यादि विजयप्रयोगादि विनयप्रकाशकमा
चारं प्रयुज्य कृत्वा ॥११॥ विजने मंत्रिव्यतिरिक्तजनरहिते हेतुनिश्चितं तैर्युक्तिभिर्निश्चितार्थं ॥१२

98

२२॥तान्सर्वान्प्रहस्तादिदुर्मंत्रिणो विभीषणंच॥२३॥अगरुमानः॥अत्राष्टमसर्गसमाप्तिः कतकरीत्या इ
तिश्रीरामाभिरामेश्रीरा॰ युद्ध॰ नवमः सर्गः॥९॥प्रत्युषसि प्रातःकालेप्राप्तेधर्मार्थयोर्निश्चयोयेनस
विभीषणोराक्षसाधिपते रावणस्यवेश्मवासभूतंवक्ष्यमाणविशेषणं अग्रजस्यालयंप्रविवेशेति

त्यजाशुकोपंसुखधर्मनाशनंभजस्वधर्मंरतिकीर्त्तिवर्द्धनं॥प्रसादजीवेमसपुत्रबांध
वाःप्रदीयतांदाशरथायमैथिली॥२२॥विभीषणवचःश्रुत्वारावणोराक्षसेश्वरः॥विस
र्जयित्वातान्सर्वान्प्रविवेशस्वकंगृहं॥२३॥इत्यार्षेश्रीरा॰ युद्ध॰ नवमःसर्गः॥९॥ततःप्र
त्युषसिप्राप्तेप्राप्तधर्मार्थनिश्चयः॥राक्षसाधिपतेर्वेश्मभीमकर्माविभीषणः॥१॥शैलाग्रच
यसंकाशंशैलशृंगमिवोन्नतं॥सुविभक्तमहाकक्षंमहाजनपरिग्रहं॥२॥मतिमद्भिर्महा
मात्रैरनुरक्तैरधिष्ठितं॥राक्षसैराप्तपर्याप्तैःसर्वतःपरिरक्षितं॥३॥मत्तमातंगनिश्वासैर्व्या
कुलीकृतमारुतं॥शंखघोषमहाघोषंतूर्यसंबाधनादितं॥४॥

सप्तमश्लोकस्थेनान्वयःभी
मकर्मारावणस्यसमीपेसीतादेयेतिदुष्करवचनवक्ता॥१॥शैलाग्राणांशैलशृंगाणांचयःसमूहस्त
त्संकाशंबहुप्रासादवत्वादेवंवादः॥२॥अनुष्ठितमितिपाठेप्यधिष्ठितमित्येवार्थः आप्तैर्हितैःपर्या
प्तैःकार्यनिर्वहणसमर्थैः॥३॥व्याकुलीकृतमारुतंनिश्वासीकरणेनवात्यारूपमापादितोवात्यमारु

भिन्नरोमाः ऊर्ध्वरोमाणः अस्रं तत्वमार्षं स्रवंति च॰ अश्रूणी निशेषः विधानैश्चिकित्साकर्मभिश्चिति
ताः पर्यालोच्यमाना अपि स्वभावे प्रकृतौ नावतिष्यंतिनावतिष्यंते ॥१८॥१९॥ पुरीमुपरि पुर्या उपरि
द्वे संध्ये द्वयोः संध्ययोः उपपन्नाः समीपं प्राप्ताः ॥२०॥ क्रव्यादा मृगा वृकादयः च स्त्वर्थे॰ स विस्फुर्जि

खरोष्ट्राश्वतरा राजन् भिन्नरोमाः स्रवंति च॥ न स्वभावेऽवतिष्ठंति विधानैरपि चिंतिताः॥१५॥
वायसाः संघशः क्रूरा व्याहरंति समंततः॥ समवेताश्च दृश्यंते विमानाग्रेषु संघशः॥१९॥ गृध्रा
श्च परिलीयंते पुरीमुपरि पीडिताः॥ उपपन्नाश्च संध्ये द्वे व्याहरंत्यशिवं शिवाः॥२०॥ क्रव्यादा
नां मृगाणां च पुरीद्वारेषु संघशः॥ श्रूयंते विपुला घोषाः स विस्फूर्जितनिस्वनाः॥२१॥
तदेवं प्रस्तुते कार्ये प्रायश्चित्तमिदं क्षमं॥ रोचये वीर वैदेही राघवाय प्रदीयतां॥२२॥
इदं च यदि वा मोहाल्लोभाद्वा व्याहृतं मया॥ नत्रापि च महाराजन दोषं कर्त्तुमर्हसि॥२३॥

तनिस्वनाः विस्फूर्जितसदृशनिस्वनाः॥२१॥ प्रस्तुते कार्ये अवश्यकर्त्तव्यदुर्निमित्तशांतविधौ॰।
प्रायश्चित्तं दुर्निमित्तसूचितपापशोधनं॥२२॥ रावणस्यातिक्रूरत्वादस्मत्तो हितस्यापि तेना
निष्टवत्ग्रहणासंभवात्॰ कोपंनमापयति इदं चेति॰ मोहः कार्यतत्त्वापरिज्ञानं॰ लोभाज्जी
वनलोभात् न दोषं मयि दुष्टत्वबुद्धिं॥२३॥ ॥ श्र ॥

सांत्वेनभ्रातरंप्रसाद्यउपस्थितक्रमःअनुष्ठितवंदनादिक्रियाक्रमःदृष्टंलोकपरावरं·भावप्राधा
न्याच्चैकुस्साश्रैस्संयेनसः·देशकालार्थसंवादीतिदेशकालौचिनत्तनदर्थानुसारीत्यर्थकंवचन
विशेषणं॥१३॥नदेववचनमाहययेति॥१४॥तानिनिमित्तान्याहसस्फुलिंगइतिअग्निर्मथनादि
नोत्पत्तिकालेसधूमकलुषोदयः॥धूमकलुषोयउदयस्तत्सहितःउत्पत्त्यनंतरंप्रणायनका

प्रसाद्यभ्रातरंज्येष्ठंसांत्वेनोपस्थितक्रमः॥देशकालार्थसंवादिदृष्टलोकपरावरः॥१३॥
यदाप्रभृतिवैदेहीसंप्राप्तेहपरंतप॥तदाप्रभृतिदृश्यंतेनिमित्तान्यशुभानिनः॥१४॥सस्फु
लिंगःसधूमार्चिःसधूमकलुषोदयः॥मंत्रसंघहुतोप्यग्निर्नसम्यगभिवर्द्धते॥१५॥अग्नि
ष्ठेष्वग्निशालासुतथाब्रह्मस्थलीषुच॥सरीसृपाणिदृश्यंतेहव्येषुचपिपीलिकाः॥१६॥
गवांपयांसिस्कन्नानिविमदावरकुंजराः॥दीनमश्वाःप्रहेषंतेनवग्रासाभिनंदिनः॥१७॥

त्तेसस्फुलिंगःसाधूमार्चिः॥१५॥अग्निष्ठेषुमहानसादिषुअग्निशालासुअग्निहोत्रगृहेषुब्रह्म
स्थलीषुवेदाध्ययनस्थानेषुसरीसृपानिसर्पाःलिंगव्यत्ययआर्षः॥१६॥स्कन्नानिशुष्काणि·
स्कंदिर्गतिशोषणयोःनवग्रासाभिनंदिनःअनेनकृतभोजनाअपिबुभुक्षितानाइतिसूच्यते॥१७॥

रामा॰ यु॰
३०

२९॥ इति श्रीरामाभिरामे श्रीरा॰ रांति॰ युद्ध॰ दशमः सर्गः॥१०॥ कतकस्तु नवमः॥ कृशत्वे हेतुर्मैथिली।
काममोहित इति मैथिली विषयकामेन मोहितः हेत्वंतरं सुहृदां विभीषणादीनां असन्मानात्

इत्येवमुक्त्वासुरसैन्यनाशनो महाबलः संयति चंडविक्रमः॥ दशाननो भ्रातरमाप्तवादिनं
विसर्जयामास तदा विभीषणं॥२७॥ इत्यार्षे श्रीरामायणे युद्ध॰ दशमः सर्गः॥१०॥ स बभूव कृ
शो राजा मैथिलीकाममोहितः॥ असन्मानाच्च सुहृदां पापः पापेन कर्मणा॥१॥ अतीवकाम
संपन्नो वैदेहीमनुचिंतयन्॥ अतीतसमये काले तस्मिन्वै युधि रावणः॥ अमात्यैश्च सुहृ
द्भिश्च प्राप्तकालममन्यत॥२॥ स हेमजालविततं मणिविद्रुमभूषितं॥ उपगम्य विनीता
श्वमारुरोह महारथं॥३॥ तमास्थाय रथश्रेष्ठं महामेघसमस्वनं॥ प्रययौ रक्षसां श्रेष्ठो
दशग्रीवः सभां प्रति॥४॥ असिचर्मधरा योधाः सर्वायुधधरास्ततः॥ राक्षसा राक्षसेंद्रस्य
पुरस्तात्संप्रतस्थिरे॥५॥ नानाविकृतवेषाश्च नानाभूषणभूषिताः॥ पार्श्वतः पृष्ठतश्चैनं प
रिवार्य ययुस्तदा॥६॥

30

जुगुप्सनात्। पापत्वे हेतुः पापेन कर्मणेति। तच्च परदारापहाररूपं॥१॥ तस्मि
न्काले रावणो युधि युद्धेऽतीतसमयेऽपि विभीषणोक्तरीत्यानवसरदुःस्थेऽपि अमात्यादिभिर्विभीषण
निरिक्तैः सह युद्धमेव प्राप्तकालं काममोहितत्वादमन्यत॥२॥ अस्यैव निश्चयाय सभाप्रस्थानं स

॥३॥४॥५॥६॥

राम॰
३०

अयंदोषः सीतापहारदोषस्तन्मूलदुर्निमित्तदोषश्चेत्यर्थः सर्वस्यजनस्येत्यादितृतीयार्थेषष्ठी· सर्वे
णाजनेनरक्षआदिरूपेणोपलक्ष्यते· दृश्यते· यद्वासर्वस्यराक्षसादिरूपस्येत्दुर्निमित्तफलं
उपलक्ष्यत इत्यर्थः॥२४॥ ननुत्वदतिरिक्तः कोपीमेमंत्रेनवदतित्वमेवकथंब्रवीषीत्यत आह· प्रापण इ

अयंहिदोषः सर्वस्यजनस्यास्योपलक्ष्यते॥ रक्षसांराक्षसीनांचपुरस्यांतःपुरस्यच॥२४॥
प्रापणेचास्यमंत्रस्यनिवृत्ताः सर्वमंत्रिणः॥ अवश्यंचमयावाच्यंयद्दृष्टमथवाश्रुतं॥
संविधाययथान्यायंतद्भवान्कर्तुमर्हसि॥२५॥ इतिस्वमंत्रिणांमध्येभ्राताभ्रातरमूचिवान्
रावणंरक्षसांश्रेष्ठंपथ्यमेतद्विभीषणः॥२६॥ हितंमहार्थंमृदुहेतुसंहितंव्यतीतकाला
यतिसंप्रतिक्षमं॥ निशम्यतद्वाक्यमुपस्थितज्वरः प्रसंगवानुत्तरमेतदब्रवीत्॥२७॥ भ
यंनपश्यामिकुतश्चिदप्यहंनराघवः प्राप्स्यतिजातुमैथिलीं॥ सुरैः सहेंद्रैरपिसं
गरेकथंममाग्रतः स्थास्यतिलक्ष्मणाग्रजः॥२८॥

ति· अस्यमंत्रस्यप्रापणाययद्यपित्वदृश्या
त्सर्वेमंत्रिणोनिवृत्तास्तथापिमयाभ्रात्रायदृष्टंश्रुतंवातत्सर्वंहितमवश्यंवाच्यमेवसमानसुख
भागित्वात्।२५। स्वमंत्रिणांस्वभ्रातृमंत्रिणां॥२६॥ व्यतीतकालेआयतौउत्तरकालेसंप्रतिवर्तमान
कालेचक्षमंहितंउपस्थितज्वरः प्राप्तक्रोधः प्रसंगवान्सीताविषयकामप्रसंगवान्॥२७॥ कुत
श्चित्दुर्निमित्तात्तस्यचापशत्रोश्चेत्यर्थः॥२८॥

तस्याःसभायामध्येरावणोवैडूर्यमयंवैडूर्यरत्ननिर्मितंप्रियकाख्यमृगसंबंधिनापरममृदुनाजि
नेनसंवृते॥१६॥सोपाश्रयंसोपधानंईश्वरवत्ईश्वरार्हं॥१७॥शत्रुभिर्महत्कृत्यंकर्त्तव्यमस्तिइ
तिजानन्नतोराक्षसान्समानयतेतिशशास॥१८॥राक्षसाद्भुतरूपाः अनुगेहमवस्थायप्रविश्य

प्रविवेशमहातेजाःसुकृतांविश्वकर्मणा॥तस्याःसवैडूर्यमयंप्रियकाजिनसंवृतं॥१६॥
महत्सोपाश्रयंभेजेरावणःपरमासनं॥ततःशशासेश्वरवत्दूतान्लघुपराक्रमान्॥१७॥
~~महत्सोपाश्र~~समानयतमेक्षिप्रमिहैतान्राक्षसानिति॥कृत्यमस्तिमहज्जानेकर्त्तव्यमि
तिशत्रुभिः॥१८॥राक्षसास्तद्वचःश्रुत्वालंकायांपरिचक्रमुः॥अनुगेहमवस्थायविहार
शयनेषुच॥उद्यानेषुचरक्षांसिचोदयंतोह्यभीतव[illegible]र॥१९॥तेरथांतचराएकेदृप्तान्
केदृढान्हयान्॥नागानन्येधिरुरुहुर्जग्मुश्चैकेपदातयः॥२०॥सापुरीपरमाकीर्णा
रथकुंजरवाजिभिः॥संपतद्भिर्विरुरुचेगरुत्मद्भिरिवांबरं॥२१॥तेवाहनान्यवस्थाययानानि
विविधानिच॥सभांपद्भिःप्रविविशुःसिंहागिरिगुहामिव॥२२॥राज्ञःपादौगृहीत्वातुरा
ज्ञातेप्रतिपूजिताः॥पीठेष्वन्येबृसीष्वन्येभूमौकेचिदुपाविशन्॥२३॥

विहारादिषुव्यासक्तान्
पिरक्षांसिरावणाज्ञयाभ्रभीतवत्तदर्थंचोदयंतःसंतोलंकायांपरिचक्रमुः॥१९॥तेश्राहुतराक्षसाः
रथांतचराःरथस्थेषुसंचारिणःजग्मुरितिशेषः हयानित्यत्राधिरुरुहुरित्यपकर्षः॥२०॥परंश्रा

कीर्णा॥२१॥२२॥वृसीवन्नासनं॥२३॥

आक्रीडाद्भिःगतिभेदेनक्रीडांकुर्वद्भिः॥७॥ततःप्रस्थानोत्तरं॥८॥९॥आतपत्रंछत्रं॥१०॥अलंकारायहे
मनिर्मितामंजर्योगर्भेययोस्ते·शुद्धस्फटिकविग्रहेतेनातिशुक्ले॥११॥सव्यदक्षिणोसमाहारद्वंद्वःसव्य

रथैश्चातिरथाःशीघ्रंमत्तैश्चवरवारणैः॥अन्वयुस्तेतुदशग्रीवमाक्रीडद्भिश्चवाजिभिः॥७॥गदाप
रिघहस्ताश्चशक्तितोमरपाणयः॥ततस्तूर्यसहस्राणांसंजज्ञेनिस्वनोमहान्॥८॥तुमुलः
शंखशब्दश्चसभांगच्छतिरावणे॥सनेमिघोषेणमहान्सहसाभिनिनादयन्॥९॥राजमार्गं
श्रियाजुष्टंप्रतिपेदेमहारथः॥विमलंचातपत्रंचप्रगृहीतमशोभत॥१०॥पांडुरंराक्षसें
द्रस्यपूर्णस्ताराधिपोयथा॥हेममंजरिगर्भेचशुद्धस्फटिकविग्रहे॥११॥चामरव्यजनेत
स्यरेजतुःसव्यदक्षिणे॥तेकृतांजलयःसर्वेरथस्थंपृथिवीस्थिताः॥१२॥राक्षसाराक्षस
श्रेष्ठंशिरोभिस्तंववंदिरे॥राक्षसैस्तूयमानःसन्जयाशीर्भिररिंदमः॥१३॥आससादम
हातेजाःसभांविरचितांतदा॥सुवर्णरजतास्तीर्णांविशुद्धस्फटिकांतरां॥१४॥विराजमा
नोवपुषारुक्मपट्टोत्तरच्छदां॥तांपिशाचशतैःषड्भिरभिगुप्तांसदाप्रभां॥१५॥

दक्षिणपार्श्वयो
रित्यर्थः॥१२॥१३॥विरचितांविश्वकर्मणेतिशेषःसुवर्णरजतास्तीर्णां·तैःकृतकुट्टिमामित्यर्थः·विशु
द्धाःस्फटिकाअंतरेमध्येशोभार्थंयस्याःसा॥१४॥विराजमानोवपुषेतिप्रवेष्टरावणविशेषणं·
रुक्मालंकृतपट्टवस्त्रमुत्तरच्छदोयस्यास्तांषड्भिःपिशाचशतैःषट्शतपिशाचैरभिगुप्तांरक्षिता·
सदाप्रभांरत्नप्रभयेतिशेषः॥१५॥

समितौसमागमे॰ समितिः सागरेसाम्येसभायामपिसंयमे॥३१॥बहुमानः॥इतिरामाभिरामेश्रीरामी
ये॰रा॰ति॰युद्ध॰दशमःसर्गः॥१०॥कानकरीत्याएकादशः॥ सइति॥१॥कृतविद्याः शिक्षिता
स्त्रविद्याः चतुर्विद्याः चतु-रथिहस्तिसादिपदातिरूपेण चतुर्विधायेयोधावसंतितेयथानग

सरावणःशस्त्रभृतांमनस्विनांमहाबलानांसमितौमनस्वी॥तस्यांसभायांप्रँयाचका भ
शेमध्येवसूनामिववज्रहस्तः॥३१॥इत्यार्षेश्रीरामायणेयुद्धकांडेएकादशःसर्गः॥११॥ ।
सतांपरिषदंकृत्स्नांसमीक्ष्यसमितिंजयः॥प्रबोधयामासतदाप्रहस्तंवाहिनीपतिं॥१॥से
नापतेयथातेस्युःकृतविद्याश्चतुर्विधाः॥योधानगररक्षायांतथाव्यादेष्टुमर्हसि॥२॥

सप्रहस्तःप्रणीतात्माचिकीर्षन्राजशासनं॥विनिक्षिप्यबलंसर्वंबहिरंतश्चमंदिरे॥३॥ततो
विनिक्षिप्यबलंसर्वंनगरगुप्तये॥प्रहस्तःप्रमुखेराज्ञोनिषसादजगादच॥४॥विहितंब
हिरंतश्चबलंबलवतस्तव॥कुरुष्वाविमनाःक्षिप्रंयदभिप्रेतमस्तिते॥५॥प्रहस्तस्यवचः
श्रुत्वाराजाराज्यहितैषिणः॥सुखेप्सुःसुहृदांमध्येव्याजहारसरावणः॥६॥

ररक्षायांसाव
धानाःस्युस्तथातान्यादेष्टुमर्हसि॰।अनेनसमुद्रतीरेमागमनंचारमुखेनज्ञातवानितिगम्यते
२॥प्रणीतात्मासावधानचित्तःमंदिरेरपुरे॥३॥तदेवाह॰।नगरगुप्तयेइति॥४॥अविमनाअव्या
कुलचित्तः॥५॥राज्यहितैषिणःप्रहस्तस्येत्यन्वयः॥६॥

२४।यथामुख्याः यथायोगं तत्तन्मंत्रविषये मुख्याः निश्चितार्थेषु भावे निश्चयाच्चाहिताग्न्यादिः अर्थनिश्चये
षित्यर्थः अमात्याउपमंत्रिणः सर्वज्ञाः सर्वशास्त्रज्ञाः बुद्धिर्दर्शनं चक्षुर्येषां ते २५ सर्वार्थस्य निश्चया
येतिशेषः सुखाय क्षेमायत्तमं विचारयितुं ॥२६॥ सुयुग्मं शोभना युग्या अश्वा यस्मिंस्तं संसदं सभां ॥२७॥

नेसमेत्यसभायांवैराक्षसाराजशासनात्।यथार्हमुपतस्थुस्तेरावणंराक्षसाधिपं॥२४॥मंत्रि
णश्चयथामुख्यानिश्चितार्थेषुपंडिताः।अमात्याश्चगुणोपेताःसर्वज्ञाबुद्धिदर्शनाः॥२५॥स
मीयुस्तत्रशतशःशूराश्चबहवस्तथा।सभायांहेमवर्णायांसर्वार्थस्यसुखायवै॥२६॥ततो
महात्माविपुलंसुयुग्मंरथंवरंहेमविचित्रितांगं।शुभंसमास्थाययथौयशस्वीविभीषणः
संसदमग्रजस्य॥२७॥सपूर्वजायावरजःशशंसनामाथपश्चाच्चरणौववंदे।शुकःप्रहस्तश्च
तथैवतेभ्योददौयथार्हंपृथगासनानि॥२८॥सुवर्णनानामणिभूषणानांसुवाससांसंसदि
राक्षसानां।तेषांपरार्ध्यागुरुचंदनानांस्रजांचगंधाःप्रववुःसमंतात्॥२९॥नचुक्रुशुर्नानृत
माहकश्चित्सभासदोनापिजजल्पुरुच्चैः।संसिद्धार्थाःसर्वएवोग्रवीर्याभर्तुःसर्वेददृशुश्चा
ननंते॥३०॥

नामग्रहणपूर्वकंनमस्कारःकार्यइतिसदाचारःव्यग्रचित्ततयाराज्ञःस्वागमत
ज्ञापनायचातेभ्यःसभामागतेभ्यःसभ्येभ्यःपृथग्ददौतत्तदासनस्थानंबोधितवान्॥२८॥तेषांराक्ष
सानांयानिपरार्ध्यागुरुचंदनानिस्रजश्चेतितेषांगंधावायुसंबंधात्प्रववुः॥२९॥संसिद्धार्थाःसंपूर्ण

युद्धकां० ॥ ३० ॥

सीतासदृशीअन्यामेनतथानमतोहरेत्यर्थः॥१३॥ हेम्नानिर्मितंयद्विंबंप्रतिमातन्निभा· मायेवेतिप्रतित्ताणामप
र्वाश्चर्यावहोवस्तुविशेषोमाया॥१४॥१५॥ हुताग्निरर्चिःसंकाशामित्यर्थेपिदृष्ट्वादीप्यतेमेशरीरजड
त्पनुषज्यते उन्नतानासिकायस्मिन्तत्॥१६॥ अवशोस्वाधीनएवतस्यावदनंपश्यन्नएयिवान्प्राप्तवा
न्यत्किंचिद्विषयनिमित्तक्रोधहर्षकालयोरपिसमानेन· तावप्यभिभूयांतःप्रवृत्तेन· दुर्व

सामेनशय्यामारोढुमिच्छत्पल्लसगामिनी॥ त्रिषुलोकेषुचान्यामेनसीतासदृशीतथा॥१३॥
तनुमध्यापृथुश्रोणीशरदिंदुनिभानना॥ हेमविंवनिभासौम्यामायेवमयनिर्मिता॥१४॥
सुत्तोहिततल्लौस्नत्तौचरणौसुप्रतिष्ठितौ॥ दृष्ट्वाताम्रनखौतस्यादीप्यतेमेशरीरजः॥१५॥
हुताग्निरर्चिःसंकाशामेनांसौरीमिवप्रभां॥ उन्नसंविमलंवल्गुवदनंचारुलोचनं॥१६॥
पश्यंस्तदवशस्तस्याःकामस्यवशमेयिवान्॥ क्रोधहर्षसमानेनदुर्वर्णकरणेनच॥१७॥

नीतिसामान्येनैवोक्तं॥१७॥

र्णकरणेनकांतिनाशेननदप्राप्तिजयोःशोकसंतापयोर्नित्येननित्यप्रवर्त्तकेन· नचस्वनगरेस्थितायांत
स्यांकिमित्येवंदुःखभोगोनआह· सातुसंवत्सरंकालंतत्समाप्तिपर्यंतंरामंप्रतीक्षमाणाममास्पर्शमयांच
तमयापितयास्त्वितिप्रतिज्ञातं बलात्कारेशापान्मरणभियास्वेनैवकृतंसमयंतद्याचितत्वेनकृतइति
अत्रवस्तुतत्वं· नहिसीताएवंयाचितुमर्हतीति अतएवपूर्वंसामेनशय्यामारोढुमिच्छत्पलसगामि

प्रियादिविषये धर्मादिविषयकृच्छ्रेषु संकटेषु च यूयं वेदितुमर्हथ· कर्तव्यकृत्यमिति शेषः ॥७॥ मंत्रकर्म नियुक्तानि मंत्रकरणपूर्वं नियुक्तानि प्रेरितानि युष्माभिः समारब्धानि मे सर्वकृत्यानि सर्वदा सफलान्येव जातु कदाचिदपि विफलानि न ॥८॥९॥ समर्थयितुं सर्वाभिमते मां योजयितुं तत्र मां नियो

प्रियाप्रिये सुखे दुःखे लाभालाभो हिताहिते ॥ धर्मकामार्थकृच्छ्रेषु यूयमर्हथ वेदितुं ॥७॥
सर्वकृत्यानि युष्माभिः समारब्धानि सर्वदा ॥ मंत्रकर्मनियुक्तानि न जातु विफलानि मे ॥८॥
स सोमग्रहनक्षत्रैर्मरुद्भिरिव वासवः ॥ भवद्भिरहमत्यर्थं वृतः श्रियमिवाप्नुयां ॥९॥ अहं
तु खलु सर्वान्वः समर्थयितुमुद्यतः ॥ कुंभकर्णस्य तु स्वप्नान्नेममर्थमचोदयं ॥१०॥ अयं हि
सुप्तः षण्मासान्कुंभकर्णो महाबलः ॥ सर्वशस्त्रभृतां मुख्यः स इदानी समुत्थितः ॥११॥ इ
यं च दंडकारण्याद्रामस्य महिषी प्रिया ॥ रक्षोभिश्चरितोद्देशादानीता जनकात्मजा ॥१२॥

अहं त्विति बोधयितुमुद्यतः पूर्वोक्तमप्यर्थं पुनरुक्तवानित्यर्थः किंच कुंभकर्णस्य स्वप्नात्स्वापाद्धेतोरिममर्थं नाचोदयं नावेदयं इदानीमुपस्थितस्य तस्यापि बोधनार्थं पुनरुक्तिरित्यर्थः ॥१०॥११॥ सीतासमर्पणं विना राघवजयोपायो विचार्यतामिति बोधयितुं तस्या दुस्त्यजत्वमाह· इयं चेति· रक्षोभिश्चरितः सेवितो य उद्देशो देशो जनस्थानलक्षणस्तस्मात् ॥१२॥ श्र

नृपात्मजौदूतेनवरुणालयमतिक्रम्यसीतायाःपदवींप्राप्यान्विष्यसुग्रीवप्रमुखान्हरीन्पुरस्कृत्यसमुद्रस्यपरेपारेसंप्राप्ताविनिष्क्रांतं॥२४॥अतःपरंयथासीताप्रदेयायथाचदशरथात्मजौवध्यौतथैवमंत्रोभवद्भिर्मंत्र्यतां·अथसुनीतंसुनिश्चितंमंत्रतत्त्वमभिधीयतां॥२५॥निश्चितप्रायएवश

परेपारेसमुद्रस्यपुरस्कृत्यनृपात्मजौ॥सीतायाःपदवींप्राप्यसंप्राप्तौवरुणालयं॥२४॥
प्रदेयाचयथासीतावध्यौदशरथात्मजौ॥भवद्भिर्मंत्र्यतांमंत्रःसुनीतंचाभिधीयतां॥२५॥
नहिशक्तिंप्रपश्यामिजगत्यन्यस्यकस्यचित्॥सागरंवानरैस्तीर्त्वानिश्चयेनजयोमम॥२६॥
तस्यकामपरीतस्यनिशम्यपरिदेवितं॥कुंभकर्णःप्रचुक्रोधवचनंचेदमब्रवीत्॥२७॥

34

त्रुजयइत्याह·नहीतिजगतिलोकेकस्यचिदिंद्रादेरपिअस्मज्जयेशक्तिंनपश्यामि·अन्यस्यमनुष्यरूपशत्रोर्वानरैःसहसागरंतीर्त्वाऽस्मज्जयेशक्तिप्रसंगमपिनपश्यामि·अतोनिश्चयेनसर्वथाममैवजयइतियोजना॥२६॥अथकुंभकर्णोभ्रातुरन्यायमूलानर्थप्राप्तिदर्शनात्क्रुद्धआहेत्याह·तस्येति·परिदेवितंकामशोकप्रलापं·प्रचुक्रोध·महाराजःसन्ईदृशंसभायांप्रलपतीतिक्रोधः॥२७॥

१८॥१९॥ नन्वेवं संवत्सरानंतरं त्वद्दशो भविष्यत्येव रामस्य पत्विरहाप्रसक्तिरेवेति काते चिंतेत्याशंक्य
ल्योपि रिपुर्नोपेक्ष्य इति नीतिशास्त्रपर्यालोचनया मंत्रे प्रेरयामीत्याह कथमिति· न कथमपीत्यर्थः
२०॥ अथापि संभावना नास्तीत्याह अथवेति· एकेनापि कपिना महत्कदनं कृतं ।२१॥ अतः कार्यग

शोकसंतापनित्येन कामेन कलुषीकृतः॥ सा तु संवत्सरं कालं मामयाचत भामिनी॥१८॥ प्र
तीक्षमाणा भर्तारं राममायतलोचना॥ तन्मया चारुनेत्रायाः प्रतिज्ञातं वचः शुभं॥१९॥ श्रांतो
हं सततं कामाद्यातो हय इवाध्वनि॥ कथं सागरमक्षोभ्यं तरिष्यंति वनौकसः॥२०॥ बहुसत्त्व
झषाकीर्णं तौ वा दशरथात्मजौ॥ अथवा कपिनैकेन कृतं नः कदनं महत्॥२१॥ दुर्ज्ञेयाः
कार्यगतयो ब्रूत यस्य यथा मति॥ मानुषान्नो भयं नास्ति तथापि तु विमश्यतां॥२२॥ तदा
देवासुरे युद्धे युष्माभिः सहितो जयं॥ ते मे भवंतश्च तथा सुग्रीवप्रमुखान्हरीन्॥२३॥

तयोर्दुर्ज्ञेयास्तस्माद्यस्य यथा मति यत्प्रभाति तद्ब्रूत· नन्वेककपिनो भीतस्य रामादधिकमेव ते भ
यमिति भयहेतुः सीता त्यज्यतामित्याशंक्य भयाभावमाह मानुषादिति॥२२॥ भयाभावहेतुमाह
तदेति· यैर्युष्माभिः सहितो देवानजयं ते भवंतो मे तथा च तथैव संति अतो मानुषान्न भयं यद्य
पि तथापि विमृश्यतां विचार्यतामिति पूर्वश्लोकेनान्वयः विमर्शहेतुमाह· सुग्रीवेति॥२३॥

अनयोर्व्यतिरेकमप्याह· अनुपायेनेति· मंत्रिभिः सहसामाद्युपायविचारानालंबनेन मोहात्स्वय
मेव यानि विपरीतान्यनपायकृत्यानि करोति तानि तथा क्रियमाणानि दुष्यंति कश्मलं प्रापयंति अप्र
यतेषु अभिचारत्वादपवित्रेषु यागेषु हुतानि हवींषीव तानि तु प्रत्यगेनमभिचारस्कणेनेति कर्त्तारं
कश्मलं प्रापयंत्येव· तद्वदिदं कर्मापाततः सुखमिव भासमानमपि परिणामे दुःखायैवेति भावः
३१॥ यथा कालं यस्य कर्मणां नारंभः स मूर्ख इत्याह· य इति· पूर्वकार्याणि प्रथमकर्त्तव्यानि कर्माणि

अनुपायेन कर्माणि विपरीतानि यानि च॥ क्रियमाणानि दुष्यंति हवींष्यप्रयतेष्विव॥३१॥
यः पश्चात्पूर्वकार्याणि कर्माण्यभिचिकीर्षति॥ पूर्वं चापरकार्याणि स न वेद नयानयौ॥
॥३२॥ चपलस्य तु कृत्येषु प्रसमीक्ष्याधिकं बलं॥ छिद्रमन्ये प्रपद्यंते क्रौंचस्य खमिव द्विजाः॥
॥३३॥

पश्चादभिचिकीर्षति एवं पश्चात्कर्त्तव्यानि पूर्वं करोति स नयानयौ न वेद· साम्नि प्रथमं प्रयोक्तव्ये
दंडं दंडे पश्चात्प्रयोक्तव्ये साम चेत्यर्थः॥ यद्वा विचारानंतरं कर्मकरणमुचितं तद्वैपरीत्यं कुर्वं
स्त्वनीत्यनीतिज्ञो नेनेत्यर्थः॥३२॥ विषय चपलस्य बलमप्यप्रयोजनमित्याह· चपलस्येति·। अ
न्ये शात्रवः परस्याधिकं बलं प्रसमीक्ष्यापि कृत्येषु चपलस्य तस्य निग्रहाय छिद्रं रंध्रं प्रपद्यंते·
द्विजा हंसा अलंघ्यस्यापि क्रौंचपर्वतस्य लंघनाय कुमारशक्तिकृतं खं रंध्रमिव॥३३॥

तदेवचचनामाह· यदात्विति· यदासलक्ष्मणस्यरामस्यसीतासकृत्समीक्ष्यैवतात्कालिकापातविचारंकृत्वैवप्र
सह्यहृताततदैवतेचित्तंयमुना· यामुनंह्रदमिवसुनिश्चितंभजेतनिश्चयभजनार्हं यथायमुनापृथिव्याम
वतारसमये एवस्वह्रदंपूरयति कालांतरेतुसमुद्रंगतत्वात्तज्जलस्यतत्पूरणासंभवएवमस्माभिःसह
विचारस्यसएवकालइदानींत्वनर्थनिश्चयोजातएवेतिविचारोनिष्फलइतिक्रोधजाव्यंग्योक्तिः॥२७॥
व्यंग्यतयोक्तमेवसाक्षादप्याह· सर्वमितियदेतद्वचनापूर्वंप्रसह्यपरदारहरणादिकृतंएतत्सर्वम

·यदातुरामस्यसलक्ष्मणस्यप्रसह्यसीताखलुसाइहाहृता॥सकृत्समीक्ष्यैवसुनिश्चितंतदा
भजेतचित्तंयमुनेवयामुनं॥२८॥सर्वमेतन्महाराजकृतमप्रतिमंतव॥विधीयेतसहास्मा
भिरादावेवास्यकर्मणः॥२९॥न्यायेनराजकार्याणियःकरोतिदशानन॥नससंतप्यतेपश्चा
न्निश्चितार्थमतिर्नृपः॥३०॥

हाराजतवाप्रतिमंअनुचितंइदानींविचारोपिनिष्फलइत्याह
विधीयेतेतिअस्यकर्मणःकारणमुद्दिश्यप्रवृत्तिकालएवयद्यस्माभिःसहमंत्रयेतत्तदाविधीये
तास्माभिरस्यनिवारणमितिशेषः इदानींक्रियमाणोविचारस्तुगतजलसेतुबंधनसमइतिभावः
२९॥अथमंत्रिभिरसंमंत्र्यकृतंनिंद्यंकर्मपश्चात्परितापायभवतीत्याहन्यायेनेतिप्रथमंमंत्रिभिःस
हनिश्चितार्थमतिर्भूत्वायोनृपतिर्न्यायेनराजकार्याणिकरोतिसतत्कार्यंकृत्वापश्चान्नसंतप्यते॥३०

पुनरितियदिमांसरामएकेनशरेणाहत्यपुनर्द्वितीयेनशरेणनिहनिष्यतियावत्ततःपूर्वमे
वतस्यरुधिरंपास्यामिकाममाश्वस॥३८॥तेसुखावहंजयंदाशरथेर्वधेनतवाहमाहर्तुंकर्तुं
यतिष्ये॥फलंतुदैवायत्तमितिभावः खादामिखादिष्ये॥३९॥४०॥कतकरीत्याएकादशःसर्गः

पुनर्मांसद्वितीयेनशरेणनिहनिष्यति॥ततोहंतस्यपास्यामिरुधिरंकाममा
श्वस॥३८॥वधेनवैदाशरथेःसुखावहंजयंतवाहर्तुमहंयतिष्ये॥हत्वाचरा
मंसहलक्ष्मणेनखादामिसर्वान्हरियूथमुख्यान्॥३९॥रमस्वकामंपिबचाग्र्य
वारुणींकुरुष्वकार्याणिहितानिविज्वरः॥मयातुरामेगमितेयमक्षयंचिराय
सीतावशगाभविष्यति॥४०॥इत्यार्षेरामायणेयुद्धकांडेद्वादशःसर्गः॥१२॥राव
णंक्रुद्धमाज्ञायमहापार्श्वोमहाबलः॥मुहूर्त्तमनुसंचिंत्यप्रांजलिर्वाक्यमब्रवीत्॥१

अनघमानः॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेद्वादशःसर्गः॥१२॥ ॥
क्रुद्धमाज्ञाय॥अप्रतिमंकर्मकृतमितिकुंभकर्णवचःश्रवणेनेतिशेषः मुहूर्त्तमनुसंचिंत्यन्या
य्येभ्रातुर्वचस्यपिमनोनुकूलतयैवंकोपश्चेदस्माकंतयोक्तौशिरच्छेदएवस्यादितिमनोनु
कूलमेववाच्यमितिसंचिंत्य॥१॥

एवंकर्मकृतवतस्तवैतावत्कालंजीवनमतिभाग्यवशादित्याह· त्वयेतियेनत्वयाऽप्रतिचिंति· तंभाविफलचिंतारहितंयदिदंमहत्कार्यंप्रबलदारहरणरूपमारब्धंतत्वांरामोतिप्रबलोपिदिष्ट्यानावधीत्त्विषमिश्रमामिषंभोज्यंपवस्तुभोक्तारंयथाहंतितद्वदित्यर्थः॥३४॥ एवंगतेस्वकर्त्तव्यमाह· तस्मादिति· यस्मात्त्वयापरैः बलशत्रुभिरप्रतिममनुचितंकर्मारब्धंयतश्चसामदानेनेच्छसिमारीचेनवास्माभिरपराज

त्वयेदंमहदारब्धंकार्यमप्रतिचिंतितं॥दिष्ट्यात्वांनावधीद्रामोविषमिश्रमिवामिषं॥३४॥
तस्मात्त्वयासमारब्धंकर्मह्यप्रतिमंपरैः॥अहंसमीकरिष्यामिहत्वाशत्रुंस्तवानघ॥३५॥
अहमुत्सादयिष्यामिशत्रुंस्तवनिशाचर॥यदिशक्रविवस्वंतौयदिपावकमारुतौ॥३६॥
तावहंयोधयिष्यामिकुवेरवरुणावपि॥गिरिमात्रशरीरस्यमहापरिघयोधिनः॥नर्दत
स्तीक्ष्णदंष्ट्रस्यविभीयाद्धिपुरंदरः॥३७॥

त्वात्तेचित्तमनुसर्त्तव्यमेवतस्मादहंतवशत्रून्हत्वातवकार्यंसमीकरिष्यामि· संपादयिष्यामि· यद्वात्वयासमीकरिष्यामि· त्वंयथायुद्धंकरिष्यसितदाहमपिपरैर्योत्स्यामिनतुविभीषणवत्त्वांत्यक्ष्यामीतिव्यंग्यं॥३५॥ उक्तमेवराज्ञः प्रीतयेऽभ्यस्यतिसत्यत्वप्रत्यायनाय· अहमिति·॥ यदिशक्रविवस्वंतौतत्तद्देवतारूपौस्यातांतथापितावहंयोधयिष्यामीत्यन्वयः॥३६॥ गिरिमात्रशरीरस्य गिरिप्रमाणदेहस्य॥३७॥ ॥

कथमेवंबलवन्तस्तत्राह॰ कुंभकर्णइति॥६॥एवमस्माकमेवप्राबल्यात्‌ चतुर्थोपायएवास्माभिरादरणीयइत्या
ह॰ उपप्रदानमिति॰ कुशलैर्नीतिकुशलैः कृतंविषयविशेषइतिशेषः॥७॥८॥९॥रहस्यंप्रमुदितइत्य

कुंभकर्णःसहास्माभिरिंद्रजिच्चमहाबलः॥प्रतिषेधयितुंशक्ताःसवज्रमपिवज्रिणं॥६॥उप
प्रदानंसांत्वंवाभेदंवाकुशलैःकृतं॥समतिक्रम्यदंडेनसिद्धिमर्थेषुरोचये॥७॥इह
प्राप्तान्वयंसर्वांछत्रूंस्तवमहाबल॥वशंशस्त्रप्रतापेनकरिष्यामोनसंशयः॥८॥एवमु
क्तस्तदाराजामहापार्श्वेनरावणः॥तस्यसंपूजयन्वाक्यमिदंवचनमब्रवीत्‌॥९॥महापा
र्श्वप्रवदतोरहस्यंकिंचिदात्मनः॥चिरवृत्तंतदाख्यास्येयदवाप्तंपुरामया॥१०॥पितामहस्य
भवनंगच्छंतींपुंजिकस्थलां॥चंचूर्यमाणामद्राक्षंआकाशेग्निशिखामिव॥११॥साप्रसह्य
मयाभुक्ताकृताविवसनाततः॥स्वयंभूभवनंप्राप्तालोलितानलिनीयथा॥१२॥

37

वत्‌॰ गुप्तंचिरवृत्तंयन्मयापुरावाप्तं॰ बलादुपभोगस्याशक्यकरणात्‌निमित्तंआत्मनःकिंचिद्दुष्कृतंतत्‌
आख्यास्ये॥१०॥तदेवाह॰ पितामहस्येति॰ चंचूर्यमाणांमद्दर्शनभीतिवशान्निलीयगतिमतीं॥११॥
ततोदर्शनोत्तरंप्रसह्यविवसनाकृतासामयाभुक्ता॰ लोलितागजेनेतिशेषः॥१२॥ ॥

यःखलुपुरुषोमृगव्यालनिषेवितंदुष्प्रवेशंवनंप्राप्यतत्रचमधुसंप्राप्यतन्मधुनपिवेत्सबालिशोमू
र्खः एतेनप्रथमंरामाश्रमोदुरासदस्तंप्राप्यतत्रतत्स्त्रियंचप्राप्यतद्भोगाभोगोनयुक्तइतिसूचितं॥२॥
ननुबलात्परद्वारभोगोऽधर्मत्वादीश्वराज्ञाविरोधीत्यत्राह॰ ईश्वरस्येतिधर्मफलप्रवर्त्तकानांयमा
दीनामपित्वमीश्वरोतस्तेयंविचारोनुचितइत्यर्थः॥३॥अनानुकूल्येकथंभोगस्तत्राह॰ बलादिति॰कु

यःखल्वपिवनंप्राप्यमृगव्यालनिषेवितं।नपिबेन्मधुसंप्राप्यसनरोबालिशोभवेत्॥२॥ई
श्वरस्येश्वरःकोस्तितवशत्रुनिबर्हण॥रमस्वसहवैदेह्याशत्रुनाक्रम्यमूर्द्धसु॥३॥बला
त्कुक्कुटवृत्तेनप्रवर्त्तस्वमहाबल।आक्रम्याक्रम्यसीतांवैतांभुंक्ष्वचरमस्वच॥४॥लब्ध
कामस्यतेपश्चादागमिष्यतिकिंभयं।प्राप्तमप्राप्तकालंवासर्वंप्रतिविधास्यसे॥५॥

क्कुटवृत्तेनकुक्कुटीनांकामिकुक्कुटसंयोगेक्रोधोजातिधर्मइतिवात्स्यायनः अथापिसंक्रुद्धाकु
क्कुटीरनुभुज्यकुक्कुटायथासुखिनस्तद्वत्त्वमपिभवेत्यर्थः तदेवदर्शयतिआक्रम्येति॥४॥अथ
स्वाभिलषितेसिद्धेप्रथमतोभयमेवनमहातेजस्त्वात् अथापितन्निमित्तंभयंप्राप्नुयात्तदापि
तत्सुप्रतिविधेयमेवत्वयेत्याह लब्धकामस्येति॰प्राप्तेप्राप्तकालंसावधानदशाप्राप्तकालंअ
प्राप्तकालंवाकामभोगाद्यसावधानदशाप्राप्तंवा॥ ५॥ म्र

आदीपयिष्यामिधक्ष्यामि॥१९॥२०॥युधासंग्रामेणनशक्यः जेतुमितिशेषः वैश्रवणेनपालितेत्यनेनपुष्पकवल्लंकापिभगवताकुवेरायदत्तेतिसूचितं॥२१॥पारमानः क॰॥१२॥इतिश्रीरामाभिरामेश्रीरा॰रा॰ति॰ युद्ध॰त्रयोदशःसर्गः॥१३॥ अथविभीषणःप्रहस्तादिवचोनिंदुर्मंत्रइत्याह निशाचरेंद्रस्येति

दिप्तंवज्रसमैर्बाणैःशतधाकार्मुकच्युतैः॥राममादीपयिष्यामिउल्काभिरिवकुंजरं॥१९॥तद्यास्यबलमादास्येबलेनमहतावृतः॥उदितःसविताकालेनक्षत्राणांप्रभामिव॥२०॥नवासवेनापिसहस्रचक्षुषायुधास्मिशक्योवरुणेनवापुनः॥मयात्वियंबाहुबलेननिर्जितापुरापुरीवैश्रवणेनपालिता॥२१॥इत्यार्षेश्रीरामायणेयुद्धकांडेत्रयोदशःसर्गः॥१३॥ निशाचरेंद्रस्यनिशम्यवाक्यंसकुंभकर्णस्यचगर्जितानि॥विभीषणोराक्षसराजमुख्यमुवाचवाक्यंहितमर्थयुक्तं॥१॥वृतोहिबाह्वंतरभोगराशिश्चिंताविषःसुस्मिततीक्ष्णदंष्ट्रः॥पंचांगुलीपंचशिरोतिकायःसीतामहाहिस्तवकेनराजन्॥२॥

वाक्यंरावणस्य॰गर्जितानिकुंभकर्णस्य॥अर्थयुक्तंवास्तवार्थं॥१॥वृतइति॰अहिमध्यदेहोत्रभोगः बाह्वंतरंहृदयभागएवभोगराशिःशरीरपरिणाहोयस्यसः चिंतैवविषंयस्य॰शोभनंस्मितमेवतीक्ष्णदंष्ट्रायस्य॰अनुचितकृत्यदर्शनादिजंस्मितं॰तस्याःपंचांगुल्यएवशिरांसियस्यसचासावतिकायश्चएवंभूतःसीतामहाहिस्तवकेनवृतःबद्धःकंठेइतिशेषःयद्वाकेनहेतुनावृतोगृही

इत्यर्थः॥२॥

तच्चममचरितंमहात्मनस्तस्यमन्येनिश्चितंज्ञातमासीत्मन्येइतितिङंतप्रतिरूपकमव्ययं मन्येशंकेध्रु
वंप्रायोनिश्चयार्थाश्रमीमताइतिकतकः॥१३॥फलिष्यतिविशीर्णोभविष्यति॰ क्वचिदेवमेवकुवेरपुत्र
नलकूवरशापोपिरंभानिबंधनः श्रूयतेतत्रोपपत्तिश्चिंत्या अस्यप्रथमत्वेतस्यांबलात्कारासंभवात् तस्यप्र

त्स्वृत्तस्यतदामन्येज्ञातमासीन्महात्मनः॥ अथसंकुपितोवेधामामिदंवाक्यमब्रवीत्॥१३॥अ
द्यप्रभृतियामन्यांबलान्नारींगमिष्यसि॥तदातेशतधामूर्द्धाफलिष्यतिनसंशयः॥१४॥इत्यहं
तस्यशापस्यभीतःप्रसभमेवतां॥नारोहयेबलात्सीतांवैदेहींशयनेशुभे॥१५॥सागरस्येवमे
वेगोमारुतस्येवमेगतिः॥नैतदाशरथिर्वेदत्वासादयतितेनमां॥१६॥कोहिसिंहमिवासी
नंसुप्तंगिरिगुहाशये॥क्रुद्धंमृत्युमिवासीनंसंबोधयितुमिच्छति॥१७॥नमत्तोनिर्गतान्बाणा
न्द्विजिह्वान्पन्नगानिव॥रामःपश्यतिसंग्रामेतेनमामभिगच्छति॥१८॥

थमत्वेऽस्यांबलात्का
रासंभवादितिकेचित् नलकूबरशापस्यतपोबलेनाकिंचित्करत्वादयमेवशापोब्रह्मास्त्रवदप्र
तिक्रियाऽपाश्चात्यइत्यन्ये॥१४॥१५॥अथमहापार्श्वोक्तस्वप्राबल्यमेवश्लाघने सागरस्येत्यादिदाशर
थिर्हियस्मादेतन्मेबलंनवेदतेनमामासादयति॥१६॥कोहिज्ञातमद्बलमितिशेषः गिरिगुहा
रूपेआशयेनिवासेआसीनमेवसुप्तंसिंहमिव॥१७॥नपश्यति॰नपश्यतिस्म॥१८॥

तर्त्तुंशक्तिरितिशेषः॥१०॥तथाविधस्यऽक्रूरस्वभावस्य·कृत्येषुरणमुखास्यसकललोकसंहारकृत्येषु
शक्रस्यपुरोयुधिदेवाश्चदेवाश्चपिविमूढाभवंति॥११॥यावत्तेकायंभित्वाबाणाःपुनस्तदिषु

वधस्तुरामस्यमयात्वयाचप्रहस्तसर्वैरपिराक्षसैर्वा॥कथंभवेदर्थविशारदस्यमहा
र्णवंतर्त्तुमिवाप्लवस्य॥१०॥धर्मप्रधानस्यमहारथस्यइक्ष्वाकुवंशप्रभवस्यराज्ञः॥पु
रोस्यदेवाश्चतथाविधस्यकृत्येषुशक्रस्यभवंतिमूढाः॥११॥तीक्ष्णानतावत्तवकंक
पत्रादुरासदाराघवविप्रमुक्ताः॥भित्वाशरीरंप्रविशंतिबाणाःऽप्रहस्ततेनैवविकत्थ
सेत्वं॥१२॥भित्वानतावत्प्रविशंतिकायंप्राणांतिकास्तेशनितुल्यवेगाः॥शिताःशरा
राघवविप्रमुक्ताःप्रहस्ततेनैवविकत्थसेत्वं॥१३॥नरावणोनातिबलस्त्रिशीर्षोनकुं
भकर्णस्यसुतोनिकुंभः॥नचेंद्रजिद्दाशरथिंप्रसोढुंत्वंवारणेशक्रसमंसमर्थः॥१४॥देवां
तकोवापिनरांतकोवा तथातिकायोतिरथोमहात्मा॥अकंपनश्चापिसमानसारःस्थातुं
नशक्तायुधिराघवस्य॥१५॥

धिंनप्रविशंतितेनैवहेतुनातावत्हेप्रहस्तत्वंविकत्थसे·व
यात्मश्लाघांकरोषिरावणस्यपुरस्तादितिशेषः॥१२॥प्राणांतिकाःप्राणांतपीडाकरास्तेकायं
भित्वायावन्नप्रविशंतिइषुधिंतावद्विकत्थसे॥१३॥त्रिशीर्षःस्त्रिशिराःत्ववेतिप्रहस्तनिर्देशः
॥१४॥१५॥

बलीमुखेतिवानरनामपर्वतकूटमात्राः पर्वतशिखरप्रमाणाः ॥३॥४॥५॥ जीवंस्तुरामस्यनमोक्षसे संनिधिंप्राप्ये

यावन्नलंकांसमभिद्रवंतिबलीमुखाः पर्वतकूटमात्राः ॥ दंष्ट्रायुधाश्चैवनखायुधाश्चप्रदीयतां
दाशरथायमैथिली ॥३॥ यावन्नगृह्णंतिशिरांसिबाणारामेरिताराक्षसपुंगवानां ॥ वज्रोपमावायुस
मानवेगाः प्रदीयतांदाशरथायमैथिली ॥४॥ नकुंभकर्णौ इ जितो चराजंस्तदामहापार्श्वमहो
दरौवा ॥ निकुंभकुंभौचतथातिकायः स्थातुंसमर्थायुधिराघवस्य ॥५॥ जीवंस्तुरामस्यन
मोक्ष्यसेत्वंगुप्तःसवित्राप्यथवामरुद्भिः ॥ निशम्यवाक्यंतुविभीषणस्यततः प्रहस्तोवच
नंबभाषे ॥६॥ ननोभयंविद्मनदैवतेभ्योनदानवेभ्योह्यथवाकदाचित् ॥ नयक्षगंधर्वम
होरगेभ्योभयंनसंख्येपतगोरगेभ्यः ॥७॥ प्रहस्तवाक्यंत्वहितंनिशम्यविभीषणोराजहि
तानुकांक्षी ॥ ततोमहार्थंवचनंबभाषेधर्मार्थकामेषुनिविष्टबुद्धिः ॥८॥ प्रहस्तराजाचमहो
दरश्चत्वंकुंभकर्णश्चयथार्थजातं ॥ ब्रवीतरामंप्रतितन्नशक्यंयथागतिःस्वर्गमधर्मबुद्धेः ॥९॥

तिशेषः ॥६॥ दैवतेभ्योनोऽस्माकंभयंइतिवयंनविद्मःसंख्येयुद्धे ॥७॥८॥ प्रहस्तेति· यद्यादृशमर्थजातं
रामंप्रतियद्यद्ब्रवीततत्तन्नशक्यंकर्तुमितिशेषः यथाऽधर्मबुद्धेःस्वर्गमुद्दिश्यगतिरशक्या ॥९॥

स्थानंबलादेर्यथापूर्वमुपचयापचयराहित्येनस्थितिः तदपेक्षयापचयः क्षयः ततः उपचयोवृद्धिः
प्रकृतेहिपरस्यवानरसहायतयासपत्न्युपचयोवर्त्ततेऽस्माकंतुखरनाशात्लंकादाहादिकृतोऽ
पचयोएतत्सर्वंबुध्यानुमृश्यपश्यः स्वामिहितंवदेत्समंत्रीनयज्ञमित्यर्थः॥२१॥ अपारमानः कत
१३॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेचतुर्दशःसर्गः॥१४॥ वहस्पते

परस्यवीर्यंस्वबलंचबुद्ध्वास्थानंक्षयंचैवतथैववृद्धिं॥ तथास्वपक्षेप्यनुमृश्यबुद्ध्याव
देत्क्षमंस्वामिहितंसमंत्री॥२१॥इत्यार्षेश्रीरामायणेयुद्धकांडेचतुर्दशःसर्गः॥१४॥ ॥
वृहस्पतेस्तुल्यमतेर्वचस्तन्निशम्ययत्नेनविभीषणस्य॥ ततोमहात्मावचनंबभाषे
तत्रैंद्रजिन्नैऋतयूथमुख्यः॥१॥ किंनामतेतातकनिष्ठवाक्यमनर्थकंवैबहुभीतवच्च
अस्मिन्कुलेयोपिभवेन्नजातःसोपीदृशंनैववदेन्नकुर्यात्॥२॥

गुरुणोत्पर्यः यत्नेननिशा
म्यदुःखेनश्रुत्वा महात्मामहामना॥१॥ तातकनिष्ठेत्यसमस्तं भीतवत् भीतस्येव अनर्थ
कमनुपादेयंवाक्यं किंनामकस्माद्उच्यते। अस्मिन्कुले पौलस्त्यकुले योजातोनभवेद
पितुसहजदुर्बलत्वादिमतिमनुष्यादिकुलेसोपीदृशंवचोनवादेत् ईदृशंचनकुर्या
त् करोतेः क्रियासामान्यवचनत्वान्नचिंतयेदित्यर्थः एवंचहननजातेरपिहन्तव्या पारइतिभावः॥२॥

व्यसनैःकामव्यसनैरभिभूतः अमित्रप्रतिमैःशत्रुतुल्यैःराक्षसनाशनार्थैराक्षसकुलनाशनिमित्तमन्वास्य
तेसेव्यते ॥१६॥ अनंतभोगेन· अपरिछिन्नदेहबलेन· परिक्षिप्तंपाशेनेववेष्टितं· रघुनाथेनवैरकरणंम
हासर्पवेष्टनमिवेतिनिदर्शनालंकारोत्रव्यंग्यः ॥१७॥ यावदितिवाक्यालंकारे· केशग्रहणात्· केशग्र

अयंचराजाव्यसनाभिभूतोमित्रैरमित्रप्रतिमैर्भवद्भिः॥अन्वास्यतेराक्षसनाशनार्थैतीक्ष्णाःप्र
कृत्यात्स्वसमीह्यपकारी॥१६॥अनंतभोगेनसहस्रमूर्ध्नानागेनभीमेनमहाबलेन॥बलात्परि
क्षिप्तमिमंभवंतोराजानमुह्निप्पविमोचयंतु॥१७॥यावद्भिकेशग्रहणात्सुहृद्भिःसमेत्यसर्वैः
परिपूर्णकामैः॥निगत्यराजापरिरक्षितव्योभूतैर्यथाभीमबलैर्गृहीतः॥१८॥सुचारिणारा
घवसागरेणप्रच्छाद्यमानस्तरसाभवद्भिः॥युक्तस्त्वयंतारयितुंसमेत्यकाकुत्स्थपातात्सु
खेपतत्सः॥१९॥इदंपुरस्यास्यसराक्षसस्यराज्ञश्चपथ्यंसुसुहृज्जनस्य॥सम्यग्विवाक्यंस्वम
तंब्रवीमिनरेंद्रपुत्रायददातुमैथिली॥२०॥

हणपर्यंतमप्यनुचिंतंकृत्वानिगत्यराजारक्षि
तव्यःभूतैर्गृहीतःपुमांस्तदाप्तैरिव॥१८॥सुचारिणा·सुचरित्ररूपचारिमता·राघवसागरेण
प्रच्छाद्यमानोनिमज्यमानःपुनश्चकाकुत्स्थरूपपातात्सुखेपतन्सोयंराजाभवद्भिःसमेत्य
तारयितुंयुक्तः॥१९॥मैथिलीरावणइतिशेषः॥२०॥

श्र

हेतातपुत्रतवमंत्रेनिश्चयोनास्तिकृत्याकृत्यविचारनिश्चयसामर्थ्यंनास्तियतस्त्वमद्याप्यविपक्वबुद्धिः
अप्राप्तज्ञानपरिपाकचित्तोबालएवतस्मात्त्वयाऽर्थहीनमनुपादेयमात्मविनाशनायबहुविप्रल
प्तं·एकेनापिहंतुंशक्यइतिवृथाप्रलपितं॥९॥हेइंद्रजित्पुत्रप्रवादेनपुत्रशब्देनोपलक्षितस्त्वंमित्र
वद्वभासमानोवस्तुतःशत्रुरेवासि·तदेवाह·यस्यरावणस्यराघवतईदृशंविनाशंनिशम्यापिमोहात्त

नतातमंत्रेतवनिश्चयोस्तिबालस्त्वमद्याप्यविपक्वबुद्धिः॥तस्मात्त्वयाप्यात्मविनाशनायवचो
र्थहीनंबहुविप्रलप्तं॥९॥पुत्रप्रवादेनतुरावणस्यत्वमिंद्रजिन्मित्रमुखोसिशत्रुः॥यस्येदृशं
राघवतोविनाशंनिशम्यमोहादनुमन्यसेत्वं॥१०॥त्वमेववध्यश्चसुदुर्मतिश्चसचापिवध्यो
यइहानयत्त्वांबालंदृढंसाहसिकंचयोद्यप्रावेशयन्मंत्रकृतांसमीपं॥११॥मूढोप्रगल्भोऽवि
नयोपपन्नस्तीक्ष्णस्वभावोल्पमतिर्दुरात्मा॥मूर्खस्त्वमत्यंतसुदुर्मतिश्चत्वमिंद्रजिद्बालतयाब्रवीषि॥१२॥

मनुमन्यसेनवारयसि॥१०॥तस्मात्त्वमेववध्यःपुत्रोपिसन्·यश्चवृद्धानांमंत्रकृतांसमीपंप्रावेशयत्
यश्चानयत्·आगमनार्थंप्रेरितवान्सोपिवध्यः॥११॥मूढःकृत्याकृत्यविवेकहीनःअतएवाप्र
गल्भःमतिप्रागल्भ्यहीनः॥अविनयेनोपपन्नोयुक्तःअल्पमतिःदीर्घदर्शनानर्हबुद्धिःदुरात्माका
मादिदुष्टांतःकरणःमूर्खःसाहसप्रवृत्तिपरःउक्तरीत्याऽत्यंतसुदुर्मतिश्च॥१२॥ ॥

तदेवाहसत्वेनेतिसत्वंबलंवीर्यंपराक्रमणशक्तिःपराक्रमस्तत्कार्यंशौर्यंरणादपराङ्मुखत्वंधैर्यंत
त्कारणंस्थैर्यंतेजःस्मत्याभयंकरत्वंएतैर्गुणैरेकोविभीषणएवतातस्यकनिष्ठोऽस्मिन्कुलेमुक्तः
३॥ हेभीरोप्राकृतेनैकेनापिराक्षसेनरणेतौमानुषराजपुत्रौहियतोनिहंतुंशक्यौअतस्तौकिंनाम

सत्वेनवीर्येणपराक्रमेणधैर्येणशौर्येणचतेजसाच॥ एकःकुलेस्मिन्पुरुषोविमुक्तोविभी
षणस्तातकनिष्ठएषः॥३॥ किंनामतौमानुषराजपुत्रावस्माकमेकेनहिराक्षसेन॥ सुप्राकृते
नापिनिहंतुमेतौशक्यौकुतोभीषयसेस्मभीरो॥४॥ त्रिलोकनाथोननुदेवराजःशक्रोमयाभू
मितलेनिविष्टः॥ भयार्पिताश्चापिदिशःप्रपन्नाःसर्वेतदादेवगणाःसमग्राः॥५॥ ऐरावतोनिस्व
नमुन्नदन्सनिपातितोभूमितलेमयातु॥ विकृष्यदंतौतुमयाप्रसह्यवित्रासितादेवगणाः
समग्राः॥६॥ सोहंसुराणामपिदर्पहंतादैत्योत्तमानामपिशोककर्त्ता॥ कथंनरेंद्रात्मजयोर्न
शक्तोमनुष्ययोःप्राकृतयोःसुवीर्यः॥७॥ अथेंद्रकल्पस्यदुरासदस्यमहौजसस्तद्वचनं
निशम्य॥ ततोमहार्थंवचनंबभाषेविभीषणःशस्त्रभृतांवरिष्ठः॥८॥

गृहीत्वास्मान्कुतोभीष
यसेव्यर्थमेवनतावताविभीमइत्यर्थः॥४॥ तदेवाहत्रिलोकेति भूमितलेनिविष्टःस्वर्गात्प्रच्याव्यभू
मौवंदीकृत्यस्थापितः भयार्पिताभयंअर्पितंएषुतेमद्दत्तभयाःसर्वेदेवगणाःदिशःप्रपन्नाःप्राप्ताः

।५।६।कथंनशक्तोनिग्रहइतिशेषः।७।८।

प्रधानंज्येष्ठत्वादिनाप्राप्तराज्यंसाधुकंराज्यरक्षादेरितिशेषः वैद्यं विद्यावंतं अवमन्यंते गुणवत्त्वे
पि गुणान्नगर्हंति शूरंपरिभवंतिचरंधर्ममन्विष्येतिशेषः ॥४॥ ज्ञातयोज्ञातिरूपाः आततायिनः अग्निदो
गरदश्चैवशस्त्रपाणिर्धनापहः क्षेत्रदारहरश्चैवषडेते आततायिनः तेप्रछन्नहृदयाः प्रछन्नंतत्कार्य

प्रधानंसाधुकंवैद्यंधर्मशीलंचराक्षस ॥ ज्ञातयोप्यवमन्यंतेशूरंपरिभवंतिच ॥४॥ नित्य
मन्योन्यसंहृष्टाव्यसनेष्वाततायिनः ॥ प्रछन्नहृदयाघोराज्ञातयस्तुभयावहाः ॥५॥
श्रूयंतेहस्तिभिर्गीताःश्लोकाःपद्मवनेपुरा ॥ पाशहस्तान्नरान्दृष्ट्वाशृणुतान्गदतोमम
॥६॥ नाग्निर्नान्यानिशस्त्राणिननःपाशाभयावहाः ॥ घोराःस्वार्थप्रयुक्तास्तुज्ञातयोनोभया-
वहाः ॥७॥

42

प्रवृत्ताअतएवघोराअन्योन्यंव्यसनेष्वापत्सुसंहृष्टाभवंति अतएवताज्ञातयोभयावहाः ॥५॥ ज्ञा
तिभीतिंहस्तिगीतेनस्पष्टयतिश्रूयंतइति हस्तिभिः पद्मवनवर्त्तिदिव्यवनगजैःस्वबंधनाय
प्रवृत्तान्पाशहस्तान्नरान्दृष्ट्वापुरापूर्वंहस्तिभिर्गीतायेश्लोकाश्रूयंतेतान्गदतोममवक्त्राच्छृ
णु ॥६॥ स्वार्थप्रयुक्ताःस्वार्थपराःहस्तिपकाद्याज्ञाकरणेउत्तमभोजनलाभादिस्वार्थपराः ॥७॥

ब्रह्मदंडेन· चतुर्मुखकरगृहीतेनप्रतिमाः अमोघाऽनिर्गलिसंहारशक्त्यासमानास्तत्समप्रकाशाश्च
तान्तस्यैवविवरणमर्चिष्मतइति· कालनिकाशरूपान्· कालाग्नितुल्यरूपान्॥१३॥ रत्नानिश्रेष्ठवस्त्र
निनिवेद्यसमर्प्य॥१४॥ अर्भकमानः क॰॥१४॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकां

कोब्रह्मदंडप्रतिमप्रकाशानर्चिष्मतःकालनिकाशरूपान्॥ सहेतबाणान्यमदंडकल्पान्स
मत्तसुक्तास्सुधिराघवेण॥१३॥ धनानिरत्नानिसुभूषणानिनिवासांसिदिव्यानिमणींश्चचित्रान्॥
सीतांचरामायनिवेद्यदेवीवसेमराजन्निहवीतशोकाः॥१४॥ इत्यार्षेश्रीरामायणेयुद्धकांडेपं
चदशः सर्गः॥१५॥ सुनिविष्टंहितंवाक्यमुक्तवंतंविभीषणं॥ अब्रवीत्परुषंवाक्यंरावणः
कालचोदितः॥१॥ वसेत्सहसपत्नेनक्रुद्धेनाशीविषेणच॥ नतुमित्रप्रवादेनसंवसेच्छत्रुसेवि
ना॥२॥ जानामिशीलंज्ञातीनांसर्वलोकेषुराक्षस॥ हृष्यंतिव्यसनेष्वेतेज्ञातीनांज्ञातयःसदा॥३

डेपंचदशःसर्गः॥१५॥ सुनिविष्टं· सुनिविष्टार्थतत्त्वं॥१॥ सपत्नेनापिसहवसेत्· नतुमित्रप्रवा
देनमित्रपदव्यवहार्येणशत्रुसेविनाशत्रुपक्षपातिनानवसेत्· सपत्नेचित्तस्यद्वेषकोद्दोषवप्र
तिष्ठामित्रप्रवादेतुद्वेष्यत्वेनास्निग्धत्वेनचेतिपरमदुःखमितितत्सहवासनिषेधःशत्रुसेवि
नेत्यनेनास्यभगवद्भक्तत्वंसूचितं॥२॥ शीलंस्वभावंजानामि· तदेवविवृणोतिहृष्यंतीति॥३॥

काशपुष्पंपिबतोपिरसाऽलाभस्तथाऽनार्येषुसौहृदंकुर्वतःफलाऽलाभइतिभावः॥१४॥यथागजःपूर्वंस्नात्वाहस्तेनरजोगृहीत्वायथात्मनोदेहंदूषयतिस्नानकृतंनैर्मल्यंनाशयति॰तथानार्याःपूर्वंकृतंस्नेहंस्वयमेवनाशयंतीत्यर्थः॥१५॥त्वत्तोन्योयद्येवंब्रूयात्तदास्मिन्मुहूर्तेनभवेत्॰नजीवे

यथामधुकरस्तर्षात्काशपुष्पंपिबन्नपि॥रसमत्रनविंदेततथानार्येषुसौहृदं॥१४॥
यथापूर्वंगजःस्नात्वागृह्यहस्तेनवैरजः॥दूषयत्यात्मनोदेहंतथानार्येषुसौहृदं॥१५॥
योन्यस्त्वेवंविधंब्रूयाद्वाक्यमेतन्निशाचर॥अस्मिन्मुहूर्तेनभवेत्त्वांतुधिक्कुलपांसन॥१६॥इत्युक्तःपरुषंवाक्यंन्यायवादीविभीषणः॥उत्पपातगदापाणिश्चतुर्भिःसहराक्षसैः॥१७॥अब्रवीच्चतदावाक्यंजातक्रोधोविभीषणः॥अंतरिक्षगतःश्रीमान्भ्रातावैराक्षसाधिपं॥१८॥

43

नः॰त्वांतुधिक्सोदरत्वेनवधानर्हत्वात्॰धिक्कृतिरेवतेदंडइतिभावः॥१६॥परुषंवाक्यं॰पूर्वोक्तंलंकावस्थानेपिएतैःसहनाशस्यदुर्वारत्वात्॰ज्येष्ठोप्यसौउत्पथप्रतिपन्नस्यकार्याकार्यमजानतःगुरोरप्यवलिप्तस्यपरित्यागोविधीयतइतिशास्त्रवलात्सर्वथापरित्याज्यएवेत्यालोच्यतत्सभांहित्वाखमुत्पपातःचतुर्भिर्मंत्रिभिः॥१७॥१८॥ अ

एतेमज्ञातिभूताः पूर्वंगृहीतागजाः वध्यंतिकरिष्यंतीत्यर्थः नोविदितंचशात्रशोनुभूतंचेत्यर्थः॥८॥ संपन्नं
हृद्यकव्यसाधनसंपत्॥९॥ ततइति·रावणवाक्यं· अहंलोकसत्कृतइतियत्तुतेनेष्टंनप्रियमिति
मन्येतथैश्वर्यप्राप्त्यादिकमपि॥१०॥ अनार्येषुकुरस्वभावेषु॥११॥ यथागर्जतांसिंचतामपिमेघानां

उपायमेनेवदंतिग्रहणेनात्रसंशयः॥ कृत्स्नाद्भयाज्ज्ञातिभयंसुकष्टंविदितंचनः॥८॥
विद्यतेगोषुसंपन्नंविद्यतेज्ञातितोभयं॥ विद्यतेस्त्रीषुचापल्यंविद्यतेब्राह्मणेतपः॥९॥ ततो
नेष्टमिदंसौम्ययदहंलोकसत्कृतः॥ ऐश्वर्यमभिजातश्चरिपूणांमूर्ध्निचस्थितः॥१०॥ य
थापुष्करपत्रेषुपतितास्तोयबिंदवः॥ नश्लेषमभिगच्छंतितथानार्येषुसौहृदं॥११॥ यथा
शरदिमेघानांसिंचतामपिगर्जतां॥ नभवत्यंबुसंक्लेदस्तथानार्येषुसौहृदं॥१२॥ यथा
मधुकरस्तर्षाद्रसंविंदन्नतिष्ठति॥ तथात्वमपितत्रैवतथानार्येषुसौहृदं॥१३॥

संवंधेपथिव्याअंवुसंक्लेदोंबुव्याप्ततानभवतितथानार्येषुसौहृदंनिष्फलमितिभावः य
द्वावर्षासुगर्जतांसिंचतामपिमेघानांशरदिनांबुसंक्लेदस्तथानार्येषुसौहृदमल्पकालस्था
यीत्यर्थः॥१२॥ यथामधुकरस्तर्षादभिलाषाद्रसंपुष्परसंविंदन्नपितत्रैवनतिष्ठतितथाना
र्येषुसौहृदमपिनतिष्ठतीत्वमपितथानादृशोनार्योसीत्यर्थः॥१३॥ ॥

कालाभिपन्नाःअधर्मतःकालपाशबद्धाः॥२४॥यदुक्तमप्रियमिवहितंतद्भवान्मर्षयतुक्षम्यतां॥२५॥मयावि
नासुखीभवेतिव्यंग्योक्तिः॥२६॥अचिरमानः क॰॥१५॥इतिश्रीरामाभिरामेश्रीरा॰राति॰युद्ध॰षो

शूराश्चबलवंतश्चकृतास्त्राश्चनरारणे॥कालाभिपन्नाःसीदंतियथावालुकसेतवः॥२४॥त
न्मर्षयतुयच्चोक्तंगुरुत्वाद्धितमिच्छता॥आत्मानंसर्वथारक्षपुरींचेमांसराक्षसां॥स्वस्तिते
स्तुगमिष्यामिसुखीभवमयाविना॥२५॥निवार्यमाणस्यमयाहितैषिणानरोचतेतेव
चनंनिशाचरपरांतकालेहिगतायुषोनराहितंनगृह्णंतिसुहृद्भिरीरितं॥२६॥इत्यार्षे
श्रीरा॰युद्ध॰षोडशःसर्गः॥१६॥इत्युक्त्वापरुषंवाक्यंरावणंरावणानुजः॥आजगाममु
हूर्तेनयत्ररामःसलक्ष्मणः॥१॥तंमेरुशिखराकारंदीप्तामिवशतह्रदां॥गगनस्थंमही
स्थास्तेददृशुर्वानराधिपाः॥२॥येचाप्यनुचरास्तस्यचत्वारोभीमविक्रमाः॥तेपिवर्मा
युधोपेताभूषणोत्तमभूषिताः॥३॥सचमेघाचलप्रख्योवज्रायुधसमप्रभः॥वरायुधधरो
वीरोदिव्याभरणभूषितः॥४॥

डशःसर्गः॥१६॥ अथविभीषणस्यरामसमीपगमनं॰इतीति॰प
रुषं॰आत्मानंसर्वथेत्यादिरूपं॰रावणानुजोविभीषणःयत्रसलक्ष्मणोरामस्तत्राजगाम॰उत्पथ
प्रतिपन्नत्वाद्देहसंबंधेनगुरुंरावणंपरित्यज्यजगद्गुरुंस्मरणमात्रेणसकलपापहरंगुरुंरामंप्र
त्याजगामेत्याशयः॥१॥मेरुशिखराकारं॰उन्नतत्वपीवरत्वबहुलत्वैस्तदाकारं॰दीप्तत्वगगनस्थ
त्वाभ्यांशतह्रदासाम्यं॥२।३।४॥

अथ सभासदां ज्येष्ठत्यागो नाऽधर्मोयमिति शंकां निवर्त्तयन्नाह सत्वंभ्रातेत्यादि ज्येष्ठत्वादिगुणको
पी नधर्मपथेस्थितः परदाराहरणादिरूपानेकाधर्मशालित्वात् पतितेः सह संव्यवहारो नविद्य
ते इति स्मृतेः पतितमाचार्यं ज्ञातिं द्रष्टुं नगच्छेत् नचास्मादुपयुंजीत यदृच्छासंनिपाते उपसंगृह्य तू
ष्णीं व्रजेदिति स्मृतेः ष्वाग्रजस्यापि ते इदं परुषं वाक्यं नक्षमामि अतः परमिह स्थित्वेति शेषः॥१८॥ सु

सत्वंभ्रातासिमे राजन् ब्रूहि मां यद्यदिच्छसि॥ ज्येष्ठो मान्यः पितृसमो न च धर्मपथे स्थितः॥ इदं
हि परुषं वाक्यं न क्षमाम्यग्रजस्य ते॥१९॥ सुनीतं हितकामेन वाक्यमुक्तं दशानन॥ नगृह्णंत्यक
तात्मानः कालस्य वशमागताः॥२०॥ पुरुषाः सुलभा राजन्सततं प्रियवादिनः॥ अप्रियस्य च
पथ्यस्य वक्ता श्रोता च दुर्लभः॥२१॥ बद्धं कालस्य पाशेन सर्वभूतापहारिणा॥ न नश्यंतमुपे
क्षे त्वां प्रदीप्तशरणं यथा॥२२॥ दीप्तपावकसंकाशैः सितैः कांचनभूषणैः॥ न त्वामिच्छा
म्यहं द्रष्टुं रामेण निहतं शरैः॥२३॥

नीतं सुनिश्चितागामिफलबोधकं वाक्यं हितकामेनो
क्तं तत्तु त्वया नगृहीतमिति शेषः तादृश्येव लोकस्थितिरित्याह नगृह्णंतीति सुनीतवाक्यार्थ
मिति शेषः॥२०॥ उक्तमेवार्थं पुनर्मारीचोक्तस्मरणेनाह सुलभा इति॥२१॥ सर्वभूतापहारिकालपाशे
न बद्धं नश्यंतं त्वां नोपेक्षेऽनो मया किंचिद्धितमुक्तमिति शेषः॥२२॥ निहतं त्वां द्रष्टुं नेच्छामि निश्चितएवो
क्तमिति शेषः॥२३॥

रा मा॰ यु॰
४५

रावणोनामेत्यादिनास्वस्यरामानुकूल्यतत्प्रातिकूल्यराहित्यादिरूपशरणागत्यंगबोधनं· आनुकूल्यस्यसंकल्पःप्रातिकूल्यस्यवर्जनंरक्षिष्यतीतिविश्वासोगोप्तृत्ववरणं· तथाआत्मनिक्षेपकार्पण्येषड्विधाशरणागतिरित्युक्तेः रावणत्वेनसर्वलोकपीडकत्वंदुर्वृत्तत्वेनाकृत्यकर्तृत्वंराक्षसत्वेनजातिक्रौर्यंराक्षसेश्वरइत्यनेनभृत्यक्रौर्यंतद्भ्रातृत्वेनस्वस्यापिदोषवत्वकथनात्सर्वहानिरूपकार्पण्यमुक्तं ।१२

45

रावणोनामदुर्वृत्तोराक्षसोराक्षसेश्वरः॥तस्याहमनुजोभ्राताविभीषणइतिश्रुतः॥१२॥तेनसीताजनस्थानात्हृताहत्वाजटायुषं॥रुद्धाचविवशादीनाराक्षसीभिःसुरक्षिता॥१३॥तमहंहेतुभिर्वाक्यैर्विविधैश्चन्यदर्शयं॥साधुनिर्यात्यतांसीतारामायेतिपुनःपुनः॥१४॥सचनप्रतिजग्राहरावणःकालचोदितः॥उच्यमानंहितंवाक्यंविपरीतइवौषधं॥१५॥सोहंपरुषितस्तेनदासवच्चावमानितः॥त्यक्त्वापुत्रांश्चदारांश्चराघवंशरणंगतः॥१६॥

दुर्वृत्तत्वमेवाह· तेनेति· राक्षसीभिःसुरक्षितेत्यनेनसीतापातिव्रत्यादिहानिःसूचितातद्धानौहिताभीरक्षणानुपयोगइतिभावः॥१३॥हेतुभिर्हेतुमद्भिःनिर्यात्यतांदीयतामितिहेतुमद्भिर्वाक्यैःपुनःपुनःसाधुन्यदर्शयमित्यन्वयः अनेनभगवदानुकूल्यसंकल्पःप्रातिकूल्याभावश्चदर्शितः॥१४विपरीतोमुमूर्षुः॥१५॥दासवदवमानितःभ्रातापिसन्नितिशेषःशरणंगतइत्यनेनात्मनिक्षेपरूपमंगंदर्शितं॥१६॥

राम॰
४५

आत्मपंचमं आत्मा पंचमो यस्य तं मंत्रिचतुष्टयसहितं तमिति यावत्॥५॥६॥७॥शालान्शालवृक्षान्॥८
यावद्धता निपतंति निपतिष्यंतीत्यर्थः॥९॥तेषामित्यनादरे षष्ठी तानन्योन्यं संभाषमाणाननादृत्य राम
स्य भगवतः परमदयालुत्वभावनया तेषामनादरः खस्थ एव व्यतिष्ठतेति तिष्ठतेर्हि प्रयोगो नि

तमात्मपंचमं दृष्ट्वा सुग्रीवो वानराधिपः॥वानरैः सह दुर्धर्षश्चिंतयामास बुद्धिमान्॥५॥
चिंतयित्वा मुहूर्त्तं तु वानरांस्तानुवाच ह॥हनूमत्प्रमुखान्सर्वानिदं वचनमुत्तमं॥६॥एष सर्वा
युधोपेतश्चतुर्भिः सह राक्षसैः॥राक्षसोभ्येति पश्यध्वमस्मान्हंतुं न संशयः॥७॥सुग्रीवस्य
वचः श्रुत्वा सर्वे ते वानरोत्तमाः॥शालानुद्यम्य शैलांश्च इदं वचनमब्रुवन्॥८॥शीघ्रं व्यादि
श नो राजन्वधायैषां दुरात्मनां॥निपतंतु हता यावद्धरण्यामल्पचेतनाः॥९॥तेषां संभाषमा
णानामन्योन्यं स विभीषणः॥उत्तरं तीरमासाद्य खस्थ एव व्यतिष्ठत॥१०॥स उवाच महाप्रा
ज्ञः स्वरेण महता महान्॥सुग्रीवं तांश्च संप्रेक्ष्य खस्थ एव विभीषणः॥११॥

र्भयत्वेनावस्थानसूचनाय॥१०॥महाप्राज्ञः सर्वदोषाकररावणत्यागात् निर्दुष्टसर्वगुणा
कररामाश्रयणाच्च महाप्राज्ञत्वं अत एव महान् महता स्वरेण सर्वलोकशरण्यस्यार्त्तरव
श्रवणाय स्वरमहत्त्वं धीरगंभीरत्वं वा स्वरे महत्त्वं तेन निर्भयत्वप्रकाशः॥११॥

यदेवमतोमंत्रैइति·वानराणांचपरेषांचक्रमादनुग्रहनिग्रहार्थंत्वंमंत्रेकार्याकार्यविचारेव्यूहेसेनास
न्निवेशेनयेसेनानयनेयद्वाविचार्यनिश्चितानामुपायानांतत्तद्विषयप्रयोगेचारेपरबलवृत्तांतज्ञान
फलकेचारपुरुषप्रवर्तनेयुक्तःसावधानोभवितुमर्हसिएवंसतितेभद्रमित्यर्थः॥२०॥युक्तमेवैतद्दि
त्याह·अंतरिति·अंतर्धानगताःअदृश्यसंचारस्वभावाःनिकृतिज्ञाःकपटोपायेनगूढविप्रियकर

मंत्रेव्यूहेनयेचारेयुक्तोभवितुमर्हसि॥वानराणांचभद्रंतेपरेषांचपरंतप॥२०॥अंतर्द्धा
नगतास्त्वेतेराक्षसाःकामरूपिणः॥शूराश्चनिकृतिज्ञाश्चतेषांजातुनविश्वसेत्॥२१॥प्रणिधी
राक्षसेंद्रस्यरावणस्यभवेदयं॥अनुप्रविश्यसोस्मासुभेदंकुर्यान्नसंशयः॥२२॥अथवास्वय
मेवैषछिद्रमासाद्यबुद्धिमान्॥अनुप्रविश्यविश्वस्तेकदाचित्प्रहरेदपि॥२३॥मित्राट
विबलंचैवमौलभत्यबलंतथा॥सर्वमेतद्बलंग्राह्यंवर्जयित्वाद्विषद्बलं॥२४॥

णाभिज्ञाः॥२१॥किंचयोयमागतःसरावणस्यप्रणिधिश्चारएवभवेत्·अस्तुकिंततस्तत्राह·अन्वि
ति·भेदं·अंगदादिविषये॥२२॥विश्वस्तेप्राप्तविश्वासेऽस्मद्बलइतिशेषः॥२३॥नन्वनेनाप्यागतेना
स्माकमधिकंबलमेवभविष्यतीत्याशंक्यनेत्याह·मित्रेति·मित्रेणआटविकेनारण्यकेनप्रेषि
तंबलंमित्राटविबलं·आप्तबंधुप्रहितंबलं·मूलंवशीकृतोस्त्रीयइतिकोशः·भत्यबलं·तत्का
लभतिदानसंपादितंबलं·मौलभत्यबलमितिसमाहारद्वंद्वः·द्विषत्प्रेरितंबलंद्विषद्बलं॥२४

सर्वलोकशरण्यायममवंशानुरूपश्चधर्मात्माचभविष्यतीतिकेकस्यैब्रह्मपुत्रेणविश्रवसावरदानात्·
सात्विकत्वेनब्रह्मतस्तथैवश्चवरत्वेनचविभीषणस्यसर्वलोकस्रष्टुःसर्वलोकांतर्यामिणश्च·यमव
तारइतिज्ञानात्सर्वलोकशरण्यत्वमहात्मत्वज्ञानंरामविषयेबोध्यं·राघवायकिंत्वर्थिनामर्थितदान
दीक्षाकृतव्रतश्लाघ्यमिदंकुलंनइत्यादिवचनैःप्रसिद्धवैभवैरघुवंशेऽवतीर्णाय·अनेनार्थिप्रार्थिना
वैफल्याभावोध्वनितः·क्षिप्रमित्यनेनशीतलसुरभिसलिलंप्राप्यतृषितस्येवविलंबासहत्वंउपस्थि

निवेदयतमांक्षिप्रंराघवायमहात्मने॥सर्वलोकशरण्यायविभीषणमुपस्थितं॥१७॥एत
त्तुवचनंश्रुत्वासुग्रीवोलघुविक्रमः॥लक्ष्मणस्याग्रतोरामंसंरब्धमिदमब्रवीत्॥१८॥प्रवि
ष्टःशत्रुसैन्यंहिप्राप्तःशत्रुरतर्कितः॥निहन्यादंतरंलब्ध्वाउलूकोवायसानिव॥१९॥ श्रीरा

तंशरणत्वेनप्राप्तंनिवेदयतशरणागतइतिज्ञापयत·अनेनगोप्तृत्ववरणंरक्षिष्यत्यवश्यमेवेतिवि
श्वासश्चदर्शितः॥१७॥एतत्तुविभीषणोक्तं·अथलोकदृशाशत्रुपक्षोनविश्वसनीयइतिमत्वाराम
मपितथैवबोधयतीत्याह·लक्ष्मणस्येति·संरब्धं·संरंभोपेतमितिक्रियाविशेषणं॥१८॥इदंपदार्थ
माह·प्रविष्टइति·कश्चिदस्मच्छत्रुःराक्षसत्वात्स्ववंशावैंरावणस्यसैन्यंप्रविष्टइदानीमतर्कि
तागमनएवसन्अस्मत्सैन्यंप्राप्तःसोसावंतरंलब्ध्वाउलूकोवायसानिवनोहन्यात्॥१९॥

सुग्रीवस्यसुमतितांस्वहितैषित्वंचमंत्रिभ्यश्राहयदुक्तमिति·मंत्रेव्यूढेइत्यादिनेतिशेषः अत्यर्थंहेतुमत्भृशं
युक्तिमत्॥३२॥तस्ययुक्तत्वमाह·सुहृदामिति·सुहृदांशाश्वतींभूतिमिच्छताबुद्धिमताप्रशस्तबुद्धिनासमर्थे
नविचारसमर्थेनसदाऽर्थकृच्छ्रेषुकृत्याकृत्यसंदेहेषुउपसंदेष्टुंसम्यगुपदेष्टुंयुक्तंउपदेशकरणमु
चितमितिभावः॥३३॥इत्येवमितिमित्रैर्मित्रेभ्यउपदेष्टव्यमेवेतियतोऽयमपिस्वस्वमतंब्रूतेत्येवंपरिपृष्टाहर

यदुक्तंकपिराजेनरावणावरजंप्रति॥वाक्यंहेतुमदत्यर्थंभवद्भिरपिचश्रुतं॥३२॥सुहृदाम
र्थकृच्छ्रेषुयुक्तंबुद्धिमतासदा॥समर्थेनोपसंदेष्टुंशाश्वतींभूतिमिच्छता॥३३॥इत्येवंपरिपृ
ष्टास्तेस्वंस्वंमतमतंद्रिताः॥सोपचारंतदारामम्ऊचुःप्रियचिकीर्षवः॥३४॥अज्ञातंनास्तितेकिं
चित्त्रिषुलोकेषुराघव॥आत्मानंपूजयन्रामपृच्छस्यस्मान्सुहृत्तया॥३४॥त्वंहिसत्यव्र
तःशूरोधार्मिकोदृढविक्रमः॥परीक्ष्यकारीस्मृतिमान्निसृष्टात्मासुहृत्सुच॥३६॥तस्मादेकैक
शस्तावद्ब्रुवंतुसचिवास्तव॥हेतुतोमतिसंपन्नाःसमर्थाश्चपुनस्तथा॥३७॥

यःस्वंस्वंमतमूचु
रित्यन्वयः॥३४॥सोपचारमूचुरित्युक्तंतत्रोपचारंदर्शयतिअज्ञातमितिः आत्मानंअस्माकमात्मा
नंसुहृत्तयासुहृद्भावप्रकाशनेनपूजयन्इत्यर्थः यद्वा एवंवानरेष्वप्ययंसुहृदित्यात्मनःकीर्तिंप्रथय
न्नित्यर्थः॥३५॥सुहृत्सुनिसृष्टात्माकृतविश्वासःसत्यव्रतःरक्षस्स्वपिशरणागतत्राणव्रतपालकः॥३६॥त

वसचिवाहेतुतोहेतुयुक्तंब्रुवन्त्वितिविधिः।३७

अस्याद्विषद्वत्त्वमेव दर्शयति· प्रकृत्येति· अमित्रस्य रावणस्य ॥२५॥ अमित्रभ्रातृत्वं तद्वचनादेव निश्चि
तमित्याह· रावणस्येति· इति तन्मुखादेव श्रुतमित्यर्थः ॥२६॥ इदमपि वचो न वास्तवमित्याह· रावणे
नेति· प्रणीतं प्रेषितं अवेहि· अतस्तस्य निग्रहं क्षमं मन्ये· क्षमवतां युक्तव्यापारवतां । क्षमावतां वा

प्रकृत्या राक्षसो ह्येष भ्राता ऽमित्रस्य वै प्रभो ॥ आगतश्च रिपुः साक्षात्कथमस्मिंश्च विश्वसेत् ॥
।२५। रावणस्यानुजो भ्राता विभीषण इति श्रुतः ॥ चतुर्भिः सह रक्षोभिर्भवन्तं शरणं गतः ॥२६॥
रावणेन प्रणीतं हि तमवेहि विभीषणं ॥ तस्याहं निग्रहं मन्ये क्षमं क्षमवतां वर ॥२७॥ रा
क्षसो जिह्मया बुद्ध्या संदिष्टो यमिहागतः ॥ प्रहर्तुं मायया छन्नो विश्वस्ते त्वयि चानघ ॥२८
वध्यतामेष तीव्रेण दण्डेन सचिवैः सह ॥ रावणस्य नृशंसस्य भ्राता ह्येष विभीषणः ॥२९॥
एवमुक्त्वा तु तं रामं संरब्धो वाहिनीपतिः ॥ वाक्यज्ञो वाक्यकुशलं ततो मौनमुपागमत् ॥३०॥
सुग्रीवस्य तु तद्वाक्यं श्रुत्वा रामो महाबलः ॥ समीपस्थानुवाचेदं हनुमत्प्रमुखान्कपीन् ॥३१॥

स्व आर्षः ॥२७॥ त्वयि प्रहर्तुं रावणेन संदिष्टः सनिहागतः ॥२८॥ अत एषो वध्यतां ॥२९॥ वाक्यकुश
लं राममित्यन्वयः ॥३०॥ अथ रामः शरणागतं श्रुत्वा आनिनीषुरपि प्रागेव सुग्रीववाक्यभंगस्या
युक्तत्वमात्मनो व्यविचार्य [illegible] सुग्रीवस्येति ॥३१॥ ॥ श्री ॥

४५ । अदेशकाले । स्वामिदेशं विहाय रिपुदेशआगमनेनानुचितदेशप्राप्तत्वं । स्वामिनः संकटकाले तत्प्रहाणेनौचित्यादनुचितकालप्राप्तोतः शंक्यतां सर्वथाशंकाविषयत्वेन त्यागार्ह एवायमिति

जांबवांस्त्वथ संप्रेक्ष्य शास्त्रबुध्या विचक्षणः । वाक्यं विज्ञापयामास गुणवद्दोषवर्जितं ॥
॥४५॥ बद्धवैराच्च पापाच्च राक्षसेंद्राद्विभीषणः । अदेशकाले संप्राप्तः सर्वथा शंक्यतामयं ॥४६
ततो मैंदस्तु संप्रेक्ष्य नयापनयकोविदः । वाक्यं वचनसंपन्नो बभाषे हेतुमत्तरं ॥४७॥
अनुजो नाम तस्यैष रावणस्य विभीषणः । पृच्छ्यतां मधुरेणायं शनैर्नरपतीश्वर ॥४८॥
भावमस्य तु विज्ञाय तत्त्वतस्त्वं करिष्यसि । यदि दुष्टो न दुष्टो वा बुद्धिपूर्वं नरर्षभ ॥४९॥

भावः ॥४६॥ हेतुमत्तरं अतिशयेन हेतुमेनन् ॥४७॥ अनुजो नामेति । नामेति प्रसिद्धौ । अनेयं मधुरेण सौम्यभावेनैव पृच्छ्यतां गूढदूतसुखेन रावणस्य वृत्तांतमिति शेषः ॥४८॥ अस्य बुद्धिपूर्वकदुष्टत्वान्यतरत्वतो निर्णीय ततस्त्वं तत्तदुचितकृत्यं करिष्यसि ॥४९॥

इत्युक्तेऽइति॰ हनूमदादिमंत्रिभिरितिशेषः विभीषणपरीक्षार्थं॰ तत्परीक्षाफलकं वचनं राघवायांगदोयु
वराजत्वादग्रतउवाच ॥३५॥ तर्कणएव॰ शंकाएव॰ विश्वासनीयः विश्वासप्रयुक्ताव्यवहारार्हः सहसानकर्त्त
व्योऽपितुशनैरित्यर्थः ॥३६॥ तत्रहेतुमाह॰ भावमांतरं ॥४०॥ तस्यतस्यगुणदोषपरीक्षणेनर्थानर्थौ हि ता

इत्युक्ते राघवायाथमतिमानंगदोग्रतः ॥ विभीषणपरीक्षार्थमुवाचवचनं हरिः ॥३५॥ शत्रोः
सकाशात्संप्राप्तः सर्वथातर्क्यएव हि ॥ विश्वासनीयः सहसानकर्त्तव्यो विभीषणः ॥३६॥ छादयि
त्वात्मभावं हि चरंति शठबुद्धयः ॥ प्रहरंति चरंध्रेषु सोनर्थः सुमहान्भवेत् ॥४०॥ अर्थानर्थौ वि
निश्चित्य व्यवसायं भजेत ह ॥ गुणतः संग्रहं कुर्याद्दोषतस्तु विसर्जयेत् ॥४१॥ यदि दोषो महांस्त
स्मिंस्त्यज्यतामविशंकितं ॥ गुणान्वापि बहून्ज्ञात्वा संग्रहः क्रियतां नृप ॥४२॥ शरभस्त्वथ निश्चि
त्य सार्थं वचनमब्रवीत् ॥ क्षिप्रमस्मिन्नरव्याघ्र चारः प्रतिविधीयतां ॥४३॥ प्रणिधाय हि चारेण य
थावत्सूक्ष्मबुद्धिना परीक्ष्य च ततः कार्यो यथान्यायं परिग्रहः ॥४४॥

हितत्वेनिश्चित्यतदनुरूपंव्य
वसायमुद्योगंभजेतेति॰ ह॰ प्रसिद्धं॰ कस्मिन्सतिकीदृशोव्यवसायस्तत्राह॰ गुणइति॰ गुणाश्रय
स्त्वनेत्यर्थः ॥४१॥ तदेवविवृणोति॰ यदिदोषइति ॥४२॥ सार्थंसोपपत्तिकं चारो इतः प्रतिविधी
यतांप्रेष्यतां ॥४३॥ प्रणिधाय चारं प्रेषयित्वा सूक्ष्मबुद्धिना चारेण च यथान्यायं परिग्रहस्ततः

संग्रहः कार्यो ॥४४॥

तदेवाह ऋतेइति नियोगादृतं·तमाहुयतस्यैववृत्तांतनिवेदनरूपनियोगंविनासामर्थ्यंदानोपा
दानौचित्यंबोद्धुंनशक्यते·तर्हि इगानयेतिचेत्तत्राह·सहसाहठाद्धि नियोगोपिराजसंनिधिप्रा
पणरूपंवृत्तांतप्रतिपादनानुज्ञादानरूपविनियोगोपिदोषवानेवप्रतिभाति·तस्मात्समर्थद्वा
रातदीयवृत्तांतंज्ञात्वाभावत्समीपानयनमुचितमितिभावः॥५४॥तर्हिशरभयत्तमेवतवापिकि
मित्याशंक्यतन्मतंदूषयति· चारेति·प्रणिहितमितिभावेनिष्ठाचारप्रेषणंयुक्तमितियदु

ऋतेनियोगात्सामर्थ्यमवबोद्धुंनशक्यते॥सहसाविनियोगोपिदोषवान्प्रतिभातिमे।
।५४॥चारप्रणिहितंयुक्तंयदुक्तंसचिवैस्तव॥अर्थस्यासंभवात्तत्रचारणंनोपपद्यते॥५५॥
अदेशकालेसंप्राप्तइत्ययंयद्विभीषणः॥विवक्षातत्रमेस्तीयंतांनिबोधयथामति॥५६॥

क्तंतवसचिवैःशरभादिभिस्तदपिनोपपद्यतेइतिशेषः यतस्तत्रचारप्रेषणेकारणंनोपपद्यते·त
त्प्रयोजनंनास्ति·कुतः अर्थस्यासंभवादेवतत्साध्यप्रयोजनासंभवादेव·अयंभावः असन्निहि
तेऽप्रकटवृत्तांतेतत्ज्ञानायतत्प्रेषणं·नतुप्रत्यक्षेप्रकटतयास्ववृत्तांतावेदकइति॥५५॥अ
थजांबवदुक्तमदेशकालप्राप्तिरूपंशंकास्पदंस्वरूपासिद्ध्यादूषयति·अदेशेति·अयंविभी
षणोऽदेशकालेसंप्राप्तइतियज्जांबवतोक्तंतत्रतद्विषयेएषदेशःकालश्चयथाभवतितथे
यंमेविवक्षास्तीत्यन्वय॥५६॥

अथ हनूमान् सुग्रीवोक्तं वध्यत्वं राजवचनत्वादत्यंताविचारमूलकमित्युपे ५. ५९. क्षया परिग्रहत्यागरूपमंगदादिवचोनुवादपूर्वकं दूषयन् इदानीमेव दोषाऽभावनिर्णयं ५ ५९ 'सुकरत्वादविलंबेन परिग्रहण एव युक्त इत्याह। अथेति। संस्कारसंपन्नः सकलशास्त्रज्ञानजसंस्कारसंयुक्तः। श्लक्ष्णां श्लक्ष्णया संदर्भे अर्थवत् प्रकटार्थवत्। लघु मितशब्दं। मधुरं श्रवणमात्रेण सुखकरं ॥५०॥ समर्थं सकलशास्त्रार्थतत्त्वनिरूपणसमर्थं अतिशाययितुं अभिभवितुं ॥५१॥ वादात्तर्ककौशलप्रक

अथ संस्कारसंपन्नो हनुमान् सचिवोत्तमः। उवाच वचनं श्लक्ष्णमर्थवन्मधुरं लघु ॥५०॥
न भवंतं मतिश्रेष्ठं समर्थं वद तां वरं। अतिशाययितुं शक्तो बृहस्पतिरपि ब्रुवन् ॥५१॥
न वक्षान्नापि संघर्षान्नाधिक्यान्न च कामतः। वक्ष्यामि वचनं राजन् यथार्थं रामगौरवात् ॥५२॥
अर्थानर्थनिमित्तं हि यदुक्तं सचिवैस्तव। तत्र दोषं प्रपश्यामि क्रिया न ह्युपपद्यते ॥५३॥

टनाद्धेतोः संघर्षात् सचिवांतरस्पर्धावशात् नाधिक्यात् अधिकबुद्धिमत्त्वाभिमानात् कामतः वचनेच्छातः यदेवमतो यथार्थमेव वक्ष्यामि। गौरवात् कार्यगौरवानुरोधेनेत्यर्थः ॥५२॥ तत्रादावंगदमतं दूषयति। अर्थेत्यादि। अर्थानर्थनिमित्तं गुणदोषनिश्चयनिमित्तं तव सचिवैरंगदादिभिर्यदुक्तं तत्र दोषं अंशेनैव गुणं पश्यामि। शंकितव्यः परीक्षणीयश्चेति यदुक्तं नद्युक्तमेव किंत्वेवं निश्चय इत्यनुक्तेरिदमनुत्तरं तदेवाह। क्रिया न त्यूपपद्यते। क्रिया उत्तररूपा यद्वा परीक्षणरूपा क्रियेदानीं नोपपद्यते इत्यर्थः ॥५३॥

कासेत्यत्राह·पृच्छ्यमानइति·अज्ञातपुरुषेणकोभवान्कुतआगतइति·किमर्थमागतइत्यादिपृच्छ्यमानःप्रष्टस्वरूपज्ञानरहितोबुद्धिमान्पुरुषस्तद्वचःसहसाझाक्विशंकेत·नेमंजानामिकेनायंप्रेषि

पृच्छ्यमानोविशंकेतसहसाबुद्धिमान्वचः॥
तत्रमित्रंप्रदुष्येतमिथ्यापृष्टंसुखागतं॥६०॥

तः किमर्थंपृच्छतीतिशंकाकुलएवभवतिकेवलंनतुउत्तरयतिकिंचित्यदितुप्रष्टुःशनैर्ज्ञानंभवतितदासुखागतंसुखार्थमागतंमित्रंचेत्तदामिथ्यापृष्टंवृथापुनःपृष्टंसन्मित्रभावात्प्रदुष्येतमिद्येतकिमर्थमेवंविचारयतिपुरुषमुखेनेतिस्तब्धस्नेहंभवतिएवंचमित्रहानिरितिभावः
॥६०॥

तंविचत्ताविषयमाह· पुरुषादिति· पापात्पुरुषाद्रावणादुत्तमंपुरुषंत्वांप्राप्यबुध्यानिश्चित्यतथा
द्वयोस्तयोर्दोषगुणावपिप्राप्यबुध्यानिश्चित्ययदत्रयुक्तंकालोचितमागमनंकृतंतत्तस्यैवबु
द्धितःसदृशंपुरुषादित्यर्धोक्तस्यैवविवरणंदौरात्म्यमिति· परदारापहरणान्रावणेदौरात्म्य
त्वयिविक्रमंचकक्षपुटेरावणंकृत्वाचतुसागरीप्रदक्षिणंकृतवतोवालिनएकेनैवबाणे

एषदेशश्चकालश्चभवतीहयथातथा। पुरुषात्पुरुषंप्राप्यतथादोषगुणावपि ॥५७॥
दौरात्म्यंरावणेदृष्ट्वाविक्रमंचतथात्वयि। युक्तमागमनंत्वत्रसदृशंतस्यबुद्धितः ॥५८॥
अज्ञातरूपैःपुरुषैःसराजन्पृच्छतामिति। यदुक्तमत्रमेप्रेक्षाकाचिदस्तिसमीक्षिता ॥५९॥

नत्वयाहननादृष्टेत्यर्थः ॥५७॥५८॥ अथैनमाकार्यतद्वचनतद्भावदर्शनाभ्यामेवतदीयगुण
दोषावगंतव्याविति स्वमतंस्थिरीकर्तुंचारप्रेषणपक्षेदोषांतरमाह· ज्ञातेति· अज्ञातकुलशी
लप्रयोजनैःपुरुषैश्चारैःसविभीषणःपृच्छतामितियन्मैंदेनोक्तमत्रमेमयासमीक्षितास
म्यकपरीक्षिताकाचित्प्रेक्षाधीरस्ति ॥५९॥

ननुत्वयैवप्रथमंपरीक्ष्यतामितिचेन्मयापरीक्षितएवेत्याह॥नत्वस्येतिदुष्टभावता·वचनचेष्टा
दिभिर्दुष्टांतःकरणत्वंनलक्ष्यतेप्रसन्नवदनतादृश्यते॥६२॥उक्तार्थस्यैवस्थैर्यायाभ्यासःअशं
कितेति·अशंकितमतिःनिश्चितशरणागमनमतिः रामशरणागमनमेवममेष्टसाधनमि
तिसुप्रतिष्ठितचित्तःअतएवस्वस्थःसुस्वभावएवभूत्वायंपरिसर्पतिनशाठोगूढविप्रियधी

नत्वस्यब्रुवतोजातुलक्ष्यतेदुष्टभावता॥प्रसन्नंवदनंचापितस्मान्मेनास्ति
संशयः॥६२॥अशंकितमतिःस्वस्थोनशठःपरिसर्पति॥नचास्यदुष्टा
वागस्तितस्मान्मेनास्तिसंशयः॥६३॥आकारःछाद्यमानोपिनशक्यो
विनिगूहितुं॥बलाद्धिविवृणोत्येवभावमंतर्गतंनृणां॥६४॥

भूत्वादुष्टवाक्दुष्टशब्दार्थदोषवती॥६३॥ननुशाठोप्येवंवक्ष्यतीत्याशंक्याह्याकारइति·आ
कारआंतरोभावःयावच्छक्यंछाद्यमानोपिनसर्वात्मनानिगूहितंशक्यःकुतस्तत्राह·बलाद्धि
ति·भावंशाठभावंसाधुभावंच·विवृणोत्येव·अंतर्यामिदेवतेतिशेषः·साहितथावचनादिप्रे
रणयातंप्रकटीकरोतीत्यर्थः·अस्यत्रिरेकरूपवादान्निर्दुष्टत्वंनिर्णीयतइतिभावः॥६४

किंचतस्यशत्रुत्वेतदभिप्रायश्चारैरपिदुर्ज्ञेयइत्याह: अशक्यमिति· परस्यशत्रोर्भावश्चारेण सहसा झाक्प्रश्नमात्रेणवेत्तुंज्ञातुमशक्यएव· अज्ञातेनपृष्टे उत्तरस्यैवादानात्· शत्रुग्रहितत्वेनज्ञातेप्रत्युतदंडस्यापिप्रसंगात्· नन्वेवंजगतिचारप्रेषणनैष्फल्यप्रसंगइतिचेन्नबहुकालंतत्रस्थितो तद्वचनैस्तद्व्यवहारैस्तत्प्रसंगेहर्षामर्षादिभिश्चतस्यशत्रुमित्रत्वज्ञानायतत्प्रेषणसंभवात्·यद्वमानींनरेणेति अंतरेणस्वरैर्भिन्नैपुणंपश्यतांभृशमितिप्राचीनपाठः अंतरेणाव्यवहार

अशक्यंसह सा राजन् भावो वोढुं परस्य वै ॥
अंतरेण स्वरैर्भिन्नैर्नैपुणं पश्यता भृशं ॥ ६१ ॥

मध्येभिन्नैः स्वरैर्विलक्षणविलक्षणस्वरैः कंठध्वनिभिनैपुणं सदसदन्यतरत्वनिश्चयंपश्यतां कुरुतांभवानितिशेषः तत्रवाष्पकंठत्वेभीत्यापूर्वापरासंगतकथनेचासन् अन्यथासन्निति निश्चीयतामित्याशयः अंतःस्वभावेगीतैस्तैर्नैपुणं पश्यताभृशमितिपाठे भृशमत्यर्थंस्वस्मिन्नैपुणंपश्यताजानतापिप्रयत्ना अंतःस्वभावैरापाततः प्रसन्नार्थत्वेपिगूढाभिप्रायैर्गीतैर्भाषितैः परस्वभावोभिप्रायः सहसावेत्तुंनशक्यइत्यर्थः ॥ ६१ ॥

अ

वायुसुतस्यवचनमितिशेषः ॥ श्रुतवान्सकलशास्त्रश्रवणवान् आत्मनि॰ स्वचित्ते स्थितं॰ स्वचित्तस्थितार्थप्रतिपादकमितियावत् ॥१॥ ममापिभवदुक्तेभ्योविलक्षणाविभीषणं प्रतिकाचिद्विवक्षास्तितत्सर्वंमद्विवक्षितंममश्रेयस्मिन्स्थितैर्भवद्भिःश्रोतुंश्रवणसन्निहितंकर्तुमिच्छामि॰ इयमुक्तिःसर्वमतप्रतिक्षेपकस्वमतश्रवणेनसुग्रीवादीनांव्याकुलचित्ततामाभूदितितेषामुपलालनाय ॥२॥ तत्रान्यैर्दोषोक्तिः पूर्वमग्राह्यत्वमुक्तं हनुमतानिर्दोषत्वोक्तिः पूर्वंग्राह्यत्वमुक्तं॰ भगवांस्तूभयोर्यासुग्रीवाद्युक्तं र

वि

52

अथरामः प्रसन्नात्मा श्रुत्वावायुसुतस्यह ॥ प्रत्यभाषतदुर्धर्षः श्रुतवानात्मनिस्थितं ॥१॥
ममापिचविवक्षास्ति काचित्प्रतिविभीषणं ॥ श्रोतुमिच्छामितत्सर्वं भवद्भिःश्रेयसिस्थितैः ॥२॥
मित्रभावेनसंप्राप्तंनत्यजेयंकथंचन ॥ दोषोयद्यपितस्यस्यात्सतामेतदगर्हितं ॥३॥

ध्रप्रहारित्वमंगीकृत्यापिपरिग्राह्यत्वंस्थापयतिमित्रेति॰ राघवंशरणागतइतिप्रसन्नवचनात्तुमितमित्रभावेनमित्रत्वेनसंप्राप्तंपत्नीस्निग्धभावेनप्राप्तंपतिमिवकथंचनसर्वदेशकालावस्थास्वपिनत्यजेयं॰ भवदुक्तरंध्रप्रहारमिथ्याविभीषिकाभीतः सन्नितिशेषः ननुशत्रुपक्षत्वेनदुष्टंकथंनत्यज्यसीत्यत्राह॰ दोषइति॰ वस्तुतस्तत्रदोषएवनास्तिशत्रुपक्षत्वेपिततोभीततयाशरणागतत्वात्यद्यपितस्यदोषोभवदुक्तस्तदतिरिक्तश्चस्यात्तथापितंनत्यजेयमितिसंबंधः यद्यपिदुष्टजनपरिग्रहः शिष्टगर्हितस्तथापिवध्यंप्रपन्नंनप्रतिप्रयच्छंतीत्येवमादिशास्त्रात्शरणागतदुष्टपरिग्रहणं

शरणागतपरित्यागेदोषः ॥३॥

नन्वदुष्टस्यास्यास्यां वेलायामत्रागमने किं प्रयोजकमित्याशंक्यायां देशकालौचित्यज्ञानमेवेत्याह· देशेति·
देशकालविदां वरास्येदमत्रागमनरूपं कार्यं देशकालोपपन्नमेव· उक्तरीत्या· किं चेदृशं कार्यं प्रयोगे
णाभिसंहितमनुष्ठानेन संपादितं आत्मानं क्षिप्रं सफलं कुरुते इत्यर्थः ॥६५॥ एतदेव विवृणोति· उद्यो
गमिति· ।उद्योगं रावणवधविषयं मिथ्यावृत्तं मिथ्याबलगर्वितं पापवृत्तं च दृष्ट्वा रावणादप्प

देशकालोपपन्नं च कार्यं कार्यविदां वर ॥ सफलं कुरुते क्षिप्रं प्रयोगेणाभिसंहितं ॥६५॥ उ
द्योगं तव संप्रेक्ष्य मिथ्यावृत्तं च रावणं ॥ वालिनं च हतं श्रुत्वा सुग्रीवं चाभिषेचितं ॥६६॥ राज्यं प्रा
र्थयमानस्त्वं बुद्धिपूर्वमिहागतः ॥ एतावत्तु पुरस्कृत्य विद्यते तस्य संग्रहः ॥६७॥ यथाशक्ति मयो
क्तं तु राक्षसस्यार्जवं प्रति ॥ प्रमाणं त्वं हि शेषस्य श्रुत्वा बुद्धिमतां वर ॥६८॥ इत्यार्षे श्रीरामायणे यु
द्धकांडे सप्तदशः सर्गः ॥१७॥

धिक्कवलं वालिनं हतं श्रुत्वा बुद्धिपूर्वं वालिवदेव रावणं हनि
ष्यति· सुग्रीववदेव मह्यं राज्यं दास्यति शरणागतवत्सलः सर्वथा मां रक्षिष्यति· इति बुद्धिपूर्वं
उपसंहरति· एतावदिति ॥६६॥६७॥ मया राक्षसस्यार्जवमुद्दिश्य त्वां प्रति यथाशास्त्रमुक्तं अधिकं च
क्तं तु न युज्यते· श्रुत्वा शेषस्य कृत्यस्य निर्णये तु त्वमेव प्रमाणं ॥६८॥ इतमानः कतकरीत्या ॥१६
इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके युद्धकांडे सप्तदशः सर्गः ॥१७॥

अथैतदुपर्यपि मम किंचिज्ज्ञातीत्याह· अस्तीति· अत्र भ्रातृपरित्यागरूपदोषोद्भावनेपि सर्वराजसु प्रत्यक्षं प्रत्यक्षसिद्धं लौकिकमंततः सर्वलोकप्रसिद्धं विद्यते मां मां प्रतिभाति च तत्र सूक्ष्मतरं किंचिदर्थरूपमस्ति॥९॥ तदर्थरूपं प्रतिपादयितुं तदुपयुक्तां लोकस्थितिमाह। अमित्रा इति· राज्ञाम मित्राः शत्रवो द्विधा कीर्तिताः तत्कुलीना ज्ञातयः प्रातिदेश्याः आसन्नदेशवासिनश्चेति· ते

अस्ति सूक्ष्मतरं किंचिद्यथात्र प्रतिभाति मा। प्रत्यक्षं लौकिकं चापि वर्तते सर्वराजसु॥९॥
अमित्रास्तत्कुलीनाश्च प्रातिदेश्याश्च कीर्तिताः। व्यसनेषु प्रहर्त्तारस्तस्मादयमिहागतः॥१०॥

द्विविधा अपि स्वविरोधिज्ञातेः स्वविरोधिन आसन्नदेशवर्त्तिनश्च व्यसनेषु आध्यात्मिकादित्रिःप्रकारकष्टेषु तस्य प्रहर्त्तारो भवंतीति प्रसिद्धं· अस्तु किं ततः इत्यत्राह· तस्मादिति· नानाप्रकारस्वपीडाप्रवृत्तज्ञातिभयात् स्वत्राणार्थमिहागतः यद्वा तस्माद्व्यसनप्रहर्तृज्ञातित्वाद्व्यसनिनं रावणं प्रहर्त्तुमयं विभीषणमिहागत इत्यर्थः॥१०॥

गर्हितत्वमेवज्ञापयितुंसुग्रीवः प्रागुक्तादधिकंस्वविवक्षितंदोषंविभीषणेकथयति सुग्रीवइति आभाष्य। अनूद्य· ततोविमर्षानन्तरं शुभतरंप्रागुक्तदोषादप्यधिकोयः समर्थतरापरिग्राह्यत्वेहेतुभूतोदोषस्तत्प्रतिपादकं॥४॥ सएषरजनीचरः दुष्टोवाप्रागुक्तदोषयुक्तोवा अदुष्टोवातद्रहितोवा तथापि असौऽग्राह्यः किं नैवग्राह्यः कृतघ्नत्वादित्याह ईदृशमिति प्रबलशत्रुग्रासरूपंव्यसनंप्राप्तंभ्रातरंयःपरित्यजेदत्याजत्।५।तस्यास्यकोनामसभवेत् यमेषसंकटेनपरित्यजेत्· तस्मादस्मानपिसंकटेत्यक्ष्यत्येवविश्वासघातिकृतघ्नत्वादित्यर्थः सर्वानुदीक्ष्य सुग्रीवस्योत्तरकस्याचालनसामर्थ्यंसर्वहरीननुभाव्य· तथालक्ष्मणमुदीक्ष्येषदुत्स्मयमानः बालत्वेनमद्वचनापरिज्ञानात्वाप्येतदेवसंमतमितीषद्धासंकुर्वन् इतिहोवाच॥६॥७॥ सुग्रीववैमनस्यपरिहारायतद्वाक्यंप्रशस्योत्तरमाह· अनधीत्येति· हरीश्वरोयदुवाचेदं वृद्धसेवारहितेन शास्त्राध्ययनरहितेनचनवक्तुंशक्यं।५

सुग्रीवस्त्वथतद्वाक्यमाभाष्यचविमृश्यच॥ततःशुभतरंवाक्यमुवाचहरिपुंगवः॥४॥सुदुष्टोवाप्यदुष्टोवाकिमेषरजनीचरः॥ईदृशंव्यसनंप्राप्तंभ्रातरंयःपरित्यजेत्॥५॥कोनामसभवेत्तस्ययमेषनपरित्यजेत्॥वानराधिपतेर्वाक्यंश्रुत्वासर्वानुदीक्ष्यतु॥६॥ईषदुस्मयमानस्तुलक्ष्मणंपुण्यलक्षणं॥इतिहोवाचकाकुत्स्थोवाक्यंसत्यपराक्रमः॥७॥अनधीत्यचशास्त्राणिवृद्धाननुपसेव्यच॥नशक्यमीदृशंवक्तुंयदुवाचहरीश्वरः॥८॥

रामा·यु·
५४

54

तदेवाहनेति· वयंनतत्कुलीनाः ज्ञातयः चात्मनिदेशपार्श्वनभवामः। अतोऽस्मद्राज्यजिघृक्षाभावान्नास्मासुप्रहारोनेननकार्यः किंतुनिजराज्यमेवस्वज्ञातिनिरासमस्मन्मुखेनसंपाद्यकांक्षतीतितदाह· राज्यकांक्षीति अतोनोपजीव्यविरोधंकरिष्यति· नत्वयम्रवैस्तमःप्रधानः।

नवयंतत्कुलीनाश्चराज्यकांक्षीचराक्षसः॥
पंडिताहिभविष्यंतितस्माज्ज्ञात्योविभीषणः॥१३॥

त्वाद्राक्षसैः कथमेवंविचारकरणमतआह· पंडिताइति· पर्यालोचनपूर्वमनुष्ठेयनिश्चयमर्थाः पंडितास्तेसर्वत्रभविष्यंत्येव· एवंचैकजन्यत्वेपियथाकुंभकर्णोतिनामसः रावणश्चातिराजसः एवमयमतिसात्विकतयैवंविचारशीलइतिभावः उपसंहरति· तस्मादिति ॥१३

राम·
५४

अथ शत्रुतः प्रयोजकमपि न ज्ञातित्वमात्रं किंतु परस्परानिष्टचिंतायुक्तत्वमित्याह· अपापा इति· अपापाः परस्परानिष्टचिंतारहिताः धर्ममार्गेण परस्परहितैषिणश्च तत्कुलीना ज्ञातयो ये ते स्वकान् हितान् मानयंति एष उक्तोऽर्थः प्रायो बाहुल्येन लोके उपलभ्यते· नरेंद्राणां तु शोभनोऽपि हितैष्यपि ज्ञातिः शंकनीय एव महत्तरराज्यैश्वर्यलोभसंभवात्· उपजापवशादनिष्टचिंताया भरतमात्रादौ दृष्टत्वाच्च· एवं च स्वस्माच्छंकितरावणेनोऽनिष्टं संभाव्य तं त्यक्त्वाऽयमागतः किंच यो हिं

अपापास्तत्कुलीनाश्च मानयंति स्वकान् हितान् ॥ एष प्रायो नरेंद्राणां शंकनीयस्तु शोभनः ॥११॥ यस्तु दोषस्त्वया प्रोक्तो ह्यादानेऽरिबलस्य च ॥ तत्र ते कीर्त्तयिष्यामि यथाशास्त्रमिदं शृणु ॥१२॥

स्वार्थमभिक्रांतं हंति मन्युरेव मन्युं स्पृशति न तस्मिन् दोष इत्यापस्तंबोक्तेः रावणनाशार्थमागमनेऽप्यस्य न दोष इत्याशयः ॥११॥ एवं भ्रातृत्यागदोषं परिहृत्य यः पूर्वं परिग्रहे रंध्रप्रहारदोष उक्तस्तमनूद्य परिहरति· य इति· अरिबलस्य शत्रुपक्षस्यादाने परिग्रहे यो दोषो रंध्रप्रहाररूपो दोष उक्तस्तद्विषये यथाशास्त्रं यथाम्नायमुत्तरं कीर्त्तयिष्यामि तच्छृणु ॥१२॥

अ

ननुभरतादिष्वेतद्दोषादर्शनाल्लक्ष्मणामीदृशभेदासंभवोत आह· नसर्वेति· राज्यादीछयाप्रा
प्तसौभ्रात्रत्यागस्याभावो भरतादन्येन परमदुष्करः तेनपितृदत्तराज्यत्यागात् लक्ष्मणादेस्तु त
दप्रसक्त्यानतदुक्तिः· मद्विधावा पुत्राः सुखलिप्सयापितृवाक्यलंघनरहिताः सुहृदोवाभ
वद्विधाः त्यक्त्वापिसर्वंसौख्यं सर्वाकारेणसर्वबलेनसर्वंयत्नेनच मित्रकार्यसाधकाः सु
हृत्परमदुर्लभइतिभावः अत्रभूतार्थकथनरूपत्वान्नात्मप्रशंसादोषो भगवतः स्वगु

नसर्वेभ्रातरस्तातभवंतिभरतोपमाः। मद्विधावापितुःपुत्राःसुहृदोवाभवद्विधाः॥१५॥
एवमुक्तस्तुरामेणसुग्रीवःसहलक्ष्मणः। उत्थायेदंमहाप्राज्ञःप्रणतोवाक्यमब्रवीत्॥१६॥
रावणेनप्रणिहितंतमवेहिनिशाचरं। तस्याहंनिग्रहंमन्येक्षमंक्षमवतांवर॥१७॥

णाविष्क्रियादोषोनास्तिभूतार्थशंसनइतिदंह्युक्तेः॥१५॥ एवंन्यायतो विभीषणस्यग्राह्यत्वे
प्रतिपादितेपिप्रीत्यतिशयेनानिष्टसंभावनयास्वमतमेवसम्यगित्याशयेनाह· एवमि
ति· सहलक्ष्मणइत्यनेनोभयोरैकमत्यंदर्शितं· ॥उत्थायप्रणतइत्यन्वयः॥१६॥ प्रणिहि
तमवेहि नतुवैरस्यादागतमित्यर्थः॥ तद्वाक्यमविश्वास्यमित्याशयः॥१७॥

उक्तहेत्वनुवादपूर्वंग्राह्यत्वमुपसंहरति· अव्यग्रा इतिसार्धेन· तेज्ञातयोऽव्यग्राः अनाकुलाः नि
र्भयवंत इति यावत्· प्रहृष्टाः अन्योन्यंसंतुष्टाश्च सौभ्रात्रात्संगताः परस्परं मिलिता भविष्यंति·
इति सर्वलोकप्रसिद्धं तेभ्योन्येतु उक्तविपरीता इति प्रागुक्तरीत्या पापमलराज्यलोभादिना भेदंग
मिष्यंति· ततोनंतरमस्य ज्ञातिवर्गस्य एष लोकप्रसिद्धः प्रमादो युद्धरूपकोलाहलो भवति अन्यो

अव्यग्राश्च प्रहृष्टाश्च ते भविष्यंति संगताः॥ प्रमादश्च महानेषोऽन्यो
न्यस्य भयमागतं॥ इति भेदं गमिष्यंति तस्मात्प्राप्तो विभीषणः॥१४॥

न्यस्यान्योन्यतो भयं चागतं भवतीति लोकस्थितिर्यतस्तस्मात् अयमेतावत्कालमनपगतसौ
भ्रात्रोपि केनचिन्निमित्तेनाद्य प्राप्तवैरः शरणमागतो ग्राह्य एवेति कतकव्याख्या· तीर्थस्तु ने
षस्ततोस्येति पठित्वा अस्य भीतस्य वै एष महान्प्रमादः अयं ततस्तेनो बलवतो रावणात्त्रस
विभीषणस्य भयमागतमिति आत्मत्राणार्थमागतः परिग्राह्य एवेत्यर्थः इतरत्तु प्राग्वदेव व्या
ख्येयमित्याह॥१४॥

अंगुल्यग्रेणएकांगुल्याग्रमात्रेणापि· अनेन संकल्पसिद्धिरैश्वर्यं चिन्हमुक्तं· यद्येवमस्मादादिसंग्रहोप्यर्थस्तत्राहेच्छन्निति· स्वस्य निरतिशयमहिमानंतात्विकं ब्रह्मभावं प्रकटीकर्तुमिच्छन्यदि स्यां तदा तथैव कुर्यां· संप्रति तु देवभावोपेतनिजविलासै रक्षोभिरवध्यत्वमस्य मयैव दत्तमतित्परिपालनाय स्वदिव्यभावं स्वशक्त्यैवांतर्धाप्य मानुषमर्यादायां स्थित्या तद्भावप्रकटनायैव

श्रूयते हि कपोतेन शत्रुः शरणमागतः ॥ ॥
अर्चितश्च यथान्यायं स्वैश्च मांसैर्निमंत्रितः ॥२४॥

सीतावियोगप्रयुक्तरोदनवत् भवादृशसहायमेलनं· वस्तुतो न स्वातिरिक्तसहायांतरापेक्षा मम· मनुष्याणां संसारमर्यादाज्ञापनं तद्व्यवहारफलमिति भावः· एवं रंध्रप्रहारभीतिं दूरीकृत्य शरणागतरक्षणं परमो धर्म इति कपोताख्यानेन दर्शयति· श्रूयते हीति· भार्याहर्तृत्वात्कपोतशत्रुर्व्याधः शरणं गृहं स्वनिवासभूतं वृक्षमागतः यथान्यायमर्चितो ग्न्यानयनशीतनिवारणाद्युपचारैर्यथोचितं पूजितः स्वैर्मांसैर्निमंत्रितो भोजनाय प्रार्थितः ॥२४॥ ॥

उक्तमेवाह॰ जिह्मयेति॰ कुटिलयेत्यर्थः विश्वस्तेमयीत्युक्तिः स्वव्यसनादपिस्वाश्रितव्यसनमहंतुदमितिमत्वेतिबोध्यं॥१८॥ नादृशाकलबुद्धित्वेदृशेनरावणभ्रातृत्वं॥१९॥ मौनमुपागमत्॰ त्रिवाचोक्तमतोधिकंप्रभौनवक्तुंयुक्तमित्याशयेनेतिशेषः॥२०॥ विमृश्यचरंध्रप्रहारदोषःसतिसंभवेप्यस्मा

राक्षसोजिह्मयाबुध्यासंदिष्टोयमिहागतः॥ प्रहर्तुंत्वयिविश्वस्तेविश्वस्तेमयिवानघ॥१८॥
लक्ष्मणेवामहाबाहोसवध्यःसचिवैःसह॥ रावणस्यनृशंसस्यभ्रातात्येषविभीषणः॥१९॥
एवमुक्त्वारघुश्रेष्ठंसुग्रीवोवाहिनीपतिः॥ वाक्यज्ञोवाक्यकुशलततनोमौनमुपागमत्॥२०॥
ससुग्रीवस्यतद्वाक्यंरामःश्रुत्वाविमृश्यच॥ ततःशुभतरंवाक्यमुवाचहरिपुंगवं॥२१॥
सदुष्टोवाप्यदुष्टोवाकिमेषरजनीचरः॥ सूक्ष्ममप्यहितंकर्तुंममशक्तःकथंचन॥२२॥
पिशाचान्दानवान्यक्षान्पृथिव्यांचैवराक्षसान्॥ अंगुल्यग्रेणतान्हन्यामिच्छन्हरिगणेश्वर॥२३॥

स्वकिंचित्करइतिविचार्य॥२१॥ नमेवनिश्चयंदर्शयतिसदुष्टइतिसएषदुष्टोऽदुष्टोवावायथाकथंचिदस्तुतथापिममसूक्ष्ममप्यहितंकर्तुंकथंचनकथमपिशक्तः किंनकथमपिशक्तइत्यर्थः॥२२॥ कुतइत्यत्रापरिमेयानिजशक्तिंतकृतोक्तिप्रतिहंत्रीमाह॰ पिशाचानिति॥२३॥

तथाऽकरणेपापमाह· तस्यधर्मस्यनित्यत्वबोधनाय· सचेदिति· केनापिशरणतयाश्रित इत्यर्थः भ
यात्· तद्रक्षणेतच्छत्रोः सकाशात्तस्माद्वाभयमुत्प्रेक्ष्यततोहितोः मोहात्· कार्यांतरपारवश्यजनितवि
स्मृतेः कामाद्वातच्छत्रुसकाशातः किंचित्फललोभेनवा· स्वयाशक्त्यास्वसामर्थ्येनसहायसंपादने
नस्वद्रव्यदानादिनावायथान्यायंनरक्षतिचेच्छरणागतमितिशेषः तदातत्पापंअरक्षितस्यशरणा
गतस्यपापंप्राप्नोतीतिशेषः तथालोकगर्हितं· भावेनिष्ठा लोकनिंदांचप्राप्नोति॥२९॥ नकेवलमे

सचेद्भयाद्वामोहाद्वाकामाद्वापिनरक्षति॥ स्वयाशक्त्यायथान्यायंतत्पापंलोकगर्हितं
॥२९॥ विनष्टःपश्यतस्तस्यरक्षिंशरणागतः॥ आदायसुकृतंतस्यसर्वंगच्छेदरक्षितः॥३०॥
एवंदोषोमहानत्रप्रपन्नानामरक्षणे॥ अस्वर्ग्यंचायशस्यंचबलवीर्यविनाशनं॥३१॥

ण:

57

तावदेव· स्वकृतसर्वसुकृतापहारंचप्राप्नोतीत्याह· विनष्ट इति· यःशरणागतोऽरक्षितोवि
नष्टःस्यात्सपश्यतस्तस्यरक्षिणःरक्षार्थंवृतस्यसमक्षमेवतस्यरक्षिणःसर्वंसुकृतमादाय
गच्छेत्॥३०॥ एतदंताःकंडुगाथाः· अथरामवाक्यंएवमिति· अतस्तदरक्षणं· अस्वर्ग्यं· स्वर्गप्रति
बंधकं· बलवीर्यविनाशनं॥ तपोबलजयद्वीर्यंनिग्रहानुग्रहसामर्थ्यंतद्विनाशकमित्यर्थः
॥३१॥

एवंरीत्यासहिंसोपितिर्यग्जंतुरपिभार्याहर्त्तारंशरणमागतंप्रतिजग्राहनोपेक्षितवानितिश्रूयते किंपुनर्मद्विधोजनः सकलधर्मरहस्यवेत्तात्वत्प्रियोभूत्वाऽकृतापकारंशरणागतंनप्रतिगृह्णीयादित्यर्थः शरणागतत्वंकायवाक्व्यापारैरसंदिग्धमेवेत्याशयः ॥२५॥ नन्वत्रविध्यदर्शनाद्धर्मानधिकृतकपोतचेष्टाकथंधर्मप्रमाणंस्यादतोविधिमपिदर्शयति· ऋषेरिति· तद्गीतगाथायांप्रमाणप्रदर्शनायस

सहितंप्रतिजग्राहभार्याहर्त्तारमागतं॥ कपोतोवानरश्रेष्ठ किंपुनर्मद्विधोजनः॥२५॥ ऋषेःक
ण्वस्यपुत्रेणकंडुनापरमर्षिणा॥ शृणुगाथांपुरागीतांधर्मिष्ठांसत्यवादिना॥२६॥ बद्धांजलि
पुटंदीनंयाचंतंशरणागतं॥ नहन्यादानृशंस्यार्थमपिशत्रुंपरंतप॥२७॥ आर्तोवायदिवादृप्तः
परेषांशरणंगतः॥ अरिःप्राणान्परित्यज्यरक्षितव्यःकृतात्मना॥२८॥

त्यवादिनेत्यंतानिऋषिविशेषणान्युक्तानि· सत्यवादिना· अबाधिताप्रतिपादनव्रतेन· अतएवतद्गीतगाथायाधर्मिष्ठा· धर्मपरेत्यर्थः ॥२६॥ तांगाथामाह· बद्धांजलिमिति· याचंतं· शरणमित्यर्थः आनृशंस्यार्थमघातुकत्वसिद्ध्यर्थं आश्रितरक्षणरूपपरमधर्मपालनार्थंवा ॥२७॥ आर्तोवादृप्तोवेतिगुणदोषौदासीन्यपरंवचनं· परेषां· शत्रूणांभयाच्छरणागतोरिरपिपूर्वंकृतवैरोपिकृतात्मनाधर्मशास्त्रशिक्षितचित्तेनप्राणान्परित्यज्यापिरक्षणीयः ॥२८॥

दानपात्रं·द्वितीयाभयप्रदानसाधनमाहृतवास्मीतिचयाचतेइति·औपाधिकभेदमवलंब्यतवाहंसेवकः·त्वंमेस्वामी·अहंशिष्यस्त्वंगुरुरहंरक्ष्यस्त्वंरक्षकइत्येवमुपासनांकुर्वतोद्वितीयाद्वैभयंभवतीतिन्यायेनावश्यंप्राप्तभयस्यसर्वभूतेभ्योयथाभयंनभवतितथायतामीतिमेव्रतमित्यर्थः·अन्यथाभूतेभ्यस्त्वनयच्छामीतिनैर्घृण्यादिदोषप्रसंगइतिभावः॥३३॥ अथापरिग्राह्य

आनयैनंहरिश्रेष्ठदत्तमस्याभयंमया॥विभीषणोवासुग्रीवयदिवारावणःस्वयं॥३४॥रामस्यतुवचःश्रुत्वासुग्रीवःप्लवगेश्वरः॥प्रत्यभाषतकाकुत्स्थंसौहार्देनाभिपूरितः॥३५॥किमत्रचित्रंधर्मज्ञलोकनाथशिखामणे॥यत्त्वमार्यंप्रभाषेथाःसत्त्ववान्सत्पथेस्थितः॥३६॥

तावदिनंसुग्रीवमेवबलात्परिग्राह्यतांगीकारंकारयित्वानमेवतदानयनायप्रेषयति·आनयेति·अस्यवाक्कायाभ्यांसुस्पष्टंशरणागतस्ययदिवारावणइति·कामरूपतयाकारांतरावष्टंभवानितिशेषः॥३४॥३५॥अथसुग्रीवोविस्मयपरवशआहकिमत्रेति·धर्मज्ञशरणागतरक्षणधर्मरहस्यलोकनाथानांराज्ञांशिखामणेसत्त्ववान्सत्त्वैकनिष्ठः·त्वमार्यंकल्याणंप्रभाषेथाइतियत्तत्रकिंचित्रं॥३६॥

यदेवमतः करिष्यामीत्यादि· वचनं शरणागतरक्षणपरं· धर्मिष्ठं जनकतासंबंधेनातिशयितधर्मवत् फलोदयकाले स्वर्ग्यं स्वर्गजनकं ॥३२॥ किं च परमकारुणिकस्य मम सर्वभूताभयदानरूपः कश्चिन्मत्संकल्पोस्तीत्याह· सकृदिति। सर्वभूतेभ्य इति पंचतुर्थी च भयप्रसक्तिमज्ञोऽभयं ददामि· अत्र वर्त्तमानप्रयोगेण नित्यसत्सहजधर्मत्वमभयदानस्य द्योत्यते तदेवाह एतन्मम व्रतमिति· नित्यपरिगृहीतो नित्यनिजप्रतिष्ठितोऽस्मद्धर्म इत्यर्थः। अत्र तात्कालिकमात्यंतिकं चेत्युभय

करिष्यामि यथार्थं तु कंडोर्वचनमुत्तमं॥ धर्मिष्ठं च यशस्यं च स्वर्ग्यं स्यात्तु फलोदये॥
॥३२॥ सकृदेव प्रपन्नाय तवास्मीति च याचते॥ अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम॥३३॥

विधमपि अभयदानं प्रतिज्ञायते· तत्रात्यंतिकं संसारभयोपरतिरूपं· द्वितीयं तु रावणादितदुत्थितं मृत्युभयनिवृत्तिरूपं· इदं चोरारिग्रहनिमित्तकाभयदानस्याप्युपलक्षणं· नन्वेवं सर्वेश्वरस्यापि तव निर्निमित्ताभयदातृत्वे वैषम्यनैर्घृण्यादिदोषप्रसंगस्तत्राह सकृदिति· अनेनोभयविधाभयदानस्य साधनमुपदिश्यते· सकृत्· एकयैव वृत्त्या प्रपन्नायपदिर्गत्यर्थः प्रकृष्टप्रतिपत्तिमते· प्रतिपत्तौ प्रकर्षश्च निरंतरत्वं· सा च तत्वमस्यादिवाक्यजन्या भगवतः स्वात्मत्वेन प्रतिपत्तिः· अयं च ज्ञानी त्वात्मैव मे मत इति गीतोक्तः। अयमेवात्यंतिकाभय

युक्तंयुक्तियुक्तंसांप्रतंसंप्रहर्षणं तत्कालसंतोषकरणं॥४॥सर्वभूतानांशरण्यमित्यनेनस्वस्यरामेभगवदवतारत्वावगमःसूचितः॥५॥मेराज्यंचभगवद्गतमित्युक्त्वासर्वज्ञत्वेनरामोरावणवधंकरिष्यत्येवेतिनि

धर्मयुक्तंचयुक्तंचसांप्रतंसंप्रहर्षणं॥अनुजोरावणस्याहंतेनचास्म्यवमानितः॥४॥भवंतंसर्वभूतानांशरण्यंशरणंगतः परित्यक्तामयालंकामित्राणिचधनानिच॥५॥भवद्गतंहिमेराज्यंजीवितंचसुखानिच॥तस्यतद्वचनंश्रुत्वारामोवचनमब्रवीत्॥६॥वचसासांत्वयित्वैनंलोचनाभ्यांपिबन्निव॥आख्याहिममतत्वेनराक्षसानांबलाबलं॥७॥एवमुक्तस्तदारक्षोरामेणाक्लिष्टकर्मणा॥रावणस्यबलंसर्वमाख्यातुमुपचक्रमे॥८॥अवध्यःसर्वभूतानांगंधर्वोरगपक्षिणां॥राजपुत्रदशग्रीवोवरदानात्स्वयंभुवः॥९॥रावणानंतरोभ्राताममज्येष्ठश्चवीर्यवान्॥कुंभकर्णोमहातेजाःशक्रप्रतिबलोयुधि॥१०॥रामसेनापतिस्तस्यप्रहस्तोयदितेश्रुतः॥कैलासेयेनसमरेमाणिभद्रःपराजितः॥११॥बद्धगोधांगुलित्रश्चअवध्यकवचोयुधि॥धनुरादाययस्तिष्ठन्नदृश्योभवतींद्रजित्॥१२॥संग्रामेसुमहत्व्यूहेतर्पयित्वाहुताशनं॥अंतर्द्धानगतःश्रीमानिंद्रजिद्धंतिराघव॥१३॥

श्चितमितिगम्यते॥६॥पिबन्निव अनुग्रहचक्षुषाऽवलोकयन्निव॥७॥८॥९॥शक्रप्रतिबलःशक्रबलस्पर्द्धिबलवान्॥१०॥११॥बद्धंगोधारूपमंगुलित्राणंयेनसःगोधाज्याघातवारणं अदृश्योभवति यइंद्रइतिशेषः॥१२॥तदेवाह संग्रामेइति सुमहत्व्यूहेउचितवलसंनिवेशवति॥१३॥

39

ममांतरात्मापिविभीषणंशुद्धं वेतित्वद्वाक्यश्रवणादितिभावः किंचपरमचतुरेणहनूमताभावरूपा
दनुमानाच्च सर्वतः सुपरीक्षितश्चायंतस्मात् ॥३७॥३८॥ हरीश्वरेणाभिहितंतमानीयायंविभीषण
इतिबोधितं पतत्रिराजेन तदानीतेनोपेंद्रेणोत्पर्थः ॥३९॥ अधिगितिमानः क॰ ॥१७॥ इतिश्रीरामा

ममचाप्यंतरात्मायंशुद्धं वेत्तिविभीषणं ॥ अनुमानाच्चभावाच्चसर्वतः सुपरीक्षितः ॥३७॥ त
स्मात्क्षिप्रंसहास्माभिस्तुल्योभवतुराघव ॥ विभीषणोमहाप्राज्ञः सखित्वंचाभ्युपैतुनः ॥३८॥
ततस्तुसुग्रीववचोनिशम्यतद्धरीश्वरेणाभिहितंनरेश्वरः ॥ विभीषणेनाशुजगामसंगमं
पतत्रिराजेनयथापुरंदरः ॥३९॥ इत्यार्षेश्रीरामायणेयुद्धकांडेऽष्टादशः सर्गः ॥१८॥ राघ
वेणाभयेदत्तेसंनतोरावणानुजः ॥ विभीषणोमहाप्राज्ञोभूमिंसमवलोकयन् ॥१॥ खात्
पपातावनिंहृष्टोभक्तैरनुचरैः सह ॥ सतुरामस्यधर्मात्मानिपपातविभीषणः ॥२॥ पादयोर्नि
पपाताथचतुर्भिः सहराक्षसैः ॥ अब्रवीच्चतदावाक्यंरामंप्रतिविभीषणः ॥३॥

भिरामेश्रीरामी
येरामायणतिलकेयुद्ध॰ अष्टादशः सर्गः ॥१८॥ संनतोभक्तिप्रवणः भूमिंसमवलोकयत् अवरो
हणायेतिभावः ॥१॥ हृष्टः अभिमतलाभजनितप्रीतियुक्तः रामस्यनिपपातपादयोरित्यनु
कर्षः ॥२॥ पूर्वमेकस्यैवपादपतनमुक्त्वामंत्रिसहितस्यतदाह पादयोरितिपादयोर्निपपातेत्य

अथविभीषणोरामस्यस्वार्थसाधनप्रतिज्ञांश्रुत्वास्वयमपिरामकार्यसाधनंप्रतिजानीते· शिरसेति २२
सान्त्वंसहाय्यं· वाहिनी· रावणवाहिनी ॥२३॥ परिष्वज्योत्पन्नेनमित्रत्वेनपरिग्रहणंसूचितं ॥२४॥२५

श्रुत्वातुवचनंतस्यरामस्याक्लिष्टकर्मणः ॥ शिरसावंद्यधर्मात्मावक्तुमेवप्रचक्रमे ॥२२॥
राक्षसानांवधेसाह्यंलंकायाश्चप्रधर्षणे ॥ करिष्यामियथाप्राणंप्रवेक्ष्यामिचवाहिनीं ॥२३॥
इतिब्रुवाणंरामस्तुपरिष्वज्यविभीषणं ॥ अब्रवील्लक्ष्मणंप्रीतःसमुद्राज्जलमानय ॥२४॥ तेन
चेमंमहाप्राज्ञमभिषिंचविभीषणं ॥ राजानंरक्षसांक्षिप्रंप्रसन्नेमयिमानद ॥२५॥ एवमुक्त
स्तुसौमित्रिरभ्यषिंचद्विभीषणं ॥ मध्येवानरमुख्यानांराजानंराजशासनात् ॥२६॥ तंप्रसा
दंतुरामस्यदृष्ट्वासद्यःप्लवंगमाः ॥ प्रचुक्रुशुर्महात्मानंसाधुसाध्वितिचाब्रुवन् ॥२७॥ अ
ब्रवीच्चहनुमांश्चसुग्रीवश्चविभीषणं ॥ कथंसागरमक्षोभ्यंतरामवरुणालयं ॥२८॥ सै
न्यैःपरिवृताःसर्वेवानराणांमहोजसां ॥ उपायैरभिगच्छामयथानदनदीपतिं ॥ तराम
तरसासर्वेससैन्यावरुणालयं ॥२९॥

॥२६॥ प्रचुक्रुशुःसंतोषात्किलिकिलामकुर्वन्
२७ ॥ वानराणांसैन्यैःपरिवृताःकथंकेनोपायेनसागरंतराम ॥२८॥ ससैन्यावरुणालयंय
यातरामतथाकैरुपायैर्नदनदीपतिमभिगच्छाममार्गप्राप्तयेतद्वदेतिशेषः ॥२९॥

अनीकपाः उपसेनापतयः ॥१४॥ दशकोटिसहस्राणि संतीति शेषः इदं च प्रधानराक्षसविवक्षया ॥१५॥ ते लोकपालाः ॥१६॥१७॥ कर्मापदानानि· युद्धकर्मनिर्वर्तितशौर्याणि· तान्यहमवगच्छाम्येव न तु तानि म

महोदरमहापार्श्वौ राक्षसश्चाप्यकंपनः ॥ अनीकपास्तु नस्यैते लोकपालसमा युधि ॥१४॥
दशकोटिसहस्राणि रक्षसां कामरूपिणां ॥ मांसशोणितभक्ष्याणां लंकापुरनिवासिनां ॥१५॥
स तैस्तु सहितो राजा लोकपालानयोधयत् ॥ सह देवैस्तु ते भग्ना रावणेन दुरात्मना ॥१६॥
विभीषणस्य तु वचस्तच्छ्रुत्वा रघुसत्तमः ॥ अन्वीक्ष्य मनसा सर्वमिदं वचनमब्रवीत् ॥१७॥
यानि कर्मापदानानि रावणस्य विभीषण ॥ आख्यातानि च तत्त्वेन ह्यवगच्छामि तान्यहं ॥१८॥
अहं हत्वा दशग्रीवं सप्रहस्तं सहात्मजं ॥ राजानं त्वां करिष्यामि सत्यमेतच्छृणोतु मे ॥१९॥
रसातलं वा प्रविशेत् पातालं वापि रावणः ॥ पितामहसकाशं वा न मे जीवन्विमोक्ष्यते ॥२०॥
अहत्वा रावणं संख्ये सपुत्रजनबांधवं ॥ अयोध्यां न प्रवेक्ष्यामि त्रिभिस्तैर्भ्रातृभिः शपे ॥२१॥

यि प्रभविष्यंतीति भावः ॥१८॥ यदुक्तं भवद्दत्तं च मे राज्यमिति तदवश्यं संपादयिष्यामीति प्रतिजानीते· अहमिति ॥१९॥ रसातलं· भूसंनिहिताधोलोकं· पातालं अधोलोकावधिभूतं लोकमेमनः ॥२०॥२१

समुदाचारउपचारः ॥३७॥ नौअवयोः विभीषणेनयदुक्तंतत्कथंनरोचिष्यतिसर्वथाऽभिरुचितमेवेत्य
र्थः ॥३८॥३९॥ सागराय·सागरप्रार्थनार्थंनियुज्यतांस्वात्मेतिशेषः ॥४०॥४१॥ कविमानः ॥ कत० ॥१८॥ इति

एवमुक्तौनतोवीरौउभौसुग्रीवलक्ष्मणौ ॥ समुदाचारसंयुक्तमिदंवचनमूचतुः ॥३७॥ कि
मर्थंनौनरव्याघ्रनरोचिष्यतिराघव ॥ विभीषणेनयत्तूक्तमस्मिन्कालेसुखावहं ॥३८॥ अ
बध्वासागरेसेतुंघोरेस्मिन्वरुणालये ॥ लंकानासादितुंशक्यासेंद्रैरपिसुरासुरैः ॥३९॥ विभी
षणस्यशूरस्ययथार्थंक्रियतांवचः ॥ अलंकालात्ययंकृत्वासागरायनियुज्यतां ॥ यथासै
न्येनगच्छामपुरींरावणपालितां ॥४०॥ एवमुक्तः कुशास्तीर्णेतीरेनदनदीपतेः ॥ संविवेशत
दारामोवेद्यामिवहुताशनः ॥४१॥ इत्यार्षेश्रीरामायणेयुद्धकांडेएकोनविंशःसर्गः ॥१९॥ ॥
ततोनिविष्टांध्वजिनींसुग्रीवेणाभिपालितां ॥ ददर्शराक्षसोभ्येत्यशार्दूलोनामवीर्यवान् ॥१॥
न:
चारोराक्षसराजस्यरावणस्यदुरात्मः ॥ तांदृष्ट्वासर्वतोव्यग्रांप्रतिगम्यसराक्षसः ॥२॥ आवि
श्यलंकांवेगेनराजानमिदमब्रवीत् ॥ एषवैवानरर्क्षौघोलंकांसमभिवर्त्तते ॥३॥ अगाधश्चाप्र
मेयश्चद्वितीयइवसागरः ॥ पुत्रौदशरथस्येमौभ्रातरौरामलक्ष्मणौ ॥४॥

श्रीरामाभिरामेश्रीरा·रा·

रा·ति·युद्ध·एकोनविंशःसर्गः ॥१९॥ निविष्टां·सागरतीरेइतिशेषः ॥१॥ तांवाहिनीं ॥२॥३॥ अगाधत्वं·दुःप्रवेशत्वेन ॥४॥

एवंप्रश्ने उपायमाह एवमिति ॥३०॥ राघवेण शरणागमने सुमुद्रानुग्रहसिद्धौ हेतुमाह खानित इति सगरेण पुत्रैरिति शेषः अयमुदकतीरसमीपः कतिपयोंशः ज्ञाते रामस्येत्यन्वयः ॥३१॥ एवं विभीषणोक्तं श्रुत्वा यत्र रामो वर्त्तते तं देशं सलक्ष्मणः सुग्रीव आजगामेति संबंधः ॥३२॥ सागरस्योपवेशनं

एवमुक्तस्तु धर्मात्मा प्रत्युवाच विभीषणः ॥ समुद्रं राघवो राजा शरणं गंतुमर्हति ॥३०॥ खानितः सगरेणायमप्रमेयो महोदधिः ॥ कर्त्तुमर्हति रामस्य ज्ञातेः कार्यं महोदधिः ॥३१॥ एवं विभीषणेनोक्तो राक्षसेन विपश्चिता ॥ आजगामाथ सुग्रीवो यत्र रामः सलक्ष्मणः ॥३२॥ ततश्चाख्यातुमारेभे विभीषणवचः शुभं ॥ सुग्रीवो विपुलग्रीवः सागरस्योपवेशनं ॥३३॥ प्रकृत्या धर्मशीलस्य रामस्यास्याप्यरोचत ॥ सलक्ष्मणं महातेजाः सुग्रीवं च हरीश्वरं ॥३४॥ सत्क्रियार्थं क्रियादक्षः स्मितपूर्वमभाषत ॥ विभीषणस्य मंत्रोयं मम लक्ष्मण रोचते ॥३५॥ सुग्रीवः पंडितो नित्यं भवान्मंत्रविचक्षणः ॥ उभाभ्यां संप्रधार्यार्थं रोचते यत्तदुच्यतां ॥३६॥

शरणागमनं॥

अस्य सकलजगच्छरणभूतस्य रामस्यापि अरोचत युक्तियुक्तत्वात्सागरशरणागमनमिति भावः ॥३४॥ सत्क्रियार्थं विभीषणस्य पूजार्थं सलक्ष्मणं सुग्रीवं हरीश्वरमभाषतेत्यन्वयः ॥३५॥ उभाभ्यामर्थं कार्यं संप्रधार्य निश्चित्य यद्रोचते तदुच्यतां ॥३६॥ ॥ श्री ॥

मद्वचनमनादृत्यागतेनापित्वयात्रकिमपिनकर्त्तुंशक्यमित्याहनहीयमिति॥१२॥शुकोविहंगमोभू
त्वा॰शुकपक्षीभूत्वा॰आप्लुत्यचांबरंजगामेतिशेषः॥१३॥सागरस्योपर्युपरि॰सागरसमीपोर्ध्वदेशे॥१४॥
यथादिष्टंसर्वमुक्तंवाक्यमब्रवीदित्यन्वयः॥तत्प्रापयंतं॰रावणोक्तंसुग्रीवायेत्यर्थः॥१५॥प्रापद्यंत॰

नहीयंहरिभिर्लंकाप्राप्तुंशक्याकथंचन॥देवैरपिसगंधर्वैःकिंपुनर्नरवानरैः॥१२॥सतदारा
क्षसेंद्रेणसंदिष्टोरजनीचरः॥शुकोविहंगमोभूत्वातूर्णमाप्लुत्यचांबरं॥१३॥सगत्वादूरमध्वा
नमुपर्युपरिसागरंसंस्थितोह्यंबरंवाक्यंसुग्रीवमिदमब्रवीत्॥१४॥सर्वमुक्तंयथादिष्टंरा
वणेनदुरात्मना॥तत्प्रापयंतंवचनंतूर्णमाप्लुत्यवानराः॥१५॥प्रापद्यंततदाक्षिप्रंलोप्तुंहंतुंच
मुष्टिभिः॥सर्वैःप्लवंगैःप्रसभंनिगृहीतोनिशाचरः॥१६॥गगनाद्भूतलेचाशुप्रतिगृह्यावता
रितः॥वानरैःपीड्यमानस्तुशुकोवचनमब्रवीत्॥१७॥नदूतान्घ्नंतिकाकुत्स्थवार्यंतांसाधु
वानराः॥यस्तुहित्वामतंभर्तुःस्वमतंसंप्रधारयेत्॥अनुक्तवादीदूतःसन्सदूतोवधमर्हति
॥१८॥शुकस्यवचनंरामःश्रुत्वातुपरिदेवितं॥उवाचमावधिष्टेतिघ्नतःशाखामृगर्षभान्॥१९॥

गृहीतवंतः॰लोप्तुंपक्षावितिशेषः॥१६॥१७॥यथोक्तराजसंदेशवादिनोममापराधोनास्तीत्याह॰य
स्त्विति॰भर्तुर्मतंसंदिष्टंमार्गंहित्वास्वमतंतत्कालेआत्मत्राणार्थमन्यदेवकिंचिद्यदिभाषतेतत्
दासोऽनुक्तवादीसन्वधमर्हति॥१८॥शुकस्यपरिदेवितरूपंवचनंश्रुत्वामवधिष्टमावधिध्वमि
तियावत्॰एकवचनमार्षं॥१९॥

सीतायाःपदंत्राणमुद्दिश्यागतौ·पदंव्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु ॥ ५ ॥ दशयोजनमाकाशं·तावत्पर्यंतावकाशमावृत्यसन्निविष्टमित्यनुषंगः·तत्त्वभूतंयथार्थमित्यर्थः ॥ ६ ॥ उपप्रदानंसीतायाःसांत्वंसुग्रीवंप्रतिसामभेदोवातंप्रत्येव ॥ ७ ॥ आत्मनोर्थे·तत्कालोचितनय·कार्यंशुकमुवाचेतिअन्वयः

उत्तमौरूपसंपन्नौसीतायाःपदमागतौ ॥ एतौसागरमासाद्यसन्निविष्टौमहाद्युते ॥ ५ ॥ बलंचाकाशमावृत्यसर्वतोदशयोजनं ॥ तत्त्वभूतंमहाराजक्षिप्रंवेदितुमर्हसि ॥ ६ ॥ तवदूतामहाराजक्षिप्रमर्हंतिवेदितुं ॥ उपप्रदानंसांत्वंवाभेदोवात्रप्रयुज्यतां ॥ ७ ॥ शार्दूलस्यवचःश्रुत्वारावणोराक्षसेश्वरः ॥ उवाचसहसाव्यग्रःसंप्रधार्यार्थमात्मनः ॥ शुकंसाधुतदारक्षोवाक्यमर्थविदांवरं ॥ ८ ॥ सुग्रीवंब्रूहिगत्वाशुराजानंवचनान्मम ॥ यथासंदेशमक्लीबंश्लक्ष्णयापरयागिरा ॥ ९ ॥ त्वंवैमहाराजकुलप्रसूतोमहाबलश्चर्क्षरजःसुतश्च ॥ नकश्चनार्थस्तवनास्त्यनर्थस्तथापिभ्रातृसमोहरीश ॥ १० ॥ अहंयद्यहरंभार्यांराजपुत्रस्यधीमतः ॥ किंतत्रतव·सुग्रीवकिष्किंधांप्रतिगम्यतां ॥ ११ ॥

सुग्रीवंप्रतिसामभेदप्रयोगार्थमितिशेषः ॥ ८ ॥ तदेवाहसुग्रीवमिति·यथासंदेशंमत्संदेशप्रकारमनतिक्रम्य·अक्लीबमकातरं ॥ ९ ॥ तवार्थःकोपिनास्ति·रामसहायकरणेनप्राप्यंफलंनास्ती·अनर्थश्चकश्चित्परिहर्तव्योनास्ति·अतोनिष्प्रयोजनप्रवृत्तिरनुचितेतिभावः यद्यपिवाकश्चिदर्थोरामतोनातःस्यात्तथापिमे[illegible]समोसि·तथाचमद्विषयेऔदासिन्यमनुचितमितिभावः ॥ १० ॥ ११ ॥

पिशाचादीनामेकैकं समुदितं च त्रातारं न पश्यामि· । अत एव नञ्पंचकं चरितार्थं ॥ २६ ॥ किं च तद्बलं त्व
यैव ज्ञातमिति त्वत्कृतवोरवृत्या जानीमइत्याह· अवधीरिति· जरावृद्धं जरायुक्तं वृद्धं चिर
कालिकं· चिरकालिकोपि कश्चिद्दोषध्वसिध्यादिना जरारहितो भवेत्· अचिरकालिकोपि कश्चित्स्या

तस्य ते त्रिषु लोकेषु न पिशाचं न राक्षसं ॥ त्रातारं नानुपश्यामि न गंधर्वं न चासुरं ॥ २६ ॥ अवधी
स्त्वं जरावृद्धं गृध्रराजं जटायुषं ॥ किं नु ते रामसान्निध्ये सकाशे लक्ष्मणस्य च ॥ हृता सीता वि
शालाक्षी यां त्वं रक्ष्य न बुध्यसे ॥ २७ ॥ महाबलं महात्मानं दुरा[illegible]र्षं सुरैरपि ॥ न बुध्यसे रघुश्रे
ष्ठं यस्ते प्राणान्हरिष्यति ॥ २८ ॥ ततोब्रवीद्वालिसुतोप्यंगदो हरिसत्तमः ॥ नायं दूतो महा
प्राज्ञ चारकः प्रतिभाति मे ॥ २९ ॥ तुलितं हि बलं सर्वमनेन तव तिष्ठता ॥ गृह्यतां मा गमल्लं
कामेतद्धि मम रोचते ॥ ३० ॥ ततो राज्ञा समादिष्टाः समुत्पत्य बलीमुखाः ॥ जगृहुश्च बबंधुश्च
विलपंतमनाथवत् ॥ ३१ ॥

पादिना जरावानित्युभयोपादानं· किंतु न त्वत्ता यदि बलमस्तीति शेषः
न बुध्यसे स्वबलमिति शेषः ॥ २७ ॥ रघुश्रेष्ठं महाबलत्वादिगुणकं न बुध्यसे इत्यर्थः ॥ २८ ॥ अयं स्वा
मिसंदेशप्रापणमात्रकृत्यो दूत एव न किंतु गुप्ततया परबलपरीक्षाप्रवृत्तिश्चार एव ॥ २९ ॥ कुतस्त
त्राह· तुलितं हीति· एवंप्रमाणमेवंव्यूहमिति सर्वं परिच्छिन्नमित्यर्थः ॥ ३० ॥ राजाः सुग्रीवेण ॥ ३१ ॥

रामवचसा हरिभिरभये दर्शिते सति· यत्र लघुः पक्षबलेन शीघ्रगतिर्भूत्वा वचनमब्रवीत्· यत्तु यत्र लघुः पक्षैर्लघुः लूनपक्ष इति तीर्थस्तन्न· तादृशस्यांतरिक्षगमनासंभवात् रामवचनानुष्ठानबाधाच्च ॥२०॥ लोकरावण इत्यनेन तत्संदेशं विनैव गमनेन ततो मे महद्भयमिति सूचितं ॥२१॥ वाक्यं· प्रतिसंदेश

स च पत्रलघुर्भूत्वा हरिभिर्दर्शिते भये ॥ अंतरिक्षे स्थितो भूत्वा पुनर्वचनमब्रवीत् ॥२०॥
सुग्रीव सत्वसंपन्न महाबलपराक्रम ॥ किं मया खलु वक्तव्यो रावणो लोकरावणः ॥२१॥
स एवमुक्तः प्लवगाधिपस्तदा प्लवंगमानामृषभो महाबलः ॥ उवाच वाक्यं रजनीचरस्य चारं शुकं शुद्धमदीनसत्वः ॥२२॥
न मेसि मित्रं न तथानुकंप्यो न चोपकर्तासि न मे प्रियोसि ॥ अरिश्च रामस्य सहानुबंधस्ततोसि वालीव वधार्ह वध्यः ॥२३॥
निहन्म्यहं त्वां ससुतं सबंधुं सज्ञातिवर्गं रजनीचरेश ॥ लंकां च सर्वां महता बलेन सर्वैः करिष्यामि समेत्य भस्म ॥२४॥
न मोक्ष्यसे रावण राघवस्य सर्वैः सहेंद्रैरपि मूढ गुप्तः ॥ अंतर्हितः सूर्यपथं गतोपि तथैव पातालमनुप्रविष्टः ॥ गिरिशपादांबुजसंगतो वा हतोसि रामेण सहानुजस्त्वं ॥२५॥

वाक्यं ॥२२॥ अनुकंप्यो दयापात्रं· अरिश्च· असीति शेषः अतः सहानुबंधः सपुत्रमित्रादिपरिकरस्ततो रामारित्वादेव वालीव वध्योसि· रामेणेति शेषः ॥२३॥ त्वां मन्मित्ररामारिं सर्वैः समेत्येत्यन्वयः ॥२४॥ राघवस्य न मोक्ष्यसे राघवान्न मुच्यसे अंतर्हितोंतर्धानशक्त्या ॥२५॥

पुरस्तात्·पूर्वंवाल्लसूर्यप्रकाशैरतिरक्तैश्चंदनैःकुंकुमैरितियावदित्यर्थः॥४॥शयनेतत्कालेसीता
याउत्तमांगेनशिरसारामभुजार्पितेनशोभितः तक्षकस्यासंभोगंशरीरंगंगाजलेननिषेवितंस्थितगं
गाजलमित्यर्थः॥ अत्रगंगाजलस्थानेसीता·गौरत्वात्पवित्रत्वाच्च॥५॥संयुगेशत्रूणांशोकवर्धनं युग
संकाशं·युगवद्दीर्घं·दीर्घदीर्घकालं·सुहृदांनंदनंसुखप्रापकं·सागरांतरभूचक्रस्यव्यपाश्र

64

चंदनागरुभिश्चैवपुरस्तादभिसेवितं॥बालसूर्यप्रकाशैश्चचंदनैरुपशोभितं॥४॥शय
नेचोत्तमांगेनसीतायाःशोभितंपुरा॥तक्षकस्येवसंभोगंगंगाजलनिषेवितं॥५॥संयुगेयुग
संकाशंशत्रूणांशोकवर्द्धनं॥सुहृदांनंदनंदीर्घंसागरांतव्यपाश्रयं॥६॥अस्यताचपुनः
सव्यंज्याघातविहतत्वचं॥दक्षिणोदक्षिणंबाहुंमहापरिघसन्निभं॥७॥

यंप्रतिव्याभृतं ६

पुनःपुनःसव्यमस्यताशरान्विसृजताज्याघातेनविहतात्वग्यत्रतादृशंसर्वभुजेभ्यउत्तमंगो
सहस्रप्रदातारंदक्षिणंबाहुंभुजंतदवच्छिन्नः कूर्परादुपरिदेशोभुजइत्याहुः उपधाय दक्षिणः
स्वयमधिशिष्येइत्यन्वयः पुनर्बाहुभुजशब्दप्रयोगःपूर्वस्यव्यवहिततयाविशेष्यप्रतिपत्त्य
र्थः अद्यत्रिदिनमुपासनयाप्रसन्नस्यसागरस्यप्रसादेनमेससैन्यस्यतरणंवाभिस्यात्·ततः
परमुपेक्षणेसागरस्यमत्तोमरणमेववस्यादितिधृतिंकृत्वानिश्चित्येतियोजनामुनिर्मौनीमहो

[illegible]

लुप्येतिछिद्येते॥३२॥रात्रिशब्दोहोरात्रपरः।यद्दिनेमरिष्यामियद्दिनेचजातवानस्मितदंतरेकालेज
न्ममरणावधिकालेयन्मयाऽशुभंकृतंतत्सर्वंत्वमुपपद्येथाः त्वंप्राप्नुयाःयदीहत्वयाऽनिवारित
ताइतोजीवितंजह्यां॥३३॥३४॥अवगुमानःक॰॥१९॥इतिश्रीरामाभिरामेश्रीरा॰रा॰ति॰युद्ध॰

भुकस्तुवानरैश्चंडैस्तत्रतैःसंप्रपीडितः॥व्याचुक्रोशमहात्मानंरामंदशरथात्मजं॥लु
प्यतेमेबलात्पक्षोभिद्यतेमेतथाक्षिणी॥३२॥यांचरात्रिंमरिष्यामिजायेरात्रिंचयामहं॥एत
स्मिन्नंतरेकालेयन्मयाह्यशुभंकृतं॥सर्वंतदुपपद्येथाजह्यांत्वेद्यदिजीवितं॥३३॥नाघा
तयत्तदारामःश्रुत्वातत्परिदेवितं॥वानरानब्रवीद्रामोमुच्यतांदूतआगतः॥३४॥इत्या
र्षेश्रीरामायणेयुद्ध॰विंशःसर्वः॥२०॥ततःसागरवेलायांदर्भानास्तीर्यराघवः।अंज
लिंप्राङ्मुखःकृत्वाप्रतिशिश्येमहोदधेः॥१॥बाहुंभुजंगभोगाभमुपधायारिसूदनः॥जा
तरूपमयैश्चैवभूषणैर्भूषितंसदा॥२॥मणिकांचनकेयूरमुक्ताप्रवरभूषणैः॥भुजैः
परमनारीणामभिमृष्टमनेकधा॥३॥

विंशःसर्गः॥२०॥ततइति॰महोदधेरंजलिंकृत्वाप्रा
ङ्मुखोवरप्रार्थनायप्रतिशिश्येशयनंकृतवान्॥१॥२॥मणिआदिमुक्ताप्रवरांतानिभूषणानियेषुतैःप
रमनारीणांकदारव्रतत्वेननरस्त्रीप्रसंगाभावादुत्तमधात्रीजनानांभुजैरनेकधास्नपनालंकरणादि
कालेभिमृष्टंस्पृष्टंबाहुभिरित्यन्वयः॥३॥

रामा·यु·
६५

65

एवंसतांगुणाः निर्गुणेषुदयागुणहीनेषुअवलिप्तेषुतद्विषयेअसामर्थ्यफलः सर्वशक्तियुक्तोपिदुष्टविषये प्रशमादिपरश्चेत्तमशक्तंमन्यंतइत्यर्थः अतोयंदंडस्यैवविषयइतिभावः आत्मप्रशंसिनं-शौर्यादिगुणाभावेपितद्वत्तयाश्लाघमानं· दुष्टं दुश्चरित्रं· धृष्टं·अधर्मप्रवृत्तौसाहसिकं विपरिधावकं· इतस्ततःस्वगुणख्यापनायपरिधावनशीलं॥१५॥ सर्वत्राप्राणिमात्रेजगत्सृष्टदंडंकृतदंडं·सत्कुरुते

असामर्थ्यफलान्येतेनिर्गुणेषुसतांगुणाः॥ आत्मप्रशंसिनंदुष्टंधृष्टंविपरिधावकं॥१५॥
सर्वत्रोत्सृष्टदंडंचलोकःसत्कुरुतेनरं॥ नसाम्नाशक्यतेकीर्त्तिर्नसाम्नाशक्यतेयशः॥१६॥
प्राप्तुंलक्ष्मणलोकेस्मिन्जयोवारणमूर्धनि॥ अद्यमद्बाणनिर्भिन्नैर्मकरैर्मकरालयं॥१७॥
निरुद्धतोयंसौमित्रेप्लवद्भिःपश्यसर्वतः॥ भोगिनांपश्यभोगानिमयाभिन्नानिलक्ष्मण॥१८॥
महाभोगानिमत्स्यानांकरिणांचकरानिह॥ सशंखशुक्तिकाजालंसमीनमकरंतथा॥१९॥

बहुमन्यते· कीर्त्तिर्दिशांतरख्यातिर्यशः स्वदेशख्यातिः नशक्यतेप्राप्तुमित्यन्वयः॥१६॥ रणमूर्ध्नि जयोवा नप्राप्तुंशक्यतइत्यनुकर्षः मद्बाणनिर्भिन्नैरतएवमत्वासर्वतः प्लवद्भिर्मत्स्यादिभिर्निरुद्धतोयं· प्रच्छादिततोयंभोगिनांभोगानिशरीराणि॥१७॥१८॥ मत्स्यानांमहाभोगानिमहाशरीराणि· करिणांजलकरिणांकरान्भिन्नान्पश्येतिशेषः शंखं संखजालशुक्तिकाजालसहितंसमुद्रमित्यन्वयः॥१९॥

राम·
६५

८ ॥ ९ ॥ अभिजग्मतुः अभिजग्मुः ॥ १० ॥ सः अंगुल्यग्रेणतान्हन्यामित्यादिनाप्रकटितवीर्यः नयज्ञः सामाद्युपायानां यथोचितंप्रयोक्ता धर्मवत्सलः शरणागतरक्षणरूपे धर्मे प्रीतिमान् उपासत उ

गोसहस्रप्रदातारंत्यपधायभुजंमहत् ॥ अद्यमेतरणंवाथमरणंसागरस्यवा ॥ ८ ॥ इतिरामोधृतिंकृत्वामहाबाहुर्महोदधिं ॥ अधिशिश्येचविधिवत्प्रयतोत्रस्थितोमुनिः ॥ ९ ॥ तस्य रामस्यसुप्तस्यकुशास्तीर्णेमहीतले ॥ नियमादप्रमत्तस्यनिशास्तिस्रोभिजग्मतुः ॥ १० ॥ सत्रिरात्रोषितस्तत्रनयज्ञोधर्मवत्सलः ॥ उपासततदारामः सागरंसरितांपतिं ॥ ११ ॥ नचदर्शयतेरूपंमंदोरामस्यसागरः ॥ प्रयतेनापिरामेणयथार्हमभिपूजितः ॥ १२ ॥ समुद्रस्यततः क्रुद्धोरामोरक्तांतलोचनः ॥ समीपस्थमुवाचेदंलक्ष्मणंशुभलक्षणं ॥ १३ ॥ अवलेपः समुद्रस्यनदर्शयतियःस्वयं ॥ प्रशमश्चक्षमाचैवआर्जवंप्रियवादिता ॥ १४ ॥ अ

पास्त ॥ ११ ॥ शरणागतत्वेपिफलप्रदानाभिमुख्याभावात्सागरस्यसापराधत्वमाह नचेति मंदोमंदबुद्धिः ॥ १२ ॥ समुद्रस्यक्रुद्धः समुद्रायक्रुद्धः ॥ १३ ॥ अवलेपोगर्वः वर्त्तत इतिशेषः प्रशमश्चित्तशांतिः क्षमाशक्यप्रतिक्रियापराधसहिष्णुता आर्जवंकौटिल्याभावः ॥ १४ ॥ अ

२९।३०॥३१॥३२॥सौमित्रिरुत्पत्योपगम्यविनिश्वसंतंरामंमामेत्युक्त्वासमुद्रसत्वनाशनंनकार्यमित्यु
क्त्वाधनुराललंबेधृतवानित्यर्थः॥३३॥एतद्विनापित्तोभाणां विनापि·साधुवृत्तंसमीचीनोपायमेवदी

महोर्मिजालचलितः शंखजालसमावृतः॥सधूमः परिवृत्तोर्मिः सहसासीन्महोदधिः
॥२९॥व्यथिताः पन्नगाश्चासन्दीप्तास्यादीप्तलोचनाः॥दानवाश्चमहावीर्याः पातालतलवा
सिनः॥३०॥ऊर्मयः सिंधुराजस्यसनक्रमकरास्तथा॥विंध्यमंदरसंकाशाः समुत्पेतुः स
हस्रशः॥३१॥आघूर्णिततरंगौघः संभ्रांतोरगराक्षसः॥उद्वर्तितमहाग्राहः सघोषोव
रुणालयः॥३२॥ततस्तुतंराघवमुग्रवेगंप्रकर्षमाणंधनुरप्रमेयं॥सौमित्रिरुत्पत्य
विनिश्वसंतंमामेतिचोक्त्वाधनुराललंबे॥३३॥एतद्विनापिह्युदधेस्तवाद्यसंपत्स्यतेवी
रतमस्यकार्यं॥भवद्विधाः क्रोधवशंनयांतिदीर्घंभवान्पश्यतुसाधुवृत्तं॥३४॥अंतर्हितै
श्चापितथांतरिक्षेब्रह्मर्षिभिश्चैवसुरर्षिभिश्च॥शब्दः कृतः कष्टमितिब्रुवद्भिर्मामेतिचो
क्त्वामहतास्वरेण॥३५॥इत्यार्षेश्रीरामायणेयुद्धकांडेएकविंशः सर्गः॥२१॥

र्घंयथाभवतितथापश्यतु॥३४॥कष्टमितिब्रुवद्भिर्ऋष्यादिभिर्महतास्वरेणमामेतिउक्त्वा
शब्दोहाहाशब्दः कृतइत्यर्थः॥३५॥मार्गमानः क०॥२०॥इतिश्रीरामाभिरामेश्रीरामीयेरा
मायणतिलकेयुद्धकांडेएकविंशतिः सर्गः॥२१॥

युद्धेनः प्रहारेण ॥२०॥ असमर्थस्वविजयेदिति शेषः ॥२१॥ स्ववैभवमवष्टभ्याह चापमिति ॥२२॥ वेलासु
तीरेषु कृतमर्यादं तदल्लंघने कृतनियमं ॥२३॥ निर्मर्यादं लंघितवेलं ॥२४॥२५॥ घोरं धनुः शनैः सं

अद्ययुद्धेनमहतासमुद्रंपरिशोषये ॥ क्षमयाहिसमायुक्तंमामयंमकरालयः ॥२०॥ असम
र्थंविजानातिधिक्क्षमामीदृशेजने ॥ नदर्शयतिसाम्नामेसागरोरूपमात्मनः ॥२१॥ चापमान
यसौमित्रेशरांश्चाशीविषोपमान् ॥ समुद्रंशोषयिष्यामिपद्भ्यांयांतुप्लवंगमाः ॥२२॥ अद्या
क्षोभ्यमपिक्रुद्धः क्षोभयिष्यामिसागरं ॥ वेलासुकृतमर्यादंसहस्रोर्मिसमाकुलं ॥२३॥ नि
र्मर्यादंकरिष्यामिसायकैर्वरुणालयं ॥ महार्णवंक्षोभयिष्येमहादानवसंकुलं ॥२४॥ ए
वमुक्त्वाधनुःपाणिः क्रोधविस्फारितेक्षणः ॥ बभूवरामोदुर्धर्षोयुगांताग्निरिवज्वलन् ॥२५॥
संपीड्यचधनुर्घोरंकंपयित्वाशरैर्जगत् ॥ मुमोचविशिखानुग्रान्वज्रानिवशतक्रतुः ॥
॥२६॥ तेज्वलंतोमहावेगास्तेजसासायकोत्तमाः ॥ प्रविशंतिसमुद्रस्यजलंवित्रस्तपन्नगं ॥२७॥
तोयवेगः समुद्रस्यसमीनमकरोमहान् ॥ सबभूवमहाघोरः समारुततरवस्तथा ॥२८॥

पीड्य सपीडनपूर्वंसज्जंकृत्वाजगत्कंपयित्वाज्याघोषेणेतिशेषः ॥२६॥२७॥ समुद्रस्यतोय
वेगः संक्षोभः समारुतरवः बाणगणप्रवर्तितमारुतशब्दसहितः ॥२८॥ ॥

निर्घाताअशनयःनिर्जग्मुःनिःसृताः॥९॥दिव्यमारुतपंक्तयःपरिवहादिवातस्कंधाः वपुःप्रकर्षेणमहावेगेनववुःबभंजचेति·मारुतपंक्तिरितिशेषः उद्वहन्मारुतसमूहइतिशेषः॥१०॥अग्रेप्येषएवकर्त्तां·न्नेपतमानामहाशनयःमहावेगत्वादिगुणैर्वैद्युतानग्नीन्मुमुचुः॥११॥अशनेःसमंअशनिघो

प्रचकाशेनदाकाशमुल्काशतविदीपितं॥अंतरिक्षाच्चनिर्घातानिर्जग्मुरतुलस्वनाः॥९॥
वपुःप्रकर्षेणववुर्दिव्यमारुतपंक्तयः॥बभंजचतदावृक्षान्जलदानुद्वहन्मुहुः॥१०॥आ
रुजंश्चैवशैलाग्राण्यद्रिखराणिबभंजच॥दिविचस्थमहावेगाःसंहताःसमहास्वनाः॥११॥
मुमुचुर्वैद्युतानग्नींस्तेमहाशनयस्तदा॥यानिभूतानिदृश्यानिचुक्रुशुश्चाशनेःसमं॥१२॥
अदृश्यानिचभूतानिमुमुचुर्भैरवस्वनं॥शिशिपिरेचाभिभूतानिसंत्रस्तान्युद्विजंतिच॥१३॥
संप्रविव्यथिरेचापिनचपस्पंदिरेभयात्॥सहभूतैःसतोयोर्मिःसनागःसहराक्षसः॥१४॥
सहसाभूत्ततोवेगाद्भीमवेगोमहोदधिः॥योजनंव्यतिचक्रामवेलामन्यत्रसंप्लवात्॥१५॥

67

षतुल्यघोषं॥१२॥संत्रस्तानिभीतानिउद्विजंतिकंपमानानिशिशिपिरेशायितान्यभूवन्·नोत्थातुंसमर्थानीत्यर्थः॥१३॥नदेवविरणोतिसंप्रव्यथिरेइति॥१४॥संप्लवःप्रलयस्ततोन्यत्रापियोजनंव्यतिचक्रामः॥१५॥

एवं प्राणिपीडावहेत्तोभे निवारिते शोषणप्रतिज्ञां संपादयितुमुद्युंक्ते ऽद्येति॥१॥ निहितानि सत्वानि यादांसि यस्य। उत्पद्यते। वर्त्तमानसामीप्ये लट्॥२।३॥ विचिन्वन् जलादि वध्यावद्धियुक्तः सन्। हे दानवालय। पूर्वोक्तहेतोर्मत्तः संतापं प्राणनाशनिबंधनं गमिष्यसि। नाम प्रसिद्धौ इत्युक्ते ति शेषः॥४॥ अस्त्रेणेत

अथोवाच रघुश्रेष्ठः सागरं दारुणं वचः॥ अद्याहं शोषयिष्यामि सपातालं महार्णवं॥१॥ शरनिर्दग्धतोयस्य परिशुष्कस्य सागर॥ मया निहतसत्वस्य पांशुरुत्पद्यते महान्॥२॥ मत्कार्मुकनिसृष्टेन शरवर्षेण सागर॥ परं तीरं गमिष्यंति पद्भिरेव प्लवंगमाः॥३॥ विचिन्वन्नाभिजानासि पौरुषं नापि विक्रमं॥ दानवालय संतापं मत्तो नाम गमिष्यसि॥४॥ ब्राह्मेणास्त्रेण संयोज्य ब्रह्मदंडनिभं शरं॥ संयोज्य धनुषि श्रेष्ठे विचकर्ष महाबलः॥५॥ तस्मिन्विकृष्टे सहसा राघवेण शरासने॥ रोदसी संपफालेव पर्वताश्च चकंपिरे॥६॥ तमश्च लोकमाववे दिशश्च न चकाशिरे॥ प्रतिचुक्षुभिरे चाशु सरांसि सरितस्तदा॥७॥ तिर्यक्च सह नक्षत्रैः संगतौ चंद्रभास्करौ॥ भास्करांशुभिरादीप्तं तमसा च समावृत्तं॥८॥

मंत्रेण संयोज्य। अभिमंत्र्य। एवमभिमंत्रितं शरं धनुषि संयोज्य॥५॥ संपफालेव विशशारतुरिव। एकवचनमार्षं॥६।७॥ नक्षत्रैः सह तिर्यक् संगतौ यथाप्राप्तपूर्वापरमार्गप्रतिरोधान्। दक्षिणोत्तरमार्गगामिनावभूतामित्यर्थः भास्करांशुभिरादीप्तमपि तमसा संवृतमाकाशमासीदिति शेषः अनेन विरुद्धयोस्तेजस्तिमिरयोः सामानाधिकरण्यरूप उत्पातः सूचितः॥८

रामा·यु·
६८

एतावत्कालमनागमनेस्वीयमगाधत्वमेवकारणमितिसूचयितुंसामान्यतोभूतस्थितिमाहपृथिवीति· पृथ्वीस्वभावःकाठिण्याद्धारणं· वायोःसदासंचारतःसंयोजनवियोजनं· आकाशस्यावकाशदानं· अपांस्पंदनंसंश्लेषणं· ज्योतिषःप्रकाशभस्मीकरणे· शाश्वतंमार्गमनादिंव्रह्मसृष्टंस्वरूपस्थितिप्रकारमास्थिताःसंतःस्वेस्वेभावेवाऽतिष्ठंति॥२३॥ तत्तस्मादहमप्यगाधत्वाशक्य

68

पृथिवीवायुराकाशमापोज्योतिश्चराघव॥स्वभावेसौम्यतिष्ठंतिशाश्वतंमार्गमाश्रिताः॥
॥२३॥तत्स्वभावोममाप्येषयदगाधोहमप्लवः॥विकारस्तुभवेद्गाधएतत्तेप्रवदाम्यहं॥२४॥
नकामान्नचलोभाद्वानभयात्पार्थिवात्मज॥रागान्नक्राकुलजलंस्तंभयेयंकथंचन॥२५॥

तरणात्वरूपाशक्यप्लवत्वादिस्वभावःगाधोगाधत्वंममविकारोभवेत्· एतदेतत्तस्माद्धेतोस्तेहंप्रवदाम्युपायमितिशेषः॥२४॥ननुमाभूत्तेगाधता· स्वस्वरूपस्तंभनेनास्माकंगतिंदेहीत्यत्राहनेति· कामाद्यन्यतमेनापिसमुदितेनवानजलंस्तंभये·॥जलरूपस्यमेस्वरूपपीडाप्रसंगात्· तत्रकामोभिलाषःलोभःस्ववस्तुपरित्यागासहिष्णुता· रागोनुरागः॥२५॥ श्र

राम·
६८

तत्प्रसिद्धं उत्तमानविशेषणं· तं दक्षिणदेशस्थं· नदनदीपतिं दृष्ट्वा राघवो रामो नातिचक्राम न चचाल· अस्खलन्नपरावर्त्तितवानित्यर्थः अस्खलन्नत्यक्रवानिति वा ॥१६॥१७॥१८॥१९॥ जातरूपं सुवर्णं तपनीयं तप्तकांचनं अधिकवर्णं· स्वोदरजातरत्नखचितभूषणोत्तमैर्भूषितः ॥२०॥ अतएव विविधधातुभिर्मंडितः शैल इव· कालिकानिलैर्मेघवातैः संकुलः मेघजालं च कालिका ॥२१॥ समुपक्रम्य· उपगम्य· पूर्वमामंत्र्य हे रामेति प्रथमं संबोध्य· शरपाणिनं शरपाणिं ॥२२॥ श्री ॥ ॥ ॥

ततस्तथा समतिक्रांतं नातिचक्राम राघवः ॥ तमुद्धतममित्रघ्नो रामो नदनदीपतिं ॥१६॥ ततो मध्यात्समुद्रस्य सागरः स्वयमुत्थितः ॥ उदयाद्रिमहाशैलान्मेरोरिव दिवाकरः ॥१७॥ पन्नगैः सह दीप्तास्यैः समुद्रः प्रत्यदृश्यत ॥ स्निग्धवैडूर्यसंकाशो जांबूनदविभूषणः ॥१८॥ रत्नमाल्यांबरधरः पद्मपत्रनिभेक्षणः ॥ सर्वपुष्पमयीं दिव्यां शिरसा धारयन्स्रजं ॥१९॥ जातरूपमयैश्चैव तपनीयविभूषणैः ॥ आत्मजानां च रत्नानां भूषितो भूषणोत्तमैः ॥२०॥ धातुभिर्मंडितः शैलो विविधैर्हिमवानिव ॥ आघूर्णिततरंगौघः कालिकानिलसंकुलः ॥२१॥ गंगासिंधुप्रधानाभिरापगाभिः समावृतः ॥ सागरः समुपक्रम्य पूर्वमामंत्र्य वीर्यवान् ॥ अब्रवीत्प्रांजलिर्वाक्यं राघवं शरपाणिनं ॥२२॥

तैःपापकर्मभिःस्पर्शनंममास्ति·तत्पापंनसह्येयंअतस्तत्रायममोघःशरोमुच्यतां॥३१॥सागरदर्शनात्·॥
अनंतरमितिशेषःसागरोपदेशादितिवार्थः॥३२॥यत्रशरःपातितस्तत्स्थलं·तेनहेतुनामरुकांता
रमितिविश्रुतं॥३३॥व्रणमुखात्·ब्रह्मास्त्रकृतद्वारात्॥३४॥उत्थितंव्रणकूपादितिशेषःसमुद्रस्य

तैर्नस्पर्शनंपापंसह्येयंपापकर्मभिः॥अमोघःक्रियतांरामअयंतत्रशरोत्तमः॥३१॥तस्यत
द्वचनंश्रुत्वासागरस्यमहात्मनः॥मुमोचतंशरंदीप्तंपरंसागरदर्शनात्॥३२॥तेनतन्मरु
कांतारंपृथिव्यांकिलविश्रुतं॥निपातितःशरोयत्रवज्राशनिसमप्रभः॥३३॥ननादच
तदातत्रवसुधाशल्यपीडिता॥तस्माद्व्रणमुखात्तोयमुत्पपातरसातलात्॥३४॥सबभूव
तदाकूपोव्रणइत्येवविश्रुतः॥सततंचोत्थितंतोयंसमुद्रस्येवदृश्यते॥३५॥अवदारण
शब्दश्चदारुणःसमपद्यत॥तस्मात्तद्बाणपातेनअपःकुक्षिष्वशोषयत्॥३६॥विख्यातं
त्रिषुलोकेषुमरुकांतारमेवच॥शोषयित्वातुतंकुक्षिंरामोदशरथात्मजः॥वरंतस्मैददौ
विद्वान्मरवेमरविक्रमः॥३७॥

जलमिव·प्रभूतमितिशेषः॥३५॥तस्मादवदारणशब्दाद्बा
णपातेनहेतुनातद्देशस्यकुक्षिषुसरस्तटाकादिषुवर्त्तमानाःपुरातनीरपीदस्कजीवनसाधनीभू
ताअशोषयत्रामइतिशेषः॥३६॥बाणशोषितजलवत्वात्ततःपरंमरुकांतारमितिख्यातं॥३७॥

तर्हि कथं कार्यनिर्वाहस्तत्राह विधास्ये करिष्यामि· उक्तमेवार्थं स्थैर्यायाह ग्राहा इति· हरीणां तरणे
तरणनिमित्तं तथा स्थलं करिष्यामि यथा यावत्सेना प्रतरिष्यति· तावद्ग्राहा वानरान्न प्रहरिष्यन्
ति· वक्ष्यमाणमार्गेण मयि सेतुं कुर्वित्युक्तं भवति· एतद्विधानं च मया ज्ञाताव्येति बोध्यं ॥२६॥

विधास्ये येन गन्तासि विषहिष्येऽप्यहं तथा न ग्राहा विधमिष्यंति यावत्सेना तरिष्यति
॥२६॥ हरीणां तरणे राम करिष्यामि यथा स्थलं ॥२६॥ तमब्रवीत्तदा रामः शृणु मे वरुणाल
य ॥ अमोघोऽयं महाबाणः कस्मिन्देशे निपात्यतां ॥२७॥ रामस्य वचनं श्रुत्वा तं च दृष्ट्वा महाश
रं ॥ महोदधिर्महातेजा राघवं वाक्यमब्रवीत् ॥२८॥ उत्तरेणावकाशोऽस्ति कश्चित्पुण्यत
रो मम ॥ द्रुमकुल्य इति ख्यातो लोके ख्यातो यथा भवान् ॥२९॥ उग्रदर्शनकर्माणो बहवस्त
त्र दस्यवः ॥ आभीरप्रमुखाः पापाः पिबंति सलिलं मम ॥३०॥

इत्युक्तेऽत्वब्रवीदिदम् इति पाठे एवं कार्यसाधने कथमपि प्रतिज्ञाते सतीत्यर्थः बाणो ब्रह्मास्त्रसंयु
तः ॥२७॥२८॥ उत्तरेणेत्येनबन्तमव्ययं· ममोत्तरेण सन्नोत्तरदेशे· अग्रिमदेश इति यावत् उत्त
रशब्दोऽग्रिमवाची· यथा भवान् लोके ख्यातः पुण्यतमश्च एवं द्रुमकुल्य इति ख्यातः पुण्यतमः
कश्चिदवकाशोऽस्ति ॥२९॥ तत्र उग्रदर्शनकर्माणो येषां तादृशा बहवो दस्यवः पापाः संति ॥३०॥

तद्वाक्यमाह· अहमिति· पितुर्वरदानसामर्थ्यमास्थायसेतुंकरिष्यामिनात्रसंशयः महोदधिश्चतत्वमेवाह· त्वत्प्रीतिमतोममसामर्थ्यमस्तीति ॥४४॥ अथकिंचिदुक्तुंनलोलोकस्थितिमाह· दंडएवेति· पुरुषस्याकृतज्ञेषुदंडएवपरोर्थसाधकइतिमेमतिः अतएवाकृतज्ञेषुक्षमांधिक् ॥४५॥ कुतएवंतत्राह· अयंहीति· यतोयंसागरः रामपूर्वैःसगरपुत्रैर्वर्धितोपि अकृतज्ञतयादंडभयादेवसं

अहंसेतुंकरिष्यामिविस्तीर्णेमकरालये ॥ पितुःसामर्थ्यमासाद्यतत्वमाहमहोदधिः ॥
॥४४॥ दंडएवपरोल्लोकेपुरुषस्येतिमेमतिः ॥ धिक्क्षमामकृतज्ञेषुसांत्वंदानमथापिवा ॥४५॥
अयंहिसागरोभीमःसेतुकर्मदिदृक्षया ॥ ददौदंडभयाद्गाधंराघवायमहोदधिः ॥४६॥
मममातुर्वरोदत्तोमंदरेविश्वकर्मणा ॥ मयातुसदृशःपुत्रस्तवदेविमष्यति ॥४७॥

जानयादिदृक्षयातज्जन्यदर्शनेनराघवायसेतुंकर्तुंगाधंददौ· यद्यपिसागरसंबंधादेवहनूमतेमैनाकद्वाराकृतोपचारःसागरस्तथापिरामेएतावद्विलंबकरणंरामेणक्रोधादस्त्रसाधनंकारयित्वास्वरिपुनाशनायेतिबोध्यं ॥४६॥ स्वस्यपितृसदृशत्वंसागरोक्तंसत्यमितिबोधयितुंवरागमनप्रकारमाह· ममेति· उत्तरार्द्धंवररूपं ॥४७॥

मरवेमरुदेशाय॥३७॥ पशव्यः पशुहितः अल्परोगः क्षीणरोगः विविधौषधिरतएवसुगंधिः॥३८॥ शोभ
नः पंथाः शोभनोदेशः॥३९॥४०॥ पित्रादत्तवरः सर्ववस्तुनिर्माणसामर्थ्यदत्तवरः विश्वकर्मणस्तव
प्रीतिमान्त्वद्विषयप्रीतिमान्तेनत्वन्नामस्मरणपूर्वं करोत्वित्यर्थः संसारसागरेगाधतासंपा

पशव्यश्चाल्परोगश्च फलमुलरसायुतः॥ बहुस्नेहोबहुक्षीरः सुगंधिर्विविधौषधिः॥३८॥ एवमे
तैश्च संयुक्तो बहुभिः संयुतोमरुः॥ रामस्यवरदानाच्च शिवः पंथाबभूवह॥३९॥ तस्मिन्दग्धे
तदाकुक्षौ समुद्रः सरितांपतिः॥ राघवंसर्वशास्त्रज्ञमिदंवचनमब्रवीत्॥४०॥ अयंसौम्य
नलोनामतनयो विश्वकर्मणः॥ पित्रादत्तवरः श्रीमान्प्रीतिमान्विश्वकर्मणः॥४१॥ एषसे
तुं महोत्साहः करोतुमयिवानरः॥ तमहंधारयिष्यामि यथाह्येषपितातथा॥४२॥ एवमु
क्तोदधिर्नष्टः समुत्थायनलस्ततः॥ अब्रवीद्वानरश्रेष्ठो वाक्यंराममहाबलः॥४३॥

दकस्यत्वन्नाम्नोमज्जाधतासंपादनमीषत्करमितिभावः॥४१॥ कथंत्वय्यगाधेकरिष्यतीत्यत्राह·
तमिति· तंतत्क्रियमाणसेतुंतावद्देशेगाधोभूत्वाधारयिष्यामि· तावन्मात्रसहाय्येमया
कृतेसेतुनिर्माणंतस्येषत्करमित्याह· यथेति· सेत्वादिनिर्माणेयथास्यपिताविश्वकर्माित
थाएषतस्मिन्कर्मणिसमर्थइत्यर्थः॥४२॥ नष्टोऽदर्शनंगतोंतर्हितइत्यर्थः ततोनलःसमुत्था
याब्रवीत्॥४३॥

५५॥यंत्रैःसुखाहरणसाधनैः॥५६॥अवासर्पत्अधःपपातेत्यर्थः॥५७॥सूत्राणीति॰आकर्षणार्थमि

तालान्दाडिमगुल्मांश्चनारिकेलविभीतकान्॥करीरान्बकुलान्निंबान्समाजह्रुरितस्ततः॥५५॥
हस्तिमात्रान्महाकायाःपाषाणांश्चमहाबलाः॥पर्वतांश्चसमुत्पाट्ययंत्रैःपरिवहंतिच॥५६॥
प्रक्षिप्यमाणैरचलैःसहसाजलमुद्धतं॥समुत्ससर्पचाकाशमवासर्पत्ततःपुनः॥५७॥समु
द्रंक्षोभयामासुर्निपतंतःसमंततः॥सूत्राण्यन्येप्रगृह्णंतिह्यायतंशतयोजनं॥५८॥न
लश्चक्रेमहासेतुंमध्येनदनदीपतेः॥सतदाक्रियतेसेतुर्वानरैर्घोरकर्मभिः॥५९॥दंडा
नन्येप्रगृह्णंतिविचिन्वंतितथापरे॥वानरैःशतशस्तत्ररामस्याज्ञापुरस्सरैः॥६०॥मेघाभैः
पर्वताभैश्चतृणैःकाष्ठैर्बबंधिरे॥पुष्पिताग्रैश्चतरुभिःसेतुंबध्नंतिवानराः॥६१॥पाषाणां
श्चगिरिप्रख्यान्गिरीणांशिखराणिच॥दृश्यंतेपरिधावंतोगृह्यदानवसन्निभाः॥६२॥
शैलानांक्षिप्यमाणानांशिलानांतत्रपात्यतां॥बभूवतुमुलःशब्दस्तदातस्मिन्महोदधौ॥६३॥
कृतानिप्रथमेनाह्नायोजनानिचतुर्दश॥प्रहृष्टैर्गजसंकाशैस्त्वरमाणैःप्लवंगमैः॥६४॥

तिशेषःसेतोरवक्रत्वायेतिवाशेषःशतयोजनमायतंदीर्घंमहासेतुंनलश्चक्रेइत्युत्तरेणा
न्वयः॥५८॥५९॥विचिन्वंतीति॰आहरणीयवस्त्वादिकं॥६०॥ ६१॥ ६२॥ ६३॥ ६४॥

औरसः पुत्रः मातुरालिंगनपूर्वं स्वतेजोनिषेकद्वारा निर्मितः पुत्र इत्यर्थः अतोहं विचित्रनिर्माणे विश्वकर्मणा सदृशः नन्वेतत्सामर्थ्यं प्रागेव त्वं किं नावदस्तत्राह न चेति। आत्मप्रशंसा लज्जयेति शेषः॥४८॥ यस्मात्समर्थोस्मि तस्माद्द्यैव मया सह वानराः सेतुं वध्नंतु बंधनानुज्ञा दीयतामित्यर्थः॥४९

औरसस्तस्य पुत्रोहं सदृशो विश्वकर्मणा॥ न चाप्यहमनुक्तो वः प्रब्रूयामात्मनो गुणान्॥
॥४८॥ समर्थश्चाप्यहं सेतुं कर्त्तुं वै वरुणालये॥ तस्माद्द्यैव बध्नंतु सेतुं वानरपुंगवाः॥४९॥
ततो विसृष्टा रामेण सर्वतो हरिपुंगवाः॥ उत्पेततुर्महारण्यं हृष्टाः शतसहस्रशः॥५०॥
ते नगान्नगसंकाशाः शाखामृगगणर्षभाः॥ बभंजुः पादपांस्तत्र प्रचकर्षुश्च सागरं॥५१॥
ते सालैश्चाश्वकर्णैश्च धवैर्वंशैश्च वानराः॥ कुटजैरर्जुनैस्तालैस्तिलकैस्तिमिशैरपि॥५२॥
विल्वकैः सप्तपर्णैश्च कर्णिकारैश्च पुष्पितैः॥ चूतैश्चाशोकवृक्षैश्च सागरं समपूरयन्॥
॥५३॥ समूलांश्च विमूलांश्च पादपान्हरिसत्तमाः॥ इंद्रकेतूनिवोद्यम्य प्रजह्रुर्वानरास्तरून्॥
॥५३॥

विसृष्टा दत्तानुज्ञाः उत्पेततुः उत्पेतुः॥५०॥ नगसंकाशास्ते नगान्पादपान्बभंजुः सागरं सागरसमीपं प्रचकर्षुः आकर्षयन्॥५१॥ सालाश्वकर्णयोरवांतरजातिकृतो भेदः॥५२॥५३॥ इंद्रकेतून्फलपुष्पादिनाशोभावत्वादिंद्रध्वजसदृशानुन्मूल्योद्यम्योद्धृत्य जह्रुः तरूनित्यस्योत्तरेण संबंधः
॥५४

वध्नंतइतिलिंगव्यत्ययआर्षः॥७५॥७६॥परेषांराक्षसानां॥७७॥वैहायसौ॰आकाशगतिमंतौ॥७९॥सु
ग्रीवेणासमन्वितोरामोधन्वीअग्रतोजगाम॰अनेनसुग्रीवस्यव्योममार्गगमनंसिद्धं॥८०॥८१

बध्नंतःसागरेसेतुंजग्मुःपारंमहोदधेः॥विशालःसुकृतःश्रीमान्सुभूमिःसुसमाहितः॥
॥७५॥अशोभतमहान्सेतुःसीमंतइवसागरे॥ततःपारेसमुद्रस्यगदापाणिर्विभीषणः॥७६॥
परेषामभियानार्थमतिष्ठत्सचिवैःसह॥सुग्रीवस्तुततःप्राहरामंसत्यपराक्रमं॥७७॥
हनूमंतंत्वमारोहअंगदंत्वथलक्ष्मणः॥अयंहिविपुलोवीरसागरोमकरालयः॥७८॥
वैहायसौयुवामेतौवानरौधारयिष्यतः॥अग्रतस्तस्यसैन्यस्यश्रीमान्रामःसलक्ष्मणः॥
॥७९॥जगामधन्वीधर्मात्मासुग्रीवेणसमन्वितः॥अन्येमध्येनगच्छंतिपार्श्वतोन्येप्लवंगमाः॥
॥८०॥सलिलंप्रपतंत्यन्येमार्गमन्येप्रपेदिरे॥केचिद्वैहायसगताःसुपर्णाइवपुप्लुवुः॥८१॥
घोषेणमहताघोषंसागरस्यसमुच्छ्रितं॥भीममंतर्दधेभीमातरंतीहरिवाहिनी॥८२॥वा
नराणांहिसातीर्णावाहिनीनलसेतुना॥तीरेनिविविशेराज्ञाबहुमूलफलोदके॥८३॥

72

तरंतीहरिवाहिनीमहतास्वीयेनघोषेणसागरस्यभीमंमेघोषमंतर्दधेतिरोहितवती॥८२
तीरेपरतीरेनिविविशे॰निवेशिता॥८३॥

६५ ॥ ६६ ॥ ६७ ॥ पंचदिनैः शतयोजनं बबंधः सुवेलः सामीप्ये सुशब्दस्याव्ययीभावः वेलासमीपं परस्य

द्वितीयेन तथैवान्हा योजनानि तु विंशतिः ॥ कृतानि प्लवगैस्तूर्णं भीमकायैर्महाबलैः ॥ ६५ ॥
अन्हा तृतीयेन तथा योजनानि तु सागरे ॥ त्वरमाणैर्महाकायैरेकविंशतिरेव च ॥ ६६ ॥ चतु
र्थेन तथा चान्हा द्वाविंशतिरथापि वा ॥ योजनानि महावेगैः कृतानि त्वरितैस्ततः ॥ ६७ ॥ पंचमे
न तथा चान्हा प्लवगैः क्षिप्रकारिभिः ॥ योजनानि त्रयोविंशत्सुवेलमधिकृत्य वै ॥ ६८ ॥ स वान
रवरः श्रीमान्विश्वकर्मात्मजो बली ॥ बबंध सागरे सेतुं यथा चास्य पिता तथा ॥ ६९ ॥ स नले
न कृतः सेतुः सागरे मकरालये ॥ शुशुभे सुभगः श्रीमान्स्वातीपथ इवांबरे ॥ ७० ॥ ततो देवाः
सगंधर्वाः सिद्धाश्च परमर्षयः ॥ आगम्य गगने तस्थुर्द्रष्टुकामास्तदद्भुतं ॥ ७१ ॥ दशयो
जनविस्तीर्णं शतयोजनमायतं ॥ ददृशुर्देवगंधर्वा नलसेतुं सुदुष्करं ॥ ७२ ॥ आप्लवंतः प्ल
वंतश्च गर्जंतश्च प्लवंगमाः ॥ तमचिंत्यमसत्यं चत्वद्भुतं लोमहर्षणं ॥ ७३ ॥ ददृशुः सर्वभू
तानि सागरे सेतुबंधनं ॥ तानि कोटिसहस्राणि वानराणां महौजसां ॥ ७४ ॥ ॥ ॥

रसमीपमधिकृत्येत्यर्थः ॥ ६८ ॥ ६९ ॥ स्वातीपथः छायापथः ॥ ७० ॥ ७१ ॥ ७२ ॥ गर्जंतः प्लवंगमा
श्च ददृशुः अचिंत्यं अचिंत्यरचनं असत्यं भगवत्संबंधं विना केनाप्यशक्यकरणं ॥ ७३ ॥ ७४ ॥

कलुषारजोव्याप्ताः ॥४॥ क्रव्यादसंकाशा गृध्रगोमायुश्येनादिसदृशाः तद्वद्रूक्षवर्णाः अत एव परुषाः
चक्रुरुद्वेजकाः ॥५॥ ६ ॥ प्रत्यादित्यं सूर्यसन्मुखं ॥७॥ चंद्रमाः संतापयति सोष्मकिरण इत्यर्थः रूक्ष

वाताश्चकलुषावांतिकंपतेचवसुंधरा ॥ पर्वताग्राणिवेपंतेपतंतिचमहीरुहाः ॥४॥ मेघाःक्र
व्यादसंकाशाःपरुषाःपरुषस्वनाः ॥ क्रूराःक्रूरंप्रवर्षंतिमिश्रंशोणितविंदुभिः ॥५॥ रक्तचंदनसं
काशासंध्यापरमदारुणा ॥ ज्वलतःप्रपतत्येतदादित्यादग्निमंडलं ॥६॥ दीनादीनस्वराःक्रूराः
सर्वतोमृगपक्षिणः ॥ प्रत्यादित्यंविनर्दंतिजनयंतोमहद्भयं ॥७॥ रजन्यामप्रकाशस्तुसंताप
यतिचंद्रमाः ॥ कृष्णरक्तांशुपर्यंतोलोकक्षयइवोदितः ॥८॥ ह्रस्वोरूक्षोऽप्रशस्तश्चपरिवेषस्तु
लोहितः ॥ आदित्येविमलेनीलंलक्ष्मलक्ष्मणदृश्यते ॥९॥ रजसामहताचापिनक्षत्राणिह
तानिच ॥ युगांतमिवलोकानांपश्यशंसतिलक्ष्मण ॥१०॥ काकाःश्येनास्तथानीचागध्राःपरित
तंतिच ॥ शिवाश्चाप्यशुभान्नादान्नदंतिसुमहाभयान् ॥११॥ शैलैःशूलैश्चखड्गैश्चविमुक्तैः
कपिराक्षसैः ॥ भविष्यत्यावृताभूमिर्मांसशोणितकर्दमा ॥१२॥

रक्तेत्यादिनापरिवेषविशेषउक्तः
॥८॥ ह्रस्वत्वादिगुणकःपरिवेषआदित्येदृश्यते ॥९॥ नक्षत्राणिहतानीतिरात्रिकालइतिशेषः ॥१०॥ म
हाभयान्महाभयजनकान्नादान् ॥११॥ अधुनादृश्यमाननिमित्तानांफलमाहशैलैरित्यादि ॥१२॥

अथसमुद्रेसेतुबंधनतस्तैर्देवैस्तदानीमेवरामस्यराज्याभिषेकः रामेणविभीषणस्येवेत्याह· तदद्भुतमिति· राघवकर्मराघवाज्ञाजन्यत्वात् तन्नामग्रहणाजत्वाद्वः सुशुभैर्जलैः आकाशगंगादिजलैः॥८४॥ अभिषिच्याशीर्वादंचकुर्वंति· जयस्वेत्यादि· इतीवेति· अतीवेत्यर्थकं· नरदेवाब्राह्म

तदद्भुतंराघवकर्मदुष्करंसमीक्ष्यदेवाःसहसिद्धचारणैः॥ उपेत्यरामंसहसामहर्षिभिस्तमभ्यषिंचन्सुशुभैर्जलैःपृथक्॥८४॥ जयस्वशत्रुघ्ननरदेवमेदिनींससागरांपालयशाश्वतीःसमाः॥ इतीवरामंनरदेवसत्कृतंशुभैर्वचोभिर्विविधैरपूजयन्॥८५॥ इत्यार्षेश्रीरामायणेयुद्धकांडेद्वाविंशःसर्गः॥२२॥ निमित्तानिनिमित्तज्ञोदृष्ट्वालक्ष्मणपूर्वजः सौमित्रिंसंपरिष्वज्यइदंवचनमब्रवीत्॥१॥ परिगृह्योदकंशीतंवनानिफलवंतिच वलौघंसंविभज्येमंव्यूह्यतिष्ठेमलक्ष्मण॥२॥ लोकक्षयकरंभीमंभयंपश्याम्युपस्थितं॥ प्रवर्हणंप्रवीराणामृक्षवानररक्षसां॥३॥

णाः॥८५॥ आमोदमानः क॰॥२१॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेद्वाविंशःसर्गः॥२२॥ अथरामस्यघोरतिमित्तदर्शनमाह· निमित्तानीति· वक्ष्यमाणानीत्यर्थः॥१॥ संविभज्यव्यूह्य· ऋक्षगोलांगुलवानरविभागंकृत्वातस्यव्यूहंचक्रवेतार्थः॥२॥ यंभयनिमित्तं॥३॥

श्री

४॥ अंबरेमेघानांस्वनमिवतेपिराक्षसाःप्लवंगानांतद्गर्जितंशुश्रुवुः॥५॥ मनसाजगामसस्मारेत्यर्थः॥६॥ स्मरणप्रकारोत्रसेति॰ उपरुध्यतेउपरुद्धातिष्ठति॰ लोहितांगोंगारकः॥७॥ आत्मनस्तत्कालहितं॰ लंकाद

बभूवुस्तेनघोषेणसंरब्धाहरियूथपाः॥ अमृष्यमाणास्तद्घोषंविनेदुर्घोषवत्तरं॥४॥ राक्षसास्तुप्लवंगानांशुश्रुवुस्तेपिगर्जितं॥ नर्दतामिवदृप्तानांमेघानामंबरेस्वनं॥५॥ दृष्ट्वादाशरथिर्लंकांचित्रध्वजपताकिनीं॥ जगाममनसासीतांदूयमानेनचेतसा॥६॥ अत्रसामृगशावाक्षीरावणेनोपरुध्यते॥ अभिभूताग्रहेणेवलोहितांगेनरोहिणी॥७॥ दीर्घमुष्णंचनिश्वस्यसमुद्वीक्ष्यचलक्ष्मणं॥ उवाचवचनंवीरस्तत्कालहितमात्मनः॥८॥ आलिखंतीमिवाकाशमुत्थितांपश्यलक्ष्मण॥ मनसेवकृतांलंकांनगाग्रेविश्वकर्मणा॥९॥ विमानैर्बहुभिर्लंकासंकीर्णारचितापुरा॥ विष्णोःपदमिवाकाशंछादितंपांडुभिर्घनैः॥१०॥ पुष्पितैःशोभितालंकावनैश्चित्ररथोपमैः॥ नानापतगसंघुष्टफलपुष्पोपगैःशुभैः॥११॥

र्शनकालेआत्मनःप्रीतिकरंदिव्यपुरीदर्शनजसंतोषद्योतकमितियावत्॥८॥ तदेवाह॰ आलिखंतीमित्यादि॥९॥ विमानैःसप्तभूमिकप्रासादैःसंकीर्णानिविडा॰ तत्रोपमा॰ पांडुभिर्घनैःसंकीर्णंविष्णोर्व्यापनशीलस्यखमयस्यब्रह्मणःपदंप्रचारस्थानमाकाशमिव॥१०॥११॥ ॥ श्री ॥

१३॥ रामो जनरमणो राम इत्यन्वयः॥१४॥ धृतानां निश्चितबुद्धीनां॥१५॥ कर्मणा धैर्येणापरं प्रतिप्र
स्थानलक्षणेन चेष्टाभिः कायव्यापारैश्च तुतोषेत्यन्वयः॥१६॥ आतपमानः कं०॥२२॥ इतिश्री
रामाभिरामे श्रीरामीये रामायणतिलके युद्धकांडे त्रयोविंशः सर्गः॥२३॥ सेति सावीराणां

क्षिप्रमद्यैव दुर्द्धर्षां पुरीं रावणपालितां॥ अभियाम जवेनैव सर्वैर्हरिभिरावृताः॥१३॥
इत्येवमुक्त्वा धन्वी स रामः संग्रामधर्षणः॥ प्रतस्थे पुरतो रामो लंकामभिमुखो विभुः॥१४॥
सविभीषणसुग्रीवाः सर्वे ते वानरर्षभाः॥ प्रतस्थिरे विनर्दंतो धृतानां द्विषतां वधे॥१५॥ राघ
वस्य प्रियार्थं तु सुतरां वीर्यशालिनां॥ हरीणां कर्मचेष्टाभिस्तुतोष रघुनंदनः॥२६॥ इत्या
र्षे श्रीरामायणे युद्धकांडे त्रयोविंशः सर्गः॥२३॥ सा वीरसमिती राज्ञा विरराज व्यवस्थि
ता॥ शशिना शुभनक्षत्रा पौर्णमासीव शारदी॥१॥ प्रचचाल च वेगेन त्रस्ता चैव वसुंधरा
पीड्यमाना बलौघेन तेन सागरवर्चसा॥२॥ ततः शुश्रुवुराक्रुष्टं लंकायां काननौकसः।
भेरीमृदंगसंघुष्टं तुमुलं लोमहर्षणं॥३॥

समितिः समागमः राज्ञा व्यवस्थिता रामेण कृतव्यू
ढा विरराज शुभनक्षत्रा शारदी पौर्णमासी शशिनेव॥१॥ तेन बलौघेन पीड्यमाना वसुंधरा सेना
या वेगेन प्रचचाल वित्रस्ता च॥२॥ आक्रुष्टमाक्रोशं घोषवत्तरमतिशयितध्वनिमत्॥३॥

मर्द्दयितुमिच्छवोमिमर्द्दयिषवः॥२०॥शिखरैर्गिरिशिखरैः॥विकिरामः विक्षिपामनाशयामेतियावत्
२१॥शुकएषविमुच्यतामिति· पूर्वमुच्यतांदूतआगतइत्यत्रताडनादिदुःखान्मुच्यतामीत्येवार्थः

प्रगृह्यगिरिशृंगाणिमहतश्चमहीरुहान्॥आसेदुर्वानरालंकांमिमर्दयिषवोरणे॥२०॥शि
खरैर्विकिरामैनांलंकांमुष्टिभिरेववा॥इतिस्मदधिरेसर्वेमनांसिहरिपुंगवाः॥२१॥ततो
रामोमहातेजाः सुग्रीवमिदमब्रवीत्॥सुविभक्तानिसैन्यानिशुकएषविमुच्यतां॥२२॥राम
स्यतुवचःश्रुत्वावानरेंद्रोमहाबलः॥मोचयामासतंदूतंशुकंरामस्यशासनात्॥२३॥मो-
चितोरामवाक्येनवानरैश्चनिपीडितः॥शुकःपरमसंत्रस्तोरक्षोधिपमुपागमत्॥२४॥रावणः
प्रहसन्नेवशुकंवाक्यमुवाचह॥किमिमौतेसितौपक्षौलूनपक्षश्चदृश्यसे॥२५॥कच्चिन्नाने
कचित्तानांतेषांत्वंवशमागतः॥ततःसभयसंविग्नस्तेनराज्ञाभिचोदितः॥वचनंप्रत्युवा
चेदंराक्षसाधिपमुत्तमं॥२६॥

तेनवध्यास्थापितइतिअवगम्यते॥२२॥२३॥२४॥प्रहसन्ने
वलूनपक्षत्वादिविकृताकारंदृष्ट्वाप्रहासः इमौतेपक्षौसितौबद्धौ किं॥अतःलूनपक्षश्चदृश्य
सेअनेकचित्तानांचंचलचित्तानांवानराणां॥२५॥२६॥

श्री

कोकिलाकुलषंडानि तदाकुलवत्तषंडानि दोधवीति कंपयति ॥१२॥ विभजत व्यभजत ॥१३॥ बलात्स्वान
रवलान् आदाय स्ववलं गृहीत्वा नीलेन सहांगद उरसि उच्यमानपुरुषव्यूहस्योरसि तिष्ठेदिति क

पश्पमत्तविहंगानि प्रलीनभ्रमराणि च ॥ कोकिलाकुलषंडानि दोधवीति शिवोनिलः ॥१२॥ इति
दाशरथी रामो लक्ष्मणं समभाषत ॥ वलं च तत्र विभजच्छास्त्रदृष्टेन कर्मणा ॥१३॥ शशास क
पिसेनां तां बलादादाय वीर्यवान् ॥ अंगदः सह नीलेन तिष्ठेदुरसि दुर्जयः ॥१४॥ तिष्ठेद्वानर
वाहिन्या वानरौघसमावृतः ॥ आश्रितो दक्षिणं पार्श्वमृषभो नाम वानरः ॥१५॥ गंधहस्तीव दुर्ध
र्षस्तरस्वी गंधमादनः ॥ तिष्ठेद्वानरवाहिन्या वानरौघसमावृतः ॥१६॥ मूर्ध्नि स्थास्याम्यहं यत्तो ल
क्ष्मणेन समन्वितः ॥ जांबवांश्च सुषेणश्च वेगदर्शी च वानरः ॥१७॥ ऋक्षमुख्या महात्मानः कुक्षिं
रक्षंतु ते त्रयः ॥ जघनं कपिसेनायाः कपिराजोभिरक्षतु ॥१८॥ पश्चार्द्धमिव लोकस्य प्रचेतास्ते-
जसावृतः ॥ सुविभक्तमहाव्यूहा महावानररक्षिता ॥ अनीकिनी सा विबभौ यथा द्यौः साभ्रसं
प्लवा ॥१९॥

पिसेनां शशास ॥१४॥ वानरौघसमावृत्त ऋषभो वानरवाहिन्या दक्षिणं पार्श्वमाश्रि
तस्तिष्ठेदित्यन्वयः ॥१५॥१६॥ यत्तः सावधानः ॥१७॥ जांबवदादयस्त्रयोपि ऋक्षाः जघनं पश्चार्द्ध
लोकस्य भूलोकस्य पश्चार्द्धं पश्चिमदिशं तेजसावृतः प्रचेता इव ॥१९॥ श्र

पुराआयांतिआयास्यति · पुरायोगेभविष्यतिलट् · एकतरंवत्स्यमाणयोरन्यतरत् ॥३४॥३५॥ सर्वस्यराक्षस
लोकस्यरणभयप्राप्तेरपीत्यर्थः ॥३६॥ समभिधावंतिधाविष्यंति ॥३७॥३८॥ आदास्येतिरस्करिष्यामि ३९

पुराप्राकारमायांतिक्षिप्रमेकतरंकुरु ॥ सीतांचास्मैप्रयच्छाशुयुद्धंवापिप्रदीयतां ॥३४॥ शुकस्य
वचनंश्रुत्वारावणोवाक्यमब्रवीत् ॥ रोषसंरक्तनयनोनिर्दहन्निवचक्षुषा ॥३५॥ यदिमांप्रतियु
ध्येरन्देवगंधर्वदानवाः ॥ नैवसीतांप्रदास्यामिसर्वलोकभयादपि ॥३६॥ कदासमभिधावंति
मामकाराघवंशराः ॥ वसंतेपुष्पितंमत्ताभ्रमराइवपादपं ॥३७॥ कदाशोणितदिग्धांगंदी
प्तैःकार्मुकविच्युतैः ॥ शरैरादीपयिष्यामिउल्काभिरिवकुंजरं ॥३८॥ तच्चास्यबलमादास्ये
बलेनमहतावृतः ॥ ज्योतिषामिवसर्वेषांप्रभामुद्यन्दिवाकरः ॥३९॥ सागरस्येवमेवे
गोमारुतस्येवमेबलं ॥ नचदाशरथिर्वेदतेनमांयोद्धुमिच्छति ॥४०॥ नमेतूणीशयान्बा
णान्सविषानिवपन्नगान् ॥ रामःपश्यतिसंग्रामेतेनमांयोद्धुमिच्छति ॥४१॥ नजानातिपु
रावीर्यंममयुद्धेसराघवः ॥ ममचापमयींवीणांशरकोणैःप्रवादितां ॥४२॥ श्री

वेद · जानाति ॥४०॥ पश्यतिदृष्टवान् ॥४१॥ पुरापूर्वंममवीर्यंनजानातिनाज्ञासीत् · शरकोणैःशर
रूपवादनदंडैःप्रवादितां ॥४२॥

सागरस्योत्तरेतीरेस्थित्वाश्लक्ष्णयागिरावानरान्सांत्वयन् अक्लिष्टंतेवचनंयथासंदेशंतथाब्रुवं
२७ ॥ अहंतथाब्रुवन्लोप्तुंपक्षभागेछेत्तुंमुष्टिभिर्हंतुंचारब्धः ॥ २८ ॥ तेकृतपरिभवाःसंभाषितुंश

सागरस्योत्तरेतीरेब्रुवंतेवचनंतथा ॥ यथासंदेशमक्लिष्टंसांत्वयन्श्लक्ष्णयागिरा ॥ २७ ॥ क्रु
द्धैस्तैरहमुत्प्लुत्यदृष्टमात्रःप्लवंगमैः ॥ गृहीतोस्म्यपिचारब्धोहंतुंलोप्तुंचमुष्टिभिः ॥ २८ ॥ नते
संभाषितुंशक्याःसंप्रश्नोत्रनविद्यते ॥ प्रकृत्याकोपनास्तीक्ष्णावानराराक्षसाधिप ॥ २९ ॥ सच
हंताविराधस्यकबंधस्यखरस्यच ॥ सुग्रीवसहितोरामःसीतायाःपदमागतः ॥ ३० ॥ सकृत्वा
सागरेसेतुंतीर्त्वाचलवणोदधिं ॥ एषरक्षांसिनिर्धूयधन्वीतिष्ठतिराघवः ॥ ३१ ॥ ऋक्षवानर
संघानामनीकानिसहस्रशः ॥ गिरिमेघनिकाशानांछादयंतिवसुंधरां ॥ ३२ ॥ राक्षसानांब
लौघस्यवानरेंद्रबलस्यच ॥ नैतयोर्विद्यतेसंधिर्देवदानवयोरिव ॥ ३३ ॥ अ

क्याः अत्रपरिभवेसंप्रश्नोविचारोनास्ति· इदमेवतावत्कार्यमितिमर्यादानास्तीत्यर्थः ॥ तदेवस्फो
रयतिप्रकृत्येति ॥ २९ ॥ अधुनाविज्ञाप्यमाह· सचेति· विराधादिहंतेत्यनेनतवापिहंतेतिसूचि
तं ॥ पदंस्थानमन्विष्यागतःप्राप्तः ॥ ३० ॥ रक्षांसिनिर्धूयतणीकृत्य ॥ ३१ ॥ ३२ ॥ संधिःसंधानंनास्त्येव ॥ ३३ ॥

सागरेसेतुबंधनंनश्रद्दध्यां॰ समुद्रस्यविराडुदरत्वेनजीवव्रातैरशक्यबंधनत्वात्जीवविशेषत्वा
द्वरामस्येत्याशयः रामोपिविराडेवनान्यइतिबुद्धिस्तु रजस्तमःप्रधानत्वान्नतस्येतिदिक्॥३॥प

सागरेसेतुबंधंतंनश्रद्दध्यांकथंचन॥अवश्यंचापिसंख्येयंनन्मयावानरंबलं॥३॥भवंतौ
वानरंसैन्यंप्रविश्यानुपलक्षितौ॥परिमाणंचवीर्यंचयेचमुख्याःप्लवंगमाः॥४॥मंत्रिणोये
चरामस्यसुग्रीवस्यचसंगताः॥येपूर्वमभिवर्त्तंतेयेचशूराःप्लवंगमाः॥५॥सचसेतुर्यथा
बद्धःसागरेसलिलार्णवे॥निवेशंचयथातेषांवानराणांमहात्मनां॥६॥रामस्यव्यवसायं
चवीर्यंप्रहरणानिच॥लक्ष्मणस्यचवीरस्यतत्त्वतोज्ञातुमर्हथः॥७॥कश्चसेनापतिस्ते
षांवानराणांमहात्मनां॥तत्रज्ञात्वायथातत्त्वंशीघ्रमागंतुमर्हथः॥८॥इतिप्रतिसमादि
ष्टौराक्षसौशुकसारणौ॥हरिरूपधरौवीरौप्रविष्टौवानरंबलं॥९॥ततस्तद्वानरंसैन्यम
चिंत्यंलोमहर्षणं॥संख्यातुंनाध्यगच्छेतांतदातौशुकसारणौ॥१०॥ ॥ ॥

77

रिमाणंचेत्यादीनांतत्त्वतोज्ञातुमर्हथेत्यनेनसंबंधः येचमुख्यास्तानितिशेषः॥४॥येपूर्वम
भिवर्त्तंते॰ अग्रेसराइत्यर्थः॥५॥सागरेसंबद्धेसलिलार्णवेलवणजलेसमुद्रेनिवेशंसेनानिवेशं
६॥प्रहरणान्यायुधानि॥७॥८॥९॥नाध्यगच्छेतां॰ नाशक्नुवातां॥१०॥
श्र

ज्याशब्दएवतुमुलःशब्दोयस्यास्तां·आर्तः आर्त्तशब्दरूपोहाहतोस्मीत्यादिकोगीतरूपोमहान्स्वनोयस्या
स्तांनाराचतलरवएवसन्नादोयस्यास्तां·अत्रतुमुलमहास्वनसन्नादशब्दैर्वीणायामंद्रमध्यताराःशब्द
उक्ताःनदीरूपायाअहितवाहिनीसेनानद्रूपंमहारंगमवगाह्यरणेवादयिष्यामि।४३।४४ नशक्यो

ज्याशब्दतुमुलांघोरामार्त्तगीतांमहास्वनां॥नाराचतलसन्नादांनदीमहितवाहिनीं॥४३॥अ
वगाह्यमहारंगंवादयिष्याम्यहंरणे॥४४॥नवासवेनापिसहस्रचक्षुषायुद्धेस्मिशक्योव
रुणेनवास्वयं॥यमेनवाधर्षयितुंशराग्निनामहाहवेवैश्रवणेनवास्वयं॥४५॥इत्यार्षे
श्रीरामायणेयुद्धकांडेचतुर्विंशःसर्गः॥२४॥सबलेसागरंतीर्णेरामेदशरथात्मजे॥अमा
त्यौरावणःश्रीमानब्रवीच्छुकसारणौ॥१॥समग्रंसागरंतीर्णंदुस्तरंवानरंबलं॥अभूत
पूर्वंरामेणसागरेसेतुबंधनं॥२॥

जेतुमितिशेषः॥४५॥अणवमानः क०२३॥इतिश्रीरामा
भिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेचतुर्विंशःसर्गः॥२४॥ रावणःशुकसारणाख्या
नमात्यावब्रवीत्‌ अमात्यत्वेनविशेषणादयंशुकोन्यःपूर्वप्रेषितशुकोक्तवृत्तांतज्ञानपूर्वकं
प्रेषणाच्चेतिकतकादयः॥१॥सर्वंवानरबलंतीर्णंरामेणसागरेसेतुबंधनंचकृतमेतदुभयमप्यभू
तपूर्वं॥२॥

विभीषणोवा·यस्माद्दिशिष्यभवतांभयमितिशेषः॥१९॥न्यस्तशस्त्रत्वाद्येकैकमप्यवधेहेतुः·किंपुनस्समु
दितमितिभावः॥२०॥प्रछन्नौच·गूढतयारंध्रान्वेषिणावपिशत्रुपक्षस्यरावणस्यशत्रुपक्षस्यसुग्रीवा

78

अथकिंचिददृष्टंवाभूयस्तद्द्रष्टुमर्हथः॥विभीषणोवाकार्त्स्न्येनपुनःसंदर्शयिष्यति॥१९॥नचे
दंग्रहणंप्राप्यभेतव्यंजीवितंप्रति॥न्यस्तशस्त्रौगृहीतौवानदूतौवधमर्हथः॥२०॥प्रछन्नौच
विमुंचेमौचारौरात्रिचरावुभौ॥शत्रुपक्षस्यसततंविभीषणविकर्षणौ॥२१॥प्रविश्यम
हतींलंकांभवद्भ्यांधनदानुजः॥वक्तव्योरक्षसांराजायथोक्तंवचनंमम॥२२॥यद्बलंत्वं
समाश्रित्यसीतांमेहृतवानसि॥तद्दर्शययथाकामंससैन्यश्चसबांधवः॥२३॥श्वःकाल्येन
गरींलंकांसप्राकारांसतोरणां॥रक्षसांचबलंपश्यशरैर्विध्वंसितंमया॥२४॥क्रोधंभीमम
हंमोक्ष्येससैन्येत्वयिरावण॥श्वःकाल्येवज्रवान्वज्रंदानवेष्विववासवः॥२५॥इतिप्रतिस
मादिष्टौराक्षसौशुकसारणौ॥जयेतिप्रतिनंद्यैनंराघवंधर्मवत्सलं॥२६॥ श्र

दिरूपस्यसततंविकर्षिणौभेदादिपरावपिइमौरात्रिचरौहेविभीषणविमुंच॥२१॥अथरामः
प्रतिसंदिशति·प्रविश्येति॥२२॥२३॥श्वःकाल्येश्वःप्रातःकाले॥२४॥वज्रवान्·वज्रवत्वगुणः॥२५॥२६॥

तत्र हेतुमाह तत्स्थितमित्यादिना ॥११॥ ददृशाते· ददृशतुः ॥१२॥ प्रतिच्छन्नौ हरिरूपेण गृहीत्वाचचक्षे गृही-
त्वोपनीयाचचक्षे ॥१३॥१४॥ तौ रामं दृष्ट्वा व्यथितौ जीविते निराशौ चाभूतां ॥१५॥ रावणप्रहितौ तत्प्रेषितौ ।

तत्स्थितं पर्वताग्रेषु निर्झरेषु गुहासु च । तरमाणं च तीर्णं च तर्त्तुकामं च सर्वशः ॥११॥ निविष्टं
निविशच्चैव भीमनादं महावलं । तद्बलार्णवमक्षोभ्यं ददृशाते निशाचरौ ॥१२॥ तौ ददर्श महाते-
जाः प्रतिच्छन्नौ विभीषणः । आचचक्षे स रामाय गृहीत्वा शुकसारणौ ॥१३॥ तस्येतौ राक्षसेंद्रस्य
मंत्रिणौ शुकसारणौ । लंकायाः समनुप्राप्तौ चारौ परपुरंजय ॥१४॥ तौ दृष्ट्वा व्यथितौ रामं निरा-
शौ जीविते तथा । कृतांजलिपुटौ भीतौ वचनं चेदमूचतुः ॥१५॥ आवामिहागतौ सौम्य रावा-
णप्रहितावुभौ । परिज्ञातुं वलं सर्वं तदिदं रघुनंदन ॥१६॥ तयोस्तद्वचनं श्रुत्वा रामो दशर-
थात्मजः । अब्रवीत्प्रहसन्वाक्यं सर्वभूतहिते रतः ॥१७॥ यदि दृष्टं वलं सर्वं वयं वा सुसमाहिताः ।
यथोक्तं वा कृतं कार्यं छंदतः प्रतिगम्यतां ॥१८॥

॥१६॥१७॥ प्रहसन् सेतुवंधनेन जनस्थाने निरपेक्षं खरादिवधेन च नमद्बलज्ञानं वृत्तमिति प्रहासः
वयमिति· रामेण निर्देशः सुग्रीवादिसहितस्य स्वस्य सुसमाहिताः ज्ञातबलाः यथोक्तं रावणो-
क्तमनतिक्रम्य· वा चेत्· कृं छंदतः स्वेच्छया ॥१८॥

नदिति॥१॥२॥३॥४॥बहुतालसमुत्सेधं अनेकतालप्रमाणोन्नतं· दिदृक्षया वानरबलदर्शनेच्छया॥५॥चरा

तद्वचःसत्यमक्लीबंसारणेनाभिभाषितं॥निशम्यरावणोराजापर्यभाषतसारणं॥१॥यदिमा
मभियुंजीरन्देवगंधर्वदानवाः॥नैवसीतामहंदद्यांसर्वलोकभयादपि॥२॥त्वंतुसौम्य
परित्रस्तोहरिभिःपीडितोभृशं॥प्रतिप्रदानमद्यैवसीतायाःसाधुमन्यसे॥३॥कोहिनाम
सपत्नोमांसमरेजेतुमर्हति॥इत्युक्त्वापरुषंवाक्यंरावणोराक्षसाधिपः॥४॥आरुरोहततः
श्रीमान्प्रासादंहिमपांडुरं॥बहुतालसमुत्सेधंरावणोथदिदृक्षया॥५॥ताभ्यांचराभ्यां
सहितोरावणःक्रोधमूर्छितः॥पश्यमानःसमुद्रंतंपर्वतांश्चवनानिच॥६॥ददर्शपृथिवी
देशंसुसंपूर्णंप्लवंगमैः॥तदपारमसंख्येयंचवानराणांमहावलं॥७॥आलोक्यरावणोरा
जापरिपप्रच्छसारणं॥एषांकेवानरामुख्याःकेशूराःकेमहावलाः॥८॥केपूर्वमभिवर्त्तं
तेमहोत्साहाःसमंततः॥केषांशृणोतिसुग्रीवःकेवायूथपयूथपाः॥९॥ श्री

भ्यां·चाराभ्यां·पश्यमानःपश्यन्॥६॥ वानराणांमहावलंचददर्शेत्यन्वयः॥७॥८॥केषांशृणोतिक्व
इतिशेषःयूथपयुथपाःमहाप्रधानाः॥९॥

विभीषणगृहीतावित्यनेनतत्यागस्तवमहतेऽनर्थायेतिसूचितं॥२७॥यत्रयस्मादेतेवर्त्तमानाश्चत्वा
राएकस्थानगताएकत्रमिलिताःतस्मात्त्वांनेशक्ताइतियोजना॥२८॥२९॥३०॥उत्पाट्यसंक्रामयितुमि

आगम्यनगरींलंकामक्रूतांराक्षसाधिपं॥विभीषणगृहीतौतुवधार्थेराक्षसेश्वर॥२७॥दृष्ट्वा
धर्मात्मनामुक्तौरामेणामिततेजसा॥एकस्थानगतायत्रचत्वारःपुरुषर्षभाः॥२८॥लोकपाल
समाःशूराःकृतास्त्रादृढविक्रमाः॥रामोदाशरथिःश्रीमान्लक्ष्मणश्चविभीषणः॥२९॥सुग्री
वश्चमहातेजामहेंद्रसमविक्रमः॥एतेशक्ताःपुरींलंकांसप्राकारांसतोरणां॥३०॥उत्पाट्यसं
क्रामयितुंसर्वेतिष्ठंतुवानराः॥यादृशंतद्धिरामस्यरूपंप्रहरणानिच॥३१॥वधिष्यतिपु
रींलंकामेकस्तिष्ठंतुतेत्रयः॥रामलक्ष्मणगुप्तासासुग्रीवेणचवाहिनी॥बभूवदुर्द्धर्षतरा
सर्वैरपिसुरासुरैः॥३२॥प्रहृष्टयोधाध्वजिनीमहात्मनांवनौकसांसंप्रतियोद्धुमिच्छतां
अलंविरोधेनशमोविधीयतांप्रदीयतांदाशरथायमैथिली॥३३॥इत्यार्षेश्रीरा०युद्ध०
पंचविंशःसर्गः॥२५॥

खातशालास्तंभमिवोपरिकृत्वापुनःप्रतिष्ठापितुमित्यर्थः॥३१॥३२॥
योद्धुमिच्छतांध्वजिनीदुर्द्धर्षेत्यन्वयःयदेवमतोलमिति॥३३॥गड्डुमानःकतक०॥२४॥इति
श्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्ध०पंचविंशःसर्गः॥२५॥

यद्धनूमताजनकात्मजादृष्टासासर्वामतिरेतस्यांगदस्यमंत्रमूलेतिशेषः॥१९॥बहूनियूथानिपरिगृह्य
स्वेनानीकेनत्वामभियाति॥२०॥वालिसुतस्यानुपश्चात्सेतुकर्त्ता॥२१॥अथयश्चेतनवर्णनंयेत्विति·

एतस्यसामतिःसर्वायद्दृष्टाजनकात्मजा॥हनूमतावेगवताराघवस्यहितैषिणा॥१९॥
बहूनिवानरेंद्राणामेषयूथानिवीर्यवान्॥परिगृह्याभियातित्वांस्वेनानीकेनमर्दितुं॥२०॥
अनुवालिसुतस्यापिबलेनमहतावृतः॥वीरस्तिष्ठतिसंग्रामेसेतुहेतुरयंनलः॥२१॥येतु
विष्टभ्यगात्राणिक्ष्वेडयंतिनदंतिच॥काशश्चपलोभीमविक्रमः॥२३॥बुद्धिमान्वानरःशू
रस्त्रिषुलोकेषुविश्रुतः॥तूर्णंसुग्रीवमागम्यपुनर्गच्छतिवानरः॥२४॥विभजन्वानरीसेना
मनीकानिप्रहर्षयन्॥यःपुरागोमतीतीरेरम्यंपर्येतिपर्वतं॥२५॥नाम्नासंरोचनोनाना
मनानानगयुतोगिरिः॥तत्रराज्यंप्रशास्त्येषकुमुदोनामयूथपः॥२६॥ श्री

गात्राणिविष्टभ्यक्ष्वेलांकुर्वंति·एतंश्वेतं·चंदनवासिनः॥२२॥एषैव·एषएवसंधिरार्षः॥२३॥
सुग्रीवमागम्यपुनर्गच्छतीत्यनेनरावणादर्शनसमयेकार्यार्थेसुग्रीवसमीपमागत्यगतवा
नितिज्ञायते॥२४॥यःपुरेत्यादिनाकुमुदवर्णनं·रम्यंरम्यारवं॥२५॥यस्यैवसंरोचतइतिनामांतरं॥२६॥

आस्थाय च विजृंभंते क्रोधेन हरियूथपाः २२ ये तु दुष्प्रसहा वीराश्चंडाश्चंडपराक्रमाः अष्टौ शतसहस्रा
णि दशकोटिशतानि च २३ यएनमनुगच्छंति वीराश्चंदनवासिनः एषैवाशंसते लंकां स्वेनानीकेनमर्दितुं २४ श्वे
तोराजतसंकाशः।९

80

राम·
८०

वचनं उत्तरं भाषेतेत्यन्वयः ॥१०॥११॥ सहस्रेण शतेन लक्षेणेत्यर्थः ॥१२॥ यूथपसंख्याया एव गणनं । सु
ग्रीवस्य बलाग्रे च यस्तिष्ठति एष नील इत्यन्वयः ॥१३॥ अथांगदवर्णनं बाहु इति । प्रगृह्य उद्यम्य पद्भ्यां

सारणाचक्ष्व मे सर्वे किंप्रभावाः प्लवंगमाः ॥ सारणो राक्षसेंद्रस्य वचनं परिपृच्छतः ॥१०॥ आच
भाषेथ मुख्यज्ञो मुख्यांस्तत्र वनौकसः ॥ एष योभिमुखो लंकां नर्दंस्तिष्ठति वानरः ॥११॥ यूथपानां
सहस्रेण शतेन परिवारितः ॥ यस्य घोषेण महता सप्राकारा सतोरणा ॥१२॥ लंका प्रतिहता स
र्वा सशैलवनकानना ॥ सर्वशाखामृगेंद्रस्य सुग्रीवस्य महात्मनः ॥१३॥ बलाग्रे तिष्ठते वीरो
नीलो नामैष यूथपः ॥ बाहु प्रगृह्य यः पद्भ्यां महीं गच्छति वीर्यवान् ॥१४॥ लंकामभिमुखः को
पादभीक्ष्णं च विजृंभते ॥ गिरिशृंगप्रतीकाशः पद्मकिंजल्कसन्निभः ॥१५॥ स्फोटयत्यति
संरब्धो लांगूलं च पुनः पुनः ॥ यस्य लांगूलशब्देन स्वनंति प्रदिशो दश ॥१६॥ एष वानरराजे
न सुग्रीवेणाभिषेचितः ॥ युवराजोंगदो नाम त्वामाह्वयति संयुगे ॥१७॥ वालिनः सदृशः
पुत्रः सुग्रीवस्य सदा प्रियः ॥ राघवार्थे पराक्रांतः शक्रार्थे वरुणो यथा ॥१८॥

महीं गच्छति । नरवदिति शेषः ॥१४॥१५॥१६॥ अभिषेचितोभिषिक्तः ॥१७॥ पराक्रांतः पराक्रमितुमुद्यतः ॥१

रामा॰ यु॰
८१

३६ ॥ पनसवर्णनं यस्तुमेघइत्यादिना ॥ ३७ ॥ भेरीणांनादइवयस्यसन्नादःश्रूयतइतिशेषः ॥ ३८ ॥ ३९ ॥ यंपनसं
शतार्धशतसहस्रसंख्यानां पंचाशल्लक्षसंख्ययूथपाःपर्युपासतेयेषांयूथानिभागशःप्रत्येकंसंती

एतस्यबलिनःसर्वेविहारानामयूथपाः ॥ राजंल्लक्षसहस्राणिचत्वारिंशत्तथैवच ॥ ३६ ॥ यस्तु
मेघइवाकाशंमहानावृत्यतिष्ठति ॥ मध्येवानरवीराणांसुराणामिववासवः ॥ ३७ ॥ भेरीणामि
वसन्नादोयस्यैषश्रूयतेमहान् ॥ घोषःशाखामृगेंद्राणांसंग्राममभिकांक्षतां ॥ ३८ ॥ एषपर्वतम
ध्यास्तेपारिपात्रमनुत्तमं ॥ युद्धेदुष्प्रसहोनित्यंपनसोनामयूथपः ॥ ३९ ॥ एनंशतसहस्राणांश
तार्धंपर्युपासते ॥ यूथपायूथपश्रेष्ठंयेषांयूथानिभागशः ॥ ४० ॥ यस्तुभीमांप्रवल्गंतींच
मूंतिष्ठतिशोभयन् ॥ स्थितांतीरेसमुद्रस्यद्वितीयइवसागरः ॥ ४१ ॥ एषदर्दुरसंकाशोविन
तोनामयूथपः ॥ पिबंश्चरतियोवेणांनदीनामुत्तमांनदीं ॥ ४२ ॥ षष्टिःशतसहस्राणिबल
मस्यप्लवंगमाः ॥ त्वामाह्वयतियुद्धायक्रथनोनामवानरः ॥ ४३ ॥ विक्रांताबलवंतश्चयथा
यूथानिभागशः ॥ यस्तुगैरिकवर्णाभंवपुःपुष्यतिवानर ॥ ४४ ॥

तिशेषः ॥ ४० ॥ विनतवर्णनंय
स्तुभीमामिति ॥ ४१ ॥ ४२ ॥ क्रथनवर्णनंत्वामाह्वयतीत्यादि ॥ ४३ ॥ विक्रांताबलवंतश्चयस्ययूथपाइति
शेषःयथास्ययूथपास्तथैवतेषांभागशः ॥ प्रत्येकंयूथानिचसंतीतिशेषःगवयवर्णनंयस्तुगैरिकेत्यादि ॥ ४४

राम
८१

चंडवर्णानियोसावित्ति ॥२७॥२८॥ रंभवर्णानियस्त्वितिनिभृतएकाग्रः ॥२९॥३०॥३१॥ यंयांतमनुगच्छंति

योसौशतसहस्राणि सहर्षंपरिकर्षति ॥ यस्यवालाबहुव्यामादीर्घलांगूलमाश्रिताः ॥२७॥
ताम्राः पीताः सिताः श्वेताः प्रकीर्णाघोरदर्शनाः ॥ अदीनोवानरश्चंडः संग्राममभिकांक्षति ॥२८॥
एषैवाशंसतेलंकां स्वेनानीकेनमर्दितुं ॥ यस्त्वेषसिंहसंकाशः कपिलोदीर्घकेसरः ॥२९॥
निभृतः प्रेक्षतेलंकां दिधक्षन्निवचक्षुषा ॥ विंध्यंकृष्णगिरिंसह्यंपर्वतंचसुदर्शनं ॥३०॥ राज
न्सततमध्यास्तेसंरंभोनामयूथपः ॥ शतंशतसहस्राणांत्रिंशच्चहरिपुंगवाः ॥३१॥ यंयांतंवा
नराघोराश्चंडाश्चंडपराक्रमाः ॥ परिवार्यानुगच्छंतिलंकांमर्दितुमोजसा ॥३२॥ यस्तुकर्णौ
विवृणुतेजृंभतेचपुनःपुनः ॥ नतुसंविजतेमृत्योर्नचसेनांप्रधावति ॥३३॥ प्रकंपतेच
रोषेणतिर्यक्पुनरीक्षते ॥ पश्यलांगूलविक्षेपंत्वेडत्येषमहाबलः ॥३४॥ महौजसावीत
भयोरम्यंसाल्वेयपर्वतं ॥ राजन्सततमध्यास्तेशरभोनामयूथपः ॥३५॥

त्पन्नयः ॥३२॥ शरभवर्णानियस्तुकर्णावितिः मृत्योर्नसंविजते नोद्वेगंगच्छतितेनयावरदानादित्ति
शेषः नचसेनामितिकिंत्वेकएवयोद्धुमिच्छतीत्यर्थः ॥३३॥३४॥ महौजसाः महतातेजसा ॥३५॥

॥७॥८॥९॥ अथ जांबवद्वर्णनं यवीयानिति । अस्यधूम्रस्यकनिष्ठ इत्यर्थः योभ्रात्रासमान इत्यन्वयः॥१०॥ गु
रुवर्तीसद्गुरूपासकः अनेनसर्वसिद्धिमत्त्वमुक्तं॥११॥ सांत्वंसाहाय्यंदेवासुरेयुद्धे इतिवैर इतिवाशे

पर्वतेषुचयेकेचिद्विषयेषुनदीषुच॥ एतेत्वामभिवर्त्तंतेराजन्नृक्षाःसुदारुणाः॥७॥ एषांम
ध्येस्थितोराजाभीमाक्षोभीमदर्शनः॥ पर्जन्यइवजीमूतैःसमंतात्परिवारितः॥८॥ ऋक्षवंतं
गिरिश्रेष्ठमध्यास्तेनर्मदांपिबन्॥ सर्वर्क्षाणामधिपतिर्धूम्रोनामैषयूथपः॥९॥ यवीयान
स्यतुभ्रातापश्यैनंपर्वतोपमं॥ भ्रात्रासमानोरूपेणविशिष्टश्चपराक्रमे॥१०॥ सएषजां
बवान्नाममहायूथपयूथपः॥ प्रशांतोगुरुवर्त्तीचसंप्रहारेष्वमर्षणः॥११॥ एतेनसांत्वंतुमह
त्कृतंशक्रस्यधीमता॥ देवासुरेजांबवतालब्धाश्चबहवोवराः॥१२॥ आरुह्यपर्वताग्रेभ्योम
हाभ्रविपुलाःशिलाः॥ मुंचंतिविपुलाकारानमृत्योरुद्विजंतिच॥१३॥ राक्षसानांचसदृशाःपि
शाचानांचरोमशाः॥ एतस्यसैन्याबहवोविचरंत्यमितौजसः॥१४॥ यएनमभिसंरब्धंप्लवमा
नमवस्थितं॥ प्रेक्षंतेवानराःसर्वेस्थितंयूथपयूथपं॥१५॥

षः॥१२॥ अथतत्सैन्यवर्णनं आरु
ह्येति॥१३॥ रोमशाअधिकरोमवंतः रक्षःपिशाचसादृश्यंक्रौर्येण॥१४॥ दंभवर्णनंयएनमिति
प्लवमानंलीलार्थमितिशेषः स्थितंलीलार्थमेवपुनःस्थितं॥१५॥ श्र

४५॥४६॥ येषां यूथपानां संख्यान विद्यते भागशः संतीति शेषः॥४७॥ अत्र सर्गच्छेदोऽपोक्तो वृत्तभेदाभावा
देकप्रकरणत्वाच्चेति कतकः॥ इति श्री युद्धकांडे षड्विंशः सर्गः॥२६॥ तानिति येजीवितं नरक्षंति॥१॥ स्निग्धा

अवमत्य सदा सर्वान्वानरान्बलदर्पितः॥ गवयो नाम तेजस्वी त्वां क्रोधादभिवर्त्तते॥४५॥ एनं श
तसहस्राणि सप्ततिः पर्युपासते॥ एषैवाशंसते लंकां स्वेनानीकेन मर्दितुं॥४६॥ एते दुष्प्रसहा वी
रा येषां संख्यान विद्यते॥ यूथपा यूथपश्रेष्ठास्तेषां यूथानि भागशः॥४७॥ इत्यार्षे श्रीरा० यु० ष
ड्विंशः सर्गः॥२६॥ तांस्तु ते संप्रवक्ष्यामि प्रेक्षमाणस्य यूथपान्॥ राघवार्थे पराक्रांता ये न रक्षंति
जीवितं॥१॥ स्निग्धा यस्य बहुव्यामा दीर्घलांगूलमाश्रिताः॥ ताम्राः पीनाः सिताः श्वेताः प्रकीर्णा
घोरकर्मणः॥२॥ प्रगृहीताः प्रकाशंते सूर्यस्येव मरीचयः॥ पृथिव्यां चानुकृष्यंते हरो नामैष
वानरः॥३॥ यं पृष्ठतोऽनुगच्छंति शतशोऽथ सहस्रशः॥ द्रुमानुद्यम्य सहसा लंकारोहणतत्पराः॥४
यूथपा हरिराजस्य किंकराः समुपस्थिताः॥ नीलानिव महामेघांस्तिष्ठतो यांस्तु पश्यसि॥५॥ अ
सितांजनसंकाशान्युद्धे सत्यपराक्रमान्॥ असंख्येयाननिर्देश्यान्परं पारमिवोदधेः॥६॥

इत्यादिहरवर्णनमिति कतकः॥ तारस्येत्यन्ये॥ बहुव्यामाः यस्य लांगूलाश्रिता वाला बहुव्यामत्वादिगुणकाः
२॥ प्रगृहीताः उत्क्षिप्ताः एष हरो नामेत्यन्वयः हरो गोलांगूलजातिः॥३॥४॥ धूम्रवर्णानं नीलानीत्यादि॥५॥ अनि
र्देश्यपान् अशक्यनामगणनान् परंपारमिव· पर
पारस्थरेणुनिव॥६॥

अथप्रमाथिवर्णनं योगंगामितिगां गामनुगंगासमीपे हस्तिवानरयोर्वैरं गजाकारशंबसादनासुरस्य हनुमत्पित्राकेसरिणा वधात्पूर्वमुत्पन्नमितिपौराणिकी गाथा॥२५॥ नेता प्रमुः॥२६॥ हैमवतीं नदीं गंगामनुवर्त्तमानमुशीरवीजाख्यं पर्वतमाश्रित्य यो रमते इत्यन्वयः॥२७॥ शतसहस्राणां सहस्रं सहस्रं लक्षमिति या

योगंगामनुपर्य्येति त्रासयन्गजयूथपान्॥ हस्तिनां वानराणां च पूर्वं वैरमनुस्मरन्॥२५॥ एष यूथपतिर्नेता गर्जन्गिरिगुहाशयः॥ गजान्रोधयते वन्यानारुजंश्च महीरुहान्॥२६॥ हरीणां वाहिनीमुख्यो नदीं हैमवतीमनु॥ उशीरवीजमाश्रित्य मंदरं पर्वतोपमं॥२७॥ रमते वानरश्रेष्ठो दिविशक्र इव स्वयं॥ एनं शतसहस्राणां सहस्रमभिवर्त्तते॥२८॥ वीर्यविक्रमदृप्तानां नर्दतां। बाहुशालिनां॥ स एष नेता चैतेषां वानराणां महात्मनां॥२९॥ स एष दुर्धरो राजन्प्रमाथी नाम यूथपः॥ वातेनेवोद्धतं मेघं यमेनमनुपश्यसि॥३०॥ अनीकमपि संरब्धं वानराणां तरस्विनां उद्धूतमरुणाभासं पवनेन समंततः॥३१॥ विवर्त्तमानं बहुशो यत्रैतद्बहुलरजः॥ एतेसितमुखा घोरा गोलांगूलामहाबलाः॥३२॥

वत्॥२८॥२९॥ दुर्द्धरः शत्रुभिर्धर्तुमशक्यः प्रमाथिनं विशिष्य बोधयति वातेनेवेति॥३०॥ तरस्वी वानरसंबंधीयस्यानीकं संरब्धं पश्यसि यस्यानीकेनोद्धूतं बहुलं रजोऽरुणाभं धूम्रवर्णं पवनेन समंततो बहुशो विवर्त्तमानं वि।क्षिप्यमाणं यत्र यत्समीपे पश्यसि स एष प्रमाथीत्यन्वयः॥३१॥ गवाक्षवर्णनं एतेसितेत्यादि॥३२॥

१६॥सन्नादवर्णनं·यस्थितमिति·योयोजनेस्थितंशैलंपार्श्वेनसेवते·एतेनयोजनव्यायामदेह इत्युक्तं·
ऊर्ध्वमपियोजनं कायेन कायप्रमाणेन गतोव्याप्तः सन्नूर्ध्ववर्त्तिपदार्थं प्राप्नोतिस्पृशति॥१७॥१८॥१९

एषराजन्सहस्राणिपर्युपास्तेहरीश्वरः॥वलेनबलसंयुक्तोदंभोनामैषयूथपः॥१६॥यःस्थितं
योजनेशैलंगच्छन्पार्श्वेनसेवते॥ऊर्ध्वंतथैवकायेनगतःप्राप्नोतियोजनं॥१७॥यस्मात्तुप
रमंरूपंचतुष्पात्सुनविद्यते॥श्रुतःसन्नादनोनामवानराणांपितामहः॥१८॥येनयुद्धंतदाद
त्तंरणेशक्रस्यधीमता॥पराजयश्चनप्राप्तःसोयंयूथपयूथपः॥१९॥यस्यविक्रममाणस्यश
क्रस्येवपराक्रमः॥एषगंधर्वकन्यायामुत्पन्नःकृष्णवर्त्मना॥२०॥तदादेवासुरेयुद्धेसाह्यार्थं
त्रिदिवौकसां॥यत्रवैश्रवणोराजाजंबूमुपनिषेवते॥२१॥योराजापर्वतेंद्राणांबहुकिन्नर
सेविनां॥विहारसुखदोनित्यंभ्रातुस्तेराक्षसाधिप॥२२॥तत्रैवरमतेश्रीमान्बलवान्वानरो
त्तमः॥युद्धेष्वकत्थनोनित्यंक्रथनोनामयूथपः॥२३॥वृत्तःकोटिसहस्रेणहरीणांसमवस्थितः
एषैवाशंसतेलंकांस्वेनानीकेनमर्दितुं॥२४॥

अथक्रथनवर्णनं·यस्येति·कृष्णवर्त्मना अग्निना॥२०
त्रिदिवौकसांसाह्यार्थमुत्पन्नइत्यन्वयः·वैश्रवणोराजायत्रगिरौजंबुमुपनिषेवतेयःपर्वतोबहूनां
किन्नराणांसेवास्तेषुनेषांपर्वतेंद्राणांराजायश्चतेभ्रातुर्विहारसुखदः॥२१॥२३॥तत्रगिरौकैलासेयोव
सति·॥अकत्थनः आत्मश्लाघारहितः वार्यैवोचपराक्रमप्रदर्शकः॥२२॥ २४॥ ॥

रामा·यु·
८४

४२।नेवानरास्तेनबलंकं समीत्यमर्दयंतीव मर्दयंतइव तिष्ठंति॥४३॥४४॥४५॥४६॥४७॥४८॥जवमानः
क०।२४।इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेसप्तविंशःसर्गः॥२७॥ सारणानुक्तं किं

84

महापर्वतसंकाशामहाजीमूतसन्निभाः॥वृत्तपिंगलनेत्राहिमहाभीमगतिस्वनाः॥४२॥मर्दयं
तीवतेसर्वेतस्थुर्लंकांसमीक्ष्यते॥एषचैषामधिपतिर्मध्येतिष्ठतिवीर्यवान्॥४३॥राज्यार्थीनि
त्यमादित्यमुपतिष्ठतिवीर्यवान्॥नाम्नापृथिव्यांविख्यातोराजन्शतबलीतियः॥४४॥एषैवाशं
सतेलंकांस्वेनानीकेनमर्दितुं॥विक्रांतोबलवान्शूरःपौरुषेस्वेव्यवस्थितः॥४५॥रामप्रियार्
थंप्राणानांदयांनकुरुतेहरिः॥गजोगवाक्षोगवयोनलोनीलश्चवानरः॥४६॥एकैकमेवयो
धानांकोटिभिर्दशभिर्वृतः॥तथान्येवानरश्रेष्ठाविंध्यपर्वतवासिनः॥नशक्यंतेबहुत्वात्तु
संख्यातुंलघुविक्रमाः॥४७॥सर्वेमहाराजमहाप्रभावाःसर्वेमहाशैलनिकाशकायाः॥
सर्वेसमर्थाःपृथिवींक्षणेनकर्तुंप्रविध्वस्तविकीर्णशैलां॥४८॥इत्यार्षेश्रीरामायणेयुद्ध
कांडेसप्तविंशःसर्गः॥२७॥सारणस्यवचःश्रुत्वारावणंराक्षसाधिपं॥बलमादिश्यतत्सर्वं
शुकोवाक्यमथाब्रवीत्॥१॥

चिच्छुकोवक्तीत्याह सारणस्येति तत्सर्वबलमादिश्यतूष्णींस्थि
तवतः सारणस्यवचः श्रुत्वास्थितंरावणंशुकोब्रवीत्॥१॥ श्री श्री

राम०
८४

शतंशतसहस्राणिशतलक्षमित्यर्थः सेतुबंधनं नलसमीपेतत्सहायतयास्थित्वासेतुबंधनकर्त्तारं॥३३॥के
सरिवर्णानि भ्रमरेत्यादि यत्रपर्वतेसर्वकालेफलंतितादृशाद्रुमाःसंति॥३४॥यंसूर्यस्तुल्यवर्णाभंस्वतुल्य

शतंशतसहस्राणिदृष्ट्वावैसेतुबंधनं॥गोलांगूलंमहाराजगवाक्षंनामयूथपं॥३३॥परिवार्याभि
नर्द्दंतेलंकांमर्द्दितुमोजसा॥भ्रमराचरितायत्रसर्वकालफलद्रुमाः॥३४॥यंसूर्यस्तुल्यवर्णाभ॰
मनुपर्येतिपर्वतं॥यस्यभासासदाभांतितद्वर्णामृगपक्षिणः॥३५॥यस्यप्रस्थंमहात्मानोनत्य
जंतिमहर्षयः॥सर्वकामफलावृक्षाःसर्वेफलसमन्विताः॥३६॥मधूनिचमहार्हाणियस्मि
न्पर्वतसत्तमे॥तत्रैषरमतेराजन्रम्येकांचनपर्वते॥३७॥मुख्योवानरमुख्यानांकेसरीनाम
यूथपः॥षष्टिर्गिरिसहस्राणिरम्याःकांचनपर्वताः॥३८॥तेषांमध्येगिरिवरस्त्वमिवानघरक्ष
सां॥तत्रैकेकपिलाःश्वेतास्ताम्रास्यामधुपिंगलाः॥३९॥निवसंत्युत्तमगिरौतीक्ष्णदंष्ट्रनखायु
धाः॥सिंहाइवचतुर्दंष्ट्राव्याघ्राइवदुरासदाः॥४०॥सर्वेवैश्वानरसमाज्वलदाशीविषोपमाः
सुदीर्घांचितलांगूलामत्तमातंगसन्निभाः॥४१॥

वर्णकांतियुक्तंपर्वतमनुपर्येतिप्रदक्षिणंकरोतिमृ
गपक्षिणःस्तद्वर्णामृगादयः॥३५॥सर्वकामेतिकाम्यंतइतिकामाविषयाःसर्वेषांभोगार्हस्रक्चंदनाभरण
वस्त्रादिरूपफलप्रदाः॥३६॥कांचनपर्वतोमहामेरुः॥३७॥शतवलीवर्णनं षष्टिरित्यादि॥३८॥तेषांमध्येगि
रिवरःसावर्णिमेरुनामास्तितत्रसावर्णिमेरौ॥३९॥

सततगोवायुः ॥११॥ १२॥ प्रतियास्यति भूलोकवर्त्तिफलैरिति शेषः ॥१३॥ अनासाद्य भास्करमिति शेषः । भा
स्करोदयने इति बहुव्रीहिः ॥१४॥ १५॥ आगमयोगेन सह · हनूमन्नामनिमित्तभूतपूर्ववृत्तान्तेन

कामरूपो हरिश्रेष्ठो बलरूपसमन्वितः ॥ अनिवार्यगतिश्चैव यथा सततगः प्रभुः ॥११॥ उद्यं
तं भास्करं दृष्ट्वा बालः किल बुभुक्षितः ॥ त्रियोजनसहस्रं तु अध्वानमवतीर्य हि ॥१२॥ आदि
त्यमाहरिष्यामि न मे क्षुत्प्रतियास्यति ॥ इति निश्चित्य मनसा पुप्लुवे बलदर्पितः ॥१३॥ आनाधृ
ष्यतमं देवमपि देवर्षिराक्षसैः ॥ अनासाद्यैव पतितो भास्करोदयने गिरौ ॥१४॥ पतितस्य क
पेरस्य हनुरेका शिलातले ॥ किंचिद्भिन्ना दृढहनुर्हनुमानेष तेन वै ॥१५॥ सत्यमागमयोगेन
ममैष विदितो हरिः ॥ नास्य शक्यं वलं रूपं प्रभावो वानुभाषितुं ॥१६॥ एष आशंसते लंकामे-
को मथितुमोजसा ॥ येन जाज्वल्यते सौ वै धूमकेतुस्तवाद्य वै ॥ लंकायां निहितश्चापि कथं वि
स्मरसे कपिं ॥१७॥ यस्यैषोनंतरः शूरः श्यामः पद्मनिभेक्षणः ॥ इक्ष्वाकूणामतिरथो लोके विश्रु
तपौरुषः ॥१८॥

सहेत्यर्थः ॥१६॥ धूमकेतुरग्निः येन जाज्वल्यते · प्रज्वालितः कृतः त्वत्तेजोरु-
द्धोपि यत्पुच्छं प्राप्य प्रज्वलितः लंकायां निहितो निक्षिप्तश्च ॥१७॥ रामं वर्णयति · यस्यैष इति · य
स्य दर्शितस्य हनूमतोनंतरः ॥ समीपवर्त्ती ॥१८॥ अ अ

गांगेयान् गंगातटोत्पन्नान् अनपत्येपिडगार्थः ॥२॥३॥ एषां कोटीति सुग्रीवसचिवसंख्या सर्वबलसंख्यां तु स
गंतिवक्ष्यति ॥४॥५॥ यौ तावितिमैंदद्विविदविषयं ॥६॥ समनुज्ञाता अमृते त्यत्र लोपः शाकल्यस्येति लो

स्थितान्पश्यसि यानेतान्मत्तानिव महाद्विपान् न्यग्रोधानिव गांगेयान्सालान्हैमवतानिव ॥२॥
एते दुष्प्रसहा राजन्बलिनः कामरूपिणः ॥ दैत्यदानवसंकाशा युद्धे देवपराक्रमाः ॥३॥ एषां कोटिस
हस्राणि नव पंच च सप्त च ॥ तथा शंकुसहस्राणि तथा वृंदशतानि च ॥४॥ एते सुग्रीवसचिवाः
किष्किंधानिलयाः सदा ॥ हरयो देवगंधर्वैरुत्पन्नाः कामरूपिणः ॥५॥ यौ तौ पश्यसि तिष्ठंतौ ।
समानौ देवरूपिणौ ॥ मैंदश्च द्विविदश्चैव ताभ्यां नास्ति समो युधि ॥६॥ ब्रह्मणा समनुज्ञाता
अमृतप्राशिनावुभौ ॥ आशंसेते यथा लंकामेतौ मर्दितुमोजसा ॥७॥ यं तु पश्यसि तिष्ठंतं प्रभि
न्नमिव कुंजरं ॥ यो बलात्क्षोभयेत्क्रुद्धः समुद्रमपि वानरः ॥८॥ एषो भिगंता लंकायां वैदेह्यास्त
व च प्रभो ॥ एनं पश्य पुरा दृष्टं वानरं पुनरागतं ॥९॥ ज्येष्ठः केसरिणः पुत्रो वातात्मज इति श्रुतः ॥
हनूमानिति विख्यातो लंघितो येन सागरः ॥१०॥

पः समनुज्ञाता वित्यर्थः ॥७॥ हनूमंतं वर्णयति यं त्विति प्रभिन्नं मत्तं ॥८॥ एष लंकायां वैदेह्यास्त
व चाभिगंता न्वेषी समीपमागतश्चेत्यर्थः ॥९॥१०॥ श्री ॥ श्री

सुग्रीववर्णानियंत्विति॥२८॥अतिबभ्राज अतिक्रम्यातिशयेनबभ्राजेत्यर्थः॥२९॥३०॥पुष्करंपद्मं॥३१॥३२॥

यंतुपश्यसितिष्ठंतंमध्येगिरिमिवाचलं॥सर्वशाखामृगेंद्राणांभर्त्तारममितौजसं॥२८॥
तेजसायशसाबुध्याबलेनाभिजनेनच॥यःकपीनतिबभ्राजहिमवानिवपर्वतः॥२९॥कि
ष्किंधांयःसमध्यास्तेदुर्गांसगहनद्रुमां॥दुर्गांपर्वतदुर्गस्थांप्रधानैःसहयूथपैः॥३०॥यस्यै
षाकांचनीमालाशोभतेशतपुष्करा॥कांतादेवमनुष्याणांयस्यांलक्ष्मीःप्रतिष्ठिता॥३१॥
एतांमालांचतारांचकपिराज्यंचशाश्वतं॥सुग्रीवोवालिनंहत्वारामेणप्रतिपादितः॥३२॥शतंश
तसहस्राणांकोटिमाहुर्मनीषिणः॥शतकोटिसहस्राणांशंकुरित्यभिधीयते॥३३॥शतं
शंकुसहस्राणांमहाशंकुरितिस्मृतः॥महाशंकुसहस्राणांशतंवृंदमिहोच्यते॥३४॥श
तंवृंदसहस्राणांमहावृंदइतिस्मृतं॥महावृंदसहस्राणांशतंपद्ममिहोच्यते॥३५॥
शतंपद्मसहस्राणांमहापद्ममितिस्मृतं॥महापद्मसहस्राणांशतंखर्वमिहोच्यते॥३६॥
शतंखर्वसहस्राणांसमुद्रमभिधीयते॥शतंसमुद्रसाहस्रंमहौघमितिविश्रुतं॥३७॥

अथसर्वबलसंख्यांदर्शयितुंसंख्यास्वरूपंनिदर्शयति॥शतमिति॥३३॥३४॥३५॥३६॥३७॥

86

राम
८६

१९॥गगनंबाणैर्भिंद्यात्सर्वदुष्करमपितस्यसुकरमित्यत्रतात्पर्यं॥२०॥२१॥२२॥२३॥२४॥२५॥यस्यप्राग्व

यस्मिन्नचलतेधर्मोयोधर्मंनातिवर्त्तते॥योब्राह्ममस्त्रंवेदांश्चवेदवेदाविदांवरः॥१९॥योभिंद्या
द्गगनंबाणैर्मेदिनींचापिदारयेत्॥यस्यमृत्योरिवक्रोधःशक्रस्येवपराक्रमः॥२०॥यस्यभार्या
जनस्थानात्सीताचापिहृतात्वया॥सएषरामस्त्वांराजन्योद्धुंसमभिवर्त्तते॥२१॥यस्यैष
दक्षिणेपार्श्वेशुद्धजांबूनदप्रभः॥विशालवक्षास्ताम्राक्षोनीलकुंचितमूर्द्धजः॥२२॥एषोहिलक्ष्म
णोनामभ्रातुःप्रियहितेरतः॥नयेयुद्धेचकुशलःसर्वशस्त्रभृतांवरः॥२३॥अमर्षीदुर्जयोजेता
विक्रांतश्चजयीबली॥रामस्यदक्षिणोबाहुर्नित्यंप्राणोबहिश्चरः॥२४॥नत्वेषराघवस्यार्थे।
जीवितंपरिरक्षति॥एषैवाशंसतेयुद्धेनिहंतुंसर्वराक्षसान्॥२५॥यस्यसव्यमसौपक्षंराम
स्याश्रित्यतिष्ठति॥रक्षोगणपरिक्षिप्तोराजाह्येषविभीषणः॥२६॥श्रीमताराजराजेनलंका।
यामभिषेचितः॥त्वामसौप्रतिसंरब्धोयुद्धायैषोभिवर्त्तते॥२७॥ श्र श्र

र्णितस्यरामस्यसव्यंपक्षमाश्रित्यतिष्ठतीत्यन्वयः रक्षोगणपरिक्षिप्तःव्याप्तःगणशब्देनचत्वार
एव॥२६॥राजराजेनरामेणरामाभिषेचितइत्यन्वयःएषोसौत्वांप्रतियुद्धायाभिवर्त्तते॥२७॥

४।कथांतेवृत्तांतश्रवणसमाप्तिसमये· भर्त्सयामास· स्वकीयभीनाकारगोपनार्थोयंव्यापारः॥५॥अधोमुखै
भर्त्सनेनेनेतिशेषः॥६॥उच्यमानविशेषणस्यनृपतेःपुरस्तादुपजीविभिर्विप्रियंवक्तुंनावत्तसदृशं
प्रग्रहे· अनुग्रहे॥७॥नदेवविप्रियंदर्शयति·रिपूणामिति·युद्धायाभिवर्त्तिनां·॥अभिमुखतयावर्त्तमाना

सुषेणंकुमुदंनीलंनलंचप्लवगर्षभं॥गजंगवाक्षंशरभंमैंदंचद्विविदंतथा॥४॥किंचिदावि
ग्नहृदयोजातक्रोधश्चरावणः॥भर्त्सयामासतौवीरौकथांतेशुकसारणौ॥५॥अधोमुखौतौ
प्रणतावब्रवीच्छुकसारणौ॥रोषगद्गदयावाचासंरब्धंपरुषंतथा॥६॥ननतावत्सदृशंनामसचि
वैरुपजीविभिः॥विप्रियंनृपतेर्वक्तुंनिग्रहेप्रग्रहेप्रभोः॥७॥रिपूणांप्रतिकूलानांयुद्धार्थ
मभिवर्त्तिनां॥उभाभ्यांसदृशंनामवक्तुमप्रस्तवेस्तवं॥८॥आचार्योगुरवोवृद्धावृथावांपर्यु
पासिताः॥सारंयद्राजशास्त्राणामनुजीव्यंनगृह्यते॥९॥

नांस्तवंबलोत्कर्षकथनंअप्रस्तवेनप्रस्ताभावेवक्तुंसदृशंयुक्तंनामकाकुरत्रअपित्वयुक्तमेव·केय
थपाः किंयद्बलमितिविचार्यवक्तव्यमितिप्रेषितेनतावन्मात्रंवाच्यं· अपथ्यंतुतेषांप्राबल्यमेकैको
नाशयितुंशक्तइत्यादिवक्तुंनयुक्तमित्यर्थः॥८॥आचार्यउपनीयवेदाध्यापकः॥गुरवःपित्रादयः
वृद्धाज्ञानवयोवृद्धाः·वांयुवाभ्यां अनुजीव्यंग्राह्यांशः नगृह्यतेनगृहीतः॥९॥ ॥

३८॥अथवलसंख्यामाह॥एवंकोटीति॥३९॥४०॥४१॥४२॥प्रज्वालितग्रहोपमं॥प्रज्वलितग्रहज्वालो

महापद्मसहस्रेणतथाखर्वशतेनच॥समुद्रेणचतेनैवमहौघेनतथैवच॥३८॥एवंकोटिसहस्रेणशंखानांचशतेनच॥महाशंखसहस्रेणतथावृंदशतेनच॥३९॥महावृंदसहस्रेणतथापंद्मशतेनच॥महापद्मसहस्रेणतथाखर्वशतेनच॥४०॥समुद्रेणचतेनैवमहौघेनतथैवच॥एषकोटीमहौघेनसमुद्रसदृशेनच॥४१॥विभीषणेनवीरेणसचिवैःपरिवारितः॥सुग्रीवोवानरेंद्रस्त्वांयुद्धार्थमनुवर्त्तते॥महावलवृतोनित्यंमहावलपराक्रमः॥४२॥इमांमहाराजसमीक्ष्यवाहिनीमुपस्थितांप्रज्वलितग्रहोपमां॥ततःप्रयत्नःपरमोविधीयतांयथाजयःस्यान्नपरैःपराभव॥४३॥इत्यार्षेश्रीरामायणेयुद्धकांडेअष्टाविंशःसर्गः॥२८॥ शुकेनतुसमादिष्टान्दृष्ट्वासहरियूथपान्॥लक्ष्मणंचमहावीर्यंभुजंरामस्यदक्षिणं॥१॥समीपस्थंचरामस्यभ्रातरंचविभीषणं॥सर्ववानरराजंचसुग्रीवंभीमविक्रमं॥२॥अंगदंचापिवलिनंवज्रहस्तात्मजात्मजं॥हनूमंतंचविक्रांतंजांबवंतंचदुर्जयं॥३॥ ॥ ॥

पमं॥४३॥गर्वमानः॥क०॥२८॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेअष्टाविंशःसर्गः॥२८॥ शुकेनेति॥१॥२॥३॥

प्रतिनंद्याभिनिःसृतौऽयमेवतयोःराक्षसत्वप्रापकशापस्यांतइत्यन्यत्रस्पष्टं॥१५॥१६॥१७॥चरान्चारान्·

एवमुक्त्वातुसव्रीडौतौदृष्ट्वाशुकसारणौ॥रावणंजयशब्देनप्रतिनंद्याभिनिःसृतौ॥१५॥अब्रवी
च्चदशग्रीवःसमीपस्थंमहोदरं॥उपस्थापयमेशीघ्रंचारानितिनिशाचरः॥१६॥ततश्चाराःसं
त्वरिताःप्राप्ताःपार्थिवशासनात्॥उपस्थिताःप्रांजलयोवर्द्धयित्वाजयाशिषः॥१७॥तानब्रवी
त्ततोवाक्यंरावणोराक्षसाधिपः॥चरान्प्रत्यायिकाञ्छूरान्धीरान्विगतसाध्वसान्॥१८॥इतोग
च्छतरामस्यव्यवसायंपरीक्षितुं॥मंत्रेष्वभ्यंतरायेस्यप्रीत्यातेनसमागताः॥१९॥कथंस्वपिति
जागर्त्तिकिमद्यचकरिष्यति॥विज्ञायनिपुणंसर्वमागंतव्यमशेषतः॥२०॥चारेणविदितः
शत्रुःपंडितैर्वसुधाधिपैः॥युद्धेस्वल्पेनयत्नेनसमासाद्यनिरस्यते॥२१॥चारास्तुतेतथेत्यु
क्त्वाप्रहृष्टाराक्षसेश्वरं॥शार्दूलमग्रतःकृत्वाततश्चक्रुःप्रदक्षिणं॥२२॥ततस्तंतुमहा
त्मानंचाराराक्षससत्तमं॥कृत्वाप्रदक्षिणंजग्मुर्यत्ररामःसलक्ष्मणः॥२३॥तेसुवेलस्य
शैलस्यसमीपेरामलक्ष्मणौ॥प्रच्छन्नाददृशुर्गत्वाससुग्रीवविभीषणौ॥२४॥

९२

प्रत्यायिकान्प्रत्ययएवप्रत्यायःतद्वतइत्यर्थःअतइतिठन्·विश्वासोपेतानित्यर्थः॥१८॥मंत्रे
षुविचारेषुअभ्यंतराःपरमांतरंगमंत्रिणः॥१९॥२०॥२१॥२२॥२३॥२४॥ ॥

गृहीतोनानविज्ञातः विस्मृत इत्यर्थः ज्ञातविस्मरणमपि युवयोर्न संभावितमित्याह भार इति अज्ञानस्य भारो
वाह्यते अज्ञानवाहुल्यमेव वर्त्तनेन ज्ञानलेशोपीति भावः धरामि राज्यमिति शेषः राज्यभ्रंशस्य परम्कारणं
भवादृशदुर्मतिसंगस्तत्र सत्यपि तन्मूलानर्थ एतावत्कालं यत्तयोर्वलेन निरस्कृत इत्यर्थः ॥१०॥ युवाभ्यां
स्वनाशमप्यविज्ञाय दुर्वचउक्तमित्याह किंत्विति शासतो राज्ञो यस्य मे जिह्वा तदुक्तिः शुभाशुभं निग्रह

गृहीतो वानविज्ञातो भारोऽज्ञानस्य वाह्यते। ईदृशैः सचिवैर्युक्तो मुरवैर्दिस्सा धराम्यहं ॥१०॥ किं
नु मत्तो भयं नास्ति मां वक्तुं परुषं वचः। यस्य मे शासतो जिह्वा प्रयच्छति शुभाशुभं ॥११॥ अप्येव
दहनं स्पृष्ट्वा वने तिष्ठंति पादपाः। राजदंडपरामष्टास्तिष्ठंते नापराधिनः ॥१२॥ हन्या महं त्वि
मौ पापौ शत्रुपक्षप्रशंसिनौ। यदि पूर्वोपकारैर्मे क्रोधो न मृदुतां व्रजेत् ॥१३॥ अपध्वंसत नश्यध्वं सन्नि
कर्षादितो मम न हि वां हंतुमिच्छामि स्मराम्युपकृतानि वां। हतावेव कृतघ्नौ द्वौ मयि स्नेहपराङ्मुखौ ॥१४॥

नुग्रहं प्रयच्छति तेन मां परुषं वचो वक्तुमुत्सहेथे यतः न हि युवयोर्मत्तो भयं किंतु नास्ति यदि स्यात्तुन्नुवाच्ये इत्य
र्थः ॥११॥ अप्रतिक्रियानर्थौ राजद्रोह इत्याह अप्येवेत्यादि राजदोषपरामृष्टाः राजक्रोधविषयाः ॥१२॥ पूर्वो
पकारैर्युद्धादौ कृतैः ॥१३॥ अपध्वंसत मत्सभाप्रवेशाद्भ्रष्टा भवत मे सन्निकर्षान्नश्यध्वं अदर्शनं गच्छत
क्रोधवशाद्वचनव्यत्यासो न दोषाय हतावेव विनापि शिरच्छेदं धिक्कारादेवेति शेषः ॥१४॥

तेनअनुशिष्टःपृष्टइत्यर्थः॥४॥चारयितुं।चारैर्विचारयितुं॥५॥यतःसंभाषितुमशक्यातोत्रसंप्रश्नोविचा
रहेतुपर्यनुयोगोनलभ्यते॥६॥विचारिते॥विचारयितुंप्रक्रांतैरक्षोभिर्विभीषणापरीवारैःविचारितःब

इतितेनानुशिष्टस्तुवाचंमंदमुदीरयन्॥तदाराक्षसशार्दूलंशार्दूलोभयविक्लवः॥४॥नते
चारयितुंशक्याराजन्वानरपुंगवाः॥विक्रांतावलवंतश्चराघवेनचरक्षिताः॥५॥नापिसंभा
षितुंशक्याःसंप्रश्नोत्रनलभ्यते॥सर्वतोरक्षतेपंथावानरैःपर्वतोपमैः॥६॥प्रविष्टमात्रेज्ञातो
हंवलेतस्मिन्नचारिते॥बलाद्गृहीतोरक्षोभिर्वहुधास्मिविचारितः॥७॥जानुभिर्मुष्टिभिर्दं-
तैस्तलैश्चाभिहतोभृशं॥परिणीतोस्मिहरिभिर्वलमध्येअमर्षणैः॥८॥परिणीयचसर्वत्र
नीतोहंरामसंसदिरुधिरस्रावीदीनांगोविह्वलश्चलितेंद्रियः॥९॥हरिभिर्वध्यमानश्चयाच
मानःकृतांजलिः॥राघवेणपरित्रातोमामेतिचयदृच्छया॥१०॥एषशैलशिलाभिस्तुपूरयि
त्वामहार्णवं॥द्वारमाश्रित्यलंकायारामस्तिष्ठतिसायुधः॥११॥

हुप्रकारगत्याचालितः॥७॥परिणीतोस्मि·हन्तुमानिवघोषणार्थमितस्ततोनीतोस्मि॥८॥तदेवाह
परिणीयचसर्वत्रेति·रुधिरस्रावीचासौदीनांगश्चेतिकर्मधारयः॥९॥यदृच्छयादृच्छेनरामेणमा
मावध्यतामितिपरित्रातः॥१०॥११॥

४९

२५॥शार्दूलःप्रधानचारोग्राहितोविभीषणेनेतिशेषः एकोग्राहितइत्यत्रहेतुःपापोयमिति अतिदुष्ट
इत्यर्थः॥२६॥सोपिशार्दूलोपि॰परेशार्दूलसहायभूतास्तेचमोचिताः॥२७॥२८॥वहिर्नित्यचराःस्वदेश

प्रेक्ष्यमाणाश्चमंतांचबभूवुर्भयविह्वलाः॥तेतुधर्मात्मनादृष्ट्वाराक्षसेंद्रेणराक्षसाः॥२५॥विभीष
णेनतत्रस्थानिगृहीतायदृच्छया॥शार्दूलोग्राहितस्त्वेकःपापोयमितिराक्षसः॥२६॥मोक्षितः
सोपिरामेणवध्यमानःप्लवंगमैः॥आनृशंसेनरामेणमोक्षिताराक्षसाःपरे॥२७॥वानरैरर्दितास्ते
तुविक्रांतैर्लघुविक्रमैः॥पुनर्लंकामनुप्राप्ताःश्वसंतोनष्टचेतसः॥२८॥ततोदशग्रीवमुपस्थितास्ते
चाराबहिर्नित्यचरानिशाचराः॥गिरेःसुवेलस्यसमीपवासिनंन्यवेदयन्रामबलंमहाब
लाः॥२९॥इत्यार्षेश्रीरा॰युद्ध॰एकोनत्रिंशःसर्गः॥२९॥ ततस्तमक्षोभ्यबलंलंकाधिपतयेच
राः॥सुवेलेराघवंशैलेनिविष्टंप्रत्यवेदयन्॥१॥चाराणांरावणःश्रुत्वाप्राप्तंराममहाबलं
जातोद्वेगोभवत्किंचिच्छार्दूलंवाक्यमब्रवीत्॥२॥अयथावच्चतेवर्णोदीनश्चासिनिशाचर।
नासिकच्चिदमित्राणांक्रुद्धानांवशमागतः॥३॥

बहिःपरवृत्तांतपरिज्ञानायनित्यप्रवृत्ताःसु
वेलसमीपवासिरामबलंतंरावणांन्यवेदयन्॥२९॥धत्रधरमाणः क॰॥२७॥इतिश्रीरा॰युद्धकांडेए
कोनत्रिंशःसर्गः॥२९॥ततइति॥१॥चाराणांवचनादितिशेषःतद्वचनाद्रामंप्राप्तंलंकासमीप
मागतंश्रुत्वेत्यन्वयः॥२॥अमित्राणांवशमागतोसिनकच्चिदिति॥३॥ अ

अन्यःपुत्रोधूम्रःशतक्रतोर्गुरुपुत्रोबृहस्पतिपुत्रइत्यर्थःअयंकेसरीविशेषःयस्यकेसरिणःपुत्रेण
हनूमताएकेनरक्षसाकदनंकृतंपूर्वमित्यर्थः॥२१॥२२॥मृत्युःसखःसुमुखादयोमृत्युतुल्याइत्य

गद्गदस्याथपुत्रोन्योगुरुपुत्रःशतक्रतोः॥कदनंयस्यपुत्रेणकृतमेकेनरक्षसां॥२१॥सुषे
णश्चात्रधर्मात्मापुत्रोधर्मस्यवीर्यवान्॥सौम्यःसोमात्मजश्चात्रराजन्दधिमुखःकपिः॥२२॥
सुमुखोदुर्मुखश्चात्रवेगदर्शीचवानरः॥मृत्युर्वानररूपेणनूनंसृष्टःस्वयंभुवा॥२३॥पु
त्रोहुतवहस्यात्रनीलःसेनापतिःस्वयं॥अनिलस्यतुपुत्रोत्रहनूमानितिविश्रुतः॥२४॥न
प्ताशक्रस्यदुर्धर्षोबलवानंगदोयुवा॥मैंदश्चद्विविदश्चोभौबलिनावश्विसंभवौ॥२५॥
पुत्रोवैवस्वतस्याथपंचकालांतकोपमाः॥गजोगवाक्षोगवयःशरभोगंधमादनः॥२६॥
दशवानरकोट्यश्चशूराणांयुद्धकांक्षिणां॥श्रीमतांदेवपुत्राणांशेषंनाख्यातुमुत्सहे॥२७॥
पुत्रोदशरथस्यैषसिंहसंहननोयुवा॥दूषणोनिहतोयेनखरश्चत्रिशिरास्तथा॥२८॥
नास्तिरामस्यसदृशोविक्रमेभुविकश्चन॥विराधोनिहतोयेनकबंधश्चांतकोपमः॥२९॥

र्थः॥२३॥२४॥२५॥पंचयमपुत्रपरिगणनंगजइत्यादि॥२६॥दशवानरकोट्यइतिवानरैरितिलुप्तषष्ठी
बहुवचनांतं·नद्विशेषणंशूराणामित्यादिनाआख्यातुमुत्सहेअशक्यगणनत्वात्॥२७॥२८॥२९॥

गरुडव्यूहमास्थायेति-प्रस्थानार्थोयं-पूर्वंतु स्थितिकालत्वात्पुरुषव्यूह आसीत् ॥१२॥ पुरायाति-
आयास्यति ॥१३॥१४॥१५॥ चरिता भवता-दैवगत्याघोषणार्थप्राणायनेनेति भावः ॥१६॥१७॥ नयात

गरुडव्यूहमास्थाय सर्वतो हरिभिर्वृतः ॥ मां विसृज्य महातेजा लंकामेवानिवर्त्तति ॥१२॥ पु
रा प्राकारमायाति क्षिप्रमेकतरं कुरु ॥ सीतां वापि प्रयच्छाशु युद्धं वापि प्रदीयतां ॥१३॥ मनसा
तत्तदाप्रेक्ष्य तत्कृत्वा राक्षसाधिपः ॥ शार्दूलं सुमहद्वाक्यमथोवाच स रावणः ॥१४॥ यदि मां प्र
तियुध्यंते देवगंधर्वदानवाः ॥ नैव सीतां प्रदास्यामि सर्वलोकभयादपि ॥१५॥ एवमुक्त्वा म
हातेजा रावणः पुनरब्रवीत् ॥ चरिता भवता सेना केऽत्र शूराः प्लवंगमाः ॥१६॥ किंप्रभाः कीदृ
शाः सौम्य वानरा ये दुरासदाः ॥ कस्य पुत्राश्च पौत्राश्च तत्त्वमाख्याहि सुव्रत ॥१७॥ तथात्र प्र
तिपत्स्यामि ज्ञात्वा तेषां बलाबलं ॥ अवश्यं परवलसंख्यानं कर्त्तव्यं युद्धमिच्छता ॥१८॥ अथैवमु
क्तः शार्दूलो रावणेनोत्तमस्वरः ॥ इदं वचनमारेभे वक्तुं रावणसन्निधौ ॥१९॥ अथर्क्षरजसः
पुत्रो युधिराजन्सुदुर्जयः ॥ गद्गदस्याथ पुत्रोत्र जांबवानिति विश्रुतः ॥२०॥

दनुसारेण ॥१८॥१९॥

गद्गदो जांबवंतः क्षेत्रद्वारा पिता-यद्यपि जांबवान् जृंभमाणस्य मम वक्त्रादजायतेति भगवन्मुखा
दस्योत्पत्तिः श्रुता तथापि जृंभणसमये उद्गताया भगवच्छक्तेर्गद्गदक्षेत्रमाविश्य तेन रूपेण परिणाम

टट: ॥४०॥

४॥यत्तदनंतरंस्तमं· सीताप्राप्ताविति शेषः॥५॥ततः स्वांतःपुरप्रवेशानंतरं· मायाविनं प्रशस्तमायावंतंम
हामायंतादृशमायाप्रयोगकर्त्तारं॥६॥मायाज्ञंविद्युज्जिह्वमब्रवीद्वचनमाह· मोहयिष्यावहेइति७

तस्यतच्छासनंश्रुत्वामंत्रिणोभ्यागमन्द्रुतं॥ततःसमंत्रयामासराक्षसैःसचिवैःसह॥४॥मंत्रयि
त्वातुदुर्द्धर्षःक्षमंयत्तदनंतरं॥विसर्जयित्वासचिवान्प्रविवेशास्वमालयं॥५॥ततोराक्षसमा
हूयविद्युज्जिह्वंमहाबलं॥मायाविनंमहामायंप्राविशद्यत्रमैथिली॥६॥विद्युज्जिह्वंचमाया
ज्ञमब्रवीद्राक्षसाधिपः॥मोहयिष्यावहेसीतांमाययाजनकात्मजां॥७॥शिरोमायामयंगत्वरा
घवस्यनिशाचर॥मांत्वंसमुपतिष्ठस्वमहच्चसशरंधनुः॥८॥एवमुक्तस्तथेत्याहविद्युज्जि
ह्वोनिशाचरः॥दर्शयामासतांमायांसुप्रयुक्तांसरावणे॥९॥तस्यतुष्टोभवद्राजाप्रददौचविभू
षणं॥अशोकवनिकायांचसीतादर्शनलालसः॥१०॥नैर्ऋतानामधिपतिःसंविवेशमहाबलः॥
ततोदीनामदीनार्हांददर्शधनदानुजः॥११॥अधोमुखींशोकपरामुपविष्टांमहीतले॥भर्त्तारंस
मनुध्यांतीमशोकवनिकांगतां॥१२॥

मांत्वंसमुपतिष्ठस्वमत्समीपमागच्छेत्यर्थः॥८॥रावणे
रावणायेत्यर्थः॥९॥कुब्जायैकैकेयीवत्तस्यविद्युज्जिह्वस्यानर्थेआनुकूल्यात्तुष्टःसन्भूषणं
प्रददौ॥१०॥संविवेश·प्रविवेश॥११॥१२॥ अ अ

यतोदूषणादयस्तेन निहताश्चतस्तस्य गुणान्वक्तुं न कोपि शक्त इत्यन्वयः॥३०॥३१॥३२॥३३॥ दुर्धरस्तदाख्यः॥३४
भवान्गतिः प्रमाणं निर्णायक इति यावत् नन्वत्र धर्मपुत्रः सुषेणः वैवस्वतपुत्रौ शरभगंधमादना

वक्तुं नृशक्तो रामस्य गुणान्कश्चिन्नरः क्षितौ॥ जनस्थानगता येन तावंतो राक्षसा हताः॥३०॥ लक्ष्मणश्चा
त्र धर्मात्मा मातंगानामिवर्षभः॥ यस्य बाणपथं प्राप्य न जीवेदपि वासवः॥३१॥ श्वेतो ज्योतिर्मुख
श्चात्र भास्करस्यात्मसंभवौ॥ वरुणस्याथ पुत्रोथ हेमकूटः प्लवंगमः॥३२॥ विश्वकर्मसुतो वी
रो नलः प्लवगसत्तमः॥ विक्रांतो वेगवानत्र वसुपुत्रः सदुर्धरः॥३३॥ राक्षसानां वरिष्ठश्च तव भ्रा
ता विभीषणः॥ प्रतिगृह्य पुरीं लंकां राघवस्य हिते रतः॥३४॥ इति सर्वं समाख्यातं तथा वै वान
रं बलं॥ सुवेलेधिष्ठितं शैले शेषकार्ये भवान्गतिः॥३५॥ इत्यार्षे रा॰ युद्ध॰ त्रिंशः सर्गः॥३०॥
ततस्तमक्षोभ्यबलं लंकायां नृपतेश्चराः॥ सुवेले राघवं शैले निविष्टं प्रत्यवेदयन्॥१॥ चारा
णां रावणः श्रुत्वा प्राप्तं रामं महाबलं॥ जातोद्वेगोभवत्किंचित्सचिवानिदमब्रवीत्॥२॥ मंत्रि
णः शीघ्रमायांतु सर्वे वै सुसमाहिताः॥ अयं नो मंत्रकालो हि संप्राप्त इति राक्षसाः॥३॥

वुक्तौ बालकांडे वरुणात्सुषेणः पर्जन्याच्छरभः कुवेराद्गंधमादनश्चोक्त इति चेन्न तत्तत्संज्ञका नामनेके
षामपि सत्वान्न विरोध इति तीर्थः॥३५॥ इति श्री रा॰ युद्ध॰ त्रिंशः सर्गः॥३०॥ ततइति॥१॥ सचिवानुप
मंत्रिणः॥२॥ आयांतु युष्मद्वचनादिति शेषः॥३॥

अस्तंदिवाकरेव्रजतिमहाबलेनसमुद्रस्योत्तरंतीरंसंपीड्यरामःसंनिविष्टइत्यन्वयः॥१९॥ बलंरामसेनाःच
रितंचारितंतद्बलमितिशेषः॥२०॥ यत्ररामःसलक्ष्मणस्तद्देशोऽस्यबलंहतं॥२१॥ चक्रान्स्वल्पान् चक्रा

सन्निविष्टःसमुद्रस्यपीड्यतीरमथोत्तरं॥ बलेनमहतारामोव्रजत्यस्तंदिवाकरे॥१९॥ अथाध्वनि
परिश्रांतमर्द्धरात्रेस्थितंबलं॥ सुखसुप्तंसमासाद्यचरितंप्रथमंचरैः॥२०॥ तत्प्रहस्तप्रणीतेनब
लेनमहताममु॥ बलमस्यहतंरात्रौयत्ररामःसलक्ष्मणः॥२१॥ पट्टिशान्परिघान्चक्रान्ऋष्टी
न्दंडान्महायुधान्॥ बाणजालानिशूलानिभास्वरान्कूटमुद्गरान्॥२२॥ यष्टीश्चतोमरान्प्रा
सान्चक्राणिमुशलानिच॥ उद्यम्योद्यम्यरक्षोभिर्वानरेषुनिपातिताः॥२३॥ अथसुप्तस्यरा
मस्यप्रहस्तेनप्रमाथिना॥ असक्तंकृतहस्तेनशिरःछिन्नंमहासिना॥२४॥ विभीषणःसमु
त्पत्यनिगृहीतोयदृच्छया॥ दिशंप्रव्राजितःसैन्यैर्लक्ष्मणःप्लवगैःसह॥२५॥ सुग्रीवोग्रीव
यासीनेभग्नयाप्लवगाधिपः॥ निरस्तहनुकःसीनेहनूमान्राक्षसैर्हतः॥२६॥ जांबवानथ।
जानुभ्यांउत्पतन्निहतोयुधि॥ पट्टिशैर्बहुभिश्छिन्नोनिकृत्तःपादपोयथा॥२७॥

णीतिपुनरुक्तेः

एतान्युद्यम्योद्यम्यतेपट्टिशादयोवानरेषुपातिताःऋष्टयःसूक्ष्मखड्गाः॥२२॥२३॥ कृतहस्तेन।
शिक्षितहस्तेनासक्तंयथातथाछिन्नं॥२४॥ समुत्पत्ययदृच्छयागतोपिनिगृहीतः॥२५॥२६॥२७॥

प्रहर्षनामकीर्त्तयन्ः नामेत्यपरमार्थे अपरमार्थभूतंरामजयजंप्रहर्षंकीर्त्तयन् ॥१३॥१४॥ तेमूलमस्मदपरिग्रहनिदानं सर्वथासर्वप्रकारेणछिन्नंतेदर्पश्चमयानिहितः ॥१५॥ एवंकरणेनकिंतेजातंतत्राहः ।

उपास्यमानांघोराभीराक्षसीभिरदूरतः ॥ उपसृत्यततःसीतांप्रहर्षनामकीर्त्तयन् ॥१३॥ इदंचवचनंधृष्टमुवाचजनकात्मजां ॥ सांत्व्यमानामृयाभद्रेयमाश्रित्यविमन्यसे ॥१४॥ खरहंतासतेभर्त्ताराघवःसमरेहतः ॥ छिन्नंतेसर्वथामूलंदर्पश्चनिहतोमया ॥१५॥ व्यसनेनात्मनःसीतेममभार्याभविष्यसि ॥ विसृजेतांमतिंमूढे किंमृतेनकरिष्यसि ॥१६॥ भवस्वभद्रेभार्याणांसर्वासामीश्वरीमम अल्पपुण्येनिवृत्तार्थेमूढेपंडितमानिनि ॥ शृणुभर्तृवधंसीतेघोरंवृत्रवधंयथा ॥१७॥ समायातःसमुद्रांतंहंतुंमांकिलराघवः ॥ वानरेंद्रप्रणीतेनबलेनमहतावृतः ॥१८॥ ॥ ॥

आत्मनस्तवव्यसनेनममभार्याभविष्यसिगत्यंतराभावात्स्वयमेवेतिशेषः एनांमतिंरामविषयांमतिं ॥१६॥ भवस्वभवेत्यर्थः निवृत्तार्थोनिवृत्तोरामरूपोर्थोयस्यास्तादृशि ॥१७॥ कथमिदंत्वयासाधितमितिचेदुपायेनेत्याहशृण्विति ॥१७॥ प्रणीतेनआनीतेन ॥१८॥

३९॥४०॥४१॥ शिरस्तत्प्रियदर्शनं॰ रामशिरोवत्प्रियदर्शनमित्यर्थः अंतरधीयत अपागच्छत्॰ स्त्रीगोष्ठ्यां
स्थातुमयुक्तत्वधियेतिभावः॥४२॥ चिक्षेप आचकर्ष॥४३॥४४॥ स विद्युज्जिह्वेनेति छंदोवशात्तकार

विद्युज्जिह्वस्तदा गत्वा शिरस्तत्सशरासनं॥ प्रणामं शिरसा कृत्वा रावणस्याग्रतः स्थितः॥३९॥ तम
ब्रवीत्ततो राजा रावणो राक्षसं स्थितं॥ विद्युज्जिह्वं महाजिह्वं समीपपरिवर्त्तिनं॥४०॥ अग्रतः कु
रु सीतायाः शीघ्रं दाशरथेः शिरः॥ अवस्थां पश्चिमां भर्त्तुः कृपणा साधु पश्यतु॥४१॥ एवमुक्तं तु त
द्रक्षः शिरस्तत्प्रियदर्शनं॥ उपनिक्षिप्य सीतायाः क्षिप्रमंतरधीयत॥४२॥ रावणश्चापि चिक्षेप भा
स्वरं कार्मुकं महत्॥ त्रिषु लोकेषु विख्यातं रामस्यैतदिति ब्रुवन्॥४३॥ इदं तत्तव रामस्य कार्मु
कं ज्यासमावृतं॥ इह प्रहस्तेनानीतं हत्वा निशि मानुषं॥४४॥ स विद्युज्जिह्वेन सहैव तच्छि
रो धनुश्च भूमौ विनिकीर्यमाणः॥ विदेहराजस्य सुतां यशस्विनीं ततो ब्रवीत्तां भव मे वशानु
गा॥४५॥ इत्यार्षे श्रीरामायणे युद्धकांडे एकत्रिंशः सर्गः॥३१॥ सा सीता तच्छिरो दृष्ट्वा तच्च का
र्मुकमुत्तमं सुग्रीवप्रतिसंसर्गमाख्यातं च हनूमता॥१॥

लोपः विनिकीर्यमाणः विकिरन्नित्यर्थः
४५॥ क॰ २९॥ इति श्रीरामाभिरामे श्रीरा॰ रा॰ ति॰ यु॰ एकत्रिंशः सर्गः॥३१॥ सेति॰ हनुमताख्या
तं सुग्रीवप्रतिसंसर्गं सुग्रीवरामसंवंधं रावणकल्पितवानरवधस्योपपादकं स्मत्वेति शेषः॥१॥

२८॥२९॥कुमुदस्तुमहातेजानिकूजन्सायकैर्हतइतिपांक्तःपाठः॥३०॥राक्षसैरासाद्यप्राप्यछिन्नः॥३१॥३२

मैंदश्चद्विविदश्चोभोनौवानरवरर्षभौ॥निश्वसंतौरुदंतौचरुधिरेणापरीवृतौ॥२८॥असिना
व्यायतौछिन्नौमध्येत्वरिनिषूदनौ॥अनुश्वनतिमेदिन्यांपनसःपनसोयथा॥२९॥नाराचैर्बहु
भिश्छिन्नःशेतेदर्यांदरीमुखः॥कुमुदस्तुमहातेजानिःकूजन्सायकैर्हतः॥३०॥अंगदोबहु
भिःछिन्नोशरैरासाद्यराक्षसैः॥पतितोरुधिरोद्गारीक्षितौनिपतितोंगदः॥३१॥हरयोमथि
तानागैरथजालैस्तथापरे॥शयानामृदितास्तत्रवायुवेगैरिवांबुदाः॥३२॥प्रसृताश्चपरेत्र
स्ताहन्यमानाजघन्यतः॥अनुद्रुतास्तुरक्षोभिःसिंहैरिवमहाद्विपाः॥३३॥सागरेपतिताःके
चित्केचिद्गगनमाश्रिताः॥ऋक्षावृक्षानुपारूढावानरैर्व्यतिमिश्रिताः॥३४॥सागरस्यचतीरे
षुशैलेषुचवनेषुच॥पिंगलास्तेविरूपाक्षैराक्षसैर्बहवोहताः॥३५॥एवंतवहतोभर्त्तासस
न्योममसेनया॥क्षतजार्द्ररजोध्वस्तमिदंचास्याहृतंशिरः॥३६॥ततःपरमदुर्द्धर्षोरावणोरा
क्षसेश्वरः॥सीतायामुपशृण्वंत्यांराक्षसीमिदमब्रवी॥३७॥राक्षसंक्रूरकर्माणंविद्यु
जिह्वंसमानय॥येनतद्राघवशिरःसंग्रामात्स्वयमाहृतं॥३८॥ ॥ ॥

जघन्यतोनुद्रुताइत्यन्वयः॥३३॥३४॥३५॥३६॥राक्षसीसीतासमीपवर्त्तिनी॥३७॥३८॥ ॥

महद्दुःखंप्रपन्नायाममममरणमेववरमितिशेषः हियतोयस्त्वंमांत्रातुमुद्यतःसोपित्वंविनिपातितेनारौ
त्नसैरितिशेषः॥१०॥सावत्सलाममश्वश्रूस्त्वयापुत्रेणारात्तसहृतेनवत्सलाधेनुरिवविवत्साकृ
ता॥११॥दैवज्ञैर्वसिष्ठादिभिरितिशेषः यतोल्पायुरसि अनन्तस्तेषांवचनंमिथ्या॥१२॥अथवेति अ
थेतिप्रत्यक्षेप्राज्ञस्यसतस्तवापिप्रज्ञानश्यत्पथनाशंप्राप्ता किं।येनप्रज्ञादौर्बल्यात्सुप्तोऽरिवशं

महद्दुःखंप्रपन्नायाममग्नायाःशोकसागरे॥योहिमामुद्यतस्त्रातुंसोपित्वंविनिपातितः॥
॥१०॥साश्वश्रूर्ममकौशल्यात्वयापुत्रेणराघव॥वत्सलातेयथाधेनुर्विवत्सावत्सलाकृता॥११॥
उद्दिष्टंदीर्घमायुस्तेदैवज्ञैरपिराघव॥अनृतंवचनंतेषांअल्पायुरसिराघव॥१२॥अ
थवानश्यतिप्रज्ञाप्राज्ञस्यापिसतस्तव॥पचत्येनंतथाकालोभूतानांप्रभवोह्ययं॥१३॥अ
दृष्टंमृत्युमापन्नःकस्मात्त्वंनयशास्त्रवित्॥व्यसनानामुपायज्ञःकुशलोह्यसिवर्जने॥१४॥

प्राप्तइतिशेषः वा अथवा हियतःकालोभूतानांप्रभवः॥प्रभवायहेतुस्तस्मादयमेनंप्राणिनंत
थापचतितत्तत्कर्मफलंप्रापयति कालईश्वरः॥अतःप्राज्ञोपित्वमप्राज्ञोजातइतिभावः॥१३॥हि
यतस्त्वंव्यसनानांवर्जनेउपायज्ञःतदनुष्ठानेकुशलश्चासितस्मात्कस्माद्धेतोरदृष्टंपूर्वमज्ञा
नंमृत्युमापन्नःअत्रहेतुंनपश्यामीतिभावः॥१४॥

भर्तुस्तत्सदृशमितिविभक्तिपरिणामेनसर्वत्रान्वेतिकेशांतदेशं·ललाटं·तेकेशांतवर्त्तिनं॥२॥ अभिज्ञानैः·लक्षणैः॥३॥४॥ आर्येणरामेणेत्यन्वयः चीरवसनंदत्वामयासहप्रव्राजितइत्यन्वयः॥५॥६॥ समुपास्थायस्व

नयनेमुखवर्णांश्चभर्त्तुस्तत्सदृशंमुखं॥ केशान्केशांतदेशंचतंचचूडामणिंशुभं॥२॥ एतैःसर्वैरभिज्ञानैरभिज्ञायसुदुःखिता॥ विजगर्हेत्रकैकेयींक्रोशंतीकुररीयथा॥३॥ स्वकामाभवकैकेयिहृतोयंकुलनंदनः॥ कुलमुत्सादितंसर्वंत्वयाकलहशीलया॥४॥ आर्येणकिंनुकैकेय्याःकृतंरामेणविप्रियं॥ यन्मयाचीरवसनंदत्वाप्रव्राजितोवनं॥५॥ एवमुक्त्वातुवैदेहीवेपमानातपस्विनी॥ जगामजगतीवालाछिन्नातुकदलीयथा॥६॥ सामुहूर्त्तात्समाश्वास्यपरिलभ्याथचेतनां॥ तच्छिरःसमुपास्थायविललापायतेक्षणा॥७॥ हाहतास्मिमहावाहोवीरव्रतमनुव्रत॥ इमांतेपश्चिमावस्थांगतास्मिविधवाकृता॥८॥ प्रथमंमरणंनार्याभर्तुर्वैगुण्यमुच्यते॥ सुवृत्तःसाधुवृत्तायाःसंवृत्तस्त्वंममाग्रतः॥९॥

समीपेस्थापयित्वासमुपाघ्रायेति पाठांतरं॥७॥ वीरव्रतंसुदृढंपितृवाक्यपालनव्रतं·तेनवनाशादिमांपश्चिमावस्थांगतास्मि·तामवस्थामाह·विधवाकृतेति॥८॥ नार्याःभर्त्तुर्मरणंप्रथमंवैगुण्यं·मुख्योनर्थः यत्तुभर्त्तुःप्रथमंमरणंनार्यावैगुण्यंदुश्चरित्रमूलमित्यर्थस्तत्र·एवंहिसर्वविधवानामसतीत्वापत्तेः संवृत्तःअतीतः॥९॥

२२।कल्याणिमंगलैःरुचिरंयत्वच्छरीरंतदेनावत्कालपर्यंतंमय्येवपरिषक्तंतत्त्वशरीरमद्यक्रव्यादैर्विपरि
कृष्यते॥२३॥अग्निहोत्रेणाग्निनासंस्कारंकेनहेतुनाननलप्स्यसेनलभसे॥२४॥प्रव्रज्यांप्रवास
मुपपन्नानांत्रयाणांअस्माकंमध्येएकंलक्ष्मणमित्यन्वयः॥परिप्रेक्षतिइक्षतीत्यर्थः॥२५॥मित्रवत्सस्य

कस्मान्मामपहायत्वंगतोगतिमतांवर॥अस्माल्लोकादमुंलोकंत्यक्त्वामामिहदुःखितां॥२२॥
कल्याणैरुचिरंगात्रंपरिषक्तंमयैवतु॥क्रव्यादैस्तच्छरीरंतेनूनंविपरिकृष्यते॥२३॥अग्निष्टोमा
दिभिर्यज्ञैरिष्टवानाप्तदक्षिणैः॥अग्निहोत्रेणसंस्कारंकेनत्वंनतुलप्स्यसे॥२४॥प्रव्रज्यामु
पपन्नानांत्रयाणामेकमागतं॥परिप्रेक्षतिकौशल्यालक्ष्मणंशोकलालसा॥२५॥सतस्याःपरि
पृच्छंत्यावधंमित्रबलस्यते॥नवचाख्यास्यतेनूनंनिशायांराक्षसैर्वधं॥२६॥सात्वांसुप्तंहतं।
ज्ञात्वामांचरक्षोगृहंगतां॥हृदयेनावदीर्णेननभविष्यतिराघव॥२७॥ममहेतोरनार्याया
अनघःपार्थिवात्मजः॥रामःसागरमुत्तीर्यवीर्यवान्गोष्पदेहतः॥२८॥अहंदाशरथेनोढा
मोहात्स्वकुलपांसनी॥आर्यपुत्रस्यरामस्यभार्यामृत्युरजायत॥२९॥

वानरबलस्य॥२६॥अवदी
र्णेन·विदीर्णेनोपलक्षितामतीनूनंनभविष्यतिम्रियेतेत्यर्थः॥२७॥सागरमुत्तीर्यगोष्पदेहतस्तल्लंघनाश
क्तेतियालोकवार्त्तानतुल्यमिदंजानमित्यर्थः॥२८॥दाशरथेन·दशरथपुत्रेणआणार्षःमृत्युरजायतमृत्युरूपाजाता॥२९॥

मयाकालरात्र्येत्यन्वयः रौद्रत्वादिविशिष्टया मयाकालरात्र्या संपरिष्वज्य आछिद्य बलात्कृत्य नयात्वंहृतः यथा नष्ट इति भावः॥१५॥ मांविहाय प्रियांनारीमिव पृथिवीमालिंग्य शेषे॥१६॥ मया सह तत्त्वयार्चितं मत्प्रियं यत्ते धनुरिदमेतादृशं जातमिति शेषः॥१७॥ सर्वैःपितृभिःसार्धंस्थितेन दशरथेन स्वर्गे त्वं समागत इत्यन्वयः

तथा त्वं संपरिष्वज्य रौद्रयातिनृशंसया॥ कालरात्र्या मयाछिद्य हृतः कमललोचनः॥१५॥ इह शे
षे महाबाहो मां विहाय तपस्विनीं॥ प्रियामिव यथा नारीं पृथिवीं पुरुषर्षभ॥१६॥ अर्चितं सततं य
त्नाद्गंधमाल्यैर्मया तव॥ इदं ते मत्प्रियं वीर धनुः कांचनभूषितं॥१७॥ पित्रा दशरथेन त्वं श्वशुरेण म
मानघ॥ सर्वैश्च पितृभिः सार्धं नूनं स्वर्गे समागतः॥१८॥ दिवि नक्षत्रभूतंच महत्कर्म कृतं तथा॥ पुण्यं
राजर्षिवंशं त्वमात्मनः समुपेक्षसे॥१९॥ किं मां न प्रेक्षसे राजन् किं वा न प्रतिभाषसे॥ बालां बालेन सं
प्राप्तां भार्यां मां सहचारिणीं॥२०॥ संश्रुतं गृह्णता पाणिं चरिष्यामीति यत्त्वया॥ स्मर तन्माम काकुत्स्थ न
य मामपि दुःखितां॥२१॥

॥१८॥ दिविनक्षत्रभूतं॥ त्रिशंकोस्तथात्वात्कृत्रिमोपायेन वंशासतथा त्वं मह
तापितृवचःपालनरूपेण कर्मणा कृतं तथा पुण्यमासाद्य आत्मनः प्रियं पुण्यं राजर्षिवंशं समुपेक्षसे त्य
क्त्वा गच्छसे तदन्याय्यमित्यर्थः॥१९॥२०॥ पाणिं गृह्णता त्वया त्वया सह चरिष्यामि धर्मादिकमिति य
त्संश्रुतं प्रतिज्ञातं तत्स्मर अतो दुःखितां मामपि नय॥२१॥ ॥ श्र ॥

नन्वनवसरे कथं प्रस्थापितवान्तत्राह नूनमिति· राजभावात्· राजकार्याभिप्रायज्ञानाद्धेतोरनवसरप्राप्ता
वपिक्षमान्वितमहाराजन्नूनंनिश्चितंआत्ययिकंअत्यावश्यकंकिंचित्कार्यमस्तितस्मादागत्यतेषांत्वंदर्शन
कुरु·क्षमान्वितेनेतिपांक्तःपाठः॥३७॥मंत्रिणांदर्शनंउद्दिश्येतिशेषः॥३८॥सर्वंसमर्थ्यैव·गत्वादुष्टमंत्रिभि

नूनमस्तिमहाराजराजभावात्क्षमान्वित॥किंचिदात्ययिकंकार्यंतेषांत्वंदर्शनंकुरु॥३७॥एतच्छ्रु
त्वादशग्रीवोराक्षसप्रतिवेदितं॥अशोकवनिकांत्यक्त्वामंत्रिणांदर्शनंययौ॥३८॥सतुसर्वंस
मर्थ्यैवमंत्रिभिःकृत्यमात्मनः॥सभांप्रविश्यविदधेविदित्वारामविक्रमं॥३९॥अंतर्धानंतु
तच्छीर्षंतच्चकार्मुकमुत्तमं॥जगामरावणस्यैवनिर्याणसमनंतरं॥४०॥राक्षसेंद्रस्तुतैःसार्द्धंमं
त्रिभिर्भीमविक्रमैः॥समर्थयामासतदारामकार्यविनिश्चयं॥४१॥अविदूरस्थितान्सर्वान्बला
ध्यक्षान्हितैषिणः॥अब्रवीत्कालसदृशोरावणोराक्षसाधिपः॥४२॥शीघ्रंभेरीनिनादेनस्फुटंको
णाहतेनमे॥समानयध्वंसैन्यानिवक्तव्यंचनकारणं॥४३॥

रेकांतेसर्वंकृत्यंविचार्येत्यर्थः
सभांप्रविश्यविदधेएकांतेकृतमंत्रोचितव्यापारमितिशेषः॥३९॥निर्याणसमनंतरमेवेतियोज
नाःमायामयत्वादितिभावः॥४०॥रामकार्यविनिश्चयंरामविषयंस्वकर्त्तव्यनिश्चयं॥४१॥४२॥स्फु
टंकोणाहतेन·उल्वणवादेनदंडाहतेनकारणंनवक्तव्यमिति·राजाआहूयतेइत्येतावदेववक्तव्यं·

नवतितमःसर्गः॥

अमांजातिंअन्यस्मिन्जन्मनि·उत्तमंदानं·कन्यादानं गोभूहिरण्यादिदानंचवारितंनकृतंसर्वातिथेः सर्वातिथिप्रियस्य· इहकालेदेशेच॥३०॥समानययोजय॥३१॥३२॥३३॥तत्रअशोकवनिकायांराक्षसः

नूनमार्यमयाऽन्यांतुवारितंदानमुत्तमं॥याहमद्यैवशोचामिभार्यासर्वातिथेरिह॥३०॥साधुघातयमांक्षिप्रंरामस्योपरिरावण॥समानयपतिंपत्न्याकुरुकल्याणमुत्तमं॥३१॥शिरसामेशिरश्चास्यकायंकायेनयोजय॥रावणानुगमिष्यामिगतिंभर्त्तुर्महात्मनः॥३२॥इतीवदुःखसंतप्ताविललापायतेक्षणा॥भर्त्तुःशिरोधनुश्चैवददर्शजनकात्मजा॥३३॥एवंलालप्यमानायांसीतायांतत्रराक्षसः॥अभिचक्रामभर्त्तारंमनीकस्थःकृतांजलिः॥३४॥विजयस्वार्यपुत्रेतिसोभिवाद्यप्रसाद्यच॥न्यवेदयदनुप्राप्तंप्रहस्तंवाहिनीपतिं॥३५॥अमात्यैःसहितःसर्वैःप्रहस्तस्त्वामुपस्थितः॥तेनदर्शनकामेनअहंप्रस्थापितःप्रभो॥३६॥

प्रहस्तप्रेषितःअनीकस्थःद्वाररक्षीराक्षसःभर्त्तारंस्वामिनमभिचक्रामाभिक्रम्यार्यपुत्रविजयस्वेतिप्रसाद्याभिवाद्यचकृतांजलिःसन्नुपस्थितःआर्यपुत्रशब्दोयद्यपिस्त्रीभिर्भर्त्तरिप्रयुज्यतेप्रायेणतथापिप्रजामात्रेसामान्यतःप्रयोगोपिबोध्यः॥३४॥३५॥३६॥ श्र

उपावृत्य·श्रमनाशनार्थंलुठित्वा·ध्वस्तांपीडितां·अध्वश्रमेणशोकेनच॥४॥रावणेनयत्त्वमुक्तायद्धरावणंप्र
तिस्वयंत्वयोक्तं·साधुपातयमांक्षिप्रमित्यादितत्सर्वंमयापरिश्रुतंननुविभीषणस्यविरुद्धकोटौग
तत्वात्तत्पक्षात्त्वयारावणसन्निधौस्थित्वाकथंश्रुतंत्वंतत्राह·लीनयेतिगहनेऽशोकवनमध्येपू

सादर्दशसखीसीतांसरमानष्टचेतनां॥उपावृत्योत्थितांध्वस्तांवडवामिवपांसुषु॥४॥तांसमा
श्वासयामाससखीस्नेहेनसुव्रतां॥उक्तायद्रावणेनत्वंप्रत्युक्तश्चस्वयंत्वया॥सखीस्नेहेन
तेभीरुमयासर्वंप्रतिश्रुतं॥५॥लीनयागहनेशून्येभयमुत्सृज्यरावणात्॥तवहेतोर्विशा-
लाक्षिनहिमेरावणाद्भयं॥६॥ससंभ्रांतश्चनिष्क्रांतोयत्कृतेराक्षसेश्वरः॥तत्रमेविदितंसर्वम
भिनिष्क्रम्यमैथिली॥७॥

र्वमस्यमायाकृतवृत्तांतंश्रुतवत्यास्तवद्रक्षणरूपकार्यार्थमागत्यलीनयागुप्तंस्थितयारावणाद्भय
मुत्सृज्यस्थितयासर्वंश्रुतं·नहिमेरावणाद्भयंतेनैवतवरक्षणेनियुक्तत्वात्·तज्जातित्वाच्चतनो
न्मैवैषासरमेत्यन्ये॥५॥६॥सरावणोयत्कृतेयन्निमित्तंसंभ्रांतोनिष्क्रांतःतदपित्वमभिनिष्क्रम्यबहि
र्गत्वामयाविदितंज्ञातं॥७॥

अत्रसीताप्रलापःस्वस्यमानुषधर्मप्रकटनायेतिबोध्यं ॥४४॥ विभुमानः क० ३० ॥ इतिश्रीरामाभिरामेश्रीरा
मीयेरामायणतिलकेयुद्धकांडेद्वात्रिंशःसर्गः ॥३२॥ सीतांत्विति विभीषणपत्नीयंसरमा· सातुसीता
यांभक्तिमती· साहिरावणेनज्ञातसात्विकभावाऽतिभर्त्सनेननाशमाशंक्यसीताश्वासनार्थंसंदिष्टे

ततस्तथेतिप्रतिगृह्यतद्वचस्तदैवदूताःसहसामहद्बलं । समानयंश्चैवसमागतंचन्यवे
दयन्भर्तरियुद्धकांक्षिणि ॥४७॥ इत्यार्षेश्रीरामायणेयुद्धकांडेद्वात्रिंशःसर्गः ॥३२॥ सीतां
तुमोहितांदृष्ट्वासरमानामराक्षसी । आससादाथवैदेहींप्रियांप्रणयिनीसखी ॥१॥ मो
हितांराक्षसेंद्रेणसीतांपरमदुःखितां । आश्वासयामासतदासरमामृदुभाषिणी ॥२॥ सा
हितत्रकृतामित्रंसीतयारक्ष्यमाणया । रक्षंतीरावणादिष्टासानुक्रोशादृढव्रता ॥३॥

तिबोध्यं प्रणयिनी· स्नेहवतीसखीसरमेत्यन्वयः ॥१॥२॥ ननुराक्षसीकथंसखीकथंचाश्वासयेदतआह·
साहीति· तत्रअशोकवनिकायां· रावणादिष्टा· अत्रबीजमुक्तं· अतएवराक्षसीभ्योनित्यंरक्षंती· सरमार
क्षमाणयासीतयाआत्मनःस्वस्याःमित्रंकृतासखीसंपादिता· तत्रयोग्यतामाह· सानुक्रोशेत्यादि
दुःखितेषुसदया· दृढव्रताप्राणैरपिमयेयंरक्षणीयेतिदृढप्रतिज्ञा ॥३॥ अ

दृष्टोमेमयादृष्टइत्यर्थःस्वगृहवत्पूर्ध्वगत्यमारुत्येतिशेषःखेचरीत्वाद्बहिर्निर्विर्गत्येतिशेषोवा साग
रांतस्थैःसागरतीरस्थैःसहितैःसंगतैःबलैःसहस्वमहिम्नारक्षितास्तिष्ठति॥१६॥अथरावणस्य

दृष्टोमेपरिपूर्णार्थःकाकुत्स्थःसहलक्ष्मणः॥साहितैःसागरांतस्थैर्बलैस्तिष्ठतिरक्षितः॥१६॥
अनेनप्रेषितायेचराक्षसालघुविक्रमाः॥राघवस्तीर्णइत्येवंप्रवृत्तिस्तैरिहाहृता॥१७॥सतांश्रु
त्वाविशालाक्षिप्रवृत्तिंराक्षसाधिपः॥एषमंत्रयतेसर्वैःसचिवैःसहरावणः॥१८॥इतिब्रुवाणा
सरमाराक्षसीसीतयासह॥सर्वोद्योगेनसैन्यानांशब्दंशुश्रावभैरवं॥१९॥दंडनिर्घातवादि
न्याश्रुत्वाभेर्यामहास्वनं॥उवाचसरमासीतामिदंमधुरभाषिणी॥२०॥सन्नाहजननीत्ये
षाभैरवाभीरुभेरिका॥भेरीनादंचगंभीरंश्रृणुतोयदनिस्वनं॥२१॥कल्प्यंतेमत्तमातंगायु
ज्यंतेरथवाजिनः॥दृश्यंतेतुरगारूढाःप्रासहस्ताःसहस्रशः॥२२॥तत्रतत्रचसंनद्धाःसंप
तंतिसहस्रशः॥आपूर्यंतेराजमार्गाःसैन्यैरद्भुतदर्शनैः॥२३॥

निष्क्रमहेतुमाह अनेनेतिप्रे
षितास्तैराघवस्तीर्णइतिप्रवृत्तिर्वार्त्ताइहाहृता॥१७॥तांप्रवृत्तिंराघवस्यसबलोत्तरणप्रवृत्तिंश्रु
त्वानिर्गत्येतिशेषःमंत्रयतेविचारयति॥१८॥शब्दंसिंहनादं॥१९॥२०॥संनाहोयुद्धायसंनहनं
भेरीनादंश्रृणु रामबलेनयुद्धायसंनाहःकृमितिशेषः॥२१॥युज्यंतेरथेनेतिशेषः॥२२॥२३॥

तस्यपश्चादपिकथनेबाधकाभावेनादौरामममोहंनिवर्त्तयितुंनशक्यमिति- सौप्तिकंसुप्तिकालयुद्धंतत्रहेतु
र्विदितात्मनः जितनिद्रालस्यादिदोषचित्तस्येत्यर्थः पुरुषव्याघ्रेसर्वातिशायिशौर्यवति· अतएवतस्मि

नशक्यंसौप्तिकंकर्त्तुंरामस्यविदितात्मनः। वधश्चपुरुषव्याघ्रेतस्मिन्नैवोपपद्यते॥८॥ नत्वे
वंवानराहंतुंशक्याःपादपयोधिनः। सुरादेवर्षभेणेवरामेणहिसुरक्षिताः॥९॥ दीर्घवृत्तभुजः
श्रीमान्महोरस्कःप्रतापवान्। धन्वीसन्नहनोपेतोधर्मात्माभुविविश्रुतः॥१०॥ विक्रांतोरक्षिता
नित्यमात्मनश्चपरस्यच। लक्ष्मणेनसहभ्रात्राकुलीनोनयशास्त्रवित्॥११॥ हंतापरबलौघा
नामचिंत्यबलपौरुषः। नहतोराघवःश्रीमान्सीतेशत्रुनिबर्हणः॥१२॥ अयुक्तबुद्धिकृत्येन
सर्वभूतविरोधिना। इयंप्रयुक्तारौद्रेणमायामायाविनात्वयि॥१३॥ शोकस्तेविगतःसर्वः
कल्याणंत्वामुपस्थितं। ध्रुवंत्वांभजतेलक्ष्मीःप्रियंतेभवतिशृणु॥१४॥ उत्तीर्यसागरंरामः
सहवानरसेनया। सन्निविष्टःसमुद्रस्यतीरमासाद्यदक्षिणं॥१५॥ ॥ ॥

न्वधोनोपपद्येत॥८॥ सर्ववानरहननमप्यशक्यमित्याहनत्वेवमिति॥९॥१०॥११॥१२॥ ननुप्र
त्यक्षतोहतेकथंनहतस्तत्राह· अयुक्तेति· अयुक्ताअनुचिताबुद्धिःकृत्यंचयस्यतेनरौद्रेणरा
वणेन॥१३॥ शोकोविगतःकल्याणंचोपस्थितंकुतस्तत्राहहेभवतितेप्रियंप्रियवचनं॥१४॥१५

रक्तःसुविक्रमिष्यतिच·यथाशत्रुघ्नोवासवोविष्णुनोपेंद्रेणसहयथाशत्रुषुविक्रांतवांस्तथातेभ

विक्रमिष्यतिरक्षःसुभर्त्तातेसहलक्ष्मणः॥यथाशत्रुषुशत्रुघ्नोविष्णुनासहवासवः॥२९॥
आगतस्यहिरामस्यक्षिप्रमंकगतांसतीं॥अहंद्रक्ष्यामिसिद्धार्थांत्वांशत्रौविनिपातिते॥३०॥
अस्राण्यानंदजानित्वंवर्त्तयिष्यसिजानकि॥समागम्यपरिष्वक्तातस्योरसिमहोरसः॥३१॥
अचिरान्मोक्ष्यतेसीतेदेवितेजघनंगतां॥धृतामेकांबहून्मासान्वेणींरामोमहाबलः॥३२॥
तस्यदृष्ट्वामुखंदेविपूर्णचंद्रमिवोदितं॥मोक्ष्यसेशोकजंवारिनिर्मोकमिवपन्नगी॥३३॥
रावणंसमरेहत्वानचिरादेवमैथिलि॥त्वयासमग्रःप्रिययासुखार्होलप्स्यतेसुखं॥३४॥
सभाजितात्वंरामेणमोदिष्यसिमहात्मना॥सुवर्षेणसमायुक्तायथासस्येनमेदिनी॥३५॥

र्त्ताविक्रमिष्यतीत्यन्वयः॥२९॥३०॥रस्योरसिअस्राणिवर्तयिष्यसीत्यन्वयः॥३१॥जघनंगतांज
घनदेशंप्राप्तांवेणीमित्यन्वयः॥३२॥३३॥समग्रःसहितः॥३४॥३५॥ अ

प्रसन्नानांशाणोल्लेखेननिर्मलानांचर्मफलकंचर्मकवचं॥२४॥२५॥नानावर्णैर्नीलपीतादिभिःसमु-
त्थितांप्रभांविसृजतांचर्मादीनांप्रभांपश्येत्यावृत्यान्वयः॥२६॥एतदुत्तरंवनंनिर्दहतइत्यादिश्लोकद्व-
यंप्रक्षिप्तमितिकतकः॥संभ्रमइति।एषसंभ्रमोरक्षसामेवानोरक्षसांतुमुल्लंलोमहर्षणं भयमा

वेगवद्भिर्नदद्भिश्चतोयौघैरिवसागरः॥शस्त्राणांचप्रसन्नानांचर्मणांवर्मणांतथा॥२४॥
रथवाजिगजानांचराक्षसेंद्रानुयायिनां॥संभ्रमोरक्षसामेषहृषितानांतरस्विनां॥२५॥प्रभां
विसृजतांपश्यनानावर्णांसमुत्थितां॥२६॥वनंनिर्दहतोघर्मेयथारूपंविभावसोः॥घंटा
नांशृणुनिर्घोषंरथानांनेमिनिस्वनं॥हयानांहेषमाणानांशृणुतूर्यध्वनिंतथा॥उद्यतायु
धहस्तानांराक्षसेंद्रानुयायिनां॥संभ्रमोरक्षसामेषतुमुलंलोमहर्षणं॥श्रीस्त्वांभजति
शोकघ्नीरक्षसांभयमागतं॥२७॥रामःकमलपत्राक्षोदैत्यानामिववासवः॥अवजित्यजित
क्रोधस्त्वमचिंत्यपराक्रमः॥रावणंसमरेहत्वाभर्त्तात्वाधिगमिष्यति॥२८॥ ॥

गतंविद्धि।अर्थात्शोकघ्नीश्रीःस्त्वांभजतिइतिविद्धि॥२७॥अथदैत्यानांनिकरस्थांलक्ष्मींयथा
वासवोन्हनवानेवंरामोरावणंसमरेहत्वातवभर्त्तात्वामवजित्यशत्रुगृहादवमुच्याधिगमिष्यति२८॥

नांसरमांइत्यन्वयः एवंब्रुवाणांदूतत्वेच्छुं॰ पूर्वशोकाभिपन्नया॰ आश्वासनात्पूर्वंजातेनशोकेनेषद्युक्त
या॥५॥ अथसीतार्पणाख्यायाइवास्याअपिरामसमीपगमनमनुचितमितिविचार्यतत्सामर्थ्या॰
भ्त्ता द्यापूर्वंतामुचितकल्पेनियोजयति॰ समर्थेति॰ अवगच्छाद्यकर्त्तव्यमितिपांक्तःपाठः इतिक
तकः॰ अंतरशब्दस्तादर्थेमदंतरेमदर्थंयत्कर्त्तव्यंत्वयाकर्त्तुंयोग्यंतादृशंकर्त्तव्यंकृत्यमद्योच्यमा

एवंब्रुवाणांतांसीतासरमामिदमब्रवीत्॥मधुरंश्लक्ष्णयावाचापूर्वशोकाभिपन्नया॥५॥
समर्थागगनंगंतुमपिचत्वंरसातलं॥अवगच्छाद्यकर्त्तव्यंकर्त्तव्यंतेमदंतरे॥६॥मत्प्रियं
यदिकर्त्तव्यंयदिबुद्धिःस्थिरातव॥ज्ञातुमिच्छामितंगत्वाकिंकरोतीतिरावणः॥७॥स
हिमायाबलःक्रूरोरावणःशत्रुरावणः॥मांमोहयतिदुष्टात्मापीतमात्रेववारुणी॥८॥
तर्जापयतिमांनित्यंभर्त्सापयतिचासकृत्॥राक्षसीभिःसुघोराभिर्यामांरक्षतिनित्यशः॥९॥

नमवगच्छ॥६॥मत्प्रियंकर्त्तव्यमितियदितवबुद्धिःस्थिरास्तितदोच्यतइतिशेषः स्थिरैवनिः
शंकंब्रूहीत्युक्त्वाचाह॥ज्ञातुमितिइतोगत्वारावणःकिंकरोतीतिरावणंज्ञातुमिच्छामि॥७॥पी
तमात्रोसवःपीतां॥८॥तर्जापयतीति॰ तर्जभर्त्सौभ्यांतत्करोतीतिणिचियुगार्षः अवाचिकीभीषि
कातर्जनं॰ वाचिकीतुसाभर्त्सनंराक्षसीभिरितिद्वारकथनं॰ रक्षति॰ अवरुध्यते॥९॥

गिरिवरंमेरुमभितोविवर्त्तमानः परिवर्त्तमानोहयइवयोमंडलंमंडलाकारगतिंआशुकरोतितंदि
वसकरंतेकुलदैवतंशरणमभ्युपैहि· हियतोयंप्रजानांसुखदुःखहान्योरितिशेषः प्रभवः॥३६॥अच
लमानः क०॥३१॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेत्रयस्त्रिंशः सर्गः॥३३॥

गिरिवरमभितोविवर्त्तमानोहयइवमंडलमाशुयः करोति॥तमिहशरणमभ्युपैहिदे
विदिवसकरंप्रभवोह्ययंप्रजानां॥३६॥इत्यार्षेश्रीरामायणेयुद्धकांडेत्रयस्त्रिंशः सर्गः॥३३॥
अथतांजातसंतापांतेनवाक्येनमोहितां॥सरमाह्लादयामासमहींदग्धामिवांभसा॥१॥
ततस्तस्याहितंसख्याश्चिकीर्षंतीसखीवचः॥उवाचकालेकालज्ञास्मितपूर्वाभिभाषि
णी॥२॥उत्सहेयमहंगत्वात्वद्वाक्यमसितेक्षणे॥निवेद्यकुशलंरामेप्रतिच्छन्नानिवर्त्तितुं॥३॥
नहिमेक्रममाणायानिरालंबेविहायसि॥समर्थागतिमन्वेतुंपवनोगरुडोपिवा॥४॥

तेनवाक्येनरावणवाक्येन· अंभसामेघपंक्तिरिवेतिशेषः॥१॥चिकीर्षंती· कर्त्तुमिच्छंतीसखीसरमा
वचउवाचेत्यन्वयः॥२॥अहंप्रतिच्छन्नागत्वाकुशलंकुशलावेदकंत्वद्वाक्यंरामेनिवेद्यपुनःप्र
तिच्छन्नानिवर्त्तितुमुत्सहेयमित्युवाच॥३॥स्वस्यास्तथासामर्थ्यंदर्शयति· नहीति॥४॥

१७॥१८॥समंत्रिणोरावणस्यसर्वंकथितंपरस्परालापंआचष्ट॥१९॥जनन्यामात्राअतिस्निग्धेनवृद्धेनचराव
णोवृहद्वचःसर्वथाहितत्वाद्वचसोवृहत्वंनदुक्त्वाचोदितःबोधितः॥२०॥तद्वाक्यमाह-दीयतामिति-स
त्कारपूर्वंदीयतामित्यर्थःनिदर्शनंतत्पराक्रमविषयइतिशेषः॥जनस्थानेऽद्भुतंखरादिवधरूपंयत्कृ

तांतुसीतापुनःप्राप्तांसरमांप्रियभाषिणीं॥परिष्वज्यचसुस्निग्धंददौचस्वयमासनं॥१७॥इहासी
नासुखंसर्वमाख्याहिममतत्वतः॥क्रूरस्यनिश्चयंतस्यरावणस्यदुरात्मनः॥१८॥एवमुक्तातुस
रमासीतयावेपमानया॥कथितंसर्वमाचष्टरावणस्यसमंत्रिणः॥१९॥जनन्याराक्षसेंद्रोवैत्वन्मो
क्षार्थंवृहद्वचः॥अतिस्निग्धेनवैदेहिमंत्रिवृद्धेनचोदितः॥२०॥दीयतामभिसत्कृत्यमनुजेंद्रा
यमैथिली॥निदर्शनंतेपर्याप्तंजनस्थानेयदद्भुतं॥२१॥लंघनंचसमुद्रस्यदर्शनंचहनूमतः
वधंचरक्षसांयुद्धेकःकुर्यान्मानुषोयुधि॥२२॥एवंसमंत्रिवृद्धैश्चमात्राचवहुवोधितः॥नत्वामु
त्सहतेमोक्तुमर्थमर्थपरोयथा॥२३॥

तंतदेवपर्याप्तंप्रमाणांतरानपेक्षंनिदर्शनंतत्पराक्रम
स्येत्यर्थः॥२१॥किंचरामानुचरोहनूमानेवसर्वराक्षसजयसमर्थइत्याह-लंघनंचेतिदर्शनं-सी
तायाइतिशेषः॥मानुषःपुरुषः-तस्माद्धनूमान्रामोवा-नवानरोमनुष्योवा-अपितुदेवावतारएवे
तिभावः॥२२॥वहुवोधितोवहुप्रकारंवोधितः-अर्थपरःउत्तरोत्तरमर्थार्जनतत्परःपरमलुब्धइत्यर्थः
॥२३॥

उद्विग्नेति· कथमुद्विग्नेत्यत्राह तद्भयादिति· अशोकवनिकां गताप्यहं तद्भयादुद्विग्नास्मि ॥१०॥ कथा
मद्विमोक्षविषया कथायदिनाम भवेत्· अपिवा तदभावविषया स्यात् अनयोर्यन्निश्चितं· तत्सर्वं मे

उद्विग्नाशंकिताचास्मिन स्वस्थं च मनो मम ॥ तद्भयाच्चाहमुद्विग्ना अशोकवनिकां गता ॥१०॥ यदि
नाम कथा तस्य निश्चितं वापि यद्भवेत् ॥ निवेदयेथाः सर्वं तद्धरो मे स्यादनुग्रहः ॥११॥ सा त्वेवं
ब्रुवतीं सीतां सरमा मृदुभाषिणी ॥ उवाच वचनं तस्याः स्पृशंती बाष्पविक्लवं ॥१२॥ एष ते यद्य
भिप्रायस्तस्माद्गच्छामि जानकि ॥ गत्वा शत्रोरभिप्रायमुपावर्त्तामि मैथिलि ॥१३॥ एवमुक्त्वा
ततो गत्वा समीपं तस्य रक्षसः ॥ शुश्राव कथितं तस्य रावणस्य समंत्रिणः ॥१४॥ सा श्रुत्वा नि
श्चयं तस्य निश्चयज्ञा दुरात्मनः ॥ पुनरेवागमत् क्षिप्रमशोकवनिकां शुभां ॥१५॥ सा प्रविश्य
ततस्तत्र ददर्श जनकात्मजां ॥ प्रतीक्षमाणां स्वामेव भ्रष्टपद्मामिव श्रियं ॥१६॥

निवेदयेथाः तदा मे वरः श्रेष्ठो ऽनुग्रहः स्यात्· एतदनुकूलमेवोत्तरं वक्ष्यति· न त्वामुत्सहते मोक्तुमि
ति ॥११॥ बाष्पविक्लवं च तस्या वदनं स्पृशंती परिमार्जयंती ॥१२॥ उपवर्त्तामि· परावृत्यागच्छामि ॥१३॥
१४॥१५॥ स्वामेव प्रतीक्षमाणां कदाऽऽगमिष्यतीति सरमेति तदागमनं· प्रतीक्षमाणामित्यर्थः ॥१६॥

रामा·यु·
१०२

उपयातिस्म लंकामितिशेषः ॥१॥२॥ आभाष्य आमंत्र्य ॥३॥ रामबलमहं जानामीति सचिवान् स्तवन्नाह जगत्संतापयतीति अगर्हयन्नितिच्छेदः अस्य रामस्य ॥४॥५॥ तूष्णीकानिति अद्य रामविक्रमं विदित्वा

तेन शंखविमिश्रेण भेरीशब्देन नादिना। उपयाति महाबाहू रामः परपुरंजयः ॥१॥ तन्निनादं निशम्याथ रावणो राक्षसेश्वरः। मुहूर्त्तं ध्यानमास्थाय सचिवानभ्युदैक्षत ॥२॥ अथ तान्सचिवांस्तत्र सर्वानाभाष्य रावणः। सभां सन्नादयन्सर्वामित्युवाच महाबलः ॥३॥ जगत्संतापनः क्रूरो गर्हयन्राक्षसेश्वरः। तरणं सागरस्यास्य विक्रमं बलपौरुषं ॥४॥ यदुक्तवंतो रामस्य भवंतस्तन्मया श्रुतं। भवतश्चाप्यहं वेद्मि युद्धे सत्यपराक्रमान् ॥५॥ तूष्णीकानीक्षतोन्योन्यं विदित्वा रामविक्रमं। ततस्तु सुमहाप्राज्ञो माल्यवान्नाम राक्षसः। रावणस्य वचः श्रुत्वा इति मातामहोब्रवीत् ॥६॥ विद्यास्वभिविनीतो यो राजा राजन्नयानुगः। स शास्ति चिरमैश्वर्यमरींश्च कुरुते वशे ॥७॥

अन्योन्यमीक्षतः तूष्णीकान् निरुत्साहान् पश्यामीदं किमिति शेषः ॥५॥ मातुः पैतामह इति पाठे रावणमातुः पितामहपुत्रस्तस्यापि नेत्यर्थः इति तीर्थः ॥६॥ तद्वाक्यमाह विद्यासु चतुर्दशसु अभिविनीतः शिक्षितः नयानुगः नीतिमार्गस्थः ॥७॥

102

राम·
१०२

युद्धेऽमृतो मरणमप्राप्तः ततः प्राक्त्वां मोक्तुं त्यक्तुं नोत्सहति-हि प्रसिद्धं तस्य सामात्यस्यैव निश्चयो वर्त्तते ॥२४॥
मृत्युलोभात्-मृत्युकृतवंचनया-सर्वेषां राक्षसानामात्मनो रावणस्य च वधेन रामेण युद्धेऽनिरस्तः स
न्रामतो मृत्युभयाद्युद्धं प्राप्य न त्वां मोक्तुं शक्तः नोत्सहत इत्यर्थः ॥२५॥ न हि मम निर्गमोऽसंभवीत्यत आह

नोत्सहत्यमृतो मोक्तुं युद्धे त्वामिति मैथिलि । सामात्यस्य नृशंसस्य निश्चयो ह्येष वर्त्तते ॥२४॥ तदे
षा सुस्थिरा बुद्धिर्मृत्युलोभादवस्थिता ॥ भयान्न शक्तस्त्वां मोक्तुमनिरस्तः स संयुगे ॥ राक्षसा
नां च सर्वेषामात्मनश्च वधेन हि ॥२५॥ निहत्य रावणं संख्ये सर्वथा निशितैः शरैः ॥ प्रतिनेष्य
ति रामस्त्वामयोध्यामसितेक्षणे ॥२६॥ एतस्मिन्नंतरे शब्दो भेरीशंखसमाकुलः ॥ श्रुतो वै सर्व
सैन्यानां कंपयन्धरणीतलं ॥२७॥ श्रुत्वा तु तं वानरसैन्यनादं लंकागता राक्षसराजभृत्याः ॥ ह
तौजसो दैन्यपरीतचेष्टाः श्रेयो न पश्यंति नृपस्य दोषात् ॥२८॥ इत्यार्षे श्रीरा० युद्ध० चतुस्त्रिंशः सर्गः ॥३४॥

निहत्येति ॥२६॥ भेरीशंखसमाकुलः तच्छब्दसमाकुलः सर्वसैन्यानां शब्दः श्रुतः ॥२७॥ नृपस्य रावण
स्य दोषादन्यायात् श्रेयो न पश्यंति नष्टजीविताशा अभवन्नित्यर्थः ॥२८॥ हरमानः क० ॥३२॥ इ
ति श्रीरामाभिरामे श्रीरामीये रामायणतिलके युद्धकाण्डे चतुस्त्रिंशः सर्गः ॥३४॥ ॥

तत्रामराणांधर्मस्तद्विषयोविधिः पक्षःराक्षसाराजसाअसुरास्तामसाइतिभेदः ॥१३॥ अथतयोःकालविशेषेणा
भिभवानभिभवौदर्शयतिधर्मोवैइत्यादियदाकृतंयुगमभूत्तदातस्मादेवकालाद्धेतोःप्रवृद्धोधर्मो
ऽधर्मंग्रसतेऽभिभवतिवैप्रसिद्धं यदातिष्यःकलिःप्रवर्त्ततेतदाततएवहेतोरधर्मोधर्मंग्रसतेकलौ
पादेनधर्मस्थितेः तथाहिसर्वदासुखसाधनंधर्मएकरूपएव अधर्मस्त्रिधा धर्मान्यस्तद्विरोधीतद
भावश्चेतितत्राद्यःशाक्तादिधर्ममार्गेदृश्यधर्माभासः द्वितीयोहत्यादिलक्षणः ॥ अन्त्यःस्वस्वविहितनित्य

धर्मोहिश्रूयतेपक्ष अमराणांमहात्मनां ॥ अधर्मोरक्षसांपक्षोह्यसुराणांचराक्षस ॥१३॥
धर्मोवैग्रसतेऽधर्मंयदाकृतमभूद्युगं ॥ अधर्मोग्रसतेधर्मंतदातिष्यःप्रवर्त्तते ॥१४॥

धर्मलोपात्मा। कृतेत्रिविधाधर्माभावएव त्रेतादौक्रमादेकद्वित्रिभिरधर्मैः संवलनंधर्मस्य एवं
चकलौ अधर्माभिभूतपादत्रयत्वादेकपादेनधर्मस्यप्रवृत्तिरक्षता एवंचधर्मतोदेवत्वं अधर्मतोरा
क्षसत्वादीतिसूचितं नन्वधर्मस्यरक्षोऽसुरधर्मत्वेरक्षोसुराणांधर्मफलैश्वर्यजयादिकथमिति
चेन्न शृणु देवाःकेवलधर्मपराःरक्षोसुराःकाम्यराजसतामसधर्ममात्रपराःतादृशधर्ममनु
तिष्ठतोपिनानुक्तत्रिप्रकाराधर्मोनमुंचत्येव रजस्तमःप्रकृतित्वात् अतोधर्मकरणेनसु
खिनोपिनेकाम्यत्वेनसांतनतयाधर्मफलांतेऽधर्मफलभोगभाजइतिनदोषः ॥१४॥ रामरा

तानीतिमेवाह संदधानइति कालेन संधानविग्रहोचितकालानुसारेण ॥८॥ कश्चतयोः कालस्तत्राह हीयमानेनेति हीयमानेन समेन च कर्त्तासंधिः कार्यः ज्यायान्प्रबलो विग्रहं कुर्वीतः सर्वथा शत्रुं नावमन्येत नोपेक्षेतेत्यर्थः ॥९॥ एवं हि स्वपक्षवृद्धिर्भवतीत्युक्तं स्वपक्षेवर्धनं कुर्वन्निति तत्तस्माद्धीयमानस्य तवब लवता रामेण संधिर्मह्यं रोचते संधानोपायमाह यदर्थमिति सीतार्थमित्यर्थः अभियुक्तोपरैः स्वयं वा

संदधानो हि कालेन विगृह्णंश्चारिभिः सह ॥ स्वपक्षे वर्द्धनं कुर्वन्महदैश्वर्यमश्नुते ॥८॥ हीयमानेन कर्त्तव्यो राज्ञा संधिः समेन च ॥ न शत्रुमवमन्येत ज्यायान्कुर्वीत विग्रहं ॥९॥ तन्मह्यं रोचते संधिः सह रामेण रावण ॥ यदर्थमभियुक्तोसि सीता तस्मै प्रदीयतां ॥१०॥ तस्य देवर्षयः सर्वे गंधर्वाश्च जयैषिणः ॥ विरोधं मा गमस्तेन संधिस्ते तेन रोचतां ॥११॥ असृजद्भगवान्पक्षौ द्वावेव हि पितामहः ॥ सुराणामसुराणां च धर्माधर्मौ तदाश्रयौ ॥१२॥

भिनिविष्टोसि वा ॥१०॥ शत्रोर्वृद्धिः स्वक्षयश्च संधानकालस्तत्राद्यः स्पष्ट एवेत्याह तस्येति ॥११॥ अथ स्वपक्षद्वयं दर्शयितुं सामान्यतो जगतः क्षयवृद्धिहेतुमाह असृजदिति भगवान्पितामहः सुराणामसुराणां च हिताहितप्राप्तिपरिहारार्थौ विधिनिषेधरूपौ द्वावेव पक्षावसृजत् किं विषयौ तौ तत्राह धर्माधर्मौ तदाश्रयौ तयोतयोर्विधिनिषेधयोः क्रमादाश्रयौ विषयौ विधिविषयो धर्मः निषेधविषयश्चाधर्मः ॥१२॥

मुखैर्यज्ञैःध्यानरूपैःब्रह्मघोषान्वेदघोषानुदीरयन्-उदैरयन्कृतवंतः॥१९॥दिशोविप्रद्रुताःतदुदीरितं
ब्रह्मघोषेणाराक्षसाइतिशेषःस्तनयित्नुर्वलाहकः ऊष्मोग्रीष्मस्तदन्तेरवाविति शेषः॥२०॥धूमउत्तिष्ठती
तिशेषः॥२१॥नन्वन्यराक्षसास्तत्तपःसंतापयन्तुमयातुब्रह्मणःसकाशादवध्यत्ववरोलब्धइतिचे

मुखैर्यज्ञैर्यजंत्येतेतैस्तैर्यज्ञैर्द्विजातयः॥जुह्वत्यग्नींश्चविधिवद्वेदांश्चोच्चैरधीयते॥अभि
भूयचरक्षांसिब्रह्मघोषानुदीरयन्॥१९॥दिशोविप्रद्रुताःसर्वेस्तनयित्नुरिवोष्मगे॥ऋषी
णामग्निकल्पानामग्निहोत्रसमुत्थितः॥२०॥आवृत्यरक्षसांतेजोधूमोव्याप्यदिशोदश॥तेषु
तेषुचदेशेषुपुण्येष्वेवधृतव्रतैः॥२१॥चर्यमाणंतपस्तीव्रंसंतापयतिराक्षसान्॥देवदान
वयक्षेभ्योगृहीतश्चवरस्त्वया॥२२॥मनुष्यावानराऋक्षागोलांगूलामहाबलाः॥बलवंत
इहागम्यगर्जंतिदृढविक्रमाः॥२३॥उत्पातान्विविधान्दृष्ट्वाघोरान्बहुविधान्बहून्॥वि
नाशमनुपश्यामिसर्वेषांरक्षसामहं॥२४॥खराभिस्तनिताघोरामेघाःप्रतिभयंकराः॥शो
णितेनाभिवर्षंतिलंकामुष्णेनसर्वतः॥२५॥

तत्राहदेवेति॥२२॥वानरादयोनदेवादयइतिभा
वः॥२३॥किंचदुर्निमित्तैरप्यस्माकमनर्थप्राप्तिरनुमीयतइत्याह-उत्पातानिति-बहुविधानदि
व्यांतरिक्षभौमभेदभिन्नान्बहूननेकान्॥२४॥खराभिस्तनिताःदुःश्रवशब्दवंतःलंकामित्यनेनस्वप
क्षानर्थःसूचितः॥२५॥

अप्रसक्तावताप्रकृतेकिमायातंतत्राहः तत्त्वयेति· तत्इत्यव्ययंतत्तादृशोनिखिलैश्वर्यादिसाधनोधर्मो
लोकान्दिग्विजयायचरतानिहतः यज्ञदानतपसांविघ्नंचरतातस्यनाशःकृतः अधर्मश्चप्रगृहीतः अ
नेकद्विजदेवर्ष्यादिपीडनेनेतिशेषः तेनकारणेनअस्मत् अस्मत्तः परेशत्रवोबलिनः धर्महान्यधर्मपरिग्र
हयोरभावात् ॥१५॥ अधर्मजानर्थंदर्शयतिसइति· तेनवप्रमादात् चित्तदोषात्प्रावृत्तपादितइदानीं

तत्त्वयाचरतालोकान्धर्मोऽपिनिहतोमहान् ॥ अधर्मःप्रगृहीतश्चतेनास्मद्बलिनःपरे ॥१५॥ विषये
सप्रमादात्प्रवृद्धस्तेऽधर्मोहिग्रसतेहिनः ॥ विवर्द्धयतिपक्षंचसुराणांसुरभावन ॥१६॥ विषये
षुप्रसक्तेनयत्किंचित्कारिणात्वया ॥ ऋषीणामग्निकल्पानामुद्वेगोजनितोमहान् ॥१७॥ तेषांप्र
भावोदुर्द्धर्षःप्रदीप्तइवपावकः ॥ तपसाभावितात्मानोधर्मस्यानुग्रहेरताः ॥१८॥

प्रवृद्धोऽधर्मरू
पोहिर्नोस्मान्ग्रसतेसुरैर्भावनंनित्यानुध्यानंयस्यधर्मस्यसोसौधर्मःसुराणांतदंशभूतानांपरेषांप
क्षंविवर्धयति ॥१६॥ रावणस्याधर्मपरिग्रहंप्रपंचयतिविषयेष्विति· विषयेषुस्त्रीवारुणादिषु
प्रसक्तेनततएवयत्किंचित्कारिणानिर्मर्यादं यथेष्टंकुर्वतात्वयाऋषीणामुद्वेगः क्रोधोजनितः
॥१७॥ ननुकिंतेषांक्रोधेनतत्राहः तेषांप्रभावः क्रोधजस्तापःप्रदीप्तःपावकइवदुर्द्धर्षोदुःसहः कुतोदुः
सहतातत्प्रभावस्यतत्राहः तपसेति· धर्मस्यानुग्रहे· अनुग्रहःसंबंधस्तत्संपादनेरताः ॥१८॥

रामा-यु- १०५ प्रत्यादित्यंसूर्याभिमुखीभूयरुदंतिरुदंतइवरटंतीत्यर्थः॥३३॥कालःकालरूपःसपुरुषःसर्वेषांगृहाणि कालेकालेसंध्याकालेषुसर्वेषांनोगृहाण्यवेक्षते॥३४॥एतदग्रेरामंमन्यामहेविक्रममित्यादिश्लोकद्वयंप्रक्षिप्तमितिप्राचीनैर्नव्याख्यातमितिकतकः॥ज्ञात्वेति·अस्यरामस्यकर्माणिएतानिनिमित्ता

105

पक्षिणश्चमृगाःसर्वेप्रत्यादित्यंरुदंतिते॥करालोविकलोमुंडपुरुषःकृष्णपिंगलः॥३३॥कालोगृहाणिसर्वेषांकालेकालेन्ववेक्षते॥एतान्यन्यानिदुष्टानिनिमित्तान्युत्पतंतिच॥३४॥विक्रंमन्यामहेरामंमानुषंरूपमास्थितं॥नहिमानुषमात्रोसौराघवोदृढविक्रमः॥येनबद्धःसमुद्रेचसेतुःसपरमाद्भुतः॥कुरुष्वनरराजेनसंधिंरामेणरावण॥ ॥ज्ञात्वावधार्यकर्माणिक्रियतामायतिक्षमं॥३५॥इदंवचस्तस्यनिगद्यमाल्यवान्परीक्ष्यरक्षोधिपतेर्मनःपुनः॥अनुत्तमेषूत्तमपौरुषोबलीबभूवतूष्णींसमवेक्ष्यरावणं॥३६॥इत्यार्षेश्रीरा०यु०पंचत्रिंशःसर्गः॥३५॥
तत्तुमाल्यवतोवाक्यंहितमुक्तंदशाननः॥नमर्षयतिदुष्टात्माकालस्यवशमागतः॥१॥सबद्ध्वाभ्रुकुटिंवक्त्रेक्रोधस्यवशमागतः॥अमर्षात्परिवृत्ताक्षोमाल्यवंतमथाब्रवीत्॥२॥

निचज्ञात्वा

आयतिंक्षमंउत्तरकालसुखदंयत्कर्मतदवधार्ययदुचितंतत्क्रियतां॥३५॥नस्यतस्मै·रावणायेत्यर्थः मनःपरीक्ष्यमदुक्तमस्मैनरोचतइतिज्ञात्वेत्यर्थः·तूष्णींबभूव·किमपिनोवाच॥३६॥अचलमानः क०॥३३॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्ध०पंचत्रिंशःसर्गः॥३५॥नत्वेति॥२॥ राम- १०५

यथापुरं· यथापूर्वं अनतिक्रमेऽव्ययीभावः न प्रभांति दिश इति शेषः वाहना इत्यन्ये॥२६॥ व्यालाः मांसादः पशवः सर्पो मांसात्पशुर्व्याल इति कोशः समवायान्मूथान्॥२७॥ कालिकाः महाकाल्यः स्त्रियः स्वप्नेषु गृहाणि तद्वर्त्तिद्रव्यजातं मुष्णंत्योऽग्रतः स्थिताः प्रतिभाष्य प्रतिकूलभाषणं कृत्वा पांडुरैर्दंतैरुपलक्षिताः प्रहसंति॥२८

रुदतां वाहनानां च प्रपतंत्यश्रुबिंदवः॥ रजोध्वस्ता विवर्णाश्च न प्रभांति यथापुरं॥२६॥ व्याला गोमायवो गृध्रा वाश्यंति च सुभैरवं॥ प्रविश्य लंकामारामे समवायांश्च कुर्वते॥२७॥ कालिकाः पांडुरैर्दंतैः प्रहसंत्यग्रतः स्थिताः॥ स्त्रियः स्वप्नेषु मुष्णंत्यो गृहाणि प्रतिभाष्य च॥२८॥ गृहाणां बलिकर्माणि श्वानः पर्युपसेवते॥ खरा गोषु प्रजायंते मूषका नकुलेषु च॥२९॥ मार्जारा द्वीपिभिः सार्द्धं सूकराः शुनकैः सह॥ किंनरा राक्षसैश्चापि समेयुर्मानुषैः सह॥३०॥ पांडुरा रक्तपादाश्च विहगाः कालचोदिताः॥ राक्षसानां विनाशाय कपोता विचरंति च॥३१॥ चीचीकूचीति वाशंतः शारिका वेश्मसुस्थिताः॥ पतंति ग्रथिताश्चापि निर्जिताः कलहैषिभिः॥३२॥

बलिकर्माणि देवपूजासाधनघृतदधान्नपानादीनि श्वभिः स्पृशंते बलिहरणानि श्वान एव भुंजते न तु वायसा इत्यर्थ इत्यन्ये॥२९॥ द्वीपिभिः शार्दूलैः समेयुर्मिथुनीभावं जग्मुः॥३०॥ पांडुरत्वादिगुणविशिष्टाः कपोता विहगा विचरंति गृहेषु मध्ये इति शेषः॥३१॥ चीचीकूचीति शब्दानुकारः कलहैषिभिः पतत्रैर्निर्जिताः ग्रथिताः पतंति परस्परमा

१०॥एवमपि॰ रामस्यमहत्त्वेपि॰ द्विधाभज्येयं॰ इतरवेणुवत्॰ ननमेयंवेतसवत्सहजआजानसिद्धः
ननुदोषश्चेत्यज्यतांतत्राह॰ स्वभावइति॰ नत्वग्निःकदापिशीतलोभवतीतिभावः॥११॥ननुरामःकथं
मानुषइत्युच्यतेनेसमुद्रेसेतोर्मनुष्यासाध्यत्वादतआहयदीति॰ तावत्प्रथमतःरामेणसमुद्रेसेतुर्बद्धइ

द्वंद्वेयस्यनतिष्ठंतिदेवतान्यपिसंयुगे॥सकस्माद्रावणोयुद्धेभयमाहारयिष्यति॥१०॥द्विधा
भज्येयमप्येवंननमेयंतुकस्यचित्॥एषमेसहजोदोषःस्वभावोदुरतिक्रमः॥११॥यदितावत्स
मुद्रेतुसेतुर्बद्धोयदृच्छया॥रामेणविस्मयःकोत्रयेनतेभयमागतं॥१२॥सतुतीर्त्वार्णवंरामः
सहवानरसेनयाप्रतिजानामितेसत्यंनजीवन्प्रतियास्यति॥१३॥एवंब्रुवाणंसंरब्धंरु
ष्टंविज्ञायरावणं॥व्रीडितोमाल्यवान्वाक्यंनोत्तरंप्रतिपद्यत॥१४॥जयाशिषातुराजानं
वर्द्धयित्वायथोचितं॥माल्यवानभ्यनुज्ञातोजगामस्वनिवेशनं॥१५॥रावणस्तुसहामात्योमंत्र
यित्वाविमृश्यच॥लंकायास्तुतदागुप्तिंकारयामाससराक्षसः॥१६॥व्यादिदेशचपूर्वस्यांप्रहस्तं
द्वारिराक्षसं॥दक्षिणस्यांमहावीर्यौमहापार्श्वमहोदरौ॥१७॥

द्र

तिविस्मयोयदिकोत्रविस्मयः
यंतःसयदृच्छयादैवगत्याघुणाक्षरन्यायेननतुस्वसामर्थ्येनेत्यर्थः येनसेतुबंधनेनतेइदं
भयमागतं॥१२॥१३॥संरब्धं॰ युद्धेसंरंभवंतं॰ रुष्टंकुपितं॰ उत्तरंवाक्यंनप्रत्यपद्यत॥१४॥अभ्यनु
ज्ञातःरावणेन॥१५॥१६॥गुप्तिप्रकारोव्यादिदेशेति॥१७॥ ॥ श्र ॥

परपक्षंतत्प्राबल्यंप्रविश्यैवपरिगत्यैववस्कतोऽहितंवचःपरुषंहितबुध्यायदुच्यतेनैनन्ममश्रोत्रगतंम
च्छ्रोत्रेणैवगृहीतं॥३॥कुतस्तत्राह-मानुषमिति॥४॥हीनं-विक्रमैरित्यनुषज्यते॥५॥यत्त्वयाहंपरुषाण्यु
क्तस्तत्तुवीरद्वेषेणवावीरेमयिद्वेषेणवा आहोस्विद्रिपोपक्षपातेनवाममप्रोत्साहनेनशत्रुप्रशंसा

हितबुध्यायदहितंवचःपरुषमुच्यते॥परपक्षंप्रविश्यैवनैतच्छ्रोत्रगतंमम॥३॥मानुषंकृ
पणंराममेकंशाखामृगाश्रयं॥समर्थंमन्यसेकेनत्यक्तंपित्रावनाश्रयं॥४॥रक्षसामीश्वरंमां
चदेवानांचभयंकरं॥हीनंमांमन्यसेकेनअहीनंसर्वविक्रमैः॥५॥वीरद्वेषेणवाशंकेपक्षपा
तेनवारिपोः॥त्वयाहंपरुषाण्युक्तोममप्रोत्साहनेनवा॥६॥प्रभवंतंपदस्थंहिपरुषंकोभिभाषते
पंडितःशास्त्रतत्वज्ञोविनाप्रोत्साहनेनवा॥७॥आनीयचवनात्सीतांपद्महीनामिवश्रियं॥किमर्थं
प्रतिदास्यामिराघवस्यभयादहं॥८॥वृतंवानरकोटीभिःससुग्रीवंसलक्ष्मणं॥पश्यकैश्चिदहो
भिश्चराघवंनिहतंमया॥९॥

यांक्रोधाद्युद्धायप्रवर्त्तिष्यतइतिप्रवर्त्तनेनवाहेतुनेतिशंकेनतुवा
क्यस्ययथाश्रुतार्थेतात्पर्यमित्यर्थः॥६॥नदेवसमर्थयन्नाह-प्रभवंतमिति-प्रभवंतंयुद्धादिसमर्थं
पदस्थंअव्याहतस्वराज्यस्थंराजानंविनाप्रोत्साहनंरिपुवधप्रवर्त्तिप्रेरणप्रयोजनंविनापंडितत्वा
दिगुणविशिष्टःकःपरुषमभिभाषणेनकोपीतिनिश्चयःवाशब्दोनिश्चये॥७॥पद्महीनामिवेत्यनेन

लक्ष्मीत्वभावबोधनंमत्सुपादेयत्वबोधनंच॥८॥

मंत्रप्रकारः। इयमिति· असुरादिसहितैः सर्वैर्देवैरपि यासुदुर्जया श्रूयते सेयं ॥ ४ ॥ कार्यसिद्धिं शत्रुदहन
नरूपकार्यसिद्धिं पुरस्कृत्य तदुपायनिश्चयायमंत्रः क्रियतां नित्यं यत्र रावणः सन्निहितः सेयं लंकेतिशे

॥ इयंसालक्ष्यतेलंकापुरीरावणपालिता ॥ सासुरोरगगंधर्वैः सर्वैरपिसुदुर्जया ॥ ४ ॥ कार्यसिद्धिंपुर
स्कृत्यमंत्रयध्वंविनिर्णये ॥ नित्यंसंनिहितोयत्ररावणोराक्षसाधिपः ॥ ५ ॥ अथतेषुब्रुवाणेषु
रावणावरजोब्रवीत् ॥ वाक्यमग्राम्यपदवत्पुष्कलार्थंविभीषणः ॥ ६ ॥ अनलःपनसश्चैवसंपा
तिःप्रमतिस्तथा ॥ गत्वालंकांममामात्याःपुरींपुनरिहागताः ॥ ७ ॥ भूत्वाशकुनयःसर्वेप्रविष्टा
श्चरिपोर्बलं ॥ विधानंविहितंयच्चतद्दृष्ट्वासमुपस्थिताः ॥ ८ ॥ संविधानंयथाहुस्तेरावणस्य
दुरात्मनः ॥ रामतद्ब्रुवतःसर्वं [redacted] याथातथ्येनमेशृणु ॥ ९ ॥ पूर्वंप्र
हस्तःसबलोद्वारमासाद्यतिष्ठति ॥ दक्षिणंचमहावीर्यौमहापार्श्वमहोदरौ ॥ १० ॥ इंद्रजित्प
श्चिमंद्वारंराक्षसैर्बहुभिर्वृतः ॥ पट्टिशासिधनुष्मद्भिःशूलमुद्गरपाणिभिः ॥ ११ ॥ नानाप्रहरणैः
शूरैरावृतोरावणात्मजः ॥ राक्षसानांसहस्रैस्तु बहुभिःशस्त्रपाणिभिः ॥ १२ ॥

षः ॥ ५ ॥ अग्राम्यपदवत्·
अग्राम्यार्थपदवत्· अपशब्दहीनंच· पुष्कलार्थं· बह्वर्थाल्पशब्दं ॥ ६ ॥ ७ ॥ यच्चविधानंविहितं· पुररक्षा
र्थमितिशेषः समुपस्थिताः ममसमीपंप्राप्ताः ॥ ८ ॥ ९ ॥ पूर्वंद्वारमित्यन्वयः ॥ १० ॥ ११ ॥ राक्षसानांसहस्रैरित्यादि

रावणे विशेषणे ॥ १२ ॥

महामायमित्यादौ इंद्रजिद्विशेषणं ॥१८॥ व्यादिश्य तन्मुखतो वृत्तांतश्रवणेन नरं तौ रिरक्षतेत्यर्थः अत्रत्वनरद्वा
रे स्वयं च स्वयमेव गमिष्यामि इति तान्मंत्रिण उवाच ॥१९॥ वीर्यं क्रमणसामर्थ्यं पराक्रमस्तत्कार्यं मध्ये

पश्चिमायामथद्वारिपुत्रमिंद्रजितंतदा॥व्यादिदेशमहामायंराक्षसैर्बहुभिर्वृतं॥१८॥उत्तरस्यां
पुरद्वारिव्यादिश्यशुकसारणौ॥स्वयंचात्रगमिष्यामिमंत्रिणस्तानुवाचह॥१९॥राक्षसंतुविरू
पाक्षंमहावीर्यपराक्रमं॥मध्यमेस्थापयद्गुल्मेबहुभिःसहराक्षसैः॥२०॥एवंविधानंलंकायां
कृत्वाराक्षसपुंगवः॥कृतकृत्यमिवात्मानंमन्यतेकालचोदितः॥२१॥विसर्जयामासततःसमं
त्रिणोविधानमाज्ञाप्यपुरस्यपुष्कलं॥जयाशिषामंत्रिगणेनपूजितोविवेशसोंतःपुरमृद्धि
मन्महत्॥२२॥इत्यार्षेश्रीरा०युद्ध०षट्त्रिंशः सर्गः॥३६॥ नरवानरराजानौसतुवायुसुतः
कपिः॥जांबवान्ऋक्षराजश्चराक्षसश्चविभीषणः॥१॥अंगदोवालिपुत्रश्चसौमित्रिःशरभःकपिः
सुषेणःसहदायादोमैंदोद्विविदएवच॥२॥गजोगवाक्षःकुमुदोनलोथपनसस्तथा॥अमि
त्रविषयंप्राप्ताःसमवेताःसमर्थयन्॥३॥

पुरमध्यवर्त्तिनिसेनासंनिवेशेऽस्थापयत्॥२०॥२१॥ज
याशिषाजयाशीर्बोधकशब्दैः॥२२॥ऋद्धिमानः क०॥३४॥इतिश्रीरामाभिरामेश्रीरा०ति०यु०षडत्रिंशःस
र्गः॥३६॥नरेति।रामसुग्रीवौ।टजभावश्चार्षः॥१॥सहदायादः सबंधुः॥२॥अमित्रविषयंशत्रुदेशंसमर्थय

तैःसचिवैःकरणभूतैःसर्वंलंकायांयद्वृत्तंतत्प्रत्यवेदयत्ततदुत्तरंराममिदमब्रवीत्॥२०॥२१॥षष्ठिःशत
सहस्राणि·षष्टिलक्षमित्यर्थः इदानींबह्वधिकमित्यर्थःपराक्रमादिभिरावणस्यसदृशाःसत्वगौरवात्धै
र्यातिशयाच्चतत्सदृशाः॥२२॥अत्ररावणबलवर्णनविषयेमन्युःस्वांतःकरणदैन्यमपिरोषश्चनकार्यः

लंकायांसचिवैःसर्वंरामायप्रत्यवेदयत्॥रामंकमलपत्राक्षमिदमुत्तरमब्रवीत्॥२०॥रावणाव
रजःश्रीमान्रामप्रियचिकीर्षया॥कुवेरंतुयदारामरावणःप्रतियुध्यति॥२१॥षष्ठिःशतसहस्रा
णितदानिर्यातिरक्षसां॥पराक्रमेणवीर्येणतेजसासत्वगौरवात्॥सदृशात्यत्रदर्पेणरावणस्यदु
रात्मनः॥२२॥अत्रमन्युर्नकर्तव्यःकोपयेत्वांनभीषये॥समर्थोह्यसिवीर्येणसुराणामपिनिग्रहे॥२३॥
तद्भवांश्चतुरंगेणबलेनमहतावृतं॥व्यूह्येदंवानरानीकंनिर्मथिष्यसिरावणं॥२४॥रावणावरजे
वाक्यमेवंब्रुवतिराघवः॥शत्रूणांप्रतिघातार्थमिदंवचनमब्रवीत्॥२५॥पूर्वद्वारंतुलंकायानी
लोवानरपुंगवः॥प्रहस्तंप्रतियोद्धास्याद्वानरैर्बहुभिर्वृतः॥२६॥अंगदोवालिपुत्रस्तुबलेनमह
तावृतः॥दक्षिणेबाधतांद्वारेमहापार्श्वमहोदरौ॥२७॥

रावणावरजःयनस्त्वांरावणंप्रतिरोषयेदित्य
र्थःतत्रहेतुमाहसमर्थइति॥२३॥यस्मात्तेनतत्तद्द्वारेषुसर्वासेनाविभज्यस्थापितातत्तस्माद्भवानपीद
दंवानरानीकंतद्वदेवविभागेनव्यूह्यव्यूहितेनचतुरंगेणबलेनवृतंरावणंनिर्मथिष्यसि॥२४॥२५॥प्र

हस्तप्रतियोद्धाप्रहस्तस्यसेनापतेःप्रतियोद्धा॥२६॥२

परमसंविग्नःशुकसारणावेदितमहाबलस्मरणादंतःकरणेतिभीतः॥१३॥१४॥१५॥तद्बलाधिक्यान्नतत्तदुचि
तैःस्वबलैःप्रतिरोधकानुपदिश्यतत्रत्यबलस्यसमाधिकन्यूनतापरिज्ञानायतत्परिच्छेदमाह॥गजानामिति
गजयोधिनामित्यर्थः। रथानारथिनां दशसाहस्रमयुतं साग्रकोटिः किंचिन्न्यूनसंख्याधिककोटिरित्यर्थः।

युक्तः परमसंविग्नो राक्षसैः सह मंत्रवित्॥उत्तरं नगरद्वारं रावणः स्वयमास्थितः॥१३॥विरूपाक्षस्तु
महता शूलखड्गधनुष्मता॥बलेन राक्षसैः सार्द्धं मध्यमं गुल्ममाश्रितः॥१४॥एतानेवंविधान् गुल्मान्
लंकायाः समुदीक्ष्य ते॥मामकामंत्रिणः सर्वे शीघ्रं पुनरिहागताः॥१५॥गजानां दशसाहस्रं रथा
नामयुतं तथा॥हयानामयुते द्वे च साग्रां कोटिं च रक्षसां॥१६॥विक्रांता बलवंतश्च संयुगेष्वा
ततायिनः॥इष्टा राक्षसराजस्य नित्यमेते निशाचराः॥१७॥एकैकस्यात्र युद्धार्थे राक्षसस्य
विशांपते॥परीवारः सहस्राणां सहस्रमुपतिष्ठति॥१८॥एवं प्रवृत्तिं लंकायां मंत्रिप्रोक्तां विभी
षणः॥एवमुक्त्वा महाबाहू राक्षसांस्तानदर्शयत्॥१९॥

॥१६॥आततायिनः शस्त्रपाणयः एतेयू
थपागणिताः॥१७॥सहस्राणां सहस्रं अनेकलक्षमित्यर्थः एकैकस्य राक्षसस्य परीवाराः परै
र्युद्धार्थिभिरुक्तसंख्या उपतिष्ठंति॥१८॥एतां मंत्रिप्रोक्तां प्रवृत्तिं एवंप्रकारेणोक्त्वा तान् राक्षसान्
अनलादीन् चतुरो मंत्रिणोऽदर्शयत्॥१९॥ ॥ ॥ ॥ ॥

रामा·यु·
१०९

109

केसप्ततत्राहाहमिति आत्मनापंचमः मंत्रिचतुष्टयसहितोविभीषणइत्यर्थः॥३५॥रक्षसामपिसंस्थानं
मनुष्यवदेवेतिइतएवज्ञायते·कतककृतरक्षोरूपाणामपितेषांमानुषत्वेनप्रच्छादनंस्वार्थानुरोधे
नपरेषामपरिज्ञानार्थंचतदेवाह·कृत्यासिध्यर्थंविभीषणामेवमुक्त्वेति·मानुषरूपेणस्वसमीपेस्थि
त्वायोद्धव्यमित्युक्तेत्यर्थइत्याह·सुवेलारोहणेबुद्धिंचकार·तस्यदुर्गत्वादुच्चैस्तत्रावस्थानस्यसुखत्व

अहमेवसहभ्रात्रालक्ष्मणेनमहौजसा॥आत्मनापंचमश्चायंसखाममविभीषणः॥३५॥सरा
मः कृत्यसिध्यर्थमेवमुक्त्वाविभीषणं॥सुवेलारोहणेबुद्धिंचकारमतिमान्प्रभुः॥३६॥रमणीयत
रं दृष्ट्वासुवेलस्यगिरेस्तटं॥३७॥ततस्तुरामोमहताबलेनप्रच्छाद्यसर्वांपृथिवीमहात्मा॥प्रहृ
ष्टरूपोभिजगामलंकांकृत्वामतिंसोरिवधेमहात्मा॥३८॥इत्यार्षेश्रीरा०यु०सप्तत्रिंशःसर्गः॥३७॥
सतुकृत्वासुवेलस्यमतिमारोहणंप्रति॥लक्ष्मणानुगतोरामःसुग्रीवमिदमब्रवीत्॥१॥विभीष
णंचधर्मज्ञमनुरक्तंनिशाचरं॥मंत्रज्ञंचविधिज्ञंचश्लक्ष्णयापरयागिरा॥२॥

चकारमतिमान्मति
मितिपाठेमतिमर्थनिर्धारणात्मिकाबुद्धिमित्यर्थः अथनिर्धारणंमतिरितीत्यर्थः॥३६॥३७॥एतदग्रेततस्तु
रामइति·पद्यंपठंतितन्नवक्ष्यमाणसंग्रहेनाप्युक्तानुवादः नाप्यत्रप्रकरणविच्छेदइतीमंश्लोकंवयः
प्रक्षिप्यात्रसर्गच्छेदंकुर्वंतिभ्रांताइतिकतककृत·सर्गमानः॥इतिश्रीरामाभिरामेश्रीरामीयेरामा
यणतिलकेयुद्धकांडेसप्तत्रिंशःसर्गः॥३७॥ सत्विति॥१॥विधिज्ञंकार्यविदं॥२॥

राम०
१०९

हनूमान्पश्चिमद्वारमिति· तस्येंद्रजिद्द्वारत्वात् नदुचितमहावलनियोजनं· तदैवौचित्यमाह· अप्रमे
यात्मा॥२५॥ विप्रकारोवधः यःसर्वान्लोकान्परिक्रमति· दिग्विजयाय· अहंतस्यवधेधृतः॥२६॥ कृत
प्रतिज्ञोयतोतोहमेवोत्तरंद्वारप्रवेक्ष्यामीत्युत्तरश्लोकेनयोजना॥३०॥३१॥३२॥ अथवानराणामपि

हनूमान्पश्चिमद्वारं निःपीड्यपवनात्मजः॥ प्रविशत्वप्रमेयात्मा वहुभिः कपिभिर्वृतः॥२५॥ दैत्य
दानवसंघानामृषीणां च महात्मनां॥ विप्रकारप्रियःक्षुद्रो वरदानबलान्वितः॥२६॥ परिक्राम
तियःसर्वान्लोकान्संतापयन्प्रजाः॥ तस्याहं राक्षसेंद्रस्य स्वयमेव वधे धृतः॥३०॥ उत्तरं नगरद्वा
रमहं सौमित्रिणा सह॥ निपीड्याभिप्रवेक्ष्यामि सबलो यत्र रावणः॥३१॥ वानरेंद्रश्च बलवान्
क्षराजश्च वीर्यवान्॥ राक्षसेंद्रानुजश्चैव गुल्मे भवतु मध्यमे॥३२॥ न चैव मानुषं रूपं कार्यं ह
रिभिराहवे॥ एषा भवतु नः संज्ञा युद्धेस्मिन्वानरे बले॥३३॥ वानरा एव वश्चिन्हं स्वजनेस्मि
न्भविष्यति॥ वयं तु मानुषेणैव सप्त योत्स्यामहे परान्॥३४॥

कामरूपतया रूपांतरकरणे
युद्धे स्वीयपरकीयविवेकासंभवादाह· नचैवेति· संज्ञा नित्यवानररूपधारणसंकेतः एवंचास्माकंस
प्ताहित्वामनुष्याकारोनिःशंकंवध्यः वानररूपधारी वानरैर्युध्यते नदावध्य एवेति भावः॥३३॥ संकेतप्र
कारमाह· वानराएवेति· वोयुष्माकंस्वजनेस्वजनत्वपरिज्ञानेवानराएववानरत्वविशिष्टाएवचिन्हं·त

द्विशिष्टमेवचिन्हमित्यर्थः मानुषेणरूपेणातिश

१२ प्रतिरंजितः प्रतिप्रापितरागः पू० र्णचंद्रप्रदीप्ताक्षपेत्यनेन पौषशुक्ले चतुर्दश्यां पूर्णिमायां वा सुवेलारोहणमिति बोध्यं चतुर्दश्यां सुवेलाग्रे रामः सैन्यं न्यवेशयदिति आग्निवेश्योक्तेः अत्र पूर्णचंद्रत्वोक्तिः पूर्णकल्पत्वादिति बोध्यं ॥१३॥१४॥ अलक मानः ॥ अयमानः क० ॥३८॥ इति श्रीरामाभिरामे श्रीरा०

तं दृष्ट्वा वानराः सर्वे राक्षसान्युद्धकांक्षिणः ॥ मुमुचुर्विविधान्नादांस्तस्य रामस्य पश्यतः ॥१२॥ ततोस्तमगमत्सूर्यः संध्यया प्रतिरंजितः ॥ पूर्णचंद्रप्रदीप्ता च क्षपा समतिवर्त्तत ॥१३॥ ततः स रामो हरिवाहिनीपतिर्विभीषणेन प्रतिनंद्य सत्कृतः ॥ सलक्ष्मणो यूथपयूथसंयुतः सुवेलपृष्ठे न्यवसद्यथासुखं ॥१४॥ इत्यार्षे श्री रा० युद्ध० अष्टत्रिंशः सर्गः ॥३८॥ ॥ तां रात्रिमुषितास्तत्र सुवेले हरियूथपाः ॥ लंकायां ददृशुर्वीरा वनान्युपवनानि च ॥१॥ समसौम्यानि रम्याणि विशालान्यायतानि च ॥ दृष्टिरम्याणि ते दृष्ट्वा बभूवुर्जातविस्मयाः ॥२॥ चंपकाशोकवकुलशालतालसमाकुला ॥ तमालपनसच्छन्ना नागमालासमावृता ॥३॥

रा० ति० युद्ध० अष्टत्रिंशः सर्गः ॥३८॥ तामिति ॥१॥ समसौम्यानि आयामविस्ताराभ्यां समानि समभूतलानि च दुष्टमृगाद्युपद्रवराहित्येन सौम्यानि अत एव क्रीडादौ रम्याणि इत्यर्थः इति तीर्थः समसाम्यानीति पाठः समप्रदेशे साम्यसंस्थानानि रम्याणि मृगाद्युपद्रवराहित्यादिति कतकः विशालानि विपुलानि आयतानि दीर्घाणि दृष्टिरम्याणि चक्षुःप्रियाणि ॥२॥ चंपकेत्यादि तिलका विशेषणं नागमाला नागवृक्षपंक्तिः ॥३॥ ॥

अध्यारोहामहे आरोस्यामहे ॥३॥ मरणांताय-मरणपर्यंतं दुःखमनुभवितुं ॥४॥ राक्षस्याः रक्षःसंबंधिन्या
नीचया क्रूरया तत् सीताहरणरूपं ॥५॥ संमंत्रयन् संचिंतयन् ॥ चित्रसानुं सुवेलमित्यन्वयः ॥६॥७

सुवेलं साधुशैलेंद्रमिमं धातुशतैश्चितं ॥ अध्यारोहामहे सर्वे वत्स्यामोत्र निशामिमां ॥३॥ लंकां
चालोकयिष्यामो निलयं तस्य रक्षसः ॥ येन मे मरणांताय हृता भार्या दुरात्मना ॥४॥ येन धर्मो न
विज्ञातो न वृत्तं न कुलं तथा ॥ राक्षस्या नीचया बुध्या येन तद्गर्हितं कृतं ॥५॥ एवं संमंत्रयन्नेव सक्रो
धो रावणं प्रति ॥ रामः सुवेलमासाद्य चित्रसानुमुपारुहत् ॥६॥ पष्ठतो लक्ष्मणश्चैव मन्वग
च्छत्समाहितः ॥ सशरं चापमुद्यम्य सुमहद्विक्रमे रतः ॥७॥ तमन्वारोहत्सुग्रीवः सामात्यः सवि
भीषणः ॥ ते वायुवेगप्रवणास्तं गिरिं गिरिचारिणः ॥८॥ अध्यारोहंत शतशः सुवेलं यत्र राघवः ॥
ते त्वदीर्घेण कालेन गिरिमारुह्य सर्वतः ॥९॥ ददृशुः शिखरे तस्य विषक्तामिव खे पुरीं ॥ तां शु
भां प्रवरद्वारां प्राकारवरशोभितां ॥१०॥ लंकां राक्षससंपूर्णां ददृशुर्हरियूथपाः ॥ प्राकारव
रसंस्थैश्च तथा नीलैश्च राक्षसैः ॥ ददृशुस्ते हरिश्रेष्ठाः प्राकारमपरं कृतं ॥११॥

वायुवेगप्रवणाः
वायुवेगगव्रतयः ॥८॥ यत्र राघवः येन राघव आरूढ इत्यर्थः ॥९॥ शिखरे तस्येति स्थितत्वेति शे
षः खे आकाशे विषक्तां रचितामिव ॥१०॥ रक्षणार्थं प्राकारवरसंस्थैर्निशाचरैरपरं प्राकारं कृतं

मिदष्ट ३ छं: ॥८०॥

१४।१५।वारणाः वनगजाः॥१६॥एकमखंडं·दिविस्पृशं·दिविस्पृक्·पूर्वपदेन्हद्युभ्यांचेतिडेरलुक्·स्पर्शः कप्रत्ययश्चार्षः समंतात्परितइत्यर्थः महारजतंस्वर्णं॥१७॥शतयोजनेति·अनेकयोजनेत्य

सुग्रीवेणाभ्यनुज्ञातालंकांजग्मुःपताकिनी॥वित्रासयंतोविहगान्ग्लापयंतोमृगद्विपान्॥कं
पयंतश्चतांलंकांनादैःस्वैर्नदतांवराः॥१४॥कुर्वंतस्तेमहावेगामहीचरणपीडितां॥रजश्चसह
सैवोर्ध्वंजगामचरणोत्थितं॥१५॥ऋक्षाःसिंहाश्चमहिषावारणाश्चमृगाःखगाः॥तेनशब्देनवि
त्रस्ताजग्मुर्भीतादिशोदश॥१६॥शिखरंतुत्रिकूटस्यप्रांशुचैकंदिविस्पृशं॥समंतात्पुष्प
संछन्नंमहारजतसन्निभं॥१७॥शतयोजनविस्तीर्णंविमलंचारुदर्शनं॥श्लक्ष्णंश्रीमन्मह
च्चैवदुःप्रापंशकुनैरपि॥१८॥मनसापिदुरारोहंकिंपुनःकर्मणाजनैः॥निविष्टातस्यशिख
रेलंकारावणपालिता॥१९॥दशयोजनविस्तीर्णाविंशद्योजनमायता॥सापुरीगोपुरैरुच्चैः
पांडुरांबुदसन्निभैः॥कांचनेनचशालेनराजतेनचशोभते॥२०॥प्रासादैश्चविमानैश्चलंका
परमभूषिता॥घनैरिवातपापायेमध्यमंवैष्णवंपदं॥२१॥

र्थः श्लक्ष्णां कुट्टिमभूमिवत्॥१८॥१९॥
दशयोजनेति·इदंचलंकारूपंमहादुर्गांतर्वर्त्तिरावणावासस्थानभूतंनदुर्गपरं·शतयोजनविस्तीर्णा त्रिंशद्योजनमायतेतिअन्यत्रैवान्यस्थलेउक्तेः कांचनेनराजतेनशालेनप्राकारेण॥२०॥प्रासादभूषितत्वेउपमानंघनैरित्यादिः मध्यमंवैष्णवंपदं·आकाशमित्यर्थः॥२१॥

४ द्रुमैरुपलक्षिताः दृश्यैर्दृष्टिप्रियवस्तुभिरुपलक्षिता ॥ ५ ॥ दृश्यान्येवाह विचित्रेति ॥ ६ ॥ अगमावृताः
७ सर्वे ऋतवो यस्मिन्नत्तत्सर्वर्तुकं ॥ ८ ॥ बर्हिणो मयूरैः परभृताः कोकिलाः वननिर्झरे निर्झरयुते वने

हिंतालैरर्ज्जुनै नीपैः सप्तपर्णैः सुपुष्पितैः ॥ तिलकैः कर्णिकारैश्च पाटलैश्च समंततः ॥ ४ ॥ शु-
शुभे पुष्पिताग्रैश्च लतापरिगतैर्द्रुमैः ॥ लंका बहुविधैर्दृश्यैर्यथेंद्रस्यामरावती ॥ ५ ॥ विचित्रकुसु-
मोपेतैरक्तकोमलपल्लवैः ॥ शाद्वलैश्च तथानीलैश्चित्राभिर्घनराजिभिः ॥ ६ ॥ गंधाढ्यान्यतिरम्या-
णि पुष्पाणि च फलानि च ॥ धारयंत्यगमास्तत्र भूषणानीव मानवाः ॥ ७ ॥ तच्चैत्ररथसंकाशं म-
नोज्ञं नंदनोपमं वनं सर्वर्तुकं रम्यं शुशुभे षट्पदायुतं ॥ ८ ॥ दात्यूहकोयष्टिवकैर्नृत्यमानैः
श्च बर्हिणैः ॥ रुतं परभृतानां च शुश्रुवे वननिर्झरे ॥ ९ ॥ नित्यमत्तविहंगानि भ्रमराचरितानि
च ॥ कोकिलाकुलषंडानि विहंगाभिरुतानि च ॥ १० ॥ भृंगराजाभिगीतानि कुररस्वनितानि
च ॥ विविशुस्ते ततस्तानि वनान्युपवनानि च ॥ ११ ॥ हृष्टाः प्रमुदिता वीरा हरयः कामरूपिणः
तेषां प्रविशतां तत्र वानराणां महौजसां ॥ १२ ॥ पुष्पसंसर्गसुरभिर्ववौ प्राणसमो निलः ॥ अ-
न्ये तु हरिवीराणां यूथान्निष्क्रम्य यूथपाः ॥ १३ ॥

राजदंतादिः ॥ ९ ॥ कोकिलैराकुलाः षंडा वृक्षषंडा येषु
तानि वनोपवनानि अग्रेपिवद्वादिरेव ॥ १० ॥ ११ ॥ १२ ॥ प्राणसमत्वेन मंदता अन्ये तु वनोपवनप्रवे-

श्यातिरिक्ताः युथान्निष्क्रम्य लंकां जग्मुः ॥ १३ ॥

३॥श्वेतचामरैःपर्यंतेवीज्यमानेयस्य विजयछत्रेणश्वेतछत्रेणराजचिन्हेनशोभितां॥४॥हिमसंछादितां
बरं॥हेमालेपरचितहंसादिचित्रैः॥संछादितमंबरमंतरीयवासोयस्यतद्बिभ्राणंग्रकरणकैरुल्ल
खैर्विलिखनैर्जातःकिणावद्धासियस्यतं॥५॥शशलोहितंशशरुधिरं॥तत्सदृशारागवतारक्तवाससा

ददर्शलंकांसुन्यस्तांरम्यकाननशोभितां॥तस्यगोपुरशृंगस्थंराक्षसेंद्रंदुरासदं॥३॥श्वेतचा
मरपर्यंतंविजयछत्रशोभितं॥रक्तचंदनसंलिप्तंरक्ताभरणभूषितं॥४॥नीलजीमूतसंका
शंहेमसंछादितांबरं॥ऐरावतविषाणाग्रैरुत्कृष्टकिणवक्षसं॥५॥शशलोहितरागेणसं
वीतंरक्तवाससा॥संध्यातपेनसंछन्नंमेघराशिमिवांबरे॥६॥पश्यतांवानरेंद्राणांराघव
स्यापिपश्यतः॥दर्शनाद्राक्षसेंद्रस्यसुग्रीवःसहसोत्थितः॥७॥क्रोधवेगेनसंयुक्तःसत्वेनच
बलेनच॥अचलाग्रादथोत्थायपुप्लुवेगोपुरस्थले॥८॥स्थित्वामुहूर्त्तंसंप्रेक्ष्यनिर्भयेनांत
रात्मना॥तृणीकृत्यचतद्रक्षःसोब्रवीत्परुषंवचः॥९॥लोकनाथस्यरामस्यसखादासोस्मि
राक्षस॥नमयामोक्ष्यसेद्यत्वंपार्थिवेंद्रस्यतेजसा॥१०॥

न्तरीयवस्त्रेणसंवीतं॥६॥पश्यतांपश्य
तोनादृत्येत्यर्थः॥७॥सत्वेनसत्वकार्योत्साहेन॥अचलाग्रात्सुवेलाग्रात्॥गोपुरस्थले॥रावणावस्थिति
स्थाने॥८॥९॥पार्थिवेंद्रतेजसानुगृहीतेनमया नमोक्ष्यसेरामाभिप्रायेणसखास्वाभिप्रायेणदा स इतिबोध्यं॥१०॥

तत्र रावणगृहं प्रासादविशेषेण लक्ष्यत इत्याह· यस्यामिति· स्तंभसहस्रेण निर्मित इति शेषः॥२२॥ स एष पुरभू
षणं· प्रासादो राक्षसेंद्रस्य चैत्य आलयः· चैत्यमायतनं तुल्ये· पुंस्त्वमार्षं· समग्रेण रक्षसां शतेन· समग्रसन्नाह

यस्यास्तंभसहस्रेण प्रासादः समलंकृतः॥ कैलासशिखराकारो दृश्यते खमिवोल्लिखन्॥२२॥
चैत्यः स राक्षसेंद्रस्य बभूव पुरभूषणं॥ शतेन रक्षसां नित्यं यः समग्रेण रक्ष्यते॥२३॥ मनोज्ञां कांचन
वतीं पर्वतैरुपशोभितां॥ नानाधातुविचित्रैश्च उद्यानैरुपशोभितां॥२४॥ नानाविहगसंघुष्टां ना
नामृगनिषेवितां॥ नानाकुसुमसंपन्नां नानाराक्षससेवितां॥२५॥ तां समृद्धां समृद्धार्थो लक्ष्मीवान्
ल्लक्ष्मणाग्रजः॥ नगरीं त्रिदिवप्रख्यां विस्मयं प्राप वीर्यवान्॥२६॥ तां रत्नपूर्णां बहुसंविधानां प्रा
सादमालाभिरलंकृतां च॥ पुरीं महायंत्रकवाटमुख्यां ददर्श रामो महता बलेन॥२७॥ इत्यार्षे
श्रीरामायणे यु· एकोनचत्वारिंशः सर्गः॥३९॥ ॥ततो रामः सुवेलाग्रं योजनद्वयमंडलं॥ उपा
रोहत्ससुग्रीवो हरियूथैः समन्वितः॥१॥ स्थीत्वा मुहूर्त्तं तत्रैव दिशो दश विलोकयन्॥ त्रिकू
टशिखरे रम्ये निर्मितां विश्वकर्मणा॥२॥

वताऽनेकेनेत्यर्थः॥२३॥२४॥२५॥ नगरीं दृष्ट्वेति शे
षः॥२६॥२७॥ उत्करमानः क·॥३६॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके युद्धकांडे ए
कोनचत्वारिंशः सर्गः॥३९॥ योजनद्वयमंडलं· योजनद्वयविस्तारं॥१॥२॥ श्र

नियुद्धंवाहुयुद्धंविनम्यविनमय्यपादक्रमान्पादविक्षेपाद्धेतोःगोपुरवेदिलग्नौभूपतितावित्यर्थः॥१६॥
सालनिखातमध्ये·प्राकारपरिखयोर्मध्ये·निघातेतिपाठेप्ययमेवार्थः अभिनिश्वसंतौमुहुस्तौस्थि
त्वालिंग्येत्यन्वयः॥१७॥वाहुरूपैर्योक्त्रैरज्जुभिःसंयोजयामासतुःबबंधतुःसंरंभःक्रोधःशिक्षानि

कृत्वानियुद्धंभृशमुग्रवेगौकालंचिरंगोपुरवेदिमध्ये॥उत्क्षिप्यचोत्क्षिप्यविनम्यदेहौपाद
क्रमाद्गोपुरवेदिलग्नौ॥१६॥अन्योन्यमापीड्यविलग्नदेहौतौपेततुःशालनिखातमध्ये॥उत्पेत
तुर्भूमितलंस्पृशंतौस्थित्वामुहूर्तंत्वभिनिश्वसंतौ॥१७॥आलिंग्यचालिंग्यचबाहुयोक्त्रैःसंयो
जयामासतुराहवेतौ॥संरंभशिक्षाबलसंप्रयुक्तौसुचेरतुःसंप्रतियुद्धमार्गै॥१८॥शार्दूलसिं
हाविवजातदंष्ट्रौगजेंद्रपोताविवसंप्रयुक्तौ॥संहत्यसंवेष्ट्यचतौकराभ्यांतौपेततुर्वैयुगपद्ध
रायां॥१९॥उद्यम्यचान्योन्यमधिक्षिपंतौसंचक्रमातेबहुयुद्धमार्गै॥व्यायामशिक्षाबलसंप्र
युक्तौक्लमंनतौजग्मतुराशुवीरौ॥२०॥बाहूत्तमैर्वारणवारणाभैर्निवारयंतौपरवारणाभौ॥
चिरेणकालेनभृशंप्रयुद्धौसंचेरतुर्मंडलमार्गमाशु॥२१॥

युद्धाभ्यासःबलंसहजंप्राणीयतैःसं
युक्तौ॥१८॥पोतोबालःसंवेदनंप्रेरणं॥१९॥व्यायामःनियुद्धोत्साहः॥२०॥वारयंत्येभिःप्रतिगजानितिवारणे
महागजःद्वितीयवारणशब्दःकरिहस्तवाची·करिकराभैरित्यर्थः·परवारणोमत्तगजःमंडलमार्गमि
उत्ताकारत्वसाध्यक्रौमार्गगतिभेदः॥२१॥

उत्पत्यगोपुरादितिशेषः तस्योपरिपुप्लुवेप्लुत्यागतइत्यर्थः चित्रमद्भुतंतत्प्रसिद्धंमुकुटंआकृष्यशिर
सोगृहीत्वाभुविपातयामासतत्पातयित्वास्वयंचभूमौपपात॥११॥तूर्णमायांतंपुनर्भूतलादितिशेषः
मेपरोक्षमेवत्वंसुग्रीवः इदानीमद्दृष्ट्यग्रेहीनग्रीवोभविष्यसि॥१२॥ततोभूतले·क्रीडायांतलाहनकं

इत्युक्त्वासहसोत्पत्यपुप्लुवेतस्यचोपरि॥आकृष्यमुकुटंचित्रंपातयामासतद्भुवि॥११॥समी
क्ष्यतूर्णमायांतंवभाषेतंनिशाचरः॥सुग्रीवस्त्वंपरोक्षंमेहीनग्रीवोभविष्यसि॥१२॥इत्युक्त्वोत्था
यतंक्षिप्रवाहुभ्यामाक्षिपत्तले॥कंदुवत्ससमुत्थायवाहुभ्यामाक्षिपद्धरिः॥१३॥परस्परंस्वेद
विदिग्धगात्रौपरस्परंशोणितरक्तदेहौ॥परस्परंश्लिष्टनिरुद्धचेष्टौपरस्परंशाल्मलिकिं
शुकाविव॥१४॥मुष्टिप्रहारैश्चतलप्रहारैररत्निघातैश्चकराग्रघातैः॥तौचक्रतुर्युद्धमसह्य
रूपंमहाबलौराक्षसवानरेंद्रौ॥१५॥

दुकोयथाऽऽगुतिष्ठतितद्वत्ससमुत्थायवाहुभ्यामाक्षिपत्·भूमावितिशेषः।१३।शोणितेनरुधिरेण
रक्तवर्णौदेहौययोस्तौपरस्परंश्लिष्टौ·श्लिष्टत्वादेवतौचतौनिरुद्धचेष्टौशाल्मलीत्नौकिंशुकावि
वपुष्पितावितिशेषः।१४॥अरत्निघातैःनिःकनिष्ठमुष्टिघातैः अरत्निस्तुनिःकनिष्ठेनमुष्टि
नेत्यमरः·असह्यरूपं·।अत्यंतासह्यं॥१५॥

अभिद्रवणं अभिमुखेन शीघ्रगमनं · आप्लवनमीषदीषद्गमनं अवस्थानं कृत्वा कृत्वा गमनमिति यावत् ·
सविग्रहमास्थानं · विग्रत्याभिमुखेनावस्थानं परावर्त्तं · पराङ्मुखगमनं · अपावर्त्तं · पार्श्वतोपसर
णं · अपद्रुतं परस्परज्ञात्वादिग्रहायावनतकायतया धावनं · अवप्लुतं प्रतिभटं पादेन प्रहर्त्तुमभि

अभिद्रवणमाप्लवनमवस्थानं सविग्रहं ॥ परावर्त्तमपावर्त्तमपद्रुतमवप्लुतं ॥२५॥
उपन्यस्तमपन्यस्तं युद्धमार्गविशारदौ ॥ तौ विचेरतुरन्योन्यं वानरेंद्रश्च रावणः ॥२६॥
एतस्मिन्नंतरे रक्षो मायाबलमथात्मनः ॥ आरब्धुमुपसंपेदे ज्ञात्वा तं वानराधिपः ॥२७॥ उ
त्पपात तदाकाशं जितकाशी जितक्लमः ॥ रावणः स्थित एवात्र हरिराजेन वंचितः ॥२८॥

गमनं ॥२५॥ उपन्यस्तं · परेण स्वबाह्वोरग्रहाय स्वोरःसमीपे स्थापनं · अपन्यस्तं · प्रतिभटबाहुग्र
हणार्थं स्वबाहुप्रसारणं · कुर्वंतौ तौ विचेरतुरित्यन्वयः ॥२६॥ एतस्मिन्नंतरे सुग्रीवादात्मानं ब
लतो मोचयितुमशक्यत्वावसरे · मायाबलमारब्धुमुपसंपेदे उपचक्रमे तं उपक्रांतमायं ज्ञात्वा
२७। जितकाशी जितश्वासः वंचितः क्व गत इत्यज्ञातहरिराजगमनः ॥२८॥ श्र

भक्तार्थे भक्तणरूपप्रयोजननिमित्तं यथा क्रुद्धाववतस्थाते तथेत्यर्थः ॥२२॥ विचित्राणि मंडलानि। चारिकरणखंडमहामंडलाख्यमंडलभेदात्। तानि तु एकपादप्रचारेण चारिसंज्ञं तु मंडलं। द्विपादक्रमणं यत्र करणाख्यं तु मंडलं। करणानां समयोगात् खंडमंडलमीरितं। खंडैस्त्रिभिश्चतुर्भिर्वा महामंडलमीरितमिति भरतोक्तानि विविधानि स्थानानि। वैष्णवं समपादं च वैशाखं मंडलं तथा प्रत्यालीढमनालीढं स्थानान्येतानि षट् नृणामिति भरतोक्तानि एतानि पादयोः पूर्वापरविक्षेपतिर्यग्वि

तौ परस्परमासाद्य यत्तावन्योन्यसूदने ॥ मार्जाराविव भक्तार्थे वतस्थाते मुहुर्मुहुः ॥२२॥
मंडलानि विचित्राणि स्थानानि विविधानि च ॥ गोमूत्रकाणि चित्राणि गतप्रत्यागतानि च ॥२३॥
तिरश्चीनगतान्येव तथा वक्रगतानि च ॥ परिमोक्षं प्रहाराणां वर्जनं परिधावनं ॥२४॥

क्षेपादिविन्यासविशेषरूपाणीनितीर्थः। गोमूत्रकाणि गोमूत्ररेखाकारकुटिलगमनानि। चित्राणि गतप्रत्यागतानि। नानाप्रकारासर्पणोपसर्पणानि ॥२३॥ तिरश्चीनगतानि। तिर्यग्गतानि वक्रगतानि सव्यापसव्यसंचरणानि प्रहाराणां परदत्तप्रहाराणां परिमोक्षं स्थानचलनादिना व्यर्थीकरणं। वर्जनं। स्वप्रहारवैफल्यापादकस्थाने तद्वर्जनं। परिधावनं एकस्य प्रति सर्वतः परितो धावनं भ्रमणमित्यर्थः ॥२४॥

इदानीं घोरयुद्धप्राप्तौ एवंविधमचिंतितं अस्माभिः सहासंमंत्रितं कार्यमितःपरं मा कथाः त्वयि किंचित्समापन्ने दैवात्त्ववापमानादिप्राप्तावित्यर्थः नाश्लीलंकीर्तयेदित्युक्तेरेवंवादः ॥४॥५॥ त्वयि चानागते पूर्वं त्वदागमनात्पूर्वं यदि नव विपत्तिः स्यात्तर्हि इति शेषः इति वक्ष्यमाणप्रकारा मतिर्मे निश्चिताभूत् भगवन्कथमे

इदानीं मा कथा वीर एवंविधमरिंदम ॥ त्वयि किंचित्समापन्ने किं कार्यं सीतया मम ॥४॥ भरतेन महा
बाहो लक्ष्मणेन यवीयसा ॥ शत्रुघ्नेन च शत्रुघ्न स्वशरीरेणवा पुनः ॥५॥ त्वयि चानागते पूर्वं इति मे
निश्चिता मतिः ॥ जानतश्चापि ते वीर्यं महेंद्रवरुणोपम ॥६॥ हत्वाहं रावणं युद्धे सपुत्रबलवाहनं ॥
अभिषिच्य च लंकायां विभीषणमथापि च ॥७॥ भरते राज्यमारोप्य त्यक्ष्ये देहं महाबल ॥ तमेवं वा
दिनं रामं सुग्रीवः प्रत्यभाषत ॥८॥ नव भार्यापहर्त्तारं दृष्ट्वा राघव रावणं ॥ मर्षयामि कथं वीर
जानन्विक्रममात्मनः ॥९॥ इत्येवंवादिनं वीरमभिनंद्य च राघवः ॥ लक्ष्मणं लक्ष्मिसंपन्नमिदं व
चनमब्रवीत् ॥१०॥

एवं मयि तव प्राकृतद्वशंकेत्यत्राह जानतश्चापीति अतिस्नेहः पापशंकीति न्यायादित्याशयः ॥६॥ तां मतिं दर्शयति हत्वेति अभिषिच्येति प्रतिज्ञायाः साधनीयत्वादित्याशयः ७ । महाबलेत्यंतं मतिकथनं ८ ॥ आत्मनो विक्रमं स्वस्य परंपराक्रमसंहारसामर्थ्यं जानन्स्वानुभवेनावगच्छन् कथं मर्षयामि न कथमपीत्यर्थः ॥९॥ अभिनंद्य सौहृदस्यातिबलसंपत्तेश्च दमेवयुक्त मिनिश्लाघ्यां कत्वेत्यर्थः लक्ष्मीसंपन्नमिति हस्व

॥१

प्राप्तसंग्रामकीर्त्तिः प्राप्तसंग्रामविजयजन्यकीर्त्तिः तदेवदर्शयति· निशिचरपतिमाजौ श्रमेण योजयित्वे
तिनिशिचरेत्यार्षं· अतिविशालंगगनं· अतिदूरंलंघयित्वेत्यर्थः॥२९॥ उक्तमर्थमुपसंहरति सइति·
तरुमृगावानरास्तन्मुखाहनूमदादयः॥३०॥ नगमानः क०॥३१॥ इतिश्रीरामाभिरामेश्रीरामीयेरा

अथहरिवरनाथः प्राप्तसंग्रामकीर्त्तिर्निशिचरपतिमाजौ योजयित्वाश्रमेण॥ गगनमतिवि
शालंलंघयित्वार्कसूनुर्हरिगणबलमध्ये रामपार्श्वं जगाम॥२९॥ स इति स विनतसूनुस्तत्र त
त्कर्मकृत्वापवनगतिरनीकं प्राविशत्संप्रहृष्टः॥ रघुवरनृपसूनोर्वर्द्धयन्युद्धहर्षं तरुमृगग
णमुख्यैः पूज्यमानो हरीन्द्रः॥३०॥ इत्यार्षे श्रीरामायणे युद्धकांडे चत्वारिंशः सर्गः॥४०॥ अथ
तस्मिन्निमित्तानि दृष्ट्वा लक्ष्मणपूर्वजः॥ सुग्रीवं संपरिष्वज्य रामो वचनमब्रवीत्॥१॥ असंम
न्त्र्य मया सार्द्धं तदिदं साहसं कृतं॥ एवं साहसयुक्तानि न कुर्वन्ति जनेश्वराः॥२॥ संशये स्थाप्य
मां चेदं बलं चेमं विभीषणं॥ कष्टं कृतमिदं वीर साहसं साहसप्रिय॥३॥ ॥ श्र

मायणतिलके युद्धकांडे चत्वारिंशः सर्गः॥४०॥ तस्मिन्सुग्रीवे निमित्तानि· क्षतजादिरूपाणि युद्ध
चिन्हानि॥१॥ जनेश्वराः नृपाः॥२॥ संशये स्थाप्येति· प्रतिघोरशत्रुसमीपंगतः कथमागमिष्य
ति· राजेति बहुचिंतामग्नकृत्वा॥३॥

२१।२२।२३।२४॥ससुग्रीवः सुग्रीवसहितः कपिराजबलंसंनह्यकृतसन्नाहंकृत्वा·काले·ज्योतिःशा

शैलैःशूलैश्चखड्गैश्चविमुक्तैःकपिराक्षसैः॥भविष्यत्यावृताभूमिर्मांसशोणितकर्दमा॥२१॥क्षि
प्रमद्यदुराधर्षांपुरींरावणपालितां॥अभियामजवेनैवसर्वतोहरिभिर्वृताः॥२२॥इत्येवं
तुवदन्वीरोलक्ष्मणंलक्ष्मणाग्रजः॥तस्मादवातरच्छीघ्रंपर्वताग्रान्महाबलः॥२३॥अवती
र्यंतुधर्मात्मातस्माच्छैलात्सराघवः॥परैःपरमदुर्द्धर्षंददर्शबलमात्मनः॥२४॥सन्नह्यतुस
ससुग्रीवःकपिराजबलंमहत्॥कालज्ञोराघवःकालेसंयुगायाभ्यचोदयत्॥२५॥ततःका
लेमहाबाहुर्बलेनमहतावृतः॥प्रविष्टःपुरतोधन्वीलंकामभिमुखःपुरीं॥२६॥तौविभीषण
सुग्रीवोहनूमान्जांबवान्नलः॥ऋक्षराजस्तथानीलोलक्ष्मणश्चान्वयुस्तदा॥२७॥ततःप
श्चात्सुमहतीपतनर्क्षवनौकसां॥प्रच्छाद्यमहतींभूमिमनुयातिस्मराघवं॥२८॥शैलशृं
गाणिशतशःप्रवृद्धांश्चमहीरुहान्॥जगृहुःकुंजरप्रख्याःवानराःपरवारणाः॥२९॥तौत्व
दीर्घेणकालेनभ्रातरौरामलक्ष्मणौ॥रावणस्यपुरींलंकामासेदतुररिंदमौ॥३०॥

स्त्रोक्तकाले·संयुगाययुद्धायाभ्यचोदयत्॥२५॥कालेस्वरशास्त्रोक्तेयुद्धयोग्येकालेप्रविष्टः
प्रवेष्टुंप्रस्थितः॥२६॥२७॥ऋक्षवनौकसांपतनेनेतिछेदः॥२८॥परवारणाः शत्रुनिवारकाः॥२९॥३०

शीतमुदकंतद्वतोजलाशयान् फलवंतिवनानिचपरिगत्य बलौघंव्यूह्यव्यूहविशेषपूर्वकं संविभज्य
विभागेनस्थापयित्वा॥११॥ आख्यातप्राया इमेश्लोकाः॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥ यद्वनक्षत्राण्य

परिगत्योदकंशीतंवनानिफलवंतिच॥ बलौघंसंविभज्येमंव्यूह्यतिष्ठामलक्ष्मण॥११॥ लो
कक्षयकरंभीमंभयंपश्याम्युपस्थितं॥ निबर्हणंप्रवीराणांऋक्षवानररक्षसां॥१२॥ वाताहि
परुषंवांतिकंपतेचवसुंधरा॥ पर्वताग्राणिवेपंतेनदंतिधरणीधराः॥१३॥ मेघाःक्रव्यादसंका
शाःपरुषाःपरुषस्वराः॥ क्रूरंक्रूरंप्रवर्षंतेमिश्रंशोणितबिंदुभिः॥१४॥ रक्तचंदनसंकाशासं
ध्यापरमदारुणा॥ ज्वलच्चनिपतत्येनदादित्यादग्निमंडलं॥१५॥ आदित्यमभिवाश्यंतिजन
यंतोमहद्भयं॥ दीनादीनस्वराःक्रूराश्चाप्रशस्तामृगद्विजाः॥१६॥ रजन्यामप्रशस्ताश्चसंतापयंति
चंद्रमाः॥ कृष्णरक्तांशुपर्यंतोयथालोकस्यसंक्षये॥१७॥ ह्रस्वोरुक्षोप्रशस्तश्चपरिवेषःसुलोहि
तः॥ आदित्यमंडलेनीलंलक्ष्मलक्ष्मणदृश्यते॥१८॥ दृश्यतेनयथावच्चनक्षत्राण्यभिवर्त्तंते॥ यु
गांतमिवलोकस्यपश्यलक्ष्मणशंसति॥१९॥ काकाःश्येनास्तथागृध्रानीचैःपरिपतंतिच।
शिवाश्चाप्यशुभावाचःप्रवदंतिमहास्वनाः॥२०॥

भिवर्त्तंतेप्रकाशगत्यादिकंनचयथावद्दृ
श्यतेइत्यन्वयः हेलक्ष्मणउक्तदुर्निमित्तजातंलोकस्ययुगांतंशंसतीवपश्य॥१९॥ श्येनादयोनीचैर्निपतंति॥

मध्यमेगुल्मे अतिदुर्जयरावणेंद्रजिदधिष्ठितयोरुत्तरपश्चिमद्वारयोर्मध्येवायुदिशितदुभयद्वारनिरोधकः
मध्यमणिन्यायेनसहायंकर्तुंसुग्रीवःसमतिष्ठतेत्यर्थः॥४१॥सर्वैर्हरिश्रेष्ठैःद्वाररोधनियुक्तेभ्योवसि

प्रजंघतरसाभ्यांचवीरैरन्यैश्चसंगतः॥मध्यमेचस्वयंगुल्मेसुग्रीवःसमतिष्ठत॥४१॥सहस
स्रैर्हरिश्रेष्ठैःसुपर्णपवनोपमैः॥वानराणांनुषड्विंशत्कोट्यःप्रख्यातयूथपाः॥४२॥निपीड्योपनि
विष्टाश्चसुग्रीवोयत्रवानरः॥शासनेनतुरामस्यलक्ष्मणःसविभीषणः॥४३॥द्वारेद्वारेहरीणां
नुकोटिकोटिर्न्यवेशयत्॥पश्चिमेनतुरामस्यसुषेणःसहजांबवान्॥४४॥अदूरान्मध्यमेगु
ल्मेतस्थौबहुबलानुगः॥तेतुवानरशार्दूलाःशार्दूलाइवदंष्ट्रिणः॥गृहीत्वाद्रुमशैलाग्रान्
हृष्टायुद्धायतस्थिरे॥४५॥सर्वेविकृतलांगूलाःसर्वेदंष्ट्रानखायुधाः॥सर्वेविकृतचित्रां
गाःसर्वेचविकृताननाः॥४६॥दशनागबलाःकेचित्केचिद्दशगुणोत्तराः॥केचिन्नागसहस्रस्य
ल्य बभूवुस्तुविक्रमाः॥४७॥

मु ख्यैः प्रख्यातयूथपाःषड्विंशत्कोट्यः अप्रख्यातयूथपानांतत्सेनानांच
गणनाभावइतिभावः॥४२॥४३॥द्वारनिरोधनियुक्तसेनाप्रमाणामाह॰द्वारेइति॥४४॥अदूरात्पश्चि
मेनआसन्नपश्चभागावष्टंभेन॥४५॥विकृतलांगूलाःक्रोधामर्षवदशादितिशेषः॥४६॥दशगुणो
त्तराःशतनागबलाःनागसहस्रस्यनागसहस्रेण॥४७॥ ॥ श्र ॥

117

३१॥ यथानिदेशं रामनिदेशमनतिक्रम्य संपीड्य लंकां रुध्वा ॥३२॥ तस्यैव प्रपंचो लंकायाइति । उत्तरद्वारं रुरोध तद्वारनिरोधकमात्मबलेञ्जगोप च ॥३३॥ उक्तमेवार्थं स्थैर्यायाह लंकामिति ॥३४॥ तद्वारं तद्वाररो

पताकामालिनीं रम्यामुद्यानवनशोभितां ॥ चित्रवप्रां सुदुष्प्रापामुच्चैः प्राकारतोरणां ॥३१॥ तां सुरैरपि दुर्द्धर्षां रामवाक्यप्रचोदिताः ॥ यथानिदेशं संपीड्य न्यविशंत वनौकसः ॥३२॥ लंकायास्तूत्तरद्वारं शैलशृंगमिवोन्नतं ॥ रामः सहानुजो धन्वी जुगोप च रुरोध च ॥३३॥ लंकामुपनिविष्टश्च रामो दशरथात्मजः ॥ लक्ष्मणानुचरो वीरः पुरीं रावणपालितां ॥३४॥ उत्तरद्वारमासाद्य यत्र तिष्ठति रावणः ॥ नान्यो रामाद्धि तद्द्वारं समर्थः परिरक्षितुं ॥३५॥ रावणाधिष्ठितं भीमं वरुणेनेव सागरं ॥ सायुधै राक्षसैर्भीमैरभिगुप्तं समंततः ॥३६॥ लघूनां त्रासजननं पातालमिव दानवैः ॥ विन्यस्तानि च योधानां बहूनि विविधानि च ॥३७॥ ददर्शायुधजालानि तथैव कवचानि च ॥ पूर्वं तु द्वारमासाद्य नीलो हरिचमूपतिः ॥३८॥ अतिष्ठत्सह मैंदेन द्विविदेन च वीर्यवान् ॥ अंगदो दक्षिणद्वारं जग्राह सुमहाबलः ॥३९॥ ऋषभेण गवाक्षेण गजेन गवयेन च ॥ हनूमान्पश्चिमं द्वारं ररक्ष बलवान्कपिः ॥४०॥

धिकां सेनां ॥३५॥ ३६ लघूनां अल्पवीर्याणां दानवैः पातालमिव गुप्तं राक्षसैर्गुप्तं द्वारमित्यन्वयः विन्यस्तानि । युद्धकाले यथोचितपरिग्रहार्थमिति शेषः ॥३७॥३८॥ ३९ ॥४०॥

५६।५७।५८। आनंतर्यमनंतरकर्त्तव्यं अभिप्रेप्सुः प्राप्तुमिच्छुः क्रमयोगार्थतत्त्ववित् सामाद्युपायानांक्रम
योगंक्रमप्रयोगंतत्साध्यमर्थतत्त्वंतत्प्रयोजनंचवेत्तीतिसः विभीषणस्यानुमतेस्थितइतिशेषः यदिरा
वणोभवंतंशरणमुपेयात्तदालंकाराज्यंतस्यैवदेयमितिविभीषणमतेस्थितइत्यर्थः राजधर्मम

तेनशब्देनमहतासप्राकारासतोरणा ॥ लंकाप्रचलितासर्वासशैलवनकानना ॥५६॥ राम
लक्ष्मणगुप्तासासुग्रीवेणचवाहिनी ॥ बभूवदुर्धर्षतरासर्वैरपिसुरासुरैः ॥५७॥ राघवःसन्नि
वेश्यैवंस्वसैन्यंरक्षसांवधेसंमंत्र्यमंत्रिभिःसार्धंनिश्चित्यचपुनःपुनः ॥५८॥ आनंतर्यमभिप्रे
प्सुःक्रमयोगार्थतत्त्ववित् ॥ विभीषणस्यानुमतेराजधर्ममनुस्मरन् ॥५९॥ अंगदंवालितनयं
समाहूयेदमब्रवीत् ॥ गत्वासौम्यदशग्रीवंब्रूहिमद्वचनात्कपे ॥६०॥ लंघयित्वापुरींलंकां
भयंत्यक्त्वागतव्यथः ॥ भ्रष्टश्रीकंगतैश्वर्यंमुमूर्षोनष्टचेतनं ॥६१॥ ऋषीणांदेवतानांचगंध
र्वाप्सरसांतथा ॥ नागानामथयक्षाणांराज्ञांचरजनीचर ॥६२॥

नुस्मरन्सामादिष्वुपायसा
ध्येर्थेदंडोनप्रयोक्तव्यः प्रजानाशहेतुरित्येवंरूपंराजधर्ममनुचिंतयन् ॥५९॥ इदंवक्ष्यमाणं
अंगदमाहूयाब्रवीत् ॥६०॥ लंघयित्वासमुद्रंगतव्यथोनिरुपद्रवभयंत्यक्त्वात्वद्बलंतृणीकृत्यलं
कामुपारणाध्वं इतिशेषः अतोभ्रष्टेत्यादिनादृशंब्रूहीत्यन्वयः ॥६१॥६२॥ ॥

अमोघवलाः ओघसंख्यनागवलाः ॥४५॥ शलभानामिति उत्पातकाले इति शेषः ॥४९॥ संपतद्भिराकाशंपूर्णं निविष्टे मेदिनीपूर्णा ॥५०॥ कृत्तवनौकसां शतसहस्राणां शतं कोटिरित्यर्थः एवं च कोटिसंख्याः पतनाल्लंकाद्वाराण्युपाजग्मुः पतनार्द्धेत्यत्र संधिरार्षः एते पूर्वं नियुक्ताधिका इति बोध्यं अन्येऽवशिष्टाः

संति चौघबलाः केचित्केचिच्छतगुणोत्तराः ॥ अप्रमेयबलाश्चान्ये तत्रासन्हरियूथपाः ॥४८॥ अद्भुतश्च विचित्रश्च तेषामासीत्समागमः ॥ तत्र वानरसैन्यानां शलभानामिवोद्गमाः ॥४९॥ प्रतिपूर्णमिवाकाशं संपूर्णेव च मेदिनी ॥ लंकामुपनिविष्टैश्च संपतद्भिश्च वानरैः ॥५०॥ शतशतसहस्राणां पतनार्द्धवनौकसां ॥ लंकाद्वाराण्युपाजग्मुरन्ये योद्धुं समंततः ॥५१॥ आवृतः स गिरिः सर्वैस्तैः समंतात्प्लवंगमैः ॥ अयुतानां सहस्रं च पुरीं तामभ्यवर्त्तत ॥५२॥ वानरैर्बलवद्भिश्च बभूव द्रुमपाणिभिः ॥ सर्वतः संवृता लंका दुष्प्रवेशापि वायुना ॥५३॥ राक्षसा विस्मयं जग्मुः सहसाभिनिपीडिताः ॥ वानरैर्मेघसंकाशैः शक्रतुल्यपराक्रमैः ॥५४॥ महांछब्दोऽभवत्तत्र बलौघस्याभिवर्त्ततः ॥ सागरस्येव भिन्नस्य यथा स्यात्सलिलस्वनः ॥५५॥

समंततो योद्धुं परितो योद्धुं जग्मुः ५१ स गिरिस्त्रिकूटः अयुतानां सहस्रं च पुरीं तामभ्यवर्त्ततः ॥ सर्वद्वारवर्त्तिस्वसेनासर्ववृत्तांतग्रहणार्थं संचरतामिति शेषः ॥५२॥५५॥५४॥ बलौघस्य वानरीयस्य ॥ अभिवर्त्ततोऽभिवर्त्तमानस्य भिन्नस्य सारस्य कतसेतुविभेदनस्य भूतोपमेयं ॥५५॥

शरणागतिंविनाजीवनंराज्यंचसुतरांदुर्लभमित्याह· धर्मात्मेत्यादि· इहागत्यमांशरणंप्राप्तोविभीषणः इदंलंकैश्वर्यमकंटकंत्वद्रूपकंटकरहितंध्रुवंप्राप्नोति· तत्प्राप्तियोग्यतांधर्मात्मेत्यादिविशेषणैर्दर्शयतिधर्मात्माधर्मप्रधानोनित्यंधर्मचिन्तकश्च· इदमैश्वर्यस्यसाक्षान्निदानंराक्षसश्रेष्ठइत्य

धर्मात्माराक्षसश्रेष्ठःसंप्राप्तोयंविभीषणः॥लंकैश्वर्यमिदंश्रीमान्ध्रुवंप्राप्नोत्यकंटकं॥६८॥
नहिराज्यमधर्मेणभोक्तुंक्षणमपित्वया॥शक्यंमूर्खसहायेनपापेनाविदितात्मना॥६९॥

नेनत्वदनंतरंन्याय्यंतस्यराज्यमितिदर्शितं· श्रीमानित्यनेनतदैश्वर्यप्रापकाशेषलक्षणवत्वंमांप्राप्तइत्यनेनतत्प्रापकसमग्रसामग्रीसंपद्दर्शिता॥६८॥ ननुमयिजीवतिकथंलंकैश्वर्यप्राप्तिस्तस्येत्यत्राह· नहीति· अधर्मेणान्याय्येननशक्यमित्यत्रहेतुर्मूर्खसहायेनेति· विभीषणायमयाराज्यस्यदत्तत्वात्तवतद्भोगोन्याय्यइतिभावः॥६९॥

यच्चपापंकृतंकृतंप्राणिनांनानाप्रकारपीडनंकृतंतत्करणीभूतः स्वयंभूवरदानजोदर्पस्तेत्वत्तःसंबंधीअद्य
विगतः॥६३॥ दंडंधारयमाणः निरुद्धासंपुरोपरोधरूपंनिग्रहंकुर्वाणः॥६४॥ कृष्णादीनांपदवींगमिष्य
सितद्धत्वापिमरणंभविष्यतीतिभावः किंचयुधिस्थिरत्वेस्वयंभूपासकस्यतेतदनुग्रहान्मत्तो

यच्चपापंकृतंमोहादवलिप्तेनराक्षस॥नूनंतेविगतोदर्पःस्वयंभूवरदानजः॥६३॥ यस्यदंड
धरस्तेहंदाराहरणकर्शितः॥दंडंधारयमाणस्तुलंकाद्वारेव्यवस्थितः॥६४॥पदवींदेवता-
नांचमहर्षीणांचराक्षस॥राजर्षीणांचसर्वेषांगमिष्यसियुधिस्थिरः॥६५॥ बलेनयेनवै
सीतांमाययाराक्षसाधम॥मामतिक्रामयित्वात्वंहृतवांस्तन्निदर्शय॥६६॥ अराक्षसमि
मंलोकंकर्तास्मिनिशितैःशरैः॥नचेच्छरणमभ्येषितामादायतुमैथिलीं॥६७॥

मरणेपुण्यलोकप्राप्तिस्तवेतिभावः॥राजाभिर्धृतदंडास्तुकृत्वापापानिमानवाः निर्मलाःस्वर्ग
मायांतिसंतःसुकृतिनोयथेत्युक्तेः॥६५॥ युध्यस्वमापलायिनोभूरित्याह बलेनेत्यादि॥६६॥
यदिमरणभीत्यायुयुत्सानास्तितदापितेहितंब्रवीमीत्याह अराक्षसमिति॥६७॥

रामा·यु·
१२०

७५ तद्रामवचनमिति संक्षेपकथनं वक्ष्यमाणस्य च ७६ तस्यैव प्रश्नं चोद्दूतोऽहमिति· यदीत्यसंदिग्धे संदिग्धवचनं· वेदाः प्रमाणं चेदितिवत्· श्रोत्रमागतएव· एतेन स्वस्य स्वीयानां च बलादि तुभ्यं न वा-

120

ततस्तस्याविदूरेण निपत्य हरिपुंगवः।। दीप्ताग्निसदृशस्तस्थावंगदः कनकांगदः।। ७५।। तद्रामवचनं सर्वं अन्यूनाधिकमुत्तमम्।। सामात्यं श्रावयामास निवेद्यात्मानमात्मना।। ७६।। दूतोऽहं कोशलेंद्रस्य रामस्याक्लिष्टकर्मणः।। वालिपुत्रोऽंगदो नाम यदि ते श्रोत्रमागतः।। ७७।। आह त्वां राघवो रामः कौशल्यानंदवर्धनः।। निष्पत्य प्रतियुध्यस्व नृशंस पुरुषो भव।। ७८।। हंतास्मि त्वां सहामात्यं सपुत्रज्ञातिबांधवं।। निरुद्विग्नास्त्रयो लोका भविष्यंति हते त्वयि।। ७९।। देवदानवयक्षाणां गंधर्वोरगरक्षसां।। शत्रुमद्योद्धरिष्यामि त्वामृषीणां च कंटकं।। ८०।। विभीषणस्य चैश्वर्यं भविष्यति हते त्वयि।। न चेत्सत्कृत्य वैदेहीं प्रणिपत्य प्रदास्यसि।। ८१।। इत्येवं परुषं वाक्यं ब्रुवाणे हरिपुंगवे।। अमर्षवशमापन्नो निशाचरगणेश्वरः।। ८२।। ततः स रोषमापन्नः शशास सचिवांस्तदा।। गृह्यतामिति दुर्मेधा वध्यतामिति चासकृत्।। ८३।। रावणस्य वचः श्रुत्वा दीप्ताग्निमिव तेजसा।। जगृहुस्तं ततो घोराश्चत्वारो रजनीचराः।। ८४।।

च्यमेव त्वया ज्ञातत्वादिति भावः

राम०
१२०

७७ निष्पत्य· पुरान्निष्क्रम्य· पुरुषो भव शूरो भव ।। ७८ ।। ७९ ।। ८० ।। वैदेहीं सत्कृत्यत्तमापनं कृत्वा मां प्रणिपत्य न चेत्प्रदास्यसि· तदा त्वयि हते विभीषणस्यैश्वर्यं भविष्यति ।। ८१ ।। ८२ ।। ८३ ।। ८४

शरणव्रजनेतुजीविताकांशेनराज्यंचतवापिदास्यामितदभावेतुदंडाधिकारिणामयासर्वथावध्यस्त्वं
युद्धवध्यश्चपरमंहितंतवेतिपरमदयालुर्भगवान्देवोपदिशतियुध्यस्वेतिमामौधर्तिंकृत्वायुध्य
स्व·युध्यस्वमौधतिंकृत्वेतिपाठः मच्छरैः पापशोधनाधिकृतस्यममशरैरणेशांतःसमाप्तस्त
तएवहेतोःशांतआजन्मकृतात्पापात्पूतोभविष्यसि· दर्शननामस्मरणैःपापशोधनफलकएवायमव

युध्यस्वमाधृतिंकृत्वाशौर्यमालंब्यराक्षस॥मच्छरैस्त्वंरणेशांतस्ततःशांतोभविष्यसि॥७०॥यद्या
विशसिलोकांस्त्रीन्पक्षिभूत्वानिशाचर॥ममचक्षुःपथंप्राप्यनजीवन्प्रतियास्यसि॥७१॥ब्रवीमि
त्वांहितंवाक्यंक्रियतामौर्ध्वदेहिकं॥सुदृष्टाक्रियतांलंकाजीवितंतेमयिस्थितं॥७२॥इत्युक्तःस
तुतारेयोरामेणाक्लिष्टकर्मणा॥जगामाकाशमाविश्यमूर्त्तिमानिवहव्यवाट्॥७३॥सोतिपत्यमु
हूर्तेनश्रीमान्रावणमंदिरं॥ददर्शासीनमव्यग्रंरावणंसचिवैःसह॥७४॥

म

तारस्तत्त्वेनज्ञाने तथाज्ञा
नाभावेपिमत्तोमरणेकिंचित्कालोत्तरमुत्तमक्षत्रियकुलेजन्मप्राप्तिरितिभावः॥७०॥पुनरपिधैर्यायवध
निश्चयमवलंब्यैवनदुश्चिन्तकृत्यंकुर्वित्युपदिशति·यदीति·नसदेशोस्तियत्रनमेचक्षुःप्राप्तिरितिभा
वः॥७१॥देहादूर्ध्वंप्राप्यऊर्ध्वदेहःपरलोकस्तत्रहितंदानादिकंऔर्ध्वदेहिकं सुदृष्टाक्रियतां·इतःपरंत
द्दर्शनाभावात्॥७२॥मूर्त्तिमान्हव्यवाडितिवानरवेषोग्निरित्यर्थः॥७३॥अतिपत्यअतिक्रम्य·मार्गमितिशेषः॥७४॥

पर्यक्रामत· सर्वं वलरक्षार्थं सर्वद्वारवृत्तांतग्रहणार्थं च: नक्षत्राणि अश्विन्यादीनि ॥९५॥ अक्षौहिणीशतं· आर्षो ह्रस्वः अक्षादूहिन्यामिति वृद्धिः यावंतोक्षौहिण्यां गजाश्वरथपदातयस्तत्संख्यावान राइत्यर्थः शतशब्दोनंतवाची· सागरं चाभिवर्त्ततां सागरपर्यंतमभिव्याप्य वर्त्तमानामित्यर्थः ॥९६॥९७

स तु द्वाराणि संयम्य सुग्रीववचनात्कपिः ॥ पर्यक्रामत दुर्द्धर्षो नक्षत्राणीव चंद्रमाः ॥९५॥ तेषामक्षौहिणिशतं समवेक्ष्य वनौकसां ॥ लंकामुपनिविष्टानां सागरं चाभिवर्त्ततां ॥९६॥ राक्षसा विस्मयं जग्मुस्त्रासं जग्मुस्तथापरे ॥ अपरे समरे हर्षाद्धर्षमेवोपपेदिरे ॥९७॥ कृत्स्नं हि कपिभिर्व्याप्तं प्राकारपरिखांतरं ॥ ददृशू राक्षसा दीनाः प्राकारं वानरीकृतं ॥९८॥ हाहाकारमकुर्वंत राक्षसा भयमागताः ॥९९॥ तस्मिन्महाभीषणके प्रवृत्ते कोलाहले राक्षसराजयोधाः ॥ प्रगृह्य रक्षांसि महायुधानि युगांतवाता इव संविचेरुः ॥१००॥ इत्यार्षे श्रीरा० युद्ध० एकचत्वारिंशः सर्गः ॥४१॥ ततस्ते राक्षसास्तत्र गत्वा रावणमंदिरं ॥ न्यवेदयन्पुरीं रुद्धां रामेण सह वानरैः ॥१॥ रुद्धां तु नगरीं श्रुत्वा जातक्रोधो निशाचरः ॥ विधानं द्विगुणं कृत्वा प्रासादं चाप्यरोहत ॥२॥

वानरीकृतं· वानररूपनिर्मितमिव कृतं ॥९८॥९९॥ राक्षसराजयोधरूपाणि रक्षांसीत्यर्थः ॥१००॥ अनष्टमानः क्र० ॥३८॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके युद्धकांडे एकचत्वारिंशः सर्गः ॥४१॥ ततन इति ॥१॥ विधानं द्वाराणां रक्षाविधानमित्यर्थः ॥२॥

ग्राहयामास· स्वेच्छया ग्रहणं कारयामास· किमर्थमिदं तत्राह· बलमित्यादि॥८५ बलमेव दर्शयति· स ता
नित्यादि॥८६॥८७॥ वालिपुत्रः प्रासादशिखरं ददर्शेति शेषः दृष्ट्वा च तच्चक्राम· पदाक्रांतवान्· तदाक्रां

ग्राहयामास तारेयः स्वयमात्मानमात्मवान्॥ बलं दर्शयितुं वीरो यातुधानगणे तदा॥८५॥ स ता
न्बाहुद्वयासक्तानादाय पतगानिव॥ प्रासादं शैलसंकाशमुत्पपातांगदस्तदा॥८६॥ तस्योत्पतन
वेगेन निर्धूतास्तत्र राक्षसाः॥ भूमौ निपतिताः सर्वे राक्षसेंद्रस्य पश्यतः॥८७॥ ततः प्रासादशिख
रं शैलशृंगमिवोन्नतं॥ चक्राम राक्षसेंद्रस्य वालिपुत्रः प्रतापवान्॥८८॥ पफाल च तदाक्रांतं दश
ग्रीवस्य पश्यतः॥ पुरा हिमवतः शृंगं वज्रेणेव विदारितं॥८९॥ भंक्त्वा प्रासादशिखरं नाम विश्रा
व्य चात्मनः॥ विनद्य सुमहानादमुत्पपात विहायसा॥९०॥ व्यथयन्राक्षसान्सर्वान्हर्षयंश्चापि वा
नरान्॥ स वानराणां मध्ये तु रामपार्श्वमुपागतः॥९१॥ रावणस्तु परं चक्रे क्रोधं प्रासादधर्षणात्॥
विनाशं चात्मनः पश्यन्निश्वासपरमोऽभवत्॥९२॥ रामस्तु बहुभिर्हृष्टैर्विनदद्भिः प्लवंगमैः॥ वृतो
रिपुवधाकांक्षी युद्धायैवाभिवर्त्तत॥९३॥ सुषेणस्तु महावीर्यो गिरिकूटोपमो हरिः॥ बहुभिः सं
वृतस्तत्र वानरैः कामरूपिभिः॥९४॥

तं च प्रासादशिखरं पश्यतो दशग्रीवस्य पफाल शतधा विशीर्णमभू
त्॥८८॥८९॥९०॥९१॥ पश्यन्निति· एकोऽपि समग्रं मम बलं पराभूय निर्भयं गच्छति एवंविधेष्वनेकेषु मन्त्रा
शोघतेषु कथं जीवनमिति पर्यालोचयन्नित्यर्थः॥९२॥ युद्धायैवाभिवर्त्तत अभ्यवर्त्तत॥९३॥९४॥

गिरिशृंगाणिसूक्ष्माणि·शृंगंस्यात्पर्वतस्याग्रेशिखरंखंडशैलकेइतिनिघंटुः॥१२॥प्रेक्षततःप्रेक्षंतमना
दृत्येत्यर्थः·राघवस्यप्रियोयःकामोमनोरथस्तत्सिध्यर्थं·आरुरुहुःलंकांलंकाप्राकारमित्यर्थः॥१३

उद्यम्यगिरिशृंगाणिमहांतिशिखराणिच॥तरूंश्चोत्पाद्यविविधास्तिष्ठंतिहरियूथपाः॥१२॥
प्रेक्षतोराक्षसेंद्रस्यतान्यनीकानिभागशः॥राघवप्रियकामार्थंलंकामारुरुहुस्तदा॥१३॥तेता
म्रवक्त्राहेमाभारामार्थेत्यक्तजीविताः॥लंकामेवाभ्यवर्त्तंतसालभूधरयोधिनः॥१४॥तेद्रुमैः।
पर्वताग्रैश्चमुष्टिभिश्चप्लवंगमाः॥प्राकाराग्राण्यसंख्यानिममंथुस्तोरणानिच॥१५॥परिखा
न्पूरयंतश्चप्रसन्नसलिलाशयान्॥पांशुभिःपर्वताग्रैश्चतृणैःकाष्ठैश्चवानराः॥१६॥ततःसहस्र
यूथाश्चकोटियूथाश्चयूथपाः॥कोटियूथशताश्चान्येलंकामारुरुहुस्तदा॥१७॥कांचनानि
प्रमर्दंतस्तोरणानिप्लवंगमाः॥कैलासशिखराग्राणिगोपुराणिप्रमथ्यच॥१८॥आप्लवंतःप्ल
वंतश्चगर्जंतश्चप्लवंगमाः॥लंकांतामपिधावंतिमहावारणसन्निभाः॥१९॥जयत्युरुबलोरा
मोलक्ष्मणश्चमहाबलः॥राजाजयतिसुग्रीवोराघवेणाभिपालितः॥२०॥

॥१४॥१५॥परिखा
नितिपुंस्त्वमार्षं॥१६॥१७॥कांचनानि·तन्मयानिकैलासशिखराग्राणितद्वदुच्चावचानिगो
पुराणि॥१८॥आप्लवंतःसमंतात्प्लवंतःप्लवंतःप्राकाराभिमुखंप्लवंतः॥१९॥२०॥

राम·
१२२

३ कपिलीकृतां कपिलवर्णां वत्सदृशीकृतां ॥ ४ ॥ ५ ॥ मुदितः पुप्लुवे नामनामशब्दो वाक्यालंकारे प्राकारसमी
पमितिशेषः रामाधिरूढ वानरस्तु वनं रामेउपचर्यते ॥ ६ ॥ मनसाजगाम ससार ॥ ७ ॥ मत्कृतेमन्निमित्तं

सददर्शावृतांलंकां सशैलवनकाननां ॥ असंख्येयैर्हरिगणैः सर्वतोयुद्धकांक्षिभिः ॥ ३ ॥ सदृष्ट्वावा
नरैः सर्वैः वसुधांकपिलीकृतां ॥ कथंक्षपयितव्याः स्युरितिचिंतापरोभवत् ॥ ४ ॥ सचिंतयित्वासु
चिरंधैर्यमालंब्यरावणः ॥ राघवंहरियूथांश्चददर्शायतलोचनः ॥ ५ ॥ राघवः सहसैन्येनमु
दितोनामपुप्लुवे ॥ लंकांददर्शगुप्तांवैसर्वतोराक्षसैर्वृतां ॥ ६ ॥ दृष्ट्वाशारथिर्लंकांचित्रध्वज
पताकिनीं ॥ जगाममनसासीतांदूयमानेनचेतसा ॥ ७ ॥ अत्रसामृगशावाक्षीमत्कृतेजनका
त्मजा ॥ पीड्यतेशोकसंतप्ताकृशास्थंडिलशायिनी ॥ ८ ॥ निपीड्यमानांधर्मात्मावैदेहीमनुचिं
तयन् ॥ क्षिप्रमाज्ञापयद्रामोवानरान्द्विषतांवधे ॥ ९ ॥ एवमुक्तेतुवचसिरामेणाक्लि
ष्टकर्मणा ॥ संघर्षमाणाः प्लवगाः सिंहनादैरपूरयन् ॥ १० ॥ शिखरैर्विकिरामैतांलंकांमु
ष्टिभिरेववा ॥ इतिस्मदधिरेसर्वेमनांसिहरियूथपाः ॥ ११ ॥

दा

शोकसंतप्तापिपीड्यतेमदर्थंरामस्यैवंम
हान्क्लेशोजायतइतिखिन्नाभवतीत्यर्थः ॥ ८ ॥ निपीड्यमानां उक्तरीत्येतिशेषः आज्ञापयत् आज्ञप्त
वान् ॥ ९ ॥ संघर्षमाणाः अग्रेभवितुंपरस्परंस्पर्धमानाः ॥ १० ॥ विकिराम विदारयाम ॥ ११ ॥

२९।यत्रमहावलोरामस्तत्रतस्थावित्यन्वयः॥३०॥गवाक्षइतिद्वयंगवाक्षोरामपार्श्वस्थगवाक्षादन्योज्ञेयः॥३१
३२।एतद्वाक्यं-निर्याणज्ञापकं-भीमनिर्घोषंयथातथारजनीचरैरुद्घुष्टंउत्घोषितमभूत्॥३३॥चंद्रव

ऋक्षाणांभीमकोपानांधूम्रःशत्रुनिबर्हणः॥वृतःकोट्यामहावीर्यस्तस्थौरामस्यपार्श्वतः॥२९॥
सन्नद्धस्तुमहावीर्योगदापाणिर्विभीषणः॥वृतोयत्तैस्तुसचिवैस्तस्थौयत्रमहाबलः॥३०॥गजोग
वाक्षोगवयःशरभोगंधमादनः॥समंतात्परिधावंतोररक्षुर्हरिवाहिनीं॥३१॥ततःकोपपरीता।
त्मारावणोराक्षसेश्वरः॥निर्याणंसर्वसैन्यानांद्रुतमाज्ञापयत्तदा॥३२॥एतच्छ्रुत्वातदावाक्यंरा
वणस्यमुखेरितं॥सहसाभीमनिर्घोषमुत्क्रुष्टंरजनीचरैः॥३३।ततःप्रवादिताभेर्यःचंद्रपांडु
पुष्कराः॥हेमकोणैरभिहताःराक्षसानांसमंततः॥३४॥विनेदुश्चमहाघोषाःशंखाःशतसहस्र
शः॥राक्षसानांसुघोराणांमुखमारुतपूरिताः॥३५॥नेबभुःशुकनीलांगाःसशंखारजनीचराः।
विद्युन्मंडलसन्नद्धाःसवलाकाइवांबुदाः॥३६॥

त्पांडुराणिपुष्कराणिमुखानियासांताःपुष्करंकरिहस्ताग्रेवाद्यभांडमुखेजलइत्यमरःहेमकोणै
रभिहताःस्वर्णमयवादनदंडाभिहताः॥३४॥३५।विद्युन्मंडलसंनद्धत्वस्थानेराक्षसेषुभूषणभूषितत्वं
ज्ञेयं॥३६॥

२१ प्राकारंनिपीड्योपनिविश्याइतिसेनाप्रवेशार्थंबहिःप्राकारंभंक्त्वास्थिताःएतस्मिन्नंतरे·बहिःप्राका
रंभंक्त्वासेनाप्रवेशसमयेस्कंधावारस्यसेनानिवेशस्यनिवेशनंव्यूहभावेनस्थापनं॥२२॥तत्प्रकारःपूर्वं

इत्येवंघोषयंतश्चगर्जंतश्चप्लवंगमाः।अभ्यधावंतलंकायाःप्राकारंकामरूपिणः॥२१॥वीरबा
हुःसुबाहुश्चनलश्चपनसस्तथा।निपीड्योपनिविष्टास्तेप्राकारंहरियूथपाः।एतस्मिन्नंतरे
चक्रुःस्कंधावारनिवेशनं॥२२॥पूर्वद्वारंतुकुमदःकोटिभिर्दशभिर्वृतः।आवृत्यबलवांस्तस्थौ
हरिभिर्जितकाशिभिः॥२३॥सहायार्थंतुतस्यैवनिविष्टःप्रसभोहरिः।पनसश्चमहाबाहु
र्वानरैरभिसंवृतः॥२४॥दक्षिणद्वारमासाद्यवीरःशतबलिःकपिः।आवृत्यबलवांस्तस्थौ
विंशत्याकोटिभिर्वृतः॥२५॥सुषेणःपश्चिमद्वारंगत्वातारापिताबली।आवृत्यबलवांस्तस्थौ
कोटिकोटिभिरावृतः॥२६॥उत्तरद्वारमागम्यरामःसौमित्रिणासह।आवृत्यबलवांस्तस्थौ
सुग्रीवश्चहरीश्वरः॥२७॥गोलांगूलोमहाकायोगवाक्षोभीमदर्शनः।वृतःकोट्यामहावीर्यस्त
स्थौरामस्यपार्श्वतः॥२८॥

द्वारमित्यादि·पूर्वादिशब्दाईशानाग्निनिर्ऋतिवायुदिक्पराःनीलादी
नांसाक्षात्पूर्वादिद्वारनिरोधकतायाःप्रागुक्तत्वात्·एवंचतदुपोद्बलनार्थमेषांतत्तत्कोणेस्थितिःपू
र्वद्वारं·पूर्वद्वारोपदिशमित्यर्थः।२३।तस्यैव·ईशानदिग्वर्तिकुमुदस्यैव।२४।।२५।।२६।सुग्रीवश्चेति·अ

यंचवायुकोणस्थइतिप्रागेबोध्यं॥२७।२८॥

अत्रराक्षसास्त्वपरेइत्यर्धंप्रक्षिप्तमितिकतकः॥४५॥४६॥४७॥एतत्युद्धोत्तरंप्रत्यवहारःसेनायाइतिभार
ताह्यभ्यपतेततःप्रत्यवहारोभूत्सैन्यानांराघवाज्ञया·ततोनिविशमानांस्तान्सैनिकान्रावणानुगाःअभिज
ग्मुर्गणाएकेपिशाचक्तइरक्षसांततोभिपततांतेषामदृश्यानांदुरात्मनांअंतर्धानवधंतत्रज्ञश्चकारसविभीष

राक्षसास्त्वपरेभीमाःप्राकारस्थामहींगतान्॥वानरान्भिंडिपालैश्चशूलैश्चैवव्यदारयन्॥४५॥वा
नराश्चापिसंक्रुद्धाःप्राकारस्थान्महींगताः॥राक्षसान्पातयामासुःखमाप्लुत्यस्वबाहुभिः॥४६॥स
संप्रहारस्तुमलोमांसशोणितकर्दमः॥रक्षसांवानराणांचसंबभूवाद्भुतोपमः॥४७॥इत्यार्षेश्रीरा
मायणेयुद्ध॰कांडेद्विचत्वारिंशःसर्गः॥४२॥युध्यतांतुततस्तेषांवानराणांमहात्मनां॥रक्षसांसं
बभूवाथबलरोषःसुदारुणः॥१॥तेहयैःकांचनापीडैर्गजैश्चाग्निशिखोपमैः॥रथैश्चादित्यसंका
शैःकवचैश्चमनोरमैः॥२॥निर्ययूराक्षसावीरानादयंतोदिशोदश॥राक्षसाभीमकर्माणो
रावणस्यजयैषिणः॥३॥वानराणामपिचमूर्वृहतीजयमिच्छतां॥अभ्यधावततांसेनांरक्षसांघो
रकर्मणां॥४॥

ण॥इतितत्रोक्तं·उत्सवमानः॥क॰॥३६॥इतिश्रीयुद्धकांडेद्विचत्वारिंशःसर्गः॥४२॥ ब
लरोषःपरस्परबलदर्शनजोरोषःएतावद्दिनयुद्धेपिबद्धवाएवतिष्ठंतीत्येवंरोषइतिभावः॥१॥कां
चनापीडैःकांचनभूषणवद्भिःअग्निशिखोपमैस्तद्वद्दुर्द्दर्षैः॥२॥निर्ययुरितिअत्रनेनवाल्मीकिनापि

प्रत्यवहारोध्वानितः॥३४॥

सैन्याःसेनायांसमवेतायेसैन्यास्तेसैनिकाश्चतेइत्यमरःसमयेप्रलयकालेपूर्यमाणस्यमहामेघैरितिशेषःवे
गास्तरंगाः॥३७॥येनत्वतिदूरवर्त्तीमलयोपिपूरितःस्वात्तादृशोनादोमुक्तःसानुर्महाप्रस्थःप्रस्थःदाङः

निष्पतंतिततःसैन्याद्दृष्टारावणचोदिताः॥समयेपूर्यमाणस्यवेगाइवमहोदधेः॥३७॥ततोवा
नरसैन्येनमुक्तोनादःसमंततः॥मलयःपूरितोयेनससानुप्रस्थकंदरः॥३८॥शंखदुंदुभिनिर्घो
षःसिंहनादस्तरस्विनां॥पृथिवींचांतरिक्षंचसागरंचाभ्यनादयत्॥३९॥गजानांबृंहितैःसार्द्धंहया
नांहेषितैरपि॥रथानांनेमिनिर्घोषैरक्षसांपदनिस्वनैः॥४०॥तस्मिन्नंतरेघोरःसंग्रामःसम
पद्यत॥रक्षसांवानराणांचयथादेवासुरेपुरा॥४१॥तेगदाभिःप्रदीप्ताभिःशक्तिशूलपरश्वधैः।
निजघ्नुर्वानरान्सर्वान्कथयंतःस्वविक्रमान्॥४२॥तथावृक्षैर्महाकायाःपर्वताग्रैश्चवानराः॥
निजघ्नुस्तानिरक्षांसिनखैर्दंतैश्चवेगिनः॥४३॥राजाजयतिसुग्रीवइतिशब्दोमहानभूत्॥
राजन्जयजयेत्युक्त्वास्वस्वनामकथांततः॥४४॥

३८।अभ्यनादयत्‌प्रतिध्वनियुक्तानकरोत्॥३९॥गजानांबृंहितैरित्यादीनामभ्यनादयन्नित्यनेनान्वयः
४०।देवासुरे‌तद्युद्धे।४१॥४२।वृक्षामदनांयुद्धसाधनानि‌पर्वताग्रादीनिक्रूरक्रूरतराणामितिविवेकः
४३।राजन्रावणजयजयेतिरक्षसामुक्तिःस्वस्वनामरूपांकथांशब्दंचोक्त्वावानरान्व्यदारयन्नितिसंबंधः॥४४॥

१५॥१६॥ केशैःशाड्वलवत्यःकेशशाड्वलाःशरीराण्येवसंघाताःकाष्ठसंचयास्तद्वहाःप्रसुस्रुःप्रसुस्रुवुरित्यर्थः
१७॥ अनुक्रांतानांक्रमेणयुद्धकथनमाजघानेति·शत्रुसैन्यविदारणमित्यंगदविशेषणं॥१८॥ तस्येंद्रजि

वानराश्चपरेघोराराक्षसैरपरैःसह॥द्वंद्वंसमीयुःसहसायुध्वाचबहुभिःसह॥१५॥तत्रासी
त्सुमहद्युद्धंतुमुलंरोमहर्षणं॥रक्षसांवानराणांचवीराणांजयमिछतां॥१६॥हरिराक्षस
देहेभ्यःप्रसृताःकेशशाड्वलाः॥शरीरसंघातवहाःप्रसुस्रुःशोणितापगाः॥१७॥आजघा
नेंद्रजित्क्रुद्धोवज्रेणेवशतक्रतुः॥अंगदंगदयावीरंशत्रुसैन्यविदारणं॥१८॥तस्यकांच
नचित्रांगंरथंसाश्वंससारथिं॥जघानगदयाश्रीमानंगदोवेगवान्हरिः॥१९॥संपातिस्तुप्र
जंघेनत्रिभिर्बाणैःसमाहतः॥निजघानाश्वकर्णेनप्रजंघंरणमूर्धनि॥२०॥जंबुमालीरथस्थ
स्तुरथशक्त्यामहाबलः॥विभेदसमरेक्रुद्धोहनूमंतंस्तनांतरे॥२१॥तस्यतंरथमास्थाय
हनूमान्मारुतात्मजः॥प्रममाथतलेनाशुसहतेनैवरक्षसा॥२२॥नदन्प्रतपनोघोरोनलं
सोभ्यनुधावत॥नलःप्रतपनस्याशुपातयामासचक्षुषी॥२३॥

तःतस्यरथंतस्यैवगदयास्वा
पतंतयाजघान॥१९॥ अश्वकर्णोवृक्षविशेषःतेनप्रजंघमाजघान·संपातिरित्यनुकर्षः॥२०॥ र
थस्याशक्तिःरथशक्तिः॥२१॥ तेनरक्षसासहतस्यरथंप्रममाथ·तेनजंबुमालीमृतइतिगम्यते
॥२२॥२३॥

अन्योन्यमभिधावतां द्वंद्वयुद्धार्थमिति भावः॥५॥ तान्येव द्वंद्वान्याह॰ अंगदेनेति॥६॥ प्रजंघेन तदाख्यरक्षसा संपातिस्त्रिभिर्बाणैः प्रजंघेन समाहत इति लिंगात्॰ दुर्धर्षणः दुःसहः आरब्धो युद्धमारब्धवान्॥७॥ शत्रु

एतस्मिन्नंतरे तेषामन्योन्यमभिधावतां। रक्षसां वानराणां च द्वंद्वयुद्धमवर्त्तत॥५॥ अंगदेनेंद्रजित्सार्द्धं वालिपुत्रेण राक्षसः। अयुध्यत महातेजास्त्र्यंबकेन यथांधकः॥६॥ प्रजंघेन च संपातिर्नित्यं दुर्द्धर्षणो रणे। जंबुमालिनमारब्धो हनूमानपि वानरः॥७॥ संगतस्तु महाक्रोधो राक्षसो रावणानुजः। समरे तीक्ष्णवेगेन शत्रुघ्नेन विभीषणः॥८॥ तपनेन गजः सार्द्धं राक्षसेन महाबलः। निकुंभेन महातेजा नीलोपि समयुध्यत॥९॥ वानरेंद्रस्तु सुग्रीवः प्रघसेन सुसंगतः। संगतः समरे श्रीमान् विरूपाक्षेण लक्ष्मणः॥१०॥ अग्निकेतुः सुदुर्धर्षो रश्मिकेतुश्च राक्षसः। मित्रघ्नो यज्ञकोपश्च रामेण सह संगताः॥११॥ वज्रमुष्टिश्च मैंदेन द्विविदेनाशनिप्रभः। राक्षसाभ्यां सुघोराभ्यां कपिमुख्यौ समागतौ॥१२॥ वीरः प्रतपनो घोरो राक्षसो रणदुर्द्धरः। समरे तीक्ष्णवेगेन नलेन समयुध्यत॥१३॥ धर्मस्य पुत्रो बलवान्सुषेण इति विश्रुतः। स विद्युन्मालिना सार्द्धमयुध्यत महाकपिः॥१४॥

घ्नेन। तदाख्येन राक्षसा मित्रघ्नेनेति क्वचित्पाठः॥८॥९॥१०॥११॥ राक्षसाभ्यां॰ वज्रमुष्ट्यशनिप्रभाभ्यां॥१२॥१३॥१४॥

रामा॰यु॰
१२६

३३॥३४॥३५॥३६॥ अपक्रम्यावरुह्य ॥३७॥३८॥३९॥ अचिंत्याचिंतयित्वा तांपूर्वगृहीतां शिलां ॥४०॥४१

द्विविदंवानरेंद्रंतुद्रुमयोधिनमाहवे ॥ शरैरशनिसंकाशैः संविव्याधाशनिप्रभः ॥३३॥ सश
रैरभिविद्धांगो द्विविदः क्रोधमूर्छितः ॥ सालेनसरथंसाश्वंनिजघानाशनिप्रभं ॥३४॥ विद्यु
न्मालीरथस्थस्तुशरैः कांचनभूषणैः ॥ सुषेणंताडयामासननादचमुहुर्मुहुः ॥३५॥ तंरथ
स्थमथो दृष्ट्वासुषेणोवानरोत्तमः ॥ गिरिशृंगेणमहतारथमाशुन्यपातयत् ॥३६॥ लाघवेन
तुसंयुक्तो विद्युन्माली निशाचरः ॥ अपक्रम्यरथात्तूर्णंगदापाणिः क्षितौस्थितः ॥३७॥ ततः ।
क्रोधसमाविष्टः सुषेणो हरिपुंगवः ॥ शिलांसुमहतींगृह्यनिशाचरमभिद्रवत् ॥३८॥ तमापतं
तंगदयाविद्युन्मालीनिशाचरः ॥ वक्षस्यभिजघानाशुसुषेणंहरिपुंगवं ॥३९॥ गदाप्रहारंतंघो
रमचिंत्यप्लवगोत्तमः ॥ तांछिलांपातयामासतस्योरसिमहामृधे ॥४०॥ शिलाप्रहाराभिहतो
विद्युन्मालीनिशाचरः ॥ निष्पिष्टहृदयोभूमौगतासुर्निपपातह ॥४१॥ एवंतैर्वानरैःशूरैःशू
रास्तेरजनीचराः ॥ द्वंद्वेविमथितास्तत्रदैत्याइवदिवौकसैः ॥४२॥ भल्लैःखड्गैर्गदाभिश्चश
क्तितोमरसायकैः ॥ अपविद्धैश्चापिरथैस्तथासांग्रामिकैर्हयैः ॥४३॥ निहतैःकुंजरैर्मत्तैस्तथावान
रराक्षसैः । चक्राक्षयुगदंडैश्चभग्नैर्धरणिसंश्रितैः ॥४४॥

दिवौकसैर्देवैः आर्षः प्रयोगः ॥४२॥४३॥४४॥

126

राम॰
१२६

तीक्ष्णैः शरैर्भिन्नगात्रो नलः प्रतपनस्य चक्षुषी पातयामास नखैराकृष्येति शेषः ग्रसंतमित्यादिना प्रघस
सुग्रीवयोः॥२४॥ सप्तपर्णो वृक्षविशेषः॥२५॥२६॥ चतुर्भिश्चिच्छेद नाधिकैरित्यर्थः॥२७॥ अट्टः शैलम

भिन्नगात्रः शरैस्तीक्ष्णैः क्षिप्रहस्तेन रक्षसा॥ ग्रसंतमिव सैन्यानि प्रघसं वानराधिपः॥२४॥ सु
ग्रीवः सप्तपर्णेन निजघान वेन च॥ प्रपीड्य शरवर्षेण राक्षसं भीमदर्शनं॥२५॥ निजघान
विरूपाक्षं शरेणैकेन लक्ष्मणः॥ अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः॥ मित्रघ्नो यज्ञको
पश्च राममादीपयंश्शरैः॥२६॥ तेषां चतुर्णां रामस्तु शिरांसि समरे शरैः॥ क्रुद्धश्चतुर्भिश्चि
च्छेद घोरैरग्निशिखोपमैः॥२७॥ वज्रमुष्टिस्तु मैन्देन मुष्टिना निहतो रणे॥ पपात सरथः
साश्वः सुराट्ट इव भूतले॥२८॥ निकुंभस्तु रणे नीलं नीलांजनचयप्रभं निर्बिभेद शरै
स्तीक्ष्णैः करैर्मेघमिवांशुमान्॥२९॥ पुनः शरशतेनाथ क्षिप्रहस्तो निशाचरः॥ विभेद स
मरे नीलं निकुंभः प्रजहास च॥३०॥ तस्यैव रथचक्रेण नीलो विष्णुरिवाहवे॥ शिरश्चिच्छेद
समरे निकुंभस्य च सारथेः॥३१॥ वज्राशनिसमस्पर्शो द्विविदश्चाशनिप्रभं॥ जघान गिरि
शृंगेण मिषतां सर्वरक्षसां॥३२॥

मिति कतकः॥ विमानमित्यन्ये॥२८॥२९॥३०॥ रथस्य चक्रं रथचक्रं नि
कुंभस्य च निकुंभस्य तत्सारथेश्च शिरश्चिच्छेद॥३१॥ वज्राशनिसमस्पर्शः तथा क्रूरस्तु क्षिप्रहार इत्यर्थः॥३२॥

३ हत इदं हतेर्लोटि मध्यमपुरुषबहुवचनं॰ हननं कुरुतेत्यर्थः दारय विदारणं कुरु॰ एहि आगच्छ
कथं विद्रवसि॰ कथं पलायसे एवं तु मुक्तः शब्दस्तस्मिन्सैन्ये प्रशुश्रुवे॥४॥ कालाः कृष्णवर्णाः कांचन

राक्षसोसीति हरयो वानरोसीति राक्षसाः॥ अन्योन्यं समरे जघ्नुस्तस्मिंस्तमसि दारुणे॥३॥ हत
दारय चैहीति कथं विद्रवसीति च॥ एवं सुतुमुलः शब्दस्तस्मिन्सैन्ये तु शुश्रुवे॥४॥ कालाः कांच
नसन्नाहास्तस्मिंस्तमसि राक्षसाः॥ संप्रदृश्यंत शैलेंद्रा दीप्तौषधिवना इव॥५॥ तस्मिंस्तम
सि दुष्पारे राक्षसाः क्रोधमूर्छिताः॥ परिपेतुर्महावेगा भक्षयंतः प्लवंगमान्॥६॥ ते हयान्कांच
नापीडान्ध्वजांश्चाशीविषोपमान्॥ आप्लुत्य दशनैस्तीक्ष्णैर्भीमकोपा व्यदारयन्॥७॥ वानरा ब
लिनो युद्धे क्षोभयन् राक्षसीं चमूं॥ कुंजरान्कुंजरारोहान्पताकाध्वजिनो रथान्॥८॥ चकर्षुश्च द
दंशुश्च दशनैः क्रोधमूर्छिताः॥ लक्ष्मणश्चापि रामश्च शरैराशीविषोपमैः॥९॥ दृश्यादृश्यानि र
क्षांसि प्रवराणि निजघ्नतुः॥ तुरंगखुरविध्वस्तं रथनेमिसमुत्थितं॥१०॥ रुरोध कर्णनेत्राणि यु
ध्यतां धरणीरजः॥ वर्तमाने तथा घोरे संग्रामे लोमहर्षणे॥ रुधिरौघा महाघोरा नद्यस्तत्र विसुस्रुवुः॥११॥

संनाहाः सुवर्णकवचाः॥५॥६॥७॥ अक्षोभयन्निति पदं पताकाध्वजिनः पताकोपेतध्वजवन्तः॥८॥९॥
प्रवराणि॰ श्रेष्ठानि॥१०॥ रथनेमिसमुद्धतं रजो युध्यतां कर्णनेत्राणि रुरोध॥११॥ ॥

४५।४६। अस्तमयाभिकांक्षिणः रात्रौ रक्षसां बलाधिक्यात्॥४७॥ उत्सवमानः क०॥४०॥४१॥४२॥ इति
श्रीरामाभिरामे श्रीरामीये रामायणतिलके युद्धकांडे त्रिचत्वारिंचत्वारिंशः सर्गः॥४३॥ युध्यता
मिति॥१॥ निशायुद्धं प्रवृत्तं परस्परं बहुसेनादर्शनजरोषादिति भावः पौषीपौर्णमास्यां सुवेलारो

बभूवायोधनं घोरं गोमायुगणसेवितं॥ कबंधानि समुत्पेतुर्दिक्षु वानररक्षसां॥४५॥ विमर्दे
तुमुले तस्मिन्देवासुररणोपमे॥४६॥ निहन्यमाना हरिपुंगवैस्तदा निशाचराः शोणितगं
धमूर्छिताः पुनः सुयुद्धं तरसा समाश्रिता दिवाकरस्यास्तमयाभिकांक्षिणः॥४७॥ इत्यार्षे श्री
रामायणे युद्धकांडे त्रिचत्वारिंशः सर्गः॥४३॥ युध्यतामेव तेषां तु तदा वानररक्षसां॥ रविर
स्तंगतो रात्रिः प्रवृत्ता प्राणहारिणी॥१॥ अन्योन्यं बद्धवैराणां घोराणां जयमिच्छतां॥ संप्रव
त्ते निशायुद्धं तदा वानररक्षसां॥२॥

हणस्यपस्पष्टप्रतीतेः सेनाविभागादिना पौषे कृष्णेतीते
माघशुक्लप्रतिपदि युद्धारंभे बहुदिनपर्यंतं संकुलयुद्धं सामान्येन उक्तं तदुत्तरदिने चेदं नि
शायुद्धं प्रवृत्तं ततो जज्ञे महायुद्धं संकुलं कपिरक्षसां मध्याह्ने प्रथमं युद्धं प्रारब्धं प्रतिपद्य
भूदिति पाद्मोक्तेः अत्र प्रकरणे न मसि दुष्पारे तमसि दारुणे इति वारं वारं वाल्मीक्युक्तेरिदं
रात्रियुद्धं कृष्णपक्षांत्यदिनेष्विति प्रतीयते अत्र तत्त्वं वक्ष्यामः॥२॥ राम

यतःसावशेषायुषोनोयुद्धादयसताश्चभभवन्॥२१॥२२॥२३॥२४॥घोरासानिशाभूयोघोरतराबभूव

तेनुरामेणबाणौघैःसर्वमर्मसुताडिताः॥युद्धादपसनास्तत्रसावशेषायुषोभवन्॥२१॥निमेषां
तरमात्रेणघोरैरग्निशिखोपमैः॥दिशश्चकारविमलाप्रदिशश्चमहारथः॥२२॥येत्वन्येराक्षसा
वीरारामस्याभिमुखेस्थिताः॥तेपिनष्टाःसमासाद्यपतंगाइवपावकं॥२३॥सुवर्णपुंखैर्विशि
खैःसंपतद्भिःसमंततः॥बभूवरजनीचित्रारवद्योतैरिवशारदी॥२४॥ राक्षसानांचनिनदैः
र्भेरीणांचैवनिस्वनैः॥साबभूवनिशाघोराभूयोघोरतराभवत्॥२५॥तेनशब्देनमहताप्रव
द्धेनसमंततः॥त्रिकूटःकंदराकीर्णःप्रव्याहरदिवाचलः॥२६॥मोलांगल्तामहाकायास्तमस
सातुल्यवर्चसः॥संपरिष्वज्यबाहुभ्यांभक्षयन्रजनीचरान्॥२७॥अंगदस्तुरणेशत्रुंनिहंतुंस
मुपस्थितः॥इंद्रजित्तुरथंत्यक्त्वाहताश्वोहतसारथिः॥अंगदेनमहाकायस्तत्रैवांतरधीयत॥२८॥
तत्कर्मवालिपुत्रस्यसर्वेदेवाःसहर्षिभिः॥तुष्टुवुःपूजनार्हस्यतौचोभौराममलक्ष्मणौ॥२९॥
प्रभावंसर्वभूतानिविदुरिंद्रजितोयुधि॥ततस्तेनमहात्मानंदृष्ट्वातुष्टाःप्रधर्षितं॥३०॥

२५॥२६॥भक्षयन् अभक्षयन्॥२७॥अंगदेनहताश्वोतएवमहायस्तोमहाखेदंप्राप्तइंद्रजित्तुतत्रै
वांतरधीयनेत्यन्वयः॥२८॥२९॥यतइंद्रजितोयुधिप्रभावंविदुस्ततस्तेनांगदेनतमिंद्रजितंप्रधर्षितंदृ
ष्ट्वामहात्मानंतमंगदंदृष्ट्वातुष्टाः॥३०॥

१२ स्तनमानानांस्तननतां-शस्त्रानांसितानां॥१३॥ कामरूपिभिरुपलक्षितामेदिनीशस्त्राण्येवपुष्पोपहारोय
स्यांतादृशीवश्रासीत्॥१४॥ शोणितानामास्त्रावैः कर्दमोयस्यांसा॥१५॥ कालरात्रीसंहाररात्रिः॥१६॥

ततोभेरीमृदंगानांपणवानांचनिस्वनः॥शंखनेमिस्वनोन्मिश्रःसंबभूवाद्भुतोपमः॥१२॥हया
नांस्तनमानानांराक्षसानांचनिस्वनः॥शस्त्राणांवानराणांचसंबभौतत्रनिस्वनः॥१३॥हतै
र्वानरमुख्यैश्चशक्तिशूलपरश्वधैः॥निहतैःपर्वताकारैराक्षसैःकामरूपिभिः॥१४॥शस्त्रपुष्पो
पहाराचतत्रासीद्युद्धमेदिनी॥दुर्ज्ञेयादुर्निवेशाचशोणितास्रावकर्दमा॥१५॥साबभूवनि
शाघोराहरिराक्षसहारिणी॥कालरात्रीवभूतानांसर्वेषांदुरतिक्रमा॥१६॥ततस्तेराक्षसाः
स्तत्रतस्मींस्तमसिदारुणे॥राममेवाभ्यवर्त्तन्तसंहृष्टाःशरवृष्टिभिः॥१७॥तेषामापततां
शब्दःक्रुद्धानामपिगर्जतां॥उद्वर्त्तेइवसत्वानांसमुद्राणामभूत्स्वनः॥१८॥तेषांरामःशरैः
षड्भिःषट्जघाननिशाचरान्॥निमेषांतरमात्रेणशरैरग्निशिखोपमैः॥१९॥यज्ञशत्रु
श्चदुर्द्धर्षोमहापार्श्वमहोदरौ॥वज्रदंष्ट्रोमहाकायस्तौचोभौशुकसारणौ॥२०॥ श्र

१७।उद्वर्त्तेप्रलयकाले॥१८॥षड्भिःषडिति-प्रधानानितिशेषः॥१९॥तेषट्गणंतेयज्ञशत्रुरिति
दुर्धर्षइतियज्ञशत्रोर्विशेषणंमहाकायइतिवज्रदंडस्यइमौशुकसारणौचारत्वेनप्रेषिताभ्या
मनावैवेतिवहवः नाविति पूर्वं स्वारसा चारत्वेनप्रेषितावेवेमौराज्ञाधिककृतावपिराजसंनिधिं
परित्यज्ययुद्धमनाविन्यन्ये॥२०॥

७ अस्यैवराघवयोरिंद्रजित्कृतबंधनस्यप्रपंचःसइति· तस्यइंद्रजितोगतिंअवस्थानप्रदेशं· अन्विच्छ
न्ज्ञातुमिच्छन्दिदेशआदिदेश॥१॥२॥३॥ ४॥परमास्त्रेण· ब्रह्मास्त्रेणामंत्रितैरिषुभिर्वारयामास॥५॥

सतस्यगतिमन्विच्छन्राजपुत्रःप्रतापवान्॥दिदेशातिबलोरामोदशवानरयूथपान्॥१॥द्वौ
सुषेणस्यदायादौनीलंचप्लवगाधिपं॥अंगदंवालिपुत्रंचशरभंचतरस्विनं॥२॥द्विविदंच
हनूमंतंसानुप्रस्थंमहाबलं॥ऋषभंचर्षभस्कंधंआदिदेशपरंतपः॥३॥तेसंप्रहृष्टाहर
योभीमानुद्यम्यपादपान्॥आकाशंविविशुःसर्वेमार्गमाणादिशोदश॥४॥तेषांवेगवतां·वे
गमिषुभिर्वेगवत्तरैः॥अस्त्रवित्परमास्त्रेणवारयामासरावणिः॥५॥तंभीमवेगाहरयोनाराचैःक्ष
तविक्षताः॥अंधकारेनददृशुर्मेघैःसूर्यमिवावृतं॥६॥रामलक्ष्मणयोरेवसर्वदेहभिदःशरा
न्॥भृशमावेशयामासरावणिःसमितिंजयः॥७॥निरंतरंशरीरौतुतावुभौरामलक्ष्मणौ॥
क्रुद्धेनेंद्रजितावीरौपन्नगैःशरतांगतैः॥८॥तयोक्षतजमार्गेणसुस्रावरुधिरंबहु॥तावु
भौचप्रकाशेतेपुष्पिताविवकिंशुकौ॥९॥ततःपर्यंतरक्ताक्षोभिन्नांजनचयोपमः॥रावणिर्भ्रा
तरौवाक्यमंतर्धानगतोब्रवीत्॥१०॥

॥६॥आवेशयामास·प्रवेशयामास॥७॥निरंतरंश
रीरौतुकृतावितिशेषः॥८॥क्षतजमार्गेणक्षतेनव्रणेनजातोयोमार्गस्तेन॥९॥१०॥

३१।३२।३३।३४॥३५।शरसंबंधेनशरपरिणतनागपाशबंधेन–अयंशरबंधोभाद्रकृष्णोत्पदिनेषुइत्य
र्गेनिरूपयिष्यामः॥३६॥अभिहतौबद्धौ॥३७॥उक्तानुवादः प्रकाशेत्यादिसमुपाजगामउपचक्रमेश्च

ततःप्रहृष्टाःकपयःससुग्रीवविभीषणाः॥साधुसाध्वितिनेदुश्चदृष्ट्वाशत्रुंपराजितं॥३१॥इंद्र
जित्तुतदानेननिर्जितोभीमकर्मणा॥संयुगेवालिपुत्रेणक्रोधंचक्रेसुदारुणं॥३२॥सोंतर्धान
गतःपापोरावणीरणकर्शितः॥ब्रह्मदत्तवरोवीरोरावणिःक्रोधमूर्छितः॥३३॥अदृश्योनिशि
तान्बाणान्मुमोचाशनिसन्निभः॥रामंचलक्ष्मणंचैवघोरैर्नागमयैःशरैः॥३४॥विभेदसमरेक्रु
द्धःसर्वगात्रेषुराघवौ॥माययासंवृतस्तत्रमोहयन्राघवौयुधि॥३५॥अदृश्यःसर्वभूतानांकूट
योधीनिशाचरः॥बबंधशरबंधेनभ्रातरौरामलक्ष्मणौ॥३६॥तौतेनपुरुषव्याघ्रौक्रुद्धेनाशीवि
षैःशरैः॥सहसाभिहतौवीरौतदाप्रेक्षंतवानराः॥३७॥प्रकाशरूपस्तुयदानशक्तस्तौबाधितुंरा
क्षसराजपुत्रः॥मायांप्रयोक्तुंसमुपाजगामबबंधतौराजसुतौदुरात्मा॥३८॥इत्यार्षेश्रीरा॰यु॰
चतुश्चत्वारिंशःसर्गः॥४४॥

भंगमात्रेणसर्वजगत्संहर्तुरपिभगवतोनागपाशबंधनसहनंस्वकृतम
र्यादारूपब्रह्मवरदानपालनार्थंविरोधेनापिनित्यमात्मानंस्मरतोरावणस्यरावणोप्यपरमभक्ततयाकी
र्तेर्लोकेषुवृध्यर्थंचेतितत्त्वं॥३५॥उच्छर्गमानः कनकस्त्र॥४१॥इतिश्रीरामाभिरामेश्रीरा॰रा॰ति॰युद्ध॰

चतुश्चत्वारिंशःसर्गः॥४४॥

प्रस्रवणौप्रस्रवणाख्यपर्वताविव ॥२१॥ इंद्रजित्त्वंकुतस्तत्राहयेनेति ॥२२॥ रजोगतिभिः वायुनाविस्तीर्यमाणरजोवन्नीरंध्रंसंपतद्भिः अर्धनाराचैः अर्धभागेनाराचतुल्यैः अंजलिकैः अंजल्याकारमुखैः वत्स-

तौतुक्रूरेणनिहतौरक्षसाकामरूपिणा ॥ असृक्सुस्रवतुस्तीव्रंजलंप्रस्रवणाविव ॥२१॥ पपातप्रथमोरामोविद्धोमर्मसुमार्गणैः । क्रोधादिंद्रजितायेनपुराशक्रोविवर्जितः ॥२२॥ रुक्मपुंखैःप्रसन्नाग्रैरजोगतिभिराशुगैः ॥ नाराचैरर्धनाराचैर्भल्लैरंजलिकैरपि ॥ विव्याधवत्सदंतैश्चसिंहदंष्ट्रैःक्षुरैस्तथा ॥२३॥ सवीरशयनेशिश्येविज्यमाविध्यकार्मुकं ॥ भिन्नमुष्टिपरीणाहंत्रिनतंरुक्मभूषितं ॥२४॥ बाणपातांतरेरामंपातितंपुरुषर्षभं ॥ सतत्रलक्ष्मणोदृष्ट्वानिराशोजीवितेभवत् ॥२५॥ रामंकमलपत्राक्षंशरण्यंरणतोषिणं ॥ सुशोचभ्रातरंदृष्ट्वापतितंधरणीतले ॥२६॥ हरयश्चापितंदृष्ट्वासंतापंपरमंगताः ॥ शोकार्त्ताश्चुक्रुशुर्घोरमश्रुपूरितलोचनाः ॥२७॥ बद्धौतुतौवीरशयेशयानौतेवानराःसंपरिवार्यतस्थुः ॥ समागतावायुसुतप्रमुखाविषादमार्त्ताःपरमंचजग्मुः ॥२८॥ इत्यार्षेश्रीरा०यु०पंचचत्वारिंशःसर्गः ॥४५॥

दंतादयस्तत्तदाकाराः ॥२३॥ आविध्यत्यक्त्वा·भिन्नोमुष्टिपरीणाहोमुष्टिप्रदेशोमुष्टिग्रहणंवायस्यत्रिषुस्थानेषुनम्रं ॥२४॥ बाणपातांतरेशरतल्पमध्ये ॥२५॥२६॥२७॥२८॥ दारुभानःकत०४२ ॥ इतिश्रीरामाभिरामेश्रीरा०रा०ति०यु०पंचचत्वारिंशःसर्गः ॥४५॥

अनालक्ष्यं अशक्यदर्शनं॥११॥प्रापितौ-बंधनमितिशेषः॥१२॥१३॥१४॥१५॥नशेकतुरवेक्षितुंताद्दशाविव
स्थितौमनुष्यत्वनाटनायेतिबोध्यं॥१६॥१७॥१८॥वीरशयेने-युद्धभूमौ-शरवेष्ठितसर्वांगौ-शरभूतस

युध्यमानमनालक्ष्यंशक्रोपित्रिदशेश्वरः॥द्रष्टुमासादितुंचापिनशक्तःकिंपुनर्युवां॥११॥प्रापिता
विषुजालेनराघवौकंकपत्रिणा॥एषकोपपरीतात्मानयामियमसादनं॥एवमुक्त्वातुधर्मज्ञौ
भ्रातरौरामलक्ष्मणौ॥निर्बिभेदशितैर्बाणैःप्रजहर्षननादच॥१३॥भिन्नांजनचयश्यामोवि
स्फार्यविपुलंधनुः॥भूयएवशरान्घोरान्विससर्जमहामृधे॥१४॥ततोमर्मसुमर्मज्ञोमज्ज
यन्निशितान्शरान्॥रामलक्ष्मणयोर्वीरोननादचमुहुर्मुहुः॥१५॥बद्धौतुशरबंधेनतावुभौ
रणमूर्धनि॥निमेषांतरमात्रेणनशेकतुरवेक्षितुं॥१६॥ततोविभिन्नसर्वांगौशरशल्याचि
तौकृतौ॥ध्वजाविवमहेंद्रस्यरज्जुमुक्तौप्रकंपितौ॥१७॥तौसंप्रचलितौवीरौमर्मभेदेनक
र्शितौ॥निपेततुर्महेष्वासौजगत्यांजगतीपती॥१८॥तौवीरशयनेवीरौशयानौरुधिरोक्षि
तौ॥शरवेष्ठितसर्वांगावार्त्तौपरमपीडितौ॥१९॥नत्वविद्धंतयोर्गात्रेबभूवांगुलमंतरं॥
नानिर्भिण्णंनचास्तब्धंआकराग्रादजिह्मगैः॥२०॥

र्पंवेष्ठितसर्वगात्रौ॥१९॥अविद्धंवेधरहितं-अंगुलं-
अंगुलप्रमाणं-अंतरमवकाशोनाभूत्-आकराग्रात्-कराग्रमभिव्याप्याध्वस्तमद्नोभिन्नंअस्तब्धमितिप
ढेचेयावत्अजिह्मगैः-वीरौ॥अनिर्विण्णामविरामसंग्रामंगतः॥२०॥ अ

आत्मनःकर्मसमीक्ष्यशयानौतौचसमीक्ष्य॥११॥१२॥१३॥यत्कृतेययोराघवयोर्निमित्तंतद्द्वयेनेतिया

दृंद्रजित्वात्मनःकर्मतौशयानौसमीक्ष्यच॥उवाचपरमप्रीतोहर्षयन्सर्वराक्षसान्॥११॥दूषणस्य चहंतारौखरस्यचमहाबलौ॥सादितौमामकैर्बाणैर्भ्रातरौरामलक्ष्मणौ॥१२॥नेमौमोक्षयितुंशक्यावेतस्मादिषुबंधनात्॥सर्वैरपिसमागम्यसर्षिसंघैःसुरासुरैः॥१३॥यत्कृतेचिंतयानस्यशोकार्त्तस्यपितुर्मम॥अस्पृष्ट्वाशयनंगात्रैस्त्रियामायातिशार्वरी॥१४॥कृत्स्नेयंयत्कृतेलंकानदीवर्षास्विवाकुला॥सोयंमूलहरोनर्थःसर्वेषांशमितोमया॥१५॥रामस्यलक्ष्मणस्यैवसर्वेषांचवनौकसां॥विक्रमानिष्फलाःसर्वेयथाशरदितोयदाः॥१६॥एवमुक्त्वातुतान्सर्वान्राक्षसान्परिपश्यतः॥यूथपानपितान्सर्वांस्ताडयत्सचरावणिः॥१७॥नीलंनवभिराहत्यमैंदंसद्विविधंतथा॥त्रिभिस्त्रिभिरमित्रघ्नस्ततापपरमेषुभिः॥१८॥जांबवंतंमहेष्वासोविद्ध्वाबाणेनवक्षसि॥हनूमतोवेगवतोविससर्जशरान्दश॥१९॥गवाक्षंशरभंचैवतावप्यमितविक्रमौ॥द्वाभ्यांद्वाभ्यांमहावेगोविव्याधयुधिरावणिः॥२०॥गोलांगूलेश्वरंचैववालिपुत्रमथांगदं॥विव्याधबहुभिर्बाणैस्त्वरमाणोथरावणिः॥२०॥

वत्॰गात्रैःशयनमस्पृष्ट्वैवत्रियामारात्रिर्याति॰अनिद्रएव निशाःक्षपयतीत्यर्थः॥१४॥१५॥१६॥यूथपान्वानराणामितिशेषः॥ताडयत्॰अताडयत्॥१७॥१८॥हनूमतः उपरीतिशेषः॥१९॥२०॥त्वरमाणः त्वरांवेगंकुर्वन्

द्यां पृथिवीं च वीक्षमाणा ॥ अतिभयाद्धि निशोषः संततौ व्याप्तौ ॥१॥ देवे इंद्र इव वृष्ट्वेव कृतकर्मणि तस्मिन् राक्षसे उपरते सति ॥२॥३॥४॥ रुधिरस्य प्रस्रावः प्रवाहस्तेन दिग्धांगौ ॥५॥६॥७॥ मायया छन्नमेनं रावणिं वानरान्

ततो द्यां पृथिवीं चैव वीक्षमाणा वनौकसः ॥ ददृशुः संततौ बाणैर्भ्रातरौ रामलक्ष्मणौ ॥१॥ वृष्ट्वेवोपरते देवे कृतकर्मणि राक्षसे ॥ आजगामाथ तं देशं ससुग्रीवो विभीषणः ॥२॥ नीलश्च द्विविदो मैंदः सुषेणः कुमुदोंगदः ॥ तूर्णं हनुमता सार्धमन्वशोचंत राघवौ ॥३॥ अचेष्टौ मंदनिश्वासौ शोणितेन परिप्लुतौ ॥ शरजालाचितौ स्तब्धौ शयानौ शरतल्पगौ ॥४॥ निश्वसंतौ यथा सर्पौ निश्चेष्टौ दीनविक्रमौ ॥ रुधिरस्रावदिग्धांगौ तपनीयाविव ध्वजौ ॥५॥ तौ वीरशयने वीरौ शयानौ मंदचेष्टितौ ॥ यूथपैः स्वैः परिवृत्तौ बाष्पव्याकुललोचनैः ॥६॥ राघवौ पतितौ दृष्ट्वा शरजालसमन्वितौ ॥ बभूवुर्व्यथिताः सर्वे वानराः सविभीषणाः ॥७॥ अंतरिक्षं निरीक्षंतो दिशः सर्वाश्च वानराः ॥ न चैनं मायया छन्नं ददृशू रावणिं रणे ॥८॥ तं तु मायाप्रतिछन्नं माययैव विभीषणः ॥ वीक्षमाणो ददर्शाग्रे भ्रातुः पुत्रमवस्थितं ॥९॥ तमप्रतिमकर्माणमप्रतिद्वंद्वमाहवे ॥९॥ ददर्शांतर्हितं वीरं वरदानाद्विभीषणः ॥ तेजसा यशसा चैव विक्रमेण च संयुतः ॥१०॥

ददृशुः ॥८॥ किंतु मायाप्रतिछन्नं तं भ्रातुः पुत्रं रावणिं विभीषण एव मायया ददर्श ॥९॥ वरदानात् ब्रह्मवरदानात् स्वयं त

अनाथमशरणांमांत्वपर्यवस्थापयआश्वासयनत्वतुस्वतंत्रंराज्यमप्यस्तिअहंत्वगतिरेवेतिभावः ३२ ३३ ततःसामान्यतःप्रमार्जनानंतरंविद्ययातिरस्करण्याविद्यातिरस्कारकविद्ययापरिजप्य·परिवीत्येति पाठेप्ययमेवार्थःराक्षसमायापरिज्ञानेनधैर्यसंपादनंचैतत्प्रमार्जनस्यफलंवक्तस्ततःसलिलमि

मोहमेनौप्रहास्येतेमहात्मानौमहाबलौ॥पर्यवस्थापयात्मानमनाथंमांचवानर॥सत्यध
र्माभिरक्तानांनास्तिमृत्युकृतंभयं॥३२॥एवमुक्त्वाततस्तस्यजलक्लिन्नेनपाणिना॥सुग्रीवस्य
शुभेनेत्रेप्रममार्जविभीषणः॥३३॥ततःसलिलमादायविद्ययापरिजप्यच॥सुग्रीवनेत्रेधर्मा
त्माप्रममार्जविभीषणः॥३४॥विमृज्यवदनंतस्यकपिराजस्यधीमतः॥अब्रवीत्कालसंप्रा
प्तमसंभ्रांतमिदंवचः॥३५॥नकालःकपिराजेंद्रवैक्लव्यमवलंबितुं॥अतिस्नेहोप्यकालेस्मि
न्मरणायोपकल्पते॥३६॥तस्मादुत्सृज्यवैक्लव्यंसर्वकार्यविनाशनं॥हितंरामपुरोगाणांसै
न्यानामनुचिंतय॥३७॥

तिश्लोकोबहुपुस्तकेषुनास्तीतिप्रायेणप्रक्षिप्तोयं·नेनेंद्रजितंद
दर्शनेतितत्कार्यप्रकाशकोत्तरवाक्याभावात्॥३४॥कालसंप्राप्तं·कालोचितंयेनप्राप्तं॥३५॥अतिस्ने
होपि·अतिस्नेहमूलरोदनादिव्यापारोपिअस्मिन्काले·ईदृशेविषमकाले॥३६॥यदेवमतस्त
स्मादित्यादि·हितंतत्समाश्वासनं॥३७॥ राम ॥ श्र ॥

२२॥२३॥निशाम्यत-पश्यत॥२४॥२५॥२६॥२७॥२८॥तयोःशरीरेसायकैश्चितेसर्वाण्युपांगानिचसायकैश्चिता
निदृष्ट्वा॥२९॥सबाष्पवदनं-बाष्पसहितवदनं॥३०॥एवंप्रायाणिएवंविधः प्रायोबाहुल्यंयेषांतानि-प्रा

तान्वानरवरान्भित्वाशरैरग्निशिखोपमैः॥ननादबलवांस्तत्रमहासत्वःसरावणिः॥२२॥तानर्द
यित्वाबाणौघैस्त्रासयित्वाचवानरान्॥प्रजहासमहाबाहुर्वचनंचेदमब्रवीत्॥२३॥शरबंधे
नघोरेणमयाबद्धौचमूमुखे॥सहितौभ्रातरावेतौनिशामयतराक्षसाः॥२४॥एवमुक्तास्ततेस
र्वेराक्षसाःकूटयोधिनः॥परंविस्मयमापन्नाःकर्मणातेनहर्षिताः॥२५॥विनेदुश्चमहानादान्स
र्वेतेजलदोपमाः॥हतोरामइतिज्ञात्वारावणिंसमपूजयन्॥२६॥निष्पंदौतुतदादृष्ट्वाभ्रात
रौरामलक्ष्मणौ॥वसुधायांनिरुच्छ्वासौहतावित्यन्वमन्यत॥२७॥हर्षेणतुसमाविष्टइंद्रजित्स
मितिंजयः॥प्रविवेशपुरींलंकांहर्षयन्सर्वनैरृतान्॥२८॥रामलक्ष्मणयोर्दृष्ट्वाशरीरेसाय
कैश्चिते॥सर्वाणिचांगोपांगानिसुग्रीवंभयमाविशत्॥२९॥तमुवाचपरित्रस्तंवानरेंद्रंविभीष
णः॥सबाष्पवदनंदीनंक्रोधव्याकुललोचनं॥अलंत्रासेनसुग्रीववाष्पवेगोनिगृह्यतां॥३०॥
एवंप्रायाणियुद्धानिविजयोनास्तिनैष्ठिकः॥सभागपशेषतास्माकंयदिवीरभविष्यति॥३१॥

प्रायेणैवंविधानीत्यर्थः नैष्ठिकोनित्यैकांतः भागपशेषेणसहिताःसभागपशेषास्तेषांभावस्सत्ताभागपशेष

साहित्यंतद्वैशिष्ट्यंसंयद्यस्माकमित्यर्थः॥३१॥

समाश्वास्य०उक्तारीत्येतिशेषः॥४३॥४४॥४५॥४६॥४७॥४८॥४९॥धवमानः क०॥४३॥इतिश्रीयुद्धकांडेष

समाश्वास्यतुसुग्रीवंराक्षसेंद्रोविभीषणः॥विद्रुतंवानरानीकंतत्समाश्वासयत्पुनः॥४३॥इंद्र
जित्तुमहामायःसर्वसैन्यसमावृतः॥विवेशनगरींलंकांपितरंचाभ्युपागमत्॥४४॥तत्ररावण
मासाद्यअभिवाद्यकृतांजलिः॥आचचक्षेप्रियंपित्रेनिहतौरामलक्ष्मणौ॥४५॥उत्पपाततततोहृ
ष्टःपुत्रंचपरिषस्वजे॥रावणोरक्षसांमध्येश्रुत्वाशत्रूनिपातितौ॥४६॥उपाघ्रायचतंमूर्ध्निपप्र
च्छप्रीतमानसः पृच्छतेचयथावृत्तंपित्रेतस्मैन्यवेदयत्॥४७॥यथातौशरबंधेननिश्चेष्टौनि
ष्प्रभौकृतौ॥४८॥सहर्षवेगानुगतांतरात्माश्रुत्वागिरंतस्यमहारथस्य॥जहौज्वरंदाशरथेः
समुत्थंप्रहृष्यवाचाभिननंदपुत्रं॥४९॥इत्यार्षेश्रीरामायणेयुद्धकांडेषट्चत्वारिंशःसर्गः॥
॥४६॥ तस्मिन्प्रविष्टेलंकायांकृतार्थेरावणात्मजे॥राघवंपरिवार्याथररक्षुर्वानरर्षभाः॥१॥
हनूमानंगदोनीलःसुषेणःकुमुदोनलः॥गजोगवाक्षःपनसःसानुप्रस्थोमहाहरिः॥२॥जांबवा
नृषभःसुंदोरंभःशतबलिःपृथुः॥व्यूढानीकाश्चयत्ताश्चद्रुमानादायसर्वतः॥३॥वीक्षमाणादिशः
सर्वास्तिर्यगूर्ध्वंचवानराः॥तृणेष्वपिचचेष्टत्सुराक्षसाइतिमेनिरे॥४॥

ट्चत्वारिंशःसर्गः॥४६॥तस्मि
न्निति॥१॥२॥व्यूढानिगरुडाद्याकारव्यूहवंत्यनीकानियेषांते॥३॥राक्षसाइत्यस्यागताइतिशेषः॥४॥

यदितवसेनासंमाश्वासनेधैर्यंनास्तितदानदहंकरिष्यामित्वयातुरामोरक्षणीयइत्याह· अथवेतिसंज्ञा
विपर्ययोमोहोयावत्तावत्पर्यंतं· मोहमात्रमेवानयोर्नत्वन्यासंभावनेत्याह· लब्धसंज्ञाविति· नौआवयोः
३८॥ व्यपनेष्यतइतीममेवार्थंस्पष्टयति· नैतदितिरामस्यनैतत्किंचनअपायकरणमित्यर्थः कुतस्तत्रा
ह· नचेति· मुमूर्षीभावेलिंगमाह· नहीति॥ यागतायुषोदुर्लभासालक्ष्मीरेनंनहास्यति॥ इदानींनजह

अथवारक्षतांरामोयावत्संज्ञाविपर्ययः॥ लब्धसंज्ञौहिकाकुत्स्थौभयंनौव्यपनेष्यतः॥३८॥
नैतत्किंचनरामस्यनचरामोमुमूर्षति॥ नह्येनंहास्यतेलक्ष्मीदुर्लभायागतायुषां॥३९॥
तस्मादाश्वासयात्मानंबलंचाश्वासयस्वकं॥ यावत्सैन्यानिसर्वाणिपुनःसंस्थापयाम्य
त हं॥४०॥ एतेहिफुल्लनयनास्त्रासादागतसाध्वसाः॥ कर्णेकर्णेप्रकथिताहरयोहरिसत्तम॥४१॥
मांतुदृष्ट्वाप्रधावंतमनीकंसंप्रहर्षितं॥ त्यजंतुहरयस्त्रासंभुक्तपूर्वामिवस्रजं॥४२॥

त्येवाग्रेपिनहास्यतीत्यर्थः॥३९॥ स्वकंबलंस्वप्राणं। अहंयावत्सर्वाणिसैन्यानिपुनःस्थापयामिस्थि
राणिकरोमितावदात्मानमात्मप्राणंचाश्वासय॥४०॥ एतेफुल्लनयनत्वादिगुणकाहरयः कर्णेकर्णे
प्रकथिताऽरामविपद्विषयकप्रकथनवंतोभवंति· हरिसत्तम· सुग्रीव॥४१॥ अनाप्रकंप्रहृष्याश्वास
नार्थंमांधावंतंदृष्ट्वातुसंप्रहर्षितंप्राप्तहर्षमनीकंनदुपाहरयोभुक्तपूर्वांस्रजमिवत्रसंत्यजंतु॥४२

पताकाध्वजमालिनीं लंकां चारयामास रणस्थौ तौ द्रष्टुमिति शेषः ॥ १४ ॥ घोषणाप्रकारो राघवो लक्ष्मणश्चेति
१५ ॥ सर्वं ब्रूहीत्यर्थः ॥ १६ ॥ १७ ॥ १८ ॥ विप्रविद्धशरासनौ भ्रष्टधनुष्कौ शरस्तंबः शरसमूहस्तन्मयौ ॥ १९ ॥ २० ॥

ततः पुष्पकमारोप्य सीतां त्रिजटया सह ॥ रावणश्चारयामास पताकाध्वजमालिनीं ॥ १४ ॥ प्राघोष
यत हृष्टश्च लंकायां राक्षसेश्वरः ॥ राघवो लक्ष्मणश्चैव हतौ ताविंद्रजिता रणे ॥ १५ ॥ विमानेनापि गत्वा
तु सीता त्रिजटया सह ॥ ददर्श वानराणां तु सर्वं सैन्यं निपातितं ॥ १६ ॥ प्रहृष्टमनसश्चापि ददर्श पि
शिताशनान् ॥ वानरांश्चाति दुःखार्त्तान् रामलक्ष्मणपार्श्वतः ॥ ततः सीता ददर्शोभौ शयानौ श
रतल्पगौ ॥ लक्ष्मणं चैव रामं च विसंज्ञौ शरपीडितौ ॥ १८ ॥ विध्वस्तकवचौ वीरौ विप्रविद्धशरा
सनौ ॥ सायकैश्छिन्नसर्वांगौ शरस्तंबमयौ क्षितौ ॥ १९ ॥ तौ दृष्ट्वा भ्रातरौ तत्र प्रवीरौ पुरुषर्षभौ
शयानौ पुंडरीकाक्षौ कुमाराविव पावकी ॥ २० ॥ शरतल्पगतौ वीरौ तथाभूतौ नरर्षभौ ॥ दुः
खार्त्ता करुणं सीता सुभृशं विललाप ह ॥ २१ ॥ भर्त्तारमनवद्यांगी लक्ष्मणं चासितेक्षणा ॥ प्रेक्ष्य
पांसुषु चेष्टंतौ रुरोद जनकात्मजा ॥ २२ ॥ सा बाष्पशोकाभिहता समीक्ष्य तौ भ्रातरौ देवसुतप्र
भावौ वितर्कयंती निधनं तयोः सा दुःखान्विता वाक्यमिदं जगाद ॥ २३ ॥ इत्यार्षे श्रीरा॰ यु॰ सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

२१ ॥ २२ ॥ वितर्कयंती चिंतयंतीत्येव ॥ २३ ॥ गिरमानः क॰ ॥ ४४ ॥ इति श्रीरामाभिरामे श्रीरामीये रा॰ युद्ध॰ स
प्तचत्वारिंशः सर्गः ॥ ४७ ॥

सातारक्षणीः सीतारक्षिका राक्षसी राजुहाव ताः राक्षस्य त्रिजटा च तमुपस्थिताः ॥५॥६॥ आख्यात कथयत
रणे हतौ राघवौ तस्यै दर्शयध्वं ॥७॥ यदाश्रयात् अवष्टब्धा गर्विता ॥८॥ निर्विशंका रामशंकारहिता नि

रावणश्चापि संहृष्टो विसृज्येन्द्रजितं सुतं ॥ आजुहाव ततः सीतारक्षणीराक्षसीस्तदा ॥५॥ राक्षस्य त्रि
जटा चापि शासनात्तमुपस्थिताः ॥ ता उवाच ततो हृष्टो राक्षसी राक्षसाधिपः ॥६॥ हताविन्द्रजिताख्या
त वैदेह्या रामलक्ष्मणौ ॥ पुष्पकं तत्समारोप्य दर्शयध्वं रणे हतौ ॥७॥ यदाश्रयादवष्टब्धा नेयं मामु
पतिष्ठते ॥ सोऽस्या भर्त्ता सह भ्रात्रा निहतो रणमूर्द्धनि ॥८॥ निर्विशंका निरुद्विग्ना निरपेक्षा च मैथिली
मामुपस्थास्यते सीता सर्वाभरणभूषिता ॥९॥ अद्य कालवशं प्राप्तं रणे रामं सलक्ष्मणं ॥ अवेक्ष्य
विनिवृत्ताशा चान्यां गतिमपश्यती ॥ अनपेक्षा विशालाक्षी मामुपस्थास्यते स्वयं ॥१०॥ तस्य तद्व
चनं श्रुत्वा रावणस्य दुरात्मनः ॥ राक्षस्यस्तास्तथेत्युक्त्वा जग्मुर्वै यत्र पुष्पकं ॥११॥ ततः पुष्पकमा
दाय राक्षस्यो रावणाज्ञया ॥ अशोकवनिकास्थां तां मैथिलीं समुपानयन् ॥१२॥ तामादाय तु रा
क्षस्यो भर्तृशोकपराजितां ॥ सीतामारोपयामासुर्विमानं पुष्पकं तदा ॥१३॥

रुद्विग्ना निःशोका नि
रपेक्षा रामो मिलिष्यतीत्याशारहिता ॥९॥ अवेक्ष्य विनिवृत्ता प्रत्यागता सा च सा तु अन्यां मतोऽन्यां रा
मरूपां प्राप्यं वस्त्व पश्यती अनपेक्षा रामापेक्षारहिता ॥१०॥११॥१२॥१३॥
अ

लक्षणैः लक्षणज्ञैः तत्प्रतिपादकशास्त्रैश्च सत्यनामानि अमोघफलानि तानि शास्त्राणि तत्प्रतिपादितलक्षणानि च ॥८॥ असंहते अपरस्पराश्लिष्टे ॥९॥ शंखे नयनोपान्त्यभागौ ललाटफलके इति कतकः चितौ उपचितौ अनुवृत्ताः आनुपूर्व्यावृत्तत्वगुणयुक्ताः समाः सममध्याः ॥१०॥ अविरलौ परस्परसंसक्तौ

सत्यनामानि पद्मानि स्त्रीणां मुक्तानि लक्षणैः ॥ तान्यद्य निहते रामे वितथानि भवन्ति मे ॥८॥
केशाः सूक्ष्माः समा नीला भ्रुवौ चासंहते मम ॥ वृत्ते चारोमके जंघे दंताश्चाविरला मम ॥९॥
शंखे नेत्रे करौ पादौ गुल्फावूरू समे चितौ ॥ अनुवृत्तनखाः स्निग्धाः समाश्चांगुलयो मम ॥१०॥
स्तनौ चाविरलौ पीनौ मामकौ मग्नचूचकौ ॥ मग्ना चोत्सेधनी नाभिः पार्श्वोरस्कं च मे चितं ॥११॥
मम वर्णो मणिनिभो मृदून्यंगरुहाणि च ॥ प्रतिष्ठितां द्वादशभिर्मामूचुः शुभलक्षणां ॥१२॥

मग्नचूचकौ निमग्नाग्रभागौ उत्सेधिनी उन्नतपर्यन्तप्रदेशा पार्श्वे चोरस्कं च स्वार्थे कः ॥ तत्पार्श्वोरस्कं प्राण्यंगत्वादेकवचनं चितं उपचितं ॥११॥ वर्णः कांतिः मणिनिभः शाणघृष्टमणिवदुज्वलः ॥ अंगरुहाणि रोमाणि द्वादशभिः प्रतिष्ठितां पादद्वयवर्त्यंगुलिदशकं द्वे पादतले च एवं द्वादशभिः सुप्रतिष्ठितां ॥ सुस्पष्टभूमिकां एवं केशादिपादांतलक्षणैर्मां शुभलक्षणामूचुः ॥१२॥ ॥

विलल्लापेति· सर्वज्ञापि देवी राक्षसानां मानुषबुद्धिस्थैर्यीय नरवत् विललापेवेत्यर्थः निहतं निहतमिव स्थितं ॥१॥ लक्षणिकाः सामुद्रिकलक्षणज्ञाः ॥२॥ अयमेव पांक्तः पाठ इति कतकः यज्वनोऽश्वमेधादियागकर्तुः सत्रिणः बहुदिनसाध्यबहुकर्तृकयागकर्त्तुः ॥३॥ वीरपार्थिवपत्नीनां· पूजनीयामिति शेषः भर्तृपूजि

भर्त्तारं निहतं दृष्ट्वा लक्ष्मणं च महाबलं ॥ विलल्लाप भृशं सीता करुणं शोककर्शिता ॥१॥ ऊचुर्लक्षणिका ये मां पुत्रिण्यविधवेति च ॥ तेऽद्य सर्वे हते रामे ज्ञानिनोऽनतवादिनः ॥२॥ वीरपार्थिवपत्नीनां ये विदुर्भर्तृपूजितां तेऽद्य सर्वे हते रामे ज्ञानिनोऽनतवादिनः ॥३॥ यज्वनो महिषीं ये मां ऊचुः पत्नीं च सत्रिणः ॥ तेऽद्य सर्वे हते रामे ज्ञानिनोऽनतवादिनः ॥४॥ ऊचुः संश्रवणे ये मां द्विजाः कार्त्तांतिकाः शुभां ॥ तेऽद्य सर्वे हते रामे ज्ञानिनोऽनतवादिनः ॥५॥ इमानि खलु पद्मानि पादयोर्वै कुलस्त्रियः ॥ अधिराज्येभिषिच्यंते नरेंद्रैः पतिभिः सह ॥६॥ वैधव्यं यांति यैर्नार्योऽलक्षणैर्भाग्यदुर्लभा ॥ नात्मनस्तानि पश्यामि पश्यंती हतलक्षणा ॥७॥

नां सुमंगलीये प्राहुः ॥४॥ सम्यक्श्रवणे यस्मिन्निति संश्रवणं संनिधिस्तस्मिन् मत्समक्षमिति यावत् कार्त्तांतिकाः ज्योतिःकृतांतविदः शुभां अविधवां ज्ञानिन इति छेदः ॥५॥ यैर्लक्षणैः स्त्रियः नरेंद्रैः पतिभिः सहाधिराज्येभिषिच्यंते तानीमानि पद्मानि पाणिपादवर्त्तिरेखारूपपद्मानि मयि वर्त्तंन इति शेषः ॥६॥ यैरलक्षणैर्भाग्यदुर्लभा दुर्लभभाग्या वैधव्यं यांति तान्यात्मनो न पश्यामि सुलक्षणानि पश्यंत्यपि हतलक्षणा निष्फललक्षणा जातास्मीति शेषः इदं पद्यं प्रक्षिप्तमिति वहवः ॥७॥

कालस्यशुभाशुभफलप्रापकस्यतत्प्रापनेनिभारोनास्तिअतस्तदुपस्थापितफलनिर्वर्तकोयः कृतांतोदैवंस
नसुदुर्जयःसामान्यरूपस्यार्थस्यविशेषेणसमर्थनरूपोर्थांतरन्यासःप्रकृतकथनरूपोयत्रेत्यादियत्रय
स्मादित्यर्थः॥१९॥२०॥२१॥२२॥एवंदशांप्राप्तस्यकथंजीवनंतत्राह कारणानीति·महांति·इदानीमपि

नकालस्यातिभारोस्तिकृतांतश्चसुदुर्जयः॥यत्ररामःसहभ्रात्राशेतेयुधिनिपातितः॥१९॥नशो
चामितथारामंलक्ष्मणंचमहारथं॥नात्मानंजननीचापियथाश्वश्रूंतपस्विनी॥२०॥सानुचिंत
यतेनित्यंसमाप्तव्रतमागतं॥कदाद्रक्ष्यामिसीतांचलक्ष्मणंचसराघवं॥२१॥परिदेवयमानांतां
राक्षसीत्रिजटाब्रवीत्॥माविषादंकृथादेविभर्तायंतवजीवति॥२२॥कारणानिचवक्ष्यामिम
हांतिसदृशानिच॥यथेमौजीवतोदेविभ्रातरौरामलक्ष्मणौ॥२३॥नहिकोपपरीतानिहर्ष
पर्युत्सुकानिच॥भवंतियुधियोधानांमुखानिनिहतेपतौ॥२४॥

सञ्जीवत्वोपपादकानिसदृशा
नि·अनुभूतैस्तत्त्वानिदृष्टसंवादीनियथेमौजीवत इतिप्रतिपद्येथास्तथाकारणानिवक्ष्यामीत्य
न्वयः॥२३॥तान्येवव्यतिरेकमुखेनाह·नहीति·पतौपत्यौनिहतेसतियोधानांमुखानि·क्षणेनशत्रूं
हनिष्यामः कंगच्छतीत्येवंकोपेनव्याप्तानिनभवंति·हर्षपर्युत्सुकानिहर्षजनकमोहदशांतिदर्शी
नोत्सुकानिनभवंति·अपितुरुदंतिकेवलंनैवंप्रकृतेऽतोजीवतीतिनिश्चिनु॥२४॥

समग्रयवं अंगुलिपर्वमध्यगसमग्रयवप्रमाणद्विद्विरेखावत्अच्छिद्रं·नीरंध्रांगुल्यंतरालं·वर्णोक्तप्रशस्त
कांति·मंदस्मितामंदस्मितवत्त्वरूपसुलक्षणावती·कंन्यालाक्षणिकाः कन्यावर्त्तिसामुद्रिकलक्षणज्ञाः॥१३
कृतांतनिपुणैः ज्योतिःशास्त्रसिद्धांतज्ञैः आधिराज्येभिषेको भावीतिउक्तमित्यन्वयः॥१४॥सागरंसमुद्रंरा

समग्रयवमच्छिद्रंपाणिपादंचवर्णवत्॥मंदस्मितेत्येवचमांकंन्यालाक्षणिकाविदुः॥१३॥
।आधिराज्येभिषेकोमेब्राह्मणैः पतिनासह॥कृतांतकुशलैरुक्तंतत्सर्वंवितथीकृतं॥१४॥
शोधयित्वाजनस्थानंप्रवृत्तिमुपलभ्यच॥तीर्त्वासागरमक्षोभ्यंभ्रातरौगोष्पदेहतौ॥१५॥
ननुवारुणमाग्नेयमैंद्रंवायव्यमेवच॥अस्त्रंब्रह्मशिरश्चैवराघवौप्रत्यपद्यत॥१६॥
अदृश्यमानेनरणेमाययावासवोपमौ॥ममनाथावनाथायानिहतौरामलक्ष्मणौ॥१७॥
नहिदृष्टिपथंप्राप्यराघवस्यरणेरिपुः॥जीवन्प्रतिनिवर्त्तेतयद्यपिस्यान्मनोजवः॥१८॥

क्षससेनासागरंचाक्षोभ्यंतीर्त्वागोष्पदेल्पावशिष्टसैन्येहतावित्यर्थः अनेनबहुदिनयुद्धोत्तरम
ल्पावशिष्टसैन्येकतिपययूथपरूपेऽयंशरबंधइतिलभ्यते॥१५॥प्रत्यपद्यतप्रत्यपद्येतां एकव
चनमार्षं·॥नन्वितःपूर्वंतत्किमिदानींनस्मृतमितिशेषः॥१६॥१७॥१८॥श्र राम

३२ रामलक्ष्मणयोरर्थेशोकंत्यज॰एवंप्रसन्नसुखाभ्यामजीवितुंजीवनराहित्येनावस्थातुमशक्यंअतोजीवन्ती
तिनिश्चिनुइतिशेषः॥३३॥३४॥३५॥३६॥३७॥सर्गमानः क्र॰॥४५॥-इतिश्रीरामाभिरामेश्रीरा॰ रा॰ ति॰ यु॰

प्रायेणागतसत्वानांपुरुषाणांगत्तायुषां॥दृश्यमानेषुवक्त्रेषुपरंभवतिवैकृतं॥३२॥त्यजशोकं
चदुःखंचमोहंचजनकात्मजे॥रामलक्ष्मणयोरर्थेनाद्यशक्यमजीवितुं॥३३॥श्रुत्वातुवचनंत
स्याः सीतासुरसुतोपमा॥कृतांजलिरुवाचेमामेवमस्त्विति मैथिली॥३४॥विमानंपुष्पकंतत्तु
सन्निवर्त्यमनोजवं॥दीनात्रिजटयासीतालंकामेवप्रवेशिता॥३५॥ततस्त्रिजटयासार्द्धंपुष्पका
दवरुह्यसा॥अशोकवनिकामेवराक्षसीभिःप्रवेशिता॥३६॥प्रविश्यसीताबहुवृक्षषंडांतां
राक्षसेंद्रस्यविहारभूमिं॥संप्रेक्ष्यसंचिंत्यचराजपुत्रीपरंविषादंसमुपाजगाम॥३७॥ इत्यार्षे
श्रीरामायणेयुद्धकांडेऽष्टचत्वारिंशःसर्गः॥४८॥ घोरेणशरबंधेनबद्धौदशरथात्मजौ॥नि
श्वसंतौयथानागौशयानौरुधिरोक्षितौ॥१॥सर्वेतेवानरश्रेष्ठाःससुग्रीवमहाबलाः॥परिवार्यम
हात्मानौतस्थुःशोकपरिप्लुताः॥२॥एतस्मिन्नंतरेरामःप्रत्यबुध्यतवीर्यवान्॥ स्थिरत्वात्सत्व-
योगाच्चशरैःसंदानितोपिसन्॥३॥

अष्टचत्वारिंशःसर्गः॥४८॥ घोरेणेति॥१॥२॥स्थिरत्वा
त्॰अतिदृढगात्रत्वात्॰सत्वयोगान्महाबलयुक्तत्वात्॰संदानितोपिबद्धोपि॥३॥ रामराम

इतोप्येवमेवेत्याह· इदंविमानमिति॥२५॥पुनर्लिंगांतरमाह· हतेति· हतोवीरः शूरः प्रधानोराजायस्याःसाभ्र
मतिरितस्ततोव्याकुलाभवति· हतकर्णैः हितकर्णधाराधिष्ठितफलका· हतकर्णधाराका॥२६॥तस्यविप
र्ययेपर्यवसानंदर्शयति· इयंपुनरिति· निवेदितजीवनौतुभ्यंकृतौ॥२७॥२८॥चारित्रेणपातिव्रत्येनसु

इदंविमानंवैदेहिपुष्पकंनाममनामतः॥दिव्यंत्वांधारयेनेदंयद्येतौगतजीवितौ॥२५॥हतवीरप्र
धानाहिगतोत्साहाविनिरुद्यमा॥सेनाभ्रमतिसंख्येषुहतकर्णेवनौर्जले॥२६॥इयंपुनरसंभ्रांतानिरु
द्विग्नातपस्विनी॥सेनारक्षतिकाकुत्स्थौमयाप्रीत्यानिवेदितौ॥२७॥सात्वंभवसुविश्रब्धाअनुमा
नैःसुखोदयैः॥अहतौपश्यकाकुत्स्थौस्नेहादेतद्ब्रवीमिते॥२८॥अनृतंनोक्तपूर्वंमेनचवक्ष्यामि
मैथिलि॥चारित्रसुखशीलत्वात्प्रविष्टासिमनोमम॥२९॥नेमौशक्यौरणेजेतुंसेंद्रैरपिसुरासु
रैः॥तादृशंदर्शनंदृष्ट्वामयाचोदीरितंतव॥३०॥इदंतुसुमहच्चित्रंशरैःपश्यस्वमैथिलि॥वि
संज्ञौपतितावेतौनैवलक्ष्मीर्विमुंचति॥३१॥

सुखशीलत्वात्सुखावहत्वात् मन्मनःसुखावहस्वभावत्वा
न्मन्मनःप्रविष्टासिहृदयंगमासीत्यर्थः अनृतात्सर्वंस्वस्वामिनोरावणस्यविरुद्धमपिमयातवोक्तमि
तिभावः॥२९॥तादृशंदर्शनं जीवनसूचकमनयोःसैनिकानांचाकारंदृष्ट्वामयातवानयोर्जीवनमुदीरि
तंनिवेदितंदृश्यतइतिदर्शनः कर्मणिल्युट् राजभोजनाःशालयइतिवत्॥३०॥लक्ष्मीर्नवियुज्यतइतिपा
ऽपिनविमुंचतीत्येवार्थः॥३१॥

रामा॰यु॰
१३८

शरभृतः शरैर्व्याप्तशरीरत्वात्क्रूररूपं प्राप्तः अस्तंव्रजन्भास्करइव तत्तइंधनिःसरत्रुधिरव्याप्तशराः किं
राणस्थानीयाः ॥१५॥ अब्रुवतोपि यस्य रुजा व्यथा दृष्ट्या रागेण अन्यया मुखशोभया च सूच्यते दृष्टीत्यनेन द
र्शनशक्तिमत्त्वं सूच्यते ॥१६॥ यमक्षयं यमगृहं यास्यामीत्यन्वयः यथायं मात्रादिषु स्नेहमपर्यालोच्यैव मा

138

शयानः शरतल्पेस्मिन्स्वशोणितपरिप्लुतः ॥ शरभृतस्ततो भासि भास्करोस्तमिव व्रजन् ॥१५॥ बाणा
भिहतमर्मत्वान्न शक्नोषीह भाषितुं ॥ रुजा चाब्रुवतो यस्य दृष्टिरागेण सूच्यते ॥१६॥ यथैव मां
वनं यान्तमनुयातो महाद्युतिः ॥ अहमप्यनुयास्यामि तथैवैनं यमक्षयं ॥१७॥ इष्टवंधुजनो नि
त्यं मां च नित्यमनुव्रतः ॥ इमामद्य गतोवस्थां ममानार्यस्य दुर्नयैः ॥१८॥ सुरुष्टेनापि वीरेण ल
क्ष्मणेन न संस्मरे ॥ परुषं विप्रियं चापि श्रावितं तु कदाचन ॥१९॥ विससर्जैकवेगेन पंच बाण
शतानि यः ॥ इष्वस्त्रेष्वधिकस्तस्मात्कार्त्तवीर्याच्च लक्ष्मणः ॥२०॥ अस्त्रैरस्त्राणि यो हन्याच्छक्रस्या
पि महात्मनः ॥ सोयमुर्व्यां हतः शेते महार्हशयनोचितः ॥२१॥

मनुगतस्तथाहमपि तत्स्नेहं त्यक्त्वानु
यास्यामीति भावः ॥१७॥ इष्टो वंधुजनो यस्य सः ॥१८॥ विप्रियमहितं कदाचन श्रावितं तु इति न संस्मरे
न स्मरामीत्यर्थः ॥१९॥ यएकवेगेन पंच वाणशतानि विससर्ज कार्त्तवीर्यस्ततस्मात्कार्त्तवीर्यात्सह
स्रवाहोरयं द्विवाहुरेकेन वेगेन तावतो वाणान् विसृजन्नधिक इत्यर्थः ॥२०॥२१॥ ॥

राम॰
१३८

गाढमर्पितं शरैर्गाढबद्धं ॥४॥ सचिवः सहायः सांपरायिकः युद्धे साधुः युद्धार्ह इति यावत् ॥५॥६॥७॥८॥९॥ योम

ततोदृष्ट्वासरुधिरंविषण्णंगाढमर्पितं॥ भ्रातरंदीनवदनंपर्यदेवयदातुरः॥४॥ किंनुमेसीतयाकार्यंलब्धयाजीवितेनवा॥ शयानंयोद्यपश्यामिभ्रातरंयुधिनिर्जितं॥५॥ शक्यासीतासमानारीमर्त्यलोकेविचिन्वता॥ नलक्ष्मणसमोभ्राताससचिवःसांपरायिकः॥६॥ परित्यक्ष्याम्यहंप्राणान्वानराणांतुपश्यतां॥ यदिपंचत्वमापन्नःसुमित्रानंदवर्द्धनः॥७॥ किंनुवक्ष्यामिकौशल्यांमातरंकिंनुकैकयीं॥ कथमंबांसुमित्रांचपुत्रदर्शनलालसां॥८॥ विवत्सांवेपमानांचवेपंतींकुररीमिव॥ कथमाश्वासयिष्यामियदियास्यामितंविना॥९॥ कथंवक्ष्यामिशत्रुघ्नंभरतंचयशस्विनं॥ मयासहवनंयातोविनातेनाहमागतः॥१०॥ उपालंभंनशक्ष्यामिसोढुमंबसुमित्रया॥ इहैवदेहंत्यक्ष्यामिनहीजीवितुमुत्सहे॥११॥ धिङ्मांदुष्कृतकर्माणमनार्यंमत्कृतेह्यसौ॥ लक्ष्मणःपतितःशेतेशरतल्पेगतासुवत्॥१२॥ त्वंनित्यंसुविषण्णंमांआश्वासयसिलक्ष्मण॥ गतासुर्नाद्यशक्तोसिमामार्त्तमभिभाषितुं॥१३॥ येनाद्यबहवोयुद्धेनिहताराक्षसाःक्षितौ॥ तस्यामेवाद्यशूरस्त्वंशेषेविनिहतःशरैः॥१४॥

यासहवनंगतः तेनलक्ष्मणेनविनागतोहंकिंवक्ष्यामि ॥१०॥ अंबांसुमित्रयेति क्रियमाणमितिशेषः ॥११॥ ।१२। गतासुर्गतासुरिव ।१३॥ ।१४॥

रामा॰यु॰
१३९

परिदेवनप्रवृत्तं वचः कृष्णेतरेक्षणाः पिंगाक्षाः॥३०॥ तं दूरपलायितसेनाः परावर्त्य स्थापयित्वागतं॰ वानराद्दु
द्रुवुः सुग्रीवसमीपस्था इति शेषः॥३१॥३२॥ खषर्गमानः कृ॰॥४९॥ इति श्रीरामाभिरामे श्रीरामीये रामाय

अनुज्ञाता मया सर्वे यथेष्टं गंतुमर्हथ॥ शुश्रुवुस्तस्य ये सर्वे वानराः परिदेवितं। वर्त्तयांचक्रिरे
अश्रूणि नेत्रैः कृष्णेतरेक्षणाः॥३०॥ ततः सर्वाण्यनीकानि स्थापयित्वा विभीषणः। आजगाम गदापा
णिस्त्वरितं यत्र राघवः॥३१॥ तं दृष्ट्वा त्वरितं यांतं नीलांजनचयोपमं। वानरा दुद्रुवुः सर्वे मन्य
मानास्तु रावणिं॥३२॥ इत्यार्षे श्रीरामायणे युद्धकांडे एकोनपंचाशः सर्गः॥४९॥ अथोवाच
महातेजा हरिराजो महाबलः॥ किमियं व्यथिता सेना मूढवातेव नौर्जले॥१॥ सुग्रीवस्य वचः
श्रुत्वा वालिपुत्रोंगदोब्रवीत्॥ न त्वं पश्यसि रामं च लक्ष्मणं च महारथं॥२॥ शरजालाचितौ वी
रौ वीरौ उभौ दशरथात्मजौ॥ शरतल्पे महात्मानौ शयानौ रुधिरोक्षितौ॥३॥ अ

णतिलके युद्ध॰ एकोनपंचाशः सर्गः॥४९॥ मूढवाता दिग्भ्रमोहकरवात्यावातवती। मूढमिति
भावे निष्ठा॥१॥ सुग्रीवस्य वचः सेनापलायनप्रश्नहेतुरूपं। अंगदस्तु प्रस्तुतमेव निमित्तमाह॥ न
त्वमिति। एवंविशेषणकौ दशरथात्मजौ न पश्यसि किं एतदेव निमित्तमिति वयाप्रश्न इति भावः॥२॥३॥

राम॰
१३९

139

विभीषणोराजानकृतइतियन्यतस्तस्मात्तन्विभीषणमभिषेक्ष्यामीतिमिथ्याप्रलप्तंप्रलपितंमांप्रधक्ष
ति॥२२॥सत्वहीनं शोकेनबलहीनं॥२३॥नीलेवेत्यादौसहेतिशेषः॥२४॥हनुमदादिभिर्मदर्थेयत्कृतंते

तत्तुमिथ्याप्रलप्तंमांप्रधक्ष्यतिनसंशयः।यन्मयानकृतोराजाराक्षसानांविभीषणः॥२२॥अस्मि
न्मुहूर्त्तेसुग्रीवप्रतियातुमितोर्हसि।सत्वहीनंमयाराजन्रावणोभिभविष्यति॥२३॥अंगदंतुपु
रस्कृत्यससैन्यंसपरिच्छदं।सागरंतरसुग्रीवनीलेनचनलेनच॥२४॥कृतंहिसुमहत्कर्मय
दन्यैर्दुष्करंरणे॥ऋक्षराजेनतुष्यामिगोलांगूलाधिपेनच॥२५॥अंगदेनकृतंकर्ममैंदेनद्विवि
देनच।युद्धंकेसरिणासंख्येघोरंसंपातिनाकृतं॥२६॥गवयेनगवाक्षेणशरभेनगजेनच॥
अन्यैश्चहरिभिर्युद्धंदुर्द्धरंत्यक्तजीवितैः॥२७॥नचातिक्रमितुंशक्यंदैवंसुग्रीवमानुषैः।यत्तु
शक्यंवयस्येनसुहृदावापरंमम॥२८॥कृतंसुग्रीवतत्सर्वंभवताधर्मभीरुणा।मित्रकार्यं
कृतमिदंभवद्भिर्वानरर्षभाऽ॥२९॥

नतुष्यामि॥२५॥२६॥हरिभिर्युद्धंकृतमितिपूर्वेणसंबंधः॥२७॥अतिप्रबलसहायेनापिदैवंदुर्जयमि
त्याह-नचातिक्रमितुमिति-वयस्यः केवलसखासुहृदुपक्रियामूलसखा॥२८॥अधर्मभीरुणेति
च्छेदइतिनीयः नहिफलमिव-धर्मभीरुणेतिच्छेदेपिधर्मत्यागाद्भीरुणेतिव्याख्यातुंशक्यत्वान्॥२९

१२लक्ष्मणस्यतुलक्ष्मणस्यच॥१३॥१४॥१५॥१६॥शल्यकःश्वावित्॥१७॥प्रतिष्ठाराज्येस्थितिः॥१८॥ग्रथ

तेनिवृत्ताःपुनःसर्वेवानरास्त्यक्तसाध्वसाः॥रक्षराजवचःश्रुत्वातंचदृष्ट्वाविभीषणं॥१२॥विभीषणस्तुरामस्यदृष्ट्वागात्रंशरैश्चितं॥लक्ष्मणस्यतुधर्मात्माबभूवव्यथितस्तदा॥१३॥जलक्लिन्नेनहस्तेनतयोर्नेत्रेविमृज्यच॥शोकसंपीडितमनारुरोदविललापच॥१४॥इमौतौसत्वसंपन्नौ।विक्रांतौप्रियसंयुगौ॥इमामवस्थांगमितौराक्षसैःकूटयोधिभिः॥१५॥भ्रातृपुत्रेणचैतेनदुष्पुत्रेणदुरात्मना॥राक्षस्याजिह्मयाबुध्यावंचितावृजुविक्रमौ॥१६॥शरैरिमावलंविद्धौरुधिरेणसमुक्षितौ॥वसुधायामिमौसुप्तौदृश्येतेशल्यकाविव॥१७॥ययोर्वीर्यमुपाश्रित्यप्रतिष्ठाकांक्षितामया॥ताविमौदेहनाशायप्रसुप्तौपुरुषर्षभौ॥१८॥जीवन्नद्यविपन्नोस्मिनष्टराज्यमनोरथः॥प्राप्तप्रतिज्ञश्चरिपुःसकामोरावणःकृतः॥१९॥एवंविलपमानंतंपरिष्वज्यविभीषणं॥सुग्रीवःसत्वसंपन्नोहरिराजोब्रवीदिदं॥२०॥राज्यंप्राप्स्यसिधर्मज्ञलंकायांनेहसंशयः॥रावणःसहपुत्रेणस्वकामंनेहलप्स्यते॥२१॥

जीवन्नपिविपन्नोस्मिमृतोस्मिप्राप्तप्रतिज्ञःनिर्वृत्तसीतापरित्यागाभावप्रतिज्ञःसकामःपूर्णमनोरथश्चपुत्रेणकृतः॥१९॥२०॥रावणःपुत्रेणसहस्वकामंस्वमनोरथंइहलंकायांनलप्स्यते॥२१॥ राम ॥ ॥ ॥

सुग्रीवोनेदमिदानींपलाय ननिमित्तमित्याह॰ अथेति॰ इदंपलायनमनिमित्तंत्वदुक्तनिमित्तान्यनिमित्य हीनमितिनमन्येकिंतुकेनचित्सांप्रतिकेनपलायनहेतुनाभयेनभवितव्यमित्यर्थः॥४॥तदेवस्पष्टयति विषण्णेति॰ विषण्णवदनास्त्यक्तप्रहरणाश्चसंततावत्पर्यंतमिहैवस्थिताःसंप्रतितुइतोदिशःप्रति

अथाब्रवीद्वानरेंद्रःसुग्रीवःपुत्रमंगदं॥नानिमित्तमिदंमन्येभवितव्यंभयेनतु॥४॥विषण्णवदनास्त्यक्तप्रहरणादिशः॥पलायंतेत्रहरयस्त्रासादुत्फुल्ललोचनाः॥५॥अन्योन्यस्यनलज्जंतेननिरीक्षंतिपृष्ठतः॥विप्रकर्षंतिचान्योन्यंपतितंलंघयंतिच॥६॥एतस्मिन्नंतरेवीरोगदापाणिर्विभीषणः॥सुग्रीवंवर्द्धयामासराघवंचजयाशिषा॥७॥विभीषणंचसुग्रीवोदृष्ट्वावानरभीषणं॥ऋक्षराजंमहात्मानंसमीपस्थमुवाचह॥८॥विभीषणोयंसंप्राप्तोयंदृष्ट्वावानरर्षभाः॥द्रवंत्यागतसंत्रासारावणात्मजशंकया॥९॥शीघ्रमेतान्सुसंत्रस्तान्बहुधाविप्रधावितान्।पर्यवस्थापयाख्याहिविभीषणमुपस्थितं॥१०॥सुग्रीवेणैवमुक्तस्तुजांबवानृक्षपार्थिवः॥वानरान्सांत्वयामाससंनिवर्त्यप्रधावतः॥११॥

पलायंतेनतुत्रासात्सांप्रतिकादेवनान्यथेत्यर्थः॥५॥नलज्जंतेशूरगर्हितेपलायनेक्रियमाणेनलज्जांप्राप्नुवंतीत्यर्थः पृष्ठतः वर्त्तमानपदार्थानितिशेषः विप्रकर्षंतीति॰ पलायनप्रतिरोधकानितिशेषः॥६॥वर्धयामासविजयीभवेतिवचनेनेतिभावः॥७॥वानरभीषणं॰वानर णांभयनिमित्तं॥८॥९॥पर्यवस्थापय॰प्रतिष्ठापय ॥११॥

आर्त्तत्वादिधर्मवतोपितान्वृहस्पतिर्विद्याभिगरुडादिध्यानरूपमृतजीवनीभिः तादृशीभिरोषधीभिश्चचि
कित्सत ॥२८॥ अस्त्वेतत्किंप्रकृतेतत्राह तानीति ॥२९॥ ननुज्ञानेकिलानयनंतत्राह· हरयस्त्विति· संपात्या
दयोहरयः पार्वतीपर्वतप्रतिष्ठितेते औषधीविजानंतिपार्वतीइतिद्विवचने आर्षंतयोर्नामाह· संजी

तानार्त्तान्नष्टसंज्ञांश्चगतासूंश्चवृहस्पतिः ॥ विद्याभिर्मंत्रयुक्ताभिरोषधीभिश्चिकित्सति ॥२८॥ ता
न्यौषधान्यानयितुंक्षीरोदंयांतुसागरं ॥ जवेनवानराःशीघ्रंसंपातिपनसादयः ॥२९॥ हरयस्तु
विजानंतिपार्वतीतेमहौषधी ॥ संजीवकरणींदिव्यांविशल्यांदेवनिर्मितां ॥३०॥ चंद्रश्चनाम
द्रोणश्चक्षीरोदेसागरोत्तमे ॥ अमृतंयत्रमथितंतत्रतेपरमौषधी ॥३१॥ तेतत्रविहितौदेवैःपर्व
तौतुमहोदधौ ॥ अयंवायुसुतोराजन्हनूमांस्तत्रगच्छतु ॥३२॥ एतस्मिन्नंतरेवायुर्मेघाश्चापि
सविद्युतः ॥ पर्यस्यसागरेतोयंकंपयन्निवपर्वतान् ॥३३॥

वेति· विशल्यांविशल्यकरणींदेवेन
ब्रह्मणानिर्मितां ॥३०॥ क्वपर्वतेतेतत्राह· चंद्रश्चेति· क्षीरोदेतौपर्वतौस्तः तयोश्च औषध्यौ कोनाम
सागरोत्तमस्तत्राह· अमृतमिति ॥३१॥ यद्यपिपनसादयोजानंतितथापिशीघ्रमागमनार्थंवायुसु
तोयातु ॥३२॥ एतस्मिन्नंतरे· औषध्यानयनवार्त्ताकाले ॥ सागरेतोयंपर्यस्यअतिलहरीयोगिकृत्वाप
र्वतान्कंपयन्प्रचंडवायुरभूत्सविद्युतोमेघाश्चासन् ॥३३॥ ॥ श्री

कुतस्तत्राह गरुडाधिष्ठिताविति गरुडोपासकतयाविज्ञातावित्यर्थः तीर्थस्तु न रुजापीडितावेतावितिपठि-
त्वा न मरणमर्थवसायि रुजापीडिताविमौ किं तु मोहमाप्राप्तौ अतस्त्यक्त्वेत्येवं व्याचष्टे॥२२॥ तमेवं सांत्व
यित्वा गरुडानुग्रहसंभावनयेत्यर्थः सांत्वयित्वेत्यस्य वार्यकथनं समाश्वास्य त्विति। अनेन सुग्रीववाक्ये

गरुडाधिष्ठितावेतावुभौ राघवलक्ष्मणौ। त्यक्त्वा मोहं वधिष्येते सगणं रावणं रणे॥२२॥ तमेवं सां
त्वयित्वा तु समाश्वास्य तु राक्षसं॥ सुषेणं श्वशुरं पार्श्वे सुग्रीवस्तमुवाच ह॥२३॥ सह शूरैर्हरिग-
णैर्लब्धसंज्ञावरिंदमौ॥ गच्छ त्वं भ्रातरौ गृह्य किष्किंधां रामलक्ष्मणौ॥२४॥ अहं तु रावणं हत्वा
सपुत्रं सहबांधवं॥ मैथिलीमानयिष्यामि शक्रो नष्टामिव श्रियं॥२५॥ श्रुत्वैतद्वानरेंद्रस्य सुषे
णो वाक्यमब्रवीत्॥ देवासुरं महायुद्धमनुभूतं पुरातनं॥२६॥ तदास्म दानवा देवान् शरसंस्प
र्शकोविदान्॥ निर्जघ्नुः शस्त्रविदुषश्छादयंतो मुहुर्मुहुः॥२७॥

न राम विषयं स्वस्य भगवदवता
रत्वज्ञानं सूचितं॥२३॥ यावल्लब्धसंज्ञौ भविष्यतस्तावदनयोः। रक्षार्थमेतौ गृहीत्वा शूरैर्हरिगणैः सह
किष्किंधां गच्छ॥२४॥२५॥ एतद्वाक्यं रक्षणोपायबोधकं वाक्यं नदेवाह देवासुरमिति॥२६॥ स्पृश्यत इ
ति स्पर्शो विषयः शरसंस्पर्शे शरविषये लक्ष्यवेधनरूपे कोविदानपि शास्त्रविदुषोपि मुहुर्मुहु
श्छादयंतो मायया ये इंद्रजिदादात्मानं प्रच्छादयंतो जघ्नुः॥२७॥ अ

४१ व्यतिक्रांतौलंघितवंतौ॥४२॥अथतातंदशरथं·स्वावतारोचितंकश्यपप्रजापत्यंशंअजंचपितामहं·चतु
र्मुखब्रह्मांशंमेहिरण्यगर्भात्मनस्तदंशस्य॥४३॥कोभवानिति।अयंपन्नगोपिमनुष्यशरीरोचितव्यवहा
रएवतत्सत्यत्वप्रत्यापनार्थः अत्ररामसमीपागमनपर्यंतंपक्ष्याकारेणैवागत्यसंनिधिमात्रेणना

तावुत्थाप्यमहातेजागरुडोवासवोपमौ॥उभौचसस्वजेहृष्टोरामश्चैनमुवाचह॥४१॥भवत्प्र
सादाद्व्यसनंरावणिप्रभवंमहत्।उपायेनव्यतिक्रांतौशीघ्रंचबलिनौकृतौ॥४२॥यथातातं
दशरथंयथाजंचपितामहं।तथाभवंतमासाद्यहृदयंमेप्रसीदति॥४३॥कोभवान्रूपसंप
न्नोदिव्यस्रगनुलेपनः।वसानोविरजेवस्त्रेदिव्याभरणभूषितः॥४४॥तमुवाचमहातेजावैन
तेयोमहाबलः।पतत्रिराजःप्रीतात्माहर्षपर्याकुलेक्षणः॥४५॥अहंसखातेकाकुत्स्थप्रि
यःप्राणोबहिश्चरः।गरुत्मानिहसंप्राप्तोयुवयोःसाह्यकारणात्॥४६॥असुरावामहावीर्या
वानरावामहाबलाः।सुराश्चापिसगंधर्वाःपुरस्कृत्यशतक्रतुं॥४७॥

गवंधनंचनिरस्यराघवस्प
र्शनाद्यर्थंपुरुषाकारेणाव्यवहृतवानितिबोध्यं।तदाह रूपसंपन्न इति दिव्यरूपसंपन्नइत्यर्थः॥४४
हर्षपर्याकुलेक्षणोराममुवाचेत्यन्वयः॥४५॥अहंसखेति·सखित्वात्सुग्रीवादिवदेवसाह्यकार
णार्थमागतइतिभावः॥४६॥इदंचसाहाय्यंमदेकसाध्यमित्याह·असुरावेति॥४७॥

सर्वेद्वीपाःलवणसमुद्रांतवर्त्तिनः॥३४॥तत्रवासिनःमलयवासिनःभोगिनोमहाकायाःयादांसिसर्वाणिलवणार्णवंजग्मुःभयादंतर्मग्नानीत्यर्थः॥३५॥३६॥३७॥प्रत्यभिनंद्यविजयाशिषाप्रतिपूज्य-सुखे-रामलक्ष्मणयोः॥३८॥संरुरुहुःयथापूर्वंसंरूढमांसाश्चाभवन्सुवर्णशोभनकांतियुक्ते तन्-शरीरे॥३९॥ते

महतापक्षवातेनसर्वद्वीपमहाद्रुमाः॥निपेतुर्भग्नविटपाःसलिलेलवणांभसि॥३४॥अभवन्पन्नगास्त्रस्ताःभोगिनस्तत्रवासिनः॥शीघ्रंसर्वाणियादांसिजग्मुश्चलवणार्णवं॥३५॥ततोमुहूर्त्ताद्गरुडंवैनतेयंमहावलं॥वानरादद‍ृशुःसर्वेज्वलंतमिवपावकं॥३६॥तमागतमभिप्रेक्ष्यनागास्तेविप्रदुद्रुवुः॥यैस्तौपुरुषौबद्धौशरभूतैर्महावलैः॥३७॥ततःसुपर्णःकाकुत्स्थौस्पृष्ट्वाप्रत्यभिनंद्यच॥विममर्शचपाणिभ्यांमुखेचंद्रसमप्रभे॥३८॥वैनतेयेनसंस्पृष्टास्तयोःसंरुरुहुर्व्रणाः सुवर्णेचतनूस्निग्धेतयोराशुबभूवतुः॥३९॥तेजोवीर्यंबलंचौजउत्साहश्चमहागुणाः॥प्रदर्शनंचबुद्धिश्चस्मृतिश्चद्विगुणातयोः॥४०॥

जःपराभिभवसामर्थ्य-वीर्यंपराक्रमःबलंशारीरंओजःकांतिःउत्साहःप्रसिद्धःप्रदर्शनंशब्दानुमानाभ्यांपरोक्षार्थनिश्चयःबुद्धिरपरोक्षनिश्चयःद्विगुणावैनतेयस्पर्शात्पूर्वतोप्यधिकाअत्रान्यैर्देवैरवतीर्यभगवतोरामस्यभूतलम्राज्ञयोपकारःसंपादितःगरुडेनतुस्वरूपतएवेतिबोध्यं॥४०॥ ॥

रा॰भा॰यु
१४३

आप्तसुंगमनानुसंस्कारयितुं॥५५॥५६॥मदुक्तसखित्वंप्रतिलोकप्रतारणायापिविस्मयोनकार्यइत्याह॥अ

एवमुक्त्वातदारामंसुपर्णःसमहाबलः॥परिष्वज्यचसुस्निग्धमाप्रष्टुमुपचक्रमे॥५५॥सखे
राघवधर्मज्ञरिपूणामपिवत्सल॥अभ्यनुज्ञातुमिच्छामिगमिष्यामियथासुखं॥५६॥न
चकौतूहलंकार्यंसखित्वंप्रतिराघव॥कृतकर्मारणेवीरसखित्वंप्रतिवेत्स्यसि॥५७॥
बालवृद्धावशेषांतुलंकांकृत्वाशरोर्मिभिः॥रावणंतुरिपुंहत्वासीतांत्वमुपलप्स्यसे॥५८॥
इत्येवमुक्त्वावचनंसुपर्णःशीघ्रविक्रमः॥रामंचनिरुजंकृत्वामध्येतेषांवनौकसां॥५९॥
प्रदक्षिणंततःकृत्वापरिष्वज्यचवीर्यवान्॥जगामाकाशमाविश्यसुपर्णःपवनोयथा॥६०॥
ततो निरुजौराघवौदृष्ट्वावानरयूथपाः॥सिंहनादंतदानेदुर्लांगूलंदुधुवुश्चते॥६१॥ततोभे
रीःसमाजघ्नुर्मृदंगांश्चाप्यवादयन्॥दध्मुःशंखान्संप्रहृष्टाःक्ष्वेलंत्यपियथापुरं॥६२॥
अपरेस्फोट्यविक्रांतावानरानगयोधिनः॥द्रुमानुत्पाट्यविविधांस्तस्थुःशतसहस्रशः॥६३॥

143

नुवेत्स्यसि॰एतैःसर्वैःसहेतिशेषः॥५७॥५८॥५९॥प्रदक्षिणंकृत्वेत्यनेनदिव्यदेवतावतारोरामइ
तिसर्वान्प्राकृतकपीन्प्रत्यपिबोधितं॥६०॥६१॥यथापुरंयथापूर्वं॥६२॥६३॥श्रीरामचंद्र॥अ

राम॰
१४३

४८ ॥ रक्षोमायययाशरभूताः एतेनागास्त्वदाश्रयाइतिबहुव्रीहिः त्वांप्राप्ताइत्यर्थः ॥ ४९ ॥ ममदुर्नयैरित्यादिनाय
दात्मनिंदनंकृतंतत्परिहरतिसभाग्यइति· अनुकूलतरंशुभदैववानसिसमरेसमरविषये ॥ ५० ॥ इमंवृ
त्तांतंनागवंधवृत्तांतंश्रुत्वा· देवतानांमुखादितिशेषः स्नेहादेवागतः ॥ ५१ ॥ स्नेहादेवचयुवांमोक्षितौमोचि

नेमंमोक्षयितुंशक्ताःशरवंधंसुदारुणं ॥ मायाबलादिंद्रजितानिर्मितंक्रूरकर्मणा ॥ ४५ ॥ एतेनागाः
काद्रवेयास्तीक्ष्णादंष्ट्राविषोल्वणाः ॥ रक्षोमायाप्रभावेनशरभूतास्त्वदाश्रयाः ॥ ४९ ॥ सभाग्यश्चासि
धर्मज्ञरामसत्यपराक्रम ॥ लक्ष्मणेनसहभ्रात्रासमरेरिपुघातिना ॥ ५० ॥ इमंश्रुत्वातुवृत्तांतंत्व
रमाणोहमागतः ॥ सहसैवावयोःस्नेहात्सखित्वमनुपालयन् ॥ ५१ ॥ मोक्षितौचमहाघोरादस्मा
त्सायकबंधनात् ॥ अप्रमादश्चकर्त्तव्योयुवाभ्यांनित्यमेवहि ॥ ५२ ॥ प्रकृत्याराक्षसाःसर्वेसंग्रा
मेकूटयोधिनः ॥ शूराणांशुद्धभावानांभवतामार्जवंबलं ॥ ५३ ॥ तन्नविश्वसनीयंवोराक्षसानां
रणाजिरे ॥ एतेनैवोपमानेननित्यंजिह्माहिराक्षसाः ॥ ५४ ॥

तौ· अप्रमादःसावधानता ॥ ५२ ॥ ५३ ॥ तन्न
विश्वसनीयं· यथावयमृजवोधर्मपरास्तथापुरुषत्वाविशेषाद्रक्षांस्यपितथैवेतिकल्पितंरक्षोगत
मार्जवंनविश्वसितव्यमित्यर्थः उक्तमेवार्थमनुभवतःस्पष्टीकरोति· एतेनैवेति· इंद्रजित्कापट्येनैवेत्यर्थः ॥ ५४

६॥ किंहर्षकारणमुत्थितंतत्ज्ञायतां॥७॥ प्राकारमधिरुह्येति॥ अनेनात्रावरोहः सूचितः॥८॥ समुत्थितो॰

एवंचवचनंचोक्त्वामंत्रिणोराक्षसेश्वरः॥ उवाचनैर्ऋतांस्तत्रसमीपपरिवर्त्तिनः॥६॥ ज्ञायतांतूर्णमेतेषांसर्वेषांचवनौकसां॥ शोककालेसमुत्पन्नेहर्षकारणमुत्थितं॥७॥ तथोक्तास्तेसुसंभ्रांताः प्राकारमधिरुह्यच॥ ददृशुः पालितांसेनांसुग्रीवेणमहात्मना॥८॥ तौचमुक्तौसुघोरेणशरबंधेनराघवौ॥ समुत्थितौमहाभागौविषेदुःसर्वराक्षसाः॥९॥ संत्रस्तहृदयाः सर्वेप्राकारादवरुह्यते॥ विवर्णाराक्षसघोराराक्षसेंद्रमुपस्थिताः॥१०॥ तदप्रियंदीनमुखारावणस्यनिशाचराः॥ कृत्स्नंनिवेदयामासुर्यथावद्वाक्यकोविदाः॥११॥ यौताविंद्रजितायुद्धेभ्रातरौरामलक्ष्मणौ॥ निबद्धौशरबंधेननिष्प्रकंपभुजौकृतौ॥१२॥ विमुक्तौशरबंधेनदृश्येतेतौरणाजिरे॥ पाशानिवगजौछित्वागजेंद्रसमविक्रमौ॥१३॥ तच्छ्रुत्वावचनंतेषांराक्षसेंद्रोमहाबलः॥ चिंतारोषसमाक्रांतोविवर्णवदनोभवत्॥१४॥ घोरैर्दत्तवरैर्बद्धौशरैराशीविषोपमैः॥ अमोघैःसूर्यसंकाशैःप्रमथ्येंद्रजितायुधि॥१५॥

दृष्टेतिशेषः॥९॥१०॥१२॥१३॥१४॥ दत्तवरैः वरेदत्वाद्दत्तवरास्तैः चिरकालदुश्चरतपसावरप्राप्तैरित्यर्थः युधिप्रमथ्यबद्धावित्यन्वयः॥१५॥

६४॥निशीथेयथाघनानांनादस्तथावानराणांनादइत्यर्थः अत्रस्थानेदिनद्वयंयुद्धावहारइत्याग्निवेश्यः
६५॥मत्तमानः क०॥४७॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयु० पंचाशः सर्गः॥५०॥

।विसृजंतोमहानादांस्त्रासयंतोनिशाचरान्॥लंकाद्वाराण्युपाजग्मुर्युद्धकामाःप्लवंगमाः॥६४॥
तेषांसुभीमस्तुमुलोनिनादोबभुवशाखामृगयूथपानां॥त्रयेनिदाघस्ययथाघनानांनादःस
भीमोनदतांनिशीथे॥६५॥इत्यार्षेश्रीरामायणेयुद्ध० पंचाशः सर्गः॥५०॥ तेषांतुतुमलंशब्दंवा
नराणांमहौजसां॥नर्द्दतोराक्षसैःसार्द्धंतदाशुश्रावरावणः॥१॥स्निग्धगंभीरनिर्घोषंश्रुत्वातंनि
नदंभृशं॥सचिवानांततस्तेषांमध्येवचनमब्रवीत्॥२॥यथासौसंप्रहृष्टानांवानराणांसमु
पस्थितः॥बहूनांसुमहान्नादोमेघानामिवगर्जतां॥३॥सुव्यक्तंमहतीप्रीतिरेतेषांनात्रसंशयः।
तथाहिविपुलैर्नादैश्चुक्षुभेलवणार्णवः॥४॥तौतुबद्धौशरैस्तीक्ष्णैर्भ्रातरौरामलक्ष्मणौ॥अ
यंचसुमहान्नादःशंकांजनयतीवमे॥५॥

अथश्रुतवानरनादेनरावणेनधूम्राक्षप्रेरणंतेषा
मितिराक्षसैःविभीषणादिभिः॥१॥स्निग्धगंभीरत्वेनदुःखमलरोदनादिशब्दव्यावृत्तिः॥२॥यथा
यस्मादित्यर्थः एवमेषांनादःसमुत्थितः॥३॥तस्मादेषांमहतीप्रीतिर्ज्ञातेतिमन्ये तत्रैवयुक्त्यंतरं
तथाहीति॥४॥शंकांबंधमोक्षणाशंकां जनयतीव जनयत्येव॥५॥ अ

ना

२५ समलंकृतैरिति रथध्वजयोर्विशेषणाः स्वर्णजालविहितैः तेन विहितालंकारैः ॥२६॥ २७॥ २८॥ पश्चिमद्वा
रात् यत्र द्वारे हनूमान् रोधकस्तस्मादेव पश्चिमद्वाराद्धनूमता योद्धुं निर्गतः ॥२९॥ ३०॥ शाकुनाः दुःशकु

परिघैर्भिंडिपालैश्च भल्लैः पाशैः परस्वधैः ॥ निर्ययूराक्षसा घोरा नर्दंतो जलदा यथा ॥२५॥ रथैः
कवचिनस्त्वन्ये ध्वजैश्च समलंकृतैः ॥ सुवर्णजालविहितैः खरैश्च विविधाननैः ॥२६॥ हयैः
परमशीघ्रैश्च गजैश्चैव मदोत्कटैः ॥ निर्ययुर्नैर्ऋतव्याघ्रा व्याघ्रा इव दुरासदाः ॥२७॥ मम
सिंहमुखैर्युक्तं खरैः कनकभूषितैः ॥ आरुरोह रथं दिव्यं धूम्राक्षः खरनिस्वनः ॥२८॥ स निर्या
तो महावीर्यो धूम्राक्षो राक्षसैर्वृतः ॥ हसन्वै पश्चिमद्वाराद्धनूमान्यत्र तिष्ठति ॥२९॥ रथप्रवर
मास्थाय खरयुक्तं खरस्वनं ॥ प्रयातं तु महाघोरं राक्षसं भीमदर्शनं ॥३०॥ अंतरिक्षगताः कु
राः शाकुनाः प्रत्यषेधयन् ॥ रथशीर्षे महाभीमो गृध्रश्च निपपात ह ॥३१॥ ध्वजाग्रे ग्रथिताश्चैव
निपेतुः कुणपाशनाः ॥ रुधिरार्द्रो महान्श्वेतः कबंधः पतितो भुवि ॥३२॥ विस्वरं चोत्सृजन्ना
दान्धूम्राक्षस्य निपातितः ॥ ववर्ष रुधिरं देवः संचचाल च मेदिनी ॥३३॥

नाः प्रत्यषेधयन् मृत्यु
सूचनेनेति शेषः ॥३१॥ ग्रथिताः मालावत्परस्परसक्ताः कुणपाशनाः गृध्राः ॥३२॥ धूम्राक्षस्य समीपे
पतितो निपतितः कबंध इति शेषः ॥३३॥ ॥ श्री ॥ राम ॥ श्री ॥ कृष्ण

संशयस्थं इंद्रजिद्बलमवष्टभ्य स्थितस्य मे तद्बलस्य वैफल्यात्प्रायोस्माकमपजय इति मन्ये इत्यर्थः ॥१६॥
तदेवाह निष्फला इति। यैः शरैरिंद्रजित्प्रयुक्तैः संग्रामे ममारिपूणां जीवितमादत्तं ते निष्फलाः संवृत्ताः ख

तरस्व बंधमासाद्य यदि मुक्तौ रिपू मम ॥ संशयस्थमिदं सर्वमनुपश्याम्यहं बलं ॥१६॥ निष्फलाः
खलु संवृत्ताः शराः पावकतेजसः ॥ आदत्तं यैस्तु संग्रामे रिपूणां जीवितं मम ॥१७॥ एवमुक्त्वा तु
संक्रुद्धो निश्वसन्नुरगो यथा ॥ अब्रवीद्रक्षसां मध्ये धूम्राक्षं नाम राक्षसं ॥१८॥ बलेन महता युक्तो रा
क्षसैर्भीमविक्रमः ॥ त्वं वधायाशु निर्याहि रामस्य सह वानरैः ॥१९॥ एवमुक्तस्तु धूम्राक्षो राक्ष
सेंद्रेण धीमता ॥ परिक्रम्य ततः शीघ्रं निर्जगाम नृपालयात् ॥२०॥ अभिनिष्क्रम्य तद्द्वारं बलाध्य
क्षमुवाच ह ॥ त्वरयस्व बलं शीघ्रं किं चिरेण युयुत्सतः ॥२१॥ धूम्राक्षवचनं श्रुत्वा बलाध्यक्षो ब
लानुगः ॥ बलमुद्योजयामास रावणस्याज्ञया भृशं ॥२२॥ ते बद्धघंटा बलिनो घोररूपा निशाचराः
विनद्यमानाः संहृष्टाः धूम्राक्षं पर्यवारयन् ॥२३॥ विविधायुधहस्ताश्च शूलमुद्गरपाणयः ॥ गदा
भिः पट्टिशैर्दंडैरायसैर्मुशलैरपि ॥२४॥

लु तस्मात्संशयस्थमिदं ॥१७॥१८॥१९॥ परिक्रम्य रावणं प्र
दक्षिणीकृत्य ॥२०॥ तद्द्वारं रावणगृहद्वारं अभिनिष्क्रम्य ततो निर्गम्य युयुत्सतः पुंसः किं चिरेण । किं वि
लंबेन विलंबो व्यर्थ इत्यर्थः ॥२१॥२२॥ बद्धघंटाः प्रासशक्त्यादिष्विति शेषः ॥२३॥ गदादिभिरुपलक्षिताः ॥२४

जनितोद्धर्षाः संजातोत्साहाः अभीतवत् निर्भयाः संतः ॥६॥ शूलनिर्भिन्नदेहिनः इन्नंतत्वमार्षं ॥७॥८॥९॥ जितकाशि

विदार्यमाणा रक्षोभिर्वानरास्ते महाबलाः ॥ अमर्षजनितोद्धर्षाश्चक्रुः कर्माण्यभीतवत् ॥६॥ शरनिर्भिन्नगात्रास्ते शूलनिर्भिन्नदेहिनः ॥ जगृहुस्ते द्रुमांस्तत्र शिलाश्च हरियूथपाः ॥७॥ ते भीमवेगा हरयो नर्दमानास्ततस्ततः ॥ ममंथू राक्षसान्वीरान्नामानि च बभाषिरे ॥८॥ तद्बभूवाद्भुतं घोरं युद्धं वानररक्षसां ॥ शिलाभिर्विविधाभिश्च बहुशाखैश्च पादपैः ॥९॥ राक्षसा मथिताः केचिद्वानरैर्जितकाशिभिः ॥ ववेमू रुधिरं केचिन्मुखै रुधिरभोजनाः ॥१०॥ पार्श्वेषु दारिताः केचित्केचिद्राशीकृता द्रुमैः ॥ शिलाभिश्चूर्णिताः केचित्केचिद्दंतैर्विदारिताः ॥११॥ ध्वजैर्विमथितैर्भग्नैः खड्गैः [illegible]श्च विनिपातितैः ॥ रथैर्विध्वंसिताः केचिद्व्यथिता रजनीचराः ॥१२॥ गजेंद्रैः पर्वताकारैः पर्वताग्रैर्वनौकसां ॥ मथितैर्वाजिभिः कीर्णं सारोहैर्वसुधातलं ॥१३॥ वानरैर्भीमविक्रांतैराप्लुत्याप्लुत्य वेगितैः ॥ राक्षसाः करजैस्तीक्ष्णैर्मुखेषु विनिदारिताः ॥१४॥ विषण्णवदना भूयो विप्रकीर्णशिरोरुहाः ॥ मूढाः शोणितगंधेन निपेतुर्धरणीतले ॥१५॥ अन्ये तु परमक्रुद्धा राक्षसा भीमविक्रमाः ॥ तलैरेवाभिधावंति वज्रस्पर्शसमैर्हरीन् ॥१६॥

भिः जितभयैर्जितश्वासैर्वा ॥१०॥ द्रुमै राशीकृताः द्रुमप्रहारैर्हत्वा राशीकृता इत्यर्थः ॥११॥१२॥ गजेंद्रैः मत्तगजेंद्रशरीरैः ॥१३॥ करजैः नखैः ॥१४॥ मूढा मूर्छिताः ॥१५॥१६॥

प्रतिलोमं प्रतिकूलं ॥३४॥३५॥ अभिनिष्क्रम्य पुरादिति शेषः महौघः प्रलयसमुद्रस्तत्कल्पां ॥३६॥ क० ४५

प्रतिलोमं ववौ वायुर्निर्घातसमनिस्वनः ॥ तिमिरौघावृतास्तत्र दिशश्च न चकाशिरे ॥३४॥ सत्त्पातांस्ततो दृष्ट्वा राक्षसानां भयावहान् ॥ प्रादुर्भूतान्सुघोरांश्च धूम्राक्षो व्यथितोभवत् ॥३५॥ मुमुहू राक्षसाः सर्वे धूम्राक्षस्य पुरस्सराः ॥३५॥ ततः सुभीमो बहुभिर्निशाचरैर्वृतोभिनिष्क्रम्य रणोत्सुको बली ददर्श तां राघवबाहुपालितां महौघकल्पां बहुवानरीं चमूं ॥३६॥ इत्यार्षे श्रीरामायणे युद्धकांडे एकपंचाशः सर्गः ॥५१॥ धूम्राक्षं प्रेक्ष्य निर्यांतं राक्षसं भीमविक्रमं ॥ विनेदुर्वानराः सर्वे प्रहृष्टा युद्धकांक्षिणः ॥१॥ तेषां सुतुमुलं युद्धं संजज्ञे कपिरक्षसां ॥ अन्योन्यपादपैर्घोरैर्निघ्नतां शूलमुद्गरैः ॥२॥ राक्षसैर्वानरा घोरा विनिकृत्ताः समंततः ॥ वानरै राक्षसाश्चापि द्रुमैर्भूमिसमीकृता ॥३॥ राक्षसास्त्वभिसंक्रुद्धा वानरान्निशितैः शरैः ॥ विव्यधुर्घोरसंकाशैः कंकपत्रैरजिह्मगैः ॥४॥ ते गदाभिश्च भीमाभिः पट्टिशैः कूटमुद्गरैः ॥ घोरैश्च परिघैश्चित्रैस्त्रिशूलैश्चापि संश्रितैः ॥५॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके युद्धकांडे एकपंचाशः सर्गः ॥५१॥ धूम्राक्षमिति ॥१॥२॥ भूमिसमीकृताः भूम्या समतां प्रापिता हता इति यावत् ॥३॥ घोरसंकाशैः घोररूपैः ॥४॥ संश्रितैः गृहीतैः ॥५॥

२७॥२८॥साशिलातस्यचक्रादिसहितंरथंप्रमथ्यभुविनिपपात·कूबरोस्त्रीयुगंधरः अवप्लुतिकान्नेरथेत्पन्नश

क्रोधाद्द्विगुणिताम्राक्षः पितुस्तुल्यपराक्रमः॥शिलांतांपातयामासधूम्राक्षस्यरथंप्रति॥२७॥आ
पतंतींशिलांदृष्ट्वा गदामुद्यम्यसंभ्रमात्॥रथादाप्लुत्यवेगेनवसुधायांव्यतिष्ठत॥२८॥साप्रम
थ्यरथंतस्यनिपपातशिलाभुवि॥सचक्रकूबरमुखंसध्वजंसशरासनं॥२९॥सत्यक्त्वातुरथंत
स्यहनूमान्मारुतात्मजः॥रक्षसांकदनंचक्रेसस्कंधविटपैर्द्रुमैः॥३०॥विभिन्नशिरसोभूत्वारा
क्षसारुधिरोक्षिताः॥द्रुमैःप्रमथिताश्चान्येनिपेतुर्धरणीतले॥३१॥विद्राव्यराक्षसंसैन्यंहनूमा
न्मारुतात्मजः॥गिरेःशिखरमादायधूम्राक्षमभिदुद्रुवे॥३२॥तमापतंतंधूम्राक्षोगदामुद्यम्य
वीर्यवान्॥विनर्दमानःसहसाहनूमंतमभिद्रवत्॥३३॥तस्यक्रुद्धस्यरोषेणगदांतांबहुकं
टकां॥पातयामासधूम्राक्षोमस्तकेथहनूमतः॥३४॥ताडितःसतयातत्रगदयाभीमवेगया॥
सकपिर्मारुतबलस्तंप्रहारमचिंतयन्॥३५॥धूम्राक्षस्यशिरोमध्येगिरिशृंगमपातयत्॥
सविस्फारितसर्वांगोगिरिशृंगेणताडितः॥३६॥

रासनसहितं॥२९॥रथंभग्नंरथं·रक्षसांक
दनंचक्रेस्वसेनारक्षणार्थमितिशेषःस्कंधःस्थलशाखाविटपःसूक्ष्मासा॥३०॥भूत्वेत्यस्यपति।
ताइतिशेषः॥३१॥३२॥अभिद्रवत्·अभ्यद्रवत्॥३३॥३४॥३५॥३६॥ अ

147

अवपोथिताः हिंसिताः॥१७॥१८॥१९॥विह्वलंतो विवशाः॥२०॥२१॥आंत्रैर्विनिःसृताः निःसृतांत्रा इत्यर्थः आंत्राणि पुरीतत् इति कतकः॥२२॥२३॥युद्धं गांधर्वं युद्धरूपसंगीतविद्या तद्रूपकोपपादकं धनुरित्यादि धनु

वानरैः पातयंतस्ते वेगिता वेगवत्तरैः॥मुष्टिभिश्चरणैर्दंतैः पादपैश्चावपोथिताः॥१७॥सैन्यं तु विद्रुतं दृष्ट्वा धूम्राक्षो राक्षसर्षभः॥रोषेण कदनं चक्रे वानराणां युयुत्सतां॥१८॥प्रासैः प्रमथिताः केचिद्वानराः शोणितस्रवाः॥मुद्गरैराहताः केचित्पतिता धरणीतले॥१९॥परिघैर्मथिताः केचिद्भिंडिपालैश्च दारिताः॥पट्टिशैर्मथिताः केचिद्विह्वलंतो गतासवः॥२०॥केचिद्विनिहता भूमौ रुधिरार्द्रा वनौकसः॥केचिद्विद्राविता नष्टाः संक्रुद्धै राक्षसैर्युधि॥२१॥विभिन्नहृदयाः केचिदेकपार्श्वेन शायिताः विदारितास्त्रिशूलैश्च केचिदांत्रैर्विनिःसृताः॥२२॥तत्सुभीमं महद्युद्धं हरिराक्षससंकुलं॥प्रबभौ शस्त्रबहुलं शिलापादपसंकुलं॥२३॥धनुर्ज्यातंत्रिमधुरं हिक्कातालसमन्वितं मंदस्तनितगीतं तद्युद्धं गांधर्वमाबभौ॥२४॥धूम्राक्षस्तु धनुःपाणिर्वानराणां मूर्धनि॥हसन्विद्रावयामास दिशस्ताञ्छरवृष्टिभिः॥२५॥धूम्राक्षेणार्दितं सैन्यं व्यथितं प्रेक्ष्य मारुतिः॥अभ्यवर्त्तत संक्रुद्धः प्रगृह्य विपुलां शिलां॥२६॥

ज्यारूपा या तंत्री वीणा तया मधुरं तंत्रिमधुरमिति ह्रस्व आर्षः हिक्का अश्वहेषा तद्रूपतालेन युक्तं मंदा नाम मंदाख्यगजविशेषाणां स्तनितं बृंहितमेव गीतं यत्र तत्॥२४॥२५॥२६॥

ऋष्टिः सूक्ष्मखड्गः ऋष्ट्याद्युपलक्षिताः पदातयो निर्यान्तीत्यर्थः ॥८॥९॥१०॥ तोमरांकुशपाणिभिः रूढा आरूढा युद्धकुशला ये गजास्ते च निर्याता इत्यन्वयः लक्षणसंयुक्ता अन्ये अश्वाश्च शूरारूढा निर्याताः

ऋष्टिभिस्तोमरैश्चित्रैः खड्गैश्च मुशलैरपि । भिंडिपालैश्च चापैश्च शक्तिभिः पट्टिशैरपि ॥८॥ खड्गैश्चक्रैर्गदाभिश्च निशितैश्च परश्वधैः । पदातयश्च निर्यान्ति विविधाः शस्त्रपाणयः ॥९॥ विचित्रवाससः सर्वे दीप्ता राक्षसपुंगवाः । गजा मदोत्कटाः शूराश्चलंत इव पर्वताः ॥१०॥ ते युद्धकुशला रूढास्तोमरांकुशपाणिभिः । अन्ये लक्षणसंयुक्ताः शूरारूढा महाबलाः ॥११॥ तद्राक्षसबलं सर्वं विप्रस्थितमशोभत । प्रावृट्काले यथा मेघा नर्दमानाः सविद्युतः । निःसृता दक्षिणद्वारादंगदो यत्र यूथपः ॥१२॥ तेषां निष्क्रममाणानामशुभं समजायत । आकाशाद्विघनात्तीव्रादुल्मुकान्यपतंस्तदा ॥१३॥ वमंतः पावकज्वालाः शिवा घोरा ववासिरे । व्याहरंत मृगा घोरा रक्षसां निधनं तदा । समापतंतो योधास्तु प्रास्खलंस्तत्र दारुणं ॥१४॥ एतानौत्पातिकान् दृष्ट्वा वज्रदंष्ट्रो महाबलः । धैर्यमालम्ब्य तेजस्वी निर्जगाम रणोत्सुकः ॥१५॥

॥११॥ विप्रस्थितं विशेषेण कृतप्रस्थानं । सविद्युतः नीलस्य रक्तोवलस्य स्वर्णभूषणबहुलत्वात् निःसृताः राक्षसा इति शेषः ॥१२॥ दुर्निमित्तरूपमशुभमेवाह आकाशादिति । विघनान्निर्मेघात् ॥१३॥ घोरा मृगा रक्षसां निधनं व्याहरंत व्याहरन् ॥१४॥ औत्पातिकान् अशुभसूचकान् ॥१५॥

३७॥३८॥धूम्राक्षवधोभाद्रशुक्लद्वितीयायामित्याहुः हनूमान्॥क०॥४६॥इतिश्रीरामाभिरामेश्रीरा०रा०ति०

पपातसहसाभूमौविकीर्णइवपर्वतः।धूम्राक्षंनिहतंदृष्ट्वाहतशेषानिशाचराः॥त्रस्ताःप्रवि
विविशुर्लंकांवध्यमानाःप्लवंगमैः॥३७॥सतुपवनसुतोनिहत्यशत्रून्क्षतजवहाःसरितश्चसं
विकीर्यरिपुवधजनितश्रमोमहात्मामुदमगमत्कपिभिःसुपूज्यमानः॥३८॥इत्यार्षेश्रीरा०यु०
द्विपंचाशःसर्गः॥५२॥ धूम्राक्षंनिहतंश्रुत्वारावणोराक्षसेश्वरः॥क्रोधेनमहताविष्टोनिश्वस
न्नुरगोयथा॥१॥दीर्घमुष्णंविनिश्वस्यक्रोधेनकलुषीकृतः।अब्रवीद्राक्षसंक्रूरंवज्रदंष्ट्रंमहा
बलं॥२॥गच्छत्वंवीरनिर्याहिराक्षसैःपरिवारितः॥जहिदाशरथिंरामंसुग्रीवंवानरैःसह॥३॥तथेत्यु
क्त्वाद्रुततरंमायावीराक्षसेश्वरः॥निर्जगामबलैःसार्द्धंबहुभिःपरिवारितः॥४॥नागैरश्वैःखरैरु
ष्ट्रैःसंयुक्तःसुसमाहितः।पताकाध्वजचित्रैश्चबहुभिःसमलंकृतः॥५॥ततोविचित्रकेयूरमुकु
टेनविभूषितः॥तनुत्रंचसमावृत्यसधनुर्निर्ययौद्रुतं॥६॥पताकालंकृतंदीप्तंतप्तकांचनभूषि
तं॥रथंप्रदक्षिणंकृत्वासमारोहच्चमूपतिः॥७॥

यु०द्विपंचाशःसर्गः॥५२॥ धूम्राक्षमिति॥१॥२॥३॥४॥बहुभिःबलाध्यक्षैरितिशेषः॥५॥तनुत्रंकवचं
समावृत्यआमुच्य॥६॥७॥

अस्त्रविदुषः अस्त्रविद्वांस इत्यर्थः ॥२५॥ संवर्त्तके प्रलयकाले ॥२६॥ तान्राक्षसगणान्निजघानेति शेषः ॥२७॥२८॥

बलवंतोऽस्त्रविदुषो नानाप्रहरणा रणे ॥ जघ्नुर्वानरसैन्यानि राक्षसाः क्रोधमूर्छिताः ॥२५॥ जघ्ने तान्राक्ष
सान्सर्वान्धृष्टो वालिसुतो रणे ॥ क्रोधेन द्विगुणाविष्टः संवर्त्तक इवानलः ॥२६॥ तान्राक्षसगणान्स
र्वान्वृक्षमुद्यम्य वीर्यवान् ॥ अंगदः क्रोधताम्राक्षः सिंहः क्षुद्रमृगानिव ॥२७॥ चकार कदनं घोरं श
क्रतुल्यपराक्रमः ॥ अंगदाभिहतास्तत्र राक्षसा भीमविक्रमाः ॥२८॥ विभिन्नशिरसः पेतुर्निकृत्ता
इव पादपाः ॥ रथैश्चित्रैर्ध्वजैरश्वैः शरीरैर्हरिरक्षसां ॥२९॥ रुधिरौघेण संछन्ना भूमिर्भयकरी तदा
हारकेयूरवस्त्रैश्च छत्रैश्च समलंकृता ॥ भूमिर्भाति रणे तत्र शारदीव यथा निशा ॥३०॥ अंगद
स्य च वेगेन तद्राक्षसबलं महत् ॥ प्राकंपत तदा तत्र पवनेनांबुदो यथा ॥३१॥ स्वबलस्य च घाते
न अंगदस्य बलेन च ॥ राक्षसः क्रोधमाविष्टो वज्रदंष्ट्रो महाबलः ॥३२॥ विस्फार्य च धनुर्घोरं शा
क्राशनिसमप्रभं ॥ वानराणामनीकानि प्राकिरच्छरवृष्टिभिः ॥३३॥ राक्षसाश्चापि मुख्यास्ते
रथैश्च समवस्थिताः ॥ नानाप्रहरणाः शूराः प्रायुध्यंत तदा रणे ॥३४॥ श्र ॥

२९॥ भयकरी भयंकरी अभूदिति शेषः मुमभाव आर्षः ॥३०॥ पवनेनांबुदो यथेत्युत्तरं सर्गच्छेदः क्वचि
त्सोऽयुक्तः वृत्तभेदप्रकरणभेदाद्यभावादिति कतकः स्वबलस्य चेति ॥३१॥३२॥३३॥३४॥ ॥

विद्रवतः विशेषेण स्वसंमुखमागच्छतः पूरयन् पूरयंतः आर्षमेकवचनं॥१६॥ तुमुलं रणसंकटं॥१७॥१८॥
१९॥ हृदयभेदनः भयंकर इत्यर्थः॥२०॥२१॥ अस्त्राणि संत्यज्य सर्वाण्यपस्त्राणि प्रयुज्य तदनंतरमस्त्रा

तांस्तु विद्रवतो दृष्ट्वा वानराजितकाशिनः॥ प्रणेदुः सुमहानादान् दिशः शब्देन पूरयन्॥१६॥ ततः
प्रवृत्तं तुमुलं हरीणां राक्षसैः सह॥ घोराणां भीमरूपाणामन्योन्यवधकांक्षिणां॥१७॥ निपतंतो
महोत्साहा भिन्नदेहशिरोधराः॥ रुधिरोक्षितसर्वांगान्यपतन् धरणीतले॥१८॥ केचिदन्योन्यमा।
साद्यशूराः परिघबाहवः॥ चिक्षिपुर्विविधान् शस्त्रान्समरेष्वनिवर्त्तिनः॥१९॥ द्रुमाणां च शिला
नां च शस्त्राणां चापि निस्वनः॥ श्रूयते सुमहांस्तत्र घोरो हृदयभेदनः॥२०॥ रथनेमिस्वनस्तत्र
धनुषश्चापि घोरवत्॥ शंखभेरीमृदंगानां बभूव तुमुलः स्वनः॥२१॥ केचिदस्त्राणि संत्यज्य
बाहुयुद्धमकुर्वत॥ तलैश्च चरणैश्चापि मुष्टिभिश्च द्रुमैरपि॥२२॥ जानुभिश्च हताः केचिद्भग्नदे
हाश्च राक्षसाः॥ शिलाभिश्चूर्णिताः केचिद्वानरैर्युद्धदुर्मदैः॥२३॥ वज्रदंष्ट्रोथतं दृष्ट्वा रणे वित्रास
यन्हरीन्॥ चचार लोकसंहारे पाशहस्त इवांतकः॥२४॥

भावाद्बाहुयुद्धमकुर्वत॥२२॥२३॥ वज्रदंष्ट्रोथतं दृष्ट्वा स्वसेनाविनाशमित्यर्थः। लोकसंहारे तन्निमि
त्तं॥२४॥

४४ ।सप्ताष्टौनवपंचाचवानरानेकेनैवशरेण विभेदेत्यर्थः ॥ ४५ ॥ ४६ ॥ संप्रधावंतिधावंतिस्म ॥ ४७ ॥
क्रोधेनोदीक्षंतंक्रोधेनोदैक्षत ॥ ४८ ॥ योयुध्येते पुनः । पुनर्युद्धमकुरुतामित्यर्थः हरिमत्तगजाविव·

दृष्ट्वासरोषताम्राक्षोवज्रदंष्ट्रःप्रतापवान् । प्रविवेशधनुःपाणिस्त्रासयन्हरिवाहिनीं ॥ ४४ ॥ श
रैर्विदारयामासकंकपत्रैरजिह्मगैः ॥ विभेदवानरांस्तत्रसप्ताष्टौनवपंचच ॥ ४५ ॥ विव्याधपरम
क्रुद्धोवज्रदंष्ट्रःप्रतापवान् ॥ ४६ ॥ त्रस्ताःसर्वेहरिगणाःशरैःसंकृत्तदेहिनः ॥ अंगदंसंप्रधावं
तिप्रजापतिमिवप्रजाः ॥ ४७ ॥ ततोहरिगणान्भग्नान्दृष्ट्वावालिसुतस्तदा । क्रोधेनवज्रदं
ष्ट्रंतमुदीक्षंतमुदैक्षत ॥ ४८ ॥ वज्रदंष्ट्रोंगदश्चोभौयोयुध्येतेपरस्परं । चेरतुःपरमक्रुद्धौहरि
मत्तगजाविव ॥ ४९ ॥ ततःशतसहस्रेणहरिपुत्रंमहाबलं ॥ जघानमर्मदेशेषुशरैरग्निशि
खोपमैः ॥ ५० ॥ रुधिरोक्षितसर्वांगोवालिसूनुर्महाबलः । चिक्षेपवज्रदंष्ट्रायवृक्षंभीमप
राक्रमः ॥ ५१ ॥ दृष्ट्वापतंतंतंवृक्षमसंभ्रांतश्चराक्षसः ॥ चिच्छेदबहुधासोपिमथितःप्रापतद्भुवि ॥ ५२ ॥ तंदृष्ट्वावज्रदंष्ट्रस्यविक्रमंप्लवगर्षभः । प्रगृह्यविपुलंशैलंचिक्षेपचननादच
॥ ५३ ॥

हरिरिहशार्दूलसिंहेनगजस्ययुद्धासंभवात्स्वप्नेपिसिंहदर्शनेगजानांमरणात्इतिकातकः ॥
।४९ ॥ हरिपुत्रंवालिपुत्रं ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥

वानराणामितिनिर्धारणेषष्ठी॥३५॥तत्रवीरक्षयकारणेतस्मिन्प्रसिद्धेआयोधनेयुद्धे॥३६॥३७॥तद्राक्षसगण

वानराणांचशूरास्तेसर्वेप्लवगर्षभाः॥अयुध्यंतशिलाहस्ताःसमवेताःसमंततः॥३५॥तत्रायु
धसहस्राणितस्मिन्नायोधनेभृशं॥राक्षसाःकपिमुख्येषुपातयांचक्रिरेतदा॥३६॥वानराश्चैवर
क्षस्सुगिरिवृक्षान्महाशिलाः॥प्रवीराःपातयामासुर्मत्तवारणसन्निभाः॥३७॥शूराणांयुध्यमा
नानांसमरेष्वनिवर्त्तिनां॥तद्राक्षसगणानांचसुयुद्धंसमवर्त्तत॥३८॥प्रभग्नशिरसःकेचिच्छि
न्नैःपादैश्चबाहुभिः॥शस्त्रैरर्दितदेहास्तुरुधिरेणसमुक्षिताः॥३९॥हरयोराक्षसाश्चैवशरवेगं
समाश्रिताः॥कंकगृध्रबलाद्याश्चगोमायुकुलसंकुलाः॥४०॥कबंधानिसमुत्पेतुर्भीरूणांभी
षणानिवै॥भुजपाणिशिरश्छिन्नाश्छिन्नकायाश्चभूतले॥४१॥वानराराक्षसाश्चापिनिपेतुस्त
त्रभूतले॥ततोवानरसैन्येनहन्यमानंनिशाचरं॥४२॥प्राभज्यतबलंसर्वंवज्रदंष्ट्रस्यपश्य
तः॥राक्षसान्भयवित्रस्तान्हन्यमानान्प्लवगमैः॥४३॥

नांतत्कृत्वेनवानराःवानरराक्षसगणानामित्यर्थः॥३८॥छिन्नैःपादैर्बाहुभिरुपलक्षिताः॥३९॥बलाःवाय
साःकंकादिभिराद्याव्याप्ताइत्यर्थः॥४०॥४१॥निशाचरंनैशाचरमित्यर्थः॥४२॥प्राभज्यतभग्नमभूत्॥४३॥

६५॥खड्गेनाछिद्यगृहीतेनवज्रदंष्ट्रीयेण॥६६॥६७॥६८॥महितःपूजितः॥६९॥क॰॥प॰॥तत्तीयायांवज्रदं

निमेषांतरमात्रेणअंगदःकपिकुंजरः॥चरतिस्मतदाक्रुद्धोदंडाहतइवोरगः॥६५॥निर्मलेनसु
धौतेनखड्गेनास्यमहच्छिरः॥जघानवज्रदंष्ट्रस्यवालिसूनुर्महाबलः॥६६॥रुधिरोक्षितगा
त्रस्यबभूवपतितंद्विधा॥तच्चतस्यपरीताक्षंशुभंखड्गहतंशिरः॥६७॥वज्रदंष्ट्रंहतंदृष्ट्वारा
क्षसाभयमोहिताः॥त्रस्ताभ्यद्रवन्लंकांवध्यमानाःप्लवंगमैः॥विषण्णवदनादीनाह्रि
याकिंचिदवाङ्मुखाः॥६८॥निहत्यतंवज्रधरंप्रतापवान्सवालिसूनुःकपिसैन्यमध्ये॥
जगामहर्षंमहितोमहाबलःसहस्रनेत्रस्त्रिदशैरिवावृतः॥६९॥इत्यार्षेश्रीरामायणेयु
द्ध॰चतुःपंचाशःसर्गः॥५४॥ वज्रदंष्ट्रंहतंश्रुत्वावालिपुत्रेणरावणः॥बलाध्यक्षमुवा
चेदंकृतांजलिमुपस्थितं॥१॥शीघ्रंनिर्यांतुदुर्धर्षाराक्षसाभीमविक्रमाः॥अकंपनंपुरः
स्कृत्यसर्वशस्त्रास्त्रकोविदं॥२॥एषशास्ताचगोप्ताचनेताचयुधिसत्तमः॥भूतिकामश्चमे
नित्यंनित्यंचसमरप्रियः॥३॥एषजेष्यतिकाकुत्स्थौसुग्रीवंचमहाबलं॥वानरांश्चापरान्
घोरान्हनिष्यतिनसंशयः॥४॥

ष्ट्रवधः।इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकां
डेचतुःपंचाशत्सर्गः।५४॥ बलाध्यक्षंप्रहस्तं॥१॥२॥शास्ता·शत्रूणां·गोप्ता·स्वबलस्य·नेता·नायकोयुद्धस्य॥३॥४॥

५४॥५५॥५६॥५७।५८॥५९॥६०॥पुष्पफलैःहस्तघतवद्धीयैस्तैर्युतआसीत्॥६१॥आर्षभंचर्मऋषभच

तमापतंतंतदृष्ट्वासरथादाप्लुत्यवीर्यवान्॥गदापाणिरसंभ्रांतःपृथिव्यांसमतिष्ठत॥५४॥अंगदेनशिलाक्षिप्तागत्वातुरणमूर्द्धनि॥सचक्रकूवरंसाश्वंप्रममाथरथंतदा॥५५॥ततोन्यच्छिखरंगृह्यविपुलद्रुमभूषितं॥वज्रदंष्ट्रस्यशिरसिपातयामासवानरः॥५६॥अभवच्छोणितोद्गारीवज्रदंष्ट्रःसुमूर्छितः॥मुहूर्त्तमभवन्मूढोगदामालिंग्यनिश्वसन्॥५७॥सलब्धसंज्ञोगदयावालिपुत्रमवस्थितं॥जघानपरमक्रुद्धेवक्षोदेशेनिशाचरः॥५८॥गदांत्यक्त्वाततस्तत्रमुष्टियुद्धमकुर्वत॥अन्योन्यंनिघ्नतुस्तत्रतावुभौहरिराक्षसौ॥५९॥रुधिरोद्गारिणौतौतुप्रहारैर्जनितश्रमौ॥बभूवतुःसुविक्रांतावंगारकबुधाविव॥६०॥ततःपरमतेजस्वीअंगदःप्लवगर्षभः॥उत्पाट्यवृक्षंस्थितवान्आसीत्पुष्पफलैर्युतः॥६१॥जग्राहचार्षभंचर्म्मखड्गंचविपुलंशुभं॥किंकिणीजालसंछन्नंचर्मणाचपरिष्कृतं॥६२॥विचित्रांश्चरुचिरान्मार्गांश्चेरतुःकपिराक्षसौ॥जघ्नतुश्चतदान्योन्यंनर्दंतौजयकांक्षिणौ॥६३॥व्रणैःसमुत्थैःशोभेतांपुष्पिताविवकिंशुकौ॥युध्यमानौपरिश्रांतौजानुभ्यामवनींगतौ॥६४॥

र्मनिर्मितंफलकंचर्मणाचपरिष्कृतंकोश

रूपेणेत्यर्थःजग्राहवज्रदंष्ट्रोंगदश्चेतिशेषः॥६२॥६३॥व्रणैःसमुत्थैःतत्सत्थितैरुधिरैरित्यर्थः॥६४

१४॥१५॥ समभित्यक्तदेहिन आत्मानो यैस्ते आत्मरक्षानिरपेक्षा इति यावत्॥१६॥१७॥ अरुणावर्णाभं ध्वस्तवर्णा
स्यवस्कन आभा यस्मिन् तत् अरुणशब्दो ध्वजपर्यायोपि॥१८॥ कौशेयोद्धतपांडुना उद्धतकौशेयवदीष

बभूव सुमहान्नादः क्षोभयन्निव सागरम्॥ तेन शब्देन वित्रस्ता वानराणां महाचमूः॥१४॥ द्रुमशैलप्रहा
राणां योद्धुं संप्रतिष्ठताम्॥ तेषां युद्धं महारौद्रं संजज्ञे कपिरक्षसाम्॥१५॥ रामरावणयोरर्थे समभि
त्यक्तदेहिनः॥ सर्वेत्यतिबलाः शूराः सर्वे पर्वतसन्निभाः॥१६॥ हरयो राक्षसाश्चैव परस्परजिघांस
वः॥ तेषां विनर्दतां शब्दः संयुगेतितरस्विनाम्॥१७॥ शुश्राव सुमहान्कोपादन्योन्यमभिगर्जताम्।
रजश्चारुणवर्णाभं सुभीममभवद्भृशम्॥१८॥ उद्धतं हरिरक्षोभिः संरुरोध दिशो दश॥ अन्योन्यर
जसा तेन कौशेयोद्धतपांडुना॥१९॥ संवृतानि च भूतानि ददृशुर्न रणाजिरे॥ न ध्वजो न पताका
वा चर्म वा तुरगोपि वा॥२०॥ आयुधं स्पंदनो वापि ददृशे तेन रेणुना॥ शब्दश्च सुमहांस्तेषां नर्द
तामभिधावताम्॥२१॥ श्रूयते तुमुले युद्धे न रूपाणि चकाशिरे॥ हरीनेव सुसंरुब्धा हरयो जघ्नुराह
वे॥२२॥ राक्षसा राक्षसांश्चापि निर्जघ्नुस्तिमिरे तदा॥ ते परांश्च विनिघ्नंतः स्वांश्च वानरराक्षसाः॥२३॥

त्पांडुरवर्णेन॥१९॥ भूतानि कपिरक्षोलक्षणप्राणिनः॥२०॥ आयुधादिन ददृशे उत्पन्नवय॥२१॥ शब्द
एव श्रूयते न रूपाणि चकाशिरे सुसंरुब्धाः सुतरां सम्यक्क्रुद्धाः॥२२॥ २३॥ ॥

५॥६॥ मेघाभः मेघसमानदेहप्रमाणः मेघवर्णः तद्वन्नीलवर्णः मेघस्यस्वन इव महान्स्वनो यस्य स तथा॥
७॥ निर्याति निर्यातिस्म॥८॥ तेषां वानराणां तेजसाद्दिश्चादित्य इव दुष्प्रेक्षो भूदिति शेषः॥९॥ रथवहन

परिगृह्य स तामाज्ञां रावणस्य महाबलः॥ बलं संप्रेरयामास तदा लघुपराक्रमः॥५॥ ततो नानाप्रहरणा भीमाक्षा भीमदर्शनाः॥ निष्पेतू राक्षसा मुख्या बलाध्यक्षप्रचोदिताः॥६॥ रथमास्थाय विपुलं तप्तकांचनभूषणं॥ मेघाभो मेघवर्णश्च मेघस्वनमहास्वनः॥७॥ राक्षसैः संवृतो घोरैस्तदा निर्यात्यकंपनः॥ नहि कंपयितुं शक्यः सुरैरपि महामृधे॥८॥ अकंपनस्ततस्तेषामादित्य इव तेजसा॥ तस्य निर्धावमानस्य संरब्धस्य युयुत्सया॥९॥ अकस्माद्दैन्यमागच्छद्धयानां रथवाहिनां॥ विस्फुरन्नयनं चास्य सव्यं युद्धाभिनंदिनः॥१०॥ विवर्णो मुखवर्णश्च गद्गदश्चाभवत्स्वनः॥ अभवत्सुदिने काले दुर्दिनं रूक्षमारुतं॥११॥ ऊचुः खगमृगाः सर्वे वाचः क्रूरा भयावहाः॥ स सिंहोपचितस्कंधः शार्दूलसमविक्रमः॥१२॥ तानुत्पातानचिंत्यैव निर्जगाम रणाजिरं॥ तथा निर्गच्छतस्तस्य रक्षसः सह राक्षसैः॥१३॥

कर्तृणां हयानामकस्मात् निर्हेतुकमेव दैन्यमागच्छन्मन इति शेषः॥१०॥ सुदिने वर्षादिकृतदुर्दिनप्रसक्तिरहिते॥११॥१२॥ अचिंत्येत्यार्षं॥१३॥

तदिति॥१॥२॥३॥एतेचेत्यस्ययत्रेत्यादि॥४॥बलवंतोवा॰वाशब्दोवैशब्दस्यार्थे॥५॥एतान्निहंतुमिच्छामिप्रथ
मतःस्वसेनारक्षणार्थंततःपरबलंहनिष्यामितिशेषः॥तदेवाह॥एतैरिति॥६॥७॥ज्ञातीन्कुमुदनलादी

तद्दृष्ट्वासुमहत्कर्मकृतंवानरसत्तमैः॥क्रोधमाहारयामासयुधितीव्रमकंपनः॥१॥क्रोधमूर्छि
तरूपस्तुधुन्वन्परमकार्मुकं॥दृष्ट्वातुकर्मशत्रूणांसारथिंवाक्यमब्रवीत्॥२॥तत्रैवतावत्त्वरि
तोरथंप्रापयसारथे॥एतेचबलिनोघ्नंतिसुबहून्राक्षसान्रणे॥३॥एतेत्रबलवंतोवाभीमको
पाश्चवानराः॥द्रुमशैलप्रहरणास्तिष्ठंतिप्रमुखेमम॥४॥एतान्निहंतुमिच्छामिसमरश्लाघि
नोह्यहं॥एतैःप्रमथितंसर्वंरक्षसांदृश्यतेबलं॥५॥ततःप्रचलिताश्वेनरथेनरथिनांवरः॥ह
रीनभ्यपतद्दूराच्छरजालैरकंपनः॥६॥नस्थातुंवानराःशेकुःकिंपुनर्योद्धुमाहवे॥अकंपन
शरैर्भग्नाःसर्वएवाभिदुद्रुवुः॥७॥तान्मृत्युवशमापन्नानकंपनशरानुगान्॥समीक्ष्यहनूमा
न्ज्ञातीनुपतस्थेमहाबलः॥८॥तंमहाप्लवगंदृष्ट्वासर्वेतेप्लवगर्षभाः॥समेत्यसमरेवीराः
सहिताःपर्यवारयन्॥९॥व्यवस्थितंहनूमंतंतेदृष्ट्वाप्लवगर्षभाः॥बभूवुर्बलवंतोहिबलवंत
मुपाश्रिताः॥१०॥

न्॰उपतस्थेस्वस्थानादितिशेषः॥८॥तेप्लवगर्षभाःकुमुदादयः॥९॥तेबलवंतोबभूवुर्यतोबलवंतमुपाश्रिताः॥१०॥

२४ ॥ शरीरशवसंकीर्णा शवरूपैः शरीरैः संकीर्णा ॥ २५ ॥ २६ ॥ २७ ॥ २५ ॥ संहर्षयति समहर्षयत ॥ २९ ॥ शास्त्रा

रुधिरार्द्रां तदा चक्रुर्महीं पंकानुलेपनां ॥ ततस्तु रुधिरौघेण शिक्तं व्यपगतं रजः ॥ २४ ॥ शरीरशवसंकीर्णा बभूव च वसुंधरा ॥ द्रुमशक्तिगदाप्रासैः शिलापरिघतोमरैः ॥ २५ ॥ राक्षसा हरयस्तूर्णं जघ्नुरन्योन्यमोजसा ॥ बाहुभिः परिघाकारैर्युध्यंतः पर्वतोपमान् ॥ हरयो भीमकर्माणो राक्षसान् जघ्नुराहवे ॥ २७ ॥ राक्षसास्त्वभिसंक्रुद्धाः प्रासतोमरपाणयः ॥ कपीन्निजघ्निरे तत्र शस्त्रैः परमदारुणैः ॥ २८ ॥ अकंपनः सुसंक्रुद्धो राक्षसानां चमूपतिः ॥ संहर्षयति तान्सर्वान्राक्षसान्भीमविक्रमान् ॥ २९ ॥ हरयस्त्वपि रक्षांसि महाद्रुममहाश्मभिः ॥ विदारयंत्यभिक्रम्य शस्त्राण्याच्छिद्य वीर्यतः ॥ ३० ॥ एतस्मिन्नंतरे वीरा हरयः कुमुदो नलः ॥ मैंदश्च परमक्रुद्धश्चक्रुर्वेगमनुत्तमं ॥ ३१ ॥ ते तु वृक्षैर्महावीरा राक्षसानां चमूमुखे ॥ कदनं सुमहच्चक्रुर्लीलया हरिपुंगवाः ॥ ममंथू राक्षसान्सर्वे नानाप्रहरणैर्भृशं ॥ ३२ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे पंचपंचाशः सर्गः ॥ ५५ ॥

ण्याच्छिद्य॰ वानराः परहस्तादिति शेषः ॥ ३० ॥ नानाप्रहरणैर्भृशमित्यत्र सर्गविच्छेदः प्रमादादिति कतकः ३१ ॥ ३२ ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके यु॰ पंचपंचाशत्सर्गः ॥ ५५ ॥ ॥

२१॥चारणैः चरणन्यासैः॥२२॥२३॥२४॥२५॥२६॥प्ररूढः सानुमानिव बहुशराचितशरीरत्वात् प्ररूढइव

तंगृहीत्वामहास्कंधंसोश्वकर्णंमहाद्युतिः॥प्रगृह्यपरयाप्रीत्याभ्रामयामासभूतले॥२१॥प्र
धावन्नुरुवेगेनबभंजतरसाद्रुमान्॥हनूमान्परमक्रुद्धश्चरणैर्दारयन्महीं॥२२॥गजांश्चसग
जारोहान्सरथान्रथिनस्तथा॥जघानहनूमान्धीमान्राक्षसांश्चपदातिगान्॥२३॥तमंतक
मिवक्रुद्धंसद्रुमंप्राणहारिणं॥हनूमंतमभिप्रेक्ष्यराक्षसाविप्रदुद्रुवुः॥२४॥तमापतंतंसंक्रु
द्धंराक्षसानांभयावहं॥ददर्शाकंपनोवीरश्चुक्षोभचननादच॥२५॥सचतुर्दशभिर्बाणैर्नि
शितैर्देहदारणैः॥निर्बिभेदमहावीर्यंहनूमंतमकंपनः॥२६॥सतथाविप्रकीर्णस्तुना
राचैःशितशक्तिभिः॥हनूमान्ददृशेवीरःप्ररूढइवसानुमान्॥२७॥विरराजमहावीर्यो
महाकायोमहाबलः॥पुष्पिताशोकसंकाशोविधूमइवपावकः॥२८॥ततोन्यंवृक्षमुत्पाट्य
कृत्वावेगमनुत्तमं॥शिरस्यभिजघानाशुराक्षसेंद्रमकंपनं॥२९॥व्यथिताराक्षसाःसर्वेक्षि
तिकंपइवद्रुमाः॥त्यक्तप्रहरणाऽसर्वेराक्षसास्तेपराजिताः॥३०॥लंकामभिययुस्त्रासाद्वा
नरैस्तैरभिद्रुताः॥तेमुक्तकेशाःसंभ्रांतभग्नमानाःपराजिताः॥३१॥

इवस्थितोगिरिवज्जनैर्ददृशइत्यर्थः॥२७॥२८॥२९॥क्षितिकंपेभूकंपकाले॥३०॥३१॥ ॥

११।१२।१३।१४।अप्रहरणं आयुधहीनं।१५।१६।पुराहीतिप्रसिद्धौ।१७।तद्दृष्ट्वाहनूमन्मुक्तंशैलशृंगं।

अकंपनस्तुशैलाभंहनूमंतमवस्थितं।महेंद्रइवधाराभिःशरैरभिववर्षह।११।अचिंत-
यित्वाबाणौघान्शरीरेपातितान्कपिः।अकंपनवधार्थायमनोदधेमहाबलः।१२।सप्रह
स्यमहातेजाहनूमान्मारुतात्मजः।अभिदुद्रावतद्रक्षःकंपयन्निवमेदिनीं।१३।तस्याथन
र्दमानस्यदीप्यमानस्यतेजसा।बभूवरूपंदुर्द्धर्षंदीप्तस्येवविभावसोः।१४।आत्मानंत्वप्र
हरणंज्ञात्वाक्रोधसमन्वितः।शैलमुत्पाटयामासवेगेनहरिपुंगवः।१५।गृहीत्वासुम-
हाशैलंपाणिनैकेनमारुतिः।सविनद्यमहानादंभ्रामयामाससवीर्यवान्।१६।ततस्तम
भिदुद्रावराक्षसेंद्रमकंपनं।पुराहिनमुचिंसंख्येवज्रेणेवपुरंदरः।१७।अकंपनस्तुतद्दृ
ष्ट्वागिरिशृंगंसमुद्यतं।दूरादेवमहाबाणैरर्द्धचंद्रैरदारयत्।१८।तंपर्वताग्रमाकाशे
रक्षोबाणविदारितं।विकीर्णंपतितंदृष्ट्वाहनूमान्क्रोधमूर्च्छितः।१९।सोश्वकर्णंसमा
साद्यरोषदर्पान्वितोहरिः।तूर्णमुत्पाटयामासमहागिरिमिवोच्छ्रितं।२०। अ

१८।तंनदितत्पर्थः।क्रोधमूर्च्छितोभूदितिशेषः।१९।२०।श्रीरामचंद्रअयोध्यानाथसंसारसाग

अथप्रहस्तनिर्गमः अकंपनवधमिति॥१॥ पूर्वेदिवसे·पूर्वाह्ने·सर्वान्गुल्मान्सेनाव्यूहविशेषान् २॥३॥४॥ पुरस्योपनिविष्टस्य· अतिसमीपनिविष्टशत्रुबलस्येत्यर्थः अतएवसहसाबलात्का

अकंपनवधंश्रुत्वाक्रुद्धोवैराक्षसेश्वरः॥ किंचिद्दीनमुखश्चापिसचिवांस्तानुदैक्षत॥१॥ सतुध्यात्वामुहूर्त्तंतुमंत्रिभिःसंविचार्यच॥ ततस्तुरावणःपूर्वंदिवसेराक्षसाधिपः॥ पुरींपरिययौलंकांसर्वान्गुल्मानवेक्षितुं॥२॥ तांराक्षसगणैर्गुप्तांगुल्मैर्बहुभिरावृतां॥ ददर्शनगरींराजापताकाध्वजमालिनीं॥३॥ रुद्धांतुनगरींदृष्ट्वारावणोराक्षसेश्वरः॥ उवाचात्महितंकालेप्रहस्तंयुद्धकोविदं॥४॥ पुरस्योपनिविष्टस्यसहसापीडितस्यह॥ नान्यंयुद्धात्प्रपश्यामिमोक्षंयुद्धविशारदाः॥५॥ अहंवाकुंभकर्णोवात्वंवासेनापतिर्मम॥ इंद्रजिद्वानिकुंभोवावहेयुर्भारमीदृशं॥६॥ सत्वंबलमतःशीघ्रमादायपरिगृह्यच॥ विजयायाभिनिर्याहियत्रसर्वेवनौकसः॥७॥ निर्याणादेवतेनूनंचपलाहरिवाहिनी॥ नर्दतांराक्षसेंद्राणांश्रुत्वानादंद्रविष्यति॥८॥ चपलाह्यविनीताश्चचलचित्ताश्चवानराः नसहिष्यंतितेनादंसिंहनादमिवद्विपाः॥९॥

रेणपीडितस्य अन्यंयुद्धात्· अन्यकर्तृकयुद्धाद्धेतोर्मोक्षमुपरोधमोक्षंपश्यामि॥५॥६॥ अतः अस्मा
त्गुल्मात्॥७॥ द्रविष्यतिपलायिष्यते॥८॥९॥

श्रमजलैः स्वेदजलैः भयादन्योन्यं प्रमथ्नंतः द्वारदेशे संमर्दं कुर्वाणाः ॥३२॥३३॥ सोपि यथार्हं अनुकूलतो
नुकूलदर्शनवचनालिंगनैः संप्रत्यपूजयत् ॥३४॥ यथा प्राणं यावद्बलं सप्राणानेव चक्रुषुः प्राणा

भयाच्छ्रमजलैरंगैः प्रस्रवद्भिर्विदुद्रुवुः ॥ अन्योन्यं प्रममथ्नंतस्ते विविशुर्नगरं भयात् ॥३२॥ प
तंतस्तेतु संमूढाः प्रेक्ष्यमाणा मुहुर्मुहुः ॥ तेषु लंकां प्रविष्टेषु राक्षसेषु महाबलाः ॥३३॥ समे
त्य हरयः सर्वे हनूमंतमपूजयन् ॥ सोपि प्रवृद्धस्तान्सर्वान्हरीन्संप्रत्यपूजयत् ॥३४॥ हनूमा
न्सत्वसंपन्नो यथार्हमनुकूलतः ॥ विनेदुश्च यथा प्राणं हरयो जितकाशिनः ॥ चक्रुशुश्च पुनस्त
त्र सप्राणानेव राक्षसान् ॥३५॥ स वीरशोभामभजन्महाकपिः समेत्य रक्षांसि निहत्य मारुतिः
महासुरं भीममभित्रनाशनं विष्णुर्यथैवोरुबलं चमूमुखे ॥३६॥ अपूजयन्देवगणास्तदाक
पिं स्वयं च रामोतिबलश्च लक्ष्मणः ॥ तथैव सुग्रीवमुखाः प्लवंगमाः विभीषणश्चैव महाब
लस्तदा ॥३७॥ इत्यार्षे श्रीरामायणे युद्ध० षट्पंचाशः सर्गः ॥५६॥

नाशार्थमितिशेषः ॥३५॥ यथा
विष्णुः उरुबलं बलवंतं महासुरं मधुकैटभादिरूपं हत्वा वीरशोभामभजत्तथैवेत्यर्थः ॥३६॥
रामादयोप्यपूजयन्नित्यनुकर्षः ॥३७॥ भाद्रशुक्लचतुर्थ्यामकंपनवधः ॥ धत्तमानः क० ॥५१॥ इति
श्रीरामाभिरामे श्रीरामीये रामा० नि० युद्ध० षट्पंचाशः सर्गः ॥५६॥ श्री

सीताप्रदानेनैवश्रेयइतिचतदाव्यवसितंनिश्चितं। अप्रदानेचयुद्धंदृष्टंतत्तथैवनइदानींप्राप्तं॥१४॥ अ
तःपरंतुयत्प्राप्तमस्माकंयुद्धंतदेवमयानुष्ठेयमित्याह॥ सोहमिति॥ तवप्रियंनकुर्यांकिं अपितुकुर्यां

प्रदानेनतुसीतायाःश्रेयोव्यवसितंमया॥ अप्रदानेपुनर्युद्धंदृष्टमेवतथैवनः॥१४॥ सोहंदानै
श्चमानैश्चसततंपूजितस्त्वया॥ सांत्वैश्चविविधैःकालेकिंनकुर्यांहितंतव॥१५॥ नहिमेजी
वितंरक्ष्यंपुत्रदारधनानिच॥ त्वंपश्यमांजुहुषंतंत्वदर्थेजीवितंयुधि॥१६॥ एवमुक्त्वातुभर्त्ता
रंरावणंवाहिनीपतिः॥ उवाचेदंबलाध्यक्षान्प्रहस्तःपुरतःस्थितान्॥१७॥ समानयतमेशीघ्रं
राक्षसानांमहाबलं॥ मद्बाणानांतुवेगेनहतानांतुरणाजिरे॥१८॥ अद्यतृप्यंतुमांसादाःपक्षि
णःकाननौकसः॥ तस्यतद्वचनंश्रुत्वाबलाध्यक्षामहाबलाः॥१९॥ बलमुद्योजयामासुस्तस्मिन्रा
क्षसमंदिरे॥ साबभूवमुहूर्त्तेनभीमैर्नानाविधायुधैः॥२०॥ लंकाराक्षसवीरैस्तैर्गजैरिवसमाकु
ला॥ हुताशनंतर्प्पयतांब्राह्मणांश्चनमस्यतां॥२१॥ आज्यगंधप्रतिवहःसुरभिर्मारुतोववौ॥ स्र
जश्चविविधाकाराजगृहुस्त्वभिमंत्रिताः॥२२॥ संग्रामसज्जाःसंहृष्टाधारयन्राक्षसास्तदा॥ सधनु
ष्काःकवचिनोवेगादुत्सृज्यराक्षसाः॥२३॥

मेव॥१५॥ युधिजीवितंजुहूर्षतंहोतुमिच्छंतं॥१६॥ ब
लाध्यक्षान्सर्वबलाध्यक्षेणस्वेनबलानियोजनाधिकृतपुरुषान्इत्यर्थः॥१७॥१८॥१९॥२०॥२१॥२२॥
संग्रामसज्जाःसंग्रामायसन्नद्धाः॥ धारयन्अधारयन्॥ अभिमंत्रितेस्रजइत्यनुकर्षः॥ उत्सृज्यवाहना
न्युपेक्ष्यः॥२३॥

अवशःवशःप्रभुत्वं·तद्रहितःवशामिच्छाप्रभुत्वयोरितिविश्वः अतएवनिरालंबः॥१०॥ननुयुद्धेमज्जीवनेपिसंदेहात्कथंनिरालंबोवशमेष्यतीत्युच्यतेतत्राह·आपदिति·युद्धेआपत्मतिःसंशयिता·संदेहविषया·श्रेयोविजयस्तत्रनसंशयितोनसंदेहविषयःतवातिबलत्वात्वद्दृशोदृष्टविजयत्वाच्चइंद्रजिद्धतः·श्रेयःप्राप्तिरेवोत्कटकोटिका·किंचश्रेयोनसंदिग्धंयुद्धेजीवनेमरणेचश्रेयःस

विद्रुतेचबलेतस्मिन्रामःसौमित्रिणासह॥अवशस्त्वंनिरालंबःप्रहस्तवशमेष्यति॥१०॥ आपत्संशयिताश्रेयोनात्रनिःसंशयीकृता॥प्रतिलोमानुलोमंवायत्तुनोमन्यसेहितं॥११॥रावणोनैवमुक्तस्तुप्रहस्तोवाहिनीपतिः॥राक्षसेंद्रमुवाचेदमसुरेंद्रमिवोशनाः॥१२॥राजन्मंत्रितपूर्वंनःकुशलैःसहमंत्रिभिः॥विवादश्चापिनोवृत्तःसमवेक्ष्यपरस्परं॥१३॥

त्वात्·जीवनेराज्यंमृतावुत्तमोलोकः।अतोत्रयुद्धेप्रवृत्तिरेवनिःसंशयीकृता·यत्त्वायुद्धेध्रुवोमृत्युर्युद्धेजीवितसंशयःतमेवकालंयुद्धस्यप्रवदंतिमनीषिणइत्यादिशास्त्रादितिभावःममत्वप्ययुद्धमेवहितंप्रतिभाति·प्रकारांतरमस्तिचेद्ब्रूहीत्याह·प्रतिलोमेत्यादिमनोनुकूलंवाभवतुप्रातिकूलंवायत्तुनोहितंमन्यसेतद्वदेतिशेषः॥११॥१२॥कुशलैर्मंत्रिभिःविभीषणमाल्यवदादिभिःयदामंत्रितंतदानःपरस्परंपरस्परमतंसमवेक्ष्यविवादोनैकमत्यंवृत्तं॥१३॥

तस्यदुर्निमित्तान्याह·अभ्रमित्यादि·मांसशोणितभोजनाःखगाअपसव्यानिमंडलानिअपगताःसव्यभागेविधा
तिर्यंषुमंडलेषुभ्रमणेषुतान्यपसव्यानिप्रदक्षिणानि·गृध्रादीनांप्रदक्षिणमपिदुर्निमित्तमितिकतकः॥३४

अभ्रमाकाशमाविश्यमांसशोणितभोजनाः॥मंडलान्यपसव्यानिखगाश्चक्रूरथंप्रति॥३४॥वमं
तिपावकज्वालाःशिवाघोरावाशिरे॥अंतरिक्षात्पपातोल्कावायुश्चपरुषंववौ॥३५॥अन्येषाम
मभिसंरब्धाग्रहाश्चनचकाशिरे॥मेघाश्चखरनिर्घोषारथस्योपरिरक्षसः॥३६॥ववर्षरुधिरं
चास्यसिषिचुश्चपुरस्सरान्॥केतुमूर्द्धनिगृध्रस्तुविलीनोदक्षिणामुखः॥नदन्नुभयतःपार्श्वे
समग्रांश्रियमाहरत्॥३७॥सारथेर्बहुशश्चात्रसंग्राममभिवर्त्तिनः॥३८॥प्रतोदोन्यपतद्धस्तात्सू
तस्यहयसादिनः॥निर्याणश्रीश्चयाचस्याद्भास्वराचसुदुर्लभा॥३९॥साननाशमूहुर्त्तेनस
मेचस्खलिताहयाः॥प्रहस्तंतंहिनिर्यंतंप्रख्यातगुणपौरुषं॥युधिनानाप्रहरणाकपिसेना
भ्यवर्त्तत॥४०॥अथघोषःसुतुमुलोहरीणांसमजायत॥वृक्षानारुजतांचैवगुर्वीर्वैगृह्णतांशिलाः॥४१॥

३५॥३६॥केतूपरिलीनत्वादिगुणकोगृध्रोनदंन्शब्दंकुर्वन्उभयतःपार्श्वेकंडूयमानइतिशेषः।
तथाकुर्वन्अस्यसमग्रांसंपूर्णांप्रभांमुखादिशोभांजयश्रियंचाहरत्॥३७॥सूतस्यसूतवंश
जस्य·सारथेर्हयसादिनःअश्वशिक्षकस्यप्रतोदःतोत्रं॥३८॥३९॥४०॥४१॥ अ

२४॥सज्जकल्पितंसर्वायुधसमेततयाकल्पितंसम्यक्समीचीनःस्तृतोयस्यतं॥२५॥सुवरूथंवरूथो

रावणंप्रेक्ष्यराजानंप्रहस्तंपर्यवारयन्॥अथामंत्र्यतुराजानंभेरीमाहत्यभैरवां॥२४॥आरुरो
हरथंयुक्तःप्रहस्तःसज्जकल्पितं॥हयैर्महाजवैर्युक्तंसम्यक्सूतंसुसंयुतं॥२५॥महाजल
दनिर्घोषंसाक्षाच्चंद्रार्कभास्वरं॥उरगध्वजदुर्द्धर्षंसुवरूथंस्ववस्करं॥२६॥सुवर्णजालसं
युक्तंप्रहसंतमिवश्रिया॥ततस्तंरथमास्थायरावणार्पितशासनः॥लंकायानिर्ययौतूर्णं
बलेनमहतावृतः॥२७॥ततोदुंदुभिनिर्घोषःपर्जन्यनिनदोपमः॥वादित्राणांचनिनदःपूर
यन्निवमेदिनी॥२८॥शुश्रुवेशंखशब्दश्चप्रयातेवाहिनीपतौ॥निनदंतःस्वरान्घोरान्रा
क्षसाजग्मुरग्रतः॥२९॥भीमरूपामहाकायाःप्रहस्तस्यपुरःसराः॥नरांतककुंभहनुर्महा
नादःसमुन्नतः॥प्रहस्तसचिवाह्येतेनिर्ययुःपरिवार्यतं॥३०॥व्यूढेनैवसुघोरेणपूर्वद्वा
रात्सनिर्ययौ॥गजयूथनिकाशेनबलेनमहतावृतः॥३१॥सागरप्रतिमौघेनवृतस्तेन
बलेनसः॥प्रहस्तोनिर्ययौक्रुद्धःकालांतकयमोपमः॥३२॥तस्यनिर्याणघोषेणराक्षसा
नांचनर्दतां॥लंकायांसर्वभूतानिविनेदुर्विकृतैःस्वरैः॥३३॥

रथगुप्तिःस्ववस्करंशोभनरथांगं॥२६॥२७॥दुंदुभिनिर्घोषइत्यादेःशुश्रुवेइत्यनेनान्वयः॥२८॥२९॥३०॥ ३१॥३

७॥८।गिरीस्तथाजगृहुरित्यनुकर्षः गिरिशृंगाणीतियावत्॥९॥१०॥११॥परमायुधैःचक्रैःचक्रंतुपरमायु

खड्गशक्त्यृष्टिशूलाश्चबाणानिमुशलानिच॥गदाश्चपरिघाःप्रासाविविधाश्चपरस्वधाः॥७॥धनूं
षिचविचित्राणिराक्षसानांजयैषिणां॥प्रगृहीतान्यराजंतवानरानभिधावतां॥८॥जगृहुःपादपां
श्चापिपुष्पितांस्तगिरीस्तथा॥शिलाश्चविपुलादीर्घायोद्धुकामाःप्लवंगमाः॥९॥तेषामन्योन्यमासा
द्यसंग्रामःसुमहानभूत्॥बहुनामश्मवर्षंचशरवर्षंचवर्षतां॥१०॥बहवोराक्षसायुद्धेबहून्वान
रपुंगवान्॥वानराराक्षसांश्चापिनिजघ्नुर्बहवोबहून्॥११॥शूलैःप्रमथिताःकेचित्केचित्तुपरमायु
धैः॥परिघैराहताःकेचित्केचिच्छिन्नाःपरस्वधैः॥१२॥निरुच्छ्वासापुनःकेचित्पतिताजगतीतले॥वि
भिन्नहृदयाःकेचिदिषुसंधानसादिताः॥१३॥केचिद्द्विधाकृताःखड्गैःस्फुरंतःपतिताभुवि॥वान
राराक्षसैःशूरैःपार्श्वतश्चविदारिताः॥१४॥वानरैश्चापिसंक्रुद्धैराक्षसौघाःसमंततः॥पादपैर्गिरि
शृंगैश्चसंपिष्टावसुधातले॥१५॥वज्रस्पर्शतलैर्हस्तैर्मुष्टिभिश्चहताभृशं॥वमन्शोणितमास्ये
भ्योविशीर्णवदनेक्षणाः॥१६॥आर्त्तस्वनंचस्वनतांसिंहनादंचनर्दतां॥बभूवतुमुलःशब्दोहरि
णांरक्षसामपि॥१७॥

धमितिकोशः॥१२॥इषूणांसंधानंसम्यग्विसर्जनंतेनसादिताःखंडिताःसंधानसंधि
ताइतिपाठेइषवएवसंधानानिबंधनरज्जवस्तैःसंधिताःसंस्पृताइत्यर्थः॥१३॥स्फुरंतःउच्छलंतः॥१४॥१५॥

वमन्श्चवमनःवेमुरितिपाठांतरं॥१६।१७॥

२४॥ सज्जकल्पितं सर्वायुधसमेतं तया कल्पितं सम्यक् समीचीनः सूतो यस्य तं॥२५॥ सुवरूथं वरूथो

रावणं प्रेक्ष्य राजानं प्रहस्तं पर्यवारयन्॥ अथामंत्र्य तु राजानं भेरीमाहत्य भेरवां॥२४॥ आरुरो
हरथं युक्तः प्रहस्तः सज्जकल्पितं॥ हयैर्महाजवैर्युक्तं सम्यक्सूतं सुसंयुतं॥२५॥ महाजल
दनिर्घोषं साक्षाच्चंद्रार्कभास्वरं॥ उरगध्वजदुर्द्धर्षं सुवरूथं स्ववस्करं॥२६॥ सुवर्णजालसं
युक्तं प्रहसंतमिव श्रिया॥ ततस्तं रथमास्थाय रावणार्पितशासनः॥ लंकाया निर्ययौ तूर्णं
बलेन महता वृतः॥२७॥ ततो दुंदुभिनिर्घोषः पर्जन्यनिनदोपमः॥ वादित्राणां च निनदः पूर
यन्निव मेदिनीं॥२८॥ शुश्रुवे शंखशब्दश्च प्रयाते वाहिनीपतौ॥ निनदंतः स्वरान्घोरान्रा
क्षसा जग्मुरग्रतः॥२९॥ भीमरूपा महाकायाः प्रहस्तस्य पुरःसराः॥ नरांतककुंभहनुर्महा
नादः समुन्नतः॥ प्रहस्तसचिवा ह्येते निर्ययुः परिवार्य तं॥३०॥ व्यूढेनैव सुघोरेण पूर्वद्वा
रात्स निर्ययौ॥ गजयूथनिकाशेन बलेन महता वृतः॥३१॥ सागरप्रतिमौघेन वृतस्तेन
बलेन सः॥ प्रहस्तो निर्ययौ क्रुद्धः कालांतकयमोपमः॥३२॥ तस्य निर्याणघोषेण राक्षसा
नां च नर्दतां॥ लंकायां सर्वभूतानि विनेदुर्विकृतैः स्वरैः॥३३॥

रथगुप्तिः स्ववस्करं शोभनरथांगं॥२६॥२७॥ दुंदुभिनिर्घोष इत्यादेः शुश्रुवे इत्यनेनान्वयः॥२८॥२९॥३०॥ ३१॥३२

७॥८॥गिरीस्तथ्याजगृहुरित्यनुकर्षः गिरिश्रृंगाणीतियावत्॥९॥१०॥११॥परमायुधैः चक्रैः चक्रंतुपरमायु

खड्गशक्त्यष्टिशूलांश्चबाणानिमुशलानिच॥गदाश्चपरिघाःप्रासाविविधाश्चपरस्वधाः॥७॥धनूंषिचविचित्राणिराक्षसानांजयैषिणां॥प्रगृहीतान्यराजंतवानरानभिधावतां॥८॥जगृहुःपादपांश्चापिपुष्पितांस्तुगिरींस्तथा॥शिलाश्चविपुलादीर्घायोद्धुकामाःप्लवंगमाः॥९॥तेषामन्योन्यमासाद्यसंग्रामःसुमहानभूत्॥बहुनामश्मवर्षंचशरवर्षंचबर्षतां॥१०॥बहवोराक्षसायुद्धेबहून्वानरपुंगवान्॥वानराराक्षसांश्चापिनिजघ्नुर्बहवोबहून्॥११॥शूलैःप्रमथिताःकेचित्केचित्तुपरमायुधैः॥परिघैराहताःकेचित्केचिच्छिन्नाःपरस्वधैः॥१२॥निरुच्छ्वासापुनःकेचित्पतिताजगतीतले॥विभिन्नहृदयाःकेचिदिषुसंधानसादिताः॥१३॥केचिद्द्विधाकृताःखड्गैःस्फुरंतःपतिताभुवि॥वानराराक्षसैःशूरैःपार्श्वतश्चविदारिताः॥१४॥वानरैश्चापिसंक्रुद्धैराक्षसौघाःसमंततः॥पादपैर्गिरिश्रृंगैश्चसंपिष्टावसुधातले॥१५॥वज्रस्पर्शतलैर्हस्तैर्मुष्टिभिश्चहताभृशं॥वमन्शोणितमास्येभ्योविशीर्णवदनेक्षणाः॥१६॥आर्त्तस्वनंचस्वनतांसिंहनादंचनर्दतां॥बभूवतुमुलःशब्दोहरीणांरक्षसामपि॥१७॥

धमितिकोशः॥१२॥इषूणांसंधानंसम्यग्विसर्जनंतेनसादिताःखंडिताःसंधानसंधिताइतिपाठेइषवाएवसंधानानिबंधनरज्जवस्तैःसंधिताःसंस्पृताइत्यर्थः॥१३॥स्फुरंतःउच्छलंतः॥१४॥१५

वमन्श्चवमनःवेस्तुरितिपाठांतरं॥१६॥१७॥

४२॥रक्षोगणवनौकसामित्यस्य॰ निनादः श्रूयत इत्युत्तरेण संबंधः॥४३॥४४॥भावमानः।क॰॥५२॥५३॥५४॥५५॥
५६॥ इति श्रीयुद्धकांडे सप्तपंचाशः सर्गः॥५७॥ तत इति॰ सस्मितं॰ एवं सेनया किलास्मान्भीषयतीति स्मि

नदतां राक्षसानां च वानराणां च गर्जितां॥ उभे प्रमुदिते सैन्ये रक्षोगणवनौकसां॥४२॥ वेगितानां स
मर्थानामन्योन्यवधकांक्षिणां॥ परस्परं चाह्वयतां निनादः श्रूयते महान्॥४३॥ ततः प्रहस्तः कपि
राजवाहिनीमभिप्रतस्थे विजयाय दुर्मतिः॥ विवृद्धवेगश्च विवेश तां चमूं यथा मुमूर्षुः शल
भो विभावसुं॥४४॥ इत्यार्षे श्रीरा॰ यु॰ सप्तपंचाशः सर्गः॥५७॥ ततः प्रहस्तं निर्यांतं दृष्ट्वा रणकृतो
द्यमं॥ उवाच सस्मितं रामो विभीषणमरिंदमः॥१॥ क एष सुमहाकायो बलेन महता वृतः॥ आग
च्छति महावेगः किं रूपबलपौरुषः॥२॥ आचक्ष्व मे महाबाहो वीर्यवंतं निशाचरं॥ राघवस्य वचः
श्रुत्वा प्रत्युवाच विभीषणः॥ एष सेनापतिस्तस्य प्रहस्तो नाम राक्षसः॥३॥ लंकायां राक्षसेंद्रस्य त्रि
भागबलसंवृतः॥ वीर्यवानस्त्रविच्छूरः सुप्रख्यातपराक्रमः॥४॥ ततः प्रहस्तं निर्यांतं भीमं भीमप
राक्रमं॥ गर्जंतं सुमहाकायं राक्षसैरभिसंहृतं॥५॥ ददर्श महती सेना वानराणां बलीयसां॥ अ
भिसंजातघोषाणां प्रहस्तमभिगर्जतां॥६॥

ते॥१॥२॥३॥ लंकायामित्यादि॰ राक्षसेंद्रसंबंधि लंकास्थबल
स्य तृतीयभागेन संवृत इत्यर्थः॥४॥५॥ प्रहस्तमभि॰ तदाभिमुख्येन गर्जतां वानराणां महती सेना निर्यांतं

प्रहस्तं ददर्शेति संबंधः॥६॥

२७॥२८॥युद्धभूमिंनदीत्वेनवर्णयति हतेत्यादिवप्रंतटंयमराणवसागरस्तद्गामिनी॥२९॥यकृत्क्लीहानौहृद
यदक्षिणभागस्थमांसविशेषौ॥३०॥३१॥युद्धभूमिमयींतद्रुपांनदींप्रवर्त्तयित्वाघनापायेहंसादिसे

वानराणांशरीरैस्तुराक्षसानांचमेदिनी॥ बभूवातिचिताघोरैःपर्वतैरिवसंवृता॥२७॥साम
हीरुधिरौघेणप्रछिन्नासंप्रकाशते॥संछन्नामाधवेमासिपलाशैरिवपुष्पितैः॥२८॥हतवीरौघ
वप्रांतुभग्नायुधमहाद्रुमां॥शोणितौघमहातोयांयमसागरगामिनीं॥२९॥यकृत्प्लीहमहापं
कांविनिकीर्णांत्रशैवलां॥भिन्नकायशिरोमीनांअंगावयवशाद्वलां॥३०॥गृध्रहंसवराकीर्णां
कंकसारससेवितां॥मेदःफेनसमाकीर्णामार्त्तस्वननिस्वनां॥३१॥तांकापुरुषदुस्तारांयु
द्धभूमिमयींनदीं॥नदीमिवघनापायेहंससारससेवितां॥३२॥राक्षसाःकपिमुख्यास्तेते
रुस्तांदुस्तरांनदीं॥यथापद्मरजोध्वस्तांनलिनींगजयूथपाः॥३३॥ततःसृजंतंबाणौघान्प्रह॰
स्तंस्यंदनेस्थितं॥ददर्शतरसानीलोविधमंतंप्लवंगमान्॥३४॥उद्धूतइववायुःखेमहदभ्रबलं
बलात्॥समीक्ष्याभिद्रुतंयुद्धेप्रहस्तोवाहिनीपतिः॥३५॥

वितांनदीमिवतांतेरुः॥३२॥पद्मरजोयुतांय
थागजयूथपास्तेरुस्तथेत्यर्थः॥३३॥ततउच्यमानगुणंप्रहस्तंनीलोददर्श॥३४॥वाहिनीपतिःप्रहस्तः
खेउद्धूतोवायुर्महदभ्रबलमिवबलवदभ्रमिवयुद्धेऽभिद्रुतंस्वंप्रत्याभिमुख्येनागच्छंतंनीलंसमी
क्ष्यतंनीलमेवाभिदुद्रुवे॥३५॥

वीरमार्गमनुव्रताः वीरमार्गोपराङ्मुखत्वलक्षणस्तमनुव्रता अनुगताः अभीतवत् अभीताहीणा ॥१८॥१९॥ तेषामि
ति निर्धारणे षष्ठी ॥२०॥ समुत्पन्नं तदाख्यं अपोथयत् हतवान् ॥२१॥ महानादस्य तदाख्यस्य ॥२२॥ तारेण साध्य

वानरा राक्षसाः क्रुद्धा वीरमार्गमनुव्रताः ॥ विवृत्तवदनाः क्रूराश्चक्रुः कर्माण्यभीतवत् ॥१८॥ नरांतकः कुं
भहनुर्महानादः समुन्नतः ॥ एते प्रहस्तसाचिवाः सर्वे जघ्नुर्वनौकसः ॥१९॥ तेषां निपततां शीघ्रं निघ्न
तां चापि वानरान् ॥ द्विविदो गिरिशृंगेण जघानैकं नरांतकं ॥२०॥ दुर्मुखः पुनरुत्थाय कपिः सवि
पुलद्रुमं ॥ राक्षसं क्षिप्रहस्तं तु समुन्नतमपोथयत् ॥२१॥ जांबवांस्तु सुसंक्रुद्धः प्रगृह्य महतीं शि
लां ॥ पातयामास तेजस्वी महानादस्य वक्षसि ॥२२॥ अथ कुंभहनुस्तत्र तारेणासाद्य वीर्यवान् ॥
वृक्षेण महता सद्यः प्राणान् संत्याजयद्रणे ॥२३॥ अमृष्यमाणस्तत्कर्म प्रहस्तो रथमाश्रितः ॥ चका
र कदनं घोरं धनुष्पाणिर्वनौकसां ॥२४॥ आवर्त इव संजज्ञे सेनयोरुभयोस्तदा ॥ क्षुभितस्याप्र
मेयस्य सागरस्येव निस्वनः ॥२५॥ महता हि शरौघेण राक्षसो रणदुर्मदः ॥ अर्दयामास संक्रुद्धो वा
नरान् परमाहवे ॥२६॥

संवध्य युयुधे इति शेषः ततः स तारस्तस्य कुंभहनोर्महता वृक्षेण प्रा
णान् संत्याजयत् समत्याजयत् ॥२३॥ तत्कर्म क्षणादेव सचिवचतुष्टयमारणकर्म ॥१४॥ उभयोः से
नयोरितस्ततो भ्रमणेनावर्त इव संजज्ञे क्षुभितस्य सागरस्य निस्वन इव निस्वनश्च जज्ञे ॥२५॥२६॥

सुतीक्ष्णाग्राभिर्दंष्ट्राभिः राक्षसानामप्यस्ति दंष्ट्राप्राबल्यं ॥४७॥ विक्रांतविजयौ प्राप्तप्रायविजयौ ॥४८॥ प

उल्लिखंतौ सुतीक्ष्णाग्राभिर्दंष्ट्राभिरितरेतरं॥ सिंहशार्दूलसदृशौ सिंहशार्दूलचेष्टितौ ॥४७॥
विक्रांतविजयौ वीरौ समरेष्वनिवर्तिनौ॥ कांक्षमाणौ यशः प्राप्तुं वृत्रवासवयोरिव ॥४८॥
आजघान तदा नीलं ललाटे मुसलेन सः॥ प्रहस्तः परमायत्तस्ततः सुस्राव शोणितं ॥४९॥
ततः शोणितदिग्धांगः प्रगृह्य च महातरुं॥ प्रहस्तस्योरसि क्रुद्धो विससर्ज महाकपिः॥५०॥
तमचिंत्य प्रहारं सः प्रगृह्य मुसलं महत्॥ अभिदुद्राव बलिनं बली नीलं प्लवंगमं॥ तमु
ग्रवेगं संरब्धमापतंतं महाकपिः॥५१॥ ततः संप्रेक्ष्य जग्राह महावेगो महाशिलां॥ तस्य
युद्धाभिकामस्य मृधे मुसलयोधिनः॥५२॥ प्रहस्तस्य शिलां नीलो मूर्ध्नि तूर्णमपातयत्॥
नीलेन कपिमुख्येन विमुक्ता महती शिला॥ बिभेद बहुधा घोरा प्रहस्तस्य शिरस्तदा॥५३॥ स
गतासुर्गतश्रीको गतसत्वो गतेंद्रियः॥ पपात सहसा भूमौ छिन्नमूल इव द्रुमः॥५४॥ विभिन्नशि
रसस्तस्य बहु सुस्राव शोणितं॥ शरीरादपि सुस्राव गिरेः प्रस्रवणो यथा॥५५॥ हते प्रहस्ते नी
लेन तदकंप्यं महाबलं॥ राक्षसानामहृष्टानां लंकामभिजगाम ह॥५६॥

रमायत्तः परमोद्युक्तः॥४९॥५०॥
अचिंत्य अचिंतयित्वा॥५१॥५२॥ तूर्णं मुसलप्रहारात्पूर्वमेवेत्यर्थः प्रहस्तस्य शिरो बहुविधा विभेद॥५३॥
॥५४॥ विभिन्नशिरसः प्रस्रवणो निर्झरः॥५५॥५६॥

३६।३७।३८।३९।४०॥अपारयन्वारयितुंअशक्तःसन्शारदंवर्षं।गोवृषस्यशरत्कालेप्राबल्ये।कालस्वभा

रथेनादित्यवर्णेननीलमेवाभिदुद्रुवे॥सधनुर्धन्विनांश्रेष्ठोविकृष्यपरमाहवे॥३६॥नीलायव्य
सृजद्बाणान्प्रहस्तोवाहिनीपतिः॥तेप्राप्यविशिखानीलंविनिर्भिद्यसमाहिताः॥३७॥महींजग्मु
र्महावेगारोषिताइवपन्नगाः॥नीलःशरैरभिहतोनिशितैर्ज्वलनोपमैः॥३८॥सतंपरमदुर्द्धर्षमा
पतंतंमहाकपिः॥प्रहस्तंताडयामासवृक्षमुत्पाट्यवीर्यवान्॥३९॥सतेनाभिहतःक्रुद्धोनदन्
राक्षसपुंगवः॥ववर्षशरवर्षाणिप्लवगानांचमूपतौ॥४०॥तस्यबाणगणानेवराक्षसस्य
दुरात्मनः॥अपारयन्वारयितुंप्रत्यगृह्णान्निमीलितः॥यथैवगोवृषोवर्षंशारदंशीघ्रमाग
तं॥४१॥एवमेवप्रहस्तस्यशरवर्षान्दुरासदान्॥निमीलिताक्षःसहसानीलःसेहेदुरा
सदान्॥४२॥रोषितःशरवर्षेणसालेनमहतामहान्॥प्रजघानहयान्नीलःप्रहस्तस्यमहाब
लः॥४३॥ततोरोषपरीतात्माधनुस्तस्यदुरात्मनः॥बभंजतरसानीलोननादचपुनःपुनः॥४४॥
विधनुःसकृतस्तेनप्रहस्तोवाहिनीपतिः॥प्रगृह्यमुसलंघोरंस्यंदनादवपुप्लुवे॥४५॥ताबु
भौवाहिनीमुख्यौजातवैरौतरस्विनौ॥स्थितौक्षतजसिक्तांगौप्रभिन्नाविवकुंजरौ॥४६॥

वात्वर्षस्यत्वन्यथा।ततएवतेननातिक्लेशकरस्तस्यशरवर्षइतिसूचितं॥४१॥४२॥४३॥४४॥४६

रिपवे· रिपुभ्यः नेषुरिपुषुः अवसा· एतेकपयः किंकरिष्यंतीत्येवंरूपानकार्यायैरिंद्रवलसादनोमेसैन्य
पालोवानररूपैःसूदितः॥४॥अविचारयन्रिपुबलंतृणीकुर्वन्रणशीर्षे· रणमूर्धानंयुद्धभूमिमि

नावज्ञारिपवेकार्यायैरिंद्रवलसादनः॥सूदितःसैन्यपालोमेसानुयात्रसकुंजरः॥४॥सोहंरि
पुविनाशायविजयायाविचारयन्॥स्वयमेवगमिष्यामिरणशीर्षंतदद्भुतं॥५॥अद्यतद्वा
नरानीकंरामंचसहलक्ष्मणं॥निर्दहिष्यामिबाणौघैर्वनंदीप्तैरिवाग्निभिः॥६॥सएवमुक्त्वाज्व
लनप्रकाशंरथंतुरंगोत्तमराजियुक्तं॥प्रकाशमानंवपुषाज्वलंतंसमारुरोहामरराजशत्रुः॥७॥
सशंखभेरीपणवप्रणादैरास्फोटितक्ष्वेडितसिंहनादैः॥पुण्यैस्तवैश्चापिसुपूज्यमानस्तदा
ययौराक्षसराजमुख्यः॥८॥सशैलजीमूतनिकाशरूपैर्मांसाशनैःपावकदीप्तनेत्रैः॥बभौवृ
तोराक्षसराजमुख्योभूतैर्वृतोरुद्रइवामरेशः॥९॥ततोनगर्याःसहसामहौजानिष्क्रम्यतद्वा
नरसैन्यमुग्रं॥महार्णवाभ्रस्तनितंददर्शसमुद्यतंपादपशैलहस्तं॥१०॥

चै

161

त्यर्थः॥५॥६॥तुरं
गोत्तमराजियुक्तं अनेनबह्वश्वयुक्तत्वंरथस्योक्तं·॥वपुषाज्वलंतं·॥अतएवस्वभासाप्रकाशमानं
७॥आस्फोटितानिभुजास्फालनानि·क्ष्वेलितानिःस्वशौर्यप्रकाशकशब्दाः॥आस्फोटितादीन्य
त्रसैनिकानां॥८॥९॥महार्णवस्यअभ्रस्यमहामेघस्येवचस्तनितंयस्यतत्॥१०॥ ॥

विशीर्णं भग्नं सेतुबंधमित्यन्वयः ॥५७॥ ध्यानमूकत्वं ध्यानेन देवताध्यानेन ये मूका मौनिनस्तेषां भावस्तत्त्वं ।
भयदुःखमोहैः किमपि वक्तुं नाशक्नुवन्नित्यर्थः ॥ तदेवाह प्राप्ता इति ॥५८॥ सलक्ष्मणेन रामेण समेत्य प्रश

न शेकुः समवस्थातुं निहते वाहिनीपतौ ॥ सेतुबंधं समासाद्य विशीर्णं सलिलं यथा ॥५७॥ हते तस्मिं
श्चमूमुख्ये राक्षसास्ते निरुद्यमाः ॥ रक्षःपतिगृहं गत्वा ध्यानमूकत्वमागताः ॥ प्राप्ताः शोकार्णवं तीव्रं
विसंज्ञा इव ते भवन् ॥५८॥ ततस्तु नीलो विजयी महाबलः प्रशस्यमानः सुकृतेन कर्मणा ॥ स
मेत्य रामेण सलक्ष्मणेन प्रहृष्टरूपस्तु बभूव यूथपः ॥५९॥ इत्यार्षे श्रीरा॰ युद्धकांडे अष्टपंचा
शः सर्गः ॥५८॥ तस्मिन्हते राक्षससैन्यपाले प्लवंगमानामृषभेण युद्धे ॥ भीमायुधं सागरवेगतुल्यं
विदुद्रुवे राक्षसराजसैन्यं ॥१॥ गत्वा तु रक्षोधिपतेः शशंसुः सेनापतिं पावकसूनुशस्तं ॥ तच्चापि ते
षां वचनं निशम्य रक्षोधिपः क्रोधवशं जगाम ॥२॥ संख्ये प्रहस्तं निहतं निशम्य क्रोधार्दितः शो
कपरीतचेताः ॥ उवाच तान्राक्षसयूथमुख्यानिंद्रो यथा निर्जरयूथमुख्यान् ॥३॥ श्र

स्यमानो न एव प्रहृष्टरूपोऽतिप्रहृष्टः प्रशंसायां रूपं ॥५९॥ तत्पंचम्यां प्रहस्तवधः ॥ धर्ममानः ॥ क॰ ॥ इति
श्रीरामाभिरामे श्रीरामीये रामायणतिलके युद्धकांडे अष्टपंचाशः सर्गः ॥५८॥ तस्मिन्निति ॥ प्रहस्ते
इत्यर्थः प्लवंगमानामृषभेण नीलेन ॥१॥ पावकसूनुशस्तं ॥ नीलेन हतं ॥२॥ निर्जरा देवाः ॥३॥

घंटानिनदैःप्रणादोयस्यतं·खरंक्रूरंगजमारुह्यगर्जति॥१७॥भांडमश्वाभरणं·कांचनानिचित्रभांडानि
यस्यतमश्वंपिशाचःपिशाचनामा॥१८॥किंकरभृतोन्यतभृतोवज्रवेगोयस्मिंस्त्रिशिरा·अत्रापिकश्चि

योसौनवार्कोदितताम्रचक्षूरारुह्यघंटानिनदप्रणादं॥गजंखरंगर्जतिवैमहात्मामहोदरो
नामसएषवीरः॥१७॥योसौहयंकांचनचित्रभांडमारुह्यसंध्याभ्रगिरिप्रकाशः॥प्रासंसमुद्य
म्यमरीचिनद्धंपिशाचएषोशनितुल्यवेगः॥१८॥यश्चैषशूलंनिशितंप्रगृह्यविद्युत्प्रभंकिंकर
वज्रवेगं॥वृषेंद्रमास्थायशशिप्रकाशमायातियोसौत्रिशिरायशस्वी॥१९॥असौचजीमू
तनिकाशरूपःकुंभःपृथुव्यूढसुजातवक्षाः॥समाहितःपन्नगराजकेतुर्विस्फारयन्यातिध
नुर्विधुन्वन्॥२०॥यश्चैषजांबूनदवज्रजुष्टंदीप्तंसधूमंपरिघंप्रगृह्य॥आयातिरक्षोबल
केतुभूतोयोसौनिकुंभोद्भुतवीरकर्मा॥२१॥यश्चैषचापासिशरौघजुष्टंपताकिनंपाव
कदीप्तरूपं॥रथंसमास्थायविभात्युदग्रोनरांतकोसौनगशृंगयोधी॥२२॥ अ

त्रत्रिशिराः॥१९॥कुंभःतन्नामा॥२०॥जांबूनदवज्रजुष्टंजांबूनदेनवज्रैर्हीरकादिरत्नैश्चयुक्तं·अ
तएवदीप्तं·सधूमं·नीलमणिकांत्यासधूममिव॥२१॥पावकवत्दीप्तंरूपंयस्यतं·नगशृंगयो
धीप्रतियोद्धभावात्·भुजकंडूतिवृत्त्यर्थमितिभावः॥२२॥

सेनयानुगतः सेनानुगतः ॥११॥ ध्वजछत्रेति तुगभावश्चार्षः महेंद्रोपमनागजुष्टं महेंद्रपर्वतसदृशगजयु
क्तं अभीरुभिः स्तोभिर्जुष्टं ॥१२॥ बलप्रवेकं बलश्रेष्ठं ॥१३॥ महात्मा महादेहः अयमकंपनः पूर्वं हताकं

तद्राक्षसानीकमतिप्रचंडमालोक्य रामो भुजगेंद्रबाहुः ॥ विभीषणं शस्त्रभृतां वरिष्ठमुवाच से
नानुगतः पृथुश्रीः ॥११॥ नानापताकाध्वजछत्रजुष्टं प्रासासिशूलायुधशस्त्रजुष्टं ॥ कस्येदमक्षोभ्य
मभीरुजुष्टं सैन्यं महेंद्रोपमनागजुष्टं ॥१२॥ ततस्तु रामस्य निशम्य वाक्यं विभीषणः शक्रसमान
वीर्यः ॥ शशंस रामस्य बलप्रवेकं महात्मनां राक्षसपुंगवानां ॥१३॥ योसौ गजस्कंधगतो महा
त्मा नवोदितार्कोपमताम्रवक्त्रः ॥ संकंपयन्नागशिरोभ्युपैनित्यकंपनं त्वेनमवेहि राजन् ।
१४॥ योसौ रथस्थो मृगराजकेतुर्धुन्वन्धनुः शक्रधनुःप्रकाशं ॥ करीव भात्युग्रविवृत्तदंष्ट्रः
स इंद्रजिन्नाम वरप्रधानः ॥१५॥ यश्चैष विंध्यास्तमहेंद्रकल्पो धन्वी रथस्थोऽतिरथोतिवीरः ।
विस्फारयन् चापमतुल्यमानं नाम्नातिकायोतिविवृद्धकायः ॥१६॥ ॥ ॥

पनादन्य इति बोध्यं स्वशरीरभारात् स्वारूढनागस्य गजस्य शिरः संकंपयन्नेति ॥१४॥ उग्रा विवृत्ता
दंष्ट्रा यस्य सः तथा वरेण ब्रह्मदत्तेन वरेण प्रधानः राक्षसश्रेष्ठः ॥१५॥ विंध्याचलास्ताचलमहेंद्र
अ
पर्वतकल्पः शरीरेण ॥ अतुल्यमानमनुपमप्रमाणं ॥१६॥

३१॥३२॥ द्वारेषु तत्कायाश्चतुर्ष्वपि द्वारेषु॰ चर्या महामार्गाः गृहं मूलायतनं तस्य गोपुराणि बहिर्द्वारम्॥

दिष्ट्यायमद्यपापात्मा मम दृष्टिपथं गतः॥ अद्य क्रोधं विमोक्ष्यामि सीताहरणसंभवं॥३१॥
एवमुक्त्वा ततो रामो धनुरादाय वीर्यवान्॥ लक्ष्मणानुचरस्तस्थौ समुद्धृत्य शरोत्तमं॥३२॥
ततः स रक्षोधिपतिर्महात्मा रक्षांसि तान्याह महाबलानि॥ द्वारेषु चर्यागृहगोपुरेषु सुनि
र्वृतास्तिष्ठत निर्विशंकाः॥३३॥ इहागतं मां सहितं भवद्भिर्वनौकसश्छिद्रमिदं विदित्वा॥
शून्यां पुरीं दुष्प्रसहां प्रमथ्य प्रधर्षयेयुः सहसा समेताः॥३४॥ विसर्जयित्वा सचिवांस्तत
स्तान्गतेषु रक्षस्सु यथानियोगं॥ व्यदारयद्वानरसागरौघं महाझषः पूर्णमिवार्णवौ॰
घं॥३५॥ तमापतंतं सहसा समीक्ष्य दीप्तेषुचापं युधि राक्षसेंद्रं॥ महत्समुत्पाट्य मही
धराग्रं दुद्राव रक्षोधिपतिं हरीशः॥३६॥ तच्छैलशृंगं बहुवृक्षसानुं प्रगृह्य चिक्षेप नि॰
शाचराय॥ तमापतंतं सहसा समीक्ष्य चिच्छेद बाणैस्तपनीयपुंखैः॥३७॥ श्र

सादाः सुनिर्वृत्ताः सुखिनः निर्विशंका निर्भयाः॥३३॥ इदं छिद्रं रणभूमौ सपरिवारस्यागमनरूपं॥३४॥
र्णवौघं॰ समुद्रजलसमूहं॥३५॥ दीप्ता इषवश्चापश्च यस्य तं॥३६॥ शृंगशब्दोर्धर्चादिः पुंस्यपि॥
३७॥

सोसौकोसौतत्राहयःसुराणामपिदर्पहारावणइतिशेषःभूतैर्भूतगणैः॥२३॥क्वासौतत्राहयत्रेति·यत्रदेशइंदुप्रतिमत्वादिगुणकंछत्रंभाति·अत्रैवरक्षोधिपतिःभूतैर्भूतगणैः॥२४॥नगेंद्रोयोविंध्यस्तद्वद्भी

यश्चैषनानाविधघोररूपैर्व्याघ्रोष्ट्रनागेंद्रमृगाश्ववक्त्रैः॥भूतैर्वृतोभातिविवृत्तनेत्रैर्योसौसुराणामपिदर्पहंता॥२३॥यत्रैतदिंदुप्रतिमंविभातिछत्रंसितंसूक्ष्मशलाकमग्र्यं॥अत्रैवरक्षोधिपतिर्महात्माभूतैर्वृतोरुद्रइवावभाति॥२४॥असौकिरीटीचलकुंडलास्योनगेंद्रविंध्योपमभीमकायः॥महेंद्रवैवस्वतदर्पहंतारक्षोधिपःसूर्यइवावभाति॥२५॥प्रत्युवाचततोरामोविभीषणमरिंदमः॥अहोदीप्तमहातेजारावणोराक्षसेश्वरः॥२६॥आदित्यइवदुष्प्रेक्षोरश्मिभिर्भातिरावणः॥नव्यक्तंलक्षयेह्यस्यरूपंतेजःसमावृतं॥२७॥देवदानववीराणांवपुरेवंविधंभवेत्॥यादृशंराक्षसेंद्रस्यवपुरेतद्विराजते॥२८॥सर्वेपर्वतसंकाशाःसर्वेपर्वतयोधिनः॥सर्वेदीप्तायुधधरायोधास्तस्यमहात्मनः॥२९॥विभातिरक्षोराजासौप्रदीप्तैर्भीमदर्शनैः॥भूतैःपरिवृतस्तीक्ष्णैर्देहवद्भिरिवांतकः॥३०॥ राम ॥

मःकायोयस्यसः॥२५॥२६॥नव्यक्तंलक्षयेइत्यत्रहेतुस्तेजःसमावत्तमितिरूपंसूक्ष्मावयवसंस्थानं॥२७॥२८॥२९॥देहवद्भिःप्रशस्तदेहैः॥३०॥

धनुष्मान्·प्रशस्तधनुष्कः·सः·धनुरादायेत्यन्वयः॥४५॥पर्याप्तोहमितिशेषः॥४६॥४७॥त्रैलोक्येनापि·तद्वर्ति

ततोमहात्मासधनुर्धनुष्मानादायरामःसहसाजगाम॥तंलक्ष्मणःप्रांजलिरभ्युपेत्यउवाच
रामंपरमार्थयुक्तं॥४५॥काममार्यःसुपर्याप्तोवधायास्यदुरात्मनः विधमिष्याम्यहंचैनमनु
जानीहिमांविभो॥४६॥तमब्रवीन्महातेजारामःसत्यपराक्रमः॥गच्छयत्नपरश्चापिभवलक्ष्म
संयुगे॥४७॥रावणोहिमहावीर्योरणेऽद्भुतपराक्रमः॥त्रैलोक्येनापिसंक्रुद्धोदुष्प्रसह्योनसं
शयः॥४८॥तस्यच्छिद्राणिमार्गस्वस्वच्छिद्राणिचलक्षय॥चक्षुषाधनुषात्मानंगोपायस्वस
माहितः॥४९॥राघवस्यवचःश्रुत्वासंपरिष्वज्यपूज्यच॥अभिवाद्यचरामाययौसौमि
त्रिराहवे॥५०॥सरावणंवारणहस्तबाहुंददर्शभीमोद्यतदीप्तचापं॥प्रच्छादयंतंशरवृष्टिजा
लैस्तान्वानरान्भिन्नविकीर्णदेहान्॥५१॥तमालोक्यमहातेजाहनूमान्मारुतात्मजः॥
निवार्यशरजालानिविदुद्रावसरावणं॥५२॥रथंतस्यसमासाद्यबाहुमुद्यम्यदक्षिणं॥त्रा
सयन्रावणंधीमान्हनूमान्वाक्यमब्रवीत्॥५३॥ ॥ ॥ ॥

देवादिसमूहैरित्यर्थः॥४८॥छिद्राणिप्रहारावसरान्·स्वच्छिद्राणिचेत्यस्यगोपायेतिशेषः·चक्षु
षास्वच्छिद्रंचलक्षयसम्यगवलोकयततोधनुषाधनुर्व्यापारेणात्मानंरक्ष॥४९॥५०॥५१॥५२॥५३॥

३८।३९।शक्राशनिस्पर्शवच्छरीरः सुग्रीवमासाद्य प्राप्य अर्थात्तमेव विभेद गुहेरितोग्रशक्तिः क्रौंचमिव

तस्मिन्प्रवृद्धोत्तमसानुवृक्षे शृंगे विदीर्णेपि पतिते पृथिव्यां ॥ महाशनिकल्पं शरमंतकाभं समाद
धे राक्षसलोकनाथः ॥३८॥ स तं गृहीत्वानिलतुल्यवेगं सविस्फुलिंगज्वलनप्रकाशं ॥ बाणं म
हेंद्राशनितुल्यवेगं चिक्षेप सुग्रीववधाय रुष्टः ॥३९॥ स सायको रावणबाहुमुक्तः शक्रा
शनिस्पर्शवपुः प्रकाशं ॥ सुग्रीवमासाद्य विभेद वेगाद्गुहेरिता क्रौंचमिवोग्रशक्तिः ॥४०॥ स साय
कार्त्तो विपरीतचेताः कूजन्पृथिव्यां निपपात वीरः ॥ तं वीक्ष्य भूमौ पतितं विसंज्ञं नेदुः प्रहृष्टा यु
धि यातुधानाः ॥४१॥ ततो गवाक्षो गवयः सुषेणस्त्वथर्षभो ज्योतिमुखो नलश्च ॥ शैलान्समुद्यम्य
विवृद्धकायाः प्रदुद्रुवुस्तं प्रति राक्षसेंद्रं ॥४२॥ तेषां प्रहारान्स चकार मोघान् रक्षोधिपो बाण
शतैः शिताग्रैः ॥ तान्वानरेंद्रानपि बाणजालैर्विभेद जांबूनदचित्रपुंखैः ॥ ते वानरेंद्रास्त्रिदशारिबा
णैर्भिन्ना निपेतुर्भुवि भीमकायाः ॥४३॥ ततस्तु तद्वानरसैन्यमुग्रं प्रच्छादयामास स बाणजालैः ॥
ते वध्यमानाः पतिताश्च वीरा नानद्यमाना भयशल्यविद्धाः ॥ शाखामृगा रावणसायकार्त्ता जग्मुः
शरण्यं शरणं स्म रामं ॥४४॥

कि ॥४०।विपरीतचेताः अचेता इति यावत्।४१।४२।४३।भयमेव शरः शल्यं तेन विद्धाः शरण्यं रामं शरणं जग्मुः।४४।

यथाताडितं·विसंज्ञतापर्यंतताडनदुःखवंतं·नेदुःसंतोषादितिशेषः॥६२॥६३॥वीर्यस्यधिक्वीर्यंधि

संग्रामेतंतथादृष्ट्वारावणंतल्लताडितं॥ऋषयोवानराःसिद्धानेदुर्देवाःसुरासुरैः॥६२॥अ
थाश्वस्यमहातेजारावणोवाक्यमब्रवीत्॥साधुवानरवीरेणश्लाघनीयोसिमेरिपुः॥६३॥
रावणेनैवमुक्तस्तुमारुतिर्वाक्यमब्रवी॥धिगस्तुममवीर्यस्ययत्वंजीवसिरावण॥६४॥
सकृत्तुप्रहरेदानीदुर्बुद्धेकिंविकत्थसे॥ततस्त्वांमामकोमुष्टिर्न्नयिष्यतियमक्षयं॥६५॥
ततोमारुतिवाक्येनकोपस्तस्यप्रजज्वले॥संरक्तनयनोयत्नान्मुष्टिमावत्यदक्षिणं॥पा
न तयामासवेगेनवीरोरसिवीर्यवान्॥६६॥हनूमान्वक्षसिव्यूढेसंचचालपुनःपुनः॥विह्व
लंतंतदादृष्ट्वाहनूमंतंमहाबल॥६७॥रथेनातिरथःशीघ्रंनीलंप्रतिसमभ्यगात्॥राक्ष
सानामधिपतिर्दशग्रीवःप्रतापवान्॥६८॥पन्नगप्रतिमैभीमैःपरमर्माभिभेदनैः॥शरै
रादीपयामासनीलंहरिचमूपतिं॥६९॥सशरौघसमायस्तोनीलोहरिचमूपतिः॥क
रेणैकेनशैलाग्रंरक्षोधिपतयेसृजत्॥७०॥

गित्यर्थःयस्त्वंजीवसिमत्तस्तलताडितोपीत्यर्थः॥६४॥६५॥६६॥व्यूढेतिविशालेवक्षसिहतोहनू
मान्संचचाल॥६७॥६८॥६९॥रक्षोधिपतयेऽसृजन्तन्महारंदत्तवानित्यर्थःसमायस्तःखेदितः॥७०॥

४५॥पंचशाखः पंचांगुलिर्युक्तः तव देहे चिरोषितं भूतात्मानं तव देहाद्विधमिष्यति अपहरिष्यति।५
५६॥कीर्त्तिं हनूमानपि रावणं प्रत्युक्तवानित्येवं रूपां कीर्त्तिं ज्ञातविक्रांतं ज्ञातपराक्रमं॥५७॥रावण

देवदानवगंधर्वैर्यक्षैश्च सह राक्षसैः॥ अवध्यत्वं त्वया प्राप्तं वानरेभ्यस्तु ते भयं॥५४॥ एष मे
दक्षिणो बाहुः पंचशाखः समुद्यतः॥ विधमिष्यति ते देहे भूतात्मानं चिरोषितं॥५५॥ श्रुत्वा
हनुमतो वाक्यं रावणो भीमविक्रमः॥ संरक्तनयनः क्रोधादिदं वचनमब्रवीत्॥५६॥ क्षि।
प्र प्रहर निःशंकं स्थिरां कीर्त्तिमवाप्नुहि॥ ततस्त्वां ज्ञातविक्रांतं नाशयिष्यामि वानर।५७॥
रावणस्य वचः श्रुत्वा वायुसूनुर्वचोऽब्रवीत्॥ प्रहतं हि मया पूर्वमक्षं तव सुतं स्मर॥५८॥ एव
मुक्तो महातेजा रावणो राक्षसेश्वरः॥ आजघानानिलसुतं तलेनोरसि वीर्यवान्॥ स तलाभि
हतस्तेन चचाल च मुहुर्मुहुः॥५९॥ स्थितो मुहूर्त्तं तेजस्वी स्थैर्यं कृत्वा महामतिः॥ आजघा
न च संक्रुद्धस्तलेनैवामरद्विषं॥६०॥ ततः स तेनाभिहतो वानरेण महात्मना॥ दशग्रीवः समा
धूतो यथा भूमिचले चलः॥६१॥

नचइति ज्ञातविक्रमं नाशयिष्यामीत्येवं रूपं पूर्वं मया
प्रहतं अक्षं तन्नामानं सुतं स्मर मत्पराक्रमज्ञानायेति शेषः पूर्वमेव ज्ञातत्वादिदानीं किम
पि मद्विक्रमविषये ज्ञातव्यं नास्तीति भावः॥५८॥५९॥६०॥ समाधूतः कंपितः भूमिचले भूकंपे ६१

नकेवलंस्वपक्षाएवापितुशत्रुरावणोपीत्याह रावणोपीति ॥८०॥ नीललाघवसंभ्रांतंरावणंदृष्ट्वा
लब्धलक्षाःलब्धहर्षविषयाश्चतएवतद्दृष्टाःप्लवंगमाश्चुक्रुशुः ॥८१॥ संरब्धः क्रुद्धः ॥८२॥८३॥ माय

रावणोपिमहातेजाःकपिलाघवविस्मितः॥अस्त्रमाहारयामासदीप्तमाग्नेयमद्भुतं।८०
ततस्तेचुक्रुशुर्हृष्टालब्धलक्षाःप्लवंगमाः॥नीललाघवसंभ्रांतंदृष्ट्वारावणमाहवे॥८१॥वा
नराणांचनादेनसंरब्धोरावणस्तदा॥संभ्रमाविष्टहृदयोनकिंचित्प्रत्यपद्यत॥८२॥आ
ग्नेयेनापिसंयुक्तंगृहीत्वारावणःशरं॥ध्वजशीर्षस्थितंनीलमुदैक्षतनिशाचरः॥८३॥त
तोब्रवीन्महातेजारावणोराक्षसेश्वरः॥कपेलाघवयुक्तोसिमाययापरयासह॥८४॥।
जीवितंखलुरक्षस्वयदिशक्तोसिवानर॥तानितान्यात्मरूपाणिसृजसित्वमनेकशः॥८५॥
तथापित्वांमयायुक्तःसायकोस्त्रप्रयोजितः॥जीवितंपरिरक्षंतंजीविताद्भ्रंशयिष्यति॥८६॥
एवमुक्त्वामहाबाहुरावणोराक्षसेश्वरः॥संधायबाणमस्त्रेणचमूपतिमताडयत्॥८७॥
सोस्त्रयुक्तेनबाणेननीलोवक्षसिताडितः॥निर्दह्यमानःसहसासपपातमहीतले॥८८॥

या. वंचनया ॥८४॥ आत्मरूपाणि. आत्मयोग्यानिस्वपराक्रमोचितानितानिकर्माणियद्यपिसृ
जसि ॥८५॥ तथापिमयायुक्तोऽस्त्रप्रयोजितोयंसायकस्त्वांजीविताद्भ्रंशयिष्यति ॥८६॥८७॥८८

समाश्वस्तः नीलेनसहयुद्धकालेप्राप्तसमाश्वासः पुनर्युद्धेप्सुर्नीलेनसहयुद्धायसंसक्तंरावणंविप्रे
क्षमाणः रावणंप्रतिअन्येनयुध्यमानस्याभिधावनमयुक्तमितीदंवचोब्रवीत् ॥७१॥७२॥७३॥७४॥७५

हनूमानपितेजस्वीसमाश्वस्तोमहामनाः ॥ विप्रेक्षमाणोयुद्धेप्सुःसरोषमिदमब्रवीत् ॥७१
नीलेनसहसंयुक्तंरावणंराक्षसेश्वरं ॥ अन्येनयुध्यमानस्यनयुक्तमभिधावनं ॥७२॥ राव
णोथमहातेजास्तंशृंगंसप्तभिःशरैः ॥ आजघानसुतीक्ष्णाग्रैस्तद्विशीर्णंपपातह ॥७३॥ त
द्विशीर्णंगिरेःशृंगंदृष्ट्वाहरिचमूपतिः ॥ कालाग्निरिवजज्वालकोपेनपरवीरहा ॥७४॥ सो
श्वकर्णान्द्रुमान्शालान्चूतांश्चापिसुपुष्पितान् ॥ अन्यांश्चविविधान्वृक्षान्नीलश्चिक्षेपसंयु
गे ॥७५॥ सतान्वृक्षान्समासाद्यप्रतिचिच्छेदरावणः ॥ अभ्यवर्षच्चघोरेणशरवर्षेणपावकं ॥७६॥
अभिवृष्टःशरौघेणमेघेनेवमहाबलः ॥ ह्रस्वंकृत्वाननोरूपंध्वजाग्रेनिपपातह ॥७७॥ पाव
कात्मजमालोक्यध्वजाग्रेसमवस्थितं ॥ जज्वालरावणःक्रोधात्ततोनीलोननादच ॥७८॥ ध्वजा
ग्रेधनुषश्चाग्रेकिरीटाग्रेचतंहरिं ॥ लक्ष्मणोथहनूमांश्चरामश्चापिसुविस्मिताः ॥७९॥

७६॥७७॥७८॥ ध्वजाग्रादिषुतंदृष्ट्वेतिशेषः रावणकिरीटेस्थितेर्युद्धेकेनापिदुष्करत्वात्लक्ष्मणा
दयस्त्रयोपिविस्मिताः ॥७९॥

जानामीति· चौर्यसीताहरणेनैवेतिभावः मोघविकत्थनेन· व्यर्थात्मश्लाघनेन।।९६।।९७।।९८।।सरामानु

जानामिवीर्यंतवराक्षसेंद्रबलंप्रतापंचपराक्रमंच।।अवस्थितोहंशरचापपाणिरागच्छकिंमो
घविकत्थनेन।।९६।।सएवमुक्तःकुपितःससर्ज्जरक्षोधिपःसप्तशरान्सुपुंखान्।।तान्लक्ष्मणः
कांचनचित्रपुंखैश्चिच्छेदबाणैर्निशिताग्रधारैः।।९७।।तान्प्रेक्षमाणःसहसानिकृत्तान्निकृत्त
भोगानिवपन्नगेंद्रान्।।लंकेश्वरःक्रोधवशंजगामससर्जचान्यान्निशितान्पृषत्कान्।।९८।।स
वाणवर्षंतुववर्षतीव्रंरामानुजःकार्मुकसंप्रयुक्तं।।क्षुराईचंद्रोत्तमकर्णिभल्लैःशरांश्चचि
च्छेदनचुक्षुभेच।।९९।।सबाणजालान्यपितानितानिमोघानिपश्यंस्त्रिदशारिराजः।।विसि-
स्मियेलक्ष्मणलाघवेनपुनश्चबाणान्निशितान्मुमोच।।१००।।सलक्ष्मणश्चापिशितान्शिता
ग्रान्महेंद्रतुल्याशनिभीमवेगान्।।संधायचापेज्वलनप्रकाशान्ससर्जरक्षोधिपतेर्वधाय
।।१।।सतान्प्रचिच्छेदहिराक्षसेंद्रशितान्शरान्लक्ष्मणमाजघान।।शरेणकालाग्निसमप्रभेण
स्वयंभुदत्तेनललाटदेशे।।२।।

जेरावणोपरिबाणवर्षंववर्षतदीयान्शरांश्चक्षुरादिभिश्चिच्छेदनचुक्षुभेच· चात्रस्वस्थानतश्च
चाल।।९९।।१००।।१०१।।१०२।।

पितुरग्नेर्माहात्म्यसंयोगात् नत्वयमस्त्राभिमंत्रितो बाणोऽग्निं दग्धुमर्हतीति वियुज्यतत्वमयुज्यत ॥८९॥९०
तं सौमित्रिं वारयित्वेति सर्वं कपिबलमिति शेषः ॥९१॥ अवेहि पश्य ॥९२॥९३॥ अंतगामी अंतं नाशं प्रा

पितृमाहात्म्यसंयोगादात्मनश्चापि तेजसा ॥ जानुभ्यामपतद्भूमौ न तु प्राणैर्वियुज्यत ॥८९॥ विसं
ज्ञं वानरं दृष्ट्वा दशग्रीवो रणोत्सुकः ॥ रथेनांबुदनादेन सौमित्रिमभिदुद्रुवे ॥९०॥ आसाद्य र
णमध्ये तु वारयित्वा स्थितो ज्वलन् ॥ धनुर्विस्फारयामास राक्षसेंद्रः प्रतापवान् ॥९१॥ तमाह सौ
मित्रिरदीनसत्त्वो विस्फारयंतं धनुरप्रमेयं ॥ अवेहि मामद्य निशाचरेंद्र न वानरांस्त्वं प्रतियो
द्धुमर्हसि ॥९२॥ स तस्य वाक्यं प्रतिपूर्णघोषं ज्याशब्दमुग्रं च निशम्य राजा ॥ आसाद्य सौमित्रिमु
पस्थितं तं रोषान्वितां वाचमुवाच रक्षः ॥९३॥ दिष्ट्यासि मे राघव दृष्टिमार्गं प्राप्तोऽन्तगामी वि
परीतबुद्धिः ॥ अस्मिन्क्षणे यास्यसि मृत्युलोकं संसाद्यमानो मम बाणजालैः ॥९४॥ तमाह सौमि
त्रिरविस्मयानो गर्जंतमुद्वृत्तशिताग्रदंष्ट्रं ॥ राजन्न गर्जंति महाप्रभावा विकत्थसे पापकृतां वरि
ष्ठ ॥९५॥

प्स्यतीत्यंतगामी भविष्यति ग्लानिः मया सह युद्धाय प्राणनाशार्थमागमनाद्विपरीतबुद्धिः दुर्बुद्धिः सं
साद्यमानः प्राप्यमाणः ॥९४॥ अविस्मयानः तद्विक्रमादिदर्शनेपि स्मयरहितः उद्वृत्ता उन्नतेति तत्पाद
तिस्थोत्पादं तु उत्कटा शीता तीक्ष्णाग्रदंष्ट्रा यस्य ॥९५॥

नचोद्धर्त्तुमशक्नोदित्याह· हिमवानिति· येनरावणेनसुरासुरैः सहिताहिमवदादयोपिभुजाभ्यामु
द्धर्त्तुंशक्यासमभूत्तेनभरतानुजःसंख्येउद्धर्तुंशक्योनाभूत्॥९॥कुतस्तत्राहशक्त्येति॥अमोघयाब्रह्म
दत्तयास्तनांतरेआहतःसौमित्रिर्विष्णोरमीमांस्यंनिःसंशयंविष्णुभागत्ववंतं· इयत्तयाचिंतयि
तुमशक्यंवाविष्णोर्भागंआत्मानंप्रत्यनुस्मरत्· अन्वस्मरत्· नहिस्वीयंस्वंहिनस्त्वीत्याशयेनब्र
ह्मशक्तिमूलायत्राणार्थंभगवत्तेजोंशएवाहमस्मीतिध्यातवान्· नटवदंगीकृतमनुष्यत्वस्यैनरे

हिमवान्मंदरोमेरुस्त्रैलोक्यंवासहामरैः॥शक्यंभुजाभ्यामुद्धर्त्तुंनशक्योभरतानुजः॥९॥
शक्त्याब्राह्म्यातुसौमित्रिस्ताडितोपिस्तनांतरे॥विष्णोरमीमांस्यभागमात्मानंप्रत्यनुस्मर
त्॥१०॥ततोदानवदर्पघ्नंसौमित्रिंदेवकंटकः॥तंपीडयित्वाबाहुभ्यांनप्रभुर्लंघनेभवत्॥११॥
ततःक्रुद्धोवायुसुतोरावणंसमभिद्रवत्॥आजघानोरसिक्रुद्धोवज्रकल्पेनमुष्टिना॥१२॥

षांदृढप्रतीत्यर्थंपरंनसर्वदातथाध्यानेएवंचब्रह्मभावनयाल्लक्ष्मणेनस्वशरीरस्यगरीयस्त्वमाप
दितमित्युक्तंभवति॥१०॥ततइतितथानुसंधानमहिमतइत्यर्थः अथानंतरमुच्यमानविशेषणे
मेनंसौमित्रिंबाहुभ्यांपीडयित्वालंघनेचालनेपिनप्रभुरभवत्ः नसमर्थोअभवत्किंपुनरुद्ध
रणेइतिभावः॥११॥ततःसौमित्रिक्लेशनान्क्रुद्धोवायुसुतइत्यर्थः॥१२॥ श्री

३।४॥मेदार्द्रगात्रइतिसंधिरार्षः अथरावणःप्राणांतापदंप्राप्तःप्रकारांतरेणजीवननिर्वाहमसंभाव्यब्रह्मदत्ता
ममोघांशक्तिंजग्राहेत्याहजग्राहेति॥५॥सधूमानलसंनिकाशां सधूमानलसदृशीं राक्षसराष्ट्रनाथोरावणः
६॥तथापिसेत्रिब्राह्मत्वेनामोघत्वात्इत्यर्थः॥७॥शक्तिमानपि महाबलवानपिशक्तिसमाहतः सन्नजज्वा

सलक्ष्मणोरावणसायकार्त्तश्चचालचापंशिथिलंप्रगृह्य॥पुनश्चसंज्ञांप्रतिलभ्यकृच्छ्राच्चिच्छेद
चापंत्रिदशेंद्रशत्रोः॥३॥निकृत्तचापंत्रिभिराजघानबाणैस्तदादाशरथिःशिताग्रैः॥ससायकार्त्तो
विचचालराजाकृच्छ्राच्चसंज्ञांपुनराससाद॥४॥सकृत्तचापःशरताडितश्चमेदार्द्रगात्रोरुधिराव
सिक्तः॥जग्राहशक्तिंस्वयमुग्रशक्तिःस्वयंभुदत्तांयुधिदेवशत्रुः॥५॥सतांसधूमानलसंनिका
शांवित्रासनींसंयतिवानराणां॥चिक्षेपशक्तिंतरसाज्वलंतींसौमित्रयेराक्षसराष्ट्रनाथः॥६॥तामा
पतंतींभरतानुजोऽस्त्रैर्जघानबाणैश्चहुताग्निकल्पैः॥तथापिसातस्यविवेशशक्तिर्भुजांतरंदाश
रथेर्विशालं॥७॥सशक्तिमान्शक्तिसमाहतःसन्जज्वालभूमौसरघुप्रवीरः॥तंविह्वलंतंसह
साभ्युपेत्यजग्राहराजातरसाभुजाभ्यां॥८॥

लयपातेतिपाठंतरं विह्वलं तंविकलंभवंतंराजाराव
णः तरसाबलेनलक्ष्मणंभुजाभ्यांजग्राह इंद्रजिद्द्वयोरपिपुनरुत्थानदर्शनादिदानीमपिपुनरु
ज्जीवनभयेनगृहीत्वासमुद्रेप्रक्षेपणीयस्तत्रगतेरामोऽसहायोनश्यत्येवेत्याशयेनायमारंभः॥८॥

राघवाभ्याशमानयदित्युक्तं कथमेवं सुग्रहत्वं लक्ष्मणस्येत्यत्राह । वायुसूनोरिति सुहृत्त्वेन सखित्वेन प
रमभक्त्या च लक्ष्मणः शत्रुणामप्रकंप्योपि वायुसूनोर्लघुत्वमगमत् ॥ शत्रूणामित्यनेन लक्ष्मणोद्धरण
समये रावणस्यानुचरैः साहाय्यं कृतमिति गम्यते । इदं च भक्तमात्रसुग्रहत्वं भगवतो भगवदवतारा
णां च स्वभावसिद्धमेवेति बोध्यं । एवं च रामलक्ष्मणयोरज्ञानशक्तिमत्त्वतात्पर्यं न याभासमानानि वच

आनयद्राघवाभ्याशं बाहुभ्यां परिगृह्य तं ॥ वायुसूनोः सुहृत्त्वेन भक्त्या परमया च सः ॥ शत्रूणा
मप्रकंप्योपि लघुत्वमगमत्कपेः ॥१७॥ तं समुत्सृज्य सा शक्तिः सौमित्रिं युधि निर्जितं ॥ रावण
स्य रथे तस्मिन्स्थानं पुनरुपागमत् ॥१८॥ रावणोपि महातेजाः प्राप्य संज्ञां महाहवे ॥ आ
ददे निशितान्बाणाञ्जग्राह च महद्धनुः ॥१९॥ आश्वस्तश्च विशल्यश्च लक्ष्मणः शत्रुसूदनः ॥
विष्णोर्भागममीमांस्यमात्मानं प्रत्यनुस्मरन् ॥२०॥

नानि मानुषवेषनिर्वहणमात्रपराणीति बोध्यं । न
दुक्तं भागवते । मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः । कुतोन्यथास्य रमतः स्व आत्म
न्सीताकृतानि व्यसनानीश्वरस्येति । मर्त्यशिक्षणं तत्फलकमित्यर्थः । आत्मनि । ईश्वरस्येत्यनेन लाघव
गौरवप्राप्त्योरविरोध उक्तः ॥१७॥ तं समुत्सृज्य । ब्रह्मत्वेन ध्यानात्तत्समुत्सर्गः । स्थानं स्थितिं ॥१८॥१९॥ पुनर्वि
ष्णोर्भागमात्मानं स्मरन् आश्वस्तः प्राप्ताश्वासेंद्रियग्रामः विशल्यः निरुक्तसर्वगात्रश्चासीदिति शेषः ॥२०॥

जानुभ्यांरथ्यपस्वरूपायांभूमौअगमत्एवंभूमौपपातचचालचलितसंज्ञोभूदित्यर्थः॥१३॥आस्यैरि
ति॰बहुत्वंदशाननत्वात्अस्येतिशेषःयतोरुधिरंपपाताततोविघूर्णमानइत्यादि॥१४॥विसंज्ञःगत

तेनमुष्टिप्रहारेणरावणोराक्षसेश्वरः॥जानुभ्यामगमद्भूमौचचालचपपातच॥१३॥
आस्यैश्चनेत्रैःश्रवणैःपपातरुधिरंबहु॥विघूर्णमानोनिश्चेष्टोरथोपस्थउपाविश
त्॥१४॥विसंज्ञोमूर्छितश्चासीन्नचस्थानंसमालभत्॥विसंज्ञंरावणंदृष्ट्वासमरेभी
मविक्रमं॥१५॥ऋषयोवानराश्चैवनेदुर्देवाश्चसासुराः॥हनूमानथतेजस्वीलक्ष्मणं
रावणार्दितं॥१६॥

चेतनःमूर्छितःस्वविषयग्रहाशक्तश्रोत्रादिकरणग्रामःनचस्थानमवस्थितिस्थानंसमाल
भत्॥लातवान्॥१५॥नेदुःसंतोषादितिशेषःसासुराःरावणस्यदेववत्असुरेष्वपिक्लेशक
रत्वेनतेषामपिवैरित्वात्॥१६॥

एवंपरमक्रोधेहेतुमाह यइति अद्यत्वयायुद्धंगच्छनसौलक्ष्मणस्त्वयाशक्त्यानिहतस्ताडितः सन्सहसाविषादं
गतोतः अभ्युपेत्यप्रतिज्ञायसरोषोहंतद्दुःखशांतयेसंपुत्रस्यपौत्रस्यतेसंख्येमृत्युर्भविष्यामिइतिशेषः

यश्चैषशक्त्यानिहतस्त्वयाद्यगच्छन्विषादंसहसाऽभ्युपेत्य॥सएषरक्षोगणराजमृत्युःसपुत्रपौत्रस्य
तवाद्ययुद्धे॥२९॥एतेनचात्यद्भुतदर्शनानिशरैर्जनस्थानकृतालयानि॥चतुर्दशान्यात्तवरा
युधानिरक्षःसहस्राणिनिषूदितानि॥३०॥राघवस्यवचःश्रुत्वाराक्षसेंद्रोमहाबलः॥वायुपुत्रं
महावेगंवहंतंराघवंरणे॥३१॥रोषेणमहताविष्टःपूर्ववैरमनुस्मरन्॥आजघानशरैर्दीप्तैःका-
लानलशिखोपमैः॥३२॥राक्षसेनाहतेतस्यताडितस्यापिसायकैः॥स्वभावतेजोयुक्तस्यभूयस्ते-
जोभ्यवर्द्धत॥३३॥ततोरामोमहातेजारावणेनकृतव्रणं॥दृष्ट्वाप्लवगशार्दूलंक्रोधस्यवशमेयिवा
न्॥३४॥तस्याभिसंक्रम्यरथंसचक्रंसाश्वध्वजछत्रमहापताकं॥ससारथिंसाशनिशूलखड्गंरामःप्र
चिच्छेदशितैःशराग्रैः॥३५॥अथेंद्रशत्रुंतरसाजघानबाणेनवज्राशनिसन्निभेन॥भुजांतरेव्यूढसु
जातरूपेवज्रेणमेरुंभगवानिवेंद्रः॥३६॥

॥२९॥ एतेनमयातावकानिरक्षांसिनिषूदितानि॥३०॥
३१॥३२॥भूयस्तेजःशौर्यंविवृद्धमभवत्॥३३॥अभिसंक्रम्यसंयुक्तोभूत्वा॥३५॥व्यूढंविशालंसुजात
रूपंराजार्हंमहाभरणैश्चंदनादिभिःप्रशस्ताकारंतस्मिन्॥३६॥ राम श्र

समभिद्रवत्· शीघ्रमभ्यद्रवत् ॥२१॥२२॥२३॥२४॥ दुद्राव शीघ्रमगमत् ॥२५॥२६॥ क्वनुगतइतियोजना
नक्वापीत्यर्थः ॥२७॥ नदेवाहयदीति· यद्यपींद्रादीन्शरणंगमिष्यसिदशधादिशोदशप्रकारा

निपातितन्महावीरांवानराणां महाचमूं ॥ राघवस्तुरणेदृष्ट्वारावणं समभिद्रवत् ॥२१॥ अ
थैनमनुसंक्रम्यहनूमान्वाक्यमब्रवीत् ॥ ममपृष्ठंसमारुह्यराक्षसंशास्तुमर्हसि ॥२२॥
विष्णुर्यथागरुत्मंतमारुह्यामरवैरिणं ॥ तच्छ्रुत्वाराघवोवाक्यंवायुपुत्रेणभाषितं ॥२३॥
अथारुरोहसहसाहनूमंतंमहाकपिं ॥ रथस्थंरावणंसंख्येददर्शमनुजाधिपः ॥२४॥ त
मालोक्यमहातेजाःप्रदुद्रावसरावणं ॥ वैरोचनमिवक्रुद्धोविष्णुरभ्युद्यतायुधः ॥२५॥
ज्याशब्दमकरोत्तीव्रंवज्रनिष्पेषनिष्ठुरं ॥ गिरागंभीरयारामोराक्षसेंद्रमुवाचह ॥२६॥
तिष्ठतिष्ठममत्वंहिकृत्वाविप्रियमीदृशं ॥ क्वनुराक्षसशार्दूलगत्वामोक्षमवाप्स्य।
सि ॥२७॥ यदीन्द्रवैवस्वतभास्करान्वास्वयंभुवैश्वानरशंकरान्वा ॥ गमिष्यसित्वंदश
धादिशोवातथापिमेनाद्यगतोविमोक्ष्यसे ॥२८॥

दिशोवातदंतान्वाऽद्यगमिष्यसित
थापिनत्वगतोपिमेमत्तोनविमोक्ष्यसे· ॥ दशवादिशोवाइतिपाठेदशापिदिशइत्यर्थः वाशब्दोप्यर्थे ॥

सइति॥१॥२॥ब्रह्मदंडः युगांतकालसमुत्थितोग्निर्वा धूमकेतुः यद्वा ब्रह्मास्त्रं अमोघत्वेन साम्यं राघवबाणा-
नामिति कर्मणि शेषे षष्ठी॥३॥४॥ महेंद्रेणासमानइति यत्तदपि मोघं निरर्थकं तत्र हेतुर्मानुषेणेति॥५॥

सप्रविश्यपुरींलंकांरामबाणभयार्दितः॥भग्नदर्पस्तदाराजाबभूवव्यथितेंद्रियः॥१॥मातंग
इवसिंहेनगरुडेनेवपन्नगः॥अभिभूतोभवद्राजाराघवेणमहात्मना॥२॥ब्रह्मदंडप्रतीकानां
विद्युज्ज्वलितवर्चसां॥स्मरन्राघवबाणानांविव्यथेराक्षसेश्वरः॥३॥सकांचनमयंदिव्यमाश्रि
त्यपरमासनं॥विप्रेक्षमाणोरक्षांसिरावणोवाक्यमब्रवीत्॥४॥सर्वंतत्खलुमेमोघंयत्तप्तंपर
मंतपः॥यत्समानोमहेंद्रेणमानुषेणविनिर्जितः॥५॥इदंतद्ब्रह्मणोघोरंवाक्यंमामभ्युप।
स्थितं।मानुषेभ्योविजानीहिभयंत्वमितितत्तथा॥६॥देवदानवगंधर्वैर्यक्षराक्षसपन्नगैः॥
अवध्यत्वंमयाप्रोक्तंमानुषेभ्योनयाचितं॥७॥तमिमंमानुषंमन्येरामंदशरथात्मजं॥इक्ष्वा
कुकुलजातेनअनरण्येनयत्पुरा॥८॥

मानुषेभ्यस्तवभयमितियदुक्तंतत्घोरंवाक्यंत
दर्थोमामुपस्थितं तत्तथा संपत्स्यतेचेतिशेषः॥६॥ननुभगवतातथाभयोपदेशःकुतस्तत्राह
देवेत्यादि यस्मान्मनुष्येभ्योनयाचितंतस्मात्तेभ्योभयंजानीहीत्युक्तमित्यन्वयः॥७॥योमानुषो
भयहेतुरुक्तस्तमिमंदशरथात्मजमेवमन्येतत्रदृढनिश्चयेहेतुमाहइक्ष्वाकुकुलेत्यादि॥८॥

वज्रपातश्चाशनिसन्निपातश्चेति समाहारैकवत् ॥३७॥३८॥ किरीटकूटं किरीटसमूहं ॥३९॥ हताः प्रवीराय
स्य तथा तस्मात् युद्धधर्मज्ञानात् व्यवस्य ज्ञात्वा ॥४०॥ इतो रणात् प्रयाहीति योजना जानामि प्रेक्ष्यसि प्रक्षिप्य

योवज्रपाताशनिसन्निपातान्नचुक्षुभे नापि चचाल राजा ॥ स रामबाणाभिहतो भृशार्त्तश्चचाल चा
पं च मुमोच वीरः ॥३७॥ तं विह्वलन्तं प्रसमीक्ष्य रामः समाददे दीप्तमथार्द्धचंद्रं ॥ तेनार्कवर्णं सहसा
किरीटं चिच्छेद रक्षोधिपतेर्महात्मा ॥३८॥ तं निर्विषाशीविषसन्निकाशं शान्तार्चिषं सूर्यमिवाप्रका
शं ॥ गतश्रियं कृत्तकिरीटकूटमुवाच रामो युधि राक्षसेंद्रं ॥३९॥ कृतं त्वया कर्म महत्सुभीमं ह
तप्रवीरश्च कृतस्त्वयाहं ॥ तस्मात्परिश्रान्त इति व्यवस्य न त्वां शरैर्मृत्युवशं नयामि ॥४०॥ प्र
याहि जानामि रणार्दितस्त्वं प्रविश्य रात्रिंचरराज लंकां ॥ आश्वास्य निर्याहि रथी सधन्वी तदा
बलं प्रेक्ष्यसि मे रथस्थः ॥४१॥ स एवमुक्तो हतदर्पहर्षो निकृत्तचापः सहताश्वसूतः ॥ शरार्दितो
भग्नमहाकिरीटो विवेश लंकां सहसा स्म राजा ॥४२॥ तस्मिन्प्रविष्टे रजनीचरेंद्रे महाबलेदा
नवदेवशत्रौ ॥ हरीन्विशल्यान्सहलक्ष्मणेन चकार रामः परमाहवाग्रे ॥४३॥ तस्मिन्प्रभग्ने त्रि
दशेंद्रशत्रौ सुरासुराभूतगणा दिशश्च ॥ ससागराः सर्वमहोरगाश्च तथैव भूम्यंबुचराः प्रहृष्टाः
॥४४॥ इत्यार्षे श्री रा॰ यु॰ एकोनषष्ठिः

सि ॥४१॥४२॥४३॥४४॥ अयं रावणपराभवस्तन्मासीयशुक्लषष्ठ्यां

सायंकाले आवयमानः [illegible] प॰४ इति रामाभिरा
मे॰ एकोनषष्ठिः सर्गः ॥५९॥

ऽच्यंते॰ एतदेव॰ उक्तं मद्भयनिमित्तं॰ समागम्य॰ ज्ञात्वा॰ यत्नमित्यादिभयस्यानिश्चितत्वाद्विवतिय
त्नंकुरुतेत्यर्थः॥१२॥ कोसौयत्नोयोस्माभिःकार्यस्तत्राह॰ राक्षसाइति॰ चर्यागोपुरेष्वाख्याते॰
अप्रतिमगांभीर्योऽनुपमगांभीर्यः॥१३॥ कुंभकर्णविबोधनाशयंकविराह॰ समरेइति॰ आत्मा

राक्षसाश्चापितिष्ठंतुचर्यागोपुरमूर्द्धसु॥सचाप्रतिमगांभीर्योदेवदानवदर्पहा॥१३॥
ब्रह्मशापाभिभूतस्तुकुंभकर्णोविबोध्यतां॥समरेजितमात्मानंप्रहस्तंचनिषूदितं॥१४॥
ज्ञात्वारक्षोभीमबलमादिदेशमहाबलः॥द्वारेषुयत्नःक्रियतांप्राकारश्चाधिरुह्यतां॥१५॥
निद्रावशसमाविष्टःकुंभकर्णोविबोध्यतां॥सुखंस्वपतिनिश्चिंतःकामोपहतचेतनः॥
॥१६॥

नंपराजितंप्रहस्तंचनिषूदितं॥१४॥ज्ञात्वा एवंस्वस्यबलक्षयेसहायार्हंभीमबलंरक्षःकुंभकर्णं
ज्ञात्वाभीमंबलमादिदेशेत्यावत्यान्वयःकुंभकर्णबोधनार्थमितिशेषः॥१५॥ १६॥

कुलाधमस्त्वकुलाधमः राक्षसकुलाधमेति यावत् ॥९॥ इतीतिशेषः शप्तोहमि सुभयान्वयि· वेदवत्या च शप्त
इत्यन्वयः शापहेतुमाह यया यतः सा धर्षिता ॥१०॥ सेयं वेदवत्येव जनकनंदनीत्यर्थः भयकारणं शा
पांतरमाह उमेति ॥११॥ यथोक्तामन्नाशनिमित्तं शापं यथोक्तवतस्तदद्य मयाप्राप्तं· यद्दुक्तस्तन्मये
तिपाठांतरं· तत्रोमाशापः कैलासशिखरचालनवेलायां रावणस्य स्त्रीनिमित्तं मरणमित्येवंरूपः

उत्पत्स्यति हि मद्वंशे पुरुषो राक्षसाधम ॥ यस्त्वां सपुत्रं सामात्यं सबलं साश्वसारथिं ॥९॥
निहनिष्यति संग्रामे त्वां कुलाधम दुर्मते ॥ शप्तोहं वेदवत्या च यथा सा धर्षिता पुरा ॥१०॥ से
यं सीता महाभागा जाता जनकनंदिनी ॥ उमा नंदीश्वरश्चापि रंभा वरुणकन्यका ॥११॥
यथोक्तास्तत् मयाप्राप्तं न मिथ्या ऋषिभाषितं ॥ एतदेव समागम्य यत्नं कर्त्तुमिहार्हथ ॥१२॥

मित्याहुः नंदीश्वरशापस्तु यस्माद्वानरमूर्त्तिं मां दृष्ट्वा राक्षस दुर्मतिः मौर्ख्यान्मामवजानीषे परि
हासं च मुंचसि· तस्मान्मद्रूपसंयुक्ता मद्वीर्यसमतेजसः उत्पत्स्यंति वधार्थं हि कुलस्य तव वान
रा इति· रंभेत्यनेन रंभानिमित्तनलकूबरशाप उच्यते· यदा त्वकामां कामार्त्तो धर्षयिष्यसि
योषितं मूर्धति सप्तधा रक्तः शकली भविता तदेति· वरुणकन्यका पुंजिकस्थला तन्निमित्तश्च
ब्रह्मशापः स्त्रीधर्षणे मरणरूपः तदुक्तस्यावश्यप्राप्तौ हेतुर्न मिथ्येति ऋषिपदेन तपोयुक्ता

उक्तमेवाभिप्रायंरावण आह· सहीतिसर्वरक्षसांककुदंश्रेष्ठः· नित्यनपुंसकंककुदमिति· तेनसमहाबाहु
रित्यनेनसामानाधिकरण्यमविरुद्धं॥१८॥परंकेतुः अतिप्रकाशवीर्यइत्यर्थः॥१९॥२०॥ननुत्वदुःखनाश

सहिसंख्येमहाबाहुःककुदंसर्वरक्षसां॥वानरान्राजपुत्रौचक्षिप्रमेवहनिष्यति॥१८॥एषके
तुःपरंसंख्येमुख्योवैसर्वरक्षसां॥कुंभकर्णःसदाशेतेमूढोग्राम्यसुखेरतः॥१९॥रामेणाभिनिरस्त
स्यसंग्रामेस्मिन्सुदारुणे॥भविष्यतिनमेशोकःकुंभकर्णेविबोधिते॥२०॥किंकरिष्याम्यहंतेन॥
शक्रतुल्यबलेनहि॥ईदृशेव्यसनेघोरेयोनसाह्यायकल्पते॥२१॥तेतुतद्वचनंश्रुत्वाराक्षसेंद्र
स्यराक्षसाः॥जग्मुःपरमसंभ्रांताःकुंभकर्णनिवेशनं॥२२॥तेरावणसमादिष्टामांसशोणितभो
जनाः॥गंधमाल्यंमहद्भक्ष्यमादायसहसाययुः॥२३॥तांप्रविश्यमहाद्वारांसर्वतोयोजनायतां
कुंभकर्णगुहांरम्यांपुष्पगंधप्रवाहिनीं॥२४॥कुंभकर्णस्यनिश्वासादवधूतामहाबलाः॥प्रति
ष्ठमानाःकृच्छ्रेणयत्नात्प्रविविशुर्गुहां॥२५॥तांप्रविश्यगुहांरम्यांरत्नकांचनकुट्टिमां॥दद
शुर्नैर्ऋतव्याघ्राःशयानंभीमविक्रमं॥२६॥

समर्थस्यापिकथमुद्बोधनमुचितंभवेत्तत्राह· किंक
रिष्यामीतिव्यसनेदुःखे॥२१॥२२॥२३॥सर्वतःप्राक्प्रत्यक्दक्षिणोत्तरतश्चइत्यर्थः·कुंभकर्णगुहां·पाताल
वद्देवनिर्मितंभुबिलमित्यर्थः॥२४॥प्रतिष्ठमानाःपरिवर्त्यगच्छंतः॥२५॥रत्नकांचनकुट्टिमांरत्नकांचननि

र्मितभूमिकामित्यर्थः॥२६॥

एत्तदुत्तरं सहि संख्ये इत्येव श्लोक इति कतकस्वरसः केचित्तु सार्धश्लोकद्वयमधिकं पठ्यते द्वारेष्वित्यादिनव
सप्तदशाष्टौ च मासान्स्वपितराक्षस इति· इदं निद्रायाम् अनियपरं वाक्यं· शायितास्येषषण्मासानिकाहं
जागरिष्यत इत्तित्तु षण्मासादर्वाक् न कदापि जागरणं तदुत्तरमपि तदेकाहमेवेति जागरणावको
लनियमपरं न तु शयने नियमपरं· स्वप्नं तु वर्षाण्यनेकानि देवदेव ममेप्सितमिति तद्वरप्रार्थनस्योत्त
रे वक्ष्यमाणत्वात्· तत्रैव रामं प्रत्यगस्त्यवाक्याच्च तत्र निद्रां समाविष्टः॥ कुंभकर्णो महाबलः बहु

नवसप्तदशाष्टौ च मासांस्वपिति राक्षसः॥ मंत्रं कृत्वा प्रसुप्तोयमितस्तु नवमेहनि॥१७॥

न्यब्दसहस्राणि शयानो न च बुध्यत इति· केचित्तु नवसप्तषोडश तन्मध्ये दशानामष्टौत्यागेऽ
वशिष्टषण्मासान्स्वपितीत्यर्थ इत्याहुः तथा एत्तदुत्तरं मंत्रं कृत्वा प्रसुप्तोयमितस्तु नवमेहनी
ति अर्धपद्यनेन तत्र यश्चतस्य इतो युद्धप्रारंभदिनात्प्राक् न नवमेहनी तिव्याख्यानं तदसंगतमेव
श्रूयंते सुमहान्कालः शयानस्य महाबलेत्यनेन षण्मासादधिकत्वस्य सांप्रतनिद्रायां प्रतीतेः
अहः शब्दो लक्षणया मासपरो वा एतच्चाग्रे स्फुटीकरिष्यते ॥१७॥ राम

नेदुरितिचिक्षिपुः हस्तैस्तच्छरीरस्यप्रणोदनंचक्रुः॥३७॥त्रिदिवंव्योमकिरंतउत्नगच्छंतः॥३८॥भुशुं
डीमुद्गरंविशेषान्॥३९॥४०॥४१॥गाढंपरिहिताःपरिहितवाससःकुंभगणान्कुंभवाद्यानिवादया

नेदुरास्फोटयामासुश्चिक्षिपुस्तेनिशाचराः॥कुंभकर्णविवोधार्थंचक्रुस्तेविपुलंस्वरं॥३७॥ससं
खभेरीपणवप्रणादंसास्फोटितक्ष्वेलितसिंहनादं॥दिशोद्रवंतस्त्रिदिवंकिरंतःश्रुत्वाविहं
गाःसहसानिपेतुः॥३८॥यदाभृशंतैर्निनदैर्महात्मानकुंभकर्णोवुबुधेप्रसुप्तः॥ततोभुशुं
डीर्मुशलानिसर्वेरक्षोगणास्तेजगृहुर्गदाश्च॥३९॥तंशैलशृंगैर्मुशलैर्गदाभिर्वृक्षैस्तलै
मुद्गरमुष्टिभिश्च॥सुखप्रसुप्तंभुविकुंभकर्णंरक्षांस्युदग्राणितदानिजघ्नुः॥४०॥तस्य
निश्वासवातेनकुंभकर्णस्यरक्षसः॥राक्षसाऽकुंभकर्णस्यस्थातुंशेकुर्नचाग्रतः॥४१॥त
तःपरिहितागाढंराक्षसाभीमविक्रमाः॥मृदंगपणवाभेरीःशंखकुंभगणांस्तथा॥४२॥
दशराक्षससाहस्रंयुगपत्पर्यवारयत्॥नीलांजनचयाकारंतेतुतंप्रत्यवोधयन्॥४३॥
अभिघ्नंतोनदंतश्चनचसंवुबुधेतदा॥यदाचैनंनशेकुस्तेप्रतिवोधयितुंतदा॥४४॥

मासुरितिशेषःततःप्रपूरितागाढंराक्षसैर्भीमविक्रमैरितिपांक्तःपाठःतत्रगुहेतिरोषःउक्त
रार्धेराक्षसाइत्यादिः॥४२॥दशराक्षससाहस्रंदशराक्षससहस्राणि॥४३॥४४॥

२७॥ऊर्ध्वलोमांचिततनुंऊर्ध्वलोमयुक्तशरीरंभ्रामयंतंपरिवर्त्तयंतंजानामीतिशेषः॥२८॥२९॥३०॥३१॥३२॥

तेतुतंविकृतंसुप्तंविकीर्णमिवपर्वतं॥कुंभकर्णंमहानिद्रंसमेताःप्रत्यवोधयन्॥२७॥ऊ
र्ध्वलोमांचिततनुंश्वसंतमिवपन्नगं॥भ्रामयंतंविनिश्वासैःशयानंभीमविक्रमं॥२८॥भीम
नासापुटंतंतुपातालविपुलाननं॥शयनेन्यस्तसर्वांगंमेदोरुधिरगंधिनं॥२९॥कांचनांगदन
द्धांगंकिरीटेनार्कवर्चसं॥ददृशुर्नैर्ऋतव्याघ्रंकुंभकर्णमरिंदमं॥३०॥ततश्चक्रुर्महात्मानः
कुंभकर्णस्यचाग्रतः॥भूतानांमेरुसंकाशंराशिंपरमतर्पणं॥३१॥मृगाणांमहिषाणांचव
राहाणांचसंचयान्॥चक्रुर्नैर्ऋतशार्दूलाराशिमन्नस्यचाद्भुतं॥३२॥ततोशोणितकुंभांश्चमांसा
निविविधानिच॥पुरस्तात्कुंभकर्णस्यचक्रुस्त्रिदिवशत्रवः॥३३॥लिलिपुश्चपरार्धेनचंदनेनप
रंतपं॥दिव्यैराश्वासयामासुर्माल्यैर्गंधैश्चगंधिभिः॥३४॥धूपगंधांश्चससृजुस्तुष्टुवुश्चपरंत
पं॥जलदाइवचानेदुर्यातुधानास्ततस्ततः॥३५॥शंखांश्चपूरयामासुःशशांकसदृशप्र
भान्॥तुमुलंयुगपच्चापिविनेदुश्चाप्यमर्षिताः॥३६॥

३३॥अथक्रमेणमं॰दमध्यतीव्रानुपायानाहलिलिपुरितिलेपनंचक्रुःआश्वासयामासुःघ्रापयामा
सुः॥३४॥३५॥३६॥

५४॥परंस्पर्शंस्पर्शनंज्ञानंप्राप्यबुध्यत॥५५॥उक्तार्थानुवादःसपात्यमानैरिति॥५६॥५७॥जाजृंभ्यमा

रज्जुबंधनबद्धाभिःशतघ्नीभिश्चसर्वशः॥वध्यमानोमहाकायोनप्राबुध्यतराक्षसः॥५४॥वार
णानांसहस्रंचशरीरेस्यप्रधावितं॥कुंभकर्णस्तदाबुद्ध्वास्पर्शंपरमबुध्यत॥५५॥सपात्यमा
नैर्गिरिशृंगवृक्षैरचिंतयस्तान्विपुलान्प्रहारान्॥निद्राक्षयात्क्षुद्भयपीडितश्चविजृंभमा
णःसहसोत्पपात॥५६॥सनागभोगाचलशृंगकल्पौविक्षिप्यबाहूजितवज्रसारौ॥विव
त्यवक्त्रंवडवामुखाभंनिशाचरोसौविकृतंजजृंभे॥५७॥तस्यजाजृंभ्यमाणस्यवक्त्रंपाताल
सन्निभं॥ददृशेमेरुशृंगाग्रेदिवाकरइवोदितः॥५८॥सजृंभमाणोतिबलःप्रबुद्धस्तुनि
शाचरः॥निश्वासश्चास्यसंजज्ञेपर्वतादिवमारुतः॥५९॥रूपमुत्तिष्ठतस्तस्यकुंभकर्णस्य
तद्बभौ॥युगांतेसर्वभूतानिकालस्येवदिधक्षतः॥६०॥तस्याग्निदीप्तसदृशेविद्युत्सदृ
शवर्चसी॥ददृशातेमहानेत्रेदीप्ताविवमहाग्रहौ॥६१॥

175

णस्यपुनःपुनर्जृंभांकुर्वतःवक्त्रमंतःपातालसन्निभंददृशे।उपरितुमेरुशृंगाग्रेउदितोदिवाक
रइवददृशेमहाशरीरस्यत्वात्॥५८॥५९॥६०॥अग्निदीप्तसदृशेदीप्ताग्निसदृशे॥६१॥

जघ्नुः तदुपरिसंचारेणतदुद्बोधनार्थमितिशेषः॥४५॥सर्वप्राणैः सर्वबलेन महाकाष्ठानां स्थूणादीनांक
टंकरैः समूहैः कटंकटैरितिपाठः कटंकटस्तंभभेदइतितीर्थः॥४६॥४७॥मृष्टकांचनकोणानां मृष्ट

ततोगुरुतरंयत्नंदारुणंसमुपाक्रमन्॥ अश्वानुष्ट्रान्खरान्नागान्जघ्नुर्दंडकशांकुशैः॥४५॥भेरी
शंखमृदंगांश्चसर्वप्राणैरवादयन्॥ निजघ्नुश्चास्यगात्राणिमहाकाष्ठकटंकरैः॥४६॥मुद्गरै
र्मुसलैश्चापिसर्वप्राणसमुद्यतैः॥तेननादेनमहतालंकासर्वाप्रपूरिता॥सपर्वतवनासर्वासो
पिनैवप्रबुध्यते॥४७॥ततोभेरीसहस्रंतुयुगपत्समहन्यत॥मृष्टकांचनकोणानांअसक्तानां
समंततः॥४८॥एवमप्यतिनिद्रस्तुयदानैवप्रबुध्यते॥शापस्यवशमापन्नस्ततःक्रुद्धानिशा
चराः॥४९॥ततःकोपसमाविष्टाःसर्वेभीमपराक्रमाः॥तद्रक्षोबोधयिष्यंतश्चक्रुरन्येपराक्र
मं॥५०॥अन्येभेरीःसमाजघ्नुःअन्येचक्रुर्महास्वनं॥केशानन्येप्रलुलुपुःकर्णानन्येदशंतिच
॥५१॥उदकुंभशतानन्येसमसिंचंतकर्णयोः॥नकुंभकर्णःपस्पंदेमहानिद्रावशंगतः॥५२॥
अन्येचबलिनस्तस्यकूटमुद्गरपाणयः॥मूर्ध्निवक्षसिगात्रेषुपातयन्कूटमुद्गरान्॥५३॥

कांचननिर्मिताःकोणावादनदंडायासां तादृशीनांभेरीणांसहस्रमित्यर्थः॥आर्षसमासः॥४८॥
शापस्यब्रह्मशापस्य॥४९॥५०॥५१॥५२॥ पातयन्अपातयन्॥५३॥ श्र

७१॥७२॥७३॥७५॥७६॥ नन्विंद्रादिभिरपि दुष्करपीडनमस्मत्पुरं कथं वानरैः पीडितं तत्राह एकेनेति॥७६॥

एवंब्रुवाणंसंरब्धंकुंभकर्णमरिंदमं॥ यूपाक्षःसचिवोराज्ञःकृतांजलिरभाषत॥७१॥ ननोदेवकृतंकिंचिद्भयमस्तिकदाचन॥ मानुषान्नोभयंराजंस्तुमुलंसंप्रबाधते॥७२॥ नदैत्यदानवेभ्योवाभयमस्तिननःक्वचित्॥ यादृशंमानुषंराजन्भयमस्मानुपस्थितं॥७३॥ वानरैःपर्वताकारैर्लंकेयंपरिवारिता॥ सीताहरणसंतप्ताद्रामान्नस्तुमुलंभयं॥७५॥ एकेनवानरेणेयंपूर्वंदग्धामहापुरी॥ कुमारोनिहतश्चाक्षःसानुयात्रःसकुंजरः॥७६॥ स्वयंरक्षोधिपश्चापिपौलस्त्योदेवकंटकः॥ व्रजेतिसंयुगेमुक्तोरामेणादित्यवर्चसा॥७७॥ यन्नदेवैःकृतोराजानापिदैत्यैर्नदानवैः॥ कृतःसइहरामेणविमुक्तःप्राणसंशयात्॥७८॥ सयूपाक्षवचःश्रुत्वाभ्रातुर्युधिपराभवं॥ कुंभकर्णोविवृत्ताक्षोयूपाक्षमिदमब्रवीत्॥७९॥ सर्वमद्यैवयूपाक्षहरिसैन्यंसलक्ष्मणं॥ राघवंचरणेजित्वाततोद्रक्ष्यामिरावणं॥८०॥ राक्षसांस्तर्पयिष्यामिहरीणांमांसशोणितैः॥ रामलक्ष्मणयोश्चापिस्वयंपास्यामिशोणितं॥८१॥

संयुगेमुक्तः जीवन्मृतइत्युक्तेतिशेषः॥७७॥ यन्नकृतः यांमवस्थांनप्रापितःसरामेणकृतस्तामवस्थांप्रापितः॥ प्राणसंशयात्तयावस्थयाप्राप्तोविमुक्तश्च॥७८॥७९॥८०॥८१॥ ॥

अदर्शयन्राक्षसाइतिशेषः दर्शितांश्चतान्सबभक्ष ॥ ६२ ॥ आदत् अदेर्लङ् ॥ ६३ ॥ समुत्पेतुः संमुखमाजग्मुः ॥ ६४ ॥ निद्रयाविशदैरीषदुन्मीलितैर्नेत्रैर्यस्यसः ॥ ६५ ॥ विस्मितइति· स्वभावतो निद्रापगमाभावेन· अ

ततस्त्वदर्शयन्सर्वान्भक्ष्यांश्चविविधान्बहून् ॥ वराहान्महिषांश्चैवबभक्ष समहाबलः ॥ ६२ ॥ आदद्बुभुक्षितोमांसंशोणितंतृषितोपिबत् ॥ मेदःकुंभांश्चमद्यांश्चपपौशक्ररिपुस्तदा ॥ ६३ ॥ ततस्तृप्तइतिज्ञात्वासमुत्पेतुर्निशाचराः ॥ शिरोभिश्चप्रणम्यैनंसर्वतःपर्यवारयन् ॥ ६४ ॥ निद्राविशदनेत्रस्तुकलुषीकृतलोचनः ॥ चारयन्सर्वतोदृष्टिंतानुवाचनिशाचरान् ॥ ६५ ॥ ससर्वान्सांत्वयामासनैर्ऋतान्नैर्ऋतर्षभः ॥ वोधनाद्विस्मितश्चापिराक्षसानिदमब्रवीत् ॥ ६६ ॥ किमर्थमहमादृत्यभवद्भिःप्रतिवोधितः ॥ कच्चित्सुकुशलंराज्ञोभयंवानेहकिंचन ॥ ६७ ॥ अथवाध्रुवमन्येभ्योभयंपरमुपस्थितं ॥ यदर्थमेवत्वरितैर्भवद्भिःप्रतिवोधितः ॥ ६८ ॥ अद्यराक्षसराजस्यभयमुत्पाटयाम्यहं ॥ दारयिष्येमहेंद्रंवाशीतयिष्येतथानलं ॥ ६९ ॥ नह्यल्पकारणेसुप्तंवोधयिष्यतिमादृशं ॥ तदाख्यातार्थतत्त्वेनमत्प्रबोधनकारणं ॥ ७० ॥ श्र ॥

अकालवोधनादिति भावः ॥ ६६ ॥ आहृत्य आदरपूर्वं· यत्नपूर्वमितियावत् ॥ ६७ ॥ अन्येभ्यः शत्रुभ्यः यदर्थं यद्भयनिवृत्तये ॥ ६८ ॥ ६९ ॥ अर्थतत्त्वेनः याथार्थ्येन ॥ ७० ॥ श्र

वलसमीरणां वलवर्द्धिकरं ॥९२॥ उपहारयन् उपाहारयन् ॥९३॥ ईषत्समुत्कटो मत्तः तावन्मधुपानेनापी

प्रत्तात्पवदनं त्र्यः स्नातः परमहर्षितः ॥ पिपासुस्त्वरयामास पानं बलसमीरणां ॥९२॥ ततस्ते
त्वरितास्तत्र राक्षसा रावणाज्ञया ॥ मद्यं भक्ष्यांश्च विविधान् क्षिप्रमेवोपहारयन् ॥९३॥ पीत्वा
घटसहस्रे द्वे गमनायोपचक्रमे ॥ ईषत्समुत्कटो मत्तः तेजोबलसमन्वितः ॥ कुंभकर्णो ब
भौरुष्टः कालांतकयमोपमः ॥९४॥ भ्रातुः स भवनं गच्छन् रक्षोबलसमन्वितः ॥ कुंभकर्णः प
दन्यासैरकंपयत मेदिनीं ॥९५॥ स राजमार्गं वपुषा प्रकाशयन् सहस्ररश्मिर्धरणीमिवां
शुभिः ॥ जगाम तत्रांजलिमालया वृतः शतक्रतुर्गेहमिव स्वयंभुवः ॥९६॥ तं राजमार्गस्थम
मित्रघातिनं वनौकसस्ते सहसा बहिः स्थिताः ॥ दृष्ट्वा प्रमेयं गिरिशृंगकल्पं वित्रेसुः
स्ते सह यूथपालैः ॥९७॥ केचिच्छरण्यं शरणं स्म रामं व्रजंति केचिद्व्यथिताः पतंति ॥ केचि
द्दिशश्च व्यथिताः पतंति केचिद्भयार्त्ता भुवि शेरते स्म ॥९८॥ श्री राम

षदेव समुत्कटो मत्तश्चेत्यर्थः ॥९४॥९५॥ वपुषा देहकांत्या ॥९६॥ अप्रमेयत्वे हेतुर्गिरिशृंगकल्पत्वं ॥९७॥
आत्मतेजसा आदित्यं स्पर्शंतमिव ॥ तत्सदृशमिति यावत् प्रायो दिनद्वयेनास्य जागरः ॥९८॥

सगर्वितं सगर्वं रोषेण विवृद्धो दोषो दुर्नयरूपो यस्य तं ॥ ८२ ॥ ८३ ॥ संप्रतस्थे प्रस्थातुमुपचक्रमे ॥ ८४

तत्तस्य वाक्यं ब्रुवतो निशम्य सगर्वितं रोषविवृद्धदोषं ॥ महोदरो नैरृतयोधमुख्यः कृतांजलिर्वाक्यमिदं बभाषे ॥ ८२ ॥ रावणस्य वचः श्रुत्वा गुणदोषौ विमृश्य च ॥ पश्चादपि महाबाहो शत्रून्युधि विजेष्यसि ॥ ८३ ॥ महोदरवचः श्रुत्वा राक्षसैः परिवारितः ॥ कुंभकर्णो महातेजाः संप्रतस्थे महाबलः ॥ ८४ ॥ सुप्तमत्याप्य भीमाक्षं भीमरूपपराक्रमं ॥ राक्षसास्त्वरिता जग्मुः दशग्रीवनिवेशनं ॥ ८५ ॥ तेभिगम्य दशग्रीवमासीनं परमासने ॥ ऊचुर्बद्धांजलिपुटाः सर्व एव निशाचराः ॥ ८६ ॥ कुंभकर्णः प्रबुद्धोसौ भ्राता ते राक्षसेश्वर ॥ कथं तत्रैव निर्यातु द्रक्ष्यसे तमिहागतं ॥ ८७ ॥ रावणस्त्वब्रवीद्धृष्टो राक्षसांस्तानुपस्थितान् ॥ द्रष्टुमेनमिहेच्छामि यथान्यायं च पूज्यतां ॥ ८८ ॥ तथेत्युक्त्वा तु ते सर्वे पुनरागम्य राक्षसाः ॥ कुंभकर्णमिदं वाक्यमूचू रावणचोदिताः ॥ ८९ ॥ द्रष्टुं त्वां कांक्षते राजा सर्वराक्षसपुंगवः ॥ गमने क्रियतां बुद्धिर्भ्रातरं संप्रहर्षय ॥ ९० ॥ कुंभकर्णस्तु दुर्धर्षो भ्रातुराज्ञाय शासनं ॥ तथेत्युक्त्वा महावीर्यः शयनादुत्पपात ह ॥ ९१ ॥

८५ ॥ ८६ ॥ तत्रैव स्थितो युद्धाय निर्यातु ॥ आहोस्विदिहागतं द्रक्ष्यसे ॥ ८७ ॥ पूज्यतां स इति शेषः ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥

१०॥११॥प्रकृत्येति-स्वभावतःपराभिभवसामर्थ्यवान्॥१२॥१३॥१४॥१५॥१६॥१७॥विजज्वालरुधिरप्र

॥तेनदेवायुधिदानवाश्चयक्षाभुजंगाःपिशिताशनाश्च॥गंधर्वविद्याधरपन्नगाश्चसहस्र
शोराघवसंप्रभग्नाः॥१०॥शूलपाणिंविरूपाक्षंकुंभकर्णंमहाबलं॥हंतुंनशेकुस्त्रिदशाः
कालोयमितिमोहिताः॥११॥प्रकृत्यात्वेषतेजस्वीकुंभकर्णोमहाबलः॥अन्येषांराक्षसेंद्रा
णांवरदानकृतंबलं॥१२॥बालेनजातमात्रेणक्षुधार्त्तेनमहात्मना॥भक्षितानिसहस्राणि
प्रजानांसुबहून्यपि॥१३॥तेषुसंभक्ष्यमाणेषुप्रजाभयनिपीडिताः॥यांतिस्मशरणंश
क्रंतमप्यर्थंन्यवेदयन्॥१४॥सकुंभकर्णंकुपितोमहेंद्रोजघाननवज्रेणशितेनवज्री॥
सशक्रवज्राभिहतोमहात्माचचालकोपाच्चभृशंननाद॥१५॥तस्यनानद्यमानस्यकुंभ
कर्णस्यरक्षसः॥श्रुत्वानिनादंवित्रस्ताःप्रजाभूयोवितत्रसुः॥१६॥ततःक्रुद्धोमहेंद्रस्यकुं
भकर्णोमहाबलः॥निःकृष्यैरावताद्दंतंजघानोरसिवासवं॥१७॥कुंभकर्णप्रहारार्त्तोविज
ज्वालसवासवः॥ततोविषेदुःसहसादेवाब्रह्मर्षिदानवाः॥प्रजाभिःसहशक्रश्चययौ-
स्थानंस्वयंभुवः॥१८॥

वाहैर्ज्वालाव्याप्तइवबभूव॥१८॥ श्रीरामअयोध्यानाथायनमः॥ श्रीरामत्रैलोक्यनाथाय

६६ क० ५५ इतिश्रीरामाभिरामेश्रीरा० रा० ति० यु० षष्टितमः सर्गः ॥६०॥ ततोराम इति ॥१॥ पर्वताकारदर्शनंयस्य

तमद्रिशृंगप्रतिमंकिरीटिनंस्पृशंतमादित्यमिवात्मतेजसा ॥ वनौकसः प्रेक्ष्यविवृद्धमद्भुतंभयार्दिता
दुद्रुविरेयतस्ततः ॥६६॥ इत्यार्षेश्रीरा० यु० षष्टितमः सर्गः ॥६०॥ ततोरामोमहातेजाधनुरादायवीर्य
वान् ॥ किरीटिनंमहाकायंकुंभकर्णंददर्शह ॥१॥ तंदृष्ट्वाराक्षसश्रेष्ठंपर्वताकारदर्शनं ॥ क्रममाण
मिवाकाशंपुरानारायणंयथा ॥२॥ सतोयांबुदसंकाशंकांचनांगदभूषणं ॥ दृष्ट्वापुनः प्रदुद्राववान
राणांमहाचमूः ॥३॥ विद्रुतांवाहिनींदृष्ट्वावर्धमानंचराक्षसं ॥ सविस्मितमिदंरामोविभीषणमु
वाचह ॥४॥ कोसौपर्वतसंकाशः किरीटीहरिलोचनः ॥ लंकायांदृश्यतेवीरः सविद्युदिवतोयदः ॥५॥
पृथिव्यांकेतुभूतोसौमहानेकोत्रदृश्यते ॥ यंदृष्ट्वावानराः सर्वेविद्रवंतियतस्ततः ॥६॥ आचक्ष्व
सुमहान्कोसौरक्षोवायदिवासुरः ॥ नमयैवंविधंभूतंदृष्टपूर्वंकदाचन ॥७॥ संपृष्टोराजपुत्रेण
रामेणाक्लिष्टकर्मणा ॥ विभीषणोमहाप्राज्ञः काकुत्स्थमिदमब्रवीत् ॥८॥ येनवैवस्वतोयुद्धेवा
सवश्चपराजितः ॥ सैषविश्रवसः पुत्रः कुंभकर्णः प्रतापवान् ॥ अस्यप्रमाणसदृशोराक्षसो
न्योनविद्यते ॥९॥

तं दृष्ट्वायत्नोबभूवेतिशेषः ॥२॥ सतोयेतिसजलमेघसंकाशमित्यर्थः ॥३॥४॥ हरिलोचनः कपिलनेत्रः ॥५॥६॥७॥८॥ ९॥

पुनरपिरावण आहनमिथ्येति अनोयंस्वप्स्यत्येव· नसंशयः जाग्रणे· जागरणे गुणाभाव आर्षः का
लः कालनियमः॥२५॥ यण्मासंत्ववशंपशायितानन्नुनतोन्यूनं अधिकंतुननिवार्यतेन द्वीजंसुक्तंजागर
णंत्वेकाहमेवसत्पत्याहितेकार्ये इतिशेषः अतएवंइल्लोकजयायरावणस्यकुंभकर्णेनसहगमने
प्रथमदिनेमधुपुरेवासउक्तोद्वितीयदिनेकैलासे· यत्ररंभायांबलाद्रावणस्यप्रवृत्तिस्तदनंतरंकुं

नमिथ्यावचनश्चत्वंस्वप्स्यत्येषनसंशयः॥कालस्तुक्रियतामस्यशयनेजाग्रणेतथा॥२५॥राव
णस्यवचः श्रुत्वास्वयंभूरिदमब्रवीत्॥शयिताह्येषषण्मासमेकाहंजागरिष्यति॥२६॥एके
नाह्नात्वसौवीरश्चरन्भूमिंबुभुक्षितः॥व्यात्तास्योभक्षयेल्लोकान्संवृद्धइवपावकः॥२७॥सो
सौव्यसनमापन्नः कुंभकर्णमबोधयत्॥त्वत्पराक्रमभीतश्चराजासंप्रतिरावणः॥२८॥स
एषनिर्गतोवीरः शिबिराद्भीमविक्रमः॥वानरान्भृशसंक्रुद्धोभक्षयन्परिधावति॥२९॥कुंभ
कर्णंप्रतीत्यैवहरयोद्यप्रदुद्रुवुः॥कथमेनंरणेक्रुद्धंवारयिष्यंतिवानराः॥३०॥

भकर्णस्तदु
त्थात्मानानाप्रहरणोद्यत इत्यादिनीततीयदिवसादिषुयुद्धमुक्तं तेनयुद्धप्रसंगेनेकदिनमपि
जागरणंप्रतीयते॥२६॥२७॥ इदानींतस्याऽकालेबोधननिमित्तमाह· सोसाविति॥२८॥ शिबिरा
त्स्वगृहात्भक्षयन् हेनौशता· भक्षणार्थमित्यर्थः॥२९॥ पुनारामः पृच्छतिकथमेनमिति॥३०॥ राम

१९ नित्यशः प्रतिदिनं ॥ २० ॥ रक्षांस्यावाहयामास गायत्रीलक्षणेन मंत्रेणाजुहावेत्यर्थः ॥ २१ ॥ आश्वस्तो जातवि
स्रंभः परमसंभ्रांत इति यावत् ॥ २२ ॥ पौलस्त्येन विश्रवसा । मतकल्पशयिष्यसे इति । अयं शापः स्वप्तुं वर्षा
ण्यनेकानि देवदेवममेप्सितं । एवमस्त्विति तं चोक्त्वा प्रत्यृष्यास्ते दिवौकस इति । तपश्चर्यानंतरं प्रार्थना

कुंभकर्णस्य दौरात्म्यं शशंसुस्ते प्रजापतेः ॥ प्रजानां भक्षणं चापि धर्षणं च दिवौकसां ॥ आश्रमध्वं
सनं चापि परस्त्रीहरणं तथा ॥ १९ ॥ एवं प्रजा यदि त्वेष भक्षयिष्यति नित्यशः ॥ अचिरेणैव कालेन शू
न्यो लोको भविष्यति ॥ २० ॥ वासवस्य वचः श्रुत्वा सर्वलोकपितामहः ॥ रक्षांस्यावाहयामास कुंभ
कर्णं ददर्श ह ॥ २१ ॥ कुंभकर्णं समीक्ष्यैव वितत्रास प्रजापतिः ॥ कुंभकर्णमथाश्वस्तः स्वयंभू
रिदमब्रवीत् ॥ २२ ॥ ध्रुवं लोकविनाशाय पौलस्त्येनासि निर्मितः ॥ तस्मात्त्वमद्य प्रभृति मतकल्पः
शयिष्यसि ॥ २३ ॥ ब्रह्मशापाभिभूतोथ निपपाताग्रतः प्रभोः ॥ ततः परमसंभ्रांतो रावणो वाक्य
मब्रवीत् ॥ प्रवृद्धः कांचनो वृक्षः फलकाले निकृत्यते ॥ न नप्तारं स्वकं न्याय्यं शप्तुमेवं प्रजापते ॥ २४ ॥

लब्धबहुवार्षिकनिद्रासमनंतरकाल इति बोध्यं । मतकल्पः शयिष्य इति शापस्य तपश्चर्याद्यसंभ
वात् । पूर्वं जातमात्रेण तु क्रिस्कृत तपो विशिष्टतया जातमात्रेणोत्पर्थिका ॥ २३ ॥ प्रवृद्धः प्रवर्धित इत्य
र्थः । कांचनः फलकः फलकाले कांचनरूपफलप्राप्तिकाले निकृत्यते छिद्यते । साक्षात्स्वकं नप्तारमेवं श

उत्तरा ॥ १८ ॥

शैलोद्यतेति उद्यतशैलंवृक्षहस्तंच गिरेःसमीपानुगतं पर्वताग्रवर्त्तिलंकायाःपरितोवर्त्तमानत्वात्
त्वंमहत्त्वमहादेशव्यापिसंस्थानवत्॥३५॥क०॥५६॥ इतिश्रीरामाभिरामेश्रीरा०रा०ति०युद्ध०एक

ततोहरीणांतदनीकमुग्रंरराजशैलोद्यतवृक्षहस्तं॥गिरेःसमीपानुगतंयथैवमहन्महां
भोधरजालमुग्रं॥३५॥ इत्यार्षेश्रीरामायणेयुद्धकांडेएकषष्टितमःसर्गः॥६१॥ सतुरा
क्षसशार्दूलोनिद्रामदसमाकुलः॥राजमार्गंश्रियाजुष्टंययौविपुलविक्रमः॥१॥राक्षसानां
सहस्रैश्चवृतःपरमदुर्जयः॥गृहेभ्यःपुष्पवर्षेणकीर्यमाणस्तदाययौ॥२॥सहेमजालवि
ततंभानुभास्वरदर्शनं॥ददर्शविपुलंरम्यंराक्षसेंद्रनिवेशनं॥३॥सतंतदासूर्यइवाभ्रजा
लंप्रविश्यरक्षोधिपतेर्निवेशं॥ददर्शदूरेग्रजमासनस्थंस्वयंभुवंशक्रइवासनस्थं॥४॥
भ्रातुःसभवनंगत्वारक्षोगणसमन्वितः॥कुंभकर्णःपदन्यासैरकंपयतमेदिनीं॥५॥सोभिग
म्यगृहंभ्रातुःकक्षामभिविगाह्यच॥ ददर्शोद्विग्नमासीनंविमानेपुष्पकेगुरुं॥६॥

कक्षामभिविगाह्य॥६॥

षष्टितमःसर्गः॥६१॥ अथरावणेनकुंभकर्णनियोजनंसत्विति॥१॥गृहेभ्यःतत्तद्गृहवर्त्तिस्त्रीरक्षो
भ्यःनिर्गतेनेतिशेषः॥२॥भानुवत्सूर्यवत्भास्वरंदर्शनंयस्यतत् भानुभिःसूर्यकिरणैर्भास्वरंद
र्शनंयस्येतिचरत्नेषुसूर्यकिरणसंबंधादधिकतेजोवत्त्वंगृहस्येतिभावः इदमेवयुक्तं॥३॥४॥५॥

विभीषणउत्तरमाह उच्यतामिति· समुच्छ्रितं· रावणेनमाययाविभीषिकार्थेनिर्मितंकिंचिद्यंत्रमात्रंअतो नकिंचिदेतदित्येववानराउच्यतांमयास्वामिभिश्चनतुरावणानुजत्वादीकमित्यर्थः एवंचकार्यसिद्धिरित्याह इतीति· इहएनस्मिन्विषये॥३१॥हेतुमत्युक्तिमत्सुमुखोक्तंवानरलोकस्यसौमुख्यसंपाद

उच्यतांवानराःसर्वेयंत्रमेतत्समुच्छ्रितं॥इतिविज्ञायहरयोभविष्यंतीहनिर्भयाः॥३१॥विभीषणवचःश्रुत्वाहेतुमत्सुमुखोक्तं॥उवाचराघवोवाक्यंनीलंसेनापतिंतदा॥३२॥गच्छसैन्यानिसर्वाणिव्यूह्यतिष्ठस्वपावके॥द्वाराण्यादायलंकायांचर्याश्चाप्यथसंक्रमान्॥३३॥शैलशृंगाणिवृक्षांश्चशिलाश्चाप्युपसंहरन्॥भवंतःसायुधाःसर्वेवानराःशैलपाणयः॥३४॥राघवेणसमादिष्टोनीलोहरिचमूपतिः॥शशाससवानरानीकंयथावत्कपिकुंजरः॥३५॥ततोगवाक्षःशरभोहनूमानंगदस्तथा॥शैलशृंगाणिशैलाभागृहीत्वाद्वारमभ्ययुः॥३६॥रामवाक्यमुपश्रुत्यहरयोजितकाशिनः॥पादपैरर्दयन्वीरावानराःपरवाहिनीं॥३७॥

नायोक्तमुपदिष्टंवचःप्रागुक्तंश्रुत्वानीलंप्रतिवाक्यमुवाच॥३२॥यथापूर्वंद्वारनिरोधेनियुंक्ते गच्छेति॥३३॥शैलशृंगादीन्युपसंहरन्उपसंहरंतःसचिन्वंतोभवंतस्तिष्ठंत्विति॥३४॥३५॥३६॥रामवाक्यंयंत्रमात्रमिदमित्येवंरूपंजितकाशिनोनिर्भयाःपरवाहिनींपुराद्बहिःपुरीपरिसररक्षणींराक्षससेनामित्यर्थः॥३७॥

सुमहान्कालोगत इतिशेषः मयासेमंआगमनानंतरमिति भावः सुमहानित्यनेनब्रह्मकृतावधिभूतषण्मासादप्यधिकः कालोगतस्सूच्यते शयिनाद्येषषण्मासानेकाहंजागरिष्यत इतितुषण्मासादर्वाक्जागरणाभावपरं मंत्रंकृत्वाप्रसुप्तोयमितस्त्वनवमेह्नीनिपद्यंतुप्रवृत्तिपरं तत्राहुःपदंमासपरंवेत्युक्तं अन्यथाषण्मासादर्वाक्कदापिजागरणाभावेनतावत्कालस्यतत्स्वापेनियय

अयंतेसुमहान्कालःशयानस्यमहाबल॥ सुषुप्तस्त्वंनजानीषेममरामकृतंभयं॥१३॥
एषदाशरथिःश्रीमान्सुग्रीवसहितोबली॥ समुद्रंलंघयित्वातुकुलंनःपरिकृंतति॥१४॥
हतंपश्यस्वलंकायांवनान्युपवनानिच॥ सेतुनासुखमागत्यवानरैकार्णवंकृतं॥१५॥ ये
राक्षसामुख्यतमाहतास्तेवानरैर्युधि॥ वानराणांक्षयंयुद्धेनपश्यामिकथंचन॥१६॥

तत्वात्ततोर्वाक्मासद्वयादिमध्येएतन्प्रवृत्तौसुमहानित्युक्तेरसंगतत्वापत्तेः अनेनसंत्रंकृत्वासुप्तस्याष्टनवमासरूपःकालोगतइतिगम्यते अनेनापियुद्धस्यषण्मासाधिककालव्यापितासूचिताभवतीतिज्ञायते॥१३॥१४॥ स्वलंकायां-स्वीयद्वीपेवानरैकार्णवंकृतं-वानरमयैकार्णववत्कृतं॥१५॥ वानराणांक्षयंनपश्यामिनित्यतुक्षयःयुद्धेमदीयैरक्षोभिर्जितपूर्वाअपिनदृश्यते॥१६॥

द्वाराणितीर्त्वाउपस्थितंप्राप्तं॥७॥८॥समुदितोत्पत्यसरावणःमुदितःसमुत्पत्यासनादुत्थायेत्यर्थःसं
धिरार्षः॥९॥१०॥क्रोधात्अकालेउद्बोधनंकोपात्कोपादितिपाठांतरं·तदेवदर्शयति·किमर्थमिति

अथदृष्ट्वादशग्रीवःकुंभकर्णमुपस्थितं॥तूर्णमुत्थायसंहृष्टःसन्निकर्षमुपानयत्॥७॥अथा
सीनस्यपर्यंकेकुंभकर्णोमहाबलः॥भ्रातुर्ववंदेचरणौकिंकृत्यमितिचाब्रवीत्॥८॥पुनः
समुदितोत्पत्यरावणःपरिषस्वजे॥सभ्रात्रासंपरिष्वक्तोयथावच्चाभिनंदितः॥९॥कुंभकर्णःशु
भंदिव्यंप्रतिपेदेवरासनं॥सतदासनमाश्रित्यकुंभकर्णोमहाबलः॥१०॥संरक्तनयनःक्रोधा
द्रावणंवाक्यमब्रवीत्॥किमर्थमहमादृत्यत्वरायोजन्प्रबोधितः॥११॥शंसकस्माद्भयंतेत्रको
वाप्रेतोभविष्यति॥भ्रातरंरावणःक्रुद्धंकुंभकर्णमवस्थितं॥रोषेणपरिवत्ताभ्यांनेत्राभ्यांवा
क्यमब्रवीत्॥१२॥

आदृत्ययत्नंकृत्वा॥११॥प्रेतोभविष्यति·मयानिहतइतिशेषः·रोषेणेषत्परिवृत्ताभ्यांनेत्राभ्यामुप
लक्षितंकुंभकर्णमिदंवाक्यमब्रवीत्॥१२॥

प्रजहासच॰ विभीषणवचोनंगीकारफलंप्राप्तंदुरात्मनेतिहासः॥१॥तदेवप्रकाशयति॰ दृष्ट इति॰ मंत्रविनिर्णयेविभीषणेनसह मंत्रविचारकालेहितेषुहितत्वादिषुअनभियुक्तेन॰ अस्मद्घानेन॰ सोयमासादितःमयाविभीषणेनचदृष्टः सर्वनाशप्राप्तिरूपदोषइत्यर्थः॥२॥लोकेत्वमेण दोषंपुरुषाःप्रपद्यंते॰ त्वांत्वत्युत्कटैः पुण्यपापैरिहैवफलमश्नुतइतिन्यायेनशीघ्रमेवपरदा

तस्यराक्षसराजस्यनिशम्यपरिदेवितं॥कुंभकर्णोबभाषेदंवचनंप्रजहासच॥१॥
दृष्टोदोषोहियोस्माभिःपुरामंत्रविनिर्णये॥हितेष्वनभियुक्तेनसोयमासादितस्त्वया॥२॥शीघ्रंखल्वभ्युपेतंत्वांफलंपापस्यकर्मणः॥निरयेष्वेवपतनंयथादुष्कृतकर्मणः॥३॥प्रथमंवैमहाराजकृत्यमेतदचिंतितं॥केवलंवीर्यदर्पेणनानुबंधोविचारितः॥४॥

रग्रहणारूपदुष्कर्मणः फलंप्राप्तमित्याह शीघ्रमिति॰ अभ्युपेतं॰ प्राप्तंजातं॰ यथायस्यप्रथमं निरयेष्वेवपतनंतद्वत्॥३॥प्रथमंएतत्कृत्यंसर्वनाशप्राप्तिरूपंकेवलंवीर्यदर्पेणनचिंतितं॥ अनुबंधोदोषोत्पादोपिनविचारितः॥इदंदुष्कर्मतस्यचैवंफलंभावीतिद्वयमपि नविचारितमित्यर्थः॥दोषोत्पादोनुबंधःस्यादित्यमरः॥४॥ राम अ

१७॥सर्वेदत्तपिताःनाशिताःकोशाऐश्वर्याणि।यस्पतंमामभ्युपपद्यानुगत्यत्रायस्व॥१८॥१९॥परासंभावना
कार्यसिद्धिप्रत्याशामेत्वय्यस्तीतिशेषःप्रतिव्यूह्यप्रातिभयंकृत्वा॥२०॥वीर्यमातिष्ठवीर्यमवलं

तदेतद्भयमुत्पन्नंत्रायस्वेहमहाबल॥नाशयत्वमिमानद्यतदर्थंबोधितोभवान्॥१७॥स
र्वेत्तपितकोशंचसत्वमभ्युपपद्यमां॥त्रायस्वेमांपुरींलंकांबालवृद्धावशेषितां॥१८॥भ्रातुर
र्थेमहाबाहोकुरुकर्मसुदुष्करं॥मयैवंनोक्तपूर्वोहिभ्राताकश्चित्परंतप॥१९॥त्वय्यस्तिमम
चस्नेहःपरासंभावनाचमे॥देवासुरेषुयुद्धेषुबहुशोराक्षसर्षभ॥त्वयादेवाःप्रतिव्यूह्यनि
र्जिताश्चामरायुधि॥२०॥तदेतत्सर्वमातिष्ठवीर्यंभीमपराक्रम॥नहितेसर्वभूतेषुदृश्य
तेसदृशोबली॥२१॥कुरुष्वमेप्रियहितमेतदुत्तमंयथाप्रियंप्रियरणबांधवप्रिय॥
स्वतेजसाव्यथयसपत्नवाहिनींशरत्घनंपवनइवोद्यतोमहान्॥२२॥इत्यार्षेश्रीरामा॰
युद्ध॰द्विषष्टितमःसर्गः॥६२॥

बस्व॥२१॥हेप्रियरणहेबांधवप्रिययथाप्रियंस्वप्रीत्यनुसारेणप्रियहितमुत्तमंहितंकुरुष्व॥२२
कत०॥५१॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेद्विषष्टितमःसर्गः॥६२

एवंवर्त्तमानस्यप्रथमंबुद्धिसिद्धिःफलमित्याह॥यथागममितियथागमंनीतिशास्त्रमनतिक्रम्य
योराजासचिवैःसहसमयंचिकीर्षति·तयादिकालोचितसमादिकर्मविचारंउक्तपंचप्रकार
तत्प्रयोगसाधनसंपत्तिविचारंचकर्त्तुमिच्छति·तद्यथाआत्मोपचयपरहानिसमयेदंडोपयो
गियानं·आत्मपरयोर्बलसाम्येसंधानं·परोपचयात्महानिसमयेदानपूर्वंसमाश्रयण
मितिबुध्वास्वबुध्यासचिवैः॥सहसुहृदश्चानुपश्यति·अयंसुहृत्हितवक्ता·अयंप्रभोःसु

यथागमंचयोराजासमयंचचिकीर्षति॥बुध्यतेसचिवैर्बुध्यासुहृदश्चानुपश्यति॥८॥
धर्ममर्थंहिकामंवासर्वान्वारक्षसांपते॥भजतेपुरुषःकालेत्रीणिद्वंद्वानिवापुनः॥९॥

स्वमात्रजननेच्छयावदतिनसुहृदित्यनुपश्यतिकार्यवशेनविचारयतिसबुध्यतेकर्त्त
व्याकर्त्तव्यविवेकबुद्धिंप्राप्नोति॥८॥अथबुद्धिफलंपुरुषार्थसिद्धिरित्याह·धर्ममितिहि
श्चार्थे·कालेतत्रप्रातःधर्मसेवा·ततअपराह्णेअर्थसेवारात्रौकामसेवेतिस्वस्वकालेत्रीणि
धर्मादीनीभजतेयुवराजादिस्तुद्वंद्वानिवाद्वंद्वान्येव·धर्मकामद्विकान्येवभजतेअवांतरभे
दाद्वंद्वत्वं।सेवनइत्यर्थः॥९॥

पूर्वकार्याणि· पूर्वकर्त्तव्यकार्याणि यः पश्चात्कुर्यात्तथोत्तरकार्याणि च पूर्वं स नयानयौ न वेद· अत्र पूर्वकार्यविचारः पश्चात्कार्यं सीताहरणं ॥५॥ तदेव प्रपंचयति· देशेति· उचितदेशकालरहितानि विपरीतकालदेशायुक्तानि त्वत्कृते त्कर्मवत् दुष्यंति दुःखाय भवंति· अप्रयतेषु असावधानेषु असंस्कृतेष्वग्निषु च हवींषीव ॥६॥ अथ यथाकालदेशप्रयुक्तात्सिद्धिमाह· त्रयाणामिति· क्षयवृद्धिस्था

यः पश्चात्पूर्वकार्याणि कुर्यादैश्वर्यमास्थितः ॥ पूर्वं चोत्तरकार्याणि न स वेद नयानयौ ॥५॥
देशकालविहीनानि कर्माणि विपरीतवत् ॥ क्रियमाणानि दुष्यंति हवींष्यप्रयतेष्विव ॥६॥
त्रयाणां पंचधा योगं कर्मणां यः प्रपद्यते ॥ सचिवैः समयं कृत्वा स सम्यग्वर्त्तते पथि ॥७॥

नलक्षणानां निश्चयपूर्वकर्त्तव्यानां कर्मणां सामादीनां योगं प्रयोगं सचिवैः सह पंचधा पंचप्रकारं समयं प्रयोगसाधनविचारं कृत्वा यः प्रपद्यते स सम्यक् पथि वर्त्तते समीचीनेन नीतिमार्गे वर्त्तते तानि पंचप्रकारसाधनानि· कर्मणामारंभोपायः ॥१॥ पुरुषद्रव्यसंपत् ॥२॥ देशकालविभागः ॥३॥ विपत्तिप्रतीकारः ॥४॥ कार्यसिद्धिश्चेति ॥५॥ सम्यगित्यव्ययं ॥७॥

अथोत्तममंत्रिविभीषणादिमतमपहायदुर्मंत्रिभिर्मंत्रणमूलः सर्वानर्थइत्याह । अनभिज्ञायेति · प्रागल्भ्यात् · शब्दरचनामात्रसामर्थ्यात् · ॥ अशास्त्रविदुषामित्यस्यैवव्याख्या अर्थशास्त्रानभिज्ञानामिति · अथापिविपुलांश्रियंकेवलंहठादेवेकृतांवचनंनकार्यमित्यन्वयः ॥१४॥१५॥ राजभिर्मंत्र

अनभिज्ञायशास्त्रार्थान्पुरुषाः पशुबुद्धयः ॥ प्रागल्भ्याद्वक्तुमिच्छंतिमंत्रिष्वभ्यंतरीकृताः ॥
॥१४॥ अशास्त्रविदुषांतेषांकार्यंनाभिहितंवचः ॥ अर्थशास्त्रानभिज्ञानांविपुलांश्रियमिच्छतां ॥१५॥
अहितंचहिताकारंधार्ष्ट्याज्जल्पंतियेनराः ॥ अवश्यंमंत्रवाह्यास्तेकर्त्तव्याःकृत्यदुषकाः ॥१६॥
विनाशयंतोभर्त्तारंसहिताःशत्रुभिर्बुधैः ॥ विपरीतानिकृत्यानिकारयंतीहमंत्रिणः ॥१७॥

कालेदुर्मंत्रिनिरासः सर्वथाकार्य इत्याह · अहितंचेति · धार्ष्ट्यात् साहसाच्चेजल्पंतितेमंत्रबाह्याः अवश्यंकर्त्तव्याः ॥१६॥ विनाशयंतइतिकेचनदुर्मंत्रिणः भर्त्तारंत्वांनाशयंतः हेतौशतातवनाशनिमित्तंविपरीतानिकृत्यानिकारयंति · केचित्सुमंत्रिणोदुर्मंत्रफलंनविनाशंपश्यंतः बुधैः सर्वज्ञैस्तवशत्रुभिः सहिताः स्वरक्षणंकुर्वंतीतिशेषः ॥१७॥ अ

अथधर्मविरुद्धेकामेप्राप्तेधर्मएवसेव्यइत्याहत्रिष्विति·एतेषुत्रिषुधर्मादिषुसर्वमूलत्वाच्चश्रेष्ठं
धर्मरूपंवस्तुतदाप्तेभ्यःश्रुत्वापिनावबुध्यतेविरोधेधर्मस्यैवानुष्ठेयत्वंनचबुध्यतेयोराममहारा
जोराजमात्रोयुवराजःतस्यैवदुःश्रुतंव्यर्थं·॥१०॥सत्वंसामएवदानादिचतुष्कयोगंउरूपंच

त्रिषुचैतेषुयच्छ्रेष्ठंश्रुत्वातन्नावबुध्यते॥राजावाराजामात्रोवाव्यर्थंतस्यबहुश्रुतं॥१०॥
उपप्रदानंसांत्वंचभेदंकालेचविक्रमं॥योगंचरक्षसांश्रेष्ठतावुभौचनयानयौ॥११॥काले
धर्मार्थकामान्यःसंमंत्र्यसचिवैःसह॥निषेवेतात्मवान्लोकेनसव्यसनमाप्नुयात्॥१२॥
हितानुबंधमालोक्यकुर्यात्कार्यमिहात्मनः॥राजासहार्थतत्वज्ञैःसचिवैर्बुद्धिजीविभिः
॥१३॥

विधप्रयोगसाधनसंपादनंतावुभौनयानयौ·प्रसिद्धौप्रयोगाप्रयोगकालौधर्मादींश्चकाले
सचिवैःसहसंमंत्र्यात्मवान्जितेंद्रियोभूत्वानिषेवतेअनुतिष्ठतिसव्यसनंनाप्नुयात्॥११॥१२॥
किंचसएवराजापिभवतीत्याहःहितानुबंधमिति·यउच्यमानगुणैःसचिवैःसहहितानुबंधंशु
भमुदर्कफलमालोक्यविचार्यआत्मनःकार्यंकुर्यात्सराजाभवतीत्यन्वयः॥१३॥ ॥

अहंत्वगुरुरिवनिषेककर्त्तेवआचार्यइव·द्वितीयजन्मदइवचमान्यः एवंवाक्श्रमंकृत्वाकिंफलेन
किमपिअतोत्रकालेयद्युक्तंतद्विधीयतां॥२३॥किंचत्वदुक्तंसत्यमेवतथापिगतेजलेसेतुबंधवदे
षाकथाव्यर्थेत्यनुशेयमतिंनुदेत्याह·विभ्रमादितिविभ्रमोविपरीतज्ञानंचित्तमोहोऽज्ञानंतदादि
दोषेणयुष्मदुक्तंहितंतत्कालेनाभिपन्नंनांगीकृतमिदानीमतीतकालस्यपुनःकथाव्यर्थेत्यर्थः॥२४॥

मान्योगुरुरिवाचार्यःकिंमांत्वमनुशाससि॥किमेवंवाक्श्रमंकृत्वायद्युक्तंतद्विधीयतां॥२३॥
विभ्रमाच्चित्तमोहाद्वाबलवीर्याश्रमेणवा॥नाभिपन्नमिदानींयद्व्यर्थातस्यपुनःकथा॥२४॥
अस्मिन्कालेतुयद्युक्तंतदिदानींविचिंत्यतां॥ममापनयजंदुःखंविक्रमेणसमीकुरु॥२५॥
यदिखल्वस्तिमेस्नेहोविक्रमंवाधिगच्छसि॥यदिकार्यंममैतत्तेहृदिकार्यतमंमतं॥२६॥स
सुहृद्योविपन्नार्थंदीनमभ्युपपद्यते॥सबंधुर्योपनीतेषुसाहाय्यायोपकल्पते॥२७॥

यदेवमतोस्मिन्निति· अपनयजं·अनीतिजं·विक्रमेणस्वीयेन॥२५॥विक्रमंवेत्यस्यस्वस्मिन्नित्यादि
एतत्कार्यंयुद्धानुष्ठानरूपंयदिकार्यतमंअतिशयेनानुष्ठातुंयोग्यंकार्यमितितवसंमतंतदा
युद्धंकुर्विंतिसंबंधः॥२६॥किंचयदिसुहृत्त्वंतदाऽवश्यमेवेदंकार्यमित्याहसइतिविपन्नार्थेविन
ष्टसर्वकार्यंअतएवदीनंअभ्युपपद्यतेऽनुगृह्णातिसएवसुहृत्·बंधुत्वेप्येतदेवंन्यायमित्याह·

सइति·अपनीतेषुअनीनमार्गस्थेषु॥२७॥

सुमंत्रित्वदुर्मंत्रित्वनिर्णयः कथं तत्राह नानिति· मंत्रनिर्णये चिकीर्षितो तान् मित्रसंकाशान् अमि
त्रान् उपसंहितान् उत्कोचादिना शत्रुवशीकृतान् संचिवसंकाशान्· व्यवहारेण तत्तन्मंत्रजार्थक्रिया
लक्षणाव्यवहारेण जानीयात् ॥१८॥ चपलस्य आपातसुखजनकवचनसंतुष्टस्य· सहसा अवि

तान्भर्त्ता मित्रसंकाशान् अमित्रान्मंत्रनिर्णये। व्यवहारेण जानीयात्सचिवानुपसंहितान्
॥१८॥ चपलस्येह कृत्यानि सहसानुप्रधावतः॥ छिद्रमन्ये प्रपद्यंते क्रौंचस्य खमिव द्विजाः॥१९॥
यो हि शत्रुमवज्ञाय आत्मानं नाभिरक्षति॥ अवाप्नोति हि सोनर्थान् स्थानाच्च व्यवरोप्यते॥२०॥
यदुक्तमिह ते पूर्वं प्रियया मेनुजेन च॥ तदेव नो हितं वाक्यं यदिच्छसि तथा कुरु॥२१॥ तत्तु श्रु
त्वा दशग्रीवः कुंभकर्णस्य भाषितं॥ भ्रुकुटिं चैव संचक्रे क्रुद्धश्चैनमभाषत॥२२॥ अ

चारेण कृत्यानि अनुप्रधावतः कुर्वतः अन्ये शत्रवः छिद्रं रंध्रं प्रपद्यंते द्विजाः पक्षिणः स्कंदश
क्ति विदारित क्रौंचस्य क्रौंचाख्याचलस्य खं रंध्रमिव ॥१९॥ अवज्ञाय· अवमत्य· स्थानात् राजपद
व्याः व्यवरोप्यते निवर्त्यते ॥२०॥ प्रियया मंदोदर्या मेनुजो विभीषणः समानार्थे च तयोर्वाक्ये इ
ति मंदोदरीवाक्यं न पथ्यमुक्तं· स्वमतिसदृशमतित्वान्मेनुज इत्युक्तं ॥२१॥ २२॥ ॥

३७॥३८॥दाशरथिंजिघांसुभिरस्माभिःपरिसांत्वितोपिकथंव्यथसे॥३९॥४०॥व्यथाहेतुर्नास्तीत्याह

अद्यशोकपरीतानांस्वबंधुवधशोचिनां॥शत्रोर्युधिविनाशेनकरोम्यश्रुप्रमार्जनं॥३७॥
अद्यपर्वतसंकाशंससूर्यमिवतोयदं॥विकीर्णंपश्यसमरेसुग्रीवंप्लवगेश्वरं॥३८॥कथं
चराक्षसैरेभिर्मयाचपरिसांत्वितः॥जिघांसुभिर्दाशरथिंव्यथसेत्वंसदानघ॥३९॥मांनिह
त्यकिलत्वांहिनिहनिष्यतिराघवः॥नाहमात्मनिसंतापंगच्छेयंराक्षसाधिप॥४०॥कामं
त्विदानीमपिमांव्यादिशत्वंपरंतप॥नपरःप्रेक्षणीयस्तेयुद्धायातुलविक्रम॥४१॥अह
मुत्सादयिष्यामिशत्रूंस्तवमहाबलान्॥यदिशक्रोयदियमोयदिपावकमारुतौ॥४२॥
तानहंयोधयिष्यामिकुबेरवरुणावपि॥गिरिमात्रशरीरस्यशितशूलधरस्यमे॥४३॥न
र्दतस्तीक्ष्णदंष्ट्रस्यबिभियाद्वैपुरंदरः॥अथवात्यक्तशस्त्रस्यमृद्नतस्तरसारिपून्॥४४॥न
मेप्रतिमुखःकश्चित्स्थातुंशक्तोजिजीविषुः॥नैवशक्त्यानगदयानासिनानैःशितैःशरैः॥४५॥ह युभिः
स्ताभ्यामेवसंरब्धोहनिष्यामिसवज्रिणं॥यदिमेमुष्टिवेगंसराघवो[illegible]द्यसहिष्यति
॥४६॥

मामिति॰मांनिहत्यतदनंतरंकिलत्वांनिहनिष्यति॰तत्रममैवहननंतेनाशक्यं॰अतएवाह॰
नात्मनिस्वविषयेसंतापंरामविषयंभयंनगच्छेयं॥४१॥४२॥४३॥४४॥४५॥४६॥

धीरदारुणांइच्छाचेत्कुर्वितुमुक्तेधीरत्वंससुत्वद्यइत्युक्तेदारुणत्वं॥२८॥२९॥सतामुपपद्य-प्राप्यअलंतापेन
कार्यइत्यर्थः॥३०॥एतत्दैन्यं-यत्कृतेयन्निमित्तं॥३१॥सर्वावस्थांसुखदुःखादिसर्वावस्थांगतंप्राप्तंत्वांप्र

तमथैवंब्रुवाणंसवचनंधीरदारुणं॥रुष्टोयमितिविज्ञायशनैःश्लक्ष्णमुवाचह॥२८॥अतीव
हिसमालक्ष्यभ्रातरंक्षुभितेंद्रियं॥कुंभकर्णःशनैर्वाक्यंबभाषेपरिसांत्वयन्॥२९॥शृणुराज
न्नवहितोममवाक्यमरिंदम॥अलंराक्षसराजेंद्रसंतापमुपपद्यते रोषंचसंपरित्यज्यस्वस्थो
भवितुमर्हसि॥३०॥नैतन्मनसिकर्त्तव्यंमयिजीवतिपार्थिव॥तमहंनाशयिष्यामियत्कृतेप
रितप्यसे॥३१॥अवश्यंचहितंवाच्यंसर्वावस्थांगतंमया॥बंधुभावादभिहितंभ्रातृस्नेहाच्चपा
र्थिव॥३२॥सदृशंयत्तुकालेस्मिन्कर्त्तुंस्निग्धेनबंधुना॥शत्रूणांकदनंपश्यक्रियमाणंमयारणे
॥३३॥अद्यपश्यमहाबाहोमयासमरमूर्द्धनि॥हतेरामेसहभ्रात्राद्रवंतींहरिवाहिनीं॥३४॥अद्य
रामस्यतद्दृष्ट्वामयानीतंरणाच्छिरः॥सुखीभवमहाबाहोसीताभवतुदुःखिता॥३५॥अद्यराम
स्यपश्यंतुनिधनंसुमहत्प्रियं॥लंकायांराक्षसाःसर्वेयेतेनिहतबांधवाः॥३६॥ ॥ ॥

तीतिशेषः विस्मोरभक्तिकावस्थासर्वावस्थेतिगीयतइत्यन्ये॥३२॥यन्ममपराक्रमस्यसदृशं-अस्मि
न्कालेचस्निग्धेनबंधुनाकर्त्तुंयोग्यंतन्मयाक्रियमाणंशत्रूणांकदनंपश्य॥३३॥३४॥३५॥३६॥ अ

५७॥सममानः क॰॥५८॥इतिश्रीरामाभिरामेश्रीरा॰रा॰ति॰यु॰त्रिषष्टितमः सर्गः॥६३॥अथाविचारि
कारीरावणइतियदुक्तमसहायएवयोत्स्यामीतिचतदुभयंदूषयतिमहोदरइत्याह॰ तदिति॰ अति
कायस्यकुंभकर्णस्यतन्नतेनप्रकारेणोक्तंवचनंश्रुत्वामहोदरउवाच॥१॥कुलेमहाकुलेजातो
पिधृष्टोवलिप्तस्त्वंप्राकृतदर्शनःसन्सर्वत्रकर्मकर्त्तव्यंवेदितुंनशक्नोषि॥२॥नसवेदनयान

रमस्वराजन्पिबचाद्यवारुणींकुरुष्वकृत्यानिविनीयदुःखं॥मयाद्यरामंगमितेयम
त्वंचिरायसीतावशगाभविष्यति॥५७॥इत्यार्षेश्रीरामा॰युद्ध॰त्रिषष्टितमः सर्गः॥६३॥
तदुक्तमतिकायस्यबलिनोबाहुशालिनः॥कुंभकर्णस्यवचनंश्रुत्वोवाचमहोदरः॥१॥
कुंभकर्णकुलेजातोधृष्टःप्राकृतदर्शनः॥अवलिप्तोनशक्नोषिकृत्यंसर्वत्रवेदितुं॥२॥नहि
राजानजानीतेकुंभकर्णनयानयौ॥त्वंतुकैशोरकाद्धृष्टःकेवलंवक्तुमिच्छसि॥३॥स्था
नंवृद्धिंचहानिंचदेशकालविधानवित्॥आत्मनश्चपरेषांचबुध्यतेराक्षसर्षभः॥४॥

यावितिकुंभकर्णोक्तंदूषयति॰ नहीतिराजानयानयोरुचितकृत्याकृत्येनजानीतेइतिनकिंतुजानीत
एवेत्यर्थः॥त्वंतुकैशोरकाद्बाल्याद्धृष्टः सनेवंवक्तुमिच्छसि॰ केवलंकर्त्तुमिच्छसिइतिपाठेअसहाय
तयारामेणयुद्धमितिशेषः॥३॥राजातुसर्ववेत्तीत्याह॰ स्थानमिति॰ स्थानंवृद्धिक्षयराहित्येनयथाप्रा
प्तस्वरूपेवस्थानं॰॥आत्मनोवृद्धिंपरेषांहानिंचराजाबुध्यतेकिंचदेशकालविधानवित्देशका
लयोरुचितकर्त्तव्यवित्॥४॥

मेमुषिवेगंराघवोयदिसहिष्यतितदाराघवस्यबाणौघामेरुधिरंपास्यंतितत्सहनमेवतस्माशक्यमितिभावः
४७॥४८॥४९॥५०॥५१॥ इंद्रादिभ्योपियदिभयंतथापित्वासाधारणंयशोजयजंदातुमिच्छामि त्वद्वयहे

ततःपास्यंतिबाणौघारुधिरंराघवस्यमे॥ चिंतयातप्पसेराजन्किमर्थंमयितिष्ठति॥४८॥सो
हंशत्रुविनाशायतवनिर्यातुमुद्यतः॥सुंचरामाझ्यंघोरंनिहनिष्यामिसंयुगे॥४९॥राघवंल
क्ष्मणंचैवसुग्रीवंचमहाबलं॥हनूमंतंचरक्षोघ्नंयेनलंकाप्रदीपिता॥५०॥हरींश्चभक्षयिष्या
मिसंयुगेसमुपस्थितः॥असाधारणमिच्छामितवदातुंमहद्यशः॥५१॥यदिचेंद्राद्भयं
राजन्यदिवापिस्वयंभुवः॥अपिदेवाःशयिष्यंतेमयिक्रुद्धेमहीतले॥५२॥यमंचशम
यिष्यामिभक्षयिष्यामिपावकं॥आदित्यंपातयिष्यामिसनक्षत्रंमहीतले॥५३॥शतक्रतुंव
धिष्यामिपास्यामिवरुणालयं॥पर्वतांश्चूर्णयिष्यामिदारयिष्यामिमेदिनीं॥५४॥दीर्घ
कालंप्रसुप्तस्यकुंभकर्णस्यविक्रमं॥अद्यपश्यंतुभूतानिभक्ष्यमाणानिसर्वशः॥नन्विदंत्रि
दिवंसर्वमाहारोममपर्यंते॥५५॥वधेननेदाशरथेःसुखावहंसुखंसमाहर्तुमहंव्रजामि
निहत्यरामंसहलक्ष्मणेनखादामिसर्वान्हरियूथमुख्यान्॥५६॥

नवोदेवाइंद्रायोपिदमयि
क्रुद्धेमहीतलेशयिष्यंतिकिंपुनर्नरवानराइत्यर्थः॥५२॥५३॥वरुणालयंसमुद्रं॥५४॥५५॥सुखावहं
उत्तरमधिकसुखजनकंसुखं॥५६॥

तत्रपुरुषयत्नसाध्येष्वप्येषुधर्मार्थयोः कामात्कश्चिद्विशेषोस्तीत्याह निश्रेयसेति· धर्मार्थौ निश्रेयसफलावेवसंतौ कामनाविशेषेणनरावपिस्वर्गाभ्युदयफलावपिभवतः अत्रधर्मशब्देनार्थनिरपेक्षोजपध्यानादिः अर्थशब्देनचार्थसाध्योयागदानादिः यज्ञोदानंतपश्चैवपावनानिमनीषिणामितिभगवद्वचनात्तेषांचित्तशुद्धिद्वारामोक्षसाधनत्वमस्तिकामस्तुनकदापिनिश्रेयसफलइतिभावः तयोरपरमपि कामाद्विशेषमाह· अधर्मानर्थयोरितिजपादिरूपेक्रियामयेवानित्यधर्मेलुप्तेसतिअधर्मानर्थौप्रा

निश्रेयसफलावेवंधर्मार्थावितरावपि। अधर्मानर्थयोःप्राप्तंफलंचप्रात्यवायिकं ॥ ८॥
ऐहलौकिकपारक्यंकर्मपुंभिर्निषेव्यते। कर्माण्यपितुकल्यानिलभतेकाममास्थितः ॥ ९॥

प्तौभवतस्तयोश्चसतोः प्रात्यवायिकंविहिताकरणप्रयुक्तप्रत्यवायजन्यंफलंपुंसःप्राप्तंभवति नतुकाम्याकरणेप्रत्यवायइतिभावः ॥ ८॥ कीदृशंतत्फलंतत्राह ऐहलौकिकेति· इहलोकेपरत्रच· भवंकर्मकर्मफलं इहऋणदारिद्र्यादिरूपंपरत्रनरकयातनारूपंनिषेव्यतेअनुभुयते· एवंधर्मफलमपि· अथकामस्यधर्मार्थाभ्यांवैलक्षण्यमाह· कर्माणीति· कामंतत्पुरुषार्थसिद्धिमुद्दिश्यकर्माणिपयत्नेनास्थितोनुतिष्ठन्नपिकल्यानिशुभानितुविशिष्यअत्रापिसाक्षान्नलभते· नतुधर्मार्थवत्कालांतरेवा· एवंचधर्मार्थकामाएकैकेनैवसेव्याः धर्मविरुद्धोयदिकामस्तदासस्वतपोविक्रमादिनासमाधेयः नहिभिक्षुकाःसंतीतिस्थाल्योनाधिश्रियंतइतिन्यायादितिभावः ॥ ९॥

सर्वथाराज्ञोऽविवेकोनास्तीत्याहयत्त्वशक्यमिति·अनुपासितवृद्धेनातएवप्राकृतबुद्धिनाकेवलंबलवतायत्तुकर्त्तुंमशक्यंनादृशंकोबुधोराजाकुर्यान्नकोपि॥५॥एतावताप्रथमंवैमहाराजकृतमेतदविंतितंकेवलंवीर्यदर्पेणानानुबंधोविचारितइतिकुंभकर्णोक्तंदुषणंपरिहृतं॥अथत्रिषुचैतेषुयत्केऽसमित्यादिनाधर्मएवसेव्योनतुकामस्तद्विरुद्धइतियदुक्तंतत्राहयांस्त्विति·यांश्चधर्मादीन्पृथगाश्रयाधर्मादयःपरस्परविरुद्धानैकानुष्ठेयाइतिब्रवीषितान्धर्मादीन्स्वभावेनतत्त्वतोऽवबोद्धुनेलक्षणं

यत्त्वशक्यंबलवतावक्तुंप्राकृतबुद्धिना॥अनुपासितवृद्धेनकःकुर्यात्तादृशंनरः॥५॥यांस्तु
धर्मार्थकामांस्त्वंब्रवीषिपृथगाश्रयान्॥अवबोद्धुंस्वभावेननहिलक्षणमस्तितान्॥६॥
कर्मचैवहिसर्वेषांकारणानांप्रयोजनं॥श्रेयःपापीयसांचात्रफलंभवतिकर्मणाम्॥७॥

सामर्थ्यंनत्वस्ति॥६॥कुतइत्यत्रसर्वस्याप्येकानुष्ठेयत्वादेवेत्याह·कर्मचैवेतिसर्वेषांकारणानांसुखसाधनानांत्रिवर्गलक्षणानांकर्मैवप्रयोजनंप्रयोजकमुत्पादकं।नत्वक्रियस्यकश्चनपुरुषार्थोधर्मादिः॥एवमेकपुरुषयत्नसाध्यानांश्रेयःपापीयसांकर्मणांशुभाशुभव्यापाराणांफलमत्रैकस्मिन्नेवकर्त्तरिभवति·एवंचविरुद्धयोरपिधर्मकामयोरेकानुष्ठेयत्वदर्शनात्धर्मएवानुष्ठेयोनतुतद्विरुद्धकामइतित्वदुक्तमयुक्तंइतिभावः॥७॥

मर्थौतत्साधनीभूतेकर्मणी·। इतरौअधर्मानर्थौतत्साधनभूतेकर्मणीतियावत्निश्रेयसफलत्वादेवचतुर्विधकर्माण्यपिश्रेयस्कराण्येवेत्यर्थः किंतुकदाचिदधर्मानर्थयोःप्रात्यवायिकंप्रत्यवायकारणकंदुःखफलंसुखंप्राप्यतइतिप्राप्तिः॥ कर्मणिक्तिन्प्राप्यंभवतीत्यर्थः॥ एतेनाधर्मानर्थयोःसुखदुःखोभयफलत्वमुक्तं· धर्मार्थयोरव्यवस्थितफलमुक्त्वाकामस्याप्याहइहलौकिकेति·॥ इहलोकपरलोकोपयोगिकर्मधर्मार्थरूपंनिषेव्यनेनतत्फलंचानुभूयनेततथाकाममास्थितोपियक्तथेक्काचारोपिकल्याणिशुभानिकर्माणिकर्मफलानिलभते·। एवंचविहितमेवशुभदंनिषिद्धमशुभदमितिनियमोनेतिभावः एतत्पक्षानुसारेणैवसीताहरणंरावणेनकृतमस्माभिश्चानुमतमित्याह॥ तत्रेति· तथासति·॥ इदंकार्यंसीताहरणरूपंरात्वात्हृदिनिश्चित्तमस्माभिरनुमतंच·॥ किंचशत्रुविषयेरावणेनयत्साहसंकृतं· तत्किमिवनकिमिवनकिमपीत्यर्थः अत्रसाहसविषये· अपनीयतां· पृथक्कृत्यप्रदर्श्यतांअत्रपक्षेरावणेनाविचार्यकृतंकिमपिदर्शयितुंनशक्यमित्यर्थः इतिपंचश्लोकीव्याख्यानंतत्रधर्मात्दुःखस्याधर्मात्सुखस्यसर्वासंमतत्वात्यदपिउक्तंयागादौनांतरीयकंदुःखमितितन्नतस्यधर्मस्यफलंकिंतुप्राक्तकर्मांतरस्यैवएवमधर्मविषयेपि॥ अनयारीत्यासर्वंपलालप्रायतयादुष्यतांमतिमद्भिरित्यलं॥१०॥

इदानीमनभिज्ञायशास्त्रार्थमित्यादिनादुर्मंत्रिसंबंधस्त्याज्यइत्युक्तंतत्परिहरति· तत्रेति· तत्रत्रया
णांराज्ञानुष्ठेयत्वेसिद्धेसतिराज्ञाइदंकामपुरुषार्थसाधनंकार्यंकर्त्तुंयोग्यंतथान्हृदिकृत्तंनिश्चितंच·नो
स्माकंमंत्रिणांमतमनुमतंचबलवद्विषयेन्याय्यत्वस्योक्तत्वात्· अतोराज्ञिनास्माकस्तुचकिंचिदचातुर्यं·
अथसाहसप्रवृत्तिरूपंप्रागुक्तंदोषमुद्धरति· शात्रौहीति· शात्रौहिप्रसिद्धंसाहसंबलवतोबलात्प्रवृत्ति
रूपंअत्रैतदनुष्ठानेकिमिवापनीयतेकोपनयः नकोपिउचितमेवकृतमित्यर्थः॥१०॥ यत्तुतीर्थेनोक्तं
धर्माधर्मयोर्हिताहितसाधनत्वंनिश्चित्यपरदाराहरणरूपाधर्मान्नराज्ञोदुःखमित्युक्तंतद्धर्माध

तत्त्ररूपत्तमिदंराज्ञान्हृदिकार्यंमतंचनः॥शात्रौहिसाहसंयत्तत्किमिवात्रापनीयते॥१०॥

र्मयोर्हिताहितफलनियमाभावादसंगतमित्याह· यांस्कधर्मार्थेति· पृथगाश्रयान्· पृथक्फलज
नकान्वदसितास्वभावेनानुबोद्धुंस्वरूपतोज्ञातुंलक्ष्यतेनेनेतिलक्षणंकारणंप्रमाणंचनास्तिसुख
फलकयागादिधर्मानुष्ठानेपितात्कालिकशरीरायासदर्शनात्दुःखजनकपरदारगमनादावपिता
त्कालिकसुखदर्शनाच्चेतिभावःतदेवप्रदर्शयति· कर्मचेति· सर्वेषांकारणानांउद्देश्यत्वेनकारणानां
सुखानामित्यर्थः कर्मकर्ममात्रंप्रयोजनंप्रयोजकंसाधकमित्यर्थः अत्रास्मिन्पुण्यकर्मणिफलंभव
ति·अश्रेयोपीतिशेषः पापीयसांकर्मणांश्रेयः सुखंचफलंभवति· एतदेवविशदयतिनिःश्रेयसेतिध

रामा·यु·
१९०

हीनार्थौहीनबलोऽसहायःसन्कःपुमान्समृद्धार्थंससहायंजीवितत्यागेनिश्चितंस्वप्राणांस्त्याक
त्वशत्रुसंहारादिरूपोयोगंरिपुंप्राकृतयथाप्राकृतमिवोक्तविशेषणरहितमिववशमानेतुमि
च्छति॥१७॥१८॥१९॥पूर्वमेववैदेहींलब्ध्वापित्वंकिमर्थंबिलंबसेतद्भोगायेतिशेषःभोगार्थंसीत

हीनार्थस्तुसमृद्धार्थंकोरिपुंप्राकृतंयथा॥निश्चितंजीवितत्यागेवशमानेतुमिच्छति॥१७॥
यस्यनास्तिमनुष्येषुसदृशोराक्षसोत्तम॥कथमाशंससेयोद्धुंतुल्येनेंद्रविवस्वतोः॥१८॥
एवमुक्त्वातुसंरब्धंकुंभकर्णंमहोदरः॥उवाचरक्षसांमध्येरावणंलोकरावणं॥१९॥ल
ब्ध्वापुरस्ताद्वैदेहींकिमर्थंत्वंविलंबसे॥यदिच्छसितदासीतावशगातेभविष्यति॥२०॥
दृष्टःकश्चिदुपायोमेसीतोपस्थानकारकः॥रुचितश्चेत्स्वयाबुध्याराक्षसेंद्रततःशृणु॥२१॥
अहंद्विजिह्वःसंह्रादीकुंभकर्णोवितर्दनः॥पंचरामवधायैतेनिर्यांतीत्यवघोषय॥२२॥

190

यावशगयाभाव्यमितियदीच्छसितदासीतानेवशगाभविष्यति॥२०॥कुतस्तत्राहदृष्टइति
सीतोपस्थानस्यसीतानुकूल्यस्यकारकःसाधनंकश्चिदुपायोमेमयादृष्टोस्तितंशृणुत्वा
स्वयाबुध्यापर्यालोच्यरुचितश्चेत्तमनुतिष्ठेतिशेषः॥२१॥तमुपायमाह·अहमिति·पंचैते
निर्यांतीत्यवघोषय॥२२॥

राम·
१९०

अथेदानीमेवमांराजन्यादिशअहमुत्सादयिष्यामिइत्यादिनाऽसहायतयायोरिपुसंहारवादउक्तस्तं
दूषयतिएकस्यैवेतिएकस्यासहायस्यैवाभियानेयोहेतुःस्वबललक्षणःप्रागुक्तःतत्रापियदनु
पपन्नंउपपत्तिरहितंअतएवासाधुवचोस्तितत्तेवक्ष्यामि॥११॥अनुपपत्तिमेवाहःयेनेतियेनातिबला

एकस्यैवाभियानेतुहेतुर्यःप्रात्थतस्त्वया॥तत्राप्यनुपपन्नंतेवक्ष्यामियदसाधुच॥११॥येनपू
र्वंजनस्थानेबहवोतिबलास्तदा॥राक्षसाराघवध्वस्ताःकथमेकोजयिष्यसि॥१२॥येपूर्वं
निर्जितास्तेनजनस्थानेमहौजसः॥राक्षसांस्तान्पुरेसर्वान्भीतानद्यनपश्यसि॥१३॥तंसिंह
मिवसंक्रुद्धंरामंदशरथात्मजं॥सर्पंसुप्तमहोबुद्ध्वाप्रबोधयितुमिच्छसि॥१४॥ज्वलंतंतेज
सानित्यंक्रोधेनचदुरासदं॥कस्तंमृत्युमिवासह्यमासादयितुमर्हति॥१५॥संशयस्थमि
दंसर्वंशत्रोःप्रतिसमासने॥एकस्यगमनंतातनहिमेरोचतेभृशं॥१६॥

हतास्तंराघव
मित्यन्वयः॥१२॥जनस्थानेतेनयेनिर्जिताःविद्रावितास्तानद्यापिभीतानत्रपुरेविद्यमानान्
राक्षसान्नपश्यसिकिं॥१३॥सिंहमिवसुप्तंसर्पमिवचबुद्ध्वापिप्रबोधयितुमिच्छसिअहोतेमौ
र्ख्यमितिभावः॥१४॥१५॥इदंसर्वंबलंशत्रोःप्रतिसमासनेप्रतिमुखावस्थानेसंशयस्थंसं
शयितजीवनविषयंअतएकस्यगमनंनमेरोचतइत्यन्वयः॥१६॥ त्र

योधेभ्यो वहु देयं देहीति शेषः मुदितः पिब मुदित इव पिब॥२९॥ कौलीने· जनवादे रामादयो भक्षिता इत्ये
वं रूपे· विश्रुते लोके सुखतः सीतये ति शेषः॥३०॥ आश्वास्य भर्तृ विपन्नि दुःखितामिति शेषः॥३१॥ अपध्व
यावंचनया भूयोधिकं सीतायाः शोको नुबंधो यस्याः सापध्वायां तया· अकामा· तादृश्यपि॥३२॥ रम

ततो माल्यानि वासांसि वीराणामनुलेपनं॥ देयं च बहु योधेभ्यः स्वयं च मुदितः पिब॥२९॥
ततोस्मिन्बहुलीभूते कौलीने सर्वतोगते॥ भक्षितः ससुहृद्रामो राक्षसैरिति विश्रुते॥३०॥ प्र
विश्याश्वास्य चापि त्वं सीतां रहसि सांत्वयन्॥ धनधान्यैश्च कामैश्च रत्नैश्चैनां प्रलोभय॥३१॥
अनयोपध्वया राजन् भूयः शोकानुबंधया॥ अकामा त्वद्वशं सीता नष्टनाथा गमिष्यति॥३२॥
रमणीयं हि भर्त्तारं विनष्टमधिगम्य सा॥ नैराश्यात्स्त्रीलघुत्वाच्च त्वद्वशं प्रतियत्स्यते॥३३॥
सा पुरा सुखसंवृद्धा सुखार्हा दुःखकर्शिता॥ त्वय्यधीनं सुखं ज्ञात्वा सर्वथैव गमिष्यति॥३४॥
एतत्सुनीतं मम दर्शनेन रामं हि दृष्ट्वैव भवेदनर्थः॥ इहैव ते सेत्स्यति मोत्सुको भूर्महान
युद्धेन सुखस्य लाभः॥३५॥

णीयं अनुवर्त्तितुं योग्यं॥३३॥ गमिष्यति त्वद्वशत्वमिति शेषः॥३४॥ एतन्म
मदर्शनेन मत्या सुनीतं· निश्चितः सुखोपायः युद्धं तु नोपाय इत्याह· रामं दृष्ट्वैव तद्दर्शनमात्रेणै
वानर्थो विघ्नो भवेत्· यदेवमतो युद्धे रामदर्शनार्थं मोत्सुको भूः॥ इहैव स्थितस्य ते महान्सुखस्य ला भो युद्धेन सेत्स्यति॥३५॥

ततोगत्वातस्यरामस्ययुद्धं दास्यामः यदिदैवात्तवशत्रून्जेष्यामस्तदानोस्माकमुपायैः सीतावशीक
रणोपायानुष्ठानैर्न किंचित्कृत्यमस्तिरामप्रत्याशानिवृत्त्यास्वतएवतदानुकूल्यस्यसिद्धत्वादिति
भावः ॥२३॥ अथपक्षांतरे नोस्माकंशत्रुरस्माभिरसाध्यनाशत्वाद्यदि जीवतिकृतसंयुगावयंच

ततोगत्वावयंयुद्धं दास्यामस्तस्ययत्नतः ॥ जेष्यामोयदितेशत्रुन्नोपायैः कार्यमस्तिनः ॥२३॥
अथजीवतिनः शत्रुः वयंचकृतसंयुगाः ॥ ततः समभिपत्स्यामोमनसायत्समीक्षितं ॥२४॥ वयं
युद्धादिहैष्यामोरुधिरेणसमुक्षिताः ॥ विदार्यस्वतनुंबाणैरामनामांकितैः शरैः ॥२५॥ भक्षि
तोराघवोस्माभिर्लक्ष्मणश्चेतिवादिनः ॥ ततः पादौग्रहीष्यामस्त्वन्नः कामंप्रपूरय ॥२६॥ ततोव
घोषयपुरेगजस्कंधेनपार्थिव ॥ हतोरामः सहभ्रात्राससैन्यइतिसर्वतः ॥२७॥ प्रीतोनामततो
भूत्वाभृत्यानांत्वमरिंदम ॥ भोगांश्चपरिवारांश्चकामान्वसुचदापय ॥२८॥

यदिजीवामततोमन
सायत्समीक्षितंतत्समभिपत्स्यामः प्राप्स्यामः ॥२४॥ किंतत्तत्राह वयमिति स्वतनुंरामनामांकि
तैर्बाणैर्विदार्यकृतविदारणांसंपादयावस्माणसंकटं युद्धेत्यर्थः एवंयुद्धाद्रुधिरोक्षितायुद्धा
त्परावृत्त्येहैष्यामः ॥२५॥ इतिवादिनः इत्येवं मिथ्यावादिनः त्वंनः कामंपूरय जित्वाआगतानिव
संमानय ॥२६॥२७॥ प्रीतोनामनामेत्यपरमार्थे प्रीतइवभूतेत्यर्थः परीवारान्दासीदासान् ॥२८॥

एवमादिपापिष्ठमंत्रैरयंराजानाशितइत्याह युद्धइति· युद्धेप्राप्तकालेसतिकापुरुषैः कुत्सितैर्भीरुभिः
प्राक्मंत्रकालेप्रियवादिभिः अतएवतदाराजानमनुगच्छद्भिः एतद्राजःसर्वंकृत्यंनाशितमित्यर्थः॥६
किंनाशितंतदाह· राजशेषेति· यदेवमतोराजानमिममासाद्यसुहृच्छिन्नंसौहार्दंप्रच्छादितंअमित्र

युद्धेकापुरुषैर्नित्यंभवद्भिःप्रियवादिभिः॥राजानमनुगच्छद्भिःसर्वंकृत्यंविनाशितं॥६॥राज
शेषाकृतालंकाक्षीणःकोशोबलंहतं॥राजानमिममासाद्यसुहृच्छिन्नममित्रकं॥७॥एषनि
र्याम्यहंयुद्धमुद्यतःशत्रुनिर्जये॥दुर्नयंभवतामद्यसमीकर्तुंमहाहवे॥८॥एवमुक्तवतोवा
क्यंकुंभकर्णस्यधीमतः॥प्रत्युवाचततोवाक्यंप्रहसन्राक्षसाधिपः॥९॥महोदरोयंरामात्तु
परित्रस्तोनसंशयः॥नहिरोचयतेतातयुद्धंयुद्धविशारद॥१०॥कश्चिन्मेत्वत्समोनास्तिसौ
हृदेनबलेनच॥गच्छशत्रुवधायत्वंकुंभकर्णजयायच॥११॥शयानःशत्रुनाशार्थंभवान्सं
बोधितोमया॥अयंहिकालःसुमहान्राक्षसानामरिंदम॥१२॥

कमित्रकार्यंकृतमितिशेषः॥७॥
किंवृथाप्रलापेनइदानींयुद्धस्यैवप्राप्यत्वात्तदेवकरोमीत्याह·एषइति· युद्धंप्रत्युद्यतोहंशत्रुनि
र्जयेतन्निमित्तंनिर्यामिभवतांदुर्मंत्रिणांदुर्नयंदुर्मंत्रमूलानर्थमाहवेनसमीकर्तुंयामीत्यनुकर्षः
धीमतइतिश्रुत्वेतिशेषः॥९॥प्रहासाशयंस्वयमेवाह महोदरोयमिति· तातेत्युपलालने॥१०॥११॥अ
यंकालोयुद्धगमनायेतिशेषः॥१२॥

स्वोक्तोपायानुष्ठानमेवतेसुखावहमित्युपसंहरति· अनयेति॥३६॥क०॥५६॥इतिश्रीरामाभिरामेश्रीरा०रा०
ति०यु०चतुःषष्टितमःसर्गः॥६४॥ सतथोक्तइति· युद्धंनकर्त्तव्यमित्युक्तः॥१॥निर्वैरः अशत्रुः॥२॥वृथान
गर्जतिशत्रोरसमक्षंस्वशौर्यंवृथानकथ्यंते· युधिकर्मणासंपद्यमानंतुमेगर्जितंपश्य॥३॥आत्मना

अनयसैन्योत्यचनवाप्तसंशयोरिपुंत्वयुद्धेनजयन्जनाधिप॥यशश्चपुण्यंचमहान्महीप
तिःश्रियंचकीर्त्तिंचचिरंसमश्नुते॥३६॥इत्यार्षेश्रीरामायणेयु०चतुःषष्टितमःसर्गः॥६४॥
सतथोक्तस्तुनिर्भर्त्स्यकुंभकर्णोमहोदरं॥अब्रवीद्राक्षसश्रेष्ठंभ्रातरंरावणंततः॥१॥सोहंत
वभयंघोरंवधात्तस्यदुरात्मनः॥रामस्याद्यप्रमार्जामिनिर्वैरोहिसुखीभव॥२॥गर्जंतिनव
थाशूरानिर्जलाइवतोयदाः॥पश्यसंपद्यमानंतुगर्जितंयुधिकर्मणा॥३॥नमर्षयंतिचा
त्मानंसंभावयितुमात्मना॥अदर्शयित्वाशूरास्तुकर्मकुर्वंतिदुष्करं॥४॥विक्लवानांह्यबु
द्धीनांराज्ञांपंडितमानिनां॥रोचतेत्वद्वचोनित्यंकथ्यमानंमहोदर॥५॥

त्मानंसंभावयितुंश्लाघ
यितुंनमर्षयंतिनसहंतेनेछंतीतियावत्· अपिअदर्शयित्वावाचास्वसामर्थ्यमप्रकाश्यदुष्करंकर्म
कुर्वंति॥४॥अशूरत्वरूपवैक्लव्यादिगुणानांराज्ञांत्वद्वचोयुद्धनिवृत्तिपरंरोचतेनतुवीराणामित्यर्थः·
शूराएवतांसादितमिदंत्वद्विधानामितिपाठेविक्लवत्वादिगुणानांत्वद्विधानांवचःशूराएवतांइदंसादि

नैईदृशाद्दुःखप्राप्तंभवतीत्यर्थः इतितीर्थः॥५॥

२४ ॥ स्त्रजं कांचनीं मणिकृतांतरं मणिरचितमध्यदेशां ॥ २५ ॥ अंगुलीवेष्टान् अंगुलीयकान् ॥ २६ ॥ २७ ॥ निष्कमुरोभूषणं ॥ २८ ॥ श्रोणीसूत्रं कटिसूत्रं ॥ २९ ॥ भारसहं युद्धेऽभिघातसहं निवातं शस्त्राभेद्यंतुयद्वर्मंत

एकाकिनंप्रमत्तंवानयेयुःदशनैःक्षयं ॥ तस्मात्परमदुर्धर्षसैन्यैःपरिवृतोव्रज ॥ रक्षसामहितं सर्वंशत्रुपक्षंनिषूदय ॥ २४ ॥ अथासनात्समुत्पत्यस्त्रजंमणिकृतांतरां ॥ आबबंधमहातेजाःकुंभकर्णस्यरावणः ॥ अंगदानंगुलीवेष्टान्वराण्याभरणानिच ॥ हारंचशशिसंकाशमाबबंधमहात्मनः ॥ २६ ॥ दिव्यानिचसुगंधानिमाल्यदामानिरावणः ॥ गात्रेषुसज्जयामासश्रोत्रयोश्चास्यकुंडले ॥ २७ ॥ कांचनांगदकेयूरनिष्काभरणभूषितः ॥ कुंभकर्णोबृहत्कर्णःसुहुतोग्निरिवाबभौ ॥ २८ ॥ श्रोणीसूत्रेणमहतामेचकेनविराजता ॥ अमृतोत्पादनेनद्धोभुजंगेनेवमंदरः ॥ २९ ॥ सकांचनंभारसहंनिवातंविद्युत्प्रभंदीप्तमिवात्मभासा ॥ आबध्यमानःकवचंरराजसंध्याभ्रसंवीतइवाद्रीराजः ॥ ३० ॥ सर्वाभरणसर्वांगःशूलपाणिःसराक्षसः ॥ त्रिविक्रमकृतोत्साहोनारायणइवाबभौ ॥ ३१ ॥ भ्रातरंसंपरिष्वज्यकृत्वाचापिप्रदक्षिणं ॥ प्रणम्यशिरसातस्मैप्रतस्थेसमहाबलः ॥ ३२ ॥

न्निवातमुदाहृतं ॥ आबध्यमानः सन्नाबध्नन् आर्षो विकरणव्यत्ययः ॥ ३० ॥ सर्वाभरणसर्वांगः सर्वाभरणयुक्तसर्वांगः नद्धांगइतिपाठांतरं त्रिषुविक्रमेषुपादन्यासेषुकृतोत्साह ॥ ३१ ॥ ३

१३॥ प्रस्फुटिष्यतः विदीर्णो भविष्यतः॥१४॥१५॥१६॥१७॥ सर्वकालायसं सर्वेष्ववयवेषु दंडादिष्वपि काला

संगृह्य शूलमादाय पाशहस्त इवांतकः॥ वानरान् राजपुत्रौ च भक्षयादित्यतेजसौ॥१३॥ समालो
क्य तु ते रूपं विद्रविष्यंति वानराः॥ रामलक्ष्मणयोश्चापि हृदये प्रस्फुटिष्यतः॥१४॥ एवमुक्त्वा म
हातेजाः कुंभकर्णो महाबलः॥ पुनर्जातमिवात्मानं मेने राक्षसपुंगवः॥१५॥ कुंभकर्णो बलाभिज्ञो
जानंस्तस्य पराक्रमं॥ बभूव मुदितो राजा शशांक इव निर्मलः॥१६॥ इत्येवमुक्तः संहृष्टो निर्ज
गाम महाबलः॥ राज्ञस्तु वचनं श्रुत्वा योद्धुमद्युक्तवांस्तदा॥१७॥ आददे निशितं शूलं वेगा
च्छत्रुनिबर्हणः॥ सर्वकालायसं दीप्तं तप्तकांचनभूषणं॥१८॥ इंद्राशनिसमप्रख्यं वज्रप्र
तिमगौरवं॥ देवदानवगंधर्वयक्षपन्नगसूदनं॥१९॥ रक्तमाल्यमहादामं स्वतश्चोद्गतपाव
कं॥ आदाय विपुलं शूलं शत्रुशोणितरंजितं॥२०॥ कुंभकर्णो महातेजा रावणं वाक्यमब्रवीत्
गमिष्याम्यहमेकाकी तिष्ठत्विह बलं महत्॥२१॥ अद्य तान् क्षुधितः क्रुद्धो भक्षयिष्यामि वानरा
न्॥ कुंभकर्णवचः श्रुत्वा रावणो वाक्यमब्रवीत्॥२२॥ सैन्यैः परिवृतो गच्छ शूलमुद्गरपाणि-
भिः॥ वानरा हि महात्मानः शूराः सुव्यवसायिनः॥२३॥

यसनिर्मितं॥१८॥ इंद्राशनिसमाप्रख्या
कांतिर्यस्य तत्॥१९॥ रक्तमाल्यान्येव महामानि यस्य तं स्वतश्चोद्गतपावकं ज्वलनार्चिषं॥२०॥२१॥२२॥२३॥

संनिपत्यःएत्य॥४२॥४३॥वानरमुख्यानांयूथानिहनिष्यामीत्युक्तानिरपराधास्तेनहंतव्याःकिंतुरा
मएवसर्वापराधमूलंहंतव्य इत्याह·नापराध्यंतीति·तेनापराध्यंतिस्वन इतिशेषः किंतुसाजातिर्वि

संनिपत्यचरक्षांसिदग्धशैलोपमोमहान्॥कुंभकर्णोमहावक्त्रःप्रहसन्निदमब्रवीत्॥४३॥
अद्यवानरमुख्यानांतानियूथानिभागशः॥निर्दहिष्यामिसंक्रुद्धःपतंगानिवपावकः॥४३
नापराध्यंतिमेकामंवानरावनचारिणः॥जातिरस्मद्विधानांसापुरोद्यानविभूषणं॥४४॥पु
ररोधस्यमूलंतुराघवःसहलक्ष्मणः॥हतेतस्मिन्हतंसर्वंतंवधिष्यामिसंयुगे॥४५॥एवंतस्य
ब्रुवाणस्यकुंभकर्णस्यरक्षसः॥नादंचक्रुर्महाघोरंकंपयतइवार्णवं॥४६॥तस्यनिष्पततस्त
र्णंकुंभकर्णस्यधीमतः॥बभूवुर्घोररूपाणिनिमित्तानिसमंततः॥४७॥उल्काशनियुतामेघा
बभूवुर्गर्दभारुणाः॥ससागरवनाचैववसुधासमकंपत॥४८॥घोररूपाःशिवानेदुःसज्वा
लकवलैर्मुखैः॥मंडलान्यपसव्यानिबबंधुश्चविहंगमाः॥४९॥

नरजातिरस्मद्विधानां
पुरोद्यानानांविभूषणमलंकारः॥४४॥अतस्तैःसहपुररोधस्यमूलंराघवएवहंतव्यःतस्मिन्ह
तेसर्वंहतंभवति·अतस्तमेवयुधिवधिष्यामि॥४५॥रक्षसःवाक्यंश्रुत्वेतिशेषःनादंचक्रुःरा
क्षसाइतिशेषः॥४६॥४७॥गर्दभारुणाःगर्दभधूम्राः॥४८॥सज्वालकवलैःसांगारपिंडैः॥४९॥

३३ अंबुदस्वनैः स्यंदनैश्च सह प्रेषयामासेति योजना ॥३४॥ अनुजग्मुरिति रावणप्रेषिता इति शेषः सर्पा
दिभिर्वाहनैर्जग्मुः ॥३५॥३६॥३७॥ सकरयोर्वाह्वोस्ततयोस्तिर्यगंतरालं व्यामः सुबहुव्यामाः सुतरां ब

तमाशीर्भिः प्रशस्ताभिः प्रेषयामास रावणः ॥ शंखदुंदुभिनिर्घोषैः सैन्यैश्चापि वरायुधैः ॥३३॥ तं
गजैश्च तुरगैश्च स्यंदनैश्चांबुदस्वनैः ॥ अनुजग्मुर्महात्मानो रथिनो रथिनां वरं ॥३४॥ सर्पै रु
ष्ट्रैः खरैश्चैव सिंहद्विपमृगद्विजैः ॥ अनुजग्मुश्च तं घोरं कुंभकर्णं महाबलं ॥३५॥ स पुष्पवर्षै
रवकीर्यमाणो धृतातपत्रः शितशूलपाणिः ॥ मदोत्कटः शोणितगंधमत्तो विनिर्ययौ दा
नवदेवशत्रुः ॥३६॥ पदातयश्च वहवो महासारा महाबलाः ॥ अन्वयुः राक्षसा भीमा भीमा
क्षाः शस्त्रपाणयः ॥३७॥ रक्ताक्षाः सुबहुव्यामाः नीलांजनचयोपमाः ॥ शूलानुद्यम्य खड्गांश्च नि
शितांश्च परश्वधान् ॥३८॥ भिंडिपालांश्च परिघान् गदाश्च मुशलानि च ॥ तालस्कंधांश्च वि
पुलान् क्षेपणीयान् दुरासदान् ॥३९॥ अथान्यद्वपुरादाय दारुणं घोरदर्शनं ॥ निष्पपा
त महातेजाः कुंभकर्णो महाबलः ॥४०॥ धनुःशतपरीणाहः स षट्शतसमुच्छ्रितः ॥ रौद्रः श
कटचक्राक्षो महापर्वतसन्निभः ॥४१॥

हुव्यामप्रमाणाः ॥३८॥३९॥ अथान्यत् सालंकारसौम्यादन्य
त् ॥४०॥ तस्यैव वप्रदर्शनं धनुःशतेति परिणाहो विशालता तिर्यक्देहप्रमाणमिदं षट्शत धनुःप्रमा
ण ऊर्ध्वोच्छ्रायः ॥४१॥

सद्वति॥१॥निर्घातानशनिघोषान्॥२॥३॥४॥आत्मनः आत्मसंबंधीनिवीर्याणिपराक्रमान्॥५॥एतद्

सलंघयित्वाप्राकारंगिरिकूटोपमोमहान्॥निर्ययौनगरात्तूर्णंकुंभकर्णोमहाबलः॥१॥नना
दचमहानादंसमुद्रमभिनादयन्॥विजयन्निवनिर्घातान्विधमन्निवपर्वतान्॥२॥तमवध्यंमघ
वतायमेनवरुणेनवा॥प्रेक्ष्यभीमाक्षमायांतंवानराविप्रदुद्रुवुः॥३॥तांस्तुविप्रद्रुतान्दृष्ट्वा
राजपुत्रोंगदोब्रवीत्॥नलंनीलंगवाक्षंचकुमुदंचमहाबलं॥४॥आत्मनस्तानिविस्मृत्यवी
र्याण्यभिजनानिच॥क्वगच्छतभयत्रस्ताःप्राकृताहरयोयथा॥५॥साधुसौम्यानिवर्त्तध्वंकिं
प्राणान्परिरक्षथ॥नालंयुद्धायवैरक्षोमहतीयंविभीषिका॥६॥महतीमुत्थितामेनांराक्ष
सानांविभीषिकां॥विक्रमाद्विधमिष्यामोनिवर्त्तध्वंप्लवंगमाः॥७॥कृच्छ्रेणतुसमाश्वास्य
संगम्यचततस्ततः॥वृक्षानगृहीत्वाहरयःसंप्रतस्थूरणाजिरे॥८॥तेनिवर्त्यतुसंरब्धाःकुंभ
कर्णंवनौकसः॥निर्जघ्नुःपरमक्रुद्धाःसमदाइवकुंजराः॥९॥प्रांशुभिर्गिरिशृंगैश्चशिलाभि
श्चमहाबलः॥पादपैःपुष्पिताग्रैश्चहन्यमानोनकंपते॥१०॥तस्यगात्रेषुपतिताभिद्यंतेबहवः
शिलाः॥पादपाःपुष्पिताग्राश्चभग्नाःपेतुर्महीतले॥११॥सोपिसैन्यानिसंक्रुद्धोवानराणांम
हौजसां॥ममंथपरमायत्तोवनान्यग्निरिवोत्थितः॥१२॥

क्षोयुद्धायास्माभिर्नालंनसमर्थ॥६॥७॥८॥नि

वर्त्यनिवर्त्ताभ्रत्वा ९ प्रांशुभिरुच्चैः॥१०॥११॥१२॥

नयनंवामं॥५०॥५१॥अचिंतयन् अगणयन् ५२ तद्दहनन्दमवाहनाभावात्·पद्भ्यामिति॥५३॥५४॥५५
५६॥विपुलपरिघवानितिमूलवदिदमप्यस्यायुधं· किंकरदंडवान्· किंकराः संहारपरिकराः काल

निष्पपातचगृध्रोस्यशूलेवैपथिगच्छतः॥प्रास्फुरन्नयनंचास्यसव्योबाहुश्चकंपत॥५०॥निष्प
पाततदाचोल्काज्वलंतीभीमनिःस्वना॥आदित्योनिष्प्रभश्चासीन्नवातिचसुखोनिलः॥५१॥
अचिंतयन्महोत्पातानुदितान्रोमहर्षणान्॥निर्ययौकुंभकर्णस्तुकृतांतवशचोदितः॥५२॥
सलंघयित्वाप्राकारंपद्भ्यांपर्वतसन्निभः॥सददर्शघनप्रख्यंवानरानीकमद्भुतं॥५३॥तेदृ
ष्ट्वाराक्षसश्रेष्ठंवानराःपर्वतोपमं॥वायुनुन्नाइवघनाययुःसर्वादिशस्तदा॥५४॥तद्वान
रानीकमतिप्रचंडंदिशोद्रवद्भिन्नमिवाभ्रजालं॥सकुंभकर्णःसमवेक्ष्यहर्षन्ननादभू
योघनवद्घनाभः॥५५॥तेतस्यघोरंनिनदंनिशम्ययथानिनादंदिविवारिदस्य॥पेतुर्धर
ण्यांबहवःप्लवंगानिकृत्तमूलाइवशालवृक्षाः॥५६॥विपुलपरिघवान्सकुंभकर्णोरि
पुनिधनायविनिःसृतोमहात्मा॥कपिगणभयमाददत्सुभीमंप्रभुरिवकिंकरदंडवान्यु
गांते॥५७॥इत्यार्षेश्रीरामा०यु०पंचषष्ठितमःसर्गः॥६५॥

दंडाअस्यसंततिथायुगांगांत्र
तेप्रभुःकालाग्निरुद्रइवविनिःसृतः॥५७॥क०॥६०॥इतिश्रीरामाभिरामेश्रीरा०ति०यु०पंचषष्ठितमः

यत्· यस्माद्वीर्यंपराक्रमंत्यक्त्वाभीताःसंतःप्रधावततनोऽनार्याःस्वामिद्रोहिणःखलु॥२१॥वोयुष्माकंज
नसंसदियानिविकत्थनानिसोदग्राणिस्वस्वोदग्रताप्रतिपादनसहितानिचस्वामिहितकरा-
णिचकृतानितानिसर्वाण्यपद्ययुध्यतोवःक्वयातानि॥२२॥यःसत्पुरुषैर्धिक्कृतोजीवतितस्यजीवनंधि

कुलेषुजाताःसर्वेस्मिन्विस्तीर्णेषुमहत्सुच॥क्वगाःकृतभयत्रस्ताःप्राकृताहरयोयथा
अनार्याःखलुयद्भीताःत्यक्त्वावीर्यंप्रधावत॥२१॥विकत्थनानिवोयानिभवद्भिर्जन
संसदि॥तानिवःक्वनुयातानिसोदग्राणिहितानिच॥२२॥भीरोःप्रवादाःश्रूयंतेयस्तु
जीवतिधिक्कृतः॥मार्गःसत्पुरुषैर्जुष्टःसेव्यतांत्यज्यतांभयं॥२३॥शयामहेवानि
हताःपृथिव्यामल्पजीविताः प्राप्नुयामोब्रह्मलोकंदुष्प्रापंचकुयोधिभिः॥२४॥

196

णित्येवंभीरूणांवीरैःक्रियमाणाःप्रवादाधिक्काररूपाःश्रूयंते·मरणादप्यधिकदुःखदाःअतोभयं
त्यज्यतांसत्पुरुषैर्जुष्टोमार्गोयुद्धंसेव्यतां॥२३॥हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीमि
त्याशयवानाहशयामहेइतिश्लोकद्वयेनयदिदैवगत्यानिहताःशयामहेतदाकुयोधिभिर्दु
ष्प्रापंब्रह्मलोकंप्राप्नुयामःवाशब्दोव्यवस्थितविकल्पे॥ २४॥ अ

१३॥नावलोकयन्अग्रपश्चदेशंनालोकितवंतः॥१४॥१५॥स्थलानिप्रदुद्रुवुरित्यनुकर्षः॥१६॥निपेतुःयुद्धा
र्थमितिशेषः॥१७॥१८॥युद्धेभग्नानांवोयुष्माकंसर्वांमहींपरिक्रम्यापिगत्वापिस्थानंप्रतिष्ठानंपश्यामि

लोहितार्द्रास्तुबहवःशेरतेवानरर्षभाः॥निरस्ताःपतिताभूमौताम्रपुष्पाइवद्रुमाः॥१३॥लंघ
यंतःप्रधावंतोवानरानावलोकयन्॥केचित्समुद्रेपतिताःकेचिद्गगनमास्थिताः॥१४॥वध्यमा
नास्तुतेवीराराक्षसेनबलीयसा॥सागरंयेनतेतीर्णाःपथातेनैवदुद्रुवुः॥१५॥तेस्थलानितदा
निम्नंविवर्णवदनाभयात्॥ऋक्षावृक्षान्समारूढाःकेचित्पर्वतमाश्रिताः॥१६॥निपेतुःकेचिद
परेकेचिन्नैवावतस्थिरे॥केचिद्भूमौनिपतिताः।केचित्सुप्तामृताइव॥१७॥तान्समीक्ष्यांगदोभ
ग्नान्वानरानिदमब्रवीत्॥अवतिष्ठतयुध्यामोनिवर्त्तध्वंप्लवंगमाः॥१८॥भग्नानांवोनप
श्यामिपरिक्रम्यमहीमिमां॥स्थानंसर्वेनिवर्त्तध्वंकिंप्राणान्परिरक्षथ॥१९॥निरायुधानांक्रम
तामसंगगतिपौरुषाः॥दाराह्युपहसिष्यंतिसवैघातःसुजीवतां॥२०॥ श्रे

सुग्रीवाज्ञांविनागतानांवधएवसर्वथेतिभावःअतःसर्वैर्निवर्त्तध्वं॥१९॥हेऽसंगगतिपौरुषाः
निरायुधानांपाषाणवृक्षाद्यायुधरहितानांद्रवतांदाराउपहसिष्यंति॥सस्वदारापहासःजीव
२तांयुष्माकंघातःमृत्योरप्यधिकदुःखदोभविष्यति॥२०॥ ॥ श्र ॥

आज्ञाप्रतिरक्षायुद्धानुज्ञाप्रतीक्षाः॥३२॥सर्गः॥६६॥ अत्रसर्गविच्छेदोऽसांप्रदायिकःएकप्रकरणत्वात्
वृत्तभेदाभावाच्चेतिकतकः॥उक्तार्थानुवादस्तेनिवृत्ताइतिनैष्ठिकींस्थिरांनिष्ठानाशस्तत्संबंधि

प्रहर्षमुपनीताश्चवालिपुत्रेणधीमता॥आज्ञाप्रतीक्षास्तस्थुश्चसर्वेवानरयूथपाः॥३२॥सर्गः॥
॥६६॥तेनिवृत्तामहाकायाःश्रुत्वांगदवचस्तदा॥नैष्ठिकींबुद्धिमास्थायसर्वेसंग्रामकांक्षिणः
॥१॥समुदीरितवीर्यास्तेसमारोपितविक्रमाः॥पर्यवस्थापितावाक्यैरंगदेनबलीयसा॥२॥प्रम्रा
ताश्चगताहर्षमरणेकृतनिश्चयाः॥चक्रुःसुतुमुलंयुद्धंवानरास्त्यक्तजीविताः॥३॥अथवृक्षा
न्महाकायाःसानूनिसुमहांतिच॥वानरास्तूर्णमुद्यम्यकुंभकर्णमभिद्रवन्॥४॥कुंभकर्णः
सुसंक्रुद्धोगदामुद्यम्यवीर्यवान्॥धर्षयन्समहाकायःसमंताद्व्यक्षिपद्रिपून्॥५॥शतानिस
प्तचाष्टौचसहस्राणिचवानराः॥प्रकीर्णाःशेरतेभूमौकुंभकर्णेनताडिताः॥६॥षोडशाष्टौ
चदशाचविंशत्त्रिंशत्तथैवच॥परिक्षिप्यचबाहुभ्यांखादन्सपरिधावति॥भक्षयन्भृशसं
क्रुद्धोगरुडःपन्नगानिव॥७॥

नीमरणपर्यवसायिनीमित्यर्थइतितीर्थः॥१॥समुदीरितवीर्याःसमुदीरितविक्रमाःकथिता
त्मीयपूर्वपराक्रमाःसमारोपितविक्रमाःइतिगृहीतविक्रमाः॥२॥३॥४॥५॥६॥ ७॥

शत्रुमाहवेनिहत्वानिहत्यकीर्त्तिंवाप्राप्नुयामः उक्तमर्थंदार्ढ्यार्थंपुनराहनिहताइति। निहताश्चेद्वीरलोक
स्यवीरैःसूर्यद्वाराप्राप्यस्यब्रह्मलोकस्यवसुधनंहिरण्यगर्भभूमानंदंभोक्ष्यामोनुभविष्यामः जीवितं
वीरलोकस्यमोक्ष्यामइतिपाठोऽपांक्तः नापितत्रार्थसामंजस्यंतत्रहिब्रह्मलोकस्यवसुमत्वमभूतंजी

अवाप्नुयामःकीर्त्तिंवानिहत्वाशत्रुमाहवे।। निहतावीरलोकस्यभोक्ष्यामोवसुवानराः।।२५।। नकुंभ
कर्णःकाकुत्स्थंदृष्ट्वाजीवन्गमिष्यति।। दीप्यमानमिवासाद्यपतंगोज्वलनंयथा।।२६।। पलाय
नेनचोद्दिष्टाःप्राणान्रक्षामहेवयं।।एकेनबहवोभग्नायशोनाशंगमिष्यति।।२७।।एवंब्रुवाणं
तंशूरमंगदंकनकांगदं।।इवमाणास्ततोवाक्यमूचुःशूरविगर्हितं।।२८।। कृतंनःकदनंघोरं
कुंभकर्णेनरक्षसा।।नस्थानकालोगच्छामोदयितंजीवितंहिनः।।२९।। एतावदुक्त्वावचनंस
र्वेतेभेजिरेदिशः।।भीमंभीमाक्षमायांतंदृष्ट्वावानरयूथपाः।।३०।। इवमाणास्तेवीराअंगदे
नबलीमुखाः।।सांत्वनैश्चानुमानैश्चततःसर्वेनिनिवर्त्तिताः।।३१।।

वितंमोक्ष्यामइत्यर्थंतीर्थमाह।२५
ननुकथमपिजयप्रत्याशाभावेनस्थित्यानप्रयोजनमतआहुः नकुंभकर्णइति।।२६।।उद्दिष्टामहा
वीरेषुमार्गणानावहवोवयमेकेनभग्नाः पलायनेनयदिप्राणान्रक्षामहेतदायशोनाशंगमिष्यति।यद्वो
द्दिष्टाएतेपलायिताइतिजनैर्निर्दिष्टाइत्यर्थः।।२७।।२८।।२९।।३०।।अनुमानैःनागपाशमुक्तिसप्तसालभेद
रूपैर्जयानुमापकैः।।३१।।

तेनहन्तुमन्मुक्तगिरिशृंगेणसंचुक्षुभे॥१८॥१९॥ननादभीमंशूलाभिघातजरुजेतिशेषः युगांतेमेघस्तनि

सकुंभकर्णंकुपितोजघानवेगेनशैलोत्तमभीमकायं॥संचुक्षुभेतेनतदाभिभूतोमेदार्द्रगात्रोरु
धिरावसिक्तः॥१८॥सशूलमाविध्यतडित्प्रकाशंगिरिर्यथाप्रज्वलिताग्रशृंगं॥बाह्वंतरेमारुति
माजघानगुहोचलंक्रौंचमिवोग्रशक्त्या॥१९॥सशूलनिर्भिन्नमहाभुजांतरःप्रविह्वलःशोणि
तमुद्वमन्रुषा॥ननादभीमंहनुमान्महाहवेयुगांतमेघस्तनितस्वनोपमं॥२०॥ततोविनेदुः
सहसाप्रहृष्टारक्षोगणास्तंव्यथितंसमीक्ष्य॥प्लवंगमास्तुव्यथिताभयार्त्ताःप्रदुद्रुवुःसंयति
कुंभकर्णात्॥२१॥ततस्तुनीलोबलवान्पर्यवस्थापयन्बलंप्रचिक्षेपशैलाग्रंकुंभकर्णाय
धीमते॥२२॥तदापतंतंसंप्रेक्ष्यमुष्टिनाभिजघानह॥मुष्टिप्रहाराभिहतंतच्छैलाग्रंव्यशीर्य
त॥सविस्फुलिंगंसज्वालंनिपपातमहीतले॥२३॥ऋषभःशरभोनीलोगवाक्षोगंधमादनः।
पंचवानरशार्दूलाःकुंभकर्णमुपाद्रवन्॥२४॥शैलैर्वृक्षैस्तलैःपादैर्मुष्टिभिश्चमहाबलाः
कुंभकर्णंमहाकायंनिजघ्नुःसर्वतोयुधि॥२५॥स्पर्शानिवप्रहारांस्तान्वेदयानोनविव्यथे॥।
ऋषभंतुमहावेगंबाहुभ्यांपरिषस्वजे॥२६॥

तस्ययःस्वनस्तदुपमं॥२०॥२१॥२२॥२३॥२४॥२५॥स्पर्शानिवमालादिस्पर्शानिववेदयानोजानन्॥२६॥

प॥ विशेषेणालंबत इति विलंबः॥९॥ तमप्राप्यतं कुंभकर्णं॥ तस्यसैन्ये॰ कुंभकर्णस्य॥१०॥ तानिप्रसिद्धानिच

कृच्छ्रेणाचसमाश्वस्ताः संगम्यचततस्ततः॥ वृक्षाद्रिहस्ताहरयस्तस्थुः संग्राममूर्धनि॥८॥ ततः
पर्वतमुत्पाट्य द्विविदः प्लवगर्षभः॥ दुद्रावगिरिशृंगाभं विलंब इवतोयदः॥९॥ तंसमुत्पाट्यचि
क्षेपकुंभकर्णायवानरः॥ तमप्राप्यमहाकायस्तस्यसैन्येपतत्ततः॥१०॥ ममर्दाश्वान्गजांश्चा
पिरथांश्चापिगजोत्तमान्॥ तानिचान्यानिरक्षांसिएवंचान्यद्गिरेःशिरः॥११॥ तच्छैलवेगाभिहतं
हताश्वंहतसारथि॥ रक्षसांरुधिरक्लिन्नंबभूवायोधनंमहत्॥१२॥ रथिनोवानरेंद्राणांशरैः
कालांतकोपमैः॥ शिरांसिनदतांजह्रुःसहसाभीमनिस्वनाः॥१३॥ वानराश्चमहात्मानःसमु
त्पाट्यमहाद्रुमान्॥ रथानश्वान्गजानुष्ट्रान्राक्षसानभ्यसूदयन्॥१४॥ हनूमांश्छैलशृंगाणि
शिलाश्चविविधान्द्रुमान्॥ ववर्षकुंभकर्णस्यशिरस्यंबरमास्थितः॥१५॥ तानिपर्वतशृंगा
णिशूलेनसविभेदह॥ बभंजवृक्षवर्षंचकुंभकर्णोमहावलः॥१६॥ ततोहरीणांतदनीकमु
ग्रंदुद्रावशूलंनिशितंप्रगृह्य॥ तस्थौसतस्यापततःपुरस्तान्महीधराग्रंहनुमान्प्रगृह्य॥१७॥

रक्षांस्युद्दिश्यअन्यदेकंगिरेःशिरःशृंगंचिक्षेप॥११॥ १२॥ रथिनोराक्षसाःशरैर्वानरेंद्राणांशिरांसि
जह्रुः॥१३॥१४॥१५॥१६॥ हरीणामनीकंकर्म॰ तस्यकुंभकर्णस्यपुरस्तात्॥ १७॥

रामा॰यु॰
१९९

199

३९॥४०॥४१॥ वज्रहस्तात्मजस्यवालिनःपुत्रोंगदः॥४२॥४३॥४४॥४५॥४६॥तदापतंतंपुंस्तमार्षे॥४७

यथासुष्काण्यरण्यानिग्रीष्मेदहतिपावकः॥तथावानरसैन्यानिकुंभकर्णोव्यनिर्दहत्॥३९॥
ततस्तेवध्यमानास्तुहतयूथाःप्लवंगमाः॥वानराभयसंविग्नाविनेदुर्विकृतैःस्वरैः॥४०॥
अनेकशोवध्यमानाःकुंभकर्णेनवानराः॥राघवंशरणंजग्मुर्व्यथिताभिन्नचेतसः॥४१॥प्र
भग्नान्वानरान्दृष्ट्वावज्रहस्तात्मजात्मजः॥अभ्यधावतवेगेनकुंभकर्णंमहाहवे॥४२॥शै
लशृंगंमहद्गृह्यविनदन्सम्मुहुर्मुहुः॥त्रासयन्राक्षसान्सर्वान्कुंभकर्णपदानुगान्॥४३॥चि
क्षेपशैलशिखरंकुंभकर्णस्यमूर्धनि॥सतेनाभिहतस्तेनशैलेनेंद्ररिपुस्तदा॥४४॥कुंभकर्णः
प्रजज्वालक्रोधेनमहतातदा॥सोभ्यधावतवेगेनवालिपुत्रममर्षणं॥४५॥कुंभकर्णोमहा
नादस्त्रासयन्सर्ववानरान्॥शूलंससर्जवैरोषादंगदेतुमहाबलः॥४६॥ तदापतंतंबलवान्
युद्धमार्गविशारदः॥लाघवान्मोक्षयामासबलवान्वानरर्षभः॥४७॥उत्पत्यचैनंतरसात
लेनोरस्यताडयत्॥सतेनाभिहतःकोपात्प्रमुमोहाचलोपमः॥४८॥ सलब्धसंज्ञोतिबलो
मुष्टिंसंगृह्यराक्षसः॥अपहासेनचिक्षेपविसंज्ञःसपपातह॥४९॥तस्मिन्प्लवगशार्दूले
विसंज्ञेपतितेभुवि॥तच्छूलंसमुपादायसुग्रीवमभिदुद्रुवे॥५०॥

राम॰
१९९

॥४८॥ ४९॥ ५०॥

प्रमुखेतिप्रकर्षेणमुखेआगतंशोणितंयस्यसः॥२७॥२८॥२९॥३०॥३१॥३१॥विचितोव्याप्तःमूर्छितइति

कुंभकर्णभुजाभ्यांतुपीडितोवानरर्षभः॥निपपातर्षभोभीमःप्रमुखागतशोणितः॥२७॥मुष्टिनाश
रभंहत्वाजानुनानीलमाहवे॥आजघानगवाक्षंतुतलेनेंद्ररिपुस्तथा॥२८॥दत्तप्रहारव्यथिता
मुमुहुःशोणितोक्षिताः॥निपेतुस्तेतुमेदिन्यांनिकृत्ताइवकिंशुकाः॥२९॥तेषुवानरमुख्येषुपातिते
षुमहात्मसु॥वानराणांसहस्राणिकुंभकर्णंप्रदुद्रुवुः॥३०॥तंशैलमिवशैलाभाःसर्वेतुप्लव
गर्षभाः॥समारुह्यसमुत्पत्यददंशुःप्लवगर्षभाः॥३१॥तन्नखैर्दशनैश्चापिमुष्टिभिर्बाहुभि
स्तथा॥कुंभकर्णंमहानादंनिजघ्नुःप्लवगर्षभाः॥३२॥सवानरसहस्रैस्तैर्विचितःपर्वतोपमः।
रराजराक्षसव्याघ्रोगिरिरात्मरुहैरिव॥३३॥बाहुभ्यांवानरान्सर्वान्प्रगृह्यसमहाबलः॥भक्षया
मासससंक्रुद्धोगरुडःपन्नगानिव॥३४॥प्रक्षिप्ताःकुंभकर्णेनवक्त्रेपातालसन्निभे॥नासापुटाभ्यांसं
जग्मुःकर्णाभ्यांचैववानराः॥३५॥भक्षयन्भृशसंक्रुद्धोहरीन्पर्वतसन्निभः॥बभंजवानरान्सर्वा
न्संक्रुद्धोराक्षसोत्तमः॥३६॥मांसशोणितसंक्लेदांकुर्वन्भूमिंसराक्षसः॥चचारहरिसैन्येषुका
लाग्निरिवमूर्छितः॥३७॥वज्रहस्तोयथाशक्रःपाशहस्तइवांतकः॥शूलहस्तोबभौयुद्धेकुंभ
कर्णोमहाबलः॥३८॥

पाठांतरंआत्मरुहैर्वृक्षैः॥३३॥३४॥३५॥३६॥३७॥३८॥ रामरा

६२॥६३॥६४॥६५॥लंकामलयंलंकासमीपवर्त्तिमलयात्॥६७॥ अभिगत्यकत्तपुटेकृत्वाजहारसै

तत्कुंभकर्णस्यभुजप्रणुन्नंशूलंशितंकांचनदामयष्टिं॥क्षिप्रंसमुत्पत्यनिगृह्यदोर्भ्यांबभं
जवेगेनसुतोनिलस्य॥६२॥कृतंभारसहस्रस्यशूलंकालायसंमहत्॥बभंजजानुमारोप्यत
दाहृष्टःप्लवंगमः॥६३॥शूलंभग्नंहनुमतादृष्ट्वावानरवाहिनी॥हृष्टाननादबहुशःसर्व।
तश्चापिदुद्रुवे॥६४॥बभूवाथपरित्रस्तोराक्षसोविमुखोभवत्॥सिंहनादंचतेचक्रुःप्रहृ
ष्टवनगोचराः॥६५॥मारुतिंपूजयांचक्रुर्दृष्ट्वाशूलंतथागतं॥६५॥सतत्तथाभग्नमवेक्ष्य
शूलंचुकोपरक्षोधिपतिर्महात्मा॥उत्पाट्यलंकामलयात्सशृंगंजघानसुग्रीवमुपेत्यतेन॥
॥६६॥सशैलशृंगाभिहतोविसंज्ञःपपातभूमौयुधिवानरेंद्रः॥तंवीक्ष्यभूमौपतितंविसंज्ञंने
दुःप्रहृष्टायुधियातुधानाः॥६७॥समभ्युपेत्याद्भुतघोरवीर्यःसकुंभकर्णोयुधिवानरेंद्रं
जहारसुग्रीवमभिप्रगृह्ययथानिलोमेघमिवप्रचंडः॥६८॥सतंमहामेघनिकाशरू
पमुत्पाट्यगच्छन्युधिकुंभकर्णः॥रराजमेरुप्रतिमानरूपोमेरुर्यथाभ्युच्छ्रितघोरशृंगः॥६९॥

न्यमध्यादन्यदेशंनिनाय॥६८॥विशेषेणोच्छ्रितान्युन्नतानिघोराणिशृंगाणियस्यसः॥६९॥

५१॥५२॥५३॥५४॥५५॥५६॥५७॥प्रजापतेःपौत्रःचतुर्मुखजंभ्राजनितऋक्षरजःपुत्रत्वात्सुग्रीवस्यब्रह्मपौत्र

तमापतंतंसंप्रेक्ष्यकुंभकर्णंमहाबलं॥उत्पपाततदावीरःसुग्रीवोवानराधिपः॥५१॥सपर्वताग्रमु
त्क्षिप्यसमाविध्यमहाबलः॥अभिदुद्राववेगेनकुंभकर्णंमहाबलं॥५२॥तमापतंतंसंप्रेक्ष्यकुंभ
कर्णःप्लवंगमं॥तस्थौविवृतसर्वांगोवानरेंद्रस्यसंमुखः॥५३॥कपिशोणितदिग्धांगंभक्षयंतंम
हाकपीन्॥कुंभकर्णंस्थितंदृष्ट्वासुग्रीवोवाक्यमब्रवीत्॥५४॥पातिताश्चत्वयावीराःकृतंक
र्मसुदुष्करं॥भक्षितानिचसैन्यानिप्राप्तंतेपरमंयशः॥५५॥त्यजतद्वानरानीकंप्राकृतैःकिं
करिष्यसि॥सहस्वैकंनिपातंमेपर्वतस्यास्यराक्षस॥५६॥तद्वाक्यंहरिराजस्यसत्वधैर्यसम
न्वितं॥श्रुत्वाराक्षसशार्दूलःकुंभकर्णोब्रवीद्वचः॥५७॥प्रजापतेस्तुपौत्रस्त्वंतथैवर्क्षरजःसु
तः॥धृतिपौरुषसंपन्नस्तस्माद्गर्जसिवानर॥५८॥सकुंभकर्णस्यवचोनिशम्यव्याविध्यशैलं
सहसामुमोच॥तेनाजघानोरसिकुंभकर्णंशैलेनवज्राशनिसन्निभेन॥५९॥तच्छैलशृंगंस
हसाविभिन्नंभुजांतरेतस्यतदाविशाले॥ततोविषेदुःसहसाप्लवंगारक्षोगणाश्चापिमुदावि
नेदुः॥६०॥सशैलशृंगाभिहतश्चुकोपननादरोषाद्विवृत्यवक्त्रं॥व्याविध्यशूलंचतडित्प्रका
शंचिक्षेपहर्यृक्षपतेर्वधाय॥६१॥

त्वं॥५८॥व्याविध्यसंतोल्य॥५९॥६०॥६१॥

रामा॰यु॰
२०१

कथंतर्हिनेदानींमोचयतीत्यत्राह मन्येइति मोहवशादात्मानंपरेणगृहीतंनबुध्यतइतिमन्येइत्यर्थः
॥७७॥७८॥कृच्छ्रगतत्वेपिमयानायंमोचयितुमुचितइत्याहमयात्विति॥७९॥कांक्षिष्ये प्रतीक्षिष्ये॥

मन्येनतावदात्मानंबुध्यतेवानराधिपः॥शैलप्रहाराभिहतःकुंभकर्णेनसंयुगे॥७७॥अयंमु
हूर्तात्सुग्रीवोलब्धसंज्ञोमहाहवे॥आत्मनोवानराणांचयत्पथ्यंतत्करिष्यति॥७८॥मयातु
मोक्षितस्यास्यसुग्रीवस्यमहात्मनः॥अप्रीतिश्चभवेत्कष्टाकीर्तिनाशश्चशाश्वतः॥७९॥
तस्मान्मुहूर्तंकांक्षिष्येविक्रमंमोक्षितस्यतु॥भिन्नंचवानरानीकंतावदाश्वासयाम्यहं॥८०॥
इत्येवंचिंतयित्वाथहनूमान्मारुतात्मजः॥भूयःसंस्तंभयामासवानराणांमहाचमूं॥८१॥
सकुंभकर्णोथविवेशलंकांस्फुरंतमादायमहाहरिंतं॥विमानचर्यागृहगोपुरस्थैःपु
ष्पाग्र्यवर्षैरभिपूज्यमानः॥८२॥लाजगंधोदवर्षैस्तुसेच्यमानःशनैःशनैः॥राजवीथ्यास्तु
शीतत्वात्संज्ञांप्रापमहाबलः॥८३॥ततःससंज्ञामुपलभ्यकृच्छ्राद्बलीयसस्तस्यभुजांतर
स्थः॥अवेक्षमाणःपुरराजमार्गंविचिंतयामासमुहुर्महात्मा॥८४॥

तस्मात्क्षणांप्रतीक्षिष्येइति
पाठांतरंमोक्षितस्यकृतमोक्षणस्यविक्रमंतुद्रक्ष्यामीतिशेषः॥८०॥पुष्पाग्र्यवर्षैःउत्तमपुष्पवर्षैः
८२॥लाजगंधोदवर्षैःसिच्यमानःदैवगत्यामोहनिवृत्तयेसुग्रीवइतिशेषः॥८३॥ ८४॥

201

राम॰
२०१

ततस्तमादायजगामेति· लंकामितिशेषः त्रिदिवालयानांनीनादंदुःखजंश्रावन्॥७०॥७१॥७२॥७३॥७४
७५॥ अथवैषवानरः वानरराजमहाबलत्वात्स्वयमेवकुंभकर्णान्मोक्षंप्राप्स्यसियदिनमोचयिष्यत्या

ततस्तमादायजगामवीरः संस्तूयमानोयुधिराक्षसेंद्रैः॥ श्रावयन्निनादंत्रिदिवालयानांप्लवं
गराजग्रहविस्मितानां॥७०॥ ततस्तमादायनदासमेनेहरीन्द्रमिंद्रोपममिंद्रवीर्यः॥ अस्मिन्हृ
तेसर्वमिदंहृतंस्यात्सराघवंसैन्यमितीन्द्रशत्रुः॥७१॥ विद्रुतांवाहिनींदृष्ट्वा वानराणामित
स्ततः॥ कुंभकर्णेनसुग्रीवंगृहीतंचापिवानरं॥७२॥ हनूमांश्चिंतयामाससमतिमान्मारुता
त्मजः॥ एवंगृहीतेसुग्रीवेकिंकर्त्तव्यंमयाभवेत्॥७३॥ यद्धिन्याय्यंमयाकर्त्तुंतत्करिष्याम्य
संशयं॥ भूत्वापर्वतसंकाशोनाशयिष्यामिराक्षसं॥७४॥ मयाहतेसंयतिकुंभकर्णेमहाब
लेमुष्टिविशीर्णदेहे॥ विमोचितेवानरपार्थिवेचभवंतुहृष्टाःप्लवगाःसमग्राः॥७५॥ अ
थवास्वयमप्येषमोक्षंप्राप्स्यतिवानरः॥ गृहीतोयंयदिभवेत्त्रिदशैःसासुरोरगैः॥७६॥

त्मानंतदामोचयितव्योमयेति· क्षणमात्रंप्रतीक्षस्थितः सासुरोरगैस्त्रिदशैर्गृहीतोपियद्ययंभवे
त्तथापिमहाबलत्वात्स्वयमेवमोक्षंप्राप्स्यतिकिंपुनरनेनराक्षसापसदेनेतिभावः॥७६॥

९३ रक्तआदेरपिखादनेहेतुर्मोहादिति॰मद्यादिनेवरक्तपानजमदवैवश्यादितिभावः यथामृत्युर्ह
रतेतथासंभक्षयामासेत्यर्थः॥९४॥९५॥संप्रस्रवतः॰अडभावआर्षः भक्षितवानरसंबंधिशोणितादि

ततःसपुर्याःसहसामहात्मानिष्क्रम्यतद्वानरसैन्यमुग्रं॥बभक्षरक्षोयुधिकुंभकर्णःप्रजायुगां
ताग्निरिवप्रवृद्धः॥९३॥बुभुक्षितःशोणितमांसगृध्नुःप्रविश्यतद्वानरसैन्यमुग्रं॥चखादरक्षां
सिहरीन्पिशाचानृक्षांश्चमोहाद्युधिकुंभकर्णः॥९४॥यथैवमृत्युर्हरतेयुगांतेसंभक्षयामा
सहरीश्चमुख्यान्॥९४॥एकंद्वौत्रीन्बहून्क्रुद्धोवानरान्सहराक्षसैः॥समादायैकहस्तेन
प्रचिक्षेपत्वरन्मुखे॥९५॥संप्रस्रवंस्तदामेदःशोणितंचमहाबलः॥वध्यमानोनगेंद्राग्रैर्भ
क्षयामासवानरान्॥९६॥तेभक्ष्यमाणाहरयोरामंजग्मुस्तदागतिं॥कुंभकर्णोभृशंक्रुद्धःक
पीन्खादन्प्रधावति॥९७॥शतानिसप्तचाष्टौचविंशत्त्रिंशत्तथैवच॥संपरिष्वज्यबाहुभ्यांखा
दन्विपरिधावति॥९८॥मेदोवसाशोणितदिग्धगात्रःकर्णावसक्तग्रथितांत्रमालः॥ववर्ष
शूलानिसुतीक्ष्णदंष्ट्रःकालोयुगांतस्थइवप्रवृद्धः॥९९॥तस्मिन्कालेसुमित्रायाःपुत्रःपरबला
र्दनः॥चकारलक्ष्मणःक्रुद्धोयुद्धंपरपुरंजयः॥१००॥

॥९६॥गतिंशरणं॥९७॥९८॥कर्णावसक्तेत्य
नाधोभागेणावकर्णलुंचनंसुग्रीवेणकृतमितिगम्यतेकर्णावसक्ताग्रथिताःपरस्परसंलग्नान्त्र मालायस्यसः॥९९॥१००॥

संप्रतिकर्त्तुंसम्यक्प्रतिकर्त्तुं॥८५॥खरैस्तीक्ष्णैःकराग्रैर्नखैःकर्णौलुलुंचेतिशेषःपादैःपादनखैः॥८६॥

एवंगृहीतेनकथंनुनामशक्यंमयासंप्रतिकर्त्तुमद्य॥तथाकरिष्यामियथाहरीणांभविष्यती
ष्टंचहितंचकार्यं॥८५॥ततःकराग्रैःसहसासमेत्यराजाहरीणाममरेंद्रशत्रोः॥खरैश्चकर्णौद
शनैश्चनासांददंशपादैर्विददारपार्श्वौ॥८६॥सकुंभकर्णोहृतकर्णनासोविदारितस्तेनरदै
र्नखैश्च॥रोषाभिभूतःक्षतजार्द्रगात्रःसुग्रीवमाविध्यपिपेषभूमौ॥८७॥सभूतलेभीमबला
भिपिष्टःसुरारिभिस्तैरभिहन्यमानः॥जगामखंकंदुकवज्जवेनपुनश्चरामेणसमाजगा
म॥८८॥कर्णनासाविहीनस्तुकुंभकर्णोमहाबलः॥रराजशोणितोत्सिक्तोगिरिःप्रस्रवणै
रिव॥८९॥शोणितार्द्रोमहाकायोराक्षसोभीमदर्शनः॥अमर्षाच्छोणितोद्गारीशुशुभेराव
णानुजः॥९०॥नीलांजनचयप्रख्यःससंध्यइवतोयदः॥युद्धायाभिमुखोभीमोमनश्चक्रेनिशा
चरः॥९१॥गतेचतस्मिन्सुरराजशत्रुःक्रोधात्प्रदुद्रावरणायभूयः॥अनायुधोस्मीतिविचिं
त्यरौद्रोघोरंतदामुद्गरमाससाद॥९२॥

॥८७॥सुरारिभिःराक्षसैः॥८८॥८९॥९०॥नीलांजनेत्यनेनविध्वंजनादिव्यावृत्तिः॥९१॥९२॥

१३॥१४॥१५॥१६॥१७॥अभ्यधावततंरामंविसृज्येतिशेषः॥१८॥तैरौद्रास्त्रप्रयोजिताःशराः॥१९॥२०॥२१॥प्रस्रवणं

यस्त्वंशक्रादिभिर्देवैरसत्त्वंप्राप्यपौरुषं।तत्सत्यंनान्यथावीरदृश्यस्तेद्यपराक्रमः॥१३॥राघवदाश
रथीरामस्तिष्ठत्यद्रिरिवाचलः॥इतिश्रुत्वात्यनादृत्यलक्ष्मणंसनिशाचरः॥१४॥अतिक्रम्यच
सौमित्रिंकुंभकर्णोमहावलः॥राममेवाभिदुद्रावकंपयन्निवमेदिनीं॥१५॥अथदाशरथीरामोरौद्र
मस्त्रंप्रयोजयत्।कुंभकर्णस्यहृदयेससर्जनिशितान्शरान्॥१६॥तस्यरामेणविद्धस्यसहसा
भिप्रधावतः॥अंगारमिश्राःक्रुद्धस्यमुखान्निश्चेरुरर्चिषः॥१७॥रामास्त्रविद्धोघोरंवैनदन्राक्षस
पुंगवः॥अभ्यधावततंक्रुद्धोहरीन्विद्रावयन्रणे॥१८॥तस्योरसिनिमग्नास्तेशरावर्हिणवास
सः।हस्ताच्चास्यपरिभ्रष्टागदाचोर्व्यांपपातह॥आयुधानिचसर्वाणिविप्रकीर्यंतभूतले॥१९॥
सनिरायुधमात्मानंयदामेनेमहावलः॥मुष्टिभ्यांचकराभ्यांचचकारकदनंमहत्॥२०॥सबा
णैरतिविद्धांगःक्षतजेनसमुक्षितः॥रुधिरंपरिसुस्राववगिरिःप्रस्रवणानिव॥२१॥सतीव्रेणच
कोपेनरुधिरेणचमूर्च्छितः॥वानरान्राक्षसान्ऋक्षान्खादन्सपरिधावति॥२२॥अथशृंगंसमावि
ध्यभीमंभीमपराक्रमः॥चिक्षेपराममुद्दिश्यबलवानंतकोपमः॥अप्राप्तमंतरारामःसप्तभिस्तम
जिह्मगैः॥२३॥चिच्छेदगिरिशृंगंतुपुनःसंधायकार्मुकं

निर्झरः॥२२॥२३॥

१०१॥पीड्यमानःसराक्षसस्तदस्त्रविशेषैंअस्त्रांतरेण विगतशोषंचकारेत्पर्थः॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥

सकुंभकर्णस्पशरान्शरीरेसप्तवीर्यवान्॥निचखानाददेचान्पान्विससर्जचलक्ष्मणः॥१॥पी
ड्यमानस्तदास्त्रैस्तुविशेषैंतत्सराक्षसः॥ततश्चुकोपवलवान्सुमित्रानंदवर्द्धनः॥२॥अथास्यक
वचंशुभ्रंजांबूनदमयंशुभं॥प्रच्छादयामासशरैःसंध्याभ्रमिवमारुतः॥३॥नीलांजनचयप्रख्यः
शरैःकांचनभूषणैः॥आपीड्यमानःशुशुभेमेघैःसूर्यइवांशुमान्॥४॥ततःसराक्षसोभीमःसु
मित्रानंदवर्द्धनं॥सावज्ञमेवप्रोवाचवाक्यंमेघौघनिस्वनः॥५॥अंतकस्याप्यकंपेनयु
धिजेतारमाहवे॥युध्यतामामभीतेनख्यापितावीरतात्वया॥६॥प्रगृहीतायुधस्येहमृत्यो
रिवमहामृधे॥तिष्ठन्नप्यग्रतःपूज्यःकिमुयुद्धप्रदायकः॥७॥ऐरावतंसमारूढोवृतःसर्वा
मरैःप्रभुः॥नैवशक्रोपिसमरेस्थितपूर्वःकदाचन॥८॥अद्यत्वयाहंसौमित्रेवलेनापि
पराक्रमैः॥तोषितोगंतुमिच्छामित्वामनुज्ञाप्यराघवं॥९॥यत्तुवीर्यवलोत्साहैस्तोषितोहंर
णेत्वया॥राममेवैकमिच्छामिहंतुंयस्मिन्हतेहतं॥१०॥राममयात्रनिहतेयेन्येस्थास्यंतिसं
युगे॥तानहंयोधयिष्यामिस्ववलेनप्रमाथिना॥११॥इत्युक्तवाक्यंतद्रक्षःप्रोवाचस्तुतिसंहि
तं॥मृधेघोरतरंवाक्यंसौमित्रिःप्रहसन्निव॥१२॥

३४॥३५॥लक्ष्मणानुचरः बहुव्रीहिः लक्ष्मणासहितः॥३६॥३७॥३८॥३९॥कालांतकयमानामवस्थाक

यूथपान्हर्षयन्सर्वान्कुंभकर्णबलार्दितान्॥३४॥सचापमादायभुजंगकल्पंदृढज्यमुग्रं
तपनीयचित्रं हरीन्समाश्वास्यसमुत्पपातरामोनिबद्धोत्तमतूणबाणः॥३५॥सवानरग
णैस्तैस्तुवृत्तःपरमदुर्जयैः॥लक्ष्मणानुचरोवीरःसंप्रतस्थेमहाबलः॥३६॥सददर्शमहा
त्मानंकिरीटिनमरिंदमं॥शोणितावृत्तरक्ताक्षंकुंभकर्णंमहाबलं॥३७॥सर्वान्समभिधावंतं
यथारुष्टंदिशागजं॥मार्गमाणंहरीन्क्रुद्धंराक्षसैःपरिवारितं॥३८॥विंध्यमंदरसंकाशं
कांचनांगदभूषणं॥स्रवंतंरुधिरंवक्त्राद्वर्षमेघमिवोत्थितं॥३९॥जिह्वयापरिलिह्यंतंस
क्किणीशोणितोक्षिते॥मृद्नंतंवानरानीकंकालांतकयमोपमं॥४०॥तंदृष्ट्वाराक्षसश्रेष्ठंप्र
दीप्तानलवर्चसं॥विस्फारयामासतदाकार्मुकंपुरुषर्षभः॥४१॥सतस्यचापनिर्घोषात्कुपि
तोराक्षसर्षभः॥अमृष्यमाणस्तंघोषमभिदुद्राववराघवं॥४२॥ततस्तुवातोद्धतमेघकल्पंभुज
गंराजोत्तमभोगबाहुं॥तमापतंतंधरणीधराभमुवाचरामोयुधिकुंभकर्णं॥४३॥

तोभेदइतितीर्थः॥४०॥४१॥४२॥भुजंगराजस्यशेषस्योत्तमोयोभोगस्तद्वद्बाहुर्यस्यसः॥४३॥ राम

ततोधर्मात्मारामस्तस्यमहत्तत्कंगं अंतरामध्येमार्गेसप्तभिराजिह्मगत्वादिगुणविशिष्टैः शरैश्चिच्छेद॥

ततस्तुरामोधर्मात्मातस्यशृंगंमहत्तदा॥ शरैःकांचनचित्रांगैश्चिच्छेदभरताग्रजः॥२४॥ तन्मेरु
शिखराकारैर्द्योतमानमिवाग्निया॥ द्वेशतेवानराणांचपतमानमपातयत्॥२५॥ तस्मिन्कालेस
धर्मात्मालक्ष्मणोराममब्रवीत्॥ कुंभकर्णवधेयुक्तोयोगान्परिमृशन्बहून्॥२६॥ नैवायंवा
नरान्राजन्नविजानातिराक्षसान्॥ मत्तःशोणितगंधेनस्वान्परांश्चैवखादति॥२७॥ साध्वेनम
धिरोहंतुसर्वतोवानरर्षभाः॥ यूथपाश्चयथामुख्यास्तिष्ठंत्वस्मिन्समंततः॥२८॥ अप्ययंदुर्मतिः
कालेगुरुभारप्रपीडितः॥ प्रचरन्राक्षसोभूमौनाहन्यात्प्लवंगमान्॥२९॥ तस्यतद्वचनंश्रु
त्वाराजपुत्रस्यधीमतः॥ तेसमारुरुहुर्हृष्टाः कुंभकर्णंमहाबलाः॥३०॥ कुंभकर्णस्तुसंक्रुद्धः।
समारूढैः प्लवंगमैः॥ व्याधूनयत्तान्वेगेनदुष्टहस्तीवहस्तिपान्॥३१॥ तान्दृष्ट्वानिर्धुतान्रा
मोरुष्टोयमितिराक्षसं॥ समुत्पपातवेगेनधनुरुत्तममाददे॥३२॥ क्रोधरक्तेक्षणोधीरोनि
र्दहन्निवचक्षुषा॥ राघवोराक्षसंवेगादभिदुद्राववेगितः॥३३॥ श्र श्र

२४॥२५॥ योगानुपायान्· अनेनवधकालेलक्ष्मणसाहित्यंरामस्यगम्यते॥२६॥२७॥ २८॥२९॥
॥३०॥३१॥ राक्षसंरुष्टोयमितिमत्वावेगेनसमुत्पपात॥३२॥३३॥ राम

व्यथयांप्रचक्रुरित्यार्षआमंतव्यवद्धितप्रयोगः॥५२॥वारिधाराःपर्वतइवसायकान्शरीरेणपिबन्नि
तियोजना॥एतेनसर्वेसायकाःशरीरेमग्नाअपिनव्यथयंति॥इतिदर्शितं॥उग्रवेगंतंमुद्गरंव्यावि

यैःसायकैःसालवरानिकृत्तावालीहतोवानरपुंगवश्च॥तेकुंभकर्णस्यतदाशरीरंवज्रोप
मानव्यथयांप्रचक्रुः॥५२॥सवारिधाराइवसायकांस्तान्पिबन्शरीरेणमहेंद्रशत्रुः॥
जघानरामस्यशरप्रवेगंव्याविध्यतंमुद्गरमुग्रवेगं॥५३॥ततस्तुरक्तक्षतजावलिप्तंवित्रा
सनंदेवमहाचमूनां॥व्याविध्यतंमुद्गरमुग्रवेगंविद्रावयामासचमूंहरीणां॥५४॥वायव्य
मादायततोपरास्त्रंरामःप्रचिक्षेपनिशाचराय॥समुद्गरंतेनजहारवाहुंसकृत्तवाहुस्तु
मुक्तंनिनाद॥५५॥सतस्यवाहुर्गिरिशृंगकल्पःसमुद्गरोराघवबाणकृत्तः॥पपाततस्मिन्ह-
रिराजसैन्येजघानतांवानरवाहिनींच॥५६॥तेवानराभग्नहतावशेषाःपर्यंतमाश्रित्यत
दाविषण्णाः॥प्रपीडितांगाददृशुःसुघोरंनरेंद्ररक्षोधिपसन्निपातं॥५७॥सकुंभकर्णस्त्रनि
कृत्तबाहुर्महासिकृंताग्रइवाचलेंद्रः॥उत्पाटयामासकरेणवृक्षंततोभिदुद्राववरणेनरेंद्रं॥५८॥

ध्यभ्रामयित्वारामस्यशरप्रवेगंजघान॥५३॥ततोराममुक्त्वाहरीणांचमूंविद्रावयामास॥५४॥समुद्गरं
मुद्गरसहितंतेनवायव्यास्त्रेण॥५५॥भग्नहतावशेषाःभग्नसमुद्गरपतितवाहुहतावशिष्टाःपर्यं
तमाश्रित्यसमुद्गरबाहुपातप्रदेशसमीपमाश्रित्यविषण्णाःस्थिताः॥५६॥५७॥करेणकृत्तेतरेण॥५८

हेरक्षोधिपविषादंमाआगच्छयोहंप्रगृहीतचापःस्थितस्तंमांराममवैहितस्मान्मामेवागच्छमुहूर्त्तात्त्वं
विचेताःनिर्जीवोमृतोभवितेतिसुधिरामःकुंभकर्णमुवाचेत्यन्वयः रामोयमितिविज्ञायरामवच

आगच्छरक्षोधिपमाविषादमवस्थितोहंप्रगृहीतचापः॥ अवेहिमांराक्षसवंशनाशनंयस्त्वं
मुहूर्त्ताद्भविताविचेताः॥४४॥ रामोयमितिविज्ञायजहासविकृतस्वनं॥ अभ्यधावतसंक्रुद्धोह
रीन्विद्रावयन्रणे॥४५॥ दारयन्निवसर्वेषांहृदयानिवनौकसां॥ प्रहस्यविकृतंभीमंसमे
घस्तनितोपमं॥४६॥ कुंभकर्णोमहातेजाराघवंवाक्यमब्रवीत्॥ नाहंविराधोविज्ञेयोनकब
धःखरोनच॥ नवालीनचमारीचःकुंभकर्णःसमागतः॥४७॥ पश्यमेमुद्गरंभीमंसर्वकाला-
यसंमहत्॥ अनेननिर्जितादेवादानवाश्चपुरामया॥४८॥ विकर्णनासइतिमांनावज्ञातुंत्व
मर्हसि॥ स्वल्पापिहिनमेपीडाकर्णनासविनाशनात्॥४९॥ दर्शयेक्ष्वाकुशार्दूलवीर्यंगात्रेषु
मेनघ॥ ततस्त्वांभक्षयिष्यामिदृष्टपौरुषविक्रमं॥५०॥ सकुंभकर्णस्यवचोनिशम्यरामः
सुपुंखान्विससर्जबाणान्॥ तैराहतोवज्रसमप्रवेगैर्नचुक्षुभेनव्यथितेसुरारिः॥५१॥

सेतिशेषः॥४५॥४६॥४७॥४८॥ विकर्णनासइत्येतावन्मात्रेणमामवज्ञातुंदुर्बलइत्यवगंतुंनार्हसि
नहिविराधादिवदहंलीलयात्वयासुयोधःअतोमामपियत्नवान्भवेत्यर्थः। ननुकथंनदुर्बलस्तत्रा
हःस्वल्पापीति॥४९॥५०॥ नव्यथतेनविव्यथे॥५१

रामा-यु
२०६

शक्राशन्योरिवशक्राशनेरिवबाभीमोयस्यतंकुंभकर्णंजगाम ॥ ६७ ॥ चलेगतेचारुरमणीयेकुंडलेयस्मात्
तत्चारुकुंडलं ॥ ६८ ॥ कुंभकर्णशिरइति कुंडलाभ्यामलंकृतंविनाकृतं अलंभूषणपर्याप्तिशक्तिवार
णेष्वाचकमित्यमरः कुंभकर्णस्यशिरः अरात्रौप्रातःकाले आदित्येउदितेगगनमध्यस्थश्चंद्रमाइवनि
ष्प्रभंभातीइत्यर्थः अयंश्लोकःप्रक्षिप्तइतिबहवः ॥ ६९ ॥ तच्चप्राकारंलंकायाइतिशेषः शिरःकर्त्तनवे
गोत्थितंलंकायांपपात देहस्तुकर्त्तनवेगलुठन्समुद्रेपपातपपितंब्रह्मास्त्रेणसौमित्रेर्ददाराइव

206

ससायकोराघवबाहुचोदितोदिशःस्वभासादशसंप्रकाशयन् ॥ विधूमवैश्वानरभीमदर्शनो
जगामशक्राशनिभीमविक्रमं ॥ ६७ ॥ सतन्महापर्वतकूटसन्निभंसुवृत्तदंष्ट्रंचलचारुकुंडलं
चकर्त्तरक्षोधिपतेःशिरस्तदायथैववृत्रस्यपुरापुरंदरः ॥ ६८ ॥ कुंभकर्णशिरोभातिकुंडलालं
कृतंमहत् ॥ आदित्येभ्युदितेरात्रौमध्यस्थइवचंद्रमाः ॥ ६९ ॥ तद्रामबाणाभिहतंपपातरक्षःशिरःप
र्वतसंनिकाशं ॥ बभंजचर्यागृहगोपुराणिप्राकारमुच्चंतमपातयच्च ॥ ७० ॥

रोपमं सपपातमहावीर्यो
दिव्यास्त्राभिहतोरणे तंदृष्ट्वासावरन्नसंकाशंकुंभकर्णंतरस्विनं गतासुंपतितंभूमौराक्षसाःप्राद्रवन्भ
यादितिमहाभारतोक्त्यालक्ष्मणातःकुंभकर्णवधःप्रतीयतेतथापिनविरोधः रामलक्ष्मणाभ्यांमिलित्वात
द्वधकरणात् अतएवपूर्वंलक्ष्मणानुचरइत्यत्रलक्ष्मणसहितइतिव्याख्यातं प्राधान्यात्कृत्ररामस्यै
वतद्धंतृत्वोक्तिः लक्ष्मणसहितोनरस्तुनत्त्वमासोलक्ष्मणसाहंतनमकवान् ॥ ७० ॥ ॥

राम०
२०६

५९ ॥ विचेष्टमानः भ्रमावितिशेषः ॥ ६० ॥ ६१ ॥ विनादयंतौ दिगादीन्प्रतिध्वनयंतौ ॥ ६२ ॥ ६३ ॥ चुकूज अवर्णो

तंतस्यबाहुंसहसात्तखड्गंसमुद्यतंपन्नगभोगकल्पं ॥ रौंद्रास्त्रयुक्तेनजघानरामोबाणेनजांबूनदचित्रितेन ॥ ५९ ॥ सकुंभकर्णस्यभुजोनिकृत्तःपपातभूमौगिरिसन्निकाशः ॥ विचेष्टमानोनिजघानवृक्षान्शैलान्शिलावानरराक्षसांश्च ॥ ६० ॥ तंछिन्नबाहुंसमवेक्ष्यरामःसमापतंतंसहसानदंतं ॥ द्वावर्द्धचंद्रौनिशितौप्रगृह्यचिच्छेदपादौयुधिराक्षसस्य ॥ ६१ ॥ तौतस्यपादौप्रदिशोदिशश्चगिरेर्गुहाश्चैवमहार्णवंच ॥ लंकांचसेनांकपिराक्षसानांविनादयंतौविनिपेततुश्च ॥ ६२ ॥ निकृत्तबाहुर्विनिकृत्तपादोविदार्यवक्त्रंवडवामुखाभं ॥ दुद्राव्वरामंसहसाभिगर्जन्राहुर्यथाचंद्रमिवांतरिक्षे ॥ ६३ ॥ अपूरयत्तस्यमुखंशिताग्रैःरामःशरैर्हेमपिनद्धपुंखैः ॥ संपूर्णवक्त्रोनशशाकवक्तुंचुकूजकृच्छ्रेणमुमूर्छचापि ॥ ६४ ॥ अथाददेसूर्यमरीचिकल्पंसब्रह्मदंडांतककालकल्पं ॥ अरिघ्नमैंद्रंनिशितंसुपुंखंरामःशरंमारुततुल्यवेगं ॥ ६५ ॥ तंवज्रजांबूनदचारुपुंखंप्रदीप्तसूर्यज्वलनप्रकाशं ॥ महेंद्रवज्राशनितुल्यवेगंरामःप्रचिक्षेपनिशाचराय ॥ ६६ ॥

नशब्देनेतिशेषः ॥ ६४ ॥ अरिघ्नं रिपूणामशुभदं ॥ ६५ ॥ ६६ ॥ श्रीरामचंद्रशरणागतवत्सलत्रैलो

विस्तीर्णकीर्त्तयः विशालकीर्त्तयः॥१२॥१३॥ प्रवरविज्ञानाः श्रेष्ठज्ञानवंतः॥१४॥ शास्त्राणां बलस्य श्रीणां चार्दनैरित्यर्थे श्रियार्दनैरित्यार्षं॥१५॥ आशीभिरित्यस्य संयुज्येति शेषः॥१६॥ युद्धोन्मत्तमत्तशब्दौ

सर्वे सुबलसंपन्नाः सर्वे विस्तीर्णकीर्त्तयः॥ सर्वे समरमासाद्य न श्रूयंते स्म निर्जिताः॥१२॥ देवैरपि सगंधर्वैः सकिन्नरमहोरगैः॥ सर्वेस्त्रविदुषो वीराः सर्वे युद्धविशारदाः॥१३॥ सर्वे प्रवरविज्ञानाः सर्वे लब्धवरास्तथा॥१४॥ स तैस्तथा भास्करतुल्यदर्शनैः॥ सुतैर्वृत्तः शत्रुबलश्रियार्दनैः॥ रराज राजा मघवान्यथामरैर्वृतो महादानवदर्पनाशनैः॥१५॥ स पुत्रान्संपरिष्वज्य भूषयित्वा च भूषणैः॥ आशीभिश्च प्रशस्ताभिः प्रेषयामास वै रणे॥१६॥ युद्धोन्मत्तं च मत्तं च भ्रातरौ चापि रावणः॥ रक्षणार्थं कुमाराणां प्रेषयामास संयुगे॥१७॥ ते भिवाद्य महात्मानं रावणं लोकरावणं॥ कृत्वा प्रदक्षिणं चैव महाकायाः प्रतस्थिरे॥१८॥ सर्वौषधीभिर्गंधैश्च समालभ्य महाबलाः॥ निर्जग्मुर्नैरृतश्रेष्ठाः षडेते युद्धकांक्षिणः॥१९॥ त्रिशिराश्चातिकायश्च देवांतकनरांतकौ॥ महोदरमहापार्श्वौ निर्जग्मुः कालचोदिताः॥२०॥ ततः सुदर्शनं नागं नीलजीमूतसन्निभं॥ ऐरावतकुले जातमारुरोह महोदरः॥२१॥ ॥

महोदरमहापार्श्वयोः पर्यायनामानि॥१७॥१८॥ सर्वौषधीभिः आयुधप्रहारनिवारकौषधीविशेषैः॥१९॥२०॥२१॥

इदृशंत्रैलोक्यविजयसमर्थं·शोचसि·शोकवंतंकरोषि॥३॥४॥असकृत्त्वयाविशस्ताइत्यन्वयः वित्रस्ता
इतिपाठेवित्रासिताइत्यर्थः॥५॥६॥नरकोविष्णुनेति·अयंसिंहिकायांविप्रचित्तेर्जातोनरकोभौमान्न

नूनंत्रिभुवनस्यापिपर्याप्तस्त्वमसिप्रभो॥सकस्मात्प्राकृतइवशोचस्यात्मानमीदृशं॥३॥ब्रह्म
दत्तास्तितेशक्तिः कवचंसायकोधनुः॥सहस्रखरसंयुक्तोरथोमेघसमस्वनः॥४॥त्वयास
कृद्विशस्त्रेणविशस्तादेवदानवाः॥ससर्वायुद्धसंपन्नोराघवंशास्तुमर्हसि॥५॥कामंतिष्ठ
महाराजनिर्गमिष्याम्यहंरणे॥उद्धरिष्यामितेशत्रून्गरुडःपन्नगानिव॥६॥शंबरोदे
वराजेननरकोविष्णुनायथा॥तथाद्यशयितारामोमयायुधिनिपातितः॥७॥श्रुत्वात्रि
शिरसोवाक्यंरावणोराक्षसाधिपः॥पुनर्जातमिवात्मानंमन्यतेकालचोदितः॥८॥श्रुत्वा
त्रिशिरसोवाक्यंदेवांतकनरांतकौ॥अतिकायश्चतेजस्वीबभूवुर्युद्धहर्षिताः॥९॥ततो
ऽहमहमित्येवगर्जंतोनैर्ऋतर्षभाः॥रावणस्यसुतावीराःशक्रतुल्यपराक्रमाः॥१०॥अंत
रिक्षगताःसर्वेसर्वेमायाविशारदाः॥सर्वेत्रिदशदर्पघ्नाःसर्वेसमरदुर्मदाः॥११॥

॥१०॥अंतरिक्षेगतंगमनंयेषांते॥११॥

रकात्कृच्छ्रमहतोदन्यइतितीर्थः॥७॥पुनर्जातमिवात्मानंमन्यते·त्रिशिरोवचनमात्रेणसंतु
ष्टोबभूव·ननुकुंभकर्णसाध्योर्थःकथंरावणस्यतस्माज्जयप्रत्याशयासंतोषस्तत्राहकालचो
दितइति·तन्नाशप्रवर्त्तकालात्मकभगवत्प्रेरणायापुनस्तस्ययुद्धबुध्यनुपरमइत्यर्थः॥८॥

रामा॰यु॰
२०८

२०८

२०॥२१॥ यावत्त्वयदारभ्यकुंभकर्णप्रहस्तयोर्दारुणोयंविनाश उत्पन्नस्तावत्तदारभ्यविभीषणवचोमां
व्रीडयतीत्यर्थः इष्टंभ्रातृवचोनगृहीतमितिलज्जितोस्मीत्यर्थः ॥२२॥ अपिचधार्मिकस्यनिष्कासनफ

देवाद्धिमांहसिष्यंतिदृष्ट्वापूर्वापकारिणं ॥ कथमिंद्रंजयिष्यामिकुंभकर्णहतेत्वयि ॥२०॥ तदि
दंमामनुप्राप्तंविभीषणवचःशुभं ॥ यदज्ञानान्मयातस्यनगृहीतंमहात्मनः ॥२१॥ विभीषण
वचस्तावत्कुंभकर्णप्रहस्तयोः ॥ विनाशोयंसमुत्पन्नोमांव्रीडयतिदारुणः ॥२२॥ तस्यायंक
र्मणःप्राप्तोविपाकोममशोकदः ॥ यन्मयाधार्मिकःश्रीमान्सनिरस्तोविभीषणः ॥२३॥ इतिब
हुविधमाकुलांतरात्माकृपणमतीवविलप्यकुंभकर्णं ॥ न्यपतदपिदशाननोभृशार्त्तस्तम
नुजमिंद्ररिपुंहतंविदित्वा ॥२४॥ इत्यार्षेश्रीरामा॰युद्ध॰अष्टषष्ठितमःसर्गः ॥६८॥ ॥
एवंविलपमानस्यरावणस्यदुरात्मनः ॥ श्रुत्वाशोकाभिभूतस्यत्रिशिरावाक्यमब्रवीत् ॥१॥
एवमेवमहावीर्योहतोनस्तातमध्यमः ॥ नतुसत्पुरुषाराजन्विलपंतियथाभवान् ॥२॥

लमिदमित्याह-तस्यायमित्यादि ॥२३॥२४॥ चोरमाणः कु॰ ॥६२॥ इतिश्रीरामाभिरामेश्रीरा॰रा॰ति॰यु
द्ध॰अष्टषष्ठितमःसर्गः ॥६८॥ एवमिति-विलपमानस्यविलपतःश्रुत्वाविलापमितिशेषः ॥१॥ एवमे
वदेवदानवदर्पहाकालाग्निप्रतिमइत्याद्युक्तप्रकारेणमहावीर्यःहतोदैवादितिशेषःसत्पुरुषाःशूराः ॥२॥

राम॰
२०८

१०॥ बांधवानांचशल्यमनुद्धृत्येत्यन्वयः॥११॥ अहंनास्मि॰ अहमपिमृतप्रायइत्यर्थः सुरासुरात्॰ सुरासुरे
भ्यः॥१२॥१३॥ वज्रनिक्षेपस्तदाघातोपियस्यव्यसनंदुःखंनकुर्यात्॥१४॥१५॥ लब्धलक्षाः लब्धावसराः॥१६

हावीररिपुदर्पघ्नकुंभकर्णमहाबल॥ त्वंमांविहायवैदैवाद्यातोसियमसादनं॥११॥ ममश
ल्यमनुद्धृत्यबांधवानांमहाबल॥ शत्रुसैन्यंप्रताप्यैकः क्वमांसंत्यज्यगच्छसि॥१२॥ इदानींख
ल्वहंनास्मियस्यमेपतितोभुजः॥ दक्षिणोयंसमाश्रित्यनबिभेमिसुरासुरात्॥१३॥ कथमे
वंविधोवीरोदेवदानवदर्पहा॥ कालाग्निप्रतिमोद्यचराघवेणरणेहतः॥१३॥ यस्यतेव
ज्रनिष्पेषोनकुर्याद्व्यसनंसदा॥ सकथंरामबाणार्त्तःप्रसुप्तोसिमहीतले॥१४॥ एतेदेवगणाः
सार्द्धमृषिभिर्गगनेस्थिताः॥ निहतंत्वांरणेदृष्ट्वानिनदंतिप्रहर्षिताः॥१५॥ ध्रुवमद्यैवसंहृष्टा
लब्धलक्षाःप्लवंगमाः॥ आरोक्ष्यंतीहदुर्गाणिलंकाद्वाराणिसर्वशः॥१६॥ राज्येननास्तिमेकार्यं
किंकरिष्यामिसीतया॥ कुंभकर्णविहीनस्यजीवितेनास्तिमेमतिः॥१७॥ यद्यहंभ्रातृहंता
रंनहन्मियुधिराघवं॥ ननुमेमरणंश्रेयोनचेदंव्यर्थजीवितं॥१८॥ अद्यैवतंगमिष्यामि
देशंयत्रानुजोमम॥ नहिभ्रातॄन्समुत्सृज्यक्षणंजीवितुमुत्सहे॥१९॥

जीवितेनास्तिमेमतिः
सजीवनयावस्थानेबुद्धिर्नास्तीत्यर्थः॥१७॥१८॥ भ्रातॄनित्यनेनखरादयोप्यनुस्मृताइतिज्ञायते॥१९

कुंभकर्णमिति॥१॥ कालसंकाशः सः कुंभकर्णः कालकर्ममस्तुः॥२॥ समुद्रमर्द्धप्रविष्टेन कबंधरूपेण कायेनोपलक्षितः मुहूर्त्तं प्रतपित्वा विक्रम्य॥३॥ निकृत्तनासाकर्णत्वादिगुणेन शरीरेण शिरोलक्षणेन लंका

कुंभकर्णं हतं दृष्ट्वा राघवेण महात्मना॥ राक्षसा राक्षसेंद्राय रावणायन्यवेदयन्॥१॥ राजन्स कालसंकाशः संयुक्तः कालकर्मणा॥ विद्राव्य वानरीं सेनां भक्षयित्वा च वानरान्॥२॥ प्रतपित्वा मुहूर्त्तं तु प्रशांतो रामतेजसा॥ कायेनार्द्धं प्रविष्टेन समुद्रं भीमदर्शनं॥३॥ निकृत्तनासाकर्णेन विक्षरद्रुधिरेण च॥ रुद्ध्वा द्वारं शरीरेण लंकायाः पर्वतोपमः॥४॥ कुंभकर्णस्तव भ्राता काकुत्स्थशरपीडितः॥ अगंडभूतो विवृतो दावदग्ध इव द्रुमः॥५॥ श्रुत्वा विनिहतं संख्ये कुंभकर्णं महाबलं॥ रावणः शोकसंतप्तो मुमोह च पपात च॥६॥ पितृव्यं निहतं श्रुत्वा देवांतकनरांतकौ॥ त्रिशिराश्चातिकायश्च रुरुदुः शोकपीडिताः॥७॥ भ्रातरं निहतं श्रुत्वा रामेणाक्लिष्टकारिणा॥ महोदरमहापार्श्वौ शोकाक्रांतौ बभूवतुः॥८॥ ततः कृच्छ्रात्समासाद्य संज्ञां राक्षसपुंगवः॥ कुंभकर्णवधाद्दीनो विललापाकुलेंद्रियः॥९॥ श्र

द्वारं रुद्ध्वा पर्वतोपमः कुंभकर्णो रामतेजसा प्रशांत इति पूर्वश्लोकेनान्वयः॥४॥ अगंडभूतः अशरीरः पाणिपादरक्तकबंधोऽगंड उच्यते॥ विवृत्तकायः अवस्त्रत्वात् दावदग्धो द्रुम इव प्रशांत इत्यन्वयः॥५॥६॥ देवांतकादयो रावणपुत्राः॥७॥ महोदरमहापार्श्वौ विमातृजौ भ्रातरौ तस्य॥८॥ ९॥ ॥

७१॥७२॥७३भ्रूरिणामहता॥७४॥देवलोकस्य आकाशस्य मध्ये इतिशेषः व्यभासीत् विशेषेण भातिस्म
७५॥प्रबुद्धपद्मप्रतिमैरिव॰प्रबुद्धपद्मरूपैरिव अतोनेवशब्दवैयर्थ्यं इक्ष्वभागिनं इक्ष्वप्राप्तिमंतं

तद्वापिकायंद्दिमहत्प्रकाशंरक्तास्तदातोयनिधौपपात॥ग्राहान्परान्मीनवरान्भुजंगमान्ममर्द भूमिंचतथाविवेश॥७१॥तस्मिन्हतेब्राह्मणदेवशत्रौमहाबलेसंयतिकुंभकर्णे॥चचालभूर्भूमिधराश्चसर्वेहर्षाच्चदेवास्तुमुलंप्रणेदुः॥७२॥ततस्तुदेवर्षिमहर्षिपन्नगाःसुराश्चभूतानिसुपर्णगुह्यकाः॥सयक्षगंधर्वगणानभोगताःप्रहर्षितारामपराक्रमेण॥७३॥ततस्तुतेनस्यवधेनभूरिणामनस्विनोनैर्ऋतराजबांधवाः॥विनेदुरुच्चैर्व्यथितारघूत्तमंहरिंसमीक्ष्यैवयथामतंगजाः॥७४॥सदेवलोकस्यतमोनिहत्यसूर्योयथाराहुमुखाद्विमुक्तः॥तथाव्यभासीद्धरिसैन्यमध्येनिहत्यरामोयुधिकुंभकर्णं॥७५॥प्रहर्षमीयुर्बहवश्चवानराःप्रबुद्धपद्मप्रतिमैरिवाननैः॥आपूजयन्राघवमिष्टभागिनंहतेरिपौभीमबलेनपात्मजे॥७६॥सकुंभकर्णंसुरसैन्यमर्दनंमहत्सुयुद्धेषुकदाचनाजितं॥ननंदहत्वाभरताग्रजोरणेमहासुरंवृत्रमिवामराधिपः॥७७॥इत्यार्षेश्रीरा॰यु॰सप्तषष्टितमःसर्गः॥६७॥

॥७६॥कदाचननकदापिजितंनकदापिजयवंतं॥७७॥२००५॥धनुरमानःसर्गः॥६१॥अत्रदिनद्वयेनकुंभकर्णोत्थानंततःसप्तमवासरेवधइतिभाद्रपूर्णिमायामेतद्वधइतिपा [illegible] भविष्यति॥इतिश्रीयुद्धकांडेसप्तषष्टितमःसर्गः॥६

परिघंसमादायस्थितोदेवांतकः दोर्भ्यांगिरिंसमुद्रमथनेमंदरगिरिः परिगृह्यस्थितस्यविष्णोर्वपुर्वि
डंबयन् विरराजेत्यनुकर्षः ॥३२॥३३॥ अमरावत्याःसुराइवलंकायाःप्रतस्थुरित्यन्वयः ॥३४॥३५॥ दे

देवांतकःसमादायपरिघंहेमभूषणं॥ परिगृह्यगिरिंदोर्भ्यांवपुर्विष्णोर्विडंबयन्॥३२॥ महा
पार्श्वमहातेजागदामादायवीर्यवान्॥ विरराजगदापाणिःकुवेरइवसंयुगे॥३३॥ तेप्रतस्थु
र्महात्मानोमरावत्याःसुराइव॥ नान्गजैश्चतुरगैश्चरथैश्चांबुदनिस्वनैः॥३४॥ अन्त्ये तु
र्महात्मानोराक्षसाःप्रवरायुधाः॥ तेविरेजुर्महात्मानःकुमाराःसूर्यवर्चसः॥३५॥ किरीटिनःश्रि
याजुष्टाग्रहादीप्ताइवांबरे॥ प्रगृहीताबभौतेषांवस्त्राणामावलिःशिवा॥३६॥ शारदभ्रप्रतीका
शाहंसावलिरिवांबरे॥ मरणंवापिनिश्चित्यशत्रूणांवापराजयं॥३७॥ इतिकृत्वामतिवीराःसंज
ग्मुःसंयुगार्थिनः॥ जगर्जुश्चप्रणेदुश्चचिक्षिपुश्चापिसायकान्॥३८॥ जगर्हुश्चमहात्मानोनिर्या
नायुद्धदुर्मदाः॥ क्ष्वेडितास्फोटितानांवैसंचचालेवमेदिनी॥३९॥ रक्षसांसिंहनादैश्चसंस्फोटित
मिवांबरं॥ तेभिनिष्क्रम्यमुदिताराक्षसेंद्रामहाबलाः॥४०॥

निश्चित्यनिश्चयेनमरणंशत्रुपराजयंवाकरिष्यामइतिशेषः॥३७॥ चिक्षिपुःशत्रुविषयादेपवचनान्प्र
चक्रुःसायकानित्यस्यजगर्हुरित्यनेनान्वयः॥३८॥ क्ष्वेडितास्फोटितानांचतैरित्यर्थः॥३९॥ ४०॥ राम

सवितेवास्तमूर्धनीत्यनेनशीघ्रंनाशःसूचितः॥२२॥२३॥विद्युद्भिरुल्काभिःसहितः॥२४॥कांचनपर्व
तैःशिखरभूतैर्युक्तोहिमवानिव॥२५॥२६॥सुसंयुक्तंसुसंयुक्ताश्वंसानुकर्षंरथाद्धोपरिकूब

सर्वायुधसमायुक्तस्तूणीभिश्चाप्यलंकृतः॥रराजगजमास्थायसवित्तेवास्तमर्द्धनि॥२२॥
हयोत्तमसमायुक्तंसर्वायुद्धसमाकुलं॥आरुरोहरथश्रेष्ठंत्रिशिरारावणात्मजः॥२३॥त्रिशि
रारथमास्थायविरराजधनुर्धरः॥सविद्युदुल्कःसज्वालःसेंद्रचापइवांबुदः॥२४॥त्रिभिःकि
रीटैस्त्रिशिराःशुशुभेसरथोत्तमे॥हिमवानिवशैलेंद्रस्त्रिभिःकांचनपर्वतैः॥२५॥अतिका
योतितेजस्वीराक्षसेंद्रसुतस्तदा॥आरुरोहरथश्रेष्ठंश्रेष्ठःसर्वधनुष्मतां॥२६॥सुचक्रा
क्षंसुसंयुक्तंसानुकर्षंसकूबरं॥तूणीबाणासनैर्दीप्तंप्रासासिपरिघाकुलं॥२७॥सकांचन
विचित्रेणकिरीटेनविराजतां॥भूषणैश्चबभौमेरुःप्रभाभिरिवभासयन्॥२८॥सरराज
रथेतस्मिन्राजसूनुर्महाबलः॥वृतोनैर्ऋतशार्दूलैर्वज्रपाणिरिवामरैः॥२९॥हयमुच्चैःश्र
वप्रख्यंश्वेतंकनकभूषणं॥मनोजवंमहाकायमारुरोहनरांतकः॥३०॥गृहीत्वाप्रासमु
ल्काभंविरराजनरांतकः॥शक्तिमादायतेजस्वीगुहःशिखिगतोयथा॥३१॥

राधारतयास्था
पितोदारुविशेषोनुकर्षःअनुकर्षोदार्वधस्थमित्यमरःसकूबरंकूबरंस्त्रीयुगंधरः॥२७॥२८॥२९॥ ३०॥३१

शैलशृंगान्वितांगाः गिरिशिखरैर्व्याप्तदेहाः मुष्टिभिर्मुष्टिप्रहारैर्वांतलोचनाः बहिर्निर्गतलोचनाः
५२॥५३॥५४॥५५॥५६॥ आक्षिप्ताः क्षिप्यमाणा इति नियुद्धप्रकारकथनं· भग्नशैलैश्च वानरैः राक्षस

निर्जघ्नुः सहसा वीरान्यातुधानान्प्लवंगमाः॥ शैलशृंगाचितांगास्ते मुष्टिभिर्वांतलोचनाः॥५२॥
चेलुः पेतुश्च नेदुश्च तत्र राक्षसपुंगवाः॥ राक्षसाश्च शरैस्तीक्ष्णैर्विभिदुः कपिकुंजरान्॥५३॥ शूलमुद्गर
खड्गैश्च जघ्नुः प्रासैश्च शक्तिभिः॥ अन्योन्यं पातयामासुः परस्परजयैषिणः॥५४॥ रिपुशोणितदिग्धां
गास्तत्र वानरराक्षसाः॥ ततः शैलैश्च खड्गैश्च विसृष्टैर्हरिराक्षसैः॥ मुहुर्त्तेनावृता भूमिरभवच्छोणि
तोक्षिता॥५५॥ विकीर्णैः पर्वताकारै रक्षोभिरभिमर्दितैः॥ आसीद्वसुमती पूर्णा तदा युद्धमदान्वि
तैः॥५६॥ आक्षिप्ताः क्षिप्यमाणाश्च भग्नशैलैश्च वानरैः॥ पुनरंगैस्तदा चक्रुर्वानरा युद्धमद्भुतं॥५७॥
वानरान्वानरैरेव जघ्नुस्ते नैर्ऋतर्षभाः॥ राक्षसान्राक्षसैरेव जघ्नुस्ते वानरा अपि॥५८॥ आक्षि
प्य च शिलाशैलान् जघ्नुस्ते राक्षसास्तदा॥ तेषां चाच्छिद्य शस्त्राणि जघ्नू रक्षांसि वानराः॥५९॥ नि
र्जघ्नुः शैलशृंगैश्च बिभिदुश्च परस्परं॥ सिंहनादान्विनेदुश्च रणे राक्षसवानराः॥६०॥ श्र

भग्नस्वयुद्धसाधनशैलादिभिरतएव पुनरंगैर्हस्तपादादिभिरासन्नाभूत्वा युद्धं चक्रुः॥५७॥५८॥ आ
क्षिप्य बलात् गृहीत्वा॥५९॥६०॥

समुद्यतशिलानगं· समुद्यताः शिलानगावृक्षाश्च येन तत् ॥४१॥४२॥४३॥ प्रतिनर्दंत· प्रत्यनर्दंत ॥४४॥ परहर्षं श

ददृशुर्वानरानीकं समुद्यतशिलानगं ॥ हरयोपि महात्मानो ददृशू राक्षसंबलं ॥४१॥ हस्त्यश्वरथ
संबाधं किंकिणीशतनादितं ॥ नीलजीमूतसंकाशं समुद्यतमहायुधं ॥४२॥ दीप्तानलरविप्रख्यै
र्नैर्ऋतैः सर्वतोवृतं ॥ तं दृष्ट्वा बलमायांतं लब्धलक्षाः प्लवंगमाः ॥४३॥ समुद्यतमहाशैलाः संप्र
णेदुर्मुहुर्मुहुः ॥ अमर्षमाणा रक्षांसि प्रतिनर्दंत वानराः ॥४४॥ ततः समुत्कृष्टरवं निशम्य र
क्षोगणा वानरयूथपानां ॥ अमर्षमाणाः परहर्षमुग्रं महाबला भीमतरं प्रणेदुः ॥४५॥ ते राक्ष
सबलं घोरं प्रविश्य हरियूथपाः ॥ विचेरुरुद्यतैः शैलैर्नगाः शिखरिणो यथा ॥४६॥ केचिदाका
शमाविश्य केचिदुर्व्यां प्लवंगमाः ॥ रक्षःसैन्येषु संक्रुद्धाः केचिद्द्रुमशिलायुधाः ॥४७॥ द्रुमांश्च वि
पुलस्कंधान् गृह्य वानरपुंगवाः ॥ तद्युद्धमभवद्घोरं रक्षोवानरसंकुलं ॥४८॥ ते पादपशिलाशैलै
श्चक्रुर्वृष्टिमनूपमां ॥ बाणौघैर्वार्यमाणाश्च हरयो भीमविक्रमाः ॥४९॥ सिंहनादान्विने
दुश्च रणे राक्षसवानराः ॥ शिलाभिश्चूर्णयामासुर्यातुधानान्प्लवंगमाः ॥५०॥ निर्जघ्नुः सं
युगे क्रुद्धाः कवचाभरणावृतान् ॥ केचिद्रथगतान्वीरान् गजवाजिगतानपि ॥५१॥

त्रुहर्षं· अमर्षमाण ॥४६॥ केचिद्द्रुमशिलायुधा इति स्वभावोक्तिः तादृशाः प्लवंगमाः रक्षःसैन्ये
षु संक्रुद्धाः आकाशमाविश्य चेरुः केचिद्विपुलस्कंधान्द्रुमान्गृहीत्वोर्व्यां चेरुः ॥४७॥४८॥४९॥५०॥५१॥

मार्गोयुद्धार्थंगमनमार्गः पतितैर्वानरैरभिसंवृत्तोमांसशोणितकर्दमःसन्ददृशेदृष्टः॥७०॥७१॥७२॥७३

सतस्यददृशेमार्गोमांसशोणितकर्दमः॥ पतितैःपर्वताकारैर्वानरैरभिसंवृतः॥७०॥ यावद्वि
क्रमितुंबुद्धिंचक्रुःप्लवगपुंगवाः॥ तावदेतानतिक्रम्यनिर्विभेदनरांतकः॥७१॥ ददाहहरि
सैन्यानिवनानीवविभावसुः॥ यावदुत्पाटयामासुर्वृक्षान्शैलान्वनौकसः॥७२॥ तावत्प्रास
हताःपेतुर्वज्रकृत्ताइवाचलाः॥ ज्वलंतंप्रासमुद्यम्यसंग्रामांतेनरांतकः॥७३॥ दिक्षुसर्वासु
बलवान्विचचारनरांतकः॥ प्रमृद्नन्सर्वतोयुद्धेप्रावट्कालेयथानिलः॥७४॥ नशेकु
र्धावितुंवीरानस्थातुंस्पंदितुंकुतः॥ उत्पतंतंस्थितंयांतंसर्वान्विव्याधवीर्यवान्॥७५॥ एके
नांतककल्पेनप्रासेनादित्यतेजसा॥ भग्नानिहरिसैन्यानिनिपेतुर्धरणीतले॥७६॥ वज्रनि
ष्पेषसदृशंप्रासस्याभिनिपातनं॥ नशेकुर्वानराःसोढुंतेविनेदुर्महास्वनं॥७७॥ पततांहरिवी
राणांरूपाणिप्रचकाशिरे॥ वज्रभिन्नाग्रकूटानांशैलानांपततामिव॥७८॥ येतुपूर्वंमहा
त्मानःकुंभकर्णेनपातिताः॥ तेस्वस्थावानरश्रेष्ठाःसुग्रीवमुपतस्थिरे॥७९॥ प्रेक्षमाणःस
सुग्रीवोददृशेहरिवाहिनीं॥ नरांतकभयत्रस्तांविद्रवंतींयतस्ततः॥८०॥

212

७४॥७५॥७६॥७७॥७८॥ स्वस्थाःस्वस्थचित्तेंद्रियाः वानरश्रेष्ठाःअंगदादयः॥७९॥ ८०॥ रामरामराम

प्रस्रुताः स्रुतवंतः रससारो निर्यासः ॥ ६१ ॥ ६२ ॥ ६३ ॥ पर्वतास्तैर्निरस्तपर्वतैः द्रुमाश्छिन्नैः छिन्नद्रुमैः विकीर्णा

छिन्नवर्मतनुत्राणाराक्षसावानरैर्हताः ॥ रुधिरंप्रस्रुतास्तत्ररससारमिवद्रुमाः ॥ ६१ ॥ रथेनचरथं
चापिवारणेनापिवारणं ॥ हयेनचहयंकेचिन्निर्जघ्नुर्वानरारणे ॥ ६२ ॥ क्षुरप्रैरर्द्धचंद्रैश्चभल्लैश्च
निशितैःशरैः ॥ राक्षसावानरेंद्राणांबिभिदुःपादपान्शिलाः ॥ ६३ ॥ विकीर्णाःपर्वतास्तैश्चद्रुमैश्छि
न्नैश्चसंयुगे ॥ हतैश्चकपिरक्षोभिर्दुर्गमावसुधाभवत् ॥ ६४ ॥ तेवानरागर्वितहृष्टचेष्टाः संग्राममा
साद्यभयंविमुच्य ॥ युद्धंस्मसर्वेसहराक्षसैस्तेनानायुधाश्चक्रुरदीनसत्वाः ॥ ६५ ॥ तस्मिन्प्रवृत्तेतु
मुलेविमर्देप्रहृष्यमाणेषुबलीमुखेषु ॥ निपात्यमानेषुचराक्षसेषुमहर्षयोदेवगणाश्चनेदुः ॥ ६६ ॥
ततोहयंमारुततुल्यवेगमारुह्यशक्तिंनिशितांप्रगृह्य ॥ नरान्तकोवानरसैन्यमुग्रंमहार्णवंमीन
इवाविवेश ॥ ६७ ॥ सवानरान्सप्तशतानिवीरःप्रासेनदीप्तेनविनिर्बिभेद ॥ एकःक्षणेनेंद्ररिपुर्महा
त्माजघानसैन्यंहरिपुंगवानां ॥ ६८ ॥ ददृशुश्चमहात्मानंहयपृष्ठप्रतिष्ठितं ॥ चरंतंहरिसैन्येषुवि
द्याधरमहर्षयः ॥ ६९ ॥

व्याप्ताः ॥ ६४ ॥ गर्वितहृष्टचेताः संजातगर्वात्हृष्टाश्चेष्टायेषांते ॥ नानायुधाः द्रुमशैलदंतनखादिनाना
प्रहरणायुताः ॥ ६५ ॥ प्रहृष्यमाणेषुप्रहृष्यत्सुबलीमुखेषुवानरेषु ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥

९०॥स्फुरिताक्षितारःस्फुरिताविशीर्णा॰अक्षतास्ताराकनीकायस्यसः॥९१॥९२॥९३॥९४॥मुष्टिनानिर्भिन्न

तंप्रासमालोक्यतदाविभग्नंसुपर्णकृत्तोरगवीर्यकल्पं॥तलंसमुद्यम्यसवालिपुत्रस्तुरंगमस्याभिजघानमूर्द्धि॥९०॥निभग्नपादःस्फुरिताक्षितारोनिष्क्रांतजिह्वोचलसन्निकाशः॥सतस्यवाजीनिपपातभूमौतलप्रहारेणविकीर्णमूर्द्धा॥९१॥नरांतकःक्रोधवशंजगामहतंतुरंगंपतितंसमीक्ष्य॥समुष्टिमुद्यम्यमहाप्रभावोजघानशीर्षेयुधिवालिपुत्रं॥९२॥अथांगदोमुष्टिविशीर्णमूर्द्धासुस्रावतीव्रंरुधिरंभृशोष्णं॥मुहुर्विजिज्वालमुमोहचापिसंज्ञांसमासाद्यविसिस्मियेच॥९३॥अथांगदोमृत्युसमानवेगंसंवर्त्यमुष्टिंगिरिशृंगकल्पं निपातयामासतदामहात्मानरांतकस्योरसिवालिपुत्रः॥९४॥समुष्टिनिर्भिन्ननिमग्नवक्षाज्वालावमन्शोणितदिग्धगात्रः॥नरांतकोभूमितलेपपातयथाचलोवज्रनिपातभग्नः॥९५॥तदांनरिक्तेत्रिदशोत्तमानांवनौकसांचैवमहाप्रणादः॥बभूवतस्मिन्निहतेग्र्य॰वीर्येनरांतकेवालिसुतेनसंख्ये॥९६॥

मतएवनिमग्नंवक्षोयस्यसः ज्वालाःअभिघातोत्थावमन्॥९५॥९६॥रा मरामरारामरामरामरा

८१॥८२॥गच्छैनंराक्षसमितिहंतुमितिशेषः॥८३॥मेघसंकाशादनीकात् स्वसेनामध्यात्॥८४॥अंगदेनदि

विद्रुतांवाहिनींदृष्ट्वासददर्शनरांतकं॥गृहीतप्रासमायांतंहयपृष्ठप्रतिष्ठितं॥८१॥दृष्ट्वोवा
चमहातेजाःसुग्रीवोवानराधिपः॥कुमारमंगदंवीरंशक्रतुल्यपराक्रमं॥८२॥गच्छैनंराक्षसंवीरं
योसौतुरगमास्थितः॥भक्षयंतंपरबलंक्षिप्रंप्राणैर्वियोजय॥८३॥सभर्तुर्वचनंश्रुत्वानिष्पपा
तांगदस्तदा॥अनीकान्मेघसंकाशादंशुमानिववीर्यवान्॥८४॥शैलसंघातसंकाशोहरीणामु
त्तमोंगदः॥रराजांगदसन्नद्धःसधातुरिवपर्वतः॥८५॥निरायुधोमहातेजाःकेवलंनखदंष्ट्र
वान्॥नरांतकमभिक्रम्यवालिपुत्रोब्रवीद्वचः॥८६॥तिष्ठकिंप्राकृतैरेभिर्हरिभिस्त्वंकरिष्य॰
सि॥अस्मिन्वज्रसमस्पर्शंप्रासंक्षिपममोरसि॥८७॥अंगदस्यवचःश्रुत्वाप्रचुक्रोधनरांतकः
संदश्यदशनैरोष्ठंनिश्वस्यचभुजंगवत्॥८८॥अभिगम्यांगदंक्रुद्धोवालिपुत्रंनरांतकः॥सप्रा
समाविध्यनदांगदेयसमुज्वलंतंसहसोत्ससर्ज॥सवालिपुत्रोरसिवज्रकल्पेबभूवभग्नोन्यपत
च्चभूमौ॥८९॥

स्वभुजाभरणेनसन्नद्धोयुक्तः॥८५॥८६॥अस्मिन्ममोरसिक्षिपेत्यन्वयः॥८७॥८८॥वालिपुत्रमभिगम्यप्रा
समुत्ससर्ज॰ सप्रासः भग्नोभवत् भूमौन्यपतच्च॥८९॥

।।५।।६।।७।।८।।९।। अस्यमहागजंमहोदरस्यगजं ।।१०।।११।।१२।। लाक्षारसेनसमानोवर्णोयस्यतद्रुधिरं ।।

सववर्षततोवृक्षान्शिलाश्चकपिकुंजरः ।। तान्प्रचिच्छेदसंक्रुद्धस्त्रिशिरानिशितैःशरैः ।।५।।
परिघाग्रेणतान्वृक्षान्बभंजसमहोदरः ।। त्रिशिराश्चांगदंवीरमभिदुद्रावसायकैः ।।६।। गजे
नसमभिद्रुत्यवालिपुत्रंमहोदरः ।। जघानोरसिसंक्रुद्धस्तोमरैर्वज्रसन्निभैः ।।७।। देवांतकश्चसं
क्रुद्धःपरिघेणतदांगदं ।। उपगम्याभिहत्याशुव्यपचक्रामवेगवान् ।।८।। सत्रिभिर्नैऋतश्रेष्ठै
र्युगपत्समभिद्रुतः ।। नविव्यथेमहातेजावालिपुत्रःप्रतापवान् ।।९।। सवेगवान्महावेगंकृ ।
त्वापरमदुर्जयः ।। तलेनसमभिद्रुत्यजघानास्यमहागजं ।।१०।। पेततुर्नयनेतस्यविननाश
सकुंजरः ।। विषाणंचास्यनिष्कृष्यवालिपुत्रोमहाबलः ।।११।। देवांतकमभिद्रुत्यताडयामास
संयुगे ।। सविह्वलस्तुतेजस्वीवातोद्धतइवद्रुमः ।।१२।। लाक्षारससवर्णंचसुस्रावरुधिरंम
हत् ।। अथाश्वस्यमहातेजाःकृच्छ्राद्देवांतकोबली ।।१३।। आविध्यपरिघंवेगादाजघानतदां
गदं ।। परिघाभिहतश्चापिवानरेंद्रात्मजस्तदा ।।१४।। जानुभ्यांपतितोभूमौपुनरेवोत्पपातह
तमुत्पतंतंत्रिशिरास्त्रिभिर्बाणैरजिह्मगैः ।।१५।।

।।१३।।१४।। अजिह्मगैः ।। ऋजुगामिभिः ।।१५।।

रामममनःप्रहर्षणं।रामस्यमनसः प्रहर्षणः।सोपिरामोपि। अथातिभीमकर्मांगदः पुनश्चयुद्धेयुद्धनिमित्तंहर्षितो
बभूव। तुष्टः सन्। सन्नद्धोबभूवेत्यर्थः॥९१॥अत्रसर्गावच्छेदोबहुषुपुस्तकेषुनदृश्यतइत्यस्माभिरपिन

अथांगदोराममनःप्रहर्षणंसुदुष्करंकृतवान्हि विक्रमं॥विसिस्मियेसोप्यथभीमकर्मापुनश्च
युद्धेसबभूवहर्षितः॥९१॥सर्गः॥६९॥ नरांतकंहतंदृष्ट्वा चुक्रुशुर्नैर्ऋतर्षभाः॥देवांतकस्त्रिमू।
र्द्धाचपौलस्त्यश्चमहोदरः॥९८॥आरूढोमेघसंकाशंवानरेंद्रंमहोदरः॥वालिपुत्रंमहावीर्य।
मभिदुद्राववेगवान्॥९९॥भ्रातृव्यसनसंतप्तस्तदादेवांतकोबली॥आदायपरिघंघोरमंगदं
समभिद्रवत्॥१००॥रथमादित्यसंकाशंयुक्तंपरमवाजिभिः॥आस्थायत्रिशिरावीरोवालिपु
त्रमथाभ्यगात्॥१॥सत्रिभिर्देवदर्पघ्नैराक्षसेंद्रैरभिद्रुतः॥वृक्षमुत्पाटयामाससमहाविटपमं
गदः॥२॥देवांतकायतंवीरश्चिक्षेपसहसांगदः॥महावृक्षंमहाशाखंशक्रोदीप्तामिवाश
निं॥३॥त्रिशिरास्तंप्रचिच्छेदशरैराशीविषोपमैः॥सवृक्षंकृंतमालोक्यउत्पपाततदांगदः ४

कृतः। पूर्वोत्तरवाक्ययोरेककर्तृकयुद्धवर्णनादिनिकृतकः सर्गः॥६९॥ ९८॥९९॥१००॥१॥२॥दी
प्तामशनिमिंद्रवज्रंचिक्षेप॥३॥त्रिशिरास्तमिति। देवांतकायप्रक्षिप्तंवृक्षंतत्सहार्थमितिशेषः॥४॥

तडिच्चक्रंचापमिंद्रधनुश्चयस्यास्तिसः॥२५॥विसृष्टगात्रःश्लथगात्रःविष्टंभितोनिरुद्धपराक्रमः॥२६॥२७

ततोवाणमयंवर्षंनीलस्योपर्यपातयन्॥गिरौवर्षंतडिच्चक्रःसगर्जइवतोयदः॥२५॥ततःश
रौघैरभिवृष्यमाणोविभिन्नगात्रःकपिसैन्यपालः॥नीलोबभूवाथविसृष्टगात्रोविष्टंभितस्ते
नमहाबलेन॥२६॥ततस्तुनीलःप्रतिलभ्यसंज्ञांशैलंसमुत्पाट्यसवृक्षखंडं॥ततःसमुत्पत्य
महोग्रवेगोमहोदरंतेनजघानमूर्ध्नि॥२७॥ततःसशैलाभिनिपातभग्नोमहोदरस्तेनम
हाद्विपेन॥व्यपोहितोभूमितलेगतासुःपपातवज्राभिहतोयथाद्रिः॥२८॥पितृव्यंनिहतंदृ
ष्ट्वात्रिशिराश्चापमाददे॥हनूमंतंचसंक्रुद्धोविव्याधनिशितैःशरैः॥२९॥सवायुसूनुःकु
पितश्चिक्षेपशिखरंगिरेः॥त्रिशिरास्तच्छरैस्तीक्ष्णैर्विभेदबहुधाबली॥३०॥तद्व्यर्थंशिखरं
दृष्ट्वाद्रुमवर्षंतदाकपिः॥विससर्जरणेतस्मिन्रावणस्यसुतंप्रति॥३१॥तमापतंतमाका
शेद्रुमवर्षंप्रतापवान्॥त्रिशिरानिशितैर्बाणैश्चिच्छेदचननादच॥३२॥हनूमांस्तुसमुत्प
त्यहयंत्रिशिरसस्तदा॥विददारनखैःक्रुद्धोनागेंद्रंमृगराडिव॥३३॥अथशक्तिंसमासा
द्यकालरात्रिमिवांतकः॥चिक्षेपानिलपुत्रायत्रिशिरारावणात्मजः॥३४॥ श्र ॥

215

२८॥पितृव्यंमहोदरं॥२९॥३०॥३१॥३२॥विददारविदारितवान्॥३३॥३४॥रामरामरामराम

१६॥१७॥१८॥ गिरेः शिरः पर्वतस्य शृंगं॥ विजंभितं त्रिशिरसः पर्वतशिखरभेदनरूपं जंभणमालोक्य॥१९॥

घोरैर्हरिपतेः पुत्रं ललाटेभिजघान ह॥ ततोंगदं परिक्षिप्तं त्रिभिर्नैर्ऋतपुंगवैः॥१६॥ हनूमानथ वि
ज्ञाय नीलश्चापि प्रतस्थतुः॥ ततश्चिक्षेप शैलाग्रं नीलस्त्रिशिरसे तदा॥१७॥ तद्रावणसुतो धीमा
न्बिभेद निशितैः शरैः॥ तद्बाणशतनिर्भिन्नं विदारितशिलातलं॥१८॥ स विस्फुलिंगं सज्वालं निप
पात गिरेः शिरः॥ स विजंभितमालोक्य हर्षाद्देवांतको बली॥१९॥ परिघेणाभिदुद्राव मारुतात्मज
माहवे तमापतंतमुत्पत्य हनुमान्कपिकुंजरः॥२०॥ आजघान तदा मूर्ध्नि वज्रकल्पेन मुष्टिना।
शिरसि प्रहरद्वीरस्तदा वायुसुतो वली॥ नादेनाकंपयच्चैव राक्षसान्स महाकपिः॥२१॥ स मुष्टि
निष्पिष्टविभिन्नमूर्द्धा निर्वर्तितदंताक्षिविलंबिजिह्वः॥ देवांतको राक्षसराजसूनुर्गतासुरु
र्व्यां सहसा पपात॥२२॥ तस्मिन्हते राक्षसयोधमुख्ये महाबले संयति देवशत्रौ॥ क्रुद्धस्त्रिशी
र्षा निशितास्त्रमुग्रं ववर्ष नीलोरसि बाणवर्षं॥२३॥ महोदरस्तु संक्रुद्धः कुंजरं पर्वतोपमं॥ भू
यः समधिरुह्याशु मंदरं रश्मिमानिव॥२४॥

तं परिघहस्तं देवांतकं॥२०॥२१॥ निर्वर्तिता बहिर्निर्गता दंताक्षिणी विलंबिजिह्वा च यस्य सः॥२२॥२३॥
भूयः समधिरुह्येति युद्धागमनवेलायामारूढगजस्यांगदेन हतत्वादिति भावः॥२४॥

॥४५॥ युद्धोन्मत्तं महोदरं तथैव च हतं इति शेषः एतद्वधो हनूमताकृत इत्यनुवादवत्वाद्द्रष्टव्यं ॥४६॥ मत्त

तस्मिन्हते देवरिपौ त्रिशीर्षे हनूमता शक्रपराक्रमेण ॥ नेदुः प्लवंगाः प्रचचाल भूमी रक्षांस्यथो
दुद्रुविरे समंतात् ॥४५॥ हतं त्रिशिरसं दृष्ट्वा युद्धोन्मत्तं तथैव च ॥ हतौ प्रेक्ष्य दुराधर्षौ देवांतकन
रांतकौ ॥४६॥ चुकोप परमामर्षी मत्तो राक्षसपुंगवः ॥ जग्राहार्चिष्मतीं चापि गदां सर्वायसीं तदा
॥४७॥ हेमपट्टपरिक्षिप्तां मांसशोणितफेनिलां ॥ विराजमानां विपुलां शत्रुशोणिततर्पितां ॥४८॥
तेजसा संप्रदीप्ताग्रां रक्तमाल्यविभूषितां ॥ ऐरावतमहापद्मसार्वभौमभयावहां ॥४९॥ गदा
मादाय संक्रुद्धो मत्तो राक्षसपुंगवः ॥ हरीन्समभिदुद्राव युगांताग्निरिव ज्वलन् ॥५०॥ अथ
र्षभः समुत्पत्य वानरो रावणानुजं ॥ मत्तानीकमुपागम्य तस्थौ तस्याग्रतो बली ॥५१॥ तं पुरस्ता
त्स्थितं दृष्ट्वा वानरं पर्वतोपमं ॥ आजघानोरसि क्रुद्धो गदया वज्रकल्पया ॥५२॥ स तयाभि
हतस्तेन गदया वानरर्षभः ॥ भिन्नवक्षाः समाधूतः सुस्राव रुधिरं बहु ॥५३॥ स संप्राप्य चिरा
त्संज्ञामृषभो वानरेश्वरः ॥ क्रुद्धो विस्फुरमाणौष्ठो महापार्श्वमुदैक्षत ॥५४॥ स वेगवान्वेगव
दभ्युपेत्य तं राक्षसं वानरवीरमुख्यः ॥ संवर्त्य मुष्टिं सहसा जघान बाह्वंतरे शैलनिकाशरूपः ॥५५॥

स्तदाख्यो महापार्श्वः ॥४७॥ ऐरावतादयो दिग्गजाः ॥४८॥४९॥५०॥५१॥५२॥५३॥५४॥ ५५॥ रामराम

दिवः क्षिप्तामाकाशान्निर्गतां· असंगतां अनर्गलगतिं ॥३५॥ घोरसंकाशां· भयंकरस्वरूपां ॥३६॥३७॥३८॥ त्यक्तचे

दिवः क्षिप्तामिवोल्कां तां शक्तिं क्षिप्तामसंगतां ॥ गृहीत्वा हरिशार्दूलो बभंज च ननाद च ॥३५॥ तां दृष्ट्वा
घोरसंकाशां शक्तिं भग्नां हनूमता ॥ प्रहृष्टा वानरगणा विनेदुर्जलदा यथा ॥३६॥ ततः खड्गं समुद्यम्य
त्रिशिरा राक्षसोत्तमः ॥ निचखान तदा खड्गं वानरेंद्रस्य वक्षसि ॥३७॥ खड्गप्रहाराभिहतो हनू
मान्मारुतात्मजः ॥ आजघान त्रिमूर्धानं तलेनोरसि वीर्यवान् ॥३८॥ स तलाभिहतस्तेन स्रस्तहस्तांबरो
भुवि ॥ निपपात महातेजास्त्रिशिरास्त्यक्तचेतनः ॥३९॥ स तस्य पततः खड्गं तमाच्छिद्य महाक
पिः ॥ ननाद गिरिसंकाशस्त्रासयन्सर्वराक्षसान् ॥४०॥ अमृष्यमाणस्तं घोषमुत्पपात निशाचरः
उत्पत्य च हनूमंतं ताडयामास मुष्टिना ॥४१॥ तेन मुष्टिप्रहारेण संचुकोप महाकपिः ॥ कुपितश्च
निजग्राह किरीटे राक्षसर्षभं ॥४२॥ स तस्य शीर्षाण्यसिना शितेन किरीटजुष्टानि सकुंडलानि
क्रुद्धः प्रचिच्छेद सुतो निलस्य त्वष्टुः सुतस्येव शिरांसि शक्रः ॥४३॥ तान्यायताक्षाण्यगसंनिभानि
प्रदीप्तवैश्वानरलोचनानि ॥ पेतुः शिरांसींद्ररिपोः पृथिव्यां ज्योतींषि मुक्तानि यथार्कमार्गात् ॥४४॥

तनः विसंज्ञः ॥३९॥४०॥४१॥ किरीटे किरीटप्रदेशे ॥४२॥ त्वष्टुः सुतस्य विश्वरूपस्य ॥४३॥ आयताक्षाणि आ
यतनेंद्रियाणि ॥४४॥

स्वबलमिति॥१॥ पितृव्यौ कावित्यत्राह॰ युद्धोन्मत्तंचेत्यादि भ्रातरावन्योन्यंभ्रातरौ॰ एतदुक्तिः परस्परसौहार्द्दाति

स्वबलंव्यथितं दृष्ट्वा तुमुलंलोमहर्षणं॥ भ्रातॄंश्च निहतान्दृष्ट्वा शक्रतुल्यपराक्रमान्॥१॥ पितृव्यौ चापिसंदृश्य समरे सन्निपातितौ॥ युद्धोन्मत्तंच मत्तंच भ्रातरौ राक्षसोत्तमौ॥२॥ चुकोप च महातेजा ब्रह्मदत्तवरो युधि॥ अतिकायोद्रिसंकाशो देवदानवदर्पहा॥३॥ सभास्करसहस्रस्य संघातमिव भास्वरं॥ रथमारुह्य शक्रारिरभिदुद्राव वानरान्॥४॥ स विस्फार्य तदा चापं किरीटी मष्टकुंडलः॥ नाम संश्रावयामास ननाद च महास्वनं॥५॥ तेन सिंहप्रणादेन नामविश्रावणेन च॥ ज्याशब्देन च भीमेन त्रासयामास वानरान्॥६॥ ते दृष्ट्वा देहमाहात्म्यं कुंभकर्णोयमुत्थितः॥ भयार्त्ता वानराः सर्वे संश्रयंते परस्परं॥७॥ ते तस्य रूपमालोक्य यथा विष्णोस्त्रिविक्रमे॥ भयाद्वानरयोधास्ते विद्रवंति ततस्ततः॥८॥ तेतिकायं समासाद्य वानरा मूढचेतसः॥ शरण्यं शरणं जग्मुर्लक्ष्मणाग्रजमाहवे॥९॥ ततोतिकायं काकुत्स्थो रथस्थं पर्वतोपमं॥ ददर्श धन्विनं दूरात् गर्जं तं कालमेघवत्॥१०॥

शयप्रतिपादनाय॥२॥३॥ सूर्यसहस्रसमुदायवद्भास्वरं॥४॥५॥६॥ कुंभकर्णोयमुत्थित इति मन्यमानाः परस्परंसंश्रयंते रक्षणार्थमिति शेषः॥७॥ तेरूपमालोक्यते इव वानरा इव विद्रवंतीति तत्र द्रव इव निर्वाहः इवेति शेषः॥८॥९॥१०॥ श्री

५६॥५७॥५८॥५९॥६०॥६१॥६२ भिन्नार्णवसन्निकाशमिति क्रियाविशेषणं॥६३॥ क०॥६३॥ गतक्लमानः इ

सकृत्तमूलः सहसैव वृक्षः क्षितौ पपात क्षतजोक्षितांगः॥ तां चास्य घोरां यमदंडकल्पां गदां प्रगृह्याश्रुतदाननाद॥५६॥ मुहूर्त्तमासीत्स गतासुकल्पः प्रत्यागतात्मा सहसा सुरारिः॥ उत्पत्य संध्याभ्रसमानवर्णः तं वारिराजात्मजमाजघान॥५७॥ सम्मूर्छितो भूमितले पपात मुहूर्त्तमुत्पत्य पुनः ससंज्ञः॥ तामेव॥ तस्याद्रिवराद्रिकल्पां गदां समाविध्य जघान संख्ये॥५८॥ सा तस्य रौद्रा समुपेत्य देहं रौद्रस्य देवाध्वरविप्रशत्रोः॥ बिभेद वक्षः क्षतजं च भूरि सुस्राव धात्वंभ इवाद्रिराजः॥५९॥ अभिदुद्राव वेगेन गदां तस्य महात्मनः॥ तां गृहीत्वा गदां भीमामाविध्य च पुनः पुनः॥६०॥ मत्तानीकं महात्मा स जघान रणमूर्द्धनि॥ स स्वया गदया भग्नो विशीर्णदशनेक्षणः॥६१॥ निपपात तदा मत्तो वज्राहत इवाचलः॥ विशीर्णनयनो भूमौ गतसत्वो गतायुषः॥६२॥ पतिते राक्षसे तस्मिन्विद्रुतं राक्षसं बलं॥६२॥ तस्मिन्हते भ्रातरि रावणस्य तन्नैर्ऋतानां बलमर्णवाभं॥ त्यक्त्वायुधं केवलजीवितार्थं दुद्राव भिन्नार्णवसन्निकाशं॥६३॥ इत्यार्षे श्रीरामायणे युद्धकांडे सप्ततितमः सर्गः॥७०॥

तिश्रीरामाभिरामे श्रीरामीये रामायणतिलके युद्धकांडे सप्ततितमः सर्गः॥७०॥ श्रीरामचंद्रप्र

पार्श्वशोभितौ·स्वपार्श्वशोभितौ·चतुर्हस्तप्रमाणाभ्यांत्सरुभ्यांखड्गमुष्टिभ्यांचितौव्यक्तंदशहस्तपरि
माणौनायतौ॥२१॥रक्तकंठगुणः रक्तकंठमाल्यः कालःकृष्णवर्णः कालस्यमृत्योरिवमहद्वपुर्य

द्वौचखड्गौचपार्श्वस्थौप्रदीप्तौपार्श्वशोभितौ॥चतुर्हस्तत्सरुचितौव्यक्तहस्तदशायतौ
॥२१॥रक्तकंठगुणोधीरोमहापर्वतसन्निभः॥कालःकालमहावक्त्रोमेघस्थइवभास्करः॥२२॥कां
चनांगदनद्धाभ्यांभुजाभ्यामेषशोभते॥शृंगाभ्यामिवतुंगाभ्यांहिमवान्पर्वतोत्तमः॥२३॥कुं
डलाभ्यांशुभाभ्यांचभातिवक्त्रंसुभीषणं॥पुनर्वस्वंतरगतःपरिपूर्णोनिशाकरः॥२४॥आच
क्ष्वमेमहाबाहोत्वमेनंराक्षसोत्तमं॥यंदृष्ट्वावानराःसर्वेभयार्त्ताविद्रुतादिशः॥२५॥सपक्षो
राजपुत्रेणरामेणामिततेजसा॥आचचक्षेमहातेजाराघवायविभीषणः॥२६॥दशग्रीवो
महातेजाराजावैश्रवणानुजः॥भीमकर्मामहात्माहिरावणोराक्षसेश्वरः॥२७॥तस्यासीद्वी
र्यवान्पुत्रोरावणप्रतिमोबले॥वृद्धसेवीश्रुतधरःसर्वास्त्रविदुषांवरः॥२८॥अश्वपृष्ठेनागपृ
ष्ठेखड्गेधनुषिकर्षणे॥भेदेसांत्वेचदानेचनयेमंत्रेचसंमतः॥२९॥यस्यबाहुंसमाश्रित्यलं
काभवतिनिर्भया॥तनयंधान्यमालिन्याअतिकायमिमंविदुः॥३०॥

स्यसः॥२२॥२३॥पुनर्वस्वोंतरं
मध्यंतत्रगतः॥२४॥२५॥२६॥२७॥२८॥धनुषिकर्षणइतिपाठेःकृष्यतेनेनेतिःकर्षणःपाशादिरित्यर्थइतितीर्थः॥२९॥
॥३०॥

सांत्वयित्वामाभैषेत्युक्त्वा ॥११॥ हरिलोचनः सिंहदृष्टिः ॥१२॥ १३॥ रथशक्तिभिरितिदीर्घ आर्षः रथस्थाभिः शक्ति

सतंदृष्ट्वामहाकायंराघवस्तुसुविस्मितः ॥ वानरान्सांत्वयित्वाचविभीषणमुवाचह ॥११॥ कोसौप
र्वतसंकाशोधनुष्मान्हरिलोचनः ॥ युक्तेहयसहस्रेणविशालेस्पंदनेस्थितः ॥१२॥ यएषनिशितैः
शूलैःसुतीक्ष्णैःप्रासतोमरैः ॥ अर्चिष्मद्भिर्वृतोभातिभूतैरिवमहेश्वरः ॥१३॥ कालजिह्वाप्रकाशाभिर्य
एषोभिविराजते ॥ आवृतोरथशक्तीभिर्विद्युद्भिरिवतोयदः ॥१४॥ धनूंषिचास्यसज्जानिहेमपृष्ठा
निसर्वशः ॥ शोभयंतिरथश्रेष्ठंशक्रचापमिवांबरं ॥१५॥ यएषरक्षःशार्दूलोरणभूमिंविराजयन्
अभ्येतिरथिनांश्रेष्ठोरथेनादित्यवर्चसा ॥१६॥ ध्वजशृंगप्रतिष्ठेनराहुणाभिविराजिते ॥ सूर्यर
श्मिप्रभैर्बाणैर्दिशोदशविराजयन् ॥१७॥ त्रिनतंमेघनिर्ह्रादंहेमपृष्ठमलंकृतं ॥ शतक्रतुध
नुःप्रख्यंधनुश्चास्यविराजते ॥१८॥ सध्वजःसपताकश्चसानुकर्षोमहारथः ॥ चतुःसादिसमा
युक्तोमेघस्तनितनिस्वनः ॥१९॥ विंशतिर्दशचाष्टौचतूणाअस्यरथमास्थिताः ॥ कार्मुकाणिच
भीमानिज्याश्चकांचनपिंगलाः ॥२०॥

भिरित्यर्थः ॥१४॥१५॥१६॥ ध्वजशृंगेत्यादिनाराहुध्वजत्वमुक्तं ॥१७॥ हेमपृष्ठंहेमसदृशपृष्ठभागंत्रि
नतमितिप्राग्व्याख्यातं ॥१८॥ सादिनःसारथयः ॥१९॥ तूणांअस्येतिच्छेदः ॥२०॥ ॥

४२॥यौवनदर्पितोहरिरिव·तरुणसिंहइव॥४३॥वीरत्वादयुध्यमानंकंचिदपिननिजघान·कलापीतूणी
रत्वान्सगर्वितंसगर्वी॥४४॥यस्यशक्तिरस्तिव्यवसाययुक्तःश्चयःसयुद्धंददातु॥४५॥तत्तस्यवाक्यंरा

तैर्दित्ताबाणवर्षेणभिन्नगात्राःपराजिताः॥नशेकुरतिकायस्यप्रतिकर्त्तुंमहाहवे॥४२॥त
त्सैन्यंहरिवीराणांत्रासयामासराक्षसः॥मृगयूथमिवक्रुद्धोहरिर्यौवनदर्पितः॥४३॥सरा
क्षसेंद्रोहरियूथमध्येनायुध्यमानंनिजघानकंचित्॥उत्पत्यरामंसधनुःकलापीसगर्वि
तंवाक्यमिदंबभाषे॥४४॥रथेस्थितोहंशरचापपाणिर्नप्राकृतंकंचनयोधयामि॥यस्या
स्तिशक्तिर्व्यवसाययुक्तोददातुमेशीघ्रमिहाद्ययुद्धं॥४५॥तत्तस्यवाक्यंब्रुवतोनिशम्य
चुकोपसौमित्रिरमित्रहंता॥अमृष्यमाणश्चसमुत्पपातजग्राहचापंचततःस्मयित्वा॥४६॥
क्रुद्धःसौमित्रिरुत्पत्यतूणादाक्षिप्यसायकं॥पुरस्तादतिकायस्यविचकर्षमहद्धनुः॥४७॥पू
रयन्समहींसर्वामाकाशंसागरंदिशः॥ज्याशब्दोलक्ष्मणस्योग्रस्त्रासयन्रजनीचरान्॥४८॥
सौमित्रेश्चापनिर्घोषंश्रुत्वाप्रतिभयंतदा॥विसिस्मियेमहातेजाराक्षसेंद्रात्मजोबली॥४९॥

मंप्रत्युक्तं·स्मयित्वा·अनादृत्यःसिद्धं·अनादरेइडार्षः॥४६॥आक्षिप्यआदाय॥४७॥मह्यादीन्पूरयन्
राक्षसांस्त्रासयन्·ज्याशब्दउदभूदितिशेषः॥४८॥प्रतिभयंभयंकरं॥४९॥ श्र

३१ ।रविभास्वरोरथोदत्तइत्यनुकर्षः ॥३२॥३३॥३४॥३५॥ अस्मिनतिकाये क्षिप्रमित्यत्रहेतुः पुरेति पुरानय

एतेनाराधितोब्रह्मातपसाभावितात्मना ॥ अस्त्राणिचाप्यवाप्तानिरिपवश्चपराजिताः ॥३१॥ सुरासुरैरवध्यत्वंदत्तमस्मैस्वयंभुवा ॥ एतच्चकवचंदिव्यंरथश्चैषविभास्वरः ॥३२॥ एतेनशतशोदेवादानवाश्चपराजिताः ॥ रक्षितानिचरक्षांसियक्षाश्चापिनिषूदिताः ॥३३॥ वज्रंविष्टंभितंयेनबाणैरिंद्रस्यधीमता ॥ पाशःसलिलराजस्ययुद्धेप्रतिहतस्तथा ॥३४॥ एषोतिकायोबलवान्राक्षसानामथर्षभः ॥ सरावणसुतोधीमान्देवदानवदर्पहा ॥३५॥ तदस्मिन्क्रियतांयत्नःक्षिप्रंपुरुषपुंगव ॥ पुरावानरसैन्यानिक्षयंनयतिसायकैः ॥३६॥ ततोतिकायोबलवान्प्रविश्यहरिवाहिनीं ॥ विस्फारयामासधनुर्ननादचपुनःपुनः ॥३७॥ तंभीमवपुषंदृष्ट्वारथस्थंरथिनांवरं ॥ अभिपेतुर्महात्मानोप्रधानायेवनौकसः ॥३८॥ कुमुदोद्विविदोमैंदोनीलःशरभएवच ॥ पादपैर्गिरिशृंगैश्चयुगपत्समभिद्रवन् ॥३९॥ तेषांवृक्षांश्चशैलांश्चशरैःकनकभूषणैः ॥ अतिकायोमहातेजाश्चिच्छेदास्त्रविदांवरः ॥४०॥ तांश्चैवसर्वान्सहरीन्शरैःसर्वायसैर्बली ॥ विव्याधाभिमुखान्संख्येभीमकायोविशारदः ॥४१॥

तिनेष्यतीत्यर्थः ॥३६॥३७॥३८॥ समभिद्रवत् समभ्यद्रवन् ॥३९॥४०॥४१॥ श्रीरामचंद्रय

रामा॰यु॰
२२०

२२०

५९॥६०॥६१॥वाणाशल्यांतरोत्थितंवाणाशल्यकृतछिद्रादुत्थितं॥६२॥मत्तुंजानीहि॰ पुरस्थितस्पश
त्रोरितिशेषः बाल्यंनप्रतिवंधकंपराक्रमेइत्यत्रदृष्टांतमाह॰ वालेनेति॰ वामनेनेत्यर्थः॥६३॥६४॥

कर्मणास्त्वयात्मानंनविकत्थितुमर्हसि॥पौरुषेणातुयोयुक्तःसतुशूरइतिस्मृतः॥५९॥
सर्वायुधसमायुक्तोधन्वीत्वंरथमास्थितः॥शरैर्वायदिवाप्यस्त्रैर्दर्शयस्वपराक्रमं॥६०॥ततःशि
रस्तेनिशितैःपातयिष्याम्यहंशरैः॥मारुतःकालसंयुक्तंवृंतात्तालफलंयथा॥६१॥अद्यतेमा
मकाबाणास्तप्तकांचनभूषणाः॥पास्यंतिरुधिरंगात्राद्बाणशल्यांतरोत्थितं॥६२॥बालोय
मितिविज्ञायनचावज्ञातुमर्हसि॥बालोवायदिवावृद्धोमृत्युंजानीहिसंयुगे॥६३॥बाले
नविष्णुनालोकास्त्रयःक्रांतास्त्रिविक्रमैः॥लक्ष्मणस्यवचःश्रुत्वाहेतुमत्परमार्थवत्॥
अतिकायःप्रचुक्रोधबाणंचोत्तममाददे॥६४॥ततोविद्याधराभूतादेवदैत्यामहर्षयः॥
गुह्यकाश्चमहात्मानस्तद्युद्धंददृशुस्तदा॥६५॥ततोतिकायःकुपितश्चापमारोप्यसायकं॥ल
क्ष्मणायप्रचिक्षेपसंक्षिपन्निवचांबरं॥६६॥तमापतंतंनिशितंशरमाशीविषोपमं॥अर्द्धचंद्रेणचि
च्छेदलक्ष्मणःपरवीरहा॥६७॥तंनिकृत्तंशरंदृष्ट्वाकृत्तभोगमिवोरगं॥अतिकायोभृशंक्रुद्धःपंच
बाणान्समाददे॥६८॥

॥६५॥सायकंचापमारोप्यबाणंधनुषिसंधाय॰ संक्षिपन्निवचांबरं॰ बाणावेगे
नांतरालस्थितमाकाशंगसनिव॥६६॥६७॥६८॥

राम॰
२२०

५०॥५१॥५२॥महतोमांप्राप्तः॥५३॥प्रतिस्तब्धोहंकारवान्‌· निवर्त्तितुंनेच्छसितदातिष्ठसत्वंप्राणान्परित्य

तदातिकायःकुपितोदृष्ट्वालक्ष्मणमुत्थितं॥आदायनिशितंवाणमिदंवचनमब्रवीत्॥५०॥बाल
स्त्वमसिसौमित्रेविक्रमेष्वविचक्षणः॥गच्छकिंकालसंकाशंमांयोधयितुमिच्छसि॥५१॥नहि
मद्बाहुसृष्टानांबाणानांहिमवानपि॥सोढुमुत्सहतेवेगमंतरिक्षमथोमही॥५२॥सुखप्रसु
प्तंकालाग्निंविबोधयितुमिच्छसि॥न्यस्यचापंनिवर्तस्वप्राणान्नजहिमद्गतः॥५३॥अथवात्वंप्र
तिस्तब्धोननिवर्त्तितुमिच्छसि॥तिष्ठप्राणान्परित्यज्यगमिष्यसियमक्षयं॥५४॥पश्यमेनिशि
तान्बाणान्रिपुदर्पनिषूदनान्॥ईश्वरायुधसंकाशांस्तप्तकांचनभूषणान्॥५५॥एषतेसर्पसं
काशोवाणःपास्यतिशोणितं॥मृगराजइवक्रुद्धोनागराजस्यशोणितं॥५६॥इत्येवमुक्त्वासंक्रु
द्धःशरंधनुषिसंदधे॥५६॥श्रुत्वातिकायस्यवचःसरोषंसगर्वितंसंयतिराजपुत्रः॥ससंचुको
पातिबलोमनस्वीउवाचवाक्यंचततोमनस्वी॥५७॥नवाक्यमात्रेणभवान्प्रधानोनकत्थनात्स
त्पुरुषाभवंति॥मयिस्थितेधन्विनिबाणपाणौनिदर्शयस्वात्मबलंदुरात्मन्॥५८॥ ॥

ज्ययमक्षयंगमिष्यसि॥५४॥ईश्वरायुधंत्रिशूलं॥५५॥५६॥५७॥प्रधानःश्रेष्ठःकत्थनादात्मनःश्ला
घामात्रात्‌· सत्पुरुषाःश्लाघ्यगुणयुक्तानभवंति· आत्मनोवलंसामर्थ्यं॥५८॥ श्र

७७।७८।७९।८०।८१।आत्मानंविशल्यंचकारेत्यत्रहेतुर्विभुरिति विभुत्वंशक्त्वानुसंधानवानित्यर्थः।८२।अ

तेबाणाःकालसंकाशाराक्षसेंद्रधनुश्च्युताः।हेमपुंखारविप्रख्याश्चक्रुर्दीप्तमिवांबरं।७७।ततस्तान्राक्षसोत्सृष्टान्शरौघान्राघवानुजः।असंभ्रांतःप्रचिच्छेदनिशितैर्बहुभिःशरैः।७८।तान्शरान्युधिसंप्रेक्ष्यनिकृत्तान्रावणात्मजः।चुकोपत्रिदशेंद्रारिर्जग्राहनिशितंशरं।७९।ससंधायमहातेजास्तंबाणंसहसोत्सृजत्।तेनसौमित्रिमायांतमाजघानस्तनांतरे।८०।अतिकायेनसौमित्रिस्ताडितोयुधिवक्षसि।सुस्रावरुधिरंतीव्रंमदंमत्तइवद्विपः।८१।सचकारतदात्मानंविशल्यंसहसाविभुः।जग्राहचशरंतीक्ष्णमस्त्रेणापिसमादधे।८२।आग्नेयेनतदास्त्रेणयोजयामाससायकं।सजज्वालतदाबाणोधनुष्यस्यमहात्मनः।८३।अतिकायोतितेजस्वीरौद्रमस्त्रंसमादधे।तेनबाणंभुजंगाभंहेमपुंखमयोजयत्।८४।तदस्त्रंज्वलितंघोरंलक्ष्मणःशरमाहितं।अतिकायायचिक्षेपकालदंडमिवांतकः।८५।आग्नेयास्त्राभिसंयुक्तंदृष्ट्वाबाणंनिशाचरः।उत्ससर्जतदाबाणंरौद्रंसूर्यास्त्रयोजितं।८६।तावुभावंबरेबाणावन्योन्यमभिजिघ्नतुः।तेजसासंप्रदीप्ताग्रौक्रुद्धाविवभुजंगमौ। तावन्योन्यंविनिर्दह्यपेततुःपृथिवीतले।८७।

स्त्रेणास्त्रमंत्रेणतदेवाह आग्नेयेनेति।८३।८४।आहितं आहितदिव्यास्त्रशक्तिं अस्त्ररूपंशरं।८५।८६।प्रदीप्तमानौतादृशावपिपरस्पराभिघातान्नभ्राजते।८७

६९।७०।।७१।।पूर्णायतविसृष्टेन पूर्णाकर्षणपूर्वकं विसृष्टेन ललाटे आजघानेत्यन्वयः।।७२।।७३।।त्रि-
पुरगोपुरं त्रिपुरासुरपुरस्य गोपुरं आश्वस्य संज्ञां प्राप्य विमृष्य विचार्य कर्त्तव्यमर्थं चिंतयामास त

तान्शरान्संप्रचिक्षेप लक्ष्मणाय निशाचरः।।तानप्राप्तांश्छितैर्बाणैश्चिच्छेद भरतानुजः।।६९।।
स तां छित्वा शितैर्बाणैर्लक्ष्मणः परवीरहा।।आददे निशितं बाणं ज्वलंतमिव तेजसा।।७०।।तमा-
दाय धनुःश्रेष्ठे योजयामास लक्ष्मणः।।विचकर्ष च वेगेन विससर्ज च सायकं।।७१।।पूर्णायत-
विसृष्टेन शरेणानतपर्वणा।।ललाटे राक्षसश्रेष्ठमाजघान स वीर्यवान्।।७२।।स ललाटे शरो-
मग्नस्तस्य भीमस्य रक्षसः।।ददृशे शोणितेनाक्तः पन्नगेंद्र इवाचले।।७३।।राक्षसः प्रचकंपेथ ल-
क्ष्मणेषुप्रपीडितः।।रुद्रबाणहतं घोरं यथा त्रिपुरगोपुरं।।७४।।चिंतयामास चाश्वस्य विमृश्य
च महाबलः।।७४।।साधु बाणनिपातेन श्लाघनीयोसि मे रिपुः।।विधायैवं विदार्यास्यं विनम्य
च महाभुजौ।।स रथोपस्थमास्थाय रथेन प्रचचार ह।।७५।।एकं त्रीन् पंच सप्तेति सायकान्
राक्षसर्षभः।।आददे संदधे चापि विचकर्षोत्ससर्ज च।।७६।।

मेवार्थः।।७४।।माहः साध्विति अ-
मोघबाणप्रयोगेण त्वं मे श्लाघ्यो रिपुरसीत्येवं आस्यं विदार्य प्रकटं यथा भवति तथा विधाया-
भिधाय भुजौ विनम्य वशे स्थापयित्वा रथोपस्थं आस्थाय रथेन प्रचचार हेत्यन्वयः।।७५।।७६

तस्मिन्वरास्त्रे तु नियुज्यमाने सौमित्रिणा बाणवरे शिताग्रे ॥ दिशश्च चंद्रार्कमहाग्र
हाश्च नभश्च तत्रास ररास चोर्वी ॥९९॥ तं ब्रह्मणोस्त्रेण नियुज्य चापे शरं सुपुंखं यमदू
तकल्पं ॥ सौमित्रिरिंद्रारिसुतस्य तस्य ससर्ज बाणं युधि वज्रकल्पं ॥१००॥ तं लक्ष्मणोत्सृ
ष्टविवृद्धवेगं समापतंतं श्वसनप्रवेगं ॥ सुपर्णवज्रोत्तमचित्रपुंखं तदातिकायः स
मरे ददर्श ॥१०१॥ तं प्रेक्ष्यमाणः सहसातिकायो जघान बाणैर्निशितैरनेकैः ॥ स सायक
स्तस्य सुपर्णवेगस्तथातिवेगेन जगाम पार्श्वं ॥१०२॥ तमागतं प्रेक्ष्य तदातिकायो बा
णं प्रदीप्तांतककालकल्पं ॥ जघान शक्त्यृष्टिगदाकुठारैः शूलैः शरैश्चाप्यविपन्नचे
ष्टः ॥१०३॥ तान्यायुधान्यद्भुतविग्रहाणि मोघानि कृत्वा स शरोग्निदीप्तः ॥ प्रगृह्य तस्यैव
किरीटजुष्टं तदातिकायस्य शिरो जहार ॥१०४॥ तच्छिरः सशिरस्त्राणं लक्ष्मणेषुप्र
मर्दितं ॥ पपात सहसा भूमौ शृंगं हिमवतो यथा ॥१०५॥ तं भूमौ पतितं दृष्ट्वा विक्षिप्तां
त बरभूषणं ॥ बभूवुर्व्यथिताः सर्वे हतशेषा निशाचराः ॥१०६॥ ते विषण्णमुखा दीनाः प्र
हारजनितश्रमाः ॥ विनेदुरुच्चैर्बहवः सहसा विस्वरैः स्वरैः ॥१०७॥ ॥

त्वाष्ट्रंत्वष्टृदेवताकंऐषिकाख्यं॥८८॥८९॥९०॥९१॥९२॥भग्नमग्रवर्त्तिशल्यंयेषांते॥९३॥मोघान्व्यर्थान्

निरर्चिषौभस्मकृतौनभ्राजेतेशरोत्तमौ॥तावुभौदीप्यमानौस्मनभ्राजेतेमहीतले॥८८॥ततोति
कायःसंक्रुद्धस्त्वाष्ट्रमैषीकमुत्सजन्॥ततश्चिच्छेदसौमित्रिरस्त्रमैंद्रेणवीर्यवान्॥८९॥ऐषीकंनि
हतंदृष्ट्वाकुमारोरावणात्मजः॥याम्येनास्त्रेणसंक्रुद्धोयोजयामाससायकं॥९०॥ततस्तदस्त्रंचि
क्षेपलक्ष्मणायनिशाचरः॥वायव्येनतदास्त्रेणनिजघानसलक्ष्मणः॥९१॥अथैनंशरधाराभिर्धा
राभिरिवतोयदः॥अभ्यवर्षतसंक्रुद्धोलक्ष्मणोरावणात्मजं॥९२॥तेतिकायंसमासाद्यकवचे
वज्रभूषिते॥भग्नाग्रशल्याःसहसापेतुर्बाणामहीतले॥९३॥तान्मोघानभिसंप्रेक्ष्यलक्ष्मणःपरवीर
हा॥अभ्यवर्षतबाणानांसहस्रेणमहायशाः॥९४॥सवर्ष्यमाणोबाणौघैरतिकायोमहाबलः॥अ
वध्यकवचःसंख्येराक्षसोनैवविव्यथे॥९५॥नशशाकरुजंकर्तुंयुधितस्यनरोत्तमः॥तथैनम
भ्युपागम्यवायुर्वाक्यमुवाचह॥९६॥ब्रह्मदत्तवरोह्येषअवध्यकवचावृतः॥ब्राह्मेणास्त्रेणभिं
ध्येनमेषवध्योहिनान्यथा॥९७॥अवध्यस्त्वेषह्यन्येषांअस्त्राणांकवचीबली॥९७॥ततस्तुवायो
र्वचनंनिशम्यसौमित्रिरिंद्रप्रतिमानवीर्यः॥समादधेबाणमथोग्रवेगंतद्ब्राह्ममस्त्रंसहसानि
युज्य॥९८॥

॥९४॥वर्ष्यमाणःक्रियमाणवर्षः॥९५॥९६॥९७॥९८॥श्रीरामरघुनंदन

दत्तवरैर्वरदत्तैःशरैर्यौखरादिहंतारौभ्रातरौतौबद्धौयत्कृतबंधनंसुरादिभिरपिमोक्तुंनशक्यंतस्माद
पिशरबंधनाद्यद्विमुक्तौतत्प्रभावैःसहस्वबलादिवैभवैरथनामायया प्रतिमायाबलेनवामोहने

तौभ्रातरौतदाबद्धौघोरैर्दत्तवरैःशरैः॥यन्नशक्यंसुरैःसर्वैरसुरैर्वामहाबलैः॥६॥मोक्तुंतद्बं
धनंघोरंयक्षगंधर्वपन्नगैः॥तन्नजानेप्रभावैर्वामाययामोहनेनवा॥७॥शरबंधाद्विमुक्तौ
भ्रातरौरामलक्ष्मणौ॥येयोधाःनिर्गताःशूराराक्षसाममशासनात्॥८॥तेसर्वेनिहतायुद्धे
वानरैःसुमहाबलैः॥तन्नपश्याम्यहंयुद्धेयोद्धारामंसलक्ष्मणं॥नाशयेत्सबलंवीरंससु
ग्रीवंविभीषणं॥९॥अहोसुबलवान्रामोमहदस्त्रबलंचवै॥यस्यविक्रममासाद्यराक्षसा
निधनंगताः॥१०॥अप्रमत्तैश्चसर्वत्रगुल्मैरक्ष्यापुरीत्वियं॥अशोकवनिकाचैवयत्रसीता
भिरक्ष्यते॥११॥निष्क्रामोवाप्रवेशोवाज्ञातव्यःसर्वदैवनः॥यत्रयत्रभवेद्गुल्मस्तत्रतत्रपु
नःपुनः॥१२॥सर्वतश्चापितिष्ठध्वंसैन्यैःपरिवृताबलैः॥द्रष्टव्यंचपदंतेषांवानराणांनिशाचराः॥१३॥

नवाबंधकरनागानांमोहनेनवेतिनजानेइत्युत्तरेणसंबंधः॥६॥७॥८॥९॥१०॥अप्रमत्तैश्चेति·रक्षायुष्माभि
रवशिष्टराक्षसैरितिशेषः·अशोकवनिकाचेति·विशिष्यरक्ष्यतेतिशेषः॥११॥निष्क्रामोवेतिपुरेऽशोकव
निकायांचेतिशेषः·नः·युष्माकं·युष्माभिरितियावत्·यत्रयत्रगुल्मइतिपद्यकस्थापितइतिशेषः

॥१२॥पदंगतागतं॥१३॥

८॥ इष्टभागिनं इष्टस्य भागः प्राप्तिस्तद्वंतं इष्टमतिकायवधं प्राप्तवंतमित्यर्थः॥ ९॥ त्रिशिरोतिकाय
देवांतकनरांतकमहोदरमहापार्श्वानां षड्भिर्दिनैर्भाद्राश्विनकृष्णपक्षांते तेन वध इत्यग्रे स्फुटं कृत

ततस्तत्परितोयाता निरपेक्षा निशाचराः॥ पुरीमभिमुखा भीता द्रवंतो नायके हते॥ १०५॥
प्रहर्षयुक्ता बहवस्तु वानराः प्रफुल्लपद्मप्रतिमाननास्तदा॥ अपूजयन्लक्ष्मणमिष्ट
भागिनं हते रिपौ भीमबले दुरासदे॥ १०६॥ इत्यार्षे श्रीरामायणे युद्धकांडे एकसप्ततित
मः सर्गः॥ ७१॥ अतिकायं हतं श्रुत्वा लक्ष्मणेन महात्मना॥ उद्वेगमगमद्राजा वचनं चे
दमब्रवीत्॥ १॥ धूम्राक्षः परमामर्षी सर्वशस्त्रभृतां वरः॥ अकंपनः प्रहस्तश्च कुंभक
र्णस्तथैव च॥ २॥ एते महाबला वीरा राक्षसा युद्धकांक्षिणः॥ जेतारः परसैन्यानां परैर्नि
त्यापराजिताः॥ ३॥ ससैन्यास्ते हता वीरा रामेणाक्लिष्टकर्मणा॥ राक्षसाः सुमहाकाया
नानाशस्त्रविशारदाः॥ ४॥ अन्ये च बहवः शूरा महात्मानो निपातिताः॥ प्रख्यातबलवीर्ये
णपुत्रेणेंद्रजिता मम॥ ५॥

कस्त॥ ६४॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके युद्धकांडे एकसप्ततितमः सर्गः॥ ७१॥
अतिकायमिति॥ १॥ २॥ ३॥ ४॥ ५॥

संपरिपुप्लुवानंलिटःकानच्शोकार्णवमग्नमित्यर्थःरथर्षभःरथस्थानांश्रेष्ठःमहारथइत्यर्थः तंरावणं
३॥ हेताततस्मात्मोहंगंतुंनार्हसियन्नयस्मात् इंद्रजिज्जीवति इंद्रारिरिंद्रजित्समरेइंद्रजिद्बाणाभि

ततस्तंराजानमुदीक्ष्यदीनंशोकार्णवेसंपरिपुप्लुवानं॥रथर्षभोराक्षसराजसूनुस्तमिंद्रजिद्वा
क्यमिदंबभाषे॥३॥नतातमोहंपरिगंतुमर्हसेयत्रेंद्रजिज्जीवतिनैर्ऋतेश॥नेंद्रारिबाणाभिह
तोहिकश्चित्प्राणान्समर्थःसमरेभिपातुं॥४॥पश्याद्यरामंसहलक्ष्मणेनमद्बाणनिर्भिन्नविकी
र्णदेहंगतायुषंभूमितलेशयानंशितैःशरीराचितसर्वगात्रं॥५॥इमांप्रतिज्ञांशृणुशक्रशत्रोः
सुनिश्चितांपौरुषदैवयुक्तां॥अद्यैवरामंसहलक्ष्मणेनसंतर्पयिष्यामिशरैरमोघैः॥६॥अद्यें
द्रवैवस्वतविष्णुरुद्रसाध्याश्चवैश्वानरचंद्रसूर्याः॥द्रक्ष्यंतुमेविक्रममप्रमेयंविष्णोरिवोग्रंब
लियज्ञवाटे॥७॥सएवमुक्त्वात्रिदशेंद्रशत्रुरापृच्छ्यराजानमदीनसत्वः॥समारुरोहानिलतु
ल्यवेगंरथंखरश्रेष्ठसमाधियुक्तं॥८॥

हतः॥प्राणानभियातुंकश्चिदपिसमर्थोनास्ति॥४॥मद्बाण
निर्भिन्नेनएवविकीर्णोदेहोयस्यतं॥५॥पौरुषदैवयुक्तांपौरुषेणसहजशौर्यबलेनदैवबलेनभ
गवत्ब्रह्मबलेनचयुक्तांक्रियमाणाग्न्यादिकर्मणोक्तः॥६॥७॥खरश्रेष्ठैःसमाधीयतेयुद्धमेभिरितिस
माधयोधनुःखड्गादयस्तैश्चयुक्तं॥८॥ राम ॥ श्र ॥

१४॥ इष्टव्यंचपदमित्युक्तं तत्रदर्शनप्रकारमाह द्विषतामिति उद्युक्तं उद्यमवत् किं आपतत् आगमनशी
लं किंत्वकायामितिशेषः यथायथापूर्वंस्थितंस्थितिमत्किमित्येवंप्रकारेणसदाइष्टव्यमित्यर्थः॥ १५॥

प्रदोषेवार्द्धरात्रेवाप्रत्यूषेवापिसर्वशः॥ नावज्ञातत्रकर्त्तव्यावानरेषुकदाचन॥ १४॥ द्विषतां
बलमुद्युक्तमापतत्किंस्थितंयथा॥ ततस्तेराक्षसाःसर्वेश्रुत्वालंकाधिपस्यतत्॥ १५॥ वचनंस
र्वमातिष्ठन्यथावत्तुमहाबलाः॥ १६॥ तान्सर्वान्हिसमादिश्यरावणोराक्षसाधिपः॥ मन्युशल्यं
वहन्दीनःप्रविवेशस्वमालयं॥ १७॥ ततःससंदीपितकोपवह्निर्निशाचराणामधिपोम
हाबलः॥ तदेवपुत्रव्यसनंविचिंतयन्मुहुर्मुहुश्चैवतदाविनिश्वसन्॥ १८॥ इत्यार्षेश्रीरा
मायणेयुद्धकांडेद्विसप्ततितमःसर्गः॥ ७२॥ ततोहतान्राक्षसपुंगवांस्तान्देवांतकादी
न्त्रिशिरोतिकायान्॥ रक्षोगणास्तत्रहतावशिष्टास्तेरावणायत्वरिताशसंसुः॥ १॥ ततोह
तांस्तान्सहसानिशम्यराजामहाबाष्पपरिप्लुताक्षः॥ पुत्रक्षयंभ्रातृवधंचघोरंविचिंत्य
राजाविपुलंप्रदध्यौ॥ २॥

१६॥ मन्युशल्यंमन्युरूपंशल्यं॥ १७॥ १८॥ सर्गः कत० ॥ ६५॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायण
तिलकेयुद्धकांडेद्विसप्ततितमःसर्गः॥ ७२॥ ततइतिदेवांतकादयश्चत्रिशिरोतिकायौचतान्॥ १॥ २॥

गंधमाल्यपुरस्कृतैर्लाजसत्कारैः लाजैः पावकं सत्कृत्य तत्र पावके वक्ष्यमाणसंस्कारसंस्कृतैर्हविर्वक्ष्यमाणच्छागरूपं जुहाव ॥१८॥ शस्त्राण्येव शरपत्राणि काशविशेषाः परिस्तरणभूताः विभीतकाः विभीतकवृक्षसंबंधिन्यः समिधः रक्तवस्त्राणि अभिचारकर्मणि तेषामेव विनियोगात् ॥ आसन्निति शेषः स्रुवमित्यत्रासीदिति ॥१९॥ शरपत्रैः प्रागुक्तरूपैः जीवतो गलं जग्राह स जीवस्य होमार्थमिति शेषः ॥२०

सह हविर्लाजसत्कारैर्माल्यगंधपुरस्कृतैः ॥ जुहुवे पावकं तत्र राक्षसेंद्रः प्रतापवान् ॥१८॥ शस्त्राणि शरपत्राणि समिधोथ विभीतकाः ॥ लोहितानि च वासांसि स्रुवं कार्ष्णायसं तथा ॥१९॥ स तत्राग्निं समास्तीर्य शरपत्रैः सतोमरैः ॥ छागस्य कृष्णवर्णस्य गलं जग्राह जीवतः ॥२०॥ सकृदेव समिद्धस्य विधूमस्य महार्चिषः ॥ बभूवुस्तानि लिंगानि विजयं यान्यदर्शयन् ॥२१॥ प्रदक्षिणावर्तशिखस्तप्तकांचनसन्निभः ॥ हविस्तत्प्रतिजग्राह पावकः स्वयमुत्थितः ॥२२॥ सोस्त्रमाहारयामास ब्राह्ममस्त्रविशारदः ॥ धनुश्चात्मरथं चैव सर्वं तत्राभ्यमंत्रयत् ॥२३॥

सकृदेवेति सजीवस्य समग्रावयवस्य छागस्य सकृदेव महाहुत्या समिद्धस्य महार्चिषोग्नेः सकाशात्तानि लिंगानि बभूवुः यानि पुरा स्वस्य विजयमदर्शयन् ॥२१॥ तान्येवाह प्रदक्षिणेति ॥२२॥ अस्त्रविशारदः स ब्राह्ममस्त्रमाहारयामास ब्रह्मणा पुनर्ब्रह्मास्त्रोपदेशमकारयत् अथ धनुरादिकं सिद्धब्रह्मास्त्रमंत्रेण

भ्यमंत्रयत् ॥२३॥

हरिरथइंद्ररथः ॥९॥ संहर्षमाणाइत्यार्षंहृष्यमाणाइत्यर्थः ॥१०॥११॥ आजिंयुद्धं ॥१२॥ शंखस्यशशिनश्चव

समास्थायमहातेजारथंहरिरथोपमं ॥ जगामसहसातत्रयत्रयुद्धमरिंदमः ॥९॥ तंप्रस्थितं
महात्मानमनुजग्मुर्महाबलाः ॥ संहर्षमाणाबहवोधनुष्प्रवरपाणयः ॥१०॥ गजस्कंधगताः
केचित्केचित्परमवाजिभिः ॥ व्याघ्रवृश्चिकमार्जारखरोष्ट्रैश्चभुजंगमैः ॥११॥ वराहैःश्वापदैः
सिंहैर्जंबुकैऽपर्वतोपमैः ॥ काकहंसमयूरैश्चराक्षसाभीमविक्रमाः ॥ प्रासमुद्गरनिस्त्रिंशप
रश्वधगदाधराः ॥१२॥ सशंखशशिवर्णेनछत्रेणरिपुसूदनः ॥ रराजप्रतिपूर्णेननभश्चंद्र
मसायथा ॥१३॥ वीज्यमानस्ततोवीरोहैमैर्हेमविभूषणैः ॥ चारुचामरमुख्यैश्चमुख्यःसर्व
धनुष्मतां ॥१४॥ ततस्त्विंद्रजितालंकासूर्यप्रतिमतेजसा ॥ रराजाप्रतिवीर्येणद्यौरिवार्केण
भास्वता ॥१५॥ ससंप्राप्यमहातेजायुद्धभूमिमरिंदमः ॥ स्थापयामासरक्षांसिरथंप्रतिसमंत
तः ॥१६॥ ततस्तुहुतभोक्तारंहुतभुक्सदृशप्रभः ॥ जुहुवेराक्षसश्रेष्ठोविधिवन्मंत्रसत्तमैः ॥१७॥

र्णइववर्णोयस्यतेन ॥१३॥ हैमैर्हिरण्मयदंडैः ॥१४॥१५॥ युद्धभूमिं युद्धजयसंपादकहोमसाधनभूमिं
निकुंभिलास्थानमित्यर्थः ॥१६॥ हुतभोक्तारं अग्निं विधिः तत्तत्कल्पोक्तप्रकारः ॥१७॥ ॥

अभ्यवर्षंत· तत्सैन्यास्थित्यनुमितस्थितिकदिगुद्देशेनेतिशेषः अन्यथांतर्धानगतत्वेनैतदसंभवात् ॥ ३१
३२ ॥ ३३ ॥ ३४ ॥ मथितसंकल्पाः संत्यक्तयुद्धसंकल्पाः ॥ ३५ ॥ अभ्यधावंत· तद्दिगाभिमुख्येनेतिशेषः

ते वध्यमानाः समरे वानराः पादपायुधाः ॥ अभ्यवर्षंत सहसा रावणिं शैलपादपैः ॥ ३१ ॥ इंद्र-
जित्तु तदा क्रुद्धो महातेजा महाबलः ॥ वानराणां शरीराणि व्यधमद्रावणात्मजः ॥ ३२ ॥ श-
रेणैकेन च हरीन्नव पंच च सप्त च ॥ बिभेद समरे क्रुद्धो राक्षसान्संप्रहर्षयन् ॥ ३३ ॥ स श-
रैः सूर्यसंकाशैः शातकुंभविभूषणैः ॥ वानरान्समरे वीरः प्रममाथ सुदुर्जयः ॥ ३४ ॥ ते भि-
न्नगात्राः समरे वानराः शरपीडिताः ॥ पेतुर्मथितसंकल्पाः सुरैरिव महासुराः ॥ ३५ ॥ ते
पतंतमिवादित्यं घोरैर्बाणगभस्तिभिः ॥ अभ्यधावंत संक्रुद्धाः संयुगे वानरर्षभाः ॥ ३६ ॥
ततस्ते वानराः सर्वे भिन्नदेहा विचेतसः ॥ व्यथिता विद्रवंति स्म रुधिरेण समुक्षिताः ॥ ३७ ॥
रामस्यार्थे पराक्रम्य वानरास्त्यक्तजीविताः ॥ नदंतस्ते निवृत्तास्तु समरे सशिलायुधाः ॥
३८ ॥ ते द्रुमैः पर्वताग्रैश्च शिलाभिश्च प्लवंगमाः ॥ अभ्यवर्षंत समरे रावणिं समवस्थिताः ॥
३९ ॥ तं द्रुमाणां शिलानां च वर्षं प्राणहरं महत् ॥ व्यपोहत महातेजा रावणिः समितिंजयः ॥ ४० ॥

३६ ॥ ३७ ॥ त्यक्तजीविताः त्यक्तजीवितेच्छाः सशिलायुधाः शिलारूपायुधैः सहिताः ॥ ३८ ॥ ३९ ॥ व्यपोहत अपसारयतिस्म ॥ ४० ॥

226

तस्मिन्नस्त्रेआहुयमानेतदस्त्रमंत्रदेवतेत्रिमूर्त्तिरहस्यलक्षणेक्रियमाणावाहनेतदुद्देशेनतन्मंत्रे
णपावकेहुयमानेचसतिसार्कादिकंनभस्थलंतत्रासेतिनायमर्थवादः॥२४॥अंतर्दधेत्मानमित्य

तस्मिन्नाहुयमानेस्त्रेहुयमानेचपावके॥सार्कग्रहेंदुनक्षत्रंवितत्रासनभस्थलं॥२४॥
सपावकंपावकदीप्ततेजाहुत्वामहेंद्रप्रतिमप्रभावः॥सचापवाणासिरथाश्वसूतः
खेंतर्दधेत्मानमचिंत्यवीर्यः॥२५॥ततोहयरथाकीर्णंपताकाध्वजशोभितं॥निर्ययौ
राक्षसबलंनर्दमानंयुयुत्सया॥२६॥नेशरैर्बहुभिश्चित्रैस्तीक्ष्णवेगैरलंकृतैः॥तोमरैरं
कुशैश्चापिवानरान्जघ्नुराहवे॥२७॥रावणिस्तुसुसंक्रुद्धस्तान्निरीक्ष्यनिशाचरान्॥
हृष्टाभवंतोयुध्यंतुवानराणांजिघांसया॥२८॥ततस्तेराक्षसाःसर्वेगर्जंतोजयकां।
क्षिणः॥अभ्यवर्षन्ततोघोरान्वानरान्शरवर्षिभिः॥२९॥सतुनालीकनाराचैर्गदा
भिर्मुशलैरपि॥रक्षोभिःसंवृतःसंख्येवानरान्विचकर्षह॥३०॥ ॥

आकारलोपश्छांदसः॥२५॥ततइतियागसमाप्त्यनंतरंतद्यागभूमेरित्यर्थः॥२६॥२७॥निशाचरान्
समीक्ष्यआहेतिशेषःकिमाहतदाहहृष्टाइति॥२८॥२९॥रक्षोभिःसंवृत्तःराक्षससैन्योपरिभ्रमन्नास
आकाशदेशेस्थितः॥३०॥

५२।।५३।।५४।।प्रफुल्लाःकिंशुकाइवासन्नितिशेषः।।५५।।शरैर्नेत्रेषुताडिताइत्यन्वयः अन्योन्यंविविशुः अन्यो

तेकेवलंसंददृशुःशिताग्रान्बाणान्रणेवानरवाहिनीषु।।मायाविगूढंचसुरेंद्रशत्रुंनचात्र
तंराक्षसमभ्यपश्यन्।।५२।।ततःसरक्षोधिपतिर्महात्मासर्वादिशोबाणगणैःशिताग्रैः।।प्र
च्छादयामासरविप्रकाशैर्विदारयामासचवानरेंद्रान्।।५३।।सशूलनिस्त्रिंशपरश्वधानि
व्याविद्धदीप्तानलसप्रभाणि।।सविस्फुलिंगोज्वलपावकानिववर्षतीव्रंप्लवगेंद्रसैन्ये।।
।।५४।।ततोज्वलनसंकाशैर्बाणैर्वानरयूथपाः।।ताडिताःशक्रजिद्बाणैःप्रफुल्लाइवकिं
शुकाः।।५५।।उदीक्षमाणागगनंकेचिन्नेत्रेषुताडिताः।।शरैर्विविशुरन्योन्यंपेतुश्चजगती
तले।।५६।।हनूमंतंचसुग्रीवमंगदंगंधमादनं।।जांबवंतंसुषेणंचवेगदर्शिनमेवच।।
।।५७।।मैंदंचद्विविदंनीलंगवाक्षंगवयंतथा।।केसरिंहरिलोमानंविद्युद्दंष्ट्रंचवानरं।।५८
सूर्याननंज्योतिमुखंतथादधिमुखंहरिं।।पावकाक्षंनलंचैवकुमुदंचैववानरं।।५९।।प्रासैः
शूलैःशितैर्बाणैरिंद्रजिन्मंत्रसंहितैः।।विव्याधहरिशार्दूलान्सर्वांस्तान्राक्षसोत्तमः।।६०।।स
वैगदाभिर्हरियूथमुख्यान्निर्भिद्यबाणैस्तपनीयवर्णैः।।ववर्षरामंशरवृष्टिजालैःसल
क्ष्मणंभास्कररश्मिकल्पैः।।६१।।

न्यगात्रंसमाक्षिप्यतस्थुः।।५६।।५७।।५८।।५९।।६०।।६१।। रामराम

४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ दत्तवरैर्वरलब्धैः ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ स्वसैन्यं स्वसैन्योपरिभागं उत्सृज्य ॥ ५० ॥ ५१

ततः पावकसंकाशैः शरैराशीविषोपमैः ॥ वानराणामनीकानि विभेद समरे प्रभुः ॥ ४१ ॥ अ
ष्टादशशरैस्तीक्ष्णैः स विध्वा गंधमादनं ॥ विव्याध नवभिश्चैव नलं दूरादवस्थितं ॥ ४२ ॥ सप्ता
भिस्तु महावीर्यो मैंदं मर्मविदारणैः ॥ पंचभिर्विशिखैश्चैव गजं विव्याध संयुगे ॥ ४३ ॥ जां
बवंतं तु दशभिर्नीलं त्रिंशद्भिरेव च ॥ सुग्रीवमृषभं चैव सोंगदं द्विविदं तथा ॥ ४४ ॥ घोरैर्दत्त
वरैस्तीक्ष्णैर्निष्प्राणानकरोत्तदा ॥ अन्यानपि तदा मुख्यान्वानरान्बहुभिः शरैः ॥ ४५ ॥ अ
र्दयामास संक्रुद्धः कालाग्निरिव मूर्छितः ॥ स शरैः सूर्यसंकाशैः सुमुक्तैः शीघ्रगामिभिः
॥ ४६ ॥ वानराणामनीकानि निर्ममंथ महारणे ॥ आकुला वानरी सेना शरजालेन पीडिता
॥ ४७ ॥ हृष्टः स परया प्रीत्या ददर्श क्षतजोक्षितं ॥ पुनरेव महातेजा राक्षसेंद्रात्मजो बली ॥ ४८ ॥
संसृज्य बाणवर्षं च शस्त्रवर्षं च दारुणं ॥ ममर्द वानरानीकं परितस्त्विंद्रजिद्बली ॥ ४९ ॥
स्वसैन्यमुत्सृज्य समेत्य तूर्णं महाहवे वानरवाहिनीषु ॥ अदृश्यमानः शरजालमुग्रं व
वर्ष नीलांबुधरो यथांबु ॥ ५० ॥ ते शक्रजिद्बाणविशीर्णदेहा मायाहता विस्वरमुन्नदंतः
रणे निपेतुर्हरयो द्रिकल्पा यथेंद्रवज्राभिहता नगेंद्राः ॥ ५१ ॥ ॥ ॥

पतितागमप्सरंपतिताभुवि पतिताग्रगप्सराः प्रशास्तवीर्या यस्मिन्तत् ॥६६॥ एतत्सहनस्यैवैनदु
परमोपायत्वमपीत्याद्दःवामिति· हृतहर्षरोषौ· ॥ अप्रकाशितरोषहर्षविकारौ अतएवविसंज्ञा
विवावांपतितौदृष्ट्वारणाग्रलक्ष्मीसमासाद्यकवमसावमरारिवासंलंकांप्रवेक्ष्यतिपश्चाद्य

प्रच्छादयन्वेषहरिरात्तसेंद्रुः सर्वाधिकः सायकवाष्टिजालैः ॥ एतच्चसर्वंपतिताग्र्यप्सरंनभ्रा
जतेवानरराजसैन्यं ॥६६॥ आवांतुदृष्ट्वापतितौविसंज्ञौनिवृत्तयुद्धौहृतहर्षरोषौ ॥ ध्रुवंप्र
वेक्ष्यत्यमरारिवासमसौसमासाद्यरणाग्रलक्ष्मीं ॥६७॥ ततस्तुताविंद्रजितोस्त्रजालैर्वभ
वतुस्तत्रतदाविशस्तौ ॥ सचापितौतत्रविषादयित्वाननादहर्षाद्युधिराक्षसेंद्रः ॥६८॥ तत
स्तदावानरसैन्यमेवंरामंचसंख्येसहलक्ष्मणेननिषूदयित्वासहसाविवेशपुरींदशग्री
वसुजाभिगुप्तां ॥ संस्तूयमानः सतुयातुधानैः पित्रेवसर्वंत्हृषितोभ्युवाच ॥६९॥ इत्यार्षेश्री
रामायणेयुद्धकांडेत्रिसप्ततितमःसर्गः ॥७३॥ तयोस्तदासादितयोरणाग्रेमुमोहसैन्यं
हरियूथपानां ॥ सुग्रीवनीलांगदजांववंतोनचापिकिंचित्प्रतिपेदिरेते ॥१॥

दस्माभिरनुध्येयं
तत्करिष्यावइतिशेषः रणाग्रेत्यादिनासमूलनाशाशक्तिः सूचिता ॥६७॥ विशस्तौपीडितौ ॥६८॥ ॥६९॥ इ
तिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेत्रिसप्ततितमःसर्गः ॥७३॥ तयोःराघवयोः
रणाग्रेरणमुखेसादितयोर्निश्चेष्टीकृतयोः ॥१॥

॥६२॥ प्रसक्तं प्रकृतं प्राप्तं ब्रह्मास्त्रमाश्रित्य अस्मानावामेवार्दयति॥६३॥ नष्टदेहोऽदृष्टदेहः॥६४॥ नन्वदृष्टदेहस्यापि संहारसाधनैः शब्दवेध्यादिदिव्यास्त्रैर्हननं कार्यमिति चेन्न भगवतो ब्रह्मण आज्ञाया मारुतिनेवास्माभिरपि पालनौचित्येनैतत्सहनस्यैवोचिदित्याशयेनाह· मन्ये इति अचिंत्यः अचिंत्य

स बाणावर्षैरभिवर्ष्यमाणो धारानिपातानिव तानचिंत्य॥ समीक्ष्यमाणोऽपरमाद्भुतश्री रामस्तदा लक्ष्मणमित्युवाच॥६२॥ असौ पुनर्लक्ष्मण राक्षसेंद्रो महास्त्रमाश्रित्य सुरेंद्रशत्रुः॥ निपातयित्वा हरिसैन्यमस्मान् शितैः शरैरर्दयति प्रसक्त॥६३॥ स्वयंभुवा दत्तवरो महात्मा समाहितोंतर्हितभीमकायः॥ कथं नु शक्यो युधि नष्टदेहो निहंतुमद्येंद्रजिदुद्यतास्त्रः॥६४॥ मन्ये स्वयंभूर्भगवानचिंत्यस्तस्यैतदस्त्रं प्रभवश्च योऽस्य॥ बाणावपातं त्वमिहाद्य धीमन्मया सहाव्यग्रमना सहस्व॥६५॥

वैभवः योऽस्य सकलसंसारस्य प्रभवः स्रष्टा चकारात्संहर्त्ता च· स्वयंभूर्हिरण्यगर्भोऽस्ति तस्य भगवत एतदस्त्रं एतदस्त्रवैभवमित्येव मन्ये जानामि अतस्तत्प्रवर्त्तमिमं बाणावपातं मया सहाव्यग्रमना भगवद्ध्यानैकचित्तो भूत्वा भगवद्ध्यानबलेन सहस्व· धीमन्निति· हेतुगर्भविशेषणं· यतस्त्वमपि ब्रह्मध्यानसंपन्नस्तस्मात्सहस्व एव हि भगवदनुग्रहादस्माकमपि जयो भविष्यति नान्यथेत्यर्थः॥६५॥

अस्त्रहतेब्रह्मास्त्रहते·आश्वासयावहेविचार्येतिशेषः॥६॥तदारात्राविति पनेनसप्तम्यांरात्रावयमस्त्र
प्रयोगइतिसूचितं॥७॥अस्त्रवह्निःमूत्रमितिशेषः॥८॥९॥१०॥दद्दशातेहतवानराणां·हतप्रायानि
त्यर्थः॥११॥पंचमश्चासौशेषोभागश्चतेनप्रातःसंगवमध्यान्हापराह्नसायान्हेषुषट्घटिकात्मके

अस्मिन्नस्त्रहतेसैन्येवानराणांतरस्विनां॥योयोधारयतेप्राणांस्तंतमाश्वासयावहे॥६॥ता
वुभौयुगपद्वीरौहनूमद्राक्षसोत्तमौ॥उल्काहस्तौतदारात्रौरणशीर्षेविचेरतुः॥७॥भिन्नलांगू
लहस्तोरूपादांगुलिशिरोधरैः॥स्रवद्भिःक्षतजंगात्रैःप्रस्रवद्भिःसमंततः॥८॥पतितैःपर्वता
कारैर्वानरैरभिसंवृतां॥शस्त्रैश्चपतितैर्दीप्तैर्ददृशातेवसुंधरां॥९॥सुग्रीवमंगदंनीलंशरभं
गंधमादनं॥जांबवंतंसुषेणंचवेगदर्शिनमेवच॥१०॥मैंदंनलंज्योतिमुखंद्विविदंचापिवान
रं॥विभीषणोहनूमांश्चददृशातेहतान्रणे॥११॥सप्तषष्टिर्हताःकोट्योवानराणांतरस्विनां
अन्हःपंचमशेषेणवल्लभेनस्वयंभुवः॥१२॥

षुपंचमेनसायान्हेनेत्यर्थः·चतुर्भिर्भागैश्चब्रह्मास्त्रसाधनमितिबोध्यं·सप्तषष्टिकोटिवानरहन
नेसामर्थ्यमाह·वल्लभेनस्वयंभुवइतिः स्वयंभुवल्लभेनब्रह्मास्त्रेणापरिमितप्राणिहनन
समर्थेनहतमितिभगवद्वैभवमेवैतदितिभावः॥१२॥ श्र

अप्रतिमैः अत्यंतं कालोचितैः ॥ २ ॥ तदेवाह माभैष्टेति · अत्रास्यामवस्थायां विषादकालो विषादावसरो नास्ति · कुतस्तत्राह · यदिति यत् यस्मात् स्वयंभुवो वाक्यमुद्वहंतौ · तदाज्ञां परिपालयंतौ अत एव अवशौ । अस्त्रप्रयोगप्रवृत्तिरहितौ अथानंतरं तस्मादेवेंद्रजितासादितौ इति यत्तस्माद्विषण्णावेव न तु प्राणापीडावंतावतो माभैष्ट · यद्वाएनाववशौ विषण्णाविति यत्तत्र विषये माभैष्ट · एतयोर्विषण्णयोरस्मान्को

ततो विषण्णं समवेक्ष्य सर्वं विभीषणो बुद्धिमतां वरिष्ठः ॥ उवाच शाखामृगराजवीरानाश्वासयन्न
प्रतिमैर्वचोभिः ॥ २ ॥ माभैष्ट नास्त्यत्र विषादकालो यदार्यपुत्रौ ह्यवशौ विषण्णौ ॥ स्वयंभुवो वाक्यमथो
द्वहंतौ यत्सादिताविंद्रजितास्त्रजालैः ॥ ३ ॥ तस्मै तु दत्तं परमास्त्रमेतत्स्वयंभुवा ब्राह्ममोघवीर्यं ॥ त
न्मानयंतौ युधि राजपुत्रौ निपातितौ कोऽत्र विषादकालः ॥ ४ ॥ ब्राह्ममस्त्रं ततो धीमान्मानयित्वा तु
मारुतिः ॥ विभीषणवचः श्रुत्वा हनुमानिदमब्रवीत् ॥ ५ ॥

वारद्विषत्पतीति शत्रुभ्यो भयं माभूत् · अत्रैतद्विषये विषादकालो नास्ति यत् यस्मात् स्वयंभुवो वाक्यं मंत्ररूपं उद्वहंतौ मानयित्वा विंद्रजिदस्त्रजालैः सादितौ सादिताविव · यतो ब्रह्मसन्माननार्थं स्वयमेव पतिताविति माभैष्टेत्यर्थः ॥ ३ ॥ राघवाभ्यां दत्तं तुं योग्यमस्त्रं रावणेरस्तीत्याह · तस्मै इति · कोऽत्र विषादकालः न कोपि क्षणानंतरमुत्थास्यत इति शेषः ॥ ४ ॥ मारुतिस्तदा विभीषणवचः श्रुत्वा तद्ब्राह्ममस्त्रं मानयित्वा सर्वेणाप्यनुसरणीयमेवेति पूजयित्वा वि

भीषणंप्रतीदमब्रवीत् ॥ ५ ॥

जीविनाशात्ततोभवेत् जीवनहेतोस्ततएवलाभसंभवादितिभावः॥२३॥२४॥विव्यथितेंद्रियः विशेषेण
व्यथितानींद्रियाणियस्यसः॥२५॥२६॥विक्रमपर्याप्तः पर्याप्तविक्रमः॥२७॥सादितौ पीडितौ॥२८॥

230

धरतेमारुतिस्तातमारुतप्रतिमोयदि॥वैश्वानरसमोवीर्येजीविताशात्ततोभवेत्॥२३॥त
तोवृद्धमुपागम्यविनयेनाभ्यवादयत्॥गृह्यजांबवतःपादौहनूमान्मारुतात्मजः॥२४॥श्रु
त्वाहनुमतोवाक्यंतदाविव्यथितेंद्रियः॥पुनर्जातमिवात्मानंमन्यतेप्लवगोत्तमः॥२५॥ततोब्रु
वीन्महातेजाहनूमंतंसजांबवान्॥आगच्छहरिशार्दूलवानरांस्त्रातुमर्हसि॥२६॥नान्यो वि
क्रमपर्याप्तस्त्वमेषांपरमःसखा॥त्वत्पराक्रमकालोयंनान्यंपश्यामिकंचन॥२७॥ऋक्षवा
नरवीराणांअनीकानिप्रहर्षय॥विशल्यौकुरुचाप्येतौसादितौरामलक्ष्मणौ॥२८॥गत्वापर
ममध्वानमुपर्युपरिसागरं॥हिमवंतंनगश्रेष्ठंहनूमन्गंतुमर्हसि॥२९॥ततःकांचनमत्यु
ग्रमृषभंपर्वतोत्तमं॥कैलासशिखरंचात्रद्रक्ष्यस्यरिनिषूदन॥३०॥तयोःशिखरयोर्मध्ये
प्रदीप्तमतुलप्रभं॥सर्वौषधियुतंवीरद्रक्ष्यस्योषधिपर्वतं॥३१॥ ॥ ॥

सागरमित्युपरियोगेषष्ठ्यर्थेद्वितीया॥२९॥कांचनंस्वर्णमयं॥अत्युग्रंसिंहादिभिर्दुष्प्रवेशं॥ऋ
षभंतदाख्यं॥३०॥तयोःशिखरयोःऋषभकैलासशिखरयोरित्यर्थः॥३१॥ श्री

मार्गतेः विशिष्येत्यर्थः तस्यवहुत्वज्ञत्वादुपायप्रश्नार्थमितिभावः॥१३॥स्वभावजरयायुक्तंवयःस्वभा
वाज्जरयावलीपलितादिनायुक्तं॥१४॥१५॥कृच्छ्राद्वाक्यंप्रत्युत्तरंवाक्यमभ्युद्गिरन्नुच्चारयन्॥१६॥१७

सागरौघनिभंभीमंदृष्ट्वाबाणार्दितंवलं॥मार्गतिजांववंतंचहनूमान्सविभीषणः॥१३॥स्वभा
वजरयायुक्तंवृद्धंशरशतैश्चितं॥प्रजापतिसुतंवीरंशाम्यंतमिवपावकं॥१४॥दृष्ट्वासम-
भिसंक्रम्यपौलस्त्योवाक्यमब्रवीत्॥कच्चिदार्यशरैस्तीक्ष्णैर्नप्राणाध्वंसितास्तव॥१५॥विभी
षणवचःश्रुत्वाजांववान्हरिपुंगवः॥कृच्छ्रादभ्युद्गिरन्वाक्यमिदंवचनमब्रवीत्॥१६॥नैर्ऋतेंद्र
महावीर्यस्वरेणत्वाभिलक्षये॥विद्धगात्रःशितैर्वाणैर्नत्वांपश्यामिचक्षुषा॥१७॥अंजनासुप्र
जायेनमातरिश्वाचसुव्रत॥हनूमान्वानरश्रेष्ठःप्राणान्धारयतेक्वचित्॥१८॥श्रुत्वाजांववतो
वाक्यमुवाचेदंविभीषणः॥आर्यपुत्रावतिक्रम्यकस्मात्पृच्छसिमारुतिं॥१९॥नैवराजनिसु-
ग्रीवेनांगदेनापिराघवे॥आर्यसंदर्शितःस्नेहोयथावायुसुतेपरः॥२०॥विभीषणवचःश्रु
त्वाजांववान्वाक्यमब्रवीत्॥शृणुनैर्ऋतशार्दूलयस्मात्पृच्छामिमारुतिं॥२१॥अस्मिन्जी
वतिवीरेतुहतमप्यहतंवलं॥हनूमत्युज्झितप्राणेजीवंतोपिमृतावयं॥२२॥ अ

येनांजनादेवीसुप्रजाःसुपुत्रवती॥१८॥आर्यपुत्रौराघवौ॥१९॥आर्यजांववान्॥२०॥२१॥२२॥

अतएवसाघूर्णितेत्यनेनलंकाक्षोभउच्यते·प्रनृत्येवप्रवृत्तनृत्येव॥४०॥४१॥वडवामुखवत्·जाज्वल्यमा
नंमुखंविवृत्यआदायराक्षसान्त्रासयन्नुग्रंउच्चैर्ननाद·यावदौषध्यानयनंतावद्रक्षोनिर्गमोमाभूदि

साघूर्णितमहाद्वाराप्रभग्नगृहगोपुरा॥लंकात्रासाकुलारात्रौप्रनृत्येवाभवत्तदा॥४०॥पृथि
वीधरसंकाशोनिपीड्यपृथिवीधरं॥पृथिवींक्षोभयामाससार्णवामारुतात्मजः॥४१॥पद्भ्यां
तुशैलमाविध्यवडवामुखवन्मुखं॥विवृत्योग्रंननादोच्चैस्त्रासयन्रजनीचरान्॥४२॥तस्य
नानद्यमानस्यश्रुत्वानिनदमुत्तमं॥लंकास्थाराक्षसव्याघ्रानशेकुःस्पंदितुंक्वचित्॥४३॥
नमस्कृत्वासमुद्रायमारुतिर्भीमविक्रमः॥राघवार्थेपरंकर्मसमीहतपरंतपः॥४४॥सपु
च्छमुद्यम्यभुजंगकल्पंविनम्यपृष्ठंश्रवणेनिकुंच्य॥विवृत्यवक्त्रंवडवामुखाभमापुप्लु
वेव्योम्निसचंडवेगः॥४५॥सवृक्षषंडांस्तरसाजहारशैलान्शिलाःप्राकृतवानरांश्च॥बाहूरु
वेगोद्धतसंप्रणुन्नास्तेक्षीणवेगाःसलिलेनिपेतुः॥४६॥सतौप्रसार्योरगभोगकल्पौभुजौ
भुजंगारिनिकाशवीर्यः॥जगामशैलंनगराजमग्र्यंदिशःप्रकर्षन्निववायुसूनुः॥४७॥

तितेषांत्रासार्थंनादेतिभावः॥४२॥४३॥समीहतचिंतितवान्॥४४॥सपुच्छमित्यनेनजातिवर्णनं॥४५॥प्रक
तवानरान्त्रिकूटवनेनित्यवासान्प्राकृतवानरान्·तेक्षीणवेगाःअनुगतवृक्षषंडादयः॥४६॥भुजंगा
रिर्गरुडः।४७॥

ओषधयो दीप्ताः दीप्ता ओषधीरित्यर्थः॥३२॥ सुवर्णकरणीं स्वर्णसमानवर्णस्य देहादेः करणीं सवर्णेति
पाठे पूर्ववर्णसमानवर्णकरणीमित्यर्थः संधानीं छिन्नशिरःकबंधयोरपि यथा पूर्वं नाडीसंधानकरणीं

तस्य वानरशार्दूल चतस्रो मूर्ध्नि संभवाः॥ दृष्टस्योषधयो दीप्ता दीपयंती दिशो दश॥३२॥ मृतसं
जीवनीं चैव विशल्यकरणीमपि॥ सुवर्णकरणीं चैव संधानकरणीं तथा॥३३॥ ताः सर्वा हनु
मन् गृह्य क्षिप्रमागंतुमर्हसि॥ आश्वासय हरीन्प्राणैर्योज्य गंधवहात्मज॥३४॥ श्रुत्वा जांबवतो
वाक्यं हनूमान्मारुतात्मजः॥ आपूर्यत बलोद्धर्षैर्वायुवेगैरिवार्णवः॥३५॥ स पर्वततटाग्रस्थः
पीडयन्पर्वतोत्तमं॥ हनूमान्दृश्यते वीरो द्वितीय इव पर्वतः॥३६॥ हरिपादविनिर्भग्नो निषः
साद स पर्वतः॥ न शशाक तदात्मानं वोढुं भृशनिपीडितः॥३७॥ तस्य पेतुर्नगा भूमौ हरिवेगाः
च्च जज्वलुः॥ शृंगाणि च व्यकीर्यंत पीडितस्य हनूमता॥३८॥ तस्मिन्संपीड्यमाने तु भग्नद्रुम
शिलातले॥ न शेकुर्वानराः स्थातुं घूर्णमाने नगोत्तमे॥३९॥

॥३३॥ प्राणैर्योजयित्वाश्व आश्वासयेत्य
न्वयः॥३४॥ बलोद्धर्षैः बलोद्रेकैः॥३५॥ पर्वततटाग्रस्थः त्रिकूटशिखरस्थः॥३६॥ हरिपादविनिर्भग्नः त
त्पादभाराक्रांतः निषसाद निविष्टोऽभूत्॥३७॥ हरिवेगात् हनूमत उत्पतनवेगात् नगा वृक्षाः पेतुः पर
स्परसंघर्षजाग्निवशतो जज्वलुश्च॥३८॥ तस्मिन् त्रिकूटपर्वते घूर्णमाने नगोत्तमे वानराः स्थातुं न शेकुः

त्रिकूटस्यैव युद्धभूमित्वात् तच्छिखरस्यैव चलनं का
त॥३९॥

तद्दृष्टदेवतादिस्थानानांनामान्याह·सब्रह्मेति·ब्रह्मकोशं·भगवतोहिरण्यगर्भस्यस्थानंब्रह्मप्रपद्ये·ब्र
ह्मकोशंप्रपद्येइत्यादिश्रुतिसिद्धं·रजतालयं·हिरण्यगर्भापरमूर्त्तेरजतनाभेःस्थानं·रुद्रशरप्रमो
क्षं·यत्रस्थानेस्थित्वारुद्रस्त्रिपुरसंहारायशरंमुमोचतत्स्थानं·हयाननं·भगवतोहयग्रीवस्यस्था

सब्रह्मकोशंरजतालयंचशक्रालयंरुद्रशरप्रमोक्षं॥हयाननंब्रह्मशिरश्चदीप्तंददर्श
वैवस्वतकिंकरांश्च॥५५॥वरुणालयंवैश्रवणालयंचसूर्यप्रभंसूर्यनिबंधनंच॥ब्रह्मा
लयंशंकरकार्मुकंचददर्शनाभिंचवसुंधरायाः॥५६॥कैलासमुग्रंहिमवच्छिलांचतंवे
वर्षंकांचनशैलमग्र्यंप्रदीप्तसर्वौषधिसंप्रदीप्तंददर्शसर्वौषधिपर्वतेंद्रं॥५७॥

नं·ब्रह्मशिरोब्रह्मास्त्रदेवतातत्स्थानं·तत्रतत्रनित्यसंनिहितान्वैवस्वतकिंकरांश्चददर्श॥५५॥
वरुणालयमिति·सूर्यनिबंधनंसूर्याणांयत्रस्थानेनिबंधनंसमावेशस्तत्स्थानंअतएवत
त्सूर्यप्रभं·ब्रह्मालयं·चतुर्मुखब्रह्मस्थानं·शंकरकार्मुकंपिनाकास्त्रराजस्थानंवसुंधरा
याःनाभिंक्ष्माभिसंज्ञंप्राजापत्यंस्थानं॥५६॥हिमवच्छिलां·भगवतोरुद्रस्यतपःसमाधिपी
ठंतंचैववर्षंजांबवदुपदिष्टं॥५७॥

४८।जनान्जनपदान्॥४९॥५०॥५१॥स्मरन्जांबवंतोवाक्यंतद्वाक्यस्मरणंवेगवशादोषाधिपर्वतमतीत्य

ससागरंघूर्णितवीचिमालंतदंभसाभ्रामितसर्वसत्वं॥समीक्षमाणःसहसाजगामचक्रंय
थाविष्णुकराग्रमुक्तं॥४८॥सपर्वतान्पक्षिगणान्सरांसिनदीस्तटाकानिपुरोत्तमानि॥स्फी
तान्जनांस्तानपिसंप्रवीक्ष्यजगामवेगात्पितृतुल्यवेगः॥४९॥आदित्यपथमाश्रित्यजगामस
गतश्रमः॥हनूमांस्त्वरितोवीरःपितुस्तुल्यपराक्रमः॥५०॥जवेनमहतायुक्तोमारुतिर्वातरं
हसा॥जगामहरिशार्दूलोदिशःशब्देननादयन्॥५१॥स्मरन्जांबवतोवाक्यंमारुतिर्भीमवि
क्रमः॥ददर्शसहसाचापिहिमवंतंमहाकपिः॥५२॥नानाप्रस्रवणोपेतंबहुकंदरनिर्झरं॥श्वे
ताभ्रचयसंकाशैःशिखरैश्चारुदर्शनैः॥५३॥शोभितंविविधैर्वृक्षैरगमत्पर्वतोत्तमं॥सतंसमा
साद्यमहानगेंद्रमतिप्रवृद्धोत्तमहेमशृंगं॥ददर्शपुण्यानिमहाश्रमाणिसुरर्षिसंघोत्तमसेवितानि
॥५४॥

गमननिवृत्त्यर्थं॥५२॥५३॥सुरर्षिसंघोत्तमेति।उत्तमसुरर्षिसंघेत्यर्थः॥५४॥ श्रीजानकीप्रियाय

सपावकेनसाग्निज्वालेनअर्पितेनस्वकरार्पितेन॥६६॥६७॥६८॥६९॥७०॥यदिमहौषधीनांगंधमाघ्राय राघवौहरिप्रवीराश्चयथापूर्वमतंतंस्वस्थास्तदौषधिगंधस्पर्शःसाधारणत्वात्तेषामनुत्थानेहेतु

सतेनशैलेनभृशंरराजशैलोपमोगंधवहात्मजस्तु॥सहस्रधारेणसपावकेनचक्रेणखेविष्णुरिवार्पितेन॥६६॥तंवानराःप्रेक्ष्यतदाविनेदुःसतानपिप्रेक्ष्यमुदाननाद॥तेषांसमुत्कृष्टरवंनिशम्यलंकालयाभीमतरंविनेदुः॥६७॥ततोमहात्मानिपपाततस्मिन्शैलोत्तमेवानरसैन्यमध्ये हर्युत्तमेभ्यःशिरसाभिवाद्यविभीषणंतत्रचसस्वजेसः॥६८॥तावप्युभौमानुषराजपुत्रौ तंगंधमाघ्रायमहौषधीनां॥बभूवतुस्तत्रतदाविशल्यावुत्तस्थुरन्येचहरिप्रवीराः॥६९॥ सर्वेविशल्याविरुजाक्षणेनहरिप्रवीराश्चहताश्चयेस्युः॥गंधेनतासांप्रवरौषधीनांसुप्तानिशांतेष्विवसंप्रबुद्धाः॥७०॥यदाप्रभृतिलंकायांयुध्यंतेहरिराक्षसाः॥तदाप्रभृतिमानार्थमाज्ञयारावणस्यच॥७१॥येहन्यंतेरणेतत्रराक्षसाःकपिकुंजरैः॥हताहतास्तुक्षिप्यंतेसर्वएवतुसागरे॥७२॥

माद्रःयदेतिमानार्थंअर्थशब्दोनिवृत्तिवाचीशत्रूणांहतराक्षसेयत्ताज्ञानाभावार्थमित्यर्थः तत्परिज्ञानेतुअवशिष्टबलस्याल्पीयस्त्वंज्ञात्वावानराःलंकांप्रविशेयुस्तेमाप्रविशन्त्वित्येतदर्थोयंरावणस्येश्वरेच्छयाचिचारः॥७१॥हताहताइतिवीप्सा·सर्वएवहताइत्यर्थः॥७२॥

वासवस्पमेघस्वरूपिणोदेवराजस्पदूतःप्रेरकोवायुरित्पर्थः विचयं·मार्गणं॥५५॥योजनसहस्राणि·
सहस्रशब्दोनेकोपलक्षणं॥५९॥६०॥६१॥किमेतदिति·यद्राघवेक्तानुकंपोनासिएवंप्रकारमेतदो

सतंसमीक्ष्पानलराशिदीप्तंविसिस्मयेचासवदूतसूनुः॥आप्लुत्पतंचौषधिपर्वतेंद्रंतत्रौषधी
नांविचयंचकार॥५८॥सयोजनसहस्राणिसमतीत्पमहाकपिः॥दिव्योषधिधरंशैलंव्पचरन्मा
रुतात्मजः॥५९॥महौषध्पस्ततःसर्वास्तस्मिन्पर्वतसत्तमे॥विज्ञायार्थिनमायांतंततोजग्मुरद
र्शनं॥६०॥सतामहात्माहनुमानपश्पंश्चुकोपरोषाद्भृशमुन्ननाद॥अमृष्पमाणोग्निसमान
चक्षुर्महीधरेंद्रंतमुवाचवाक्यं॥६१॥किमेतदेवंसुविनिश्चितंतेयद्राघवेनासिकृतानुकंपः
पश्पाद्यमेद्राङ्बलाभिभूतोविकीर्णमात्मानमथोनगेंद्र॥६२॥सतस्पशृंगंसनगंसनागंसकां
चनंधातुसहस्रजुष्टं॥विकीर्णकूटंज्वलिताग्रसानुंप्रगृह्यवेगात्सहसोन्ममाथ॥६३॥स
भास्कराध्वानमनुप्रपन्नस्तंभास्कराभंशिखरंप्रगृह्य॥बभौतदाभास्करसन्निकाशोर
वेःसमीपेप्रतिभास्कराभः॥६५॥

दासीन्पंवलादित्पर्थःस्वबलादितिचेन्नत्राहपश्पेति॥६२॥
सनागंसगजं·उन्ममाथ·उत्पाटयामास॥६३॥अतःसतमिति॥६४॥तंतदित्पर्थः प्रतिभास्कराभः
प्रतिसूर्यसदृशःरवेःसमीपेइत्पनेनसूर्योदयोत्तरमेतदानयनमितिलभ्पते॥६५॥ ॥

आरक्षो द्वाराणि तस्या द्वाररक्षिणो विरूपाक्षा राक्षसाः आरक्षो गुल्ममित्यन्ये ॥५॥ अट्टः गृहोपरितनं गृहं स्यादट्टः क्षौममस्त्रियामिति वा· प्रतोलिः रथ्या चर्या अल्परथ्या ॥६॥ तेषां वानराणां संबंधी हुतभुक् ददाह· पतंति· अपतत् ॥७॥ दह्यते दग्धः ॥८॥ और्णं ऊर्णासूत्रनिर्मितं· आविकं आविरोमनिर्मितं ऊर्णा त्वितरेषामपीति न पौनरुक्त्यं· कांचनभांडं सौवर्णमुपकरणं ॥९॥ वाजिभांडपरिच्छदं· वाजिनां भांड

उल्काहस्तैर्हरिगणैः सर्वतः समभिद्रुताः ॥ आरक्षस्था विरूपाक्षाः सहसा विप्रदुद्रुवुः ॥५॥ गोपुराट्ट
प्रतोलीषु चर्यासु विविधासु च ॥ प्रासादेषु च संहृष्टाः ससृजुस्ते हुताशनं ॥६॥ तेषां गृहसहस्राणि
ददाह हुतभुक् तदा ॥ प्रासादाः पर्वताकाराः पतंति धरणीतले ॥७॥ अगरुर्दह्यते तत्र परं चैव सु
चंदनं ॥ मौक्तिका मणयः स्निग्धा वज्रं चापि प्रवालकं ॥८॥ क्षौमं च दह्यते तत्र कौशेयं चापि शोभनं ॥
आविकं विविधं चौर्णं कांचनं भांडमायुधं ॥९॥ नानाविकृतसंस्थानं वाजिभांडपरिच्छदं ॥ गजगैवे
यकक्ष्याश्च रथभांडाश्च संस्कृतान् ॥१०॥

मलंकारः परिच्छदः पल्ययनादिश्च· तत् नानाश्च अनेकं विकृतसंस्थानं विचित्रविन्यासं· ॥ रथभांडान् रथालंकारान् संस्कृतान्· सम्यग्रचितान्· भांडशब्दोऽलंकारमात्रवाची· । रथभांडेत्युक्तेः अत एव वाजिभांडेत्यत्र वाजिग्रहणं च रितार्थं अश्वालंकारवाचित्वे तु न द्वैयर्थ्यं स्पष्टमेव तत्त्वेपि कर्णावतंसादिवत्साहित्यबोधनार्थं तत्रासः रथभांडेत्यत्र तुलातणिक इत्यन्ये ॥१०॥

ओषधीशैलमितिदीर्घ आर्षः आश्विनकृष्णाष्टम्यामिद ॥७३॥६१॥ इति श्रीरामाभिरामे श्रीरा० रा० ति
य० चतुःसप्ततितमः सर्गः ॥७४॥ तत इति· अर्थ्यमर्थ्यादनपेतमग्रेकर्त्तव्यं विज्ञापयन् ॥१॥ निषूदिताः रा
घवाभ्यामिति शेषः तस्मादिदानीमुपनिर्हारं पुररक्षो दातुं संपादयितुं नार्हतीतिकतकः उपनिर्हारं निषू
म्पयुद्धप्रदानमितितीर्थः उपनिर्हारं युद्धावहारमस्माकं दातुं नार्हतीत्यर्थः अनेनान्यदा युद्धावहारो जा

ततो हरिर्गंधवहात्मजस्तु तमोषधीशैलमुदग्रवेगः। निनाय वेगाद्धिमवंतमेव पुनश्च रामे
ण समाजगाम ॥७३॥ इत्यार्षे श्रीरा० युद्ध० चतुःसप्ततितमः सर्गः ॥७४॥ ततोब्रवीन्महातेजाः सु
ग्रीवो वानरेश्वरः ॥ अर्थ्यं विज्ञापयंश्चापि हनूमंतमिदं वचः ॥१॥ यतो हतः कुंभकर्णः कुमाराश्च निषू
दिताः ॥ निदानीमुपनिर्हारं रावणो दातुमर्हति ॥२॥ ये ये महाबलाः संति लघवश्च प्लवंगमाः ॥ लं
काम् अभिपतंत्वाशु गृह्योल्काः प्लवगर्षभाः ॥३॥ ततोस्तंगत आदित्ये रौद्रे तस्मिन्निशामुखे । लंकाम
भिमुखाः सोल्का जग्मुस्ते प्लवगर्षभाः ॥४॥

न इति ज्ञायत इत्यन्ये ॥२॥ अतो ये ये महाबलाः संति लघवः ।
क्षिप्रकारिणस्ते सर्वे उल्का गृहीत्वा लंकामभ्युत्पत्य तां तु दाहायेति भावः ॥३॥ ततोस्तमिति· पूर्वदिवसापर
रात्रिशेषे उल्काहस्ताभ्यां हनूमद्विभीषणाभ्यां जांबवदन्वेषणं ततस्तन्नियोगतउषसि पर्वताहरणा
य गमनं अथाहरणं पुनश्च तत्स्थापणं पुनरागमनमिति त्रिंशत् घटिकामध्ये सर्वं ततः पुनः प्रदोषे ह
नूमदादीनां लंकादाहगमनमिति कतकादयः ॥४॥

हैमेत्यादि·हैमनिर्मितानिपूर्णचंद्रार्धचंद्राकारवंतिचंद्रशालोत्तमानिप्रशस्तशिरोगृहाणि·साधिष्ठानानि
मंचादिसहितानि॥१९॥दिवाकरंस्पृशंतीवस्थितानि॥२०॥२१॥घर्मगेग्रीष्मगेदिवाकरेगतेप्रवृत्तानि

हैमचंद्रार्धचंद्राणिचंद्रशालोत्तमानिच॥तत्रचित्रगवाक्षाणिसाधिष्ठानानिसर्वशः॥१९॥मणिवि
द्रुमचित्राणिस्पृशंतीवदिवाकरं॥क्रौंचबर्हिणवीणानांभूषणानांचनिस्वनैः॥२०॥नादि
तान्यचलाभानिवेश्मान्यग्निर्ददाहसः॥ज्वलनेनपरीतानितोरणानिचकाशिरे॥२१॥वि
द्युद्भिरिवनद्धानिमेघजालानिघर्मगे॥ज्वलनेनपरीतानिगृहाणिप्रचकाशिरे॥२२॥दवा
ग्निदीप्तानियथाशिखराणिमहागिरेः॥विमानेषुप्रसुप्तानिदह्यमानावरांगनाः॥२३॥त्य
क्ताभरणसंयोगाहाहेत्युच्चैर्विचुक्रुशुः॥तत्रचाग्निपरीतानिनिपेतुर्भवनान्यपि॥२४॥वज्रि
वज्रहतानीवशिखराणिमहागिरेः॥तानिनिर्दह्यमानानिदूरतःप्रचकाशिरे॥२५॥हि
मवच्छिखराणीवदह्यमानानिसर्वशः॥हर्म्याग्रैर्दह्यमानैश्चज्वालाप्रज्वलितैरपि॥२६॥रा
त्रौसादृश्यतेलंकापुष्पितैरिवकिंशुकैः॥हस्त्यध्यक्षैर्गजैर्मुक्तैर्मुक्तैश्चतुरगैरपि॥बभूवलंका
लोकांतेभ्रांतग्राहइवार्णवः॥२७॥

विद्युद्भिर्नद्धानिमेघजालानीवस्थितानिगृहाणि॥२२॥विमानंस
प्तभूमिःप्रासादः॥२३॥तत्रचेतिसप्तभूमिप्रासादेवर्तमानानिगृहाणीत्यर्थः॥२४॥२५॥२६॥हस्त्यध्य
क्षागजस्वामिनस्तैर्दाहपरित्राणायमुक्तैर्गजैःलोकांतेप्रलयेभ्रांताघूर्णमानाग्राहायस्यसः॥२७॥

११ रोमजं कंबलादि वालजं चामरादि· व्याघ्रजं चर्म· आसनोपयोगि· अंडजं मृगमदादि ॥१२॥ अस्त्रं शस्त्रं· चि
त्रान् गृहान् स्वस्तिकादिगृहान् ॥१३॥ गृहे गृध्नुना गृहस्थानां दीर्घभावा आर्षः हेमचित्रं तनुत्रं येषां ते तेषां भां
डानि भूषणानि ॥१४॥ शीधुपानेन चंचलानि अक्षीणि येषां शत्रुषु संजातो मन्युर्येषां अदीर्घत्वमार्षं ॥१५

तनुत्राणि च योधानां हस्त्यश्वानां च चर्म च ॥ खड्गा धनूंषि ज्या बाणास्तोमरांकुशशाक्तयः ॥११॥ रोम
जं बालजं चर्म व्याघ्रजं चांडजं बहु ॥ मुक्तामणिविचित्रांश्च प्रासादांश्च समंततः ॥ विविधानस्त्रसं
घातानग्निर्दहति तत्र वै ॥ नानाविधान् गृहांश्चित्रान् ददाह हुतभुक् तदा ॥१३॥ आवासान् राक्षसानां च
सर्वेषां गृहगृध्नुनां ॥ हेमचित्रतनुत्राणां स्रग्भांडांबरधारिणां ॥१४॥ शीधुपानचलाक्षाणां मदविह्व
लगामिनां ॥ कांतालंबितवस्त्राणां शत्रुसंजातमन्युनां ॥१५॥ गदाशूलासिहस्तानां खादतां मिषतामपि
पि ॥ शयनेषु महार्हेषु प्रसुप्तानां प्रियैः सह ॥१६॥ त्रस्तानां गच्छतां तूर्णं पुत्रानादाय सर्वतः ॥ तेषां श
तसहस्राणि तदा लंकानिवासिनां ॥१७॥ अदहत् पावकस्तत्र जज्वाल च पुनः पुनः ॥ सारवंति महा
र्हाणि गंभीरगुणवंति च ॥१८॥

प्रियैः प्रियवस्तभिः कांताभिरित्यर्थः ॥१६॥ त्रस्तानां गच्छतां अग्निभया
दिति शेषः एवंभूतानां लंकानिवासिनां शतसहस्राणि गृहाण्यदहत् ॥१७॥ दह्यमानगृहवर्णनं सारवं
तीत्यादि सारवत्त्वं स्थिरसंस्थानवत्त्वं· गंभीरगुणवंति· अनेककक्ष्याप्राकारांतर्गेहद्वारतो दुर्गमत्वलक्षणं
गांभीर्यवंति ॥१८॥

रामा॰यु॰
२३६

एतत्त्रयंव्याप्यव्याप्तमभूत्॥३८॥३९॥सन्नाहजघोषः॥४०॥रौद्रीव॰वा॰कालरात्रिरिव॥४१॥यत्रयस्यआसन्नं
द्वारंतत्तेआसाद्ययुध्यध्वमित्यादिष्टाः॥४२॥अपिचवोयुष्माकंमध्येतत्रगुल्मेस्थितेवितथंपलायनं

वानरोद्घुष्टघोषश्चराक्षसानांचनिस्वनः॥ज्याशब्दश्चापिरामस्यत्रयंव्यापदिशोदश॥३८॥तस्य
कार्मुकनिर्मुक्तैःशरैस्तत्पुरगोपुरं॥कैलासशृंगप्रतिमंविकीर्णमपतद्भुवि॥३९॥ततोरामशरा
न्दृष्ट्वाविमानेषुगृहेषुच॥सन्नाहोराक्षसेंद्राणांतुमुलःसमपद्यत॥४०॥तेषांसन्नह्यमानानां
सिंहनादंचकुर्वतां॥शर्वरीराक्षसेंद्राणांरौद्रीवसमपद्यत॥४१॥आदिष्टावानरेंद्रास्तेसुग्रीवे
णमहात्मना॥आसन्नंद्वारमासाद्ययुध्यध्वंचप्लवंगमाः॥४२॥यश्चवोवितथंकुर्यात्तत्रतत्राप्युप
स्थितः॥सहंतव्योभिसंप्लुत्यराजशासनदूषकः॥४३॥तेषुवानरमुख्येषुदीप्तोल्कोज्ज्वलपाणि
षु॥स्थितेषुद्वारमाश्रित्यरावणंक्रोधमाविशत्॥४४॥तस्यजृंभितविक्षेपाद्व्यामिश्रावैदिशो
दश॥रूपवानिवरुद्रस्यमन्युर्गात्रेष्वदृश्यत॥४५॥सकुंभंचनिकुंभंचकुंभकर्णात्मजावुभौ
प्रेषयामाससंक्रुद्धोराक्षसैर्बहुभिःसह॥४६॥

कुर्यात्सराजशासनदूषकःमदाज्ञातिवर्तीतिसम
द्भिःप्लवगैर्हंतव्यइत्यादिष्टाः॥४३॥स्थितेषुसत्स्वितिशेषः॥४४॥तस्यरावणस्यभयक्रोधजंयज्जृं
भितंविजृंभणंतद्युक्तविक्षेपात्सशब्दमहावायुप्रवृत्त्यादशदिशोव्यामिश्राःव्याप्ताःरूपवान्रुद्र
स्यगात्रेषुभ्रुकुटीचक्रमुखादिष्वदृश्यत॥४५॥४६॥

राम॰
२३६

236

२८॥छायावन्हिज्वालाप्रतिबिंबं॥२९॥३०॥धूमैर्व्याप्तस्यातएवोच्चैर्विनेदुषः क्रस्वंतं नारीजनस्यस्वनइत्य

अश्वंमुक्तंगजोदृष्ट्वाक्वचिद्भीतोपसर्पति॥भीतोभीतंगजंदृष्ट्वाक्वचिदश्वोनिवर्त्तते॥२८॥लंका
यांदह्यमानायांशुशुभेचमहोदधिः॥छायासंसक्तसलिलोलोहितोदइवार्णवः॥२९॥साबभू
वमुहूर्त्तेनहरिभिर्दीपितापुरी॥लोकस्यास्यक्षयेघोरेप्रदीप्तेववसुंधरा॥३०॥नारीजनस्यधूमेन
व्याप्तस्योच्चैर्विनेदुषः॥स्वनोज्वलनतप्तस्यशुश्रुवेशतयोजनं॥३१॥प्रदग्धकायानपरान्रा
क्षसान्निर्गतान्बहिः॥सहसात्युत्पततिस्मह्हरयोथयुयुत्सवः॥३२॥उद्घुष्टंवानराणांचराक्षसा
नांचनिस्वनं॥दिशोदशसमुद्रंचपृथिवींचव्यनादयत्॥३३॥विशल्यौचमहात्मानौतावुभौरा
मलक्ष्मणौ॥असंभ्रांतौजगद्धनुस्तेउभेधनुषीवरे॥३४॥ततोविस्फारयानस्यरामस्यधनुरु
त्तमं॥बभूवतुमुलःशब्दोराक्षसानांभयावहः॥३५॥अशोभततदारामोधनुर्विस्फारयन्मह
हत्॥भगवानिवसंक्रुद्धोभवोवेदमयंधनुः॥३६॥उद्घुष्टंवानराणांचराक्षसानांचनिस्वनं।
ज्याशब्दस्तावुभौशब्दोअतिरामस्यशुश्रुवे॥३७॥

न्वयः॥३१॥३२॥३३॥३४॥३५॥संहारकालेसंक्रुद्धोभगवान्भवःशब्दब्रह्मात्मकंवेदमयंधनुर्विस्फारय
न्निव॥३६॥रामस्यज्याशब्दस्तावुभौवानरराक्षसशब्दावतिक्रम्याधरीकृत्यशुश्रुवे॥३७॥

५५ ज्वलितप्रासं बाणवर्षणाद्युज्वलितप्रासमित्यर्थ इति कतकः हेमजालेति हेमजालव्याप्तभुजमित्यर्थः व्यावेष्टिताः चालिताः परस्वधा यस्मिन् तत्त ॥५६॥ गंधादीनामुत्सेकत आधिक्यतः संमोदितो महान नि

दीप्तमुशलगदाखड्गप्रासतोमरकार्मुकं ॥ तद्राक्षसबलं भीमं घोरविक्रमपौरुषं ॥५५॥ ददृशे ज्वलितप्रासं किंकिणीशतनादितं ॥ हेमजालाचितभुजं व्यावेष्टितपरस्वधं ॥५६॥ व्याघूर्णितमहाशस्त्रं बाणसंसक्तकार्मुकं ॥ गंधमाल्यमधूत्सेकसंमोदितमहानिलं ॥५७॥ घोरं शूरजनाकीर्णं महांबुधरनिस्वनं ॥ तद्दृष्ट्वा बलमायांतं राक्षसानां दुरासदं ॥५८॥ संचचाल प्लवंगानां बलमुच्चैर्ननादच ॥ जवेनाप्लुत्य च पुनस्तद्बलं रक्षसां महत् ॥५९॥ अभ्ययात्प्रत्यरिबलं पतंगा इव पावकं ॥ तेषां भुजपरामर्शव्यामृष्टपरिघाशनि ॥६०॥ राक्षसानां बलं श्रेष्ठं भूयः परमशोभत ॥ तत्रोन्मत्ता इवोत्पेतुर्हरयोथ युयुत्सवः ॥६१॥ तरुशैलैरभिघ्नंतो मुष्टिभिश्च निशाचरान् ॥ तथैवापततां तेषां हरीणां निशितैः शरैः ॥६२॥ शिरांसि सहसा जह्रू राक्षसा भीमविक्रमाः ॥ दशनैर्हृतकर्णाश्च मुष्टिभिर्भिन्नमस्तकाः ॥६३॥ शिलाप्रहारभग्नांगा विचेरुस्तत्र राक्षसाः ॥ तथैवाप्यपरे तेषां कपीनामसिभिः शितैः ॥ प्रवरानभितो जघ्नुर्घोररूपा निशाचराः ॥६४॥

लो येन तत् ॥५७॥ ५८ ॥ संचचाल लंकाया इति शेषः ॥५९॥ तेषां रक्षसां भुजपरामर्शेन भुजबंधनेन व्यामृष्टाः व्याघूर्णिताः परिघाशनयो यत्र तत् ॥६०॥ ६१ ॥ ६२ ॥ ६३ ॥ अप

रे निशाचरास्तेषां कपीनां प्रवरान् जघ्नु ॥६४॥

४७॥अथास्यांरात्र्यामेवगच्छतेतिवानरानीकभयायस्वयंसिंहनादंनादयन्ःकुर्वन्शशास॥४८॥४९॥स
प्रभंनिस्तिमिरं॥५०॥ताराधिपस्यचंद्रस्यताराणांनक्षत्राणांतयोर्वानरराक्षसबलयोराभरणाभाआ

यूपाक्षःशोणिताक्षश्चप्रजंघःकंपनस्तथा॥निर्ययुःकौंभकर्णाभ्यांसहरावणशासनात्॥४७॥
शशासचैवतान्सर्वान्राक्षसान्समहाबलान्॥राक्षसागच्छताद्यैवसिंहनादंचनादयत्॥४८॥त
च्चोदितास्तेनराक्षसाज्वलितायुधाः॥लंकायानिर्ययुर्वीराःप्रणदंतःपुनःपुनः॥४९॥रक्षसां
भूषणस्थाभिर्भाभिःस्वाभिश्चसर्वशः॥चक्रुस्तेसप्रभंव्योमहरयश्चाग्निभिःसह॥५०॥तत्रतारा
धिपस्याभाताराणांभातथैवच॥तयोराभरणाभाचज्वलिताद्यामभासयत्॥५१॥चंद्राभाभूषणा
भाचग्रहाणांज्वलिताचभा॥हरिराक्षससैन्यानिभ्राजयामाससर्वतः॥५२॥तत्रचार्द्धप्रदीप्ता
नांगृहाणांसागरःपुनः॥भाभिःसंसक्तसलिलश्चलोर्मिःशुशुभेधिकं॥५३॥पताकाध्वजसंयु
क्तमुत्तमासिपरश्वधं॥भीमाश्वरथमातंगनानापत्तिसमाकुलं॥५४॥

भरणकांतिश्चज्वलिता
प्रकाशमानाद्यांसेनाद्वयमध्यगगनाकाशप्रदेशमभासयत्॥५१॥उक्तश्लोकस्यैवव्याख्यानंचं
द्राभेत्यादिग्रहाणांनक्षत्राणां॥५२॥संसक्तंसंबद्धंसलिलंयस्यसः॥५३॥उत्तमासिपरश्वधंपर
श्वधोद्विविधःअसिरूपःकुठाररूपश्चतत्रासिरूपपरश्वधमित्यर्थःतेनासिखड्गयोर्नपौनरुक्त्यं॥५४॥

क्षुरः क्षुराग्रः शरः क्षुरप्रोर्धचंद्राकृतिः नाराचः सर्वायसः वत्सदंतस्तदाकारः शिलीमुखः कंकपत्रसदृ
शः कर्णी पार्श्वद्वयस्थितकर्णाकारावयवः शल्यभूयस्त्वा दीर्घफलको बाणः शल्यः विपाटः करवी

क्षुरक्षुरप्रनाराचैर्वत्सदंतैः शिलीमुखैः ॥ कर्णिशल्यविपाटैश्च बहुभिर्निशितैः शरैः ॥६॥ अंगदप्र
तिविद्धांगो वालिपुत्रः प्रतापवान् धनुरुग्रं रथं बाणान् ममर्द्दतरसा बली ॥७॥ शोणिताक्षस्ततः क्षि
प्रमासिचर्मसमाददे ॥ उत्पपात तदा क्रुद्धो वेगवानविचारयन् ॥८॥ तं क्षिप्रतरमाप्लुत्य परामृश्यांग
दो बली ॥ करेण तस्य तं खड्गं समाच्छिद्य ननाद च ॥९॥ तस्यांसफलके खड्गं निजघान ततोंगदः ॥ य
ज्ञोपवीतवच्चैनं चिच्छेद कपिकुंजरः ॥१०॥ तं प्रगृह्य महाखड्गं विनद्य च पुनः पुनः ॥ वालिपु
त्रोभिदुद्राव रणशीर्षपरान्नरान् ॥११॥ प्रजंघसहितो वीरो यूपाक्षस्तु ततो बली ॥ रथेनाभिय
यौ क्रुद्धो वालिपुत्रं महाबलं ॥ आयसीं तु गदां गृह्य स वीरः कनकांगदः ॥ शोणिताक्षः समाश्व
स्यन्तमेवानुपपात ह ॥१२॥ प्रजंघस्तु महावीरो यूपाक्षसहितो बली ॥ गदयाभिययौ क्रुद्धो वा
लिपुत्रं महाबलं ॥१३॥ तयोर्मध्ये कपिश्रेष्ठः शोणिताक्षप्रजंघयोः ॥ विशाखयोर्मध्यगतः पूर्णचं
द्रैवाबभौ ॥१४॥

६

राग्रसदृशदितितीर्थादयः ॥६॥७॥८॥ परामृश्य धृत्वा ॥९॥ अंसरूपे फलके यज्ञोपवीतवदे
नं शोणिताक्षं चिच्छेद तावतापि न परावृत्तो नापि मृतः ॥१०॥ तं महाखड्गं शोणिताक्षीयं ॥११॥ कनकांगद
दः इति शोणिताक्षविशेषणं ॥१२॥१३॥१४॥

२३०

६५ देहीतियुद्धमितिशेषः॥६६॥६७॥६८॥६९॥क०॥६८॥ इतिश्रीरामाभिरामेश्रीरामायणतिलकेयुद्धकांडेपं

घ्नंतमन्यंजघानान्यःपातयंतमपातयत्॥ गर्हमाणांजगर्हान्योदशंतमपरादशत्॥६५॥ देहीत्यान्यो
ददात्यन्योददामीत्यपरःपुनः॥ किंक्लेशयसितिष्ठेतितत्रान्योन्यंबभाषिरे॥६६॥ विप्रलंभितशस्त्रंच।
विमुक्तकवचायुधं॥ समुद्यतमहाप्रासंमुष्टिशूलासिकुंतलं॥६७॥ प्रावर्त्ततमहारौद्रंयुद्धंवानरर
क्षसां॥ वानरान्दशसप्तेतिराक्षसाजघ्नुराहवे॥६८॥ विप्रस्तंभितवस्त्रंचविमुक्तकवचध्वजं॥ बलं
राक्षसमालंब्यवानराःपर्यवारयन्॥६९॥ इत्यार्षेश्रीरामायणेयुद्धकांडेपंचसप्ततितमःसर्गः
॥७५॥ प्रवृत्तेसंकुलेतस्मिन्घोरेवीरजनक्षये॥ अंगदःकंपनंवीरमाससादरणोत्सुकः॥१॥ आ
हूयसोंगदंकोपात्ताडयामासवेगितः॥ गदयाकंपनःपूर्वंसचचालभृशाहतः॥२॥ ससंज्ञांप्राप्यते
जस्वीचिक्षेपशिखरंगिरेः॥ अर्दितश्चप्रहारेणकंपनःपतितोभुवि॥३॥ ततस्तुकंपनंदृष्ट्वाशोणि
ताक्षोहतंरणे॥ रथेनाभ्यपतत्क्षिप्रंतत्रांगदमभीतवत्॥४॥ सोंगदंनिशितैर्बाणैस्तदाविव्याधवेगि
तः॥ शरीरदारणैस्तीक्ष्णैःकालाग्निसमविग्रहैः॥५॥

चसप्ततितमःसर्गः॥७५॥ अथकंपनादीनामंगदादिभिर्युद्धंप्रवृत्तेइति॥१॥ आहूयेतिपूर्वान्वयिसों
गदंअंगदेनयुद्धायाहूतःकंपनइत्यर्थः सचचालअंगदइत्यर्थः॥२॥३॥ अभीतवत्अभीतार्हं॥४॥५॥

रामा·यु·
२३६

२६॥जग्राहदधार॥२८॥२९॥एतस्मिन्नंतरेशोणिताक्तताडितेद्विविदेशोणिताक्तगदांगृह्णानेसतीत्यर्थः भ्रात

ससंज्ञांप्राप्यतेजस्वीवालिपुत्रःप्रतापवान्॥प्रजंघस्यशिरःकायात्पातयामासमुष्टिना॥२६॥सयू
पाक्षोश्रुपूर्णाक्षोपितृव्येनिहतेरणे॥अवरुह्यरथात्क्षिप्रंक्षीणेषुःखड्गमाददे॥२७॥तमापतंतं
संप्रेक्ष्ययूपाक्षंद्विविदस्त्वरन्॥आजघानोरसिक्रुद्धोजग्राहचबलाद्बली॥२८॥गृहीतंभ्रातरंदृ
ष्ट्वाशोणिताक्षोमहावलः॥आजघानमहातेजावक्षसिद्विविदंततः॥२९॥सततोभिहतस्तेनच
चालचमहावलः॥उद्यतांचपुनस्तस्यजहारद्विविदोगदां॥३०॥एतस्मिन्नंतरेमैंदोद्विविदाभ्या
शमागमत्॥तौशोणिताक्षयूपाक्षौप्लवगाभ्यांतरस्विनौ॥चक्रतुःसमरेतीव्रमाकर्षोत्पाटनंभृश
॥३१॥द्विविदःशोणिताक्षंतुविददारनखैर्मुखे॥निष्पिपेषसवीर्येणक्षितौवाविप्रवीर्यवान्॥३२॥
यूपाक्षमभिसंक्रुद्धोमैंदोवानरपुंगवः॥पीडयामासबाहुभ्यांपपातसहतःक्षितौ॥३३॥हतप्रवीरा
व्यथिताराक्षसेंद्रचमूस्तथा॥जगामाभिमुखीसातुकुंभकर्णात्मजोयतः॥३४॥आपतंतीचवेगे
नकुंभस्तांसांत्वयच्चमूं॥अथोत्कृष्टंमहावीर्यैर्लब्धलक्षैःप्लवंगमैः॥३५॥

सहाय्यार्थंतत्समीप
मागमत्॥३०॥प्लवंगमाभ्यांमैंदद्विविदाभ्यां॥आकर्षआकर्षणं॥उत्पाटनमुत्खाननं॥३१॥३२॥३३॥कुंभ
कर्णात्मजोयतःयत्रतस्थावित्यर्थः॥३४॥सांत्वयत्॥असांत्वयत्॥३५॥

श्रा

२३९

राम·
२३६

परस्परदिदृक्षया · युद्धावसरदिदृक्षयास्वानुरूपप्रतिभटराक्षसजिज्ञासयावा ॥१५॥ प्रतियत्ताः सावधा

अंगदं परिरक्षंतौ मैंदोद्विविदाावचानस्पतस्थुतुरभ्याशे परस्परदिदृक्षया ॥१५॥ अभिपेतुर्म
हाकायाः प्रतियत्ता महाबलाः ॥ राक्षसा वानरान्रोषादसिबाणगदाधराः ॥१६॥ त्रयाणां वान
राणां त्रिभी राक्षसपुंगवैः ॥ संसक्तानां महद्युद्धमभवद्रोमहर्षणं ॥ ते तु वृक्षान्समादाय सं
प्रचिक्षिपु राहवे ॥ खड्गेन प्रतिचिक्षेप तान्प्रजंघो महाबलः ॥१८॥ रथान्सर्वान्द्रुमां शैलान्प्रति
चिक्षिपुराहवे ॥ शरौघैः प्रतिचिच्छेद तान्यूपाक्षो महाबलः ॥१९॥ स ख्यान् द्विविदमैंदाभ्यां द्रुमा
नुत्पाट्य वीर्यवान् ॥ बभंज गदया मध्ये शोणिताक्षः प्रतापवान् ॥२०॥ उद्यम्य विपुलं खड्गं परम
र्मविदारणं ॥ प्रजंघो वालिपुत्राय अभिदुद्राव वेगितः ॥२१॥ तमभ्याशगतं दृष्ट्वा वानरेंद्रो म
हाबलः ॥ आजघानाश्वकर्णेन द्रुमेणातिबलस्तदा ॥२२॥ बाहुं चास्य सनिस्त्रिंशमाजघान समुष्टिना ॥ वालिपुत्रस्य घातेन स पपात क्षितावसिः ॥२३॥ तं दृष्ट्वा पतितं भूमौ खड्गं मुशलसन्निभं ॥
मुष्टिं संवर्त्तयामास वज्रकल्पं महाबलः ॥ स ललाटे महावीर्यमंगदं वानरर्षभं ॥ आजघान महातेजाः स मुहूर्त्तं चचाल ह ॥२५॥

नाः ॥१६॥ त्रयाणां · अंगदमैंदद्विविदानां त्रिभिः शोणिताक्ष
प्रजंघयूपाक्षैः ॥१७॥१८॥१९॥ सख्यान्प्रक्षिप्तान् ॥२०॥ वालिपुत्रायोद्यम्य वालिपुत्रं हंतुमुद्यम्य ॥२१॥२२॥२३॥२४॥२

240

४४॥४५॥४६॥४७॥४८॥४९॥५०॥५१॥५२॥सस्कंधमेनंसालमुरसिनिवेश्यैकेनकरेणासंपीड्यसत्वमशा

सतुतेनप्रहारेणमैंदोवानरयूथपः॥मर्मण्यभिहतस्तेनपपातभुविमूर्छितः॥४४॥अंगदोमातु
लंदृष्ट्वापतितंतुमहाबलो॥अभिदुद्राववेगेनकुंभमुद्यतकार्मुकं॥४५॥तमापतंतंविव्याध
कुंभः पंचभिरायसैः॥त्रिभिश्चान्यैस्त्रिभिर्बाणैर्मातंगमिवतोमरैः॥४६॥सोंगदंबहुभिर्बाणैः
कुंभोविव्याधवीर्यवान्॥४७॥अकुंठधारैर्निशितैस्तीक्ष्णैःकनकभूषणैः॥अंगदःप्रतिवि
द्धांगोवालिपुत्रोनकंपते॥४८॥शिलापादपवर्षाणितस्यमूर्ध्निववर्षह॥सप्राचिच्छेदतान्स
र्वान्बिभेदचपुनःशिलाः॥४९॥कुंभकर्णात्मजःश्रीमान्वालिपुत्रसमीरितान्॥आपतंतंच
संप्रेक्ष्यकुंभोवानरयूथपं॥५०॥भ्रुवोर्विव्याधबाणाभ्यांउल्काभ्यामिवकुंजरं॥तस्यसुस्रावरु
धिरंपिहितेचास्यलोचने॥५१॥अंगदःपाणिनानेत्रेपिधायरुधिरोक्षिते॥सालमासन्नमेकेन
परिजग्राहपाणिना॥५२॥संपीड्योरसिसस्कंधंकरेणाभिनिवेश्यच॥किंचिदभ्यवनम्यैनमु
न्ममाथमहारणे॥५३॥तमिंद्रकेतुप्रतिमंवृक्षंमंदरसन्निभं॥समुत्सृजतवेगेनमिषतांसर्वर
क्षसां॥५४॥सचिच्छेदशितैर्बाणैःसप्तभिःकायभेदनैः॥अंगदोविव्यथेभीत्वांसपपातमुमोहच॥५५

रवांकिंचिदवनम्य·उन्ममाथ·निष्पत्रंकृतवान्॥५३॥समुत्सृजत्समुदसृजत्॥५४॥अभीत्वांविव्यथेपुनः

पुनःक्रियमाणेनयुद्धेनेतिभावः॥५२॥

उत्कृष्टं रक्षः कुंभः लब्धलक्ष्यैर्महावीर्यैस्तेजस्विभिर्वानरैर्निपातितामहावीरांचमूं दृष्ट्वा रणेसुदुष्करंकर्म
चक्रे इति संबंधः ॥३६॥३७॥ तस्य कुंभस्य तत्सशरं धनुर्विद्युदैरावतसंबंधनोर्चिष्मत् । भासमानं द्वितीयं
इंद्रधनुर्यथा अपरमिंद्रधनुरिव भूयः शुशुभे विद्युत्करस्थानीया । ऐरावतोभ्रमातंगस्तत्संबंधि इंद्रधनुषा संबंधा

निपातितमहावीरां दृष्ट्वा रक्षश्चमूं तदा ॥ कुंभः प्रचक्रे तेजस्वी रणे कर्म सुदुष्करं ॥३६॥ स धनुर्ध
न्विनां श्रेष्ठः प्रगृह्य सुसमाहितः ॥ मुमोचाशीविषप्रख्याञ्छरान्देहविदारणान् ॥३७॥ तस्य त
च्छुशुभे भूयः सशरं धनुरुत्तमं ॥ विद्युदैरावतार्चिष्मद्द्वितीयेंद्रधनुर्यथा ॥३८॥ आकर्णकृष्टमु
क्तेन जघान द्विविदं तदा ॥ तेन हाटकपुंखेन पत्रिणा पत्रवाससा ॥३९॥ सहसाभिहतस्तेन विप्र
मुक्तपदः स्फुरन् ॥ निपपात त्रिकूटाभो विह्वलन्प्लवगोत्तमः ॥४०॥ मैंदस्तु भ्रातरं तत्र भग्नं दृष्ट्वा
महाहवे ॥ अभिदुद्राव वेगेन प्रगृह्य विपुलां शिलां ॥४१॥ तां शिलां तु प्रचिक्षेप राक्षसाय महा
बलः ॥ बिभेद तां शिलां कुंभः प्रसन्नैः पंचभिः शरैः ॥४२॥ संधाय चान्यं सुमुखं शरमाशीवि
षोपमं ॥ आजघान महातेजा वक्षसि द्विविदाग्रजं ॥४३॥

तः इंद्रायुधं त्विंद्रधनुस्तदेव ऋजु रो
हितं ऐरावतं ॥ ऋजु दीर्घं इंद्रधनुस्तद्युद्युक्तं विद्युद्युक्तं च स्वाभाविकमिंद्रधनुरित्यर्थः । एतच्चोत्पातका
ले भवतीत्यर्थ इति तात्पर्यं ॥३८॥३९॥ विप्रमुक्तपदः विप्रमुक्तं प्रसारितं पदं येन सः ॥४०॥४१॥ प्रसन्नैः उत्तेजितैः ॥४२॥४३

६७।६८।६९।अथकुंभस्यशौर्यंस्तौति निकुंभाग्रजेतिवेगशब्दोर्धर्चादिः॥७०॥संनतिःस्वजनप्रावण्यं
प्रभावःप्रतापःतवचरावणस्यचानान्यस्ययुष्मास्वित्यर्थः प्रल्हादबल्योर्वृत्रघ्नादीनांचोपमायस्य

अर्दितास्तेद्रुमारेजुर्यथाघोराःशतघ्नयः॥द्रुमवर्षंतुतच्छिन्नंदृष्ट्वाकुंभेनवीर्यवान्॥६७॥वानरा
धिपतिःश्रीमान्महासत्त्वोनविव्यथे॥सविध्यमानःसहसासहमानस्तुतान्शरान्॥६८॥कुं
भस्यधनुराक्षिप्यबभंजेंद्रधनुःप्रभं॥अवप्लुत्यततःशीघ्रंकृत्वाकर्मसुदुष्करं॥६९॥अब्रवी
त्कुपितःकुंभंभग्नशृंगमिवद्विपं॥निकुंभाग्रजवीर्यंतेबाणवेगंतदद्भुतं॥७०॥सन्नतिश्चप्र
भावश्चतवचरावणस्यवा॥प्रह्लादबलिवृत्रघ्नकुबेरवरुणोपम॥७१॥एकस्त्वमनुजातो
सिपितरंबलवत्तरं॥त्वामेवैकंमहाबाहुंशूलहस्तमरिंदमं॥७२॥त्रिदशानातिवर्त्तंतेजितें
द्रियमिवाधयः॥विक्रमस्वमहाबुद्धेकर्माणिममपश्यच॥७३॥वरदानात्पितृव्यस्तेस
हतेदेववदानवान्॥कुंभकर्णस्तुवीर्येणसहतेचसुरासुरान्॥७४॥धनुषींद्रजितस्तुल्यःप्र
तापेरावणस्यच॥त्वमद्यरक्षसांलोकेश्रेष्ठोसिबलवीर्यतः॥७५॥ श्री ॥

तं॥७१॥पितरमनुजातोसिपित्रासदृशोसि॥७२॥७३॥पितृव्योरावणः॥कुंभकर्णस्तुवीर्येणशरीर
बलेनसुरान्सहतेत्वंतुभाभ्यामिर्थः॥७४॥७५॥

५६॥५७॥५८॥५९॥६०॥आववार अवरुरोधनगेनपर्वतेनजलाशयंजलप्रवाहमिव॥६१॥६२॥भ्रातृजंभ्रातृ

अंगदंपतितंदृष्ट्वासीदंतमिवसागरं॥दुरासदंहरिश्रेष्ठाराघवायन्यवेदयन्॥५६॥रामस्तुव्याथितंश्रुत्वावालिपुत्रंमहाहवे॥व्यादिदेशहरिश्रेष्ठाजांबवत्प्रमुखांस्ततः॥५७॥तेतुवानरशार्दूलाः श्रुत्वारामस्यशासनं॥अभिपेतुः सुसंक्रुद्धाःकुंभमुद्यतकार्मुकं॥५८॥ततोद्रुमशिलाहस्ताःकोपसंरक्तलोचनाः॥रिरक्षिषंतोभ्यपतन्नंगदंवानरर्षभाः॥५९॥जांबवांश्चसुषेणश्चवेगदर्शीचवानरः॥कुंभकर्णात्मजंवीरंक्रुद्धाःसमभिदुद्रुवुः॥६०॥समीक्ष्यापततस्तांस्तुवानरेंद्रान्महाबलान्॥आववारशरौघेननगेनैवजलाशयं॥६१॥तस्यबाणपथंप्राप्यनशेकुरपिवीक्षितुं॥वानरेंद्रामहात्मानोवेलामिवमहोदधिः॥६२॥तांस्तुदृष्ट्वाहरिगणान्शरवृष्टिभिरर्दितान्॥अंगदंपृष्ठतः कृत्वाभ्रातृजंप्लवगेश्वरः॥६३॥अभिदुद्रावसुग्रीवःकुंभकर्णात्मजंरणे॥शैलसानुचरंनागंवेगवानिवकेसरी॥६४॥उत्पाट्यचमहावृक्षानश्वकर्णादिकान्बहून्॥अन्यांश्चविविधान्वृक्षान्चिक्षेपसमहाकपिः॥६५॥तांछादयंतीमाकाशंवृक्षवृष्टिंदुरासदां॥कुंभकर्णात्मजःश्रीमांश्चिच्छेदस्वशरैःशितैः॥६६॥

पुत्रंप्लवगेश्वरः सुग्रीवः एतदंतमष्टमीरात्रौयुद्धं अतः परंनवमीदिनयुद्धं॥६३॥शैलसानुषुचरतितिंनागंगजं॥६४॥६५॥६६॥ ग्र

८५॥पुस्फोटभिन्नंसतस्यमुष्टिःसुग्रीवास्थिमंडलेप्ननिजघ्नेप्रतिहतः॥८६॥८७॥तत्रउरसि॥८८॥अर्चिः
सहस्रेणविकचंयद्रविमंडलंतत्समानवर्चस्कं॥८९॥९०॥यदृच्छयादैवाधीनतःकदाचित्भूम्यांपति

ततःकुंभःसमुत्पत्यसुग्रीवमभिपत्यच॥आजघानोरसिक्रुद्धोवज्रकल्पेनमुष्टिना॥८५॥तस्यच
र्मचपुस्फोटसंजज्ञेचापिशोणितं॥तस्यमुष्टिर्महावेगःप्रतिजघ्नेस्थिमंडले॥८६॥तस्यवेगेनतत्र
त्रासीत्तेजःप्रज्वलितंमहत्॥वज्रनिष्पेषसंजाताज्वालामेरोर्यथागिरेः॥८७॥सतत्राभिहतस्ते
नसुग्रीवोवानरर्षभः॥मुष्टिंसंवर्त्तयामासवज्रकल्पंमहाबलः॥८८॥अर्चिःसहस्रविकचं
रविमंडलवर्चसं॥समुष्टिंपातयामासकुंभस्योरसिवीर्यवान्॥८९॥सतुतेनप्रहारेणविव्ह
लोभृशपीडितः॥निपपाततदाकुंभोगतार्चिरिवपावकः॥९०॥मुष्टिनाभिहतस्तेननिपपाता
शुराक्षसः॥लोहितांगइवाकाशाद्दीप्तरश्मिर्यदृच्छया॥९१॥कुंभस्यपततोरूपंभग्नस्योरसि
मुष्टिना॥बभौरुद्राभिपन्नस्ययथारूपंगवांपतेः॥९२॥तस्मिन्हतेभीमपराक्रमेणप्लवंगमाना
मृषभेणयुद्धे॥महीसशैलासवनाचचालभयंचरक्षांस्यधिकंविवेश॥९३॥इत्यार्षेश्रीरा·यु·ष
ट्सप्ततिःसर्गः॥७६॥

तोलोहितांगोभौमइवपपात॥९१॥मुष्टिनोरसिभग्नस्यपततःकुंभस्यरूपंरुद्रे
णाभिपन्नस्याभिभूतस्यगवांपतेःसूर्यस्येव॥९२॥९३॥क०९७॥इतिश्रीरामाभिरामेश्रीरा०रा०ति·युद्ध
षट्सप्ततितमःसर्गः॥७६॥

नेत्वमयासह महाविमर्दं महायुद्धं ॥७६॥७७॥ उपालंभभयात् बहुभिः सह युद्धेन श्रांतः कुंभः सुग्रीवेणाहत इति निंदाभयेत्यर्थः ॥७८॥ सावमानेन कृतकर्मेत्यादिना ॥७९॥ अवीतमदो अनपगतम

महाविमर्दं सहते मया सह तदद्भुतं ॥ अद्य भूतानि पश्यंतु शक्रशंवरयोरिव ॥७६॥ कृतमप्रतिमं कर्म दर्शितं चास्त्रकौशलं ॥ पातिता हरिवीराश्च त्वयैते भीमविक्रमाः ॥७७॥ उपालंभभयाच्चैव नासि वीर मयाहतः ॥ कृतकर्मा परिश्रांतो विश्रांतः पश्य मे बलं ॥७८॥ तेन सुग्रीववाक्येन ॥ सावमानेन मानितः ॥ अग्नेराज्यहुतस्येव तेजस्तस्याभ्यवर्द्धत ॥७९॥ ततः कुंभस्तु सुग्रीवं बाहुभ्यां जगृहे तदा ॥ गजाविवावीतमदौ निश्वसंतौ मुहुर्मुहुः ॥८०॥ अन्योन्यगात्रग्रथितौ घर्षंतावितरेतरं ॥ सधूमां मुखतो ज्वालां विसृजंतौ परिश्रमात् ॥८१॥ तयोः पादाभिघाताच्च निमग्ना चाभवन्मही ॥ व्याघूर्णिततरंगश्च चुक्षुभे वरुणालयः ॥८२॥ ततः कुंभं समुत्क्षिप्य सुग्रीवो लवणांभसि ॥ पातयामास वेगेन दर्शयन्नुदधेस्तलं ॥८३॥ ततः कुंभनिपातेन जलराशिः समुत्थितः ॥ विंध्यमंदरसंकाशो विससर्प्प समंततः ॥८४॥

दौ अवीतमदाविति छेदे व्यापन्नमदावित्यर्थः ॥८०॥८१॥८२॥ दर्शयन्नुदधेः स्थलं स्वबलं दर्शयन् उदधेः स्थलमतिक्रम्य लवणांभसि कुंभं पातयामास उदधेस्तलमिति पाठे तद्दर्शयन् लवणांभसि पातयामासेत्यर्थः ८३ विध्यमंदरसंकाशः कुंभस्ततो जलात्समुत्थितेत्यन्वयः ॥८४॥

स्पंदितुमपिनशेकुः उरोविवत्यउरःप्रकाश्य ॥९॥ तस्यहन्मतः ॥१०॥ परिघःशतधाकृतःमहाशिलाहतजीर्ण
काश्ववत् विकीर्यमाणश्चसंआकाशेउल्काशतमिवासीदितिशेषः ॥११॥ भूमिचलेभूकंपे ॥१२॥१३॥१४

राक्षसावानराश्चापिनशेकुःस्पंदितुंभयात् ॥ हनूमांस्तुविवृत्योरस्तस्थौप्रमुखतोबली ॥९॥ परिघो
पमबाहुस्तंपरिघंभास्करप्रभं ॥ बलीबलवतस्तस्यपातयामासवक्षसि ॥१०॥ स्थिरेतस्योरसिव्यू
ढेपरिघःशतधाकृतः ॥ विकीर्यमाणःसहसाउल्काशतमिवांबरे ॥११॥ सतुतेनप्रहारेणन
चचालमहाकपिः ॥ परिघेणसमाधूतोयथाभूमिचलेऽचलः ॥१२॥ सतथाभिहतस्तेनहनू
मान्प्लवगोत्तमः ॥ मुष्टिंसंवर्त्तयामासबलेनातिमहाबलः ॥१३॥ तमुद्यम्यमहातेजानिकुंभो
रसिवीर्यवान् ॥ अभिचिक्षेपवेगेनवेगवान्वायुविक्रमः ॥१४॥ तत्रपुस्फोटवर्मास्यप्रसुस्राव
चशोणितं ॥ मुष्टिनातेनसंजज्ञेमेघेविद्युदिवोत्थिता ॥१५॥ सतुतेनप्रहारेणनिकुंभोवि
चचालच ॥ स्वस्थश्चापिनिजग्राहहनूमंतंमहाबलं ॥१६॥ चुक्रुशुश्चतदासंख्येभीमंलंकानि
वासिनः ॥ निकुंभेनोद्यतंदृष्ट्वाहनूमंतंमहाबलं ॥१७॥ सतदाह्रियमाणोपिहनूमांस्तेनरक्षसा
आजघानानिलसुतोवज्रकल्पेनमुष्टिना ॥१८॥

॥१५॥१६॥ भीमंविचुक्रुशुःकपीनांभयंकरंयथा
भवतितथेत्यर्थः उद्यतंगृहीतं ॥१७॥ तथाह्रियमाणोपिकुंभकर्णेनसुग्रीववद्ध्रियमाणोपि ॥१८॥

निकुंभइति ॥१॥ स्रग्दामभिः सन्नद्धमलंकृतं दत्तपंचागुलंपंचांगुलप्रमाणं दत्ताः कालायसपट्टबंधा यस्मिन्तं
॥२॥ हेमपट्टादयोलंकारार्थाः ॥३॥ शक्रध्वजसमौजसं अलंकारादिकृतसौंदर्यात् ॥४॥ निष्कमुरोभूषणं ॥५॥ महा

निकुंभोभ्रातरंदृष्ट्वासुग्रीवेणनिपातितं ॥ प्रदहन्निवकोपेनवानरेंद्रमुदैक्षत ॥१॥ ततःस्रग्दामसन्न
द्धंदत्तपंचांगुलंशुभं ॥ आददेपरिघंधीरोमहेंद्रशिखरोपमं ॥२॥ हेमपट्टपरिक्षिप्तंवज्रविद्रुमभू
षितं ॥ यमदंडोपमंभीमंरक्षसांभयनाशनं ॥३॥ तमाविध्यमहातेजाःशक्रध्वजसमौजसं ॥ विननादवि
वृतास्योनिकुंभोभीमविक्रमः ॥४॥ उरोगतेननिष्केणभुजस्थैरंगदैरपि ॥ कुंडलाभ्यांचचित्राभ्यांमा
लयाचसचित्रया ॥५॥ निकुंभोभूषणैर्भातितेनस्मपरिघेणच ॥ यथेंद्रधनुषामेघःसविद्युत्स्तनयि
त्नुमान् ॥६॥ परिघाग्रेणपुस्फोटवातग्रंथिर्महात्मनः ॥ प्रजज्वालसघोषश्चविधूमइवपावकः
॥७॥ नगर्याविटपावत्यांगंधर्वभवनोत्तमैः ॥ सतारागणनक्षत्रंसचंद्रसमहाग्रहं ॥ निकुंभपरिघा
घूर्णंभ्रमतीवनभस्थलं ॥७॥ दुरासदश्चसंजज्ञेपरिघाभरणप्रभः ॥ क्रोधेंधनोनिकुंभाग्निर्युगांता
ग्निरिवोत्थितः ॥८॥

त्मनोमहादेहस्यपरिघाग्रेणवातग्रंथिः ॥ आवहादिसप्तमहावायूनांसं
धिःपुस्फोट एतेनपरिघस्यदैर्घ्यमुक्तं प्रजज्वालनिकुंभइतिशेषः ॥ परिघाग्रभागइतिवा ॥६॥ वि
टपावती गंधर्वनगरी अलकेतितीर्थः ॥७॥ परिघाभरणाभ्यांप्रभाकांतिर्यस्यसः ॥८॥ ॥

४॥५॥बलाध्यक्षंरावणबलाध्यक्षंत्वरात्त्वरया॥६॥७॥रथमावह·युद्धभूमिंप्रापयेत्यर्थः॥८॥ममपुर

रावणस्यवचःश्रुत्वाशूरमानीखरात्मजः।बाढमित्यब्रवीद्धृष्टोमकराक्षोनिशाचरः॥४॥सोभि
वाद्यदशग्रीवंकृत्वाचापिप्रदक्षिणं॥निर्जगामगृहाच्छुभ्राद्रावणस्याज्ञयाबली॥५॥समीप
स्थंबलाध्यक्षंखरपुत्रोब्रवीदिदं॥रथश्चानीयतांतूर्णंसैन्यंचानीयतांत्वरात्॥६॥तस्यतद्व
चनंश्रुत्वाबलाध्यक्षोनिशाचरः॥स्पंदनंचबलंचैवसमीपंप्रत्यपादयत्॥७॥प्रदक्षिणंरथं
कृत्वासमारुह्यनिशाचरः॥सूतंसंचोदयामासशीघ्रंवैरथमावह॥८॥अथतान्राक्षसान्स
र्वान्मकराक्षोब्रवीदिदं॥एतेसर्वेप्रयुध्यध्वंपुरस्तान्ममराक्षसाः॥९॥अहंराक्षसराजेनराव
णेनमहात्मना॥आज्ञप्तःसमरेहंतुंतावुभौरामलक्ष्मणौ॥१०॥अद्यरामंवधिष्यामिलक्ष्म
णंचनिशाचराः॥शाखामृगंचसुग्रीवंवानरांश्चशरोत्तमैः॥११॥अद्यशूलनिपातैश्चवानराणां
महाचमूं॥प्रदहिष्यामिसंप्राप्तंशुष्केंधनमिवानलः॥१२॥मकराक्षस्यतच्छ्रुत्वावचनंतेनि
शाचराः॥सर्वेनानायुधोपेताबलवंतःसमाहिताः॥१३॥तेकामरूपिणःक्रूरादंष्ट्रिणःपि
गलेक्षणाः॥मातंगाइवनर्दंतोध्वस्तकेशाभयावहाः॥१४॥

244

स्तात्ममाग्रतोयूयंसर्वेप्रयुध्य
ध्वं-वानरैःसहेतिशेषः॥९॥१०॥११॥१२॥१३॥ध्वस्तकेशाःविप्रकीर्णकेशाअतएवभयावहाः॥१४

क्षितावभ्यवपद्यतःभूमावाप्लुतोबभूव ॥१९॥ निष्पिष्यभूमावितिशेषः अस्योरसिभूमिपतितस्योरसि ॥२०॥
शिरोधरांपरिवृत्यपशोरिवाघ्राणपे ॥२१॥ निनदतिनिकुंभेसादितेसति राक्षसेंद्रसूनुः खरसुतोमकरा

आत्मानंमोक्षयित्वाथक्षितावभ्यवपद्यत ॥ हनूमानुन्ममाथाशुनिकुंभंमारुतात्मजः ॥१९॥ निष्पि
ष्यपरमायत्तोनिकुंभंनिष्पिपेषच ॥ उत्पत्यचास्यवेगेनपपातोरसिवेगवान् ॥२०॥ परिगृह्यचबा
हुभ्यांपरिवृत्यशिरोधरां ॥ उत्पाटयामासशिरोभैरवंनदतोमहत् ॥२१॥ अथनिनदतिसादिते
निकुंभेपवनसुतेनरणेबभूवयुद्धं ॥ दशरथसुतराक्षसेंद्रसून्वोर्भृशतरमागतरोषयोःसुभीमं ॥२२॥
व्यपेतेतुजीवेनिकुंभस्यहृष्टाविनेदुःप्लवंगाःदिशःसस्वनुश्च ॥ चचालेवचोर्वीपपातेवसाद्यौर्ब
लंराक्षसानांभयंचाविवेश ॥२३॥ इत्यार्षेश्रीरामा० युद्ध० सप्तसप्ततितमःसर्गः ॥७७॥ निकुंभंनि
हतंदृष्ट्वाकुंभंचविनिपातितं ॥ रावणःपरमामर्षीप्रजज्वालानलोयथा ॥१॥ नैर्ऋतःक्रोधशोकाभ्यां
द्वाभ्यांतुपरिमूर्छितः ॥ खरपुत्रंविशालाक्षंमकराक्षमचोदयत् ॥२॥ गच्छपुत्रमयाज्ञप्तोबलेनाभि
समन्वितः ॥ राघवंलक्ष्मणंचैवजहितौसवनौकसौ ॥३॥

क्षः अनेनवक्ष्यमाणोपक्षेपः ॥२२॥ उक्तार्थस्यै
वविवरणं व्यपेतेव्यपगते एतदंतंनवमीदिनयुद्धं ॥२३॥ कत० ॥७०॥ इतिश्रीरामाभिरामेश्रीरामीये
रामायणतिलकेयुद्धकांडेसप्तसप्ततितमःसर्गः ॥७७॥ निकुंभमिति ॥१॥ नैर्ऋतोरावणःपरिमूर्छितोव्याप्तः ॥२॥३॥

३।४।निर्घाताः तद्वन्महाध्वनयोयंत्रायुधविशेषाः।५॥६॥द्रवमाणान्द्रवतः जितेनजयेनकाशंतेते
जितकाशिनश्चभवन्तितिशेषइतितीर्थः॥७॥तान्वानरविद्रावकान्राक्षसान्रामःशरवर्षैरवारय।

वृक्षशूलनिपातैश्चगदापरिघपातनैः॥अन्योन्यंमर्दयंतिस्मतदाकपिनिशाचराः।३॥शक्ति
खड्गगदाकुंतैस्तोमरैश्चनिशाचराः॥पट्टिशैर्भिंडिपालैश्चबाणपातैःसमंततः॥४॥पाशमुद्ग-
रदंडैश्चनिर्घातैश्चापरैस्तथा॥कदनंकपिसिंहानांचक्रुस्तेरजनीचराः॥५॥बाणौघैरर्दिता
श्चापिखरपुत्रेणवानराः॥संभ्रांतमनसःसर्वेदुद्रुवुर्भयपीडिताः॥६॥तान्दृष्ट्वाराक्षसाःस
र्वेद्रवमाणान्वनौकसः॥नेदुस्तेसिंहवद्दृप्ताराक्षसाजितकाशिनः॥७॥विद्रवत्सुतदातेषुवा
नरेषुसमंततः॥रामस्तान्वारयामासशरवर्षेणराक्षसान्॥८॥वारितान्राक्षसान्दृष्ट्वामक
राक्षोनिशाचरः॥कोपानलसमाविष्टोवचनंचेदमब्रवीत्॥९॥तिष्ठरामभयासार्द्धंद्वंद्वयु
द्धंभविष्यति॥त्याजयिष्यामितेप्राणान्धनुर्मुक्तैःशितैःशरैः॥१०॥यत्तदादंडकारण्येपितरंहत
वान्मम॥तदग्रतःस्वकर्मस्थंस्मृत्वारोषोभिवर्द्धते॥११॥

मास॥८॥९॥१०॥यत्तयस्मात्पितरंहतवान
सितस्मात्तदग्रतस्तद्दिनादितः॥स्वकर्मस्थंपितवधरूपकर्मकर्त्तारंत्वांस्मृत्वारोषोभिवर्द्धतेमदग्र
तःस्वकर्मस्थंदृष्ट्वेतिपाठेमदग्रतस्तिष्ठंतमितिशेषः॥तीर्थस्तुस्वकर्मस्थंस्वसुतरामकृत्पनिरतमि
त्यर्थइत्याह॥११॥

१५॥१६॥तस्यध्वजःपपातसुबद्धोपीतिशेषः॥१७॥विक्रमरहिताःयथापूर्वंविचित्रपादन्यासरहिताःप्रथममाकु
लैश्चरणैर्गत्वापश्चात्सास्रसुखाययुः॥१८॥प्रवातिसपांसुरतएवखरः॥अभिमुखइतिशेषः॥१९॥२०॥

परिवार्यमहाकायामहाकायंखरात्मजं॥अभिजघ्नुस्ततोहृष्टाश्चालयंतोनभस्तलं॥१५॥शंखभे
रीसहस्राणामाहतानांसमंततः॥क्ष्वेलितास्फोटितानांचतत्रशब्दोमहानभूत्॥१६॥प्रभ्रष्टोथ
करात्तस्यप्रतोदःसारथेस्तदा॥पपातसहसादैवात्ध्वजस्तस्यतुरक्षसः॥१७॥तस्यतेरथसंयुक्ता
हयाविक्रमवर्जिताः॥चरणैराकुलैर्गत्वादीनाःसास्रमुखाययुः॥१८॥प्रवातिपवनस्तस्मिन्स
पांसुःखरदारुणः॥निर्याणेतस्यरौद्रस्यमकराक्षस्यदुर्मतेः॥१९॥तानिदृष्ट्वानिमित्तानिराक्ष
सावीर्यवत्तमाः॥अचिंत्यनिर्गताःसर्वेयत्रतौरामलक्ष्मणौ॥२०॥घनगजमहिषांगतुल्यवर्णाः
समरमुखेष्वसकृद्गदासिभिन्नाः॥अहमहमितियुद्धकौशलास्तेरजनिचराःपरिबभ्रमुर्मुहु
स्ते॥२१॥इत्यार्षेश्रीरामायणेयुद्धकांडेअष्टसप्ततितमःसर्गः॥७८॥ निर्गतंमकराक्षंतेदृ
ष्ट्वावानरपुंगवाः॥आप्लुत्यसहसासर्वेयोद्धुकामाव्यवस्थिताः॥१॥ततःप्रवृत्तसुमहत्तद्यु
द्धंलोमहर्षणं॥निशाचरैःप्लवंगानांदेवानांदानवैरिव॥२॥

असकृत्शत्रूणांगदासिभिर्भिन्नंभेदोयेषांते
अहमहमितिवदंतः॥२१॥क०७१॥इतिश्रीरामाभिरामेश्रीरा०रा०ति०यु०अष्टसप्ततितमःसर्गःनि

र्गतमि॥१॥२॥

२१॥२२॥२३॥ आकाशेजीमूतयोःशब्दइवज्यातलयोर्ज्याकरतलयोःसंघर्षाद्धेतोर्धनुर्मुक्तोऽन्योन्य धनुर्मुक्तःस्वनोऽन्योन्यंमिश्रोरणाजिरेश्रूयतेस्म॥२४॥२५॥ अन्योन्यंगात्रेषुविद्धंवेधनमभूदितिशेषः

राघवेणैवमुक्तस्तमकराक्षोमहाबलः॥बाणौघानमुंचत्तस्मैराघवायरणाजिरे॥२१॥तांछरांश्चरवर्षेणरामश्छिच्छेदनैकधा॥निपेतुर्भुविविच्छिन्नारुक्मपुंखाःसुवाससः॥२२॥तद्युद्धमभवत्तत्रसमेत्यान्योन्यमोजसा॥खरराक्षसपुत्रस्यसूनोर्दशरथस्यच॥२३॥जीमूतयोरिवाकाशेशब्दोज्यातलयोरिव॥धनुर्मुक्तःस्वनोऽन्योन्यंश्रूयतेचरणाजिरे॥२४॥देवदानवगंधर्वाःकिन्नराश्चमहोरगाः॥अंतरिक्षगताःसर्वेद्रष्टुकामास्तदद्भुतं॥२५॥विद्धमन्योन्यगात्रेषुद्विगुणंवर्द्धतेबलं॥कृतप्रतिकृतान्योन्यंकुरुतांतौरणाजिरे॥२६॥राममुक्तांस्तुबाणौघान्राक्षसस्त्वच्छिनद्रणे॥रक्षोमुक्तांस्तुरामोवैनैकधाप्राच्छिनच्छरैः॥२७॥बाणौघवितताःसर्वादिशश्चप्रदिशस्तथा॥संछन्नावसुधाचैवसमंतान्नप्रकाशते॥२८॥ततःक्रुद्धोमहाबाहुर्धनुश्छिच्छेदसंयुगे॥अष्टाभिरथनाराचैःसतंविव्याधराघवः॥२९॥

अथापिद्विगुणंबलंवर्द्धतेस्मः कृतप्रतिकृताकृतप्रतिकृतानिआर्षोडादेशोविभक्तेःकुरुतांअरुतांअडभावआर्षः॥२६॥२७॥२८॥२९॥

यत्यस्मात्तस्मिन्कालेपितृवधकालेतस्मिन्महावनेमयानदृष्टोसितस्मान्ममांगानिदत्स्यंतेतेनदैवदर्शी
नेतुप्रतीकारेणतापःशाम्येदित्यर्थः॥१२॥इतरोमृगःसिंहेतरमृगमात्रं॥१३॥१४॥१५॥येनवधसाधनेनास्त्रा

दत्स्यंतेभृशामंगानिदुरात्मन्ममराघव॥यन्मयासिनदृष्टस्त्वंतस्मिन्कालेमहावने॥१२॥दिष्ट्या
सिदर्शनंराममममत्वंप्राप्तवानिह॥कोपितोसिक्षुधार्त्तस्यसिंहस्येवेतरोमृगः॥१३॥अद्यमद्बा
णवेगेनप्रेतराड्विषयंगतः॥येत्वयानिहताःशूराःसहतैश्चवसिष्यसि॥१४॥बहुनात्रकिमुक्तेनशृ
णुरामवचोमम॥पश्यंतुसकलालोकास्त्वांमांचैवरणाजिरे॥१५॥अस्त्रैर्वागदयावापिबाहुभ्यां
वारणाजिरे॥अभ्यस्तंयेनवारामवर्त्ततांतेनवामृधं॥१६॥मकराक्षवचःश्रुत्वारामोदशरथात्म
जः॥अब्रवीत्प्रहसन्वाक्यमुत्तरोत्तरवादिनं॥१७॥कत्थसेकिंवृथारक्षोबहून्यसदृशानिते॥
नरणोशक्यतेजेतुंविनायुद्धेनवाग्बलात्॥१८॥चतुर्दशसहस्राणिरक्षसांत्वत्पिताचयः
त्रिशिरादूषणश्चापिदंडकेनिहतोमया॥१९॥स्वाशिताश्चापिमांसेनगृध्रगोमायुवायसाः॥
भविष्यंत्यद्यवैपापतीक्ष्णतुंडनखांकुशाः॥२०॥

दिष्वन्यतमेनतेभ्यःस्त्वयाभ्यासोस्तितेन
वातेनैवमृधंयुद्धंवर्त्ततांसंपाद्यतां॥१६॥उत्तरोत्तरवादिनांबहुप्रलापिनं॥१८॥नत्वयाजेतुमि
त्यन्वयः॥१८॥स्वाशिताःसुष्ठुभुक्तवंतोद्यभविष्यंतीत्यद्धयेनेतिशेषः॥१९॥२०॥ रामराम

प्रधावंत·प्राधावंत॥४०॥४१॥नवम्यांपूर्वरात्रेस्यवधः क०॥७२॥इतिश्रीरामाभिरामेश्रीरा०रा०ति०यु०

दृष्ट्वातेराक्षसाःसर्वेमकराक्षस्यपातनं॥लंकामेवप्रधावंतरामबाणभयार्दिताः॥४०॥दश
रथनृपसूनुबाणवेगैरजनिचरंनिहतंखरात्मजंतं॥प्रददृशुरथदेवताःप्रहृष्टागिरिमि
ववज्रहतंयथाविकीर्णं॥४१॥इत्यार्षेश्रीरामायणेयुद्धकांडेनवसप्ततितमःसर्गः॥७९॥
मकराक्षंहतंश्रुत्वारावणःसमितिंजयः॥रोषेणमहताविष्टोदंतान्कटकटाप्यच॥१॥कु
पितश्चतदातत्रकिंकार्यमितिचिंतयन्॥आदिदेशाथसंक्रुद्धोरणायेंद्रजितंसुतं॥२॥ज
हिवीरमहावीर्यौभ्रातरौरामलक्ष्मणौ॥अदृश्योदृश्यमानोवासर्वथात्वंबलाधिकः॥३॥
त्वमप्रतिमकर्माणमिंद्रंजयसिसंयुगे॥किंपुनर्मानुषौदृष्ट्वानवधिष्यसिसंयुगे॥४॥तथो
क्तोराक्षसेंद्रेणप्रतिगृह्यपितुर्वचः॥यज्ञभूमौसविधिवत्पावकंजुहुवेंद्रजित्॥५॥जुह्वत
श्चापितत्राग्निंरक्तोष्णीषधरास्त्रियः॥आजग्मुस्तत्रसंभ्रांताराक्षस्योयत्ररावणिः॥६॥शस्त्राणि
शरपत्राणिसमिधोथविभीतकाः॥लोहितानिचवासांसिस्रुवंकार्ष्णायसंतथा॥७॥सर्वतो
ग्निंसमास्तीर्यशरपत्रैःसतोमरैः॥छागस्यसर्वकृष्णस्यगलंजग्राहजीवतः॥८॥

नवसप्तति
मःसर्गः॥कटकटाप्येत्यार्षोयुक्॥१॥२॥३॥४॥जुह्वज्जुहाव·वध्यभावश्चार्षः॥५॥स्त्रियआजग्मुःहोमप

रिचारिका इतिशेषः॥६॥शास्त्राणीत्यादिव्याख्यातं॥७॥८॥

भित्वारथंभक्त्वेत्यर्थः हत्वाश्वानित्यसंधिपाठः रथादश्वानितिपाठांतरं वसुधास्थोभूदितिशेषः

भित्वारथंशरैरामोरथादश्वानपातयत्॥ विरथोवसुधास्थः समकराक्षोनिशाचरः ३०॥
तत्तिष्ठद्वसुधांरक्तःशूलंजग्राहपाणिना॥ त्रासनंसर्वभूतानांयुगांताग्निसमप्रभं ३१॥ दु
रवापंमहत्शूलंरुद्रदत्तंभयंकरं॥ जाज्वल्यमानमाकाशेसंहारास्त्रमिवापरं॥ ३२॥ यं
दृष्ट्वादेवताः सर्वाभयार्त्ताविद्रुतादिशः॥ विभ्राम्यचमहच्छूलंप्रज्वलंतंनिशाचरः॥ ३३
सक्रोधात्प्राहिणोत्तस्मैराघवायमहात्मने॥ तमापतंतंज्वलितंखरपुत्रकराच्युतं॥ ३४॥
बाणैश्चतुर्भिराकाशेशूलंचिच्छेदराघवः॥ सभिन्नोनेकधाशूलोदिव्यहाटकमंडितः॥
व्यशीर्यतमहोल्केवरामबाणार्दितोभुवि॥ ३५॥ तच्छूलंनिहतंदृष्ट्वारामेणाक्लिष्टकर्म
णा॥ साधुसाध्वितिभूतानिव्याहरंतिनभोगताः॥ ३६॥ तंदृष्ट्वानिहतंशूलंमकराक्षोनिशा
चरः॥ मुष्टिमुद्यम्यकाकुत्स्थंतिष्ठतिष्ठेतिचाब्रवीत्॥ ३७॥ सतंदृष्ट्वापतंतंतुप्रहस्यर
घुनंदनः॥ पावकास्त्रंततोरामःसंदधेनुशरासने॥ ३८॥ तेनास्त्रेणहतंरक्षःकाकुत्स्थेनतत
दारणे॥ संछिन्नहृदयस्तत्रपपातचममारच॥ ३९॥

३० तत्तिष्ठद्वसुधामितिपाठः वसुधां
वसुधायांतिष्ठत्तद्रक्तःशूलंजग्राहेतिसंबंधः॥ ३१॥ ३२॥ स्पष्टोर्थश्चादिः ३३ ३४ ३५ ३६ ३७ ३८ ३९

रामंहत्वानिर्वानरामुर्वीकृत्वापितुःप्रीतिंकरिष्येइत्यर्थः यत्त्वेवमादिवचसांरामस्तुतिपरतयाक्लेशो
नव्याख्यानंतद्व्यर्थैवककवेःकविनिबद्धवक्तुश्चतथातात्पर्याभावादितिएतत्सजातीयवालिवाक्यावस
रेनिरूपितं॥१८॥१९॥तूणीधनुःसंबंधात्त्रिशिरोनागत्वोत्प्रेक्षा॰सजंतौसक्तस्पंतौ॥२०॥इमौतावितिसं

अथनिर्वानरामुर्वींहत्वारामंचलक्ष्मणं॥करिष्येपरमांप्रीतिंइत्युक्त्वांतरधीयत॥१८॥आप्रा
पपाताथसंक्रुद्धोदशग्रीवेणचोदितः॥तीक्ष्णकार्मुकनाराचैस्तीक्ष्णैस्त्विंद्ररिपूरणे॥१९॥सद
दर्शमहावीर्यौनागौत्रिशिरसाविव॥सजंतौविषुजालानिवीरौवानरमध्यगौ॥२०॥इमौता
वितिसंचिंत्यसज्जंकृत्वाचकार्मुकं॥संततानेषुधाराभिःपर्जन्यइववर्षिमान्॥२१॥सतुवैहा
यसरथोयुधितौरामलक्ष्मणौ॥अचक्रविषयेतिष्ठन्विव्याधनिशितैःशरैः॥२२॥नौतस्य
शरवेगेनपरीतौरामलक्ष्मणौ॥धनुषीसशरेकृत्वादिव्यमस्त्रंप्रचक्रतुः॥२३॥प्रच्छादयंतौग
गनंशरजालैर्महाबलौ॥तमस्त्रैःसूर्यसंकाशैर्नैवपस्पर्शतुःशरैः॥२४॥

चिंत्यसकलराक्षसहंता
राविति स्मृत्वा इषुधाराभिः इषुवर्षैः संततान॰ पूरयामाससर्वादिशइतिशेषः॥२१॥वैहायसरथः आ
काशगामीरथोयस्यसः अचक्रविषयेतिष्ठन्॰ इदंयुद्धंतद्रात्रावेवमध्यरात्रे॥२२॥परीतौव्याप्तौप्र
चक्रतुःप्रादुश्चक्रतुः॥२३॥अस्त्रैःअस्त्रमंत्राभिमंत्रितैःशरैस्तंमिंद्रजितंनैवपस्पर्शतुः पस्पृशतुःऽअं
ताहितत्वादितिभावः॥२४॥

विजयंदर्शयंतिचेत्यत्रजीवतः पुनर्लंकाप्रवेशएवात्रजयः ॥९॥१०॥ राक्षसांस्तर्पयित्वा अभिचारयागी
यानितिशेषः ॥११॥१२॥ वपुषास्वरूपेण ॥ जाज्वल्यमानोरथइतिशेषः मृगैश्चित्रमयैः ॥१३॥ जांबूनद

शरहोमसमिद्धस्यविधूमस्यमहार्चिषः ॥ बभूवुस्तानिलिंगानिविजयंदर्शयंतिच ॥९॥ प्रद
क्षिणावर्त्तशिखस्तप्तहाटकसन्निभः ॥ हविस्तत्प्रतिजग्राहपावकः स्वयमुत्थितः ॥१०॥ हुत्वा
ग्निंतर्पयित्वाथदेवदानवराक्षसान् ॥ आरुरोहरथश्रेष्ठमंतर्धानगतंशुभं ॥११॥ सवाजिभि
श्चतुर्भिस्तुवाणैस्तुनिशितैर्युतः ॥ आरोपितमहाचापः शुशुभेस्यंदनोत्तमे ॥१२॥ जाज्वल्यमा
नोवपुषातपनीयपरिच्छदः ॥ मृगैश्चंद्रार्द्धचंद्रैश्चसरथः समलंकृतः ॥१३॥ जांबूनदमहाकं
बुदीप्तपावकसन्निभः ॥ बभूवेंद्रजितः केतुर्वैडूर्यसमलंकृतः ॥१४॥ तेनचादित्यकल्पेन
ब्रह्मास्त्रेणचपालितः ॥ सबभूवदुराधर्षोरावणिः सुमहाबलः ॥१५॥ सोभिनिर्यायनगरादिंद्र
जित्समितिंजयः ॥ हुत्वाग्निंराक्षसैर्मंत्रैरंतर्धानगतोब्रवीत् ॥१६॥ अद्यहत्वारणेयौतौमि
थ्याप्रव्रजितौवने ॥ जयंपित्रेप्रदास्यामिरावणायरणेधिकं ॥१७॥ ॥ ॥

मयामहांतः कंबवोवलयायस्यसः कंबुर्नावलयेशंखेइत्यमरः ॥१४॥१५॥ राक्षसैर्मंत्रैः निर्ऋति
दैवत्यमंत्रैः अंतर्धानगतः अंतर्धानशक्तिंप्राप्तः ॥१६॥१७॥

अभ्रसंप्लवे सूर्यस्य गतपादिकामिव नास्य वेगयुक्तगत्यादिकं किंचिद्विदितं ॥३५॥३६॥३७॥३८॥ अयुध्यमानं त्य
क्तयुद्धं प्रच्छन्नं युद्धभीत्या गृहेऽस्मददृश्यतया स्थितं अयुध्यमानत्वादिषट्प्रकाराणामपि सर्वरक्षउ
द्देशेन ब्रह्मास्त्रसंधाने वधो भवति न तु तद्युज्यत इत्यर्थः अंततो विभीषणस्यापि नाशप्रसंग इत्याशयः

नास्य वेगगतिं कश्चिन्न च रूपं धनुः शरान् ॥ न चास्य विदितं किंचित्सूर्यस्येवाभ्रसंप्लवे
॥३५॥ तेनातिविद्धाश्च हरयो निहताश्च गतासवः ॥ बभूवुः शतशस्तत्र पतिता धरणीत
ले ॥३६॥ लक्ष्मणस्तु ततः क्रुद्धो भ्रातरं वाक्यमब्रवीत् ॥ ब्राह्ममस्त्रं प्रयोक्ष्यामि वधार्थं स
र्वरक्षसां ॥३७॥ तमुवाच ततो रामो लक्ष्मणं शुभलक्षणं ॥ नैकस्य हेतो रक्षांसि पृथिव्यां हं
तुमर्हसि ॥३८॥ अयुध्यमानं प्रच्छन्नं प्रांजलिं शरणागतं ॥ पलायमानं मत्तं वा न हंतुं त्वमि
हार्हसि ॥३९॥ तस्यैव तु वधे यत्नं करिष्यामि महाभुज ॥ आदेक्ष्यावो महावेगानस्त्राना
शीविषोपमान् ॥४०॥

३९ ॥ मायया अंतर्हितमेनमेव हंतुं घोरान् आशीविषोपमानस्त्रान् अस्त्राणि आदेक्ष्यावः ॥ अदृश्यवधो
ऽस्मदेकसाध्यः दृश्यस्य तु वध ईषत्करो वानराणामपीत्याह राक्षसमिति । यदि दर्शनं स्यात् तदा दृ
ष्ट्वा दर्शनमात्रेण हनूमदादया अनं राक्षसं निहनिष्यंति ॥४०॥ अ

राम॰
२४९

२४९

विजयंदर्शयंतिचेत्यत्रजीवतः पुनर्लंकाप्रवेशएवात्रजयः॥९॥१०॥राक्षसांस्तर्पयित्वा अभिचारयागी
यानितिशेषः॥११॥१२॥वपुषास्वरूपेण॥जाज्वल्यमानोरथइतिशेषः मृगैश्चित्रमयैः॥१३॥जांबूनद

शरहोमसमिद्धस्यविधूमस्यमहार्चिषः॥बभूवुस्तानिलिंगानिविजयंदर्शयंतिच॥९॥प्रद
क्षिणावर्त्तशिखस्तप्तहाटकसन्निभः॥हविस्तत्प्रतिजग्राहपावकःस्वयमुत्थितः॥१०॥हुत्वा
ग्निंतर्पयित्वाथदेवदानवराक्षसान्॥आरुरोहरथश्रेष्ठमंतर्धानगतंशुभं॥११॥सवाजिभि
श्चतुर्भिस्तुबाणैस्तुनिशितैर्युतः॥आरोपितमहाचापःशुशुभेस्पंदनोत्तमे॥१२॥जाज्वल्यमा
नोवपुषातपनीयपरिच्छदः॥मृगैश्चंद्रार्द्धचंद्रैश्चसरथःसमलंकृतः॥१३॥जांबूनदमहाकं
बुदीप्तपावकसन्निभः॥बभूवेंद्रजितःकेतुर्वैडूर्यसमलंकृतः॥१४॥तेनचादित्यकल्पेन॥
ब्रह्मास्त्रेणचपालितः॥सबभूवदुराधर्षोरावणिःसुमहाबलः॥१५॥सोभिनिर्यायनगरादिंद्र
जित्समितिंजयः॥हुत्वाग्निंराक्षसैर्मंत्रैरंतर्धानगतोब्रवीत्॥१६॥अद्यहत्वारणेयौतौमि
थ्याप्रव्रजितौवने॥जयंपित्रेप्रदास्यामिरावणायरणेधिकं॥१७॥ ॥ ॥

मयामहांतःकंबवोवलयायस्यसःकंबुर्नावलयेशंखेइत्यमरः॥१४॥१५॥राक्षसैर्मंत्रैःनिर्ऋति
दैवत्यमंत्रैःअंतर्धानगतःअंतर्धानशक्तिंप्राप्तः॥१६॥१७॥

अभ्रसंप्लवेसूर्यस्यगत्यादिकमिवनास्यवेगयुक्तगत्यादिकंकिंचिद्विदितं॥३५॥३६॥३७॥३८॥अयुध्यमानंत्य
क्तयुद्धं·प्रच्छन्नंयुद्धभीत्यागृहेऽस्मदृश्यतयास्थितंअयुध्यमानत्वादिषट्प्रकाराणामपिसर्वरक्षउ
द्देशेनब्रह्मास्त्रसंधानेवधोभवतिनतुतद्युज्यतइत्यर्थः अंततोविभीषणस्यापिनाशप्रसंगइत्याशयः

नास्यवेगगतिंकश्चिन्नचरूपंधनुःशरान्॥नचास्यविदितंकिंचित्सूर्यस्येवाभ्रसंप्लवे
॥३५॥तेनातिविद्धाश्चहरयोनिहताश्चगतासवः॥बभूवुःशतशस्तत्रपतिताधरणीत
ले॥३६॥लक्ष्मणस्तुततःक्रुद्धोभ्रातरंवाक्यमब्रवीत्॥ब्राह्ममस्त्रंप्रयोक्ष्यामिवधार्थंस
र्वरक्षसां॥३७॥तमुवाचततोरामोलक्ष्मणंशुभलक्षणं॥नैकस्यहेतोरक्षांसिपृथिव्यांहं
तुमर्हसि॥३८॥अयुध्यमानंप्रच्छन्नंप्रांजलिंशरणागतं॥पलायमानंमत्तंवानहंतुंत्वमि
हार्हसि॥३९॥तस्यैवतुवधेयत्नंकरिष्यामिमहाभुज॥आदेक्ष्यावोमहावेगानस्त्रानाशी
विषोपमान्॥४०॥

३९॥माययांतर्हितमेनमेवहंतुंघोरानाशीविषोपमानस्त्रान्अस्त्राणिआदेक्ष्यावः॥अदृश्यवधो
स्मदेकसाध्यःदृश्यस्यतुवधईषत्करोवानराणामपीत्याह·राक्षसमिति·यदिदर्शनंस्यात्तदाद
श्यादर्शनमात्रेणहनूमदादयएनंराक्षसंनिहनिष्यंति॥४०॥ श्र

धूमांधकारं चक्रे माययेति शेषः। दिशश्चांतर्दधे अंतर्धापयामास नीहारवशात्तद्विवेकं मायया संपाद-
यामासेत्यर्थः॥२५॥२६॥२७॥२८॥ दत्तवरैः वरदत्तैः॥२९॥३०॥ कंकपत्रिणस्ते पतगा बाणाः अंतरिक्षे रावणिं

स हि धूमांधकारं च चक्रे प्रच्छादयन्नभः॥ दिशश्चांतर्दधे श्रीमान्नीहारतमसावृत्त॥२५॥ नैव
ज्यातलनिर्घोषो न च नेमिखुरस्वनः॥ शुश्रुवे चरतस्तस्य न च रूपं प्रकाशते॥२६॥ घनांधकारे
तिमिरे शिलावर्षमिवाद्भुतं॥ स ववर्ष महाबाहुर्नाराचशरवृष्टिभिः॥२७॥ स रामं सूर्यसंकाशैः
शरैर्दत्तवरैर्भृशं॥ विव्याध समरे क्रुद्धः सर्वगात्रेषु रावणिः॥२८॥ तौ हन्यमानौ नाराचैर्धाराभिः
इव पर्वतौ॥ हेमपुंखान्नरव्याघ्रौ तिग्मान्मुमुचतुः शरान्॥३०॥ अंतरिक्षे समासाद्य रावणिं कं-
कपत्रिणः॥ निकृत्य पतगा भूमौ पेतुस्ते शोणिताप्लुताः॥३१॥ अतिमात्रं शरौघेणादीप्यमानौ न-
रोत्तमौ॥ तानिषून्पततो भल्लैरनेकैर्विचकर्ततुः॥३२॥ यतो हि ददृशाते तौ शरान्निपतितान् शि-
तान्॥ ततस्तु तौ दाशरथी ससृजातेस्त्रमुत्तमं॥३३॥ रावणिस्तु दिशः सर्वा रथेनातिरथो
पतत्॥ विव्याध तौ दाशरथी लघ्वस्त्रो निशितैः शरैः॥३३॥ ते नातिविद्धौ तौ वीरौ रुक्मपुंखैः सुसंह-
तैः॥ बभूवतुर्दाशरथी पुष्पिताविव किंशुकौ॥३४॥

समासाद्य तं निकृत्य विध्वा भूमौ शोणितोक्षि-
ताः पेतुः॥३१॥ तानिषून् इंद्रजित्प्रयुक्तबाणान् विचकर्ततुरित्यार्षो गुणः॥३२॥ यतो यस्यां दिशि ततस्तस्यां दिशि॥३३॥३४॥

250

मायांपरस्यमोहकरींशक्तिंप्रादुष्करोत्·प्रादुर्भावयामास·निकुंभिलांगंतुकामःपश्चिमद्वारेणनिर्ग
च्छन्स्वगमनविघातकंरामलक्ष्मणयोर्युद्धोद्योगंदृष्ट्वातन्निवारणार्थंमायांप्रकटितवानित्याशयः

इंद्रजित्तुततोदृष्ट्वाभ्रातरौरामलक्ष्मणौ॥रणायात्युद्यतौवीरौमायांप्रादुष्करोत्तदा॥४॥इंद्र
जित्तुरथेस्थाप्यसीतांमायामयींतदा॥बलेनमहतावृत्यतस्यावधमरोचयत्॥५॥मोहना
र्थंतुसर्वेषांबुद्धिंकृत्वासुदुर्मतिः॥हंतुंसीतांव्यवसितोवानराभिमुखोययौ॥६॥तंदृष्ट्वा
त्वभिनिर्यांतंसर्वेतेकाननौकसः॥उत्पेतुरभिसंक्रुद्धाःशिलाहस्तायुयुत्सवः॥७॥हनूमान्पु
रतस्तेषांजगामकपिकुंजरः॥प्रगृह्यसुमहच्छृंगंपर्वतस्यदुरासदं॥८॥सददर्शहतानंदां
सीतामिंद्रजितोरथे॥एकवेणीधरांदीनामुपवासकृशाननां॥९॥परिक्लिष्टैकवसनाम
मृजांराघवप्रियां॥रजोमलाभ्यामालिप्तैःसर्वगात्रैर्वरस्त्रियं॥१०॥तांनिरीक्ष्यमुहूर्त्तंतुमै
थिलीमध्यवस्यच॥बभूवाचिरदृष्टाहितेनसाजनकात्मजा॥११॥

॥४॥तांमायामाह·इंद्रजि
त्वितितस्यावधंमायासीतायावधंबुद्धिंकृत्वामंत्रंकृत्वा·सीतांहंतुंव्यवसितःसन्ययौ·इंद्ररात्रिशे
षपरद्दिनेदशम्यांवाइतिबोध्यं॥५॥६॥७॥८॥९॥परिक्लिष्टंमलिनंअमृजांउद्वर्त्तनादिसंस्काररहितां·स
र्वगात्रैरुपलक्षितां॥१०॥अध्यवस्यनिश्चित्य·विषण्णोबभूवेतिशेषःनिश्चयहेतुमाह·अचिरेत्यादि॥११॥

राम
२

दृष्ट्वावानरयूथपाइति॰ अत्रतद्दर्शनोपायोभारतेउक्तः इदमंभोगृहीत्वातुराजराजस्यशासनात्॰ गुह्य
कोभ्यागतःकश्चित्त्वत्सकाशमरिंदम॰ इदमंभःकुबेरस्तेमहाराजप्रयच्छति॰ अंतर्हितानांभूतानांदर्शना
र्थंपरंतप॰ अनेनमृष्टनयनोभूतान्यंतर्हितान्सुत॰ भवान्द्रक्ष्यतियस्मैचप्रदास्यतिनरः सचेतिविभी

तमेनंमायिनंक्षुद्रं अंतर्हितरथंबलात्॥राक्षसंनिहनिष्यंतिदृष्ट्वावानरयूथपाः॥४१॥यद्ये
षभूमिंविशतेदिवंवारसातलंवापिनभस्तलंवा॥एवंविगूढोपिममास्त्रदग्धःपतिष्यतेभूमि
तलेगतासुः॥४२॥इत्येवमुक्त्वावचनंमहार्थंरघुप्रवीरःप्लवगर्षभैर्वृतः॥वधायरौद्रस्यनृशं
सकर्मणस्तदामहात्मात्वरितंनिरीक्षते॥४३॥इत्यार्षेश्रीरा॰ यु॰ अशीतितमःसर्गः॥८०॥ ॥
विज्ञायतुमनस्तस्यराघवस्यमहात्मनः॥सनिवृत्याहवात्तस्मात्प्रविवेशपुरंततः॥१॥सोनुस्म
त्यवधंतेषांराक्षसानांतरस्विनां॥क्रोधताम्रेक्षणःशूरोनिर्जगामाथरावणिः॥२॥सपश्चिमेन
द्वारेणनिर्ययौराक्षसैर्वृतः॥इंद्रजित्तुमहावीर्यःपौलस्त्योदेवकंटकः॥३॥

षणवाक्येन॥४१
भूमिंभूमिविवरं दिवंस्वर्गएतदुपरितनलोकोपलक्षणं रसातलमित्येतदधस्तनलोकोपलक्षणं॥४२ त्व
रितं॰ त्वरोपेतंनिरीक्षतेस्म॥४३॥इतिश्रीरामाभिरामेश्रीरा॰रा॰ति॰ युद्ध॰ अशीतितमःसर्गः॥८०॥कृत॰
७३॥मनोविज्ञाय॰ दिव्यास्त्रबलेनसर्वथामांजिघांसतीतिज्ञात्वा॥१॥तेषांकुंभकर्णादीनां॥ २॥३॥

रामा·यु·
२५१

पापपराक्रमकूटयोधिन्हेनिर्घृणातेस्त्रीविषयेपिघृणानास्तिअतोऽनार्यस्येदृशंकर्मधिक्इतिअनुकर्षः
१९॥२०॥हेवधार्हतेनकर्मणानचिरंजीविष्यसिहियतोममहस्तगतोसि॥२१॥येलोकवध्यैश्चोरादिभिर

धिक्त्वांपापसमाचारंयस्यतेमतिरीदृशी॥नृशंसानार्यदुर्वृत्तक्षुद्रपापपराक्रम॥अनार्यस्ये
दृशंकर्मघृणातेनास्तिनिर्घृण॥१९॥च्युतागृहाच्चराज्याच्चरामहस्ताच्चमैथिली॥किंतवैष
पराद्धाहियदेनांहंसिनिर्दय॥२०॥सीतांहत्वातुनचिरंजीविष्यसिकथंचन॥वधार्हकर्म
णानेनममहस्तगतोह्यसि॥२१॥येचस्त्रीघातिनांलोकालोकवध्यैश्चकुत्सिताः॥इहजीवि
तमुत्सृज्यप्रेत्यतान्प्रतिलप्स्यसे॥२२॥इतिब्रुवाणोहनूमान्सायुधैर्हरिभिर्वृतः॥अभ्यधाव
त्सुसंक्रुद्धोराक्षसेंद्रसुतंप्रति॥२३॥आपतंतंमहावीर्यंतदनीकंवनौकसां॥रक्षसांभीम
कोपानामनीकेनन्यवारयत्॥२४॥सतांबाणसहस्रेणविक्षोभ्यहरिवाहिनीं॥हनूमंतंहरिश्रे
ष्ठमिंद्रजित्प्रत्युवाचह॥२५॥सुग्रीवस्त्वंचरामश्चयन्निमित्तमिहागताः॥तांवधिष्यामिवै
देहीमद्यैवतवपश्यतः॥२६॥इमांहत्वाततोरामंलक्ष्मणंत्वांचवानर॥सुग्रीवंचवधिष्यामि
तंचानार्यंविभीषणं॥२७॥

पिरपिकुत्सिताअतिदुःखतयापरिहृताःस्त्रीघातिनांलोकास्तानिहे
दानींजीवितमुत्सृज्यप्रेत्यप्रतिलप्स्यसे॥२२॥२३॥आपतंतमितिलिंगव्यत्ययआर्षः॥२४॥२५॥२६॥२७॥

२५१

राम
२५

शोकार्त्तत्वादिगुणविशिष्टां राक्षसेंद्रसुतमिंद्रजितं श्रितां सीतां दृष्ट्वा किमस्य समर्थितमभिप्रेतमिति स्वयं चिंतयन्स वानरान्प्रत्यपि किं समर्थितमस्येति अब्रवीत् ॥१२॥ अस्तु यत्किंचिदस्याभ्यर्थितमपि तु दुष्टमेनं हनामेत्युद्योगं कृतवानित्याह सह तैरिति ॥१३॥ विकोशं विगतपिधानं निस्त्रिंशं खड्गं

अब्रवीत्तां तु शोकार्त्तां निरानंदां तपस्विनीं ॥ दृष्ट्वा रथस्थितां दीनां राक्षसेंद्रसुतश्रितां ॥१२॥
किं समर्थितमस्येति चिंतयन्स महाकपिः ॥ सह तैर्वानरश्रेष्ठैरभ्यधावत रावणिं ॥१३॥
तद्वानरबलं दृष्ट्वा रावणिः क्रोधमूर्छितः ॥ कृत्वा विकोशं निस्त्रिंशं मूर्ध्नि सीतामकर्षयत् ॥१४॥
तां स्त्रियं पश्यतां तेषां ताडयामास राक्षसः ॥ क्रोशंतीं राम रामेति मायया योजितां रथे ॥१५॥
गृहीतां मूर्द्धजां दृष्ट्वा हनूमान्दैन्यमागतः ॥ दुःखजं वारि नेत्राभ्यामुत्सृजन्मारुतात्मजः ॥१६॥
तां दृष्ट्वा चारुसर्वांगीं रामस्य महिषीं प्रियां ॥ अब्रवीत्परुषं वाक्यं क्रोधाद्रक्षोधिपात्मजं ॥१७॥
दुरात्मन्नात्मनाशाय केशपक्षे परामशः ॥ ब्रह्मर्षीणां कुले जातो राक्षसीं योनिमाश्रितः ॥१८॥

मूर्ध्नि तत्स्थकेशपाशे स्पृष्ट्वेति शेषः ॥१४॥ पश्यतां तेषां पश्यतस्ताननादृत्येत्यर्थः ॥१५॥१६॥१७॥ हे दुरात्मन्यदेनां केशपक्षे केशकलापे परामशस्तदात्मनाशाय पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे यतो ब्रह्मर्षिकुलजातोपि राक्षसीं योनिमाश्रितोसि अतस्त्वां धिगित्युत्तरेणान्वयः ॥१८॥

२॥३॥४॥५॥६॥७॥८॥निधेयाश्वैःसारथ्यधीनाश्वैःसमायुक्तः॥९॥साशिलाव्यर्थमुद्यताअभवदितिशेषः

तानुवाचततःसर्वान्हनूमान्मारुतात्मजः॥विषण्णवदनान्दीनांस्त्रस्तान्विद्रवतःपृथक्॥२॥
कस्माद्विषण्णवदनाविद्रवध्वंप्लवंगमाः॥त्यक्तयुद्धसमुत्साहाःशूरत्वंक्वनुवोगतं॥३॥पृष्ठतोनु
व्रजध्वंमामग्रतोयांतमाहवे॥३॥एवमुक्ताःसुसंक्रुद्धावायुपुत्रेणधीमता॥शैलशृंगान्द्रु
मांश्चैवजगृहुर्हृष्टमानसाः॥४॥अभिपेतुश्चगर्जंतोराक्षसान्वानरर्षभाः॥परिवार्यहनूमंत
मन्वयुश्चमहाहवे॥५॥सतैर्वानरमुख्यैस्तुहनूमान्सर्वतोवृतः॥हुताशनइवार्चिष्मानदह
च्छत्रुवाहिनीं॥६॥सराक्षसानांकदनंचकारसुमहाकपिः॥वृतोवानरसैन्येनकालांतकयमो
पमः॥७॥सतुशोकेनचाविष्टःकोपेनमहताकपिः॥हनूमान्रावणिरथेमहतीपातयच्छि
लां॥८॥तमापतंतीदृष्ट्वैवरथःसारथिनातदा॥विधेयाश्वसमायुक्तोविदुरमपवाहितः॥९॥
तमिंद्रजितमप्राप्यरथस्थंसहसारथिं॥विवेशधरणींभित्वासाशिलाव्यर्थमुद्यता॥१०॥
पतितायांशिलायांतुव्यथितारक्षसांचमूः॥निपतंत्याचशिलयाराक्षसामथिताभृशं॥११॥
तमभ्यधावंछतशोनदंतःकाननोकसः॥तेद्रुमांश्चमहाकायागिरिशृंगाणिचोद्यताः॥१२॥

१०॥११॥गिरिशृंगाणिचोद्यताःगृहीत्वेतिशेषःगृहीत्वायुद्धार्थमुद्यताबभूवुरित्यर्थः॥१२॥रामरा

अमित्राणांशत्रूणांयस्त्पीडाकरंतत्पापमपिकर्त्तव्यमेव॥२८॥२९॥३०॥३१॥एषावैदेहीविशस्तातोवःपरिश्र
मोनिष्फलः॥३२॥३३॥व्यादितास्यस्याविवृत्तास्यस्यतन्दुर्गंखेचररथरूपंदुर्गं॥३४॥हृष्टरूपंःअतिश

नहंतव्याःस्त्रियश्चेतियद्ब्रवीषिप्लवंगम॥पीडाकरममित्राणांयच्चकर्त्तव्यमेवतत्॥२८॥तमेव
मुक्त्वारुदतींसीतांमायामयींचतां॥शितधारेणखड्गेननिजघानेंद्रजित्स्वयं॥२९॥यज्ञोपवी
तमार्गेणछिन्नातेनतपस्विनी॥सापृथिव्यांपृथुश्रोणीपपातप्रियदर्शना॥३०॥तामिंद्रजित्स्त्रि
यंहत्वाहनूमंतमुवाचह॥३१॥मयारामस्यपश्यमांप्रियांशस्त्रनिषूदितां॥एषाविशस्तावैदेही
निष्फलोवःपरिश्रमः॥३२॥ततःखड्गेनमहताहत्वातामिंद्रजित्स्वयं॥हृष्टःसरथमास्थायन।
नादचमहास्वनं॥३३॥वानराःशुश्रुवुःशब्दमदूरेप्रत्यवस्थिताः॥व्यादितास्यस्यनदतस्तंदुर्गं
संश्रितस्यतु॥३४॥तथातुसीतांविनिहत्यदुर्मतिःप्रहृष्टचेताःसबभूवरावणिः॥तंहृष्टरूपंस
मुदीक्ष्यवानराविषण्णरूपाःसमभिप्रदुद्रुवुः॥३५॥इत्यार्षेश्री रा०यु०एकाशीतितमःसर्गः॥
॥८१॥ श्रुत्वातंभीममनिर्ह्रादंशक्राशनिसमस्वनं॥वीक्षमाणादिशःसर्वादुद्रुवुर्वानराभृशं॥१॥

येनहृष्टंःप्रशंसायांरूपं॥३५॥कत०॥७४॥इतिश्रीरामाभिरामेश्रीरा०रा०ति०यु०एकाशीतितमःसर्गः
॥८१॥ श्रुत्वेतिःभीमोयोनिर्ह्रादःशब्दस्तंश्रुत्वाइंद्रजितइतिशेषःशक्राशनिसमस्वनंःतमिंद्रजितंवीक्षमाणादिशो
द्रुद्रुवुः॥१॥

दशम्यांपूर्वाह्ने निकुंभिलागमनं निकुंभिलांचैत्यं तदाख्यंदेवालयंवटवृक्षंवा ॥२४॥ जुहुवज्जुहाव ॥२५
होमशोणितभुक् होमार्थमाहुतित्वेनप्रक्षिप्तशोणितभुक् अर्चिभिः पिनद्धः समृद्धः ॥ सुतीव्रोग्निः

ततःप्रेक्ष्यहनूमंतंव्रजंतंयत्रराघवः ॥ सहोतुकामोदुष्टात्मागतश्चैत्यंनिकुंभिलां ॥२४॥ निकुं
भिलामधिष्ठायपावकंजुहुवेंद्रजित् ॥ यज्ञभूम्यांततोगत्वापावकस्तेनरक्षसा ॥२५॥ हूयमानःप्र
जज्वालहोमशोणितभुक्तदा ॥ सार्चिःपिनद्धोददृशेहोमशोणिततर्पितः ॥२६॥ संध्यागतइ
वादित्यःसुतीव्रोग्निःसमुत्थितः ॥२६॥ अथेंद्रजिद्राक्षसभूतयेतुजुहावहव्यंविधिनाविधान
वित् ॥ दृष्ट्वाव्यतिष्ठंतचराक्षसास्तेमहासमूहेषुनयानयज्ञाः ॥२७॥ इत्यार्षेश्रीरामायणेयुद्धकां
डेद्व्यशीतितमःसर्गः ॥८२॥ राघवश्चापिविपुलंतंराक्षसवनौकसां ॥ श्रुत्वासंग्रामनिर्घोषंजां
बवंतमुवाचह ॥१॥ सौम्यनूनंहनुमताकृतंकर्मसुदुष्करं ॥ श्रूयतेचयथाभीमःसुमहाना
युधस्वनः ॥२॥ तद्गच्छकुरुसाहाय्यंस्वबलेनाभिसंवृतः ॥ क्षिप्रमृक्षपतेतस्यकपिश्रेष्ठस्य
युध्यतः ॥३॥ ऋक्षराजस्तथेत्युक्त्वास्वेनानीकेनसंवृतः ॥ आगच्छत्पश्चिमंद्वारंहनूमान्यत्रवानरः ॥
॥४॥

रक्तोविपत्सूचकः ॥२६॥ महासमूहेषुयुद्धेषुनयानयज्ञाःकृत्याकृत्यतत्त्वज्ञाः ॥२७॥ कत० ॥७५॥ इतिश्री
रामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेद्व्यशीतितमःसर्गः ॥८२॥ राघवश्चापीति ॥१॥२॥३॥४॥

ततस्तद्वर्षंविसर्जंतस्तेवानराइंद्रजितंक्षिपंतिआक्षिपंतिस्मतिरस्कृतंचक्रुरितियावत्॥१३॥१४॥१५॥१६

क्षिपंतीइंद्रजितंसंख्येवानराभीमविक्रमाः॥वृक्षशैलमहावर्षंविसर्जंतःप्लवंगमाः॥१३॥शत्रूणांक
दनंचक्रुर्नेदुश्चविविधैःस्वनैः॥वानरैस्तैर्महाभीमैर्घोररूपानिशाचराः॥१४॥वीर्यादभिह
तावृक्षैर्व्यचेष्टंतरणक्षितौ॥ससैन्यमभिवीक्ष्याथवानरार्दितमिंद्रजित्॥१५॥प्रगृहीतायुधः
क्रुद्धःपरानभिमुखोययौ॥सशरौघानवसृजन्स्वसैन्येनाभिसंवृतः॥१६॥जघानकपिशार्दू
लान्सुबहून्दृढविक्रमः॥शूलैरशनिभिःखड्गैःपट्टिशैःकूटमुद्गरैः॥१७॥तेचाप्यनुचरांस्तस्यवा
नराजघ्नुराहवे॥१८॥सुस्कंधविटपैःशैलैःशिलाभिश्चमहाबलः॥हनूमान्कदनंचक्रेरक्षसांभी
मकर्मणां॥१९॥सनिवार्यपरानीकमब्रवीत्तान्वनौकसः॥हनूमान्सन्निवर्तध्वंननःसाध्यमिदं
बलं॥२०॥त्यक्त्वाप्राणान्विचेष्टंतोरामप्रियचिकीर्षवः॥यन्निमित्तंहियुध्यामोहतासाजनका
त्मजा॥२१॥इदमर्थंहिविज्ञाप्यरामंसुग्रीवमेवच॥तौयत्प्रतिविधास्येतेतत्करिष्यामहेवयं।
॥२२॥इत्युक्त्वावानरश्रेष्ठोवारयन्सर्ववानरान्॥शनैःशनैरसंत्रस्तःसबलःसंन्यवर्तत॥२३॥

१७॥१८॥१९॥संनिवार्यपरानीकंराक्षससेनां॥२०॥प्राणांस्त्यक्त्वाप्राणस्नेहमपित्यक्त्वाविचेष्टंतःसंतोराम
प्रियचिकीर्षयायन्निमित्तंयुध्यामःसाहतेतिव्यर्थोयंश्रमइतिभावः॥२१॥प्रतिविधास्येतेप्रतिक्रिया
नुष्ठानेनियोक्ष्येतेतत्करिष्यामहे॥२२॥२३॥

तंलक्ष्मणोवाहुभ्यांपरिष्वज्यदुःखितोभूत्वास्वस्थंअस्वस्थंचित्तंरामंहेत्वर्थसंयुतंउपपत्त्याविशिष्टप्रयोजनेनचसहितंवाक्यमुवाच॥१३॥ तदेवाहशुभेइति॰ तदद्यविपुलंवीरदुःखमिंद्रजिताकृतं॰ कर्मणाव्यपनेष्यामितस्मादुत्तिष्ठराघवेतियुद्धायपौरुषावलंबनेनप्रोत्साहयिष्य

तंलक्ष्मणोथवाहुभ्यांपरिष्वज्यसुदुःखितः॥ उवाचराममस्वस्थंवाक्यंहेत्वर्थसंयुतं॥१३॥
शुभेवर्त्मनितिष्ठंतंत्वामार्यविजितेंद्रियं॥ अनर्थेभ्योनशक्नोतित्रातुंधर्मोनिरर्थकः॥१४॥

न्केवलधर्मावलंबनमप्रयोजकमितिप्रतिपादयत्यनेनवाक्यसमूहेन हे आर्यशुभेवर्त्मनिधर्ममार्गेराज्यत्यागपूर्वकंपितृवचनपालनरूपेतिष्ठंतंविजितेंद्रियंहस्तप्राप्तराज्यपरित्याज्यकयोः कैकयीदशरथयोरुपरिकालुष्याभावेनविजितेंद्रियंत्वांत्वदाश्रितोधर्मोनर्थेभ्यस्त्रातुंनशक्नोतुयतस्तस्मादसौनिरर्थकःप्राधान्येनपुरुषार्थोनभवति॥१४॥

श्वसद्भिःसीताविपत्तिस्मृतिजदुःखान्निश्वसद्भिरित्यर्थः॥५॥नीलमेघनिभंभीमंक्रुद्धवलंउद्यतंयुद्धा
योद्यतंसन्निवार्ययुद्धप्रवृत्तेरितिशेषः॥६॥तेनसैन्येनसह कृतसैन्येनापिसहरामस्यसन्निक

अथायांतंहनूमंतंददर्शनृपतिस्तदा॥वानरैःकृतसंग्रामैःश्वसद्भिरभिसंवृतः॥५॥दृष्ट्वाप
थिहनूमांश्चतद्बलमुद्यतं॥नीलमेघनिभंभीमंसन्निवार्यन्यवर्त्तत॥६॥सतेनसहसै-
न्येनसन्निकर्षंमहायशाः॥शीघ्रमागम्यरामायदुःखितोवाक्यमब्रवीत्॥७॥समरेयुध्यमा
नानामस्माकंप्रेक्षतांचसः॥जघानरुदतींसीतामिंद्रजिद्रावणात्मजः॥८॥उद्भ्रांतचित्तस्तां-
दृष्ट्वाविषण्णोहमरिंदम॥तदहंभवतोवृत्तंविज्ञापयितुमागतः॥९॥तस्यतद्वचनंश्रुत्वाराघ
वःशोकमूर्छितः॥निपपाततदाभूमौछिन्नमूलइवद्रुमः॥१०॥तंभूमौदेवसंकाशंपतितंद
श्यराघवं॥अभिपेतुःसमुत्पत्यसर्वतःकपिसत्तमाः॥११॥आसिंचन्सलिलैश्चैनंपद्मोत्पल
सुगंधिभिः॥प्रदहंतमसंहार्यंसहसाग्निमिवोत्थितं॥१२॥ श्र ॥

र्षमागम्यप्राप्यरामायाब्रवीदित्यर्थः॥७॥८॥९॥१०॥अभिपेतुःतत्समीपमाजग्मुः॥११॥प्रदहंतंसी
तानाशश्रवणशोकेनसहायेनदहंतं अतएवासंहार्यं अनिवार्यवेगं उत्थितमग्निमिव दृष्ट्वा
सलिलादिभिस्तमसिंचन्॥१२॥

उक्तमेवार्थंविशदयति· यथैवेति· यथायस्मात्स्थावरंव्यक्तं धर्मप्रसक्तिरहितमपिसुखीतिव्यक्तं· तथाविधंस्थावरवद्धमानधिकृतंजंगमं पश्वाद्यपिसुखीतिव्यक्तं।तेनव्यतिरेकः खंडितः अन्वयमपिखंडयतिनतथायुक्तः अयमर्थः सुखरूपोनसर्वात्मनाधर्मयुक्तस्त्वद्विधोधर्मस्यसुखा

यथैवस्थावरंव्यक्तंजंगमंचतथाविधं ।नायमर्थस्तथायुक्तस्त्वद्विधोनविपद्यते ॥१६॥
यद्यधर्मोभवेद्भूतोरावणोनरकंव्रजेत् ।भवांश्चधर्मसंयुक्तोनैवव्यसनमाप्नुयात् ॥१७॥

न्वये· नविपद्यतेनविपन्नःस्यात् दृश्यतेचविपत्तिरित्यन्वयोपिनास्ति· अनेनतदंशेजन्मांतरीणं धर्मकल्पनापिपरास्ता· साधनत्वासिद्धावेवतत्कल्पनावसरात् अतोयमर्थोधर्मरूपोननास्त्येव ॥१६॥ उक्तमर्थंप्रकृतेयोजयति· यदीति· अधर्मोभूतोदुःखसाधनत्वेनयदिसिद्धोभवेत्· तदारावणोनरकंदुःखंव्रजेत्· धर्मयुक्तोभवांश्चनैवव्यसनंदुःखंप्राप्नुयात् ॥१७॥

एवंधर्मपदार्थमंगीकृत्यतस्यार्थत्वंनास्तीत्यनुभवात्प्रदर्श्येदानींधर्मपदार्थएवनास्तिफलानुमेयता हितस्योक्ताफलंचसुखं प्रकृतेचसुखान्वयव्यतिरेकयोर्धर्माभावेननेनतदनुमानमित्याह भूता नामितिस्थावराणांजंगमानांचपश्वादिरूपाणांभूतानांदर्शनं सुखापरोक्षदर्शनंयथास्तितथा

भूतानांस्थावराणांचजंगमानांचदर्शनं॥यथा
स्तिनतथाधर्मस्तेननास्तीतिमेमतिः॥१५॥

धर्मोनास्तिअसामर्थ्यादनधिकाराच्चतस्माद्धर्मःसुखसाधनत्वंव्याप्नोनेतिमेमतिःजन्मांतरादिकं न्यास्त्येवेतिबौद्धमतेनेयमुक्तिः न हितंविनाजायमानस्यापितत्कारणकत्वमितिभावः यत्तुयथा। स्थावरादीनांदर्शनात्तत्सत्तातथाधर्मस्यदर्शनाभावाद्धर्मोनास्तीतिव्याचक्षतेतन्नयोग्यानुपलंभस्यैवाभावसाधकत्वात् धर्मस्यचपिशाचादिवदयोग्यत्वात्॥१५॥ श्र

नचैवमस्तीत्याह॰ यस्मादित्ति येष्वधर्मः प्रतिष्ठितस्तेष्वर्था विवर्धने धर्मशीलाश्चक्लिश्यंतेतेनतस्मा
देतौनिरर्थकौश्कतनस्वस्व फलरहितौविपरीतफलौचेत्यर्थः एवंचसुखदुःखयोर्धर्माधर्माभ्यां
व्याप्त्यभावात् नताभ्यांतदनुमानमितिभावः ॥२१॥ इदानीधर्मादिस्वरूपमेवदुर्निरूपमि
तिवक्तुंकिंव्यापाररूपोवातज्जन्यातिशयरूपावेतिविकल्प्यनाद्यइत्याह॰ वध्यंतइतिपाप

यस्मादर्थाविवर्द्धंतेयेष्वधर्मःप्रतिष्ठितः॥क्लिश्यंतेधर्मशीलाश्चतस्मादेतौनिरर्थकौ॥२१॥
वध्यंतेपापकर्माणोयद्यधर्मेणराघव॥वधकर्महतोऽधर्मःसहतःकंवधिष्यति॥२२॥

कर्मणःपुरुषाययद्यधर्मेणक्रियाशरीरेणवध्यंतेतदाक्रियायास्त्रिक्षणावस्थायित्वाच्चतु
र्क्षणेस्वत एववधकर्मणानाशात्क्रिक्रिययाहतोनष्टोऽधर्मःस्वयंहतोऽसन्मृत्वाकंहंतव्यंव
धिष्यति॰ यद्वावधकर्मरूपोधर्मश्चतुर्थक्षणेहतोनष्टःस्वयमसन्सन्कंवधिष्यति॰ वधक
र्मेत्युपलक्षणं ॥२२॥

अस्यतर्कस्यविपर्ययेपर्यवसानमाहः तस्यचेति· तस्यरावणस्यसत्यधर्मेव्यसनाभावात्सुखसत्वाच्च पितवाक्यपरिपालकेत्वयिव्यसनंदुःखमागतेप्राप्तेसतिसिद्धोधर्माधर्माभ्यांसुखदुःखयोरन्वयव्यतिरेकाभावः किंचोक्ताउभवादेवविपरीतफलताचतयोरित्याहः धर्मइति· धर्मोयथाकृतफलविरुद्धदुःखफलोभवति· एवमधर्मश्चकृतफलविरुद्धस्तुसुखफलोभवतितस्मादेतौपरस्पराविरोधिनौअन्योन्यंयथाकृतफलविरुद्धफलकौ॥१८॥कुतएवंनिश्चयस्तत्रानुभवादेवेत्याहः धर्मेणेति·

तस्यचव्यसनाभावाद्व्यसनंचागतेत्वयि॥धर्मोभवत्यधर्मश्चपरस्परविरोधिनौ॥१८॥ध
र्मेणोपलभेद्धर्मंअधर्मंचाप्यधर्मतः॥यच्चधर्मेणायुज्येयुर्येष्वधर्मःप्रतिष्ठितः॥१९॥नविधर्मे
णायुज्येरन्नाधर्मरुचयोजनाः॥धर्मेणाचरतांचैषांतथाधर्मफलंभवेत्॥२०॥ श्री

धर्मेणधर्मंधर्मसाध्यंसुखंयदिउपलभेत· तथाऽधर्मतः अधर्मेणाधर्मंतत्फलंदुःखंयद्युपलभेत् नियमेनउत्तरार्धस्थंयदानिपूर्वार्धान्वयियद्येवंनियमःस्यात्·तदायेषुरावणादिषुधर्मःप्रतिष्ठितःतेऽधर्मेणतत्फलेनदुःखेनैवयुज्येयुःतथायेजानानाधर्मरुचयअधर्मरुचिरहितास्तेधर्मेणतत्फलेननवियुज्येरंननवियुक्ताःस्युः·तमेवार्थंप्रकारांतरेणाहः धर्मेणेति· धर्मेणधर्ममार्गेणचरतांअनुतिष्ठतांतेषांतथाधर्मफलंसुखंभवेत्:तदेतयोर्विरुद्धफलराहित्यंस्यादित्यर्थः॥१९॥२०॥

रा·मा·यु· तुल्यन्यायादशुभकर्मजातिशयोप्यसन्नेवेतिध्वनितमर्थंकतर्केणदृढीकरोति-यदीतिहेसतांमु
२५१ ख्यसत्पुरुषश्रेष्ठयदिसत्कर्मजन्यमहत्सुखंस्यात्तदातवकिंचनकिंचनकिंचिदपिअस
दशुभंदुःखंनस्यात्-उक्तस्यतर्कस्यविपर्ययपर्यवसानमाह-त्वयाचेदृशंदुःखंप्राप्तंतस्मात्तत्
त्सदितिनोपपद्यते॥२५॥ननूक्तदोषसमर्हःकर्मणःप्राधान्येनार्थसाधनपक्षेयुक्तोनतुपौरुषोपक
नास्यार्थसाधकत्वेनतर्हिमुख्यमर्थसाधनंपौरुषमेवालंब्यतामित्याह-अथवेतिदुर्बलःस्वतोर्थस

यदिसत्स्यात्सतांमुख्यनासत्स्यात्तवकिंचन॥त्वयायदीदृशंप्राप्तंतस्मात्तन्नोपपद्यते॥२५॥
257 अथवादुर्बलःक्लीबोबलंधर्मोऽनुवर्त्तते॥दुर्बलोहृतमर्यादोनसेव्यइतिमेमतिः॥२६॥बल
स्ययदिचेद्धर्मोगुणभूतःपराक्रमे॥धर्ममुत्सृज्यवर्त्तस्वयथाधर्मेतथावले॥२७॥

धनासमर्थःअतएवक्लीबःअर्थसाधनेऽकिंचित्करोबलंपौरुषंअनुवर्त्ततेसहकारितयापेक्षतेतेन
दादुर्बलोहृतमर्यादःत्यक्तसुखसाधनत्वमर्यादोधर्मोनसेव्यइतिमेमतिःउक्तन्यायेनेतिभावः२६
नतुपौरुषंसहकारीकृत्यधर्मःसाधयतीतिनोच्यतेकिंतुपौरुषमेवप्रधानंकर्मतुतस्योपकारकंइति
तर्हितथैवानुष्ठानंकुर्वित्याह-बलस्येति-बलस्यपौरुषस्यधर्मोगुणभूतउपांगीक्रियतेतदापरा राम·
क्रमैःप्रयत्नैर्धर्ममुत्सृज्यधर्मप्राधान्यंत्यक्त्वायथेदानींधर्मेवर्त्तसेप्राधान्येनतथाबलेपौरुषेएववर्त्तस्व॥२ २५

द्वितीयंदूषयति· अथवेति· विहितेन· विहितश्येनाद्यनुष्ठानजातिशयेनास्मदीयेनायंपुरुषोहन्यतेस्वीयेनवान्यंहंतिएवंसतिविधिर्विहितानुष्ठानजातिशायएवंतेनपापेनकर्मणाहत्यारूपेणलिप्यते· नस:कर्मानुष्ठातापुरुष:हत्यायास्तदकर्तृकत्वात् नहिस्वोत्पादितपुत्रकृतहत्यापितरंस्पृशति· एवंतस्यकर्मजातिशयस्यानंत्यमभ्युपेत्यात्मालेपउक्त: एतेनकर्मकरणसंतुष्टस्येश्वरस्यफलदत्वमित्यपास्तंतस्यैवलेपप्रसंगात्· अत्रपक्षेविहितेनेत्यस्यविहितकर्मसंतुष्टेनेश्वरेणेत्यर्थ:॥२३॥एवम

अथवाविहितेनायंहन्यतेहंतिचापरं॥विधि:सल्लिप्यतेतेननसपापेनकर्मणा॥२३॥अ
दृष्टप्रतिकारेण अव्यक्तेनासतासता॥कथंशक्यंपरंप्राप्तुंधर्मेणातिविकर्षण॥२४॥

तिशयस्यघातकत्वमंगीकृत्यात्मालेपउक्त: इदानींघातकत्वमेवनास्तीत्याह· अदृष्टेति· अदृष्टप्रतिकारेण· अचेतनतयाऽज्ञातस्वकर्त्तव्यशत्रुप्रतीकारेण: अथस्वाश्रयचेतनद्वारातत्ज्ञानमितिचेतन्नाह· अव्यक्तेनस्वाश्रयभूतात्मनोऽप्रत्यक्षरूपाव्यक्तेनातएवासताऽसत्कल्पेनसतावर्त्तमानेनापिधर्मेणकर्मजन्यातिशयेनकथंपरंवध्यस्वरूपंप्राप्तुंशक्यं· अप्राप्यपरंहंतीतिचेदसंबंधाविशेषात्सर्वहननप्रसंग: अयंहन्तृकृतकर्मजातिशयोवध्यनिष्ठएवेतिचेदन्यधर्मेणान्यस्यधार्मिकत्वप्रसंग:कर्तृनिष्ठत्वेतूक्तदोषइतिभाव:॥२५॥ ॥

अथैषहृतक्रोधावेशःसन्पौरुषधर्मयोरनुष्ठानेसिद्धांतंसिद्धाचारप्रदर्शनपूर्वकमाहयदीतिहेपरंत
पधर्मश्चयदिभूतःस्यात्प्राधान्येनानुष्ठेयःस्यात् भूतअधर्मइत्यसंधिरार्षःअधर्मोधर्मादन्यःपौरुषंत
द्वायदिप्राग्वत्भूतंस्यात्तदावज्रीमुनिंविश्वरूपंपौरुषेणहत्वापश्चादिज्यांधर्मंनकुर्यात्·किंत्वे
कस्यैवप्राधान्येएकमेवकुर्यादितिभावः॥२९॥तस्मादधर्मसंश्रितःपौरुषयुक्तोधर्मःरिपुंविनाश
यतितस्मात्सर्वमेतत्पौरुषधर्मोभयंयथाकामंस्वकार्यानुरोधेनरःकुरुते·वज्रिप्रभृतिनरः।३०

यदिधर्मोभवेद्भूतअधर्मोवापरंतप॥नस्महत्वामुनिंवज्रीकुर्यादिज्यांशतक्रतुः॥२९॥
अधर्मसंश्रितोधर्मोविनाशयतिराघव॥सर्वमेतद्यथाकामंकाकुत्स्थकुरुतेनरः॥३०॥मम
चेदंमतंतातधर्मोयमितिराघव॥धर्ममूलंत्वयाछिन्नंराज्यमुत्सृजतातदा॥३१॥ अ

यदिदमुक्तंयथोचितकालदेशमुभयमनुष्ठेयमितिअयमेवधर्मोन्याय्यइतिमममतं·नन्वेवं
धर्मस्यतवापिसंमतत्वेकिमितिमेदुःखमतआह·धर्ममूलमिति·अर्थमूलराज्यमुत्सृजतात्व
याधर्मस्यमूलंअर्थरूपंछिन्नमतस्त्वंक्लेशवानितिभावःयत्तुतीर्थेनअधर्मसंश्रितोधर्मःक
र्तारंविनाशयति·तस्माद्यथाकामंतत्कालौचित्येनोभयमप्यनुष्ठेयमिदमेवयाथाकाम्येनोभ
याचरणमेवधर्मइतिमममतमितिव्याख्यातंतत्तूपहसनीयमेवव्युत्पन्नैरित्यलं॥३१॥रामरा

किंचसत्यस्यापिधर्मत्वाद्धर्मपक्षपातिनाभवतासत्यधर्मएवादौकिमितिसम्यक्नानुष्ठितोयेनैवमनर्थेनवतःस्यादित्याह· अथचेदिति· अथपक्षांतरेहेपरंतपत्वयासत्यवचनंपितृवचनांगीकाररूपसत्यपरिपालनंधर्मोऽनुष्ठीयतइतिचेत्तदात्वयिज्येष्ठेउक्तस्याभिषेकवचनस्याकरणेयदनंतरंराज्ञःप्राप्तंतेनानृतेनराजात्वयाविनाभूतोमृतइतिशेषः अतस्तेनराज्ञोऽभिषेककरणरूपसत्येनत्वंबद्धःकिंनभवेरितिशे

अथचेत्सत्यवचनंधर्मःकिलपरंतप॥अन
तंत्वय्यकरणेकिंनबद्धस्त्वयाविना॥२८॥

षःप्रथमोक्तंराज्ञोऽभिषेकवचनरूपंसत्यंनपरिपालितंतत्परिपालनेत्वयाविनाभूतत्वासंभवेनपितृमरणंनस्यात्एवमाद्यनर्थश्चनवृत्तःस्यादितिभावः अनृतंत्वय्यकरणेकिंनबद्धस्त्वयाविनेतिसर्वत्रपाठःपाठइतिकतकः तीर्थस्त्वनृतंत्वय्यकरुणःकिंनबद्धस्त्वयापितेतिपठित्वासत्यस्यधर्मत्वेनत्वयिअभिषेकविषयमनृतंवदन्राज्यान्निष्काशनादकरुणःपितात्वयाकिंनबद्धइतिव्याचष्टे· तदयुक्तंपितृबंधनस्यसत्यवचनपरिपालनरूपत्वाभावात्॥२८॥ राम श्र

पुनरर्थमेवस्तौति· यस्येति· यस्यार्थाः संतितस्यधर्मकामरूपाअर्थाः प्रयोजनानिभवंतितस्यसर्वेप्रदक्षिणमनुकूलं· अधनेनपुरुषेणार्थंविचिन्वतापिअर्थकामेनविनापौरुषमर्थोनशक्यंप्राप्तुमितिशेषः॥३८॥ अर्थवशादेवराज्ञिसर्वेगुणा इत्याह· हर्ष इत्यादि· यानिहर्षादीनिसंतिएतानिनराधिपेअर्थात् अर्थसंपत्तेरेवप्रवर्त्तंते· अमोघानिभवंतीतिभावः यस्यहर्षोराक्षःसकृतार्थोभवतियस्मिन्क्रोधः

यस्यार्थाधर्मकामार्थास्तस्यसर्वंप्रदक्षिणं॥ अधनेनार्थकामेननार्थःशक्यंविचिन्वता॥३८॥ हर्षः
कामश्चदर्पश्चधर्मःक्रोधःशमोदमः॥ अर्थादेतानिसर्वाणिप्रवर्त्तंतिनराधिप॥३९॥ येषांनश्य
त्ययंलोकश्चरतांधर्मचारिणां॥ तेर्थास्त्वयिनदृश्यंतेदुर्दिनेषुयथाग्रहाः॥४०॥ त्वयिप्रव्रजिते
वीरगुरोश्चवचनेस्थिते॥ रक्षसापहृताभार्याप्राणैःप्रियतरातव॥४१॥

सनश्यतीत्यादि॥३

सर्वमूलोर्थस्तवनसंवृत्त इत्याह· येषामिति· एषांधर्मचारिणांतापसानांधर्मचरतामपिअर्थाभावात्· अयंलोकऐहिकपुरुषार्थोनश्यतीतिसंबंधः तेइहलोकेसुखसाधनभूताअर्थास्त्वयिनदृश्यंतेदुर्दिनेषुनवग्रहाइवेत्यर्थः॥४०॥ सर्वमिदंदुःखंस्वानुचितपूर्वाचातुरीमूलमित्युपसंहरतित्वयीति· गुरोर्वचनेस्थितेत्वयिप्रव्रजितेसतिधर्मश्रद्धाजाड्येनमोहाद्धनप्राप्तेरक्षसाभार्यापहृताअप्रत्याहृताच· प्राणैःप्राणेभ्य॥४१॥

अथार्थस्यधर्ममूलत्वमेवप्रतिपादयति। अर्थेभ्यइति। ततस्ततःसंवृत्तेभ्योनानादेशादाहृतेभ्योऽतएवप्रवृद्धेभ्योर्थेभ्यःसर्वाःक्रियाःयोगप्रधानाभोगप्रधानाश्चप्रवर्त्तंते। निष्कामतयाकृतायोगप्रधानाभवंति। सकामतयाकृताभोगप्रधानाइत्यर्थः॥३२॥ अर्थाभावेक्रियाव्यतिरेकमप्याहार्थेनहीनेति॥३३॥ नकेवलमर्थपरित्यागेधर्मासंभवः किंतुदोषप्राप्तिरपीत्याह। सोयमिति। यःपुमान्प्राप्तमर्थंपरित्यज्यसुखका

अर्थेभ्योथप्रवृद्धेभ्यःसंवृत्तेभ्यस्ततस्ततः॥ क्रियाःसर्वाःप्रवर्त्तंतेपर्वतेभ्यइवापगाः॥३२॥ अर्थेन
हिविमुक्तस्यपुरुषस्याल्पचेतसः॥ विच्छिद्यंतेक्रियाःसर्वाग्रीष्मेकुसरितोयथा॥३३॥ सोयमर्थं
परित्यज्यसुखकामःसुखैधितः॥ पापमाचरतेकर्त्तुंतदादोषःप्रवर्त्तते॥३४॥ यस्यार्थास्तस्यमित्रा
णियस्यार्थास्तस्यबांधवाः॥ यस्यार्थाःसपुमान्लोकेयस्यार्थाःसचपंडितः॥३५॥ यस्यार्थाःसच
विक्रांतोयस्यार्थाःसचबुद्धिमान्॥ यस्यार्थाःसमहाबाहुर्यस्यार्थाःसगुणाधिकः॥३६॥ अर्थस्यैतेप
रित्यागेदोषाःप्रव्याहृतामया॥ राज्यमुत्सृजताधीरयेनबुद्धिस्त्वयाकृता॥३७॥

मोभवतिसोयंभ्रष्टार्थःसुखैधितः अभिवृद्धस्तत्सुखाभिलाषोभूत्वापापमन्यायेनार्थार्जनंकर्त्तुमाचरतेआरभतेततोदोषस्ताडनबंधनादिरूपःप्रवर्त्तते॥३४॥ अथार्थःसर्वमूलमितिस्तौति। यस्येति॥३५॥३६॥ एतेदोषाःमित्राद्यभावरूपाःप्रव्याहृताःस्पष्टमुक्ताः तत्रराज्यमुत्सृजतात्वयायेनगुणेनबुद्धिरर्थपरित्यागविषयाकृतातंनजानेइतिशेषः॥३७

विभीषणमुखंदृष्ट्वा· रामादिदैन्यदर्शनेनदीनमित्यर्थः लक्ष्मणोवाचेतिसंधिरार्षः॥६॥७॥संनिवार्यनैवं
दुःखंकार्यमित्युक्त्वा॥८॥आर्त्तरूपेणदीनवेषेण॥९॥कथमयुक्तंतत्राहाभिप्रायंत्विति·सीताप्रतिसीता

विभीषणमुखंदृष्ट्वासुग्रीवंतांश्चवानरान्॥लक्ष्मणोवाचमंदार्थमिदंबाष्पपरिप्लुतः॥६॥ह
ताइंद्रजितासीताइतिश्रुत्वैवराघवः॥हनूमद्वचनात्सौम्यततोमोहमुपाश्रितः॥७॥कथयं
तंतुसौमित्रिंसंनिवार्यविभीषणः॥पुष्कलार्थमिदंवाक्यंविसंज्ञंराममब्रवीत्॥८॥मनुजें॰
द्रार्त्तरूपेणयदुक्तस्त्वंहनूमता॥तदयुक्तमहंमन्येसागरस्येवशोषणं॥९॥अभिप्रायंतु॰
जानामिरावणस्यदुरात्मनः॥सीतांप्रतिमहाबाहोनचघातंकरिष्यति॥१०॥याच्यमानः
सुबहुशोमयाहितचिकीर्षुणा॥वैदेहीमुत्सृजस्वेतिनचतत्कृतवान्वचः॥११॥नैवसाम्नानदा
नेननभेदेनकुतोयुधा॥साद्रष्टुमपिशक्येतनैवचान्येनकेनचित्॥१२॥ ॥ ॥

सुहृद्रूपवर्त्तमानंतदभिप्रायंसर्वनाशेपिसीतानत्याज्येत्येवंरूपंजानामिचअतोघातंनकरिष्य
तिसीतायाइतिशेषः॥१०॥तमेवाहयाच्यमानइति॥११॥किंचसीतान्येनकेनाप्युपायेन
द्रष्टुमेवाशक्याकुतस्तस्याहरणंएवंविधइत्याह·नैवसाम्नेतिकुतोयुधानिमित्तभूतयान्यस्यद
र्शनादिप्रसंगःनकुतोपि॥१२॥

अतःपरमेतावदेवकर्त्तव्यंकिमतीतार्थानुशोचनेनेत्याहः तदद्येति· कर्मणापौरुषेणाहमेवव्यपनेष्यामित
स्मान्मत्क्रोत्साहनार्थमुत्तिष्ठ॥४२॥तनुप्राकृतवदैन्यंयुक्तमहात्मनस्तेइत्याहः उत्तिष्ठेत्यादिः महात्मानं

तदद्यविपुलंवीरदुःखमिदंजिताकृतं॥कर्मणाव्यपनेष्यामितस्मादुत्तिष्ठराघव॥४२॥उत्तिष्ठ
नरशार्दूलदीर्घबाहोधृतव्रत॥किमात्मानंमहात्मानंआत्मानंनावबुध्यसे॥४३॥अयमनघत
वोदितःप्रियार्थंजनकसुतानिधनंनिरीक्ष्यरुष्टः सरथगजहयांसराक्षसेंद्रांभृशमिषुभिर्वि
निपातयामिलंकां॥४४॥इत्यार्षेश्रीरामायणेयुद्धकांडेअशीतितमःसर्गः॥८३॥राममाश्वासमानेतु
लक्ष्मणेभ्रातृवत्सले॥निक्षिप्यगुल्मान्स्वस्थानेतत्रागच्छद्विभीषणः॥१॥नानाप्रहरणैर्वीरैश्चतु
र्भिरभिसंवृतः॥नीलांजनचयाकारैर्मातंगैरिवयूथपैः॥२॥सोभिगम्यमहात्मानंराघवंशो
कलालसं॥वानरांश्चापिददृशेवाष्पपर्याकुलेक्षणान्॥३॥राघवंचमहात्मानमिक्ष्वाकुकुलनं
दनं॥ददर्शमोहमापन्नंलक्ष्मणस्यांकमाश्रितं॥४॥व्रीडितंशोकसंतप्तंदृष्ट्वारामंविभीषणः
अंतर्दुःखेनदीनात्माकिमेतदितिसोब्रवीत्॥५॥

परमात्मानं॥४३॥तवप्रियार्थमुदितउद्युक्तः
निरीक्ष्यकृत्वा॥४४॥क०॥७६॥इतिश्रीरामाभिरामेश्रीरामी० रा० ति० युद्ध० अशीतितमःसर्गः॥८३
आश्वासयमानेगुल्मान्स्वस्थानेपूर्वादितत्तद्द्वारेनिक्षिप्यावस्थाप्य॥१॥२॥ददृशेददर्श॥३॥४॥५॥

पत्रिणांपत्रिरूपैरंगैर्वाजिनोवेगवंतः तस्यलक्ष्मणस्यशराश्चसौम्याःपतत्रिणः कंकादयइवशोणितंपास्यंतिइंद्रजितइतिशेषः॥२०॥ तत्तस्माल्लक्ष्मणंसंदिशप्रेषय॥२१॥ रिपुनिधनंप्रतिकालविप्रकर्षः कालक्षेपोद्यकर्त्तुंयन्नयतोनक्षमः नयोग्यः तस्मात्त्वंरिपोर्वधायलक्ष्मणमतिसृजप्रेषय यथादिवज्र

तस्यैतेनिशितास्तीक्ष्णाःपत्रिपत्रांगवाजिनः॥ पतत्रिणइवासौम्याःशराःपास्यंतिशोणितं॥२०॥
तत्संदिशमहाबाहोलक्ष्मणंशुभलक्षणं॥ राक्षसस्यविनाशायवज्रंवज्रधरोयथा॥२१॥ मनु
जवरनकालविप्रकर्षोरिपुनिधनंप्रतियत्क्षमोद्यकर्त्तुं॥ त्वमतिसृजरिपोर्वधायवज्रंदि
विजरिपुमथनेयथामहेंद्रः॥२२॥ समाप्तकर्माहिसराक्षसर्षभोभवत्यदृश्यःसमरेसुरासुरैः
युयुत्सतातेनसमाप्तकर्मणा॥ भवेत्सुराणामपिसंशयोमहान्॥२३॥ इत्यार्षेश्रीरा० यु० चतु
राशीतितमःसर्गः॥८४॥ तस्यतद्वचनंश्रुत्वाराघवःशोककर्शितः॥ नोपधारयतेव्यक्तंयदुक्तं
तेनरक्षसा॥१॥ ततोधैर्यमवष्टभ्यरामःपरपुरंजयः॥ विभीषणमुपासीनमुवाचकपिसन्निधौ॥२॥

रिपुमथनेदेवरिपुमथनेऽमरेंद्रःवज्रमतिसृजतितथेत्यर्थः॥२२॥ कालक्षेपोनकार्यइत्यत्रहेतुमाह· समाप्तेतिसमाप्तयागकर्मेत्यर्थः सुराणामपिसंशयःप्राणसंशयइत्यर्थः॥२३॥ क०॥७७॥ इतिश्रीयुद्धकांडेचतुराशीतितमःसर्गः॥८४॥ नोपधारयतेव्यक्तं·शोकवशान्नजानातिस्मेत्यर्थः॥१॥ उपासीनं सहोपविष्टं॥४

अतःपरमेतावदेवकर्त्तव्यंकिमतीतार्थानुशोचनेनेत्याह तदद्येति कर्मणापौरुषेणाहमेवव्यपनेष्यामित
स्मान्मत्प्रोत्साहनार्थमुत्तिष्ठ ॥४२॥ ननुप्राकृतवद्दैन्यंयुक्तंमहात्मनस्तेइत्याह उत्तिष्ठेत्यादि महात्मानं

तदद्यविपुलंवीर दुःखमिदंजिताकृतं ॥ कर्मणाव्यपनेष्यामितस्मादुत्तिष्ठराघव ॥४२॥ उत्तिष्ठ
नरशार्दूलदीर्घबाहोधृतव्रत ॥ किमात्मानंमहात्मानंआत्मानंनावबुध्यसे ॥४३॥ अयमनघत
वोदितःप्रियार्थंजनकसुतानिधनंनिरीक्ष्यरुष्टः सरथगजहयांसराक्षसेंद्रांभृशमिषुभिर्वि
निपातयामिलंकां ॥४४॥ इत्यार्षेश्रीरामायणेयुद्धकांडेअशीतितमःसर्गः ॥८३॥ राममाश्वासमानेतु
लक्ष्मणेभ्रातृवत्सले ॥ निक्षिप्यगुल्मान्स्वस्थानेतत्रागच्छद्विभीषणः ॥१॥ नानाप्रहरणैर्वीरैश्चतु
र्भिरभिसंवृतः ॥ नीलांजनचयाकारैर्मातंगैरिवयूथपैः ॥२॥ सोभिगम्यमहात्मानंराघवंशो
कलालसं ॥ वानरांश्चापिददृशेवाष्पपर्याकुलेक्षणान् ॥३॥ राघवंचमहात्मानमिक्ष्वाकुकुलनं
दनं ॥ ददर्शमोहमापन्नंलक्ष्मणस्यांकमाश्रितं ॥४॥ व्रीडितंशोकसंतप्तंदृष्ट्वारामंविभीषणः
अंतर्दुःखेनदीनात्माकिमेतदितिसोब्रवीत् ॥५॥

परमात्मानं ॥४३॥ तवप्रियार्थमुदितउद्युक्तः
निरीक्ष्यश्रुत्वा ॥४४॥ क० ॥७६॥ इतिश्रीरामाभिरामेश्रीरामी० रा० ति० युद्ध० त्र्यशीतितमःसर्गः ॥८३
आश्वासयमानेगुल्मान्स्वस्थानेपूर्वादिनक्षद्वारेनिक्षिप्यावस्थाप्य ॥१॥२॥ ददृशेददर्श ॥३॥४॥५॥

पत्रिणांपात्ररूपैरंगैर्वाजिनोवेगवंतः तस्यलक्ष्मणस्यशरा ह्यसौम्याः पतत्रिणः कंकादयइवशोणितंपास्यं
तिइंद्रजितइतिशेषः॥२०॥तत्तस्माल्लक्ष्मणंसंदिशप्रेषय॥२१॥रिपुनिधनंप्रतिकालविप्रकर्षः काल
क्षेपोद्यकर्त्तुंयत्यतोनक्षमः नयोग्यः तस्मात्त्वंरिपोर्वधायलक्ष्मणमतिसृजप्रेषय यथादिवज

तस्यैतेनिशितास्तीक्ष्णाः पत्रिपत्रांगवाजिनः॥ पतत्रिणइवासौम्याः शराः पास्यंतिशोणितं॥२०॥
तत्संदिशमहाबाहोलक्ष्मणंशुभलक्षणं॥ राक्षसस्यविनाशायवज्रंवज्रधरोयथा॥२१॥मनु
जवरनकालविप्रकर्षोरिपुनिधनंप्रतियत्क्षमोद्यकर्त्तुं॥त्वमतिसृजरिपोर्वधायवज्रंदि
विजरिपुमथनेयथामहेंद्रः॥२२॥समाप्तकर्माहिसराक्षसर्षभोभवत्यदृश्यः समरेसुरासुरैः
युयुत्सतातेनसमाप्तकर्मणा॥भवेत्सुराणामपिसंशयोमहान्॥२३॥इत्यार्षेश्रीरा॰यु॰चतु
राशीतितमः सर्गः॥८४॥तस्यतद्वचनंश्रुत्वाराघवः शोककर्शितः॥नोपधारयतेव्यक्तंयदुक्तं
तेनरक्षसा॥१॥ततोधैर्यमवष्टभ्यरामः परपुरंजयः॥विभीषणमुपासीनमुवाचकपिसन्निधौ॥२॥

रिपुमथनेदेवरिपुमथनेऽमरेंद्रः वज्रमतिसृजतितथेत्यर्थः॥२२॥कालक्षेपोनकार्यइत्यत्रहेतुमा
ह समाप्तेति समाप्तयागकर्मेत्यर्थः सुराणामपिसंशयः प्राणसंशयइत्यर्थः॥२३॥क॰॥७७॥इतिश्रीयु
द्धकांडेचतुराशीतितमः सर्गः॥८४॥नोपधारयतेव्यक्तं शोकवशान्नजानातीत्यर्थः॥१॥उपासीनं

यस्मिन्समाप्तं॥२

कातर्हिवधविषयस्यानुभवस्यगतिस्तत्राह॰ वानरानिति मोहयित्वा॰ मायासीताच्छेदनेनेतिशेषः॥१३॥मोहनेप्रयोजनमाहचैत्यमिति॥१४॥ननुकरोतुहोमंकिंमोहनप्रयासेनेत्यत्राहविघ्नमिति॰ वानराणांपराक्रमेसतियागस्यविघ्नमन्विच्छताऽनुसरतासंभावयतानूनंनिश्चयेनतद्विघ्ननिवृत्तयेप्रयोजिता॥१५॥

वानरान्मोहयित्वातुप्रतियातःसराक्षसः॥मायामयींमहाबाहोतांविद्धिजनकात्मजां॥१३॥चैत्यंनिकुंभिलामद्यप्राप्यहोमंकरिष्यति॥हुतवानुपयातोहिदेवैरपिसवासवैः॥१४॥दुराधर्षोभवत्येषःसंग्रामेरावणात्मजः॥तेनमोहयतानूनमेषामायाप्रयोजिता॥विघ्नमन्विच्छतातत्र वानराणांपराक्रमे॥१५॥ससैन्यास्तत्रगच्छामोयावत्तन्नसमाप्यते॥त्यजैनंनरशार्दूलमिथ्यासंतापमागतं॥१६॥सीदतेहिबलंसर्वंदृष्ट्वात्वांशोककर्शितं॥इहत्वंस्वस्थहृदयस्तिष्ठसत्वसमुच्छ्रितः॥१७॥लक्ष्मणंप्रेषयास्माभिःसहसैन्यानुकर्षिभिः॥१८॥एषतंनरशार्दूलोरावणिंनिशितैःशरैः॥त्याजयिष्यतितत्कर्मततोवध्योभविष्यति॥१९॥

तेनाद्यतद्यागस्यविघ्नएवकर्तव्यइतिरहस्यमित्याह॰ ससैन्याइतितद्धोमकर्म॥१६॥हियतःत्वांशोककर्शितंदृष्ट्वासर्वंवानरबलंसीदतेसीदतितस्मात्वंस्वस्थहृदयोभूत्वाइहैवतिष्ठ॥१७॥सैन्यानुकर्षिभिःसर्वसेनाग्रहीत्वागच्छद्भिरस्माभिःप्रधानैःसहलक्ष्मणंप्रेषय॥१८॥एषरावणिंनिशितैःशरैर्व्याकुलीकृत्यतत्कर्मत्याजयिष्यतिततोहिनोर्मायासिध्यभावाद्वध्योभविष्यति
॥१९॥

सएषएवंप्रकारेणलब्धवरइंद्रजित्सैन्येनसहहोमंकर्त्तुंनिकुंभिलायांप्राप्तःसयदिकृतंकर्महोमक
र्मकृत्वोत्तिष्ठेच्चेत्सवनिवनोस्मान्हतान्विद्धि॥१३॥किंचभगवतातद्वधोप्येवंप्रकारेणकृतइत्याह·नि
कुंभिलामिति·निकुंभिलांतद्यागभूमिंमहाकालीचैत्रंतदाख्यन्यग्रोधमूलरूपमप्राप्तंअकृताग्निं

सएषकिलसैन्येनप्राप्तःकिलनिकुंभिलां॥यद्युत्तिष्ठेत्कृतंकर्महतान्सर्वांश्चविद्धिनः॥१३॥नि
कुंभिलामसंप्राप्तमकृताग्निंचयोरिपुः॥त्वामाततायिनंहन्यादिंद्रशत्रोसतेवधः॥१४॥वरोदत्तो
महाबाहोसर्वलोकेश्वरेणवै॥इत्येवंविहितोराजन्वधस्तस्यैषधीमतः॥१५॥वधायेंद्रजितोराम
संदिशस्वमहाबलं॥हतेतस्मिन्हतंविद्धिरावणंससुहृज्जनं॥१६॥विभीषणवचःश्रुत्वारामो
वाक्यमथाब्रवीत्॥जानामितस्यरौद्रस्यमायांसत्यपराक्रम॥१७॥सहिब्रह्मास्त्रवित्प्राज्ञोमहा
मायोमहाबलः करोत्यसंज्ञान्संग्रामेदेवान्सवरुणानपि॥१८॥तस्यांतरिक्षेचरतःसरथस्यमहा
यशः॥नगतिर्ज्ञायतेवीरसूर्यस्येवाभ्रसंप्लवे॥१९॥

अहुताभिचारहोमंअहुताग्निमितिपाठांतरं·।
आततायिनंगृहीतशस्त्रंयोरिपुर्हन्यात्·युध्येन्हेइंद्रशत्रोसरिपुस्तेवधः·वधकर्त्ताभविष्यति॥१४
सर्वलोकेश्वरेणब्रह्मणाएषवरोदत्तोवैप्रसिद्धः·राजन्धीमतस्तस्यैवमेषवधोविहितोब्रह्मणा॥१५
१६॥१७॥१८॥हेमहायशः·अंतरिक्षेचरतःसरथस्यस्यतस्यगतिर्नज्ञायते·अभ्रसंप्लवेमेघसमूहे॥१९

नेत्वयायत्प्रागुक्तंतद्भूयःश्रोतुमिच्छामि॥३॥यदुक्तंतदेवेदंवाक्यंपुनर्बभाषे॥४॥५॥६॥७॥मिथ्यासंतापंतन्म
त्तंशोकं॥८॥९॥१०॥११॥तेनवीरेणोग्रजितातपसाप्रीतस्यस्वयंभुवोवरदानान्निकुंभिलायांदेवीहोमे

नैर्ऋताधिपतेर्वाक्यंयदुक्तंतेविभीषण॥भूयस्तच्छ्रोतुमिच्छामिब्रूहियत्तेविवक्षितं॥३॥राघव
स्यवचःश्रुत्वावाक्यंवाक्यविशारदः॥यत्तत्पुनरिदंवाक्यंबभाषेथविभीषणः॥४॥यथाज्ञप्तंमहाबा
होत्वयागुल्मनिवेशनं॥तत्तथानुष्ठितंवीरत्वद्वाक्यसमनंतरं॥५॥तान्यनीकानिसर्वाणिवि
भक्तानिसमंततः॥विन्यस्तायूथपाश्चैवयथान्यायंविभागशः॥६॥भूयस्तुममविज्ञाप्यंत
च्छृणुष्वमहाप्रभो॥त्वय्यकारणसंतप्तेसंतप्तहृदयावयं॥७॥त्यजराजन्निमंशोकंमिथ्या
संतापमागतं॥यदियंत्यज्यतांचिंताशत्रुहर्षविवर्द्धनी॥८॥उद्यमःक्रियतांवीरहर्षःस
मुपसेव्यतां॥प्राप्तव्यायदितेसीताहंतव्याश्चनिशाचराः॥९॥रघुनंदनवक्ष्यामिश्रूयतांमे
हितंवचः॥साध्वयंयातुसौमित्रिर्बलेनमहतावृतः॥१०॥निकुंभिलायांसंप्राप्तंहंतुं।
रावणिमाहवे॥धनुर्मंडलनिर्मुक्तैराशीविषविषोपमैः॥११॥तेनवीरेणतपसावर।
दानात्स्वयंभुवः॥अस्त्रंब्रह्मशिरःप्राप्तंकामगाश्चतुरंगमाः॥१२॥

समाप्तेकामगतुरंगयुक्तो
रथोब्रह्मशिरोस्त्रंचाग्नेःसकाशाल्लप्स्यतेतेनचतत्रावध्यत्वंसकर्मयोगपर्यंतमितिवरदानाद्ब्रह्म

२९।।३०। त्वरितंययौलक्ष्मणामनुययावित्यर्थः।।३१।।पथिविष्ठितं।हनूमतासीतावधवृत्तांतनिवेदनार्थ
मागमनसमयेद्वाररक्षार्थंपथिस्थापितमित्यर्थः।।३२।।३३।।मायायोगंमाययैवयोगयुद्धजयोपायो
यस्यतमिंद्रजितंप्राप्यब्रह्मविधानेननिकुंभिलामसंप्राप्तइत्याद्युक्तब्रह्मवरदानप्रकारेणतंवि

सोभिवाद्यगुरोःपादौकृत्वाचापिप्रदक्षिणं।निकुंभिलामभिययौचैत्यंरावणपालितं।२९।।विभी
षणेनसहितोराजपुत्रःप्रतापवान्।कृतस्वस्त्ययनोभ्रात्रालक्ष्मणस्त्वरितोययौ।।३०।।वान
राणांसहस्रैस्तुहनूमान्बहुभिर्वृतः।।विभीषणश्चसामात्योलक्ष्मणंत्वरितंययौ।।३१।।मह
ताहरिसैन्येनसवेगमभिसंवृतः।।ऋक्षराजबलंचैवददर्शपथिविष्ठितं।।३२।।सगत्वादूर
मध्वानंसौमित्रिर्मित्रनंदनः।।राक्षसेंद्रबलंदूरादपश्यद्व्यूहमाश्रितं।।३३।।ससंप्राप्यधनुःपा
णिर्मायायोगमरिंदमः।।तस्थौब्रह्मविधानेनविजेतुंरघुनंदनः।।३४।।विभीषणेनसहि
तोराजपुत्रःप्रतापवान्।।अंगदेनचवीरेणतथानिलसुतेनच।।३५।।

जेतुंतस्थौरघुनंदनोल
क्ष्मणः।ब्रह्मविमानेनेतिपाठेब्रह्मणोभगवतस्तेजोंशोहमस्मीतिविशिष्यजायमानेनध्याने
नशत्रुंजेतुंतस्थौसंकटकालेतादृशध्यानस्यतस्यनिसर्गसिद्धत्वादितिकतकः।।३४।।सल
क्ष्मणोविभीषणादिभिःसहोच्यमानगुणांद्विषतांबलंविवेश।प्रतिभयनममतिशयेनभयंकरं।।३५।।

२०।२१।२२ मायानामभिज्ञातस्यतद्विषयज्ञातवतः अभिज्ञस्तस्येति पाठेप्ययमेवार्थः॥२३॥ अन्यत्कार्मुकश्रेष्ठं
देवतानुग्रहप्राप्तंपरमित्यर्थः॥२४॥ सशरीप्रशस्तशरवान् चामचापभृत् वामहस्तेनचापभृत्॥२५॥ रा

राघवस्तुरिपोर्ज्ञात्वामायावीर्यंदुरात्मनः॥ लक्ष्मणंकीर्त्तिसंपन्नंइदंवचनमब्रवीत्॥२०॥ यद्वा
नरेंद्रस्यबलंतेनसर्वेणसंवृतः॥ हनूमत्प्रमुखैश्चैवयूथपैःसहलक्ष्मण॥२१॥ जांबवेनर्क्षप
तिनासहसैन्येनसंवृतः॥ जहितंराक्षससुतंमायाबलसमन्वितं॥२२॥ अयंत्वांसचिवैःसार्द्धं
महात्मारजनीचरः॥ अभिज्ञातस्यमायानांपृष्ठतोनुगमिष्यति॥२३॥ राघवस्यवचःश्रुत्वाल
क्ष्मणःसविभीषणः॥ जग्राहकार्मुकश्रेष्ठमन्यद्भीमपराक्रमः॥२४॥ सन्नद्धःकवचीखड्गीसश
रीवामचापभृत्॥ रामपादावुपस्पृश्यहृष्टःसौमित्रिरब्रवीत्॥२५॥ अद्यमत्कार्मुकोन्मुक्ताःशरा
निर्भिद्यरावणिं॥ लंकामभिपतिष्यंतिहंसाःपुष्करिणीमिव॥२६॥ अद्यैवतस्यरौद्रस्यशरीरंमाम
काःशराः॥ विधमिष्यंतिभित्वातंमहाचापगुणच्युताः॥२७॥ एवमुक्त्वातुवचनंद्युतिमान्भ्रातुर
ग्रतः॥ सरावणिवधाकांक्षीलक्ष्मणस्त्वरितंययौ॥२८॥

वणिंनिर्भिद्यासक्ताःसंतोलंकामभिप
तिष्यंति॥२६॥२७॥ एवमुक्त्वात्विति। सएवमुक्त्वेतिपाठेसलक्ष्मणःसएवलक्ष्मणस्त्वरितंय
यावितिनच्छन्दद्वयनिर्वाहकइतिंतार्थः॥२८॥ ॥ ॥ ॥

९॥१०॥तेशस्त्राणिनिवेशयंतोविकृताननबाहवःसंतःसुमहद्भयंचक्रुःराक्षसावानरेंद्रेष्वितिपाठः
११॥१२॥१३॥विषण्णंश्रुत्वायागभूमिस्थमितिशेषःअननुष्ठितेयागस्थानात्प्राग्न्याआसमाप्तेःस

ससंप्रहारस्तुमुलःसंजज्ञेकपिरक्षसां॥शब्देनमहतालंकांनादयन्वैसमंततः॥९॥शस्त्रैश्च
विविधाकारैःशितैर्बाणैश्चपादपैः॥उद्यतैर्गिरिशृंगैश्चघोरैराकाशमावृतं॥१०॥राक्षसावा
नरेंद्रेषुविकृताननबाहवः॥निवेशयंतःशस्त्राणिचक्रुस्तेसुमहद्भयं॥११॥तथैवसकलैर्वृ
क्षैर्गिरिशृंगैश्चवानराः॥अभिजघ्नुर्निजघ्नुश्चसमरेसर्वराक्षसान्॥१२॥ऋक्षवानरमु
ख्यैश्चमहाकायैर्महाबलैः॥रक्षसांयुध्यमानानांमहद्भयमजायत॥१३॥स्वमनीकंविषण्णं
तुश्रुत्वाशत्रुभिरर्दितं॥उदतिष्ठतदुर्द्धर्षःसकर्मण्यननुष्ठिते॥१४॥वृक्षांधकारान्निर्गम्यजा
तक्रोधःसरावणिः॥आरुरोहरथंसज्जंपूर्वयुक्तंसुसंयतं॥१५॥सभीमकार्मुकशरःकृष्णा
जनचयोपमः॥रक्तास्यनयनोभीमोबभौमृत्युरिवांतकः॥१६॥दृष्ट्वैवतुरथस्थंतंपर्यवर्त्तत
तद्बलं॥रक्षसांभीमवेगानांलक्ष्मणेनयुयुत्सतां॥१७॥तस्मिंस्तुकालेहनुमानरुजत्सदुरासदं
धरणीधरसंकाशोमहावृक्षमरिंदमः॥१८॥

कर्मणीतिपाठेक्षराधिक्यमार्षं॥१४॥वृक्षांधकारान्
निकुंभिलाचैत्रियान्‌ःदूरंनिःसरणंदरणंदशम्यांसायान्हे॥१५॥१६॥पर्यवर्त्ततद्बलंराक्षसबलमित्यर्थः॥१७॥१

३६॥ क० ७५॥ इति श्रीरामाभिरामे श्रीरा० रा० ति० यु० पंचाशीतितमः सर्गः॥ ८५॥ अथ तस्यामवस्थायां र
क्षार्थसेनां निवेश्येंद्रजितो यागकाले। परेषां शत्रूणां अहितं नाशकं रस्वेषामर्थसाधकं॥ १॥ एतत्कपि

विविधममलशस्त्रभास्वरं तत्ध्वजगहनं गहनं महारथैश्च॥ प्रतिभयतममप्रमेयवेगं
तिमिरमिव द्विषतां बलं विवेश॥ ३६॥ इत्यार्षे श्रीरा० यु० पंचाशीतितमः सर्गः॥ ८५॥ अथ त
स्यामवस्थायां लक्ष्मणं रावणानुजः॥ परेषामहितं वाक्यमर्थसाधकमब्रवीत्॥ १॥ यदेतद्राक्ष
सानीकं मेघश्यामं विलोक्यते॥ एतदायोध्यतां शीघ्रं कपिभिश्च शिलायुधैः॥ २॥ तस्यानीकस्य
महतो भेदने यत लक्ष्मण॥ राक्षसेंद्रसुतोप्यत्र भिन्ने दृश्यो भविष्यति॥ ३॥ स त्वमिंद्राशनिप्रख्यैः
शरैरवकिरन्परान्॥ अभिद्रवाशु यावद्वै नैतत्कर्म समाप्यते॥ ४॥ जहि वीर दुरात्मानं माया
परमधार्मिकं॥ रावणिं क्रूरकर्माणं सर्वलोकभयावहं॥ ५॥ विभीषणवचः श्रुत्वा लक्ष्मणः
शुभलक्षणः॥ ववर्ष शरवर्षेण राक्षसेंद्रसुतं प्रति॥ ६॥ ऋक्षाः शाखामृगाश्चैव द्रुमप्रवरयोधि
नः॥ अभ्यधावंत सहितास्तदनीकमवस्थितं॥ ७॥ राक्षसाश्च शितैर्बाणैरसिभिः शक्तितोमरैः।
अभ्यवर्त्तंत समरे कपिसैन्यजिघांसवः॥ ८॥

भिरायोध्यतां॥ २॥ हे लक्ष्मण तस्य तत्र परस्थितस्य महतो
नीकस्य भेदने त्वं यतन यत्नं कुरु॥ ३॥ एतत्कर्म होमकर्म यावन्न समाप्यते तावदाश्वभिद्रव रावणिमि
त्यन्वयः॥ ४॥ मायापरं अधार्मिकमिति च्छेदः॥ ५॥ राक्षसेंद्रसुतं प्रति तत्प्राप्तिमुद्दिश्य तत्सेनायां ववर्षेत्यर्थः॥ ६॥

३०॥यदिद्वंद्वंददासिइतिशेषःतर्हिबाहुभ्यांयुध्यस्व॥३१॥हनूमंतंजिघांसंतंतद्वधेसर्वात्मनासन्नद्धं
३२॥योवासवजेतायस्यदर्शनंतवापेक्षितंसएषरथमास्थायहनूमंतंजिघांसति॥३३॥तमिमंराव

युध्यस्वयुधिशूरोसिरावणात्मजदुर्मते।वायुपुत्रंसमासाद्यनजीवन्प्रतियास्यसि॥३०॥
बाहुभ्यांसंप्रयुध्यस्वयदिमेद्वंद्वमाहवे॥वेगंसहस्वदुर्बुद्धेततस्त्वंरक्षसांवरः॥३१॥हनूमं
तंजिघांसंतंसमुद्यतशरासनं॥रावणात्मजमाचष्टेलक्ष्मणायविभीषणः॥३२॥यःसवासव
निर्जेतारावणस्यात्मसंभवः॥सएषरथमास्थायहनूमंतंजिघांसति॥३३॥तमप्रतिमसं
स्थानैःशरैःशत्रुनिवारणैः॥जीवितांतकरैर्घोरैःसौमित्रेरावणिंजहि॥३४॥इत्येवमुक्त
स्तदामहात्माविभीषणेनारिविभीषणेन॥ददर्शतंपर्वतसन्निकाशंरथस्थितंभीम
बलंदुरासदं॥३५॥इत्यार्षेश्रीरामायणेयुद्धकांडेषडशीतितमःसर्गः॥८६॥एवमुक्त्वातुसौमि
त्रिंजातहर्षोविभीषणः॥धनुःपाणिनमादायत्वरमाणोजगामसः॥१॥

णंहर्षंअप्रतिसंस्थानै
रनुपमस्वरूपैशरैर्जहि॥३४॥३५॥कु०॥७६॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्ध
कांडेषडशीतितमःसर्गः॥८६॥एवमितिजातहर्षःयागासमाप्त्याब्रह्मवचनादवश्यंमरिष्यती
तिसंतुष्टःधनुःपाणिंतंलक्ष्मणमादायजगामेंद्रजित्संमुखेइतिशेषः॥१॥ ॥

राक्षसानांतत्सैन्यंसहनूमान्निःसंज्ञंचकार॥१९॥२०॥असिपाणयोसिभिःशक्तिहस्ताःशक्तीभिरित्यादिप्र

सराक्षसानांतत्सैन्यंकालाग्निरिवनिर्दहन्॥ चकारबहुभिर्दत्तैःनिःसंज्ञंयुधिवानरः॥१९॥ वि
ध्वंसयंतंतरसादृष्ट्वैवपवनात्मजं॥राक्षसानांसहस्राणिहनूमंतमवाकिरन्॥२०॥शितशूल
धराःशूलैरसिभिश्चासिपाणयः॥शक्तिहस्ताश्चशक्तीभिःपट्टिशैःपट्टिशायुधाः॥२१॥परिघै
श्चगदाभिश्चकुंतैश्चशुभदर्शनैः॥शतशश्चशतघ्नीभिरायसैरपिमुद्गरैः॥२२॥घोरैःपरशु
भिश्चैवभिंदिपालैश्चराक्षसाः॥मुष्टिभिर्वज्रकल्पैश्चतलैरशनिसन्निभैः॥२३॥अभिजघ्नुः
समासाद्यसमंतात्पर्वतोपमं॥तेषामपिचसंक्रुद्धश्चकारकदनंमहत्॥२४॥सददर्शकपि
श्रेष्ठमचलोपममिंद्रजित्॥सूदमानमसंत्रस्तममित्रान्पवनात्मजं॥२५॥ससारथिमुवा
चेदंयाहियत्रैषवानरः॥क्षयमेवहिनःकुर्याद्राक्षसानामुपेक्षितः॥२६॥इत्युक्तःसारथिस्ते
नययौयत्रसमारुतिः॥वहन्परमदुर्द्धर्षंस्थितमिंद्रजितंरथे॥२७॥सोभ्युपेत्यशरान्खड्
गान्पट्टिशासिपरश्वधान्॥अभ्यवर्षतदुर्द्धर्षःकपिमूर्द्धनिराक्षसः॥२८॥तानिशस्त्राणिघो
राणिप्रतिगृह्यसमारुतिः॥रोषेणमहताविष्टोवाक्यंचेदमुवाचह॥२९॥ [illegible]

कारेणोत्यंशक्तीभिरित्यत्रदीर्घमार्षं॥२१॥२२॥२३॥२४॥२५॥नोराक्षसानांमत्संबंधिनांराक्षसानां॥२६॥इ

इजितवह्नपापयनः यत्नमाकृतिस्मेतनाप्य
माणिग्यत्रो॥२७॥२८॥२९॥

नज्ञातिःनज्ञात्यभिमानःप्रमाणंकर्त्तव्याकर्त्तव्यमर्यादाकारणंसौदर्यं·सोदरत्वं॥१२॥१३॥शिथिलया·का
र्याकार्यविवेकासमर्थयाबुध्याएतन्महदंतरं·स्वजनत्यागपरजनाश्रयणाजनितदोषतारतम्यंनवे
त्सितदेवदार्ढ्यायपुनरहि·क्वचेतिस्वजनसंवासःनत्साध्यश्रेयःप्राप्तिरित्यर्थःजन्मकर्मादिनायः
परस्तदाश्रयप्राप्यनीचत्वंनीचपराश्रयःमयूरव्यंसकादित्वात्समासः॥१४॥सत्यमेवंयदिपरोनीचः॥

नज्ञातित्वंनसौहार्दंनजातिस्तवदुर्मते॥प्रमाणंनचसौदर्यंनधर्मोधर्मदूषण॥१२॥शोच्यस्त्वम
सिदुर्बुद्धेनिंदनीयश्चसाधुभिः॥यस्त्वंस्वजनमुत्सृज्यपरभृत्यत्वमागतः॥१३॥नैतच्छिथिलया
बुध्यात्वंवेत्सिमहदंतरं॥क्वचस्वजनसंवासःक्वचनीचपराश्रयः॥१४॥गुणवान्वापरजनःस्व
जनोनिर्गुणोपिवा॥निर्गुणःस्वजनःश्रेयान्यःपरःपरएवसः॥१५॥यःस्वपक्षंपरित्यज्यपरपक्षं
निषेवते॥सस्वपक्षेक्षयंयातेपश्चात्तैरेवहन्यते॥१६॥निरनुक्रोशताचेयंयादृशीतेनिशाचर
स्वजनेनत्वयाशक्यंपौरुषंरावणानुज॥१७॥

स्यात्तत्राहगुणवान्चेत्तियःपरःपरएवसइतिस्वकुल
प्रयुक्तव्यवहारेप्राप्तेपरोनंतर्भृतएवभवतीत्यर्थः॥१५॥किंचपरपक्षाश्रितस्यांतेनाशएवेत्याहयइति
१६॥इयंनिरनुक्रोशताहोमविघातपर्वंलक्ष्मणस्यन्यग्रोधप्रवेशकरणेनमद्वधविषयानिर्दयता
यादृशीअतिघोरातेनवास्तितद्विषयंपौरुषंपुरुषयत्नःस्वजनेनैकेनत्वयैवकर्त्तुंशक्यंनान्येनकेनापि॥१

अविदूरमल्पमार्गंगत्वामहद्वनंनिकुंभिलावनंप्रविश्यतत्रत्वं·तत्कर्महोमकर्मस्थानं॥२॥३॥भूतानांरजस्त
मःप्रधानभूतगणानांउपहारमुपहृत्यदत्वा॥४॥५॥न्यग्रोधमप्रविष्टंवह्निर्युद्धायनिर्गतंपुनस्तत्राप्रवि

अविदूरंततोगत्वाप्रविश्यतुमहद्वनं॥अदर्शयततत्कर्मलक्ष्मणायविभीषणः॥२॥नीलजीमूतसं
का[illegible]ःशंन्यग्रोधंभीमदर्शनं॥तेजस्वीरावणभ्रातालक्ष्मणायन्यवेदयत्॥३॥हु
होपहारंभूतानांवलवान्रावणात्मजः॥उपहृत्यततःपश्चात्संग्राममभिवर्त्तते॥४॥अदृश्यःसर्वभू
तानांततोभवतिराक्षसः॥निहंतिसमरेशत्रून्वध्नातिचशरोत्तमैः॥५॥तमप्रविष्टंन्यग्रोधंबलि
नंरावणात्मजं॥विध्वंसयशरैर्दीप्तैःसरथंसाश्वसारथिं॥६॥तथेत्युक्त्वामहातेजासौमित्रिर्मित्रनंद
नः॥बभूवावस्थितस्तत्रचित्रंविस्फारयन्धनुः॥७॥सरथेनाग्निवर्णेनवलवान्रावणात्मजः॥इंद्रजि
त्कवचीखड्गीसध्वजःप्रत्यदृश्यत॥८॥तमुवाचमहातेजाःपौलस्त्यमपराजितं॥समाहूयेत्वांसमरेस
कृ म्यग्युद्धंप्रयच्छमे॥९॥एवमुक्तोमहातेजामनस्वीरावणात्मजः॥अब्रवीत्परुषंवाक्यंतत्रदृष्ट्वाविभीष-
णं॥१०॥इहत्वंजातसंवृद्धःसाक्षाद्भ्रातापितुर्मम॥कथंद्रुह्यसिपुत्रस्यपितृव्योममराक्षसः॥११॥

त्वमेवजहि
तथैवतस्यवरदानादिति॥६॥तत्रन्यग्रोधद्वारे॥७॥प्रत्यदृश्यतलक्ष्मणोधनुःशब्दंकृत्वातत्रप्रतिनिवर्त्तइति
भावः॥८॥महातेजाःलक्ष्मणः॥९॥१०॥इहराक्षसीयास्मत्कुलेजातः॥संवृद्धश्चेतिस्नातानुलिप्तवत्समानःस

पुत्रस्यपुत्राय॥११॥

स्वकुलनाशंकृतंत्वयेत्यस्योत्तरमाहपरस्वानामिति·सुहृदामतिशंका·अनिष्टत्वशंका॥एवंचभवदी
याधर्माएवभवन्नाशकोनत्वहमितिभावः॥२३॥पुनःस्पष्टमेवरावणीयाद्दोषाद्भवतांसर्वेषांनाशइत्या
ह·महर्षीणामिति·अभिमानोगर्वःवैरत्वंदीर्घवैरंप्रतिकूलताहितवक्तृत्वेषुप्रतिकूलबुद्धिता॥२४

परस्वानांचहरणंपरदाराभिमर्शनं॥सुहृदामतिशंकाचत्रयोदोषाःक्षयावहाः॥२३॥महर्षीणां
वधोघोरःसर्वदेवैश्चविग्रहः॥अभिमानश्चरोषश्चवैरत्वंप्रतिकुलता॥२४॥एतेदोषाममभ्रातु
र्जीवितैश्वर्यनाशनाः॥गुणान्प्रच्छादयामासुःपर्वतानिवतोयदाः॥२५॥दोषैरेतैःपरित्यक्तो
मयाभ्रातापितातव॥नेयमस्तिपुरीलंकानचत्वंनचतेपिता॥२६॥अतिमानश्चबालश्चदुर्वि
नीतश्चराक्षस॥बद्धस्त्वंकालपाशेनब्रूहिमांयद्यदिच्छसि॥२७॥अद्येहव्यसनंप्राप्तंयन्मां
परुषमुक्तवान्॥प्रवेष्टुंनत्वयाशक्योन्यग्रोधंराक्षसाधम॥२८॥ श्र ॥

गुणान्अभिजनविद्याबलवत्त्वादिगुणान्॥२५॥नेयमस्तीति·इदंमयापुरैवोक्तमितिशेषः॥२६॥य
द्यत्पुरुषमित्यर्थः॥२७॥यन्मांपरुषमुक्तवान्त्वंपुरातस्मात्तेऽद्यव्यसनंप्राप्तंसंप्रत्युच्यमानंपा
रुष्यफलंतुकालांतरेभविष्यतीतिशेषःव्यसनंप्राप्तमित्येतदेवद्रढयतिप्रवेष्टुमितिपुनरभि
चारायेतिशेषः॥२८॥

मच्छीलं मत्स्वभावं जानन्नपि अजानन्निवा किं विकत्थसे ॥१८॥ अतोऽसाधो गौरवात् पितृव्यत्वगौरवमाश्रित्य
मद्विषयं पारुषं त्यज। यद्वाम्रोरोहमिति गौरवाद्धेतोर्यत्पारुष्यं त्यज्य। अथ त्वं जातसंवृद्ध इत्यस्योत्तरमाह
कुल इति। प्रथमो गुणः सत्त्वं अराक्षसं रजस्तमः प्रकृति रक्षः कुल दुर्लभं ॥१९॥ किं च स्वजनत्यागदोषस्त

इत्युक्तो भ्रातृपुत्रेण प्रत्युवाच विभीषणः॥ अजानन्निव मच्छीलं किं राक्षस विकत्थसे ॥१८॥ राक्षसें
द्रसुतासाधो पारुष्यं त्यज गौरवात्॥ कुले यद्यप्यहं जातो रक्षसां क्रूरकर्मणां ॥१९॥ गुणो यः प्रथमो
नृणां तन्मे शीलमराक्षसं ॥१९॥ न रमे दारुणेनाहं न चाधर्मेण वै रमे॥ भ्रात्रा विषमशीलोपि क-
थं भ्राता निरस्यते ॥२०॥ धर्मात्प्रच्युतशीलं हि पुरुषं पापनिश्चयं॥ त्यक्त्वा सुखमवाप्नोति हस्ता
दाशीविषं यथा ॥२१॥ परस्वहरणे युक्तं परदाराभिमर्षकं॥ त्याज्यमाहुर्दुरात्मानं वेश्म प्रज्वलितं
यथा ॥२२॥

व पितुरेवेत्याह। भ्रात्रेति। विषमशीलोपि भ्राता कथं निरस्यते एवमास्ति चान्लोके वदेति शेषः भ्रात्रा विष-
यशीलेनेति पाठे दारुणकर्माधर्मारतिरहं अन्यथा विषमशीलेन रावणादिलक्षणशीलेना भ्रात्रा
कथं भ्राता रावणो निरस्यत इत्यर्थे च तीर्थ आह ॥२०॥ ननु दुःशीलस्त्यज्यत एवेति चेद्भवतु सुशीलस्य
ममत्यागोनुचित एवेत्याशयेनाह। धर्मादिति ॥२१॥ मयातु तस्यत्यागो न्याय्य एवेत्याह। परस्वेति ॥२२

उवाचेत्यादिनाऽब्रवीत्परुषं वाक्यमिति प्रागुक्तस्यैव विवरणं· तांश्च वानरशार्दूलान् उवाचेत्यनुकर्षः॥५॥ मुक्तवर्षमेघोत्सृष्टं वर्षं॥६॥७॥८॥९॥ सपुरःसरौ सुग्रीवादिप्रधानसहितौ युवां भ्रातराविति शेषः॥१०॥ एवमपिय

हनूमत्पृष्ठमारूढमुदयस्थं रविप्रभं। उवाचैनं सुसंरब्धः सौमित्रिं सविभीषणं॥५॥ तांश्च वानरशार्दूलान् पश्यध्वं मे पराक्रमं। अद्य मत्कार्मुकोत्सृष्टं शरवर्षं दुरासदं॥६॥ मुक्तवर्षमिवाकाशे धारयिष्यथ संयुगे॥६॥ अद्य वो मामका बाणा महाकार्मुकनिःसृताः। विधमिष्यन्ति गात्राणि तूलराशिमिवानलः॥७॥ तीक्ष्णसायकनिर्भिन्नान् शूलशक्त्यृष्टिसायकैः। अद्य वो गमयिष्यामि सर्वानेव यमक्षयं॥८॥ सृजतः शरवर्षाणि क्षिप्रहस्तस्य संयुगे। जीमूतस्येव नदतः कः स्थास्यति ममाग्रतः॥९॥ रात्रियुद्धे तदा पूर्वं वज्राशनिसमैः शरैः। शायितौ स्थो मया भूमौ विसंज्ञौ सपुरःसरौ॥१०॥ स्मृतिर्न्न तेस्ति वा मन्ये व्यक्तं यातो यमक्षयं। आशीविषसमं क्रुद्धं यन्मां योद्धुमुपस्थितः॥११॥ तच्छ्रुत्वा राक्षसेन्द्रस्य गर्जितं राघवस्तदा। अभीतवदनः क्रुद्धो रावणिं वाक्यमब्रवीत्॥१२॥

यन्मां योद्धुमुपस्थितोसि तन्मायः पूर्वस्य ते स्मृतिर्नास्ति वाऽथवा व्यक्तं यातो यमक्षयं आदिकर्मणि क्तः यमक्षयं यमगृहं प्रयातुमुपक्रान्तोसि॥११॥ अभीतवदनः निर्भयप्रवृत्ताभिवदनव्यवहारः॥१२॥ राम श्र श्र

अत्रहतोयमद्यत्वंयमगृहंगतःसन्देवताकार्यंसर्वंदिवानांसंतोषरूपंकरिष्यसि॥२९॥३०॥क०॥८०॥
इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेसप्ताशीतितमःसर्गः॥८७॥ अब्रवीत्पर

धर्षयित्वाचकाकुत्स्थंनशक्यंजीवितुंत्वया॥युध्यस्वनरदेवेनलक्ष्मणेनरणेसह॥हतस्त्वंदे
वताकार्यंकरिष्यसियमक्षयं॥२७॥निदर्शयित्वात्मबलंसमुद्यतंकुरुष्वसर्वायुधसायकव्य
यं॥नलक्ष्मणस्यैत्यहिबाणगोचरंत्वमद्यजीवन्सबलोगमिष्यसि॥२८॥इत्यार्षेश्रीरामायणेयु
द्धकांडेसप्ताशीतितमःसर्गः॥८७॥ विभीषणवचःश्रुत्वारावणिःक्रोधमूर्छितः॥अब्रवीत्प
रुषंवाक्यंक्रोधेनाभ्युत्पपातच॥१॥उद्यतायुधनिस्त्रिंशोरथेसुसमलंकृते॥कालाश्वयुक्तेमह
तिस्थितःकालांतकोपमः॥२॥महाप्रमाणमुद्यम्यविपुलंवेगवद्दृढं॥धनुर्भीमबलोभीमंश
रांश्चामित्रनाशनान्॥३॥तंददर्शमहेष्वासोरथस्थःसमलंकृतः॥अलंकृतममित्रघ्नोराव
णस्यात्मजोबली॥४॥

षमितिःविभीषणमितिशेषःतच्चवक्ष्यमाणं॥१॥उद्यतायुधनिस्त्रींशःउद्यतायुधोनिस्त्रिंशोनिर्घृण
श्चेत्यर्थइतिकतकःउद्यतान्यायुधानिनिस्त्रिंशश्चयेनसःगोबलीवर्दवत्प्रयोगःइत्यन्ये॥२॥३॥तं
सविभीषणंलक्ष्मणंअलंकृतंस्वतेजोभूषितं॥४॥

रा॰मा॰यु॰
२६९

२०॥२२॥२३॥२४॥त्वामद्येतिइत्यपनीत्यनुकर्षः॥२५॥२६॥क्रूरकर्मन्कूटयुद्धव्यापारकर्त्तः एतद्वृथावचनंकस्मा

इंद्रजित्वात्मनःकर्मप्रसमीक्ष्याभिगम्यच॥विनद्यसुमहानादमिदंवचनमब्रवीत्॥२१॥पत्रिणःशि
तधारास्तेशरामत्कार्मुकच्युताः॥आदास्यंतेद्यसौमित्रेजीवितंजीवितांतकाः॥२२॥अद्यगोमा
युसंघाश्चश्येनसंघाश्चलक्ष्मण॥गृध्राश्चनिपतंतुत्वांगतासुंनिहतंमया॥२३॥क्षत्रबंधुंसदाना
र्यंरामःपरमदुर्मतिः॥भक्तंभ्रातरमद्यैवत्वांद्रक्ष्यतिनिहतंमया॥२४॥विस्रस्तकवचंभूमौव्यपवि
द्धशरासनं॥हृतोत्तमांगंसौमित्रेत्वामद्यनिहतंमया॥२५॥इतिब्रुवाणंसंक्रुद्धःपरुषंरावणात्म
जं॥हेतुमद्वाक्यमर्थज्ञोलक्ष्मणःप्रत्युवाचह॥२६॥वाग्बलंत्यजदुर्बुद्धेक्रूरकर्मन्हिराक्षस॥
अथकस्माद्वदस्येतत्संपादयसुकर्मणा॥२७॥अकृत्वाकत्थसेकर्मकिमर्थमिहराक्षस॥
कुरुतत्कर्मयेनाहंश्रद्दध्यांतवकत्थनं॥२८॥अनुक्त्वापरुषंवाक्यंकिंचिदप्यनवक्षिपन्॥अवि
कत्थन्वधिष्यामित्वांपश्यपुरुषादन॥२९॥इत्युक्त्वापंचनाराचानाकर्णापूरितान्शरान्॥वि
जघानमहावेगान्लक्ष्मणोराक्षसोरसि॥३०॥सुपत्रवाजितावाणाज्वलिताइवपन्नगाः॥नैर्ऋ
तोरस्यभासंतसवितूरश्मयोयथा॥३१॥

द्वदसिसर्वंसुकर्मणैवसंपादय॥२७॥२८॥अनवक्षि
पन्ईषदपिनिंदामकुर्वन्॥अविकत्थन्स्वश्लाघामकुर्वन्॥२९॥३०॥सुपत्रवाजिताःसुपत्रैःकंकादिपत्रैः
संजातवेगाः॥३१॥

राम॰
२६९

चयस्मात्त्वयाकार्याणांशत्रुवधादिकार्याणांपारोंतःसमाप्तिरुक्तःवाचाजल्पितःसपारस्त्वयाकर्मणा
दुर्गमणवदुःप्रापएवकुतस्तत्राह·कार्याणामिति·यःकार्याणांपारंकर्मणागच्छतिसबुद्धिमान्॥१३॥स
त्वंहीनार्थःक्रियाकार्यनिष्पादनासमर्थःकेनचिदपिदुरवापस्यमद्विजयरूपस्यार्थस्यासिद्धिं·वाचा

उक्तश्चदुर्गमःपारःकार्याणांराक्षसत्वया॥कार्याणांकर्मणापारंयोगच्छतिसबुद्धिमान्॥१३॥
सत्वमर्थस्यहीनार्थोदुरवापस्यकेनचित्॥वाचाव्याहृत्यजानीषेकृतार्थोस्मीतिदुर्मते॥१४॥अंत
र्धानगतेनाजौयत्त्वयाचरितस्तदा॥तस्कराचरितोमार्गोनैषवीरनिषेवितः॥१५॥यथाबाणपथं
प्राप्यस्थितोस्मितवराक्षस॥दर्शयस्वाद्यतत्तेजोवाचात्वंकिंविकत्थसे॥१६॥एवमुक्तोधनुर्भीमंप
रामृश्यमहाबलः॥ससर्जनिशितान्बाणानिंद्रजित्समितिंजयः॥१७॥तेनसृष्टामहावेगाःशराः
सर्पविषोपमाः॥संप्राप्यलक्ष्मणंपेतुःश्वसंतइवपन्नगाः॥१८॥शरैरतिमहावेगैर्वेगवान्राव
णात्मजः॥सौमित्रिमिंद्रजिद्युद्धेविव्याधशुभलक्षणं॥१९॥सशरैरतिविद्धांगोरुधिरेणसमु
क्षितः॥शुशुभेलक्ष्मणःश्रीमान्विधूमइवपावकः॥२०॥

व्याहृत्यदुर्मतिकृतार्थोस्मीतिजानीषे॥१४॥अथशा
यितावितियत्त्वयोक्तंसानेपकीर्तिरेवेत्याह·अंतरिति·आजौरणेंतर्धानगतेनत्वयायत्·यच्चाचरितएष
तस्करादिचरितोमार्गोनवीरनिषेवितः॥१५॥१६॥१७॥लक्ष्मणंसंप्राप्यपेतुः·कवचेनाहताइतिशेषः॥१८॥१९॥२०॥

४२ सर्वसंस्तभितेंद्रियः संस्तभितसर्वेंद्रियः॥४३॥४४॥ प्रथमे तद्युद्धे नागपाशाबंधनके· तस्मिन्युद्धे· यत्र भ्रात्रा सह
निबद्धस्त्वं तत्किं न स्मरसि यदद्य आयुधि आयोधने निश्चेष्टसे शरपातादि करोषि॥४५॥ तदेव पुनराह

ततः संधाय सौमित्रिः शरानाशीविषोपमान्॥ मुमोच विशिखांस्तस्मिन्सर्पानिव विषोल्बणान्॥४२
शक्राशनिसमस्पर्शैर्लक्ष्मणेनाहतः शरैः॥ मुहुर्त्तमभवन्मूढः सर्वसंस्तभितेंद्रियः॥४३॥ ददर्शाव
स्थितं वीरमाजौ दशरथात्मजं॥ सोभिचक्राम सौमित्रिं रोषात्संरक्तलोचनः॥४४॥ अब्रवीच्चैनमा
साद्य पुनः सपरुषं वचः॥ किं न स्मरसि तद्युद्धे प्रथमे मत्पराक्रमं॥ निबद्धस्त्वं सह भ्रात्रा यदा
युधि विचेष्टसे॥४५॥ युवां खलु महायुद्धे वज्राशनिसमैः शरैः॥ शायितौ प्रथमं भूमौ विसंज्ञौ
सपुरःसरौ॥४६॥ स्मृतिर्वा नास्ति ते मन्ये व्यक्तं वा यमसादनं॥ गंतुमिच्छसि यन्मां त्वं आधर्षयि
तुमिच्छसि॥४७॥ यदि ते प्रथमं युद्धे न दृष्टो मत्पराक्रमः॥ अद्य त्वां दर्शयिष्यामि तिष्ठेदानीं व
वस्थितः॥४८॥ इत्युक्त्वा सप्तभिर्बाणैरभिविव्याध लक्ष्मणं॥ दशभिस्तु हनूमंतं तीक्ष्णधारैः
शरोत्तमैः॥४९॥ ततः शरशतेनैव सुप्रयुक्तेन वीर्यवान्॥ क्रोधाद्द्विगुणसंरब्धो निर्बिभेद विभी
षणं॥५०॥ तद्दृष्ट्वेंद्रजिता कर्म कृतं रामानुजस्तदा॥ अचिंतयित्वा प्रहसन्नैनत्किंचिदिति ब्रुवन्॥५१॥

त्किंचिदिति ब्रुवन्॥५१॥

युवामिति॥४६॥ यमसादनं यमगृहं॥४७॥४८॥४९॥५०॥ नैतत्किंचिदिति ब्रुवन् एतन्न किंचित् न किंचि

३१॥ विमर्दः संघर्षः॥३२॥ विक्रांतौ कृतपराक्रमौ॥३४॥ वलवृत्रौ वलइंद्रः॥३५॥३६॥ नरराक्षसमुख्यौ तौ प्रहृष्टा
वभ्ययुध्येतामित्युत्तरं श्लोकद्वयं भिन्नवृत्तं प्रक्षिप्तं तदुत्तरं सर्गविच्छेदश्चासंप्रदायः तयोर्युद्धस्ये

सशरैराहतस्तेन सरोषो रावणात्मजः॥ सुप्रयुक्तैस्त्रिभिर्वाणैः प्रतिविव्याध लक्ष्मणं॥३२॥ सव
भूव महाभीमो नरराक्षससिंहयोः॥ विमर्दस्तुमुलो युद्धे परस्परजयैषिणोः॥३३॥ विक्रांतौ
वलसंपन्नौ उभौ विक्रमशालिनौ॥ उभौ परमदुर्जेयावतुल्यवलतेजसौ॥३४॥ युयुधाते त
दा वीरौ ग्रहाविव नभोगतौ॥ वलवृत्राविव हि तौ युधि वै दुष्प्रधर्षणौ॥३५॥ युयुधाते महा
त्मानौ तदा केसरिणाविव॥ बहूनवसृजंतौ हि मार्गणौघानवस्थितौ॥३६॥ नरराक्षसमु।
ख्यौ तौ प्रहृष्टावभ्ययुध्यतां॥३७॥ सर्गः॥८८॥ ततः शरान्दाशरथिः संधायामित्रकर्श
नः॥ ससर्ज राक्षसेंद्राय क्रुद्धः सर्प इव श्वसन्॥३८॥ तस्य ज्यातलनिर्घोषं स श्रुत्वा राक्षसाधि
पः॥ विवर्णवदनो भूत्वा लक्ष्मणं समुदैक्षत॥३९॥ तं विषण्णवदनं दृष्ट्वा राक्षसं रावणात्मजं।
सौमित्रिं युद्धसंयुक्तं प्रत्युवाच विभीषणः॥४०॥ निमित्तान्युपपश्यामि यान्यस्मिन्रावणा
त्मजे। त्वरतेन महावाहो भग्न एष न संशयः॥४१॥

वाग्रे सत्त्वेन प्रकरणांतराभावादिति कतकः॥३७
सर्गः॥८८॥ ततः शरानिति॥३८॥३९॥ युद्धसंयुक्तं युद्धजनकहर्षयुक्तं॥४०॥ निमित्तानि मुखवैवर्ण्यादि
दुर्निमित्तानि यानि-अनुभूतपराजयसूचकत्वानि तैर्नैतद्वधे त्वर शीघ्रमुद्यमं कुरु॥४१॥

सासारयोःधारासंपातआसारस्तत्सहितयोः॥६२॥महान्कालोनेकदिनरूपः॥६३॥६४॥६५॥६६॥६७॥जयोद्य

शरवर्षंततोघोरंमुंचतोभीमनिस्वनं॥सासारयोरिवाकाशेनीलयोःकालमेघयोः॥६२॥तयोरथ
महान्कालोव्यतीयाद्युद्ध्यमानयोः॥नचतौयुद्धवैमुख्यंक्लमंचाप्युपजग्मतुः॥६३॥अस्त्राण्यस्त्र
विदांश्रेष्ठौदर्शयंतौपुनःपुनः॥शरानुच्चावचाकारानंतरिक्षेवबंधतुः॥६४॥व्यपेतदोषमस्यं
तौलघुचित्रंचसुष्ठुच॥उभौतुतुमुलंघोरंचक्रतुर्नरराक्षसौ॥६५॥तयोःपृथक्पृथग्भीमः
शुश्रुवेतुमुलःस्वनः॥सकंपंजनयामासनिर्घातइवदारुणः॥६६॥तयोःसभ्राजतेशब्दस्त
थासमरयत्तयोः॥सुघोरयोर्निस्वनतोर्गगनेमेघयोरिव॥६७॥सुवर्णपुंखैर्नाराचैर्बल
वंतौकृतव्रणौ॥प्रसुस्रुवातेरुधिरंकीर्त्तिमंतौजयेधृतौ॥६८॥तेगात्रयोर्निपतितारुक्म
पुंखाःशरायुधि॥असृग्दिग्धाविनिष्पेतुर्विविशुर्धरणीतलं॥६९॥अन्येसुनिशितैःश
स्त्रैराकाशेसंजघट्टिरे॥बभंजुश्चिच्छिदुश्चैवतयोर्बाणाःसहस्रशः॥७०॥सबभूवरणोघोर
स्तयोर्बाणमयश्चयः॥अग्निभ्यामिवदीप्ताभ्यांसत्रेकुशमयश्चयः॥७१॥तयोःकृतव्रणौदेहौ
शुशुभातेमहात्मनोः॥सुपुष्पाविवनिष्पत्रौवनेकिंशुकशाल्मली॥७२॥चक्रतुस्तुमुलंघोरंस
न्निपातंमुहुर्मुहुः॥इंद्रजिल्लक्ष्मणश्चैवपरस्परजयैषिणौ॥७३॥

तौदृढोत्साहौ॥६८॥६९॥७०॥चयःस

मूहः॥७१॥७२॥सविलापाज्जुहे॥७३॥

५२॥ अकिंचित्करत्वमेव विवृणोति॥ नैवमिति॥ एवंशब्दार्थो लघव इति पुष्पमालावल्लघवः वद्धमेतवश

मुमोच च शरान्घोरान्संगृह्य नरपुंगवः॥ अभीतवदनः क्रुद्धो रावणिं लक्ष्मणो युधि॥५२॥ नैवं रणगताः शूराः प्रहरंति निशाचर॥ लघवश्चाल्पवीर्याश्च शरा हीमे सुखास्तव॥५३॥ नैवं शूरास्तु युध्यंते समरे युद्धकांक्षिणः॥ इत्येवं तं ब्रुवन्धन्वी शरैरभिववर्ष ह॥५४॥ तस्य वाणैः सुविध्वस्तं कवचं कांचनं महत्॥ व्यशीर्यत रथोपस्थे ताराजालमिवांबरात्॥५५॥ विधूतवर्मा नाराचैर्वभूव स कृतव्रणः॥ इंद्रजित्समरे वीरः प्रत्यूषे भानुमानिव॥५६॥ ततः शरसहस्रेण संक्रुद्धो रावणात्मजः॥ विभेद समरे वीरो लक्ष्मणं भीमविक्रमः॥५७॥ व्यशीर्यत महद्दिव्यं कवचं लक्ष्मणस्य तु॥ कृतप्रतिकृतान्योन्यं वभूवतुरभिद्रुतौ॥५८॥ अभीक्ष्णं निःश्वसंतौ तौ युध्येतां तुमुलं युधि॥५८॥ शरसंकृत्तसर्वांगौ सर्वतो रुधिरोक्षितौ॥ सुदीर्घकालं तौ वीरावन्योन्यं निशितैः शरैः॥५९॥ ततक्षतुर्महात्मानौ रणकर्मविशारदौ॥ वभूवतुश्चात्मजये यत्तौ भीमपराक्रमौ॥६०॥ तौ शरौघैस्तथाकीर्णौ निकृत्तकवचध्वजौ॥ सृजंतौ रुधिरं चोष्णं जलं प्रस्रवणाविव॥६१॥

रामे सुखाननुक्लेशदा इत्यर्थः॥५३॥५४॥५५॥ प्रत्यूषे भानुमानिव क्षतजरक्तवर्णत्वादिति भावः॥
५६॥५७॥ अन्योन्यंकृतप्रतिकृतान्यार्षो डा। कृतप्रतिकृते यत्तौ वभूवतुरित्यर्थः॥५८॥५९॥६०॥६१॥

वज्राःवज्रपाताः॥४॥५॥राक्षसैस्तैःसचिवरूपैः॥६॥संचोदमानःसंचोदयमानः॥७॥परायणंपरागतिः॥

तेशराःशिखिसंस्पर्शानिपतंतःसमाहिताः॥राक्षसान्दारयामासुर्वज्राइवमहागिरीन्॥४॥
विभीषणस्यानुचरास्तेपिशूलासिपट्टिशैः॥चिच्छिदुःसमरेवीरान्राक्षसान्राक्षसोत्तमाः॥५॥
राक्षसैस्तैःपरिवृतःसतदातुविभीषणः॥बभौमध्येप्रधृष्टानांकलभानामिवद्विपः॥६॥ततःसं
चोदमानोवैहरीन्रक्षोवधप्रियान्॥उवाचवचनंकालेकालज्ञोरक्षसांवरः॥७॥एकोयंराक्षसें
द्रस्यपरायणमवस्थितः॥एतच्छेषंबलंतस्यकिंतिष्ठतहरीश्वराः॥८॥तस्मिंश्चनिहतेपापे
राक्षसेरणमूर्द्धनि॥रावणंवर्जयित्वातुशेषमस्यबलंहतं॥९॥प्रहस्तोनिहतोवीरोनिकुंभश्च
महाबलः॥कुंभकर्णश्चकुंभश्चधूम्राक्षश्चनिशाचरः॥१०॥जंबुमालीमहामालीतीक्ष्णवेगोश
निप्रभः॥सुप्तघ्नोयज्ञकोपश्चवज्रदंष्ट्रश्चराक्षसः॥११॥संह्रादीविकटोरिघ्नस्तपनोमंदएवच
प्रघासःप्रघसश्चैवप्रजंघोजंघएवच॥१२॥अग्निकेतुश्चदुर्द्धर्षोरश्मिकेतुश्चवीर्यवान्॥विद्यु
ज्जिह्वोद्विजिह्वश्चसूर्यशत्रुश्चराक्षसः॥१३॥अकंपनःसुपार्श्वश्चचक्रमालीचराक्षसः॥कंपनः
सत्ववंतश्चदेवांतकनरांतकौ॥१४॥

उत्तमोयोद्धेतियावत्तस्यरावणस्यबलंसेनाएतच्छेषंदृश्यमा
नबलमात्रावशेषंतत्किंतिष्ठत्तद्धननानुद्यमेननिःशेषः॥८॥९॥एतन्मात्रशेषत्वमेवाहप्रहस्तइति॥१०
।१॥१२॥१३॥१४॥

७४॥अवगाढैःगाढमग्नैःप्ररूढौप्ररूढवन्तौ॥७५॥७६॥७७॥समरपरिश्रमंयुद्धजश्रमं॥७८॥क०॥८१॥इति
श्रीरामाभिरामेश्रीरा०रा०ति०युद्धकांडेएकोननवतितमःसर्गः॥८९॥युध्यमानाविति।प्रतिभिन्नौमत्तौ

लक्ष्मणोरावणिंयुद्धेरावणिश्चापिलक्ष्मणं॥अन्योन्यंतावभिघ्नंतौनश्रमंप्रतिपद्यतां॥७४॥बाण
जालैःशरीरस्थैरवगाढैस्तरस्विनौ॥शुशुभातेमहावीर्यौप्ररूढाविवपर्वतौ॥७५॥ततोरुधिरसि
क्तानिसंवृतानिशरैर्भृशं॥बभ्राजुःसर्वगात्राणिज्वलंतइवपावकाः॥७६॥तयोरथमहान्कालोव्य
तीयाद्युध्यमानयोः॥नचतौयुद्धवैमुख्यंश्रमंचाप्यभिजग्मतुः॥७७॥अथसमरपरिश्रमंनिहंतुंस
मरमुखेष्वजितस्यलक्ष्मणस्य॥प्रियहितमुपपादयन्महात्मासमरमुपेत्यविभीषणोवतस्थे॥७८॥
इत्यार्षेश्रीरामायणेयु०एकोननवतितमःसर्गः॥८९॥ ॥युध्यमानौततोदृष्ट्वाप्रसक्तौनरराक्षसौ॥
प्रभिन्नाविवमातंगौपरस्परजयैषिणौ॥१॥तयोर्युद्धंद्रष्टुकामोवरचापधरोबली॥शूरःसराव
णभ्रातातस्थौसंग्राममूर्द्धनि॥२॥ततोविस्फारयामासमहद्धनुरवस्थितः॥उत्ससर्जचतीक्ष्णा
ग्रान्राक्षसेषुमहाशरान्॥३॥

मत्तौमातंगाविवयुद्धायप्रसक्तावतएवयुध्यमानौदृष्ट्वा॥१॥
ततःपरंपरस्परंयुद्धार्थंगतयोःरन्यतरवधांतंयुद्धंद्रष्टुकामःसन्शूरोरावणभ्रातायुयुत्सयासं
ग्राममूर्द्धनितस्थौ॥२॥अतएवततोविस्फारयामासेति।अवस्थितोभूमाविति शेषः॥३॥ ॥ ॥

२४ हनूमानपीति पर्वतात्सानु शिखरमुत्पाट्य॥ लक्ष्मणं पश्चादवरोप्य विश्रमार्थं स्वारूढं लक्ष्मणं
भूमाववस्थाप्य विभीषणसहायार्थं हनूमान्कदनं चक्रे॥२५॥ दुरासादः परैर्दुरासद इत्यर्थः॥२६॥२७॥प्र

स संप्रहारस्तुमुलः संजज्ञे कपिरक्षसां॥ देवासुराणां क्रुद्धानां यथा भीमो महास्वनः॥२४॥ हनू
मानपि संक्रुद्धः सानुमुत्पाट्य पर्वतात्॥ स लक्ष्मणं स्वयं पश्चादवरोप्य महामनाः॥२५॥ रक्षसां
कदनं चक्रे दुरासादः सहस्रशः॥ स दत्वा तुमुलं युद्धं पितृव्यस्येंद्रजिद्बली॥२६॥ लक्ष्मणं परवीर
घ्नः पुनरेवाभ्यधावत॥ तौ प्रयुद्धौ तदा वीरौ मृधे लक्ष्मणराक्षसौ॥२७॥ शरौघानभिवर्षंतौ जघ्न
तुस्तौ परस्परं॥ अभीक्ष्णमंतर्दधतुः शरजालैर्महाबलौ॥२८॥ चंद्रादित्याविवोष्णांते यथा मेघौ
तरस्विनौ॥ न त्वादानं न संधानं धनुषो वा परिग्रहः॥२९॥ न विप्रमोक्षो बाणानां न विकर्षो न वि
ग्रहः॥ न मुष्टिप्रतिसंधानं न लक्ष्यप्रतिपादनं॥३०॥ अदृश्यंत तयोस्तत्र युध्यतोः पाणिला
घवात्॥ चापवेगप्रयुक्तैश्च बाणजालैः समंततः॥३१॥

युद्धौ योद्धुमुपक्रांतौ शरजालैः परस्परप्रयु
क्तैः परस्परमंतर्दधतुः॥२८॥ उष्णांते वर्षारंभो संधानं संयोजनं धनुषो वा परिग्रहः सव्यापसव्येन
कार्मुकग्रहणं॥२९॥ विग्रहो बाणानां विभागः विग्रहः समरे काये विरोधप्रविभागयोरिति कोशः
मुष्टिप्रतिसंधानं दृढनया मुष्टिसंयोजनं लक्ष्यप्रतिपादनं लक्ष्यभेदनं॥३०॥३१॥ ॥

बाहुभ्यांसागरंतीर्त्वावस्थितैर्युष्माभिरिदंलघुअवशिष्टबलरूपंगोष्पदंलंघ्यतां॥१५॥समागम्ययुद्धं
प्राप्य १६ जनितुःजनयितृभ्रातुःपुत्रस्यनिधनंनाशःकर्त्तुमयुक्तंतथापिघृणांदयामपास्यरामा

एतान्निहत्यातिबलान्बहून्रक्षससत्तमान्॥बाहुभ्यांसागरंतीर्त्वालंघ्यतांगोष्पदंलघु॥१५
एतावदेवशेषंवोजेतव्यमितिवानराः॥हताःसर्वेसमागम्यराक्षसाबलदर्पिताः॥१६॥अयु
क्तंनिधनंकर्त्तुंपुत्रस्यजनितुर्मम॥घृणामपास्यरामार्थेनिहन्यांभ्रातुरात्मजं॥१७॥हन्तुका
मस्यमेबाष्पंचक्षुश्चैवनिरुध्यति॥तमेवैषमहाबाहुर्लक्ष्मणःशमयिष्यति॥१८॥वानराघ्न
तसंभूयभृत्यानस्यसमीपगान्॥इतितेनातियशसाराक्षसेनाभिचोदिताः॥१९॥वानरें
द्राजहृषिरेलांगूलानिव्यधुः॥ततस्तेकपिशार्दूलाःक्ष्वेडंतश्चपुनःपुनः॥मुमुचुर्विविधान्ना
दान्मेघान्दृष्ट्वेवबर्हिणः॥२०॥जांबवानपितैःसर्वैःस्वयूथैरभिसंवृतः॥तेश्मभिस्ताड
यामासुर्नखैर्दंतैश्चराक्षसान्॥२१॥निघ्नंतमृक्षाधिपतिंराक्षसास्तेमहाबलाः॥परिभर्त्स्यभ
यत्यक्त्वातमनेकविधायुधैः॥२२॥शरैःपरश्वभिस्तीक्ष्णैःपट्टिशैर्यष्टितोमरैः॥जांबवंतंमृधे
जघ्नुर्निघ्नंतंराक्षसींचमूं॥२३॥

र्थेभ्रातुरात्मजंनिहन्यांहननोपायप्रवर्त्तनेनेतिभावः॥१७॥हंतु
कामस्यसाक्षात्अहर्त्तुकामस्यबाष्पंकर्तृनिरुध्यातिनिरुणद्धि॥तंलक्ष्मणएवेत्यन्वयः॥१८॥घ्नतेत्यार्षं

१९॥२०॥२१॥२२॥२३॥

पीतेनस्वर्णभूषितेन·संपूर्णायतमुक्तेनसंपूर्णमाकर्णपर्यंतमायतेनाकृष्टेनततोमुक्तेन॥४०॥विच
रिष्यतःरथसंचारंकरिष्यतःतलशब्दानुनादिनातलंज्याघातवारणंतस्यज्याघट्टनजोयःशब्दस्त

ततोपरेणभल्लेनपीतेननिशितेनच॥संपूर्णायतमुक्तेनसुपत्रेणसुवर्चसा॥४०॥महेंद्राश
निकल्पेनसूतस्यविचरिष्यतः॥सतेनबाणाशनिनातलशब्दानुनादिना॥४१॥लाघवाद्राघवः
श्रीमान्शिरःकायादपाहरत्॥सयंतरिमहातेजाहतेमंदोदरीसुतः॥४२॥स्वयंसारथ्यमकरोत्पु
नश्चधनुरस्पृशत्॥तदद्भुतमभूत्तत्रसारथ्यंपश्यतांयुधि॥४३॥हयेषुव्यग्रहस्तंतंविव्याधनिशि
तैःशरैः॥धनुष्यथपुनर्व्यग्रेहयेषुमुमुचेशरान्॥४४॥छिद्रेषुतेषुबाणौघैर्विचरंतमभीतव
त्॥अर्दयामाससमरेसौमित्रिःशीघ्रकृत्तमः॥४५॥निहतंसारथिंदृष्ट्वासमरेरावणात्म
जः॥प्रजहौसमरोद्धर्षंविषण्णःसबभूवह॥४६॥विषण्णवदनंदृष्ट्वाराक्षसंहरियूथपाः॥ततः
परमसंहृष्टालक्ष्मणंचाभ्यपूजयन्॥४७॥ततःप्रमाथीरभसोशरभोगंधमादनः॥अमृष्यमा
णाश्चत्वारश्चक्रुर्वेगंहरीश्वराः॥४८॥तेचास्यहयमुख्येषुतूर्णमुत्पत्यवानराः॥चतुर्षुसुमहा
वीर्यानिपेतुर्भीमविक्रमाः॥४९॥

स्यानुनादोस्यास्तितेन॥४१॥४२॥४३॥हयेषुहययंत्रणविषये·
व्यग्रहस्तंदृष्ट्वानत्समयेइतिशेषः॥४४॥४५॥४६॥समरोद्धर्षंसमरोत्साहंप्रजहौत्यक्तवान्॥४७॥४८॥४९॥

अभिसंपन्नेआप्ते·रूपाणि·स्वरूपवद्वस्तूनिनचकाशिरेनदृग्गोचराणीतिभावःरावणिश्चापिलक्ष्मणंप्रा
प्याद्युध्यतामितिशेषः॥३२॥उग्राऽव्यवस्थातत्तद्बाणोरयुध्यद्वानरराक्षसवधरूपा·भवतिअभवदि

अंतरिक्षेऽभिसंपन्नेनरूपाणिचकाशिरे॥लक्ष्मणोरावणिंप्राप्यरावणिश्चापिलक्ष्मणं॥३२॥अ
व्यवस्थाभवत्युग्रानाभ्यामन्योन्यविग्रहे॥ताभ्यामुभाभ्यांतरसाप्रसृष्टैर्विशिखैःशितैः॥३३॥
निरंतरमिवाकाशंबभूवतमसावृतं॥तैःपतद्भिश्चबहुभिस्तयोःशरशतैःशितैः॥३४॥दिश
श्चप्रदिशश्चैवबभूवुःशरसंकुलाः॥तमसापिहितंसर्वमासीत्प्रतिभयंमहत्॥३५॥अस्तंग
तेसहस्रांशौसंवृत्तंतमसाचवै॥रुधिरौघामहानद्यःप्रावर्त्तंतसहस्रशः॥३६॥क्रव्यादादा
रुणावाग्भिश्चिक्षिपुःभीमनिस्वनान्॥नतदानींववौवायुर्नचजज्वालपावकः॥३७॥स्वस्त्य
स्तुलोकेभ्यइतिजजल्पुस्तेमहर्षयः॥संपेतुश्चात्रसंतप्तागंधर्वाःसहचारणैः॥३८॥अथरा
क्षससिंहस्यकृष्णान्कनकभूषणान्॥शरैश्चतुर्भिःसौमित्रिर्विव्याधचतुरोहयान्॥३९॥

त्यर्थःयत्तुअयमेनंनिगृह्णातिसएनंवेत्यनिश्चयरूपाव्यवस्थितिव्याख्यानंतच्चिंत्यंतस्याअव्यव
स्थायाअनुगतत्वस्यनिरूपयितुमशक्यत्वा[illegible]संबंधे[illegible]नउग्रेतिविशेषणवैयर्थ्याच्च॥३३॥३४॥
प्रतिभयंभयंकं॥३५॥३६॥वाग्भिर्वागिंद्रियैःक्रव्यादागृध्रादयः॥३७॥३८॥३९॥ ॥

बहुलेनतमसाइमादिशःसंसक्ताःसंवृत्ताएवंचास्माकंवत्सकरीरात्रिरागतातो॥५॥भवंतोध्वजंनिर्भयं
युध्यंतुमोहनायमद्गमनापरिज्ञायत्वयाकिमर्थंगम्यतेतत्राहंत्विति॥६॥प्रविष्टेप्रवेष्टुमुपक्रांतेन

तमसाबहुलेनेमाःसंसक्ताःसर्वतोदिशः॥नेहविज्ञायतेस्वोवापरोवाराक्षसोत्तमाः॥५॥ध्वजंभ
वंतोयुध्यंतुहरीणांमोहनायवै॥अहंतुरथमास्थायआगमिष्यामिसंयुगे॥६॥तथाभवंतःकु
र्वंतुयथेमेहिवनौकसः॥नयुध्येयुर्महात्मानःप्रविष्टेनगरंमयि॥७॥इत्युक्त्वारावणसुतोवं
चयित्वावनौकसः॥प्रविवेशपुरींलंकांरथहेतोरमित्रहा॥८॥सरथंभूषयित्वाथरुचिरंहे
मभूषितं॥प्रासासिशरसंयुक्तंयुक्तंपरमवाजिभिः॥९॥अधिष्ठितंहयज्ञेनसूतेनाप्तोप
देशिना॥आरुरोहमहातेजारावणिःसमितिंजयः॥१०॥सराक्षसगणैर्मुख्यैर्वृतोमंदोद
रीसुतः॥निर्ययौनगराद्वीरःकृतांतबलचोदितः॥११॥सोभिनिष्क्रम्यनगरादिंद्रजित्परमौ
जसा॥अभ्ययाज्जवनैरश्वैर्लक्ष्मणंसविभीषणं॥१२॥ततोरथस्थमालोक्यसौमित्रीराव
णात्मजं॥वानराश्चमहावीर्याराक्षसश्चविभीषणः॥१३॥ ॥ ॥ ॥ ॥

२७५

ने

युध्येयुःममनगरप्रवेशविघ्नार्थंयथावानरामयासहनयुध्येरन्तथाभवंतःकुर्वन्त्वित्यर्थः॥७॥
॥८॥हयज्ञेनअश्वहृदयज्ञेनआप्तंहितमुपदेष्टुंशीलमस्त्यस्यतेन॥१०॥११॥१२॥१३॥

५०॥५१॥ तेनिहत्येति· ऋषभादयइत्यर्थः॥५२॥५३॥५४॥ कः०॥८२॥ इतिश्रीरामाभिरामेश्रीरा०रा०ति०
युनवतितमः सर्गः॥९०॥ सइति॥१॥ विजयेन· विजयप्राप्तिरूपेणहेतुना· अभिमुखतयायुद्धार्थं

तेषामधिष्ठितानांतैर्वानरैः पर्वतोपमैः॥ मुखेभ्योरुधिरंव्यक्तंहयानांसमवर्त्तत ५०
तेहयामथिताभग्नाव्यसवोधरणींगताः॥५१॥ तेनिहत्यहयांस्तस्यप्रमथ्यचमहारथं
पुनरुत्पत्यवेगेनतस्थुर्लक्ष्मणपार्श्वतः॥५२॥ सहताश्वादवप्लुत्यरथान्मथितसारथिः शरव
र्षेणसौमित्रिमभ्यधावतरावणिः॥५३॥ ततोमहेंद्रप्रतिमः सलक्ष्मणः पदातिनंतंनिहते
र्हयोत्तमैः॥ सृजंतमाजौनिशितांछरोत्तमान्भृशंतदाबाणगणैर्व्यदारयत्॥५४॥ इत्यार्षेश्री
रामायणेयुद्धकांडेनवतितमः सर्गः॥९०॥ सहताश्वोमहातेजाभूमौतिष्ठन्निशाचरः॥
इंद्रजित्परमक्रुद्धः संप्रजज्वालतेजसा॥१॥ तौधन्विनौजिघांसंतावन्योन्यमिषुभिर्भृशं।
विजयेनाभिनिष्क्रांतौवनेगजवृषाविव॥२॥ निवर्हयंतश्चान्योन्यंतेराक्षसवनौकसः॥भ
र्त्तारंनजहुर्युद्धेसंपतंतस्ततस्ततः॥३॥ ततस्तान्राक्षसान्सर्वान्हर्षयन्रावणात्मजः॥।
स्तुन्वनोहर्षमाणश्चइदंवचनमब्रवीत्॥४॥

प्रवृत्तावभूतांइतिशेषः गजवृषौगजश्रेष्ठौ॥२॥ नि
वर्हयंतोमारयंतः भर्त्तारंस्वस्वभर्त्तारं· संपतंतः संगच्छमानाः॥३॥ स्तुन्वानइत्यार्षस्तुवन्नित्यर्थः॥४॥

ननुकथंसर्वराक्षसाइंद्रजितियुध्यतित्रिभिःत्रिभिर्बाणैर्वेद्धुंशक्यास्तत्राहशीघ्रास्त्रमितिप्रयोगमात्रेण
सर्वविध्यकमस्त्रंशीघ्रास्त्रंयद्वाभ्यावप्रधानोनिर्देशः॥अस्त्रविषयकशीघ्रप्रयोगसामर्थ्यरूपंशीघ्रास्त्र

ततस्तान्राक्षसान्सर्वान्त्रिभिरेकैकमाहवे॥अविध्यत्परमःक्रुद्धःशीघ्रास्त्रंसंप्रदर्शयन्॥राक्ष
सेंद्रसुतंचापिबाणौघैःसमताडयत्॥२५॥सोतिविद्धोबलवताशत्रुणाशत्रुघातिना॥अस
क्तंप्रेषयामासलक्ष्मणायबहून्शरान्॥२६॥तानप्राप्तान्शितैर्बाणैश्छिच्छेदपरवीरहा॥
सारथेरस्यचरणेरथिनोरथसत्तमः॥२७॥शिरोजहारधर्मात्माभल्लेनानतपर्वणा॥असूतास्ते
हयास्तत्ररथमूहुरविक्लवाः॥२८॥मंडलान्यभिधावंतितदद्भुतमिवाभवत्॥अमर्षवशमा
पन्नःसौमित्रिर्दृढविक्रमः॥२९॥प्रत्यविध्यद्धयांस्तस्यशरैर्वित्रासयन्रणे॥अमर्षमाणस्तत्क
र्मरावणस्यसुतोरणे॥३०॥विव्याधदशभिर्बाणैःसौमित्रिंरोमहर्षणं॥तेतस्यवज्रप्रतिमाःश
राःसर्पविषोपमाः॥विलयंजग्मुरागत्यकवचंकांचनप्रभं॥३१॥ श्र श्र

त्वंसंप्रदर्शयन्नित्यर्थः॥२५॥असक्तंअविरतं॥२६॥रथसत्तमोलक्ष्मणः॥२७॥असूताःअसारथ
यः॥अविक्लवाःअनाकुलाः॥२८॥२९॥३०॥कवचमागत्यप्राप्यविलयंजग्मुःपूर्वकवचस्यविशार
णेपिकवचांतरंघनमित्यवगम्यते॥३१॥

१४।१५।१६।समरकोपेनरावणिःसमरजन्यकोपेन॥१७॥त्वरन्निवशीघ्रमेव॰तदपिद्वितीयधनुरपि॥१८

विस्मयंपरमंजग्मुःलाघवात्तस्यधीमतः॥रावणिश्चापिसंक्रुद्धोरणेवानरयूथपान्॥१४॥पात
यामासबाणौघैःशतशोथसहस्रशः॥समंडलीकृतधनूरावणिःसमितिंजयः॥१५॥हरीनभ्यहन
क्रुद्धःपरंलाघवमास्थितः॥तेवध्यमानाहरयोनाराचैर्भीमविक्रमैः॥सौमित्रिंशरणंप्राप्ताःप्रजा
पतिमिवप्रजाः॥१६॥ततःसमरकोपेनज्वलितोरघुनंदनः॥चिच्छेदकार्मुकंतस्यदर्शयन्पाणि
लाघवं॥१७॥सोन्यत्कार्मुकमादायसज्जंचक्रेत्वरन्निव॥तदप्यस्यत्रिभिर्बाणैर्लक्ष्मणोनिरकृं
तत॥१८॥अथैनंछिन्नधन्वानमाशीविषविषोपमैः॥विव्याधोरसिसौमित्रीरावणिंपंचभिः
शरैः॥१९॥तेतस्यकायंनिर्भिद्यमहाकार्मुकनिःसृताः॥निपेतुर्धरणींबाणाःरक्ताइवमहोर
गाः॥२०॥सछिन्नधन्वारुधिरंवमन्वक्त्रेणरावणिः॥जग्राहकार्मुकंश्रेष्ठंदृढज्यंबलवत्तरं
॥२१॥सलक्ष्मणंसमुद्दिश्यपरंलाघवमास्थितः॥ववर्षशरवर्षाणिवर्षाणीवपुरंदरः॥२२॥मु
क्तमिंद्रजितातत्तुशरवर्षमरिंदमः॥आवारयदसंभ्रांतोलक्ष्मणःसुदुरासदं॥२३॥संदर्शया
मासतदारावणिंरघुनंदनः॥असंभ्रांतोमहातेजास्तदद्भुतमिवाभवत्॥२४॥

॥१९॥रक्ताःबाण
नामपिरुधिरसंबंधाद्रक्तत्वं॥२०॥२१॥२२॥२३॥संदर्शयामासस्वपौरुषमितिशेषः॥२४॥रामरा

दशधाचिच्छेदभुविअपातयच्च॥४३॥४४॥निमित्तगाःलक्ष्यगाःवेध्यंलक्ष्यंशरव्यंचनिमित्तंचेतिकथ्य

तामापतंतीसंप्रेक्ष्यसुमित्रानंदवर्धनः॥चिच्छेदनिशितैर्वाणैर्दशधापातयद्भुवि॥४३॥तस्मै
दृढधनुःक्रुद्धोहताश्वायविभीषणः॥वज्रस्पर्शसमान्पंचससर्जोरसिमार्गणान्॥४४॥तेत
स्यकायंभित्वातुरुक्मपुंखनिमित्तगाः॥बभूवुर्लोहितादिग्धारक्ताइवमहोरगाः॥४५॥सपि
तृव्यस्यसंक्रुद्धइंद्रजिच्छरमाददे॥उत्तमंरक्षसांमध्येयमदत्तंमहाबलं॥४६॥तंसमीक्ष्यमहा
तेजामहेषुंतेनसंधितं॥लक्ष्मणोप्याददेवाणमन्यद्भीमपराक्रमः॥४७॥कुवेरेणस्वयंस्वप्ने
यद्दत्तममितात्मना॥दुर्जयंदुर्विषह्यंचसेंद्रैरपिसुरासुरैः॥४८॥तयोस्तुधनुषीश्रेष्ठेवाहु
भिःपरिघोपमैः॥विकृष्यमाणेवलवत्क्रौंचाविवचुकूजतुः॥४९॥ताभ्यांतौधनुषीश्रेष्ठेसंहि
तौसायकोत्तमौ॥विकृष्यमाणौवीराभ्यांभृशंजज्वलतुःश्रिया॥५०॥तौभासयंतावाकाशंध
नुर्भ्यांविशिखौच्युतौ॥मुखेनमुखमाहत्यसन्निपेततुरोजसा॥५१॥सन्निपातस्तयोर्घोरा
सीच्छरयोर्घोररूपयोः॥सधूमविस्फुलिंगश्चतर्जेर्दारुणोभवत्॥५२॥ ॥ ॥

तेलोहितंरुधिरं॥४५॥४६॥वाणशब्दोर्धचादिः॥४७॥अमितात्मना॥अपरिच्छिन्नमाहात्म्येन॥४८॥४९
संहितौयोजितौ॥५०॥सन्निपेततुःसंघर्षंप्रापतुः॥५१॥वाणसन्निपाताज्जातस्तज्जः॥५२॥

एवंदर्शनात्तमभेद्यकवचंमत्वाकवचरहितेस्थानेललाटेअविध्यत्॥३२॥३३॥३४॥शरासनंविकृष्यं

अभेद्यकवचंमत्वालक्ष्मणंरावणात्मजः॥ललाटेलक्ष्मणंवाणैःसुपुंखैस्त्रिभिरिंद्रजित्॥३२॥
अविध्यत्परमक्रुद्धःशीघ्रमस्त्रंप्रदर्शयन्॥तैःपृषत्कैर्ललाटस्थैःशुशुभेरघुनंदनः॥३३॥रणा
ग्रेसमरश्लाघीत्रिशृंगइवपर्वतः॥सतथाप्यर्दितोवाणैराक्षसेनतदामधे॥३४॥तमाशुप्रतिवि
व्याधलक्ष्मणःपंचभिःशरैः॥विकृष्येंद्रजितोयुद्धेवदनेशुभकुंडले॥३५॥लक्ष्मणेंद्रजितौवी
रौमहावलशरासनौ॥अन्योन्यंजघ्नतुर्वीरौविशिखैर्भीमविक्रमौ॥३६॥ततःशोणितदिग्धांगौ
लक्ष्मणेंद्रजितावुभौ॥रणेतौरेजतुर्वीरौपुष्पिताविवकिंशुकौ॥३७॥तौपरस्परमभ्येत्यसर्वगा
त्रेषुधन्विनौ॥घोरैर्विव्यधतुर्बाणैःकृतभावावुभौजये॥३८॥ततःसमरकोपेनसंयुतोरावणात्म
जः॥विभीषणंत्रिभिर्बाणैर्विव्याधवदनेशुभे॥३९॥अयोमुखैस्त्रिभिर्विद्ध्वाराक्षसेंद्रंविभीषणं
एकैकानभिविव्याधतान्सर्वान्हरियूथपान्॥४०॥तस्मैदृढतरंक्रुद्धोजघानगदयाहयान्॥विभी
षणोमहातेजारावणेःसुदुरात्मनः॥४१॥सहताश्वादवप्लुत्यरथान्मथितसारथिः॥अथशक्तिंम
हातेजाःपितृव्यायमुमोचह॥४२॥

इंद्रजितोवदनेशरैर्विव्याधेतिसंवंधः॥३५॥विशिखैःविशिष्टशि
खैःशितैर्वाणैरितियावत्॥३६॥३७॥जयेकृतभावौकृताभिप्रायौ॥३८॥३९॥४०॥४१॥४२॥ ॥

६०॥६१॥भैरवमभिरुतंयस्मिन्नादृशेभूतैःप्राणिभिः॥६२॥सन्निहितैनतदस्त्रेणैवायंवध्यइतिनिश्चित्यैन्द्रास्त्रं
संदधइत्याह· अथेति· अत्रप्रत्यस्त्रंरावणोब्रह्मशापवशान्नवुध्यारूढंवस्तुतोस्यप्रत्यस्त्रंनास्त्येवे

अवार्यंसर्वभूतानांसर्वशस्त्रविदारणं॥माहेश्वरेणद्युतिमान्तदस्त्रंप्रत्यवारयत्॥६०॥तयोः
समभवद्युद्धंअद्भुतंलोमहर्षणं॥गगनस्थानिभूतानिलक्ष्मणंपर्यवारयन्॥६१॥भैरवाभिरु
तेभीमेयुद्धेवानररक्षसां॥भूतैर्बहुभिराकाशंविस्मितैरावृतंबभौ॥६२॥ऋषयःपितरोदे
वागंधर्वगरुडोरगाः॥शतक्रतुपुरस्कृत्यररक्षुर्लक्ष्मणंरणे॥६२॥अथान्यंमार्गणंश्रेष्ठंसं
दधेराघवानुजः॥हुताशनसमस्पर्शंरावणात्मजदारणं॥६३॥सुपत्रमनुवृत्तांगंसुपर्वाणं
सुसंस्थितं॥सुवर्णविकृतंवीरःशरीरान्तकरंशरं॥६४॥दुरावारंदुर्विषमंराक्षसानांभ
यावहं॥आशीविषविषप्रख्यंदेवसंघैःसमर्चितं॥६५॥येनशक्रोमहातेजादानवानज
यत्प्रभुः॥पुरादेवासुरेयुद्धेवीर्यवान्हरिवाहनः॥६६॥अथैन्द्रमस्त्रंसौमित्रिःसंयुगेष्वपरा
जितं॥शरःश्रेष्ठंधनुःश्रेष्ठेविकर्षन्निदमब्रवीत्॥६७॥

तिकतकः॥६३॥अनुवृत्तांगंआनुपूर्व्यात्तनुत्व
वद्धत्त्वगुणयुक्तमंगयस्यसुसंस्थितंशोभनसंस्थानंसुवर्णविकृतंस्वर्णभूषितं॥६४॥दुरावारं·
अस्त्रांतरैर्वारयितुमशक्यं·आशीविषत्वगुणकंयद्विषंमहासर्पस्तत्प्रख्यंतत्सदृशंदेवसंघैःसम
र्चितंपूजितंदेवराजीयत्वादेव॥६५॥६६॥६७॥

महाग्रहोंगारकशन्यादि:॥५३॥ व्रीडितौस्वस्वप्रयुक्तशरस्यमोघत्वदर्शनेनसंजातलज्जौ· यद्यपिराव
णेरेवव्रीडायुक्तालक्ष्मणस्यपुनतद्बाणनिवारणायप्रयोक्तुःसार्थक्यसत्वेनव्रीडाभावस्तथापितन्नि
राकरणपूर्वकंरिपुवधपर्यंतव्यापारेणापादानान्नतदभावेनतस्यापिलज्जेति·बोध्यं च्छत्रिन्पाये

तौमहाग्रहसंकाशावन्योन्यंसन्निपत्यच॥संग्रामेशतधायातौमेदिन्यांचैवपेततुः॥५३॥शरौ
प्रतिहतौदृष्ट्वातावुभौरणमूर्धनि॥व्रीडितौजातरोषौचलक्ष्मणेंद्रजितौतदा॥५४॥सुसंरब्धस्तु
सौमित्रिरस्त्रंवारुणमाददे॥रौद्रंमहेंद्रजिद्युद्धे ष्यसजद्युद्धविष्ठितः॥तेनतद्विहतंशस्त्रंदा
रुणंपरमाद्भुतं॥५५॥ततःक्रुद्धोमहातेजाइंद्रजित्समितिंजयः॥आग्नेयंसंदधेदीप्तंसलोकं
संक्षिपन्निव॥५६॥सौर्येणास्त्रेणतंवीरोलक्ष्मणःपर्यवारयत्॥अस्त्रंनिवारितंदृष्ट्वारावणिःक्रो
धमूर्छितः॥५७॥आददेनिशितंबाणमासुरंशत्रुदारुणं॥तस्माच्चापाद्विनिष्पेतुर्भास्वराःकूट
मुद्गराः॥५८॥शूलानिचभुशुंड्यश्चगदाःखड्गाःपरस्वधाः॥तंदृष्ट्वालक्ष्मणःसंख्येघोरमस्त्रंसुदा
रुणं॥५९॥

नद्विवचनप्रयोगइतिकतकः·जातरोषौरामाविशिख्येविभीषणेबाणःप्रमुक्तइतिलक्ष्म
णस्यरोषः॥लक्ष्मणस्त्वंपरिहृतवानितिरावणेरोषः॥५४॥५५॥लोकंसंक्षिपन्निव·संहरन्निव॥५६
शस्त्रंनिवारितमितिपाठेशस्त्रशब्दोस्त्रपर्यायः॥५७॥५८॥ ५९॥ ॥

७८॥७९॥८०॥८१॥व्यपास्तो विशेषधर्मैरत एव गतजीवितः॥८२॥प्रशांतपीडाबहुलः प्रशांतबहुल

केचिल्लंकां परित्रस्ताः प्रविष्टा वानरार्दिताः॥समुद्रे पतिताः केचित्केचित्पर्वतमाश्रिताः॥७९॥
हतमिंद्रजितं दृष्ट्वा शयानं च रणक्षितौ॥राक्षसानां सहस्रेषु न कश्चित्प्रत्यदृश्यत॥८०॥यथा
स्तंगत आदित्ये नावतिष्ठंति रश्मयः॥तथा तस्मिन्निपतिते राक्षसास्ते गता दिशः॥८१॥शांत
रश्मिरिवादित्यो निर्वाण इव पावकः॥बभूव स महाबाहुर्व्यपास्तगतजीवितः॥८२॥प्रशां
तपीडाबहुलो विनष्टारिः प्रहर्षवान्॥बभूव लोकः पतिते राक्षसेंद्रसुते तदा॥८३॥हर्षं च
शक्रो भगवान्सह सर्वैर्महर्षिभिः॥जगाम निहते तस्मिन्राक्षसे पापकर्मणि॥८४॥आका
शे चापि देवानां शुश्रुवे दुंदुभिस्वनः॥नृत्यद्भिरप्सरोभिश्च गंधर्वैश्च महात्मभिः॥८५॥वव
र्षुः पुष्पवर्षाणि तदद्भुतमिवाभवत्॥प्रशशाम हते तस्मिन्राक्षसे क्रूरकर्मणि॥८६॥शुद्धा
आपो नभश्चैव जहृषुर्देवदानवाः॥आजग्मुः पतिते तस्मिन्सर्वलोकभयावहे॥८७॥ऊचु
श्च सहितास्तुष्टा देवगंधर्वदानवाः॥विज्वराः शांतकलुषा ब्राह्मणा विचरंत्विति॥८८॥ततो
भ्यनंदन्संहृष्टाः समरे हरियूथपाः॥तमप्रतिबलं दृष्ट्वा हतं नैरृतपुंगवं॥८९॥

पीडः॥८३॥८४
८५॥प्रशशाम रज इति शेषः॥८६॥आपः शुद्धाः प्रसन्नाः देवदानवाः दानवानामपि तच्छत्रुत्वात्तेषामपि

हर्षः आजग्मुरिति देवदानवा इत्यनुकर्षः॥८७॥८८॥८

अर्थसाधनंआत्मनःकार्यसिद्धेर्हेतुभूतमिदंवक्ष्यमाणवचनमस्त्राधिष्ठात्रीदेवतांप्रत्यब्रवीत्॥६८

लक्ष्मीवान्लक्ष्मणोवाक्यमर्थसाधकमात्मनः॥धर्मात्मासत्यसंधश्चरामोदाशरथिर्यदि॥पौरु
षेचाप्रतिद्वंद्वस्तदैनंजहिरावणिं॥६८॥इत्युक्त्वाबाणमाकर्णंविकृष्यनमजिह्मगं॥लक्ष्मणःस
मरेवीरःससर्जेंद्रजितंप्रति॥६९॥ऐंद्रास्त्रेणसमायुज्यलक्ष्मणःपरवीरहा॥७०॥तच्छिरःसशिर
स्त्राणंश्रीमज्ज्वलितकुंडलं॥प्रमथ्येंद्रजितःकायात्पातयामासभूतले॥७१॥तद्राक्षसतनूजस्य
भिन्नस्कंधंशिरोमहत्॥तपनीयनिभंभूमौददृशेरुधिरोक्षितं॥७२॥हतःसनिपपाताथधर
ण्यांरावणात्मजः॥कवचीसशिरस्त्राणोविप्रविद्धशरासनः॥७३॥चुक्रुशुस्तेततःसर्वेवानराः
सविभीषणाः॥हृष्यंतोनिहतेतस्मिन्देवावृत्रवधेयथा॥७४॥अथांतरिक्षेभूतानामृषीणांच
महात्मनां॥जज्ञेथजयसन्नादोगंधर्वाप्सरसामपि॥७५॥पतितंसमभिज्ञायराक्षसीसा
महाचमूः॥वध्यमानादिशोभेजेहरिभिर्जितकाशिभिः॥७६॥वानरैर्वध्यमानास्तेशस्त्राण्यु
त्सृज्यराक्षसाः॥लंकामभिमुखाःसस्रुर्भ्रष्टसंज्ञाःप्रधाविताः॥७७॥दुद्रुवुर्बहुधाभीताराक्षसाः
शतशोदिशः॥त्यक्त्वाप्रहरणान्सर्वेपट्टिशासिपरश्वधान्॥७८॥ श्र ॥

६९॥७०॥७१॥तपनीयनिभत्वेउपपत्तिःरुधिरोक्षितमिति॥७२॥७३॥७४॥७५॥७६॥७७

अभिक्रम्यप्रदक्षिणीकृत्य·शक्रस्येंद्रानुजोयथाश्रयोपेंद्रसमीपेतिष्ठतितद्वत्·इंद्रस्येवबृहस्पतिरि
तिपाठेगुणप्रधानभावनावस्थानमात्रेदृष्टांतइत्यर्थः॥४॥निघ्नन्निति·विभीषणइत्याकर्षः·हृष्टोवि
भीषणःसंतुष्टागमनेनैवेंद्रजिद्वधंनिघ्नन्बोधयन्निवनिकटमागत्यराघवायसामान्यतइंद्रजिद्व

ततोराममभिक्रम्यसौमित्रिरभिवाद्यच॥तस्थोभ्रातसमीपस्थःशक्रस्येंद्रानुजोयथा॥४॥नि
घ्नन्निवचागत्यराघवायमहात्मने॥आचचक्षेतदावीरोघोरमिंद्रजितोवधं॥५॥रावणेस्तु
शिरश्छिन्नंलक्ष्मणेनमहात्मना॥न्यवेदयतरामायतदाहृष्टोविभीषणः॥६॥श्रुत्वैवतुमहा
वीर्योलक्ष्मणेनेंद्रजिद्वधं॥प्रहर्षमतुलंलेभेवाक्यंचेदमुवाचह॥७॥साधुलक्ष्मणतुष्टोस्मि
कर्मचासुकरंकृतं॥रावणेर्हिविनाशेनजितमित्युपधारय॥८॥सतंशिरस्युपाघ्रायलक्ष्मणं
कीर्त्तिवर्द्धनं॥लज्जमानंबलात्स्नेहादंकमारोप्यवीर्यवान्॥९॥उपवेश्यतमुत्संगेपरिष्वज्याव
पीडितं॥भ्रातरंलक्ष्मणंस्निग्धंपुनःपुनरुदैक्षत॥१०॥

धमाचचक्षे॥५॥ततःकिंकर्तव्योवधइत्याकांक्षा·
यामाह·रावणेरिति·छिन्नमितिन्यवेदयत॥६॥७॥जितमित्युपधारय·इदानीमेवास्माभिरितिशेषः॥८॥
लज्जमानंभ्रातसन्निधौ·एवंकृतमितिवक्तुंलज्जयायुतंक्रियावाहुल्याद्वैतेषुश्लोकेपुनःपुनःकर्म
पदप्रयोगः·अंकमारोप्यअंकेउपवेशनायाकृष्य॥९॥अवपीडितंशास्त्रव्रणैरितिशेषःयद्वावपीडितं

गाढमालिंग्य॥१०॥

९० लब्धलक्षाः प्राप्तहर्षविसराः रलयोरभेदात्प्राप्तरक्षणा इत्यपि । रघुसुतं रघुवंशजं ॥ ९१ ॥ विश्रावयन् श्रावयन् ॥ ९२ ॥ ९३ ॥ उपलभन् उपालभन् ॥ ९४ ॥ क० ॥ ९३ ॥ इति श्रीरामाभिरामे श्रीरामीये रामायण

विभीषणो हनूमांश्च जांबवांश्चर्क्षयूथपः ॥ विजये नाभिनंदंतस्तुष्टुवुश्चापि लक्ष्मणं ॥ ९० ॥ क्ष्वेडंतश्च प्लवंतश्च गर्जंतश्च प्लवंगमाः ॥ लब्धलक्षा रघुसुतं परिवार्योपतस्थिरे ॥ ९१ ॥ लांगूलानि प्रविध्यंतः स्फोटयंतश्च वानराः ॥ लक्ष्मणो जयतीत्येव वाक्यं विश्रावयंस्तदा ॥ ९२ ॥ अन्योन्यं च समाश्लिष्य हरयो हृष्टमानसाः ॥ चक्रुरुच्चावचगुणा राघवाश्रयसत्कथाः ॥ ९३ ॥ तदसुकरमथाभिवीक्ष्य तुष्टाः प्रियसुहृदो युधि लक्ष्मणस्य कर्म परममुपलभन् मनः प्रहर्षं विनिहतमिंद्ररिपुं निशम्य देवाः ॥ ९४ ॥ इत्यार्षे श्रीरामायणे युद्धकांडे एकनवतितमः सर्गः ॥ ९१ ॥ रुधिरक्लिन्नगात्रस्तु लक्ष्मणः शुभलक्षणः ॥ बभूव हृष्टस्तं हत्वा शक्रजेतारमाहवे ॥ १ ॥ ततः स जांबवंतं च हनूमंतं च वीर्यवान् ॥ संनिपत्य महातेजास्तांश्च सर्वान्वनौकसः ॥ २ ॥ आजगाम ततः शीघ्रं यत्र सुग्रीवराघवौ ॥ विभीषणमवष्टभ्य हनूमंतं च लक्ष्मणः ॥ ३ ॥ श्र ॥

तिलके युद्धकांडे एकनवतितमः सर्गः ॥ ९१ ॥ रुधिरेति ॥ संनिपत्य संगत्य ॥ २ ॥ युद्धव्रणजपीडावशाद्विभीषणं हनूमंतं चावष्टभ्य अवलंब्येत्यर्थः ॥ ३ ॥

रामा·यु·
२८१

हेलक्ष्मणनाथेनउपलालनार्थेनाथशब्दप्रयोगः॥१९॥समाभाष्यसुषेणेत्येवंसंबोध्य॥२०॥विशल्यइतीति·

त्वयालक्ष्मणनाथेनसीताचपृथिवीचमे॥नदुष्प्रापाहतेतस्मिन्शक्रजेतरिचाहवे॥१९॥सतंभ्रा
तरमाश्वास्यपरिष्वज्यचराघवः॥रामःसुषेणंमुदितःसमाभाष्येदमब्रवीत्॥२०॥विशल्योयं
महाप्राज्ञःसौमित्रिर्मित्रवत्सलः॥यथाभवतिसुस्वस्थंतथात्वंसमुदाचर॥२१॥विशल्यःक्रि
यतांक्षिप्रंसौमित्रिर्मित्रवत्सलः॥ऋक्षवानरसैन्यानांशूराणांद्रुमयोधिनां॥२२॥येचाप्यन्यत्रयु
ध्यंतिसशल्याव्रणिनस्तथा॥तेपिसर्वेप्रयत्नेनक्रियतांसुखिनस्तथा॥२३॥एवमुक्तःसरामे
णमहात्माहरियूथपः॥लक्ष्मणायददौनस्तःसुषेणःपरमौषधं॥२४॥सतस्यगंधमाघ्रायवि
शल्यःसमपद्यत॥तदानिर्वेदनश्चैवसंसंरूढव्रणएवच॥२५॥विभीषणमुखानांचसुहृ·
दांराघवाज्ञया॥सर्ववानरमुख्यानांचिकित्सामकरोत्तदा॥२६॥ततःप्रकृतिमापन्नोहृतश
त क्ल ल्योग[illegible]मः॥सौमित्रिर्मुमुदेतत्रक्षणेनविगतज्वरः॥२७॥तदैवरामःप्लवगाधिपस्तथाविभी
षणश्चर्क्षपतिश्चवीर्यवान्॥अवेक्ष्यसौमित्रिमरोगमुत्थितंमुदाससैन्याःसुचिरंजहर्षिरे॥२८

२८१

औषधपर्वतानयनोत्तरमौषध्यःसुषेणेनसंगत्यस्थापिताइत्यनेनज्ञायते॥२१॥येवानराःसशल्याव्र
णिनश्चतेपिविशल्याःप्ररूढव्रणाश्चकार्याः॥२२॥नस्तःनासिकायां॥२३॥२४॥२५॥२६॥२७॥२८॥

राम·
२८१

शस्त्रैःकृत्तगात्रं॥११॥१२॥दुष्करकर्मणा इतरपौरुषेणात्वयेतिशेषः पुत्रेहतोरावणमद्यहतमेवमन्येतद्वधस्येषत्करत्वादितिभावः॥१३॥१४॥व्यपाश्रयः अवलंबनभूतः एवंलक्ष्मणमाश्वास्यविभीषणादीनप्याः

शल्यसंपीडितंशस्तंनिश्वसंतंतुलक्ष्मणं॥रामस्तुदुःखसंतप्तंतंतुनिश्वासपीडितं॥११॥मूर्ध्निचैनमुपाघ्रायभूयःसंस्पृश्यचत्वरन्॥उवाचलक्ष्मणंवाक्यमाश्वास्यपुरुषर्षभः॥१२॥कृतंपरमकल्याणंकर्मदुष्करकर्मणा॥अद्यमन्येहतेपुत्रेरावणंनिहतंयुधि॥१३॥अद्याहंविजयीशत्रौहतेतस्मिन्दुरात्मनि॥रावणस्यनृशंसस्यदिष्ट्यावीरत्वयारणे॥१४॥छिन्नोहिदक्षिणोबाहुःसहितस्यव्यपाश्रयः॥विभीषणहनूमद्भ्यांकृतंकर्ममहद्रणे॥१५॥अहोरात्रैस्त्रिभिर्वीरःकथंचिद्विनिपातितः॥निरमित्रःकृतोस्म्यद्यनिर्यास्यतिहिरावणः॥१६॥बलव्यूहेनमहतानिर्यास्यतिहिरावणः॥बलव्यूहेनमहताश्रुत्वापुत्रंनिपातितं॥१७॥तंपुत्रवधसंतप्तंनिर्यांतंराक्षसाधिपं॥बलेनावृत्यमहतानिहनिष्यामिदुर्जयं॥१८॥

श्वासयतिविभीषणेनेति॥१५॥अहोरात्रैस्त्रिभिरितिदशम्यांचतुर्थप्रहरेआरंभात्त्रयोदश्यांचतुर्थप्रहरेवधादितिभावः॥अद्यनिरमित्रःकृतोस्मि कथंरावणोजीवतिनिरमित्रत्वंतत्राह निर्यास्यतीति अवश्यंनिर्यास्यति॥१६॥१७॥निर्यांतंचतंमहताबलेनसहजेनावृत्याक्राम्यनिहनिष्यामि॥१८॥ ॥ ॥ ॥

६॥ कालांतकोकालः सर्वसंहारकः अंतकस्तदधिकृतः॥७॥ भूयोबहुमतः मयात्यंतश्लाघनीयः॥८॥ येनवैव
स्त्वतेनत्वंकालधर्मणाकालधर्मेणसंयुक्तः संयोजितः योभर्तुःकृतेहन्यतेसपुमान्स्वर्गंगच्छति· एष
पंथासुयोधानांनरस्तोसुखानरयोधानां· नकेवलमेतेष्वेवकिंतुदेवादिगणेष्वपीत्याह· सर्वामरेति·

पुत्रशोकाकुलोदीनोविललापाकुलेंद्रियः॥हाराक्षसचमूमुख्यममवत्समहाबल॥६॥जित्वेंद्रंक
थमद्यत्वंलक्ष्मणस्यवशंगतः॥ननुत्वमिषुभिःक्रुद्धोभिंद्याःकालांतकावपि॥७॥मंदरस्यापिशृं
गाणिकिंपुनर्लक्ष्मणंयुधि॥अद्यवैवस्वतोराजाभूयोबहुमतोमम॥८॥येनाद्यत्वंमहाबाहोसं
युक्तःकालधर्मणा॥एषपंथाःसुयोधानांसर्वामरगणेष्वपि॥९॥यःकृतेहन्यतेभर्तुःसपुमान्स्व
र्गमृच्छति॥९॥अद्यदेवगणाःसर्वेलोकपालामहर्षयः॥हतमिंद्रजितंदृष्ट्वासुखंस्वप्स्यंतिनिर्भ
याः॥१०॥अद्यलोकास्त्रयःकृत्स्नापृथिवीचसकानना॥एकेनेंद्रजिताहीनाशून्येवप्रतिभातिमे
॥११॥अद्यनैर्ऋतकन्यानांश्रोष्याम्यंतःपुरेरवं॥करेणुसंघस्ययथानिनादंगिरिगह्वरे॥१२॥ ॥

एवंयुद्धमरणस्यसकलशूरजनाकांक्षिततयायुद्धहतंत्वांनशोचामीतिभावः॥९॥१०॥त्रयोलोकाः
पातालांतरिक्षस्वर्गाः पृथिव्याःपृथगुक्तेःसकाननानिर्भयेत्यनुकर्षः किंचममैकेनेंद्रजिताशून्यासर्वा
पिपृथिवीशून्येवभाति॥११॥रवंरोदनजं॥१२॥

२६॥क०८४॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेद्विनवतितमःसर्गः॥९२॥ अथराव
णवृत्तांतमाह ततइत्यादि सचिवाअविशिष्टसुपार्श्वादिमंत्रिणः अवज्ञायअवक्षिप्तसंज्ञाः ज्ञानंयस्यत
स्यैपुत्रवधवृत्तांतज्ञानरहितायेत्यर्थः तीर्थस्क अवज्ञायअभिज्ञायहृष्ट्वा पूर्वंश्रुत्वापश्चाद्युद्धभू

अपूजयत्कर्मसलक्ष्मणस्यसुदुष्करंदाशरथिर्महात्मा॥ बभूवहृष्टोयुधिवानरेंद्रोनिशम्य
तंशक्रजितंनिपातितं॥२६॥ इत्यार्षेश्रीरामायणेयुद्धकांडेद्विनवतितमःसर्गः॥९२॥ ततःपौलस्त्यस
भि चिवाःश्रुत्वाचेंद्रजितोवधं॥ आचचक्षुरभिज्ञायदशग्रीवायसत्वराः॥१॥ युद्धेहतोमहाराजलक्ष्मणे
नतवात्मजः॥ विभीषणसहायेनमिषतांनोमहाद्युतिः॥२॥ शूरःशूरेणसंगम्यसंयुगेष्वपराजितः
लक्ष्मणेनहतःशूरःपुत्रस्तेविबुधेंद्रजित्॥३॥ गतःसपरमान्लोकान्शरैःसंतप्यलक्ष्मणं॥ सतं
प्रतिभयंश्रुत्वावधंपुत्रस्यदारुणं॥४॥ घोरमिंद्रजितःसंख्येकश्मलंप्राविशन्महत्॥ उपलभ्य
चिरात्संज्ञांराजाराक्षसपुंगवः॥५॥

मिंगत्वाप्रत्यर्थीकृत्याचचक्षुरित्यर्थमाह॥१॥ मिषतांनइ
तियोद्धृराक्षसैर्दर्शनात् क्ति त्रिन्यायेनवोध्यं मिषतोऽनादृत्येत्यर्थः॥२॥ विबुधान्देवानिंद्रंचज
यतीतिविबुधेंद्रजित्॥३॥ परमाल्लोकान्वीरप्राप्यानितिभावः॥ दारुणंशोकजनकत्वात्॥४॥
प्रतिभयंअतिभयंकरंघोरंतीक्ष्णं कश्मलंमूर्छां॥५॥ ॥ ॥

२२।यंत्रस्यमंदररूपमथनयंत्रस्य·वासुकिनाकरणेनदानवैःकृष्यमाणस्यमथ्नतःक्षीरादिमथनंकुर्वतो
मंदरस्येव।२३।नोपचक्रमुः समीपंनप्रापुः।२४।आहवेयुद्धेः संस्तंभयिषुःप्रतिस्थापयितुमिच्छुः।राक्ष

तस्यक्रुद्धस्यनेत्राभ्यांप्रापतन्नस्रविंदवः।दीपाभ्यामिवदीप्ताभ्यांसार्चिषःस्नेहविंदवः।२२।दंता
न्विदशतस्तस्यश्रूयतेदशनस्वनः।यंत्रस्याकृष्यमाणस्यमथ्नतोदानवैरिव।२३।तमंतकमिव
क्रुद्धंचराचरचिखादिषुं।वीक्षमाणंदिशःसर्वाराक्षसानोपचक्रमुः।२४।ततःपरमसंक्रुद्धोराव
णोराक्षसाधिपः।अब्रवीद्रक्षसांमध्येसंस्तंभयिषुराहवे।२५।मयावर्षसहस्राणिचरित्वापरमं
तपः।तेषुतेष्ववकाशेषुस्वयंभुःपरितोषितः।२६।तस्यैवतपसोव्युष्ट्याप्रसादाच्चस्वयंभुवः।
नासुरेभ्योनदेवेभ्योभयंममकदाचन।२७।कवचंब्रह्मदत्तंमेयदादित्यसमप्रभं।देवासुरवि
मर्देषुनच्छिन्नंवज्रमुष्टिभिः।२८।तेनमामद्यसंयुक्तंरथस्थमिहसंयुगे।प्रतीयात्कोद्यमामा
जौसाक्षादपिपुरंदरः।२९।

सानितिशेषः द्वित्वाभावआर्षः।२५।अवकाशेषुतत्तत्तपःसमाप्तिसमयेषुस्वायंभुवस्थानविषयेषु
वा।२६।व्युष्ट्याफलोदयेन।२७।भयाभावहेतुमाह·कवचमिति।२८।क्रुद्धोक्तित्वादद्येत्यस्यपुनरुक्ति
र्नदोषायप्रतीयात् अभिमुखोभवेत्।२९।

१३॥नामेतिप्रसिद्धौ·ममत्वयाप्रेतकार्याणिकर्त्तुंयोग्यानित्वंतुविपरीतेवर्त्तसेयतस्त्वदीयानियमाकर्त्तव्यानिभविष्यंति॥१४॥१५॥रावणश्चसमाधिगमितिपाठेसम्यगाधिःसमाधिर्मनोव्यथातांगच्छतीत्यर्थइति

यौवराज्यंचलंकांचरक्षांसिचपरंतप॥मातरंमांचभार्यांचक्वगतोसिविहायनः॥१३॥ममनामत्वयावीरगतस्ययमसादनं॥प्रेतकार्याणिकार्याणिविपरीतेहिवर्त्तसे॥१४॥सत्वंजीवतिसुग्रीवेलक्ष्मणेचसराघवे॥ममशल्यमनुधृत्यक्वगतोसिविहायनः॥१५॥एवमादिविलापार्त्तंरावणंराक्षसाधिपं॥आविवेशमहान्कोपःपुत्रव्यसनसंभवः॥१६॥प्रकृत्याकोपनंह्येनंपुत्रस्यपुनराधयः॥दीप्तंसंदीपयामासुःघर्मेर्क्कइवरश्मयः॥१७॥कोपाद्विजृंभमाणस्यवक्त्राद्व्यक्तमभिज्वलन्॥उत्पपातसधूमाग्निर्वृत्रस्यवदनादिव॥१८॥सपुत्रवधसंतप्तःशूरःक्रोधवशंगतः॥समीक्ष्यरावणोबुध्यावैदेह्यारोचयद्वधं॥१९॥तस्यप्रकृत्यारक्तेचरक्तेक्रोधाग्निनापिच।रावणस्यमहाघोरेदीप्तेनेत्रेबभूवतुः॥२०॥घोरंप्रकृत्यारूपंतत्तस्यक्रोधाग्निमूर्छितं॥बभूवरूपंक्रुद्धस्यरुद्रस्येवव्यवस्थितं॥२१॥

तीर्थः॥१६॥पुत्रस्याधयः।पुत्रनाशजाश्चाधयःप्रकृत्याकोपनमतएवदीप्तंनित्यंकोपदीप्तंपुनश्चाधयोदीपयामासुः॥१७॥१८॥बुध्यासमीक्ष्यवैदेह्याः।कित्वमेपुत्रवधमत्तमित्यालोच्येत्यर्थः॥१९॥२०॥२१॥ ॥ श्र ॥

यत्रमैथिलीतत्रनिष्पपातसिंहनादंविचुक्रुशुःतद्रूपंक्रोशनंकृतवंतःसचिवाइतिशेषः॥३८॥३९॥तेषांसिं
हनादप्रवर्त्तौकारणमाहाद्येनेति॥३९॥आहृत्यपरत्नानिभुंक्ते॥४०॥अशोकवनिकांगतांवैदेहीम

व्रजंतंराक्षसंप्रेक्ष्यसिंहनादंविचुक्रुशुः॥ऊचुश्चान्योन्यमालिंग्यसंक्रुद्धंप्रेक्ष्यराक्षसं॥३८॥अद्यै
नंताबुभौदृष्ट्वाभ्रातरौप्रव्यथिष्यतः॥लोकपालाहिचत्वारःक्रुद्धेनानेननिर्जिताः॥बहवःशत्रवश्चा
न्येसंयुगेष्वभिपातिताः॥३९॥त्रिषुलोकेषुरत्नानिभुंक्तेआहृत्यरावणः॥विक्रमेचबलेचैवना
स्त्यस्यसदृशोभुवि॥४०॥तेषांसंजल्पमानानामशोकवनिकांगतां॥अभिदुद्राववैदेहींरावणः
क्रोधमूर्छितः॥४१॥वार्यमाणःसुसंक्रुद्धःसुहृद्भिर्हितबुद्धिभिः॥अभ्यधावतसंक्रुद्धःखेग्र
होरोहिणीमिव॥४२॥मैथिलिरक्ष्यमाणातुराक्षसीभिरनिंदिता॥ददर्शराक्षसंक्रुद्धंनिस्त्रिंशव
रधारिणं॥४३॥तंनिशाम्यसनिस्त्रिंशंव्यथिताजनकात्मजा॥निवार्यमाणंबहुशःसुहृद्भिरनि
वर्त्तिनं॥४४॥सीतादुःखसमाविष्टाविलपंतीदमब्रवीत्॥यथायंमामभिक्रुद्धःसमभिद्रवतिस्व
यं॥वधिष्यतिसनाथांमामनाथामिवदुर्मतिः॥४५॥

भिदुद्राव॥४१॥ग्रहःकुजादिः॥४२॥४३॥अनि
वार्यमाणमप्यनिवर्त्तिनं॥अनुवर्त्तिनमितिपाठेभिमुखमागच्छंतं॥४४॥यथायेनप्रकारेणानुभ्रम्यमानो
यंमामभिद्रवति॥४५॥

तदेतस्यव्याख्यानंदेवासुरविमर्देष्वितितद्विषयेऽभिप्रसन्नेनप्रीतेनयद्धनुर्दत्तं॥३०॥तदद्यतूर्यशतैरनेकमं
गलवाद्यध्वनिभिःसहपरंधनुर्ब्रह्मदत्तंधनुरुत्थाप्यतांउद्ध्रियतांआहवेरामलक्ष्मणयोर्वधाय॥३१॥व्य
वस्यतव्यवास्यत·निश्चितवानित्यर्थः॥३२॥सुघोरःघोरचित्तः॥३३॥किंचिदेवहतंनदेवहत्वातन्नतस्मिन्का

यत्तदाभिप्रसन्नेनसशरंकार्मुकंमहत्॥देवासुरविमर्देषुममदत्तंस्वयंभुवा॥३०॥अद्यतूर्य
शतैर्भीमंधनुरुत्थाप्यतांमम॥रामलक्ष्मणयोरेववधायपरमाहवे॥३१॥सपुत्रवधसंतप्तःक्रूरः
क्रोधवशंगतः॥समीक्ष्यरावणोबुध्यासीतांहंतुंव्यवस्यत॥३२॥प्रत्यवेक्ष्यतुताम्राक्षःसुघोरोघोर
दर्शनः॥दीनोदीनस्वरान्सर्वांस्तानुवाचनिशाचरान्॥३३॥माययाममवत्सेनवंचनार्थंवनौक
सां॥किंचदेवहतंतत्रसीतेयमितिदर्शितं॥३४॥तदिदंतथ्यमेवाहंकरिष्येप्रियमात्मनः॥वैदेहींना
शयिष्यामित्तत्रबंधुमनुव्रतां॥इत्येवमुक्त्वासचिवान्खड्गमाशुपरामशात्॥३५॥उद्धत्यगुणसं
पन्नंविमलांबरवर्चसं॥निष्पपातसवेगेनसभार्यःसचिवैर्वतः॥३६॥रावणःपुत्रशोकेनभशमा
कुलचेतनः॥संक्रुद्धःखड्गमादायसहसायत्रमैथिली॥३७॥

लेइयंवास्तवसीताहतेतिमषैवद
र्शितंनदिदंशत्रुणामप्रियकरंरूपंवस्तुतआत्मनःप्रियंतथ्यमेवकरिष्ये॥३४॥यदेवमतोवैदेही
मितितत्रबंधुंवस्तुतोऽनुव्रतां॥३५॥विमलांबरवर्चसंनिर्मलाकाशकांति॥३६॥३७॥ ॥

५५।५६॥एवंविलपंतींचंद्रेणविनाकृतांग्रहवशंगतांरोहिणीमिवमैथिलींदृष्ट्वा॥५७॥सुपार्श्वोनामामा
त्यःशुचिःशुद्धव्रतस्तादिनरसचिवैरेवंवक्तुमयोग्यमितिनिवार्यमाणोपिरावणंप्रतीदमब्रवीत्·अस्ये
वाविंध्यइतिनामांतरंअतएवभारते·अथशोकवनिकास्थांतांरामदर्शनलालसां·खड्गमादायदुरात्मा

निराशानिहतेपुत्रेदत्वाश्राद्धमचेतना॥अग्निमाविक्ष्यतेनूनंआपोवापिप्रवेक्ष्यति॥५५॥धिगस्तुकु
ब्जामसतींमंथरांपापनिश्चयां॥यन्निमित्तमिमंशोकंकौशल्याप्रतिपत्स्यते॥५६॥इत्येवंमैथि
लींदृष्ट्वाविलपंतींतपस्विनीं॥रोहिणीमिवचंद्रेणविनाग्रहवशंगतां॥५७॥एतस्मिन्नंतरेतस्य
अमात्यःशीलवान्शुचिः॥सुपार्श्वोनाममेधावीरावणंरक्षसांवरं॥निवार्यमाणःसचिवैरिदंवच
नमब्रवीत्॥५८॥कथंनामदशग्रीवसाक्षाद्वैश्रवणानुज॥हंतुमिच्छसिवैदेहींक्रोधाद्धर्ममपास्यच॥५९॥वेदविद्याव्रतस्नातःस्वकर्मनिरतस्तथा॥स्त्रियःकस्माद्वधंवीरमन्यसेराक्षसेश्वर॥६०॥

जवेनाभिपपातह·तद्बुध्वातस्यदुर्बुद्धेरविंध्यःपापनिश्चयं·शमयामाससंक्रुद्धंश्रुयतांयेनहेतुने
उक्तं॥५८॥वैश्रवणानुजेत्यनेनमहाकुलप्रसूतत्वमुक्तं॥५९॥धर्मापासनंचतथायुक्तंधार्मिकत्वादे
वेत्याह·वेदेति·वेदविद्याग्रहणापेक्षितब्रह्मचर्यव्रतपूर्वंविद्यांगृहीत्वास्नातःगुरुकुलात्समावृत्तः
तदनंतरंदारग्रहणपूर्वंनित्याग्निहोत्रादिस्वकर्मनिरतः॥६०॥ अ

वधिष्यतीत्यत्रकारणमाह बहुश इति ॥४६॥ अनुपस्थानेसति अनंगीकारेसति ॥४७॥४८॥४९॥ रामलक्ष्मणावहत्वातौहंतुमशक्नुवानेन ॥५०॥ हनूमतस्तत्तद्वाक्यंमत्पृष्ठमारोहेदानीमेवत्वांरामसमीपंनेष्या

बहुशश्चोदयामासभर्त्तारंमामनुव्रतां ॥ भार्याममभवस्वेतिप्रत्याख्यातोध्रुवंमया ॥४६॥ सोयं
मामनुपस्थानेव्यक्तंनैराश्यमागतः ॥ क्रोधमोहसमादिष्टोव्यक्तंमांहंतुमुद्यतः ॥४७॥ अथवा
तौनरव्याघ्रौभ्रातरौरामलक्ष्मणौ ॥ मन्निमित्तमनार्येणसमरेद्यनिपातितौ ॥४८॥ भैरवोहिमहान्नादोराक्षसानांश्रुतोमया ॥ बहूनामिहहृष्टानांतथाविक्रोशतांप्रियं ॥४९॥ अहोधिङ्मन्निमित्तोयंविनाशोराजपुत्रयोः ॥ अथवापुत्रशोकेनअहत्वारामलक्ष्मणौ ॥५०॥ विधमिष्यतिमांरौद्रोराक्षसःपापनिश्चयः ॥ हनूमतस्तत्तद्वाक्यंनकृतंक्षुद्रयामया ॥५१॥ यद्यहंतस्यपृष्ठेनतदायायासमनिर्जिता ॥ नाद्यैवमनुशोचेयंभर्त्तुरंकगतासती ॥५२॥ मन्येतुहृदयंतस्याःकौशल्यायाःफलिष्यति ॥ एकपुत्रायदापुत्रंविनष्टंश्रोष्यतेयुधि ॥५३॥ साहिजन्मचबाल्यंचयौवनंचमहात्मनः ॥ धर्मकार्याणिरूपंचरुदंतीसंस्मरिष्यति ॥५४॥

मीति उक्तरूपं रामेणानिर्जितापियदि तदाऽयासं अयासिषं तदाद्यैवंनानुशोचेयं ॥५१॥५२॥ यदाश्रोष्यतेतदाफलिष्यतिस्फुटिष्यति यदिरामोपिहन्यतइतिशेषः तदेवाह एकपुत्रेति ॥५३॥५४॥
श्र

एकंरामंपरिक्षिप्येतितस्यैवमूलत्वात्तमेकमेवपरिक्षिप्यपरितोनिरुध्यहंतुमर्हथ·शरवर्षाणिवर्षथे
तिशेषः॥४॥अथवेति अद्यरामहननासंभवे भवद्भिरद्यभिन्नगात्रंश्वोनिहंतास्मि॥५॥इत्येतद्वचं प्रथ

एकंरामंपरिक्षिप्यसमरेहंतुमर्हथ॥यद्वृष्टाःशरवर्षाणिप्रावृट्कालेइवांबुदाः॥४॥अथवा
हंशरैस्तीक्ष्णौर्भिन्नगात्रंमहाहवे॥भवद्भिःश्वोनिहंतास्मिरामंलोकस्यपश्यतः॥५॥इत्येत
द्वाक्यमादायराक्षसेंद्रस्यराक्षसाः॥निर्ययुस्तेरथैःशीघ्रैर्नानानीकैश्चसंयुताः॥६॥परिघान्प
ट्टिशांश्चैवशरखड्गपरश्वधान्॥शरीरांतकरान्सर्वेचिक्षिपुर्वानरान्प्रति॥७॥वानराश्च
द्रुमांश्चैलान्राक्षसान्प्रतिचिक्षिपुः॥८॥ससंग्रामोमहाभीमःसूर्यस्योदनंप्रति॥रक्षसां य
वानराणांचतुमुलःसमपद्यत॥९॥तेगदाभिश्चचित्राभिःप्रासैःखड्गैःपरश्वधैः॥अन्योन्यं
समरेजघ्नुस्तदावानरराक्षसाः॥१०॥एवंप्रवृत्तेसंग्रामेत्वद्भुतंसुमहद्रजः॥रक्षसांवानरा
णांचशांतंशोणितविस्रवैः॥११॥

मपद्यतोक्तं॥६॥७॥८॥सूर्यस्योदयनंप्रति·चतुर्दशीसूर्योदयमारभ्येत्यर्थः त्रयोदशीरात्रिशेषेरावण
स्यसीतासमीपगमनमितिबोध्यं॥९॥गदाभिरन्योन्यंजघ्नुःयद्यपिवानराणांगदाद्यायुधाभावस्त
थापिराक्षसहस्तेभ्यआच्छिद्यगृहीतैस्तैस्तेषांयुद्धसंभवइतिबोध्यं॥१०॥११॥ ॥

रूपसंपन्नांमैथिलींप्रत्यवेक्षस्वरामवधपर्यंतमितिशेषः त्वंतस्मिन्नेवराघवएवक्रोधमुत्सृज ॥ ६१ ॥ अद्यकृ
ष्णपक्षचतुर्दशीतस्यामभ्युत्थानंसमरोद्योगंकृत्वाअमावास्यायांविजयायनिर्याहिप्रस्थानंकुरु ॥ ६२ ॥ ६२

मैथिलींरूपसंपन्नांप्रत्यवेक्षस्वपार्थिव ॥ तस्मिन्नेवसहास्माभिराहवेक्रोधमुत्सृज ॥ ६१ ॥ अभ्युत्था
नंत्वमद्यैवकृष्णपक्षचतुर्दशीं ॥ कृत्वानिर्याह्यमावास्यांविजयायबलैर्वृतः ॥ ६२ ॥ शूरोधीमान्र
थीखड्गीरथप्रवरमास्थितः ॥ हत्वादाशरथिंभीमंभवान्प्राप्स्यतिमैथिलीं ॥ ६३ ॥ सतदुरात्मासुहृ
दानिवेदितंवचः सुधर्म्यंप्रतिगृह्यरावणः गृहंजगामाथततश्चवीर्यवान्पुनःसभांचप्रययौ
सुहृद्वृतः ॥ ६४ ॥ इत्यार्षेश्रीरामायणेयुद्धकांडेत्रिनवतितमःसर्गः ॥ ९३ ॥ ॥ सप्रविश्यसभांराजा
दीनःपरमदुःखितः ॥ निषसादासनेमुख्येसिंहःक्रुद्धइवश्वसन् ॥ १ ॥ अब्रवीच्चसतान्सर्वान्ब
लमुख्यान्महाबलः ॥ रावणःप्रांजलिर्वाक्यंपुत्रव्यसनकर्शितः ॥ २ ॥ सर्वेभवंतःसर्वेणहस्त्यश्वे
नसमावृताः ॥ निर्यातरथसंघैश्चहस्त्यश्वैश्चोपशोभिताः ॥ ३ ॥

॥ ६४ ॥ कृ० ॥ ८५ ॥ इतिश्रीरामा
भिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेत्रिनवतितमःससर्गः ॥ ९३ ॥ स इति ॥ १ ॥ रावणःप्रां
जलिरिति ॥ परमापदःप्राप्त्याअवसिष्टानांयुद्धोन्मुख्यार्थंनमस्कारंकरोतीत्याशयः ॥ २ ॥ सर्वे
णएकमपिहस्त्यश्वरथपादातमत्यक्त्वेत्यर्थः ॥ ३ ॥ ॥ ॥ ॥

तथात्वंकर्त्तारमपिनददृशुरित्याह·चालयंतमिति·कर्त्तुरदृष्टत्वेपिक्रियामात्रदर्शनेदृष्टांतोवातंव
नगतंयथास्पर्शाविधमनादिकार्यैर्यथावायुरनुमितएवभवतितथारामोप्यनुमितएवनप्रत्यक्षइ
तिभावः॥२१॥२२॥इंद्रियार्थाःशब्दादिविषयास्तेषुतिष्ठंतमनुभावितृत्वेनावस्थितंभूतात्मानंजीवंप्र
जायथानपश्यंतितिप्रत्यक्षतस्तद्वदित्यर्थः॥२३॥एषगजानीकवतीगजानीकमेवहंतिनान्यमितिगजा

चालयंतंमहासैन्यंविधमंतंमहारथान्॥ददृशुस्तेनवैरामंवातंवनगतंयथा॥२१॥छिन्नंभि
न्नंशरैर्दग्धंप्रभग्नंशस्त्रपीडितं॥बलंरामेणददृशुर्नरामंशीघ्रकारिणं॥२२॥प्रहरंतंशरीरेषु
नतेपश्यंतिराघवं॥इंद्रियार्थेषुतिष्ठंतंभूतात्मानमिवप्रजाः॥२३॥एषहंतिगजानीकमेषहंति
महारथान्॥एषहंतिशरैस्तीक्ष्णैःपदातीन्वाजिभिःसह॥२४॥इतितेराक्षसाःसर्वेरामस्यसदृ
शान्रणे॥अन्योन्यंकुपिताजघ्नुःसादृश्याद्राघवस्यतु॥२५॥

नीकस्थामन्यंतेएवमन्येपिमन्यं
तेस्मेत्यर्थः॥२४॥इतिएषंहंतीत्यादिप्रकारेणकुपिताःसर्वेतेराक्षसाःरामस्यसदृशान्‌सदृशत्वेन
प्रतीयमानान्राक्षसान्रामसादृश्यादन्योन्यंजघ्नुःसदृशारावणस्यैतेरणेराक्षससत्तमाइतिपू
र्वार्धपाठेरावणेनदेवासुरंयुद्धादौसाक्षात्सात्व्यार्थमूलबलनयातेषांदृष्टप्रत्ययानामत्यूर्जित
बलानामेवसंगृहीतत्वात्तेषांरावणसादृश्यं॥२५॥ ॥ ॥

मातंगरथरूपेकूलेयासांताःशरीराण्येवसंघाटाःकाष्ठसमूहास्तान्वहंतिताः॥१२॥१३॥१४॥१५॥१६॥१७

मातंगरथकूलाश्वशरमत्स्याध्वजद्रुमाः॥शरिरसंघाटवहाःप्रसस्रुःशोणितापगाः॥१२॥तत
स्तेवानराःसर्वेशोणितौघपरिप्लुताः॥ध्वजवर्मरथानश्वान्नानाप्रहरणानिच॥आप्लुत्याप्लु
त्यसमरेवानरेंद्राबभंजिरे॥१३॥केशान्कर्णललाटंचनासिकाश्चप्लवंगमाः॥रक्षसांदश
नैस्तीक्ष्णैर्नखैश्चापिव्यकर्त्तयन्॥१४॥एकैकंराक्षसंसंख्येशतंवानरपुंगवाः॥अभ्यधावंत
पतितंवृक्षशाकुनयोयथा॥१५॥तदागदाभिर्गुर्वीभिःप्रासैःखङ्गैःपरस्वधैः॥निर्जघ्नुर्वानरा
न्घोरान्राक्षसाःपर्वतोपमाः॥१६॥राक्षसैर्वध्यमानानांवानराणांमहाचमूः॥शरणंशरणं
यातारामंदशरथात्मजं॥१७॥ततोरामोमहातेजाधनुरादायवीर्यवान्॥प्रविश्यराक्षसंसैन्यं
शरवर्षंववर्षच॥१८॥प्रविष्टंतुतदारामंमेघाःसूर्यइवांबरे॥नाधिजग्मुर्महाघोरानिर्दहंतं
शराग्निना॥१९॥कृतान्येवसुघोराणिरामेणरजनीचराः॥रणेरामस्यददृशुःकर्माण्यसुकराणि
नि॥२०॥

१८॥१९॥रजनीचरारामस्यरणेऽसुकराणिकर्माणिरामेणकृतान्येवददृशुःनतुक्रियमाणानि॥२०

अनीकमिति·एकेभैकरथा त्र्यश्वा पत्तिः पंचपदातिका पत्त्यंगैस्त्रिगुणैः सर्वैः क्रमादाख्यायथोत्तरं·सेनामुखं गुल्मगणौ वाहिनी पतना चमूः अनीकिनी दशानीकिन्यक्षौहिणीत्यमरोक्तः प्रकारेण दशसंख्यापतिस्तत्र त्रिगुणं सेनामुखं तत्त्रिगुणो गुल्मः तत्त्रिगुणो गणः गण त्रिगुणा वाहिनी तत्त्रिगुणा पतना तत्त्रिगुणा चमूः चमूत्रिगुणा अनीकिनी·एवं च दशोनत्रिंशताधिकसप्तसहस्रसंख्याता चमूरनीकं·सहस्राण्येव साहस्रं दशसाहस्राण्यनीकान्यस्मिन्सन्तीति तत्तु रथानां दशसहस्राण्यनीकानीत्य

अनीकं दशसाहस्रं रथानां वातरंहसा॥अष्टादशसहस्राणि कुंजराणां तरस्विनां॥३१॥
चतुर्दशसहस्राणि सारोहाणां च वाजिनां॥पूर्णे शतसहस्रे द्वे राक्षसानां पदातिनां॥३२॥दि
वसस्याष्टभागेन शरैरग्निशिखोपमैः॥हतान्येकेन रामेण रक्षसां कामरूपिणां॥३३॥

र्थः·एकोनत्रिंशल्लक्षाधिकसप्तकोटिसंख्यासंख्याता रथा इत्युक्तं·अष्टादशसहस्राणीत्यत्राप्यनीकमिति विभक्तिपरिणामेन योज्यं·तेन विंशतिसहस्राधिकद्वादशलक्षोत्तरत्रयोदशकोटिसंख्यागजा इत्युक्तं·चतुर्दशसहस्राण्यनीकानि षष्टिसहस्राधिकविंशतिलक्षोत्तरदशशतकोटिसंख्यावाजिन इत्यर्थः·शतसहस्रे द्वेऽनीके अष्टाशीतिलक्षोत्तरपंचचत्वारिंशत्कोट्यधिकशतकोटिसंख्याः पदातय इत्यर्थः॥३१॥३२॥दिवसस्याष्टभागेन चतुर्दशीसंबंध्यंत्यमुहूर्त्तद्वयेन॥३३॥रामरा

राक्षसानांपरस्परंरामसादृश्यप्रतीतौकारणमाहमोहिताइति॥२६॥अतएवतेरामसहस्राणिपश्यंतिपु
नश्चएकमेवपश्यंति॥२७॥भ्रमंतीमाकर्षणवेगतोऽनवस्थितांकांचनींस्वर्णमयीकार्मुकस्यकोटिंधनु
ष्कोटिंवेगवशादलातचक्रप्रतिमांददृशुराघवस्तुनेतिसंवंधः॥२८॥लाघवातिशयान्मंडलीकृतकार्मु
कंराक्षसान्निघ्नंतंरामंकालचक्रेणोपमिनोतिशरीरेतिशरीरंमध्यदेहएवनाभिश्चक्रस्येवमध्यंय

नतेददृशिरेरामंदहंतमपिवाहिनीं॥मोहिताःपरमास्त्रेणगांधर्वेणमहात्मना॥२६॥तेतुरामस
हस्राणिरणेपश्यंतिराक्षसाः॥पुनःपश्यंतिकाकुत्स्थमेकमेवमहाहवे॥२७॥भ्रमंतीकांचनीं
कोटिंकार्मुकस्यमहात्मनः॥अलातचक्रप्रतिमांददृशुस्तेनराघवं॥२८॥शरीरनाभिंसत्वार्चिः
शरारंनेमिकार्मुकं॥ज्याघोषतलनिर्घोषंतेजोबुद्धिगुणप्रभं॥२९॥दिव्यास्त्रगुणपर्यंतनिघ्नं
तंयुधिराक्षसान्॥ददृशूरामचक्रंतत्कालचक्रमिवप्रजाः॥३०॥

स्यतत्सत्वंबलमेवार्चिर्ज्वा
लायस्यतत्·शराएवारामध्यकाष्ठानियस्यतत्·नेमिर्वलयाकारोऽवयवविशेषस्तद्रूपंकार्मु
कंयस्यतत्·तलज्याघात्वारणेनतज्जोघोषोलक्ष्यतेज्याघोषतलघोषावेवनिर्घोषोध्वनिर्य
स्यतत्तेजःप्रतापःबुद्धिर्ज्ञानंतद्रूपौगुणावेवप्रभायस्यतत्॥२९॥दिव्यास्त्रगुणोदिव्यास्त्रवैभ
वंतंदेवपर्यंतोधारणायस्यतत्॥३०॥

रावणेनप्रयुक्तानियुद्धार्थंप्रेषितानिरामेणाहतानिदृष्ट्वावृद्धास्त्रश्श्रुत्वाहतशेषाः वालवृद्धानिशाचराः राक्षस्यश्चसमागम्यसंघशः संभ्रम्यदीनाश्चिंतापरिप्लुताश्च अभवन्नितिशेषः॥४॥५॥परिदेवनप्रकारः कथमिति·निर्नतोदरीनिम्नोदरी॥६॥लोकवध्यालोकैर्वधार्हाः हीनरूपा·रामसांनिधानर्हकुत्सि

दृष्ट्वाश्रुत्वाचसंभ्रांताहतशेषानिशाचराः॥राक्षस्यश्चसमागम्यदीनाश्चिंतापरिप्लुताः॥४॥विधवाहतपुत्राश्चक्रोशंत्योहतवांधवाः॥राक्षस्यःसहसागम्यदुःखार्त्ताःपर्यदिवयन्॥५॥कथंसूर्पनखावृद्धाकरालानिर्नतोदरी॥आससादवनेरामंकंदर्पसमरूपिणं॥६॥सुकुमारंमहासत्वंसर्वभूतहितेरतं॥तंदृष्ट्वालोकवध्यासाहीनरूपाप्रकामिता॥७॥कथंसर्वगुणैर्हीनागुणवंतंमहौजसं॥सुमुखंदुर्मुखीरामंकामयामासराक्षसी॥८॥जनस्यास्याल्पभाग्यत्वाद्वलिनीश्वेतमूर्द्धजा॥अकार्यमपहास्यंचसर्वलोकविगर्हितं॥९॥राक्षसानांविनाशायदूषणस्यखरस्यच॥चकाराप्रतिरूपासाराघवस्यप्रधर्षणं॥१०॥ श्र ॥

तरूपा अथापिरामेप्रकामितासंजातप्रकामा॥७॥८॥अस्यजनस्यराक्षसजनस्यबलिनीःजरावशाज्जातवलिःवलीत्यादित्वादिनिः॥९॥अत्रप्रतिरूपाविकृतरूपा अप्रतिरूपस्येतिपाठेतदसदृशाकारकस्येति अर्थः॥१०॥

राम·
२८९

२०९

हतशेषाःकतिपयेलंकामभिपेतुः॥३४॥आक्रीडंक्रीडातस्याभूमिः॥३५॥३६॥प्रत्यनंतरंआसन्नं॥३७॥ममवा

तेहताश्वाहतरथाःशांताविमथितध्वजाः॥अभिपेतुःपुरींलंकांहतशेषानिशाचराः॥३४॥हतैर्गज
पदातश्वैस्तद्बभूवरणाजिरं॥आक्रीडभूमिःक्रुद्धस्यरुद्रस्येवमहात्मनः॥३५॥ततोदेवाःसगंधर्वाः
सिद्धाश्चपरमर्षयः॥साधुसाध्वितिरामस्यतत्कर्मसमपूजयन्॥३६॥अब्रवीच्चतदारामःसुग्री
वंप्रत्यनंतरं॥विभीषणंचधर्मात्माहनूमंतंचवानरं॥३७॥जांबवंतंहरिश्रेष्ठंमैंदंद्विविदमेव
च॥एतदस्त्रबलंभीमंममवात्र्यंबकस्यवा॥३८॥निहत्यतांराक्षसराजवाहिनींरामस्तदाश
क्रसमोमहात्मा॥अस्त्रेषुशस्त्रेषुजितक्लमश्चसंस्तूयतेदेवगणैःप्रहृष्टैः॥३९॥इत्यार्षेश्री
रामायणेयुद्धकांडेचतुर्नवतितमःसर्गः॥९४॥ नानिनाथसहस्राणिसारोहाणांचवाजि
नां॥रथानांत्वग्निवर्णानांसध्वजानांसहस्रशः॥१॥राक्षसानांसहस्राणिगदापरिघयोधिनां॥कां
चनध्वजचित्राणांशूराणांकामरूपिणां॥२॥निहतानिशरैर्दीप्तैस्तप्तकांचनभूषणैः॥
रावणेनप्रयुक्तानिरामेणाक्लिष्टकर्मणा॥३॥

त्र्यंबकस्यवाअनेनस्वस्यविष्णुत्वंसूचितं॥३८॥संस्तूयतेस्म॥३९॥क॥८६॥इतिश्रीरामाभिरामेश्रीरामी
येरामायणतिलकेयुद्धकांडेचतुर्नवतितमःसर्गः॥९४॥नानीतिसहस्रशःसहस्राणीत्यर्थः॥१॥२॥३॥

२१ ॥ इंद्रजितमपिहतंश्रुत्वानावबुध्यतेपराक्रममितिशेषः ॥ २२ ॥ कुलेकुलेगृहेगृहे ॥ २३ ॥ २४ ॥ २५ ॥ अपश्यंतोऽप
श्यंतः ॥ २६ ॥ रामहस्तात्प्राप्तमिदंस्वस्यभयंपूरोब्रह्मदत्तमहावरइतिकृत्वातत्सर्वान्नबुध्यते ॥ २७ ॥ उपस

कुंभकर्णंहतंश्रुत्वाराघवेणमहाबलं ॥ अतिकायंचदुर्मर्षंलक्ष्मणेनहतंतदा ॥ २१ ॥ प्रियंचेंद्र
जितंपुत्रंरावणोनावबुध्यते ॥ २२ ॥ ममपुत्रोममभ्राताममभर्त्तारणेहतः ॥ इत्येषश्रूयतेशब्दोराक्षसी
नांकुलेकुले । रथाश्चनागाश्चहतातत्रतत्रसहस्रशः ॥ रणेरामेणशूरेणहताश्चापिपदातयः ॥ २४ ॥
रुद्रोवायदिवाविष्णुर्महेंद्रोवाशतक्रतुः ॥ हंतिनोरामरूपेणयदिवास्वयमंतकः ॥ २५ ॥ हतप्रवीरा
रामेणनिराशाजीवितेवयं ॥ अपश्यंतोभयस्यांतमनाथाविलपामहे ॥ २६ ॥ रामहस्ताद्दशग्रीवःशू
रोदत्तमहावरः ॥ इदंभयंमहाघोरंसमुत्पन्नंनबुध्यते ॥ २७ ॥ तंनदेवानगंधर्वानपिशाचानरा
क्षसाः ॥ उपसृष्टंपरित्रातुंशक्तारामेणसंयुगे ॥ २८ ॥ उत्पाताश्चापिदृश्यंतेरावणस्यरणेरणे ॥
कथयंतिहिरामेणरावणस्यनिबर्हणं ॥ २९ ॥ पितामहेनप्रीतेनदेवदानवराक्षसैः ॥ रावणस्या
भयंदत्तंमनुष्येभ्योनयाचितं ॥ ३० ॥ तदिदंमानुषंमन्येप्राप्तंनिःसंशयंभयं ॥ जीवितांतकरंघोरंरक्ष
सांरावणस्यच ॥ ३१ ॥

ष्टंहंतुमारब्धं ॥ २८ ॥ कथयंतीतितदुत्पातफलंमाल्यवदादयोवृद्धाइतिशेषः ॥ २९ ॥
रामेणास्यवधेउपपत्तिंचाहुः पितामहेनेति-देवदानवराक्षसैःतेभ्यः ॥ ३० ॥ ३१ ॥ ॥

तन्निमित्तंधर्षणानिमित्तंसाऽऽनीतेतिच्छेदः वधायरक्षसामितिशेषः ॥११॥ प्राप्नोतिनप्राप्स्यतिच ॥१२॥ प्रार्थ
यानंप्रार्थयमानं-एकेनासहायेनरामेणब्रह्मदत्तवरमपिहतंविराधंसंप्रेक्ष्यास्थितस्यरावणस्यतदेक

तन्निमित्तमिदंवैरंरावणेनकृतंमहत् ॥ वधायसीतासानीतादशग्रीवेणरक्षसा ॥११॥ नचसी
तांदशग्रीवःप्राप्नोतिजनकात्मजां ॥ बद्धंबलवतावैरंअक्षयंराघवेणच ॥१२॥ वैदेहींप्रार्थयानं
तंविराधंप्रेक्ष्यराक्षसं ॥ हतमेकेनरामेणपर्याप्तंतन्निदर्शनं ॥१३॥ चतुर्दशसहस्राणिरक्षसांभी
मकर्मणां ॥ निहतानिजनस्थानेशरैरग्निशिखोपमैः ॥१४॥ खरश्चनिहतःसंख्येदूषणस्त्रि
शिरास्तथा ॥ शरैरादित्यसंकाशैःपर्याप्तंतन्निदर्शनं ॥१५॥ हतोयोजनबाहुश्चकबंधोरुधिरा
शनः ॥ क्रोधान्नादंनदन्सोथपर्याप्तंतन्निदर्शनं ॥१६॥ जघानबलिनंरामःसहस्रनयनात्मजं
वालिनंमेघसंकाशंपर्याप्तंतन्निदर्शनं ॥१७॥ ऋष्यमूकेवसंश्चैवदीनोभग्नमनोरथः ॥ सुग्री
वःप्रापितोराज्यंपर्याप्तंतन्निदर्शनं ॥१८॥ धर्मार्थसहितंवाक्यंसर्वेषांरक्षसांहितं ॥ युक्तंवि
भीषणेनोक्तंमोहात्तस्यनरोचते ॥१९॥ विभीषणवचःकुर्याद्यदिस्मधनदानुजः ॥ श्मशानभू
तादुःखार्त्तनियंलंकाभविष्यति ॥२०॥

मेवपर्याप्तंनिदर्शनंरामस्यसदेवासुरसकललोका
तिशयित्वावगमायपर्याप्तंनिदर्शनमित्यर्थः ॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥२०॥ ॥

३९॥४०॥ प्राप्तकालं कालोचितं पौलस्त्येन विभीषणेन यत एव यस्माद्रामादेव भयं दृष्टं स्वमंत्रशक्तिवैभवेनेति शेषः॥४१॥४२॥ क० ८९॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके युद्धकांडे पंचनवति

तन्न पश्यामहे लोके यो नः शरणदो भवेत्॥ राघवेणोपसृष्टानां कालेनेव युगक्षये॥३९॥ नास्ति नः
शरणं किंचिद्भये महति तिष्ठतां॥ दवाग्निवेष्टितानां हि करेणूनां यथा वने॥४०॥ प्राप्तकालं
कृतं तेन पौलस्त्येन महात्मना॥ यत एव भयं दृष्टं तमेव शरणं गतः॥४१॥ इतीव सर्वा रजनीच
रस्त्रियः परस्परं संपरिरभ्य वाहुभिः॥ विषेदुरार्त्तातिभयाभिपीडिता विनेदुरुच्चैश्च तदा सु
दारुणं॥४२॥ इत्यार्षे श्रीरामायणे यु० पंचनवतितमः सर्गः॥९५॥ आर्त्तानां राक्षसीनां तु लंका
यां वै कुले कुले॥ रावणः करुणं शब्दं शुश्राव परिदेवितं॥१॥ स तु दीर्घं विनिश्वस्य मुहूर्तं ध्यान
मास्थितः॥ बभूव परमक्रुद्धो रावणो भीमदर्शनः॥२॥ संदश्य दशनैरोष्ठं क्रोधसंरक्तलोचनः
राक्षसैरपि दुर्दर्शः कालाग्निरिव मूर्त्तिमान्॥३॥ उवाच च समीपस्थान् राक्षसान् राक्षसेश्वरः॥ क्रो
धाव्यक्तकथस्तत्र निर्दहन्निव चक्षुषा॥४॥ महोदरं महापार्श्वं विरूपाक्षं च राक्षसं॥ शीघ्रं वदत सै
न्यानि निर्यतिति ममाज्ञया॥५॥

नमः सर्गः॥९५॥ आर्त्तानामिति। कुले कुले गृहे गृहे॥१॥२॥३॥ क्रोधेनाव्यक्ता कथा कथनं यस्य सः॥४॥५॥ श्री

रावणेनपीड्यमानंदेवैःप्रसादितस्यब्रह्मणोनुग्रहादपितयोराक्षसानामित्याहुःपीड्यमानास्त्विति॥३२॥३३
दानवाराक्षसाश्चभयेनप्रभृताःदेवेभ्योभयंविभ्राणाएवंविचरिष्यंतिदेवाःस्वतःपरतोवास्मान्पीड
यिष्यंतीतिभययुक्ताएवभविष्यंतीत्यर्थः॥३४॥एवंब्रह्मणःप्रसादात्सभयत्वमात्रंप्राप्तंसंहाराधिकृ

पीड्यमानास्तुबलिनावरदानेनरक्षसा॥दीप्तैस्तपोभिर्विबुधाःपितामहमपूजयन्॥३२॥दे
वतानांहितार्थायमहात्मावैपितामहः॥उवाचदेवतास्तुष्टइदंसर्वांमहद्वचः॥३३॥अद्यप्र
भृतिलोकांस्त्रीन्सर्वेदानवराक्षसाः॥भयेनप्रभृतानित्यंविचरिष्यंतिशाश्वतं॥३४॥दैवतैस्तु
समागम्यसर्वैश्चेंद्रपुरोगमैः॥वृषध्वजस्त्रिपुरहामहादेवःप्रतोषितः॥३५॥प्रसन्नस्तुमहादे
वोदेवानेतद्वचोब्रवीत्॥उत्पत्स्यतिहितार्थंवोनारीरक्षःक्षयावहा॥३६॥एषादेवैःप्रयुक्तातु
कृत्यायथादानवान्पुरा॥भक्षयिष्यतिनःसर्वान्राक्षसघ्नीसरावणान्॥३७॥रावणस्यापनीतेनदु
र्विनीतस्यदुर्मतेः॥अयंनिष्ठानकोघोरःशोकेनसमभिप्लुतः॥३८॥

नरुद्रप्रसादेनतुनाशएवास्मा
कमित्याहुःदैवतैरिति॥३५॥३६॥साएषासीतैवेत्याहुःएषेतिपुरापूर्वकल्पेदेवैर्दानवनाशार्थंप्र
युक्ताकृत्यायथादानवान्हरतिस्मएवंदेवैःप्रयुक्ताएषासीतापिसरावणान्रावणसहितानस्मा
न्भक्षयिष्यति॥३७॥अपनीतेनअनयेननिष्ठानकोनाशःशोकसहितःप्राप्तः॥३८॥ ॥

सशरैःशरसहितैःवदनैःस्वीयैःसशरत्वात्सनालैःपंकजैरिव॥१६॥१७॥१८॥यत्नेनावेक्ष्यमवेक्षितुंयोग्यंततलंयस्या

सशरैरर्कवदनैः संख्येवानरयूथपाः॥मंडयिष्यंतिवसुधांसनालैरिवपंकजैः॥१६॥अद्ययूथप्रचं
डानांहरीणांद्रुमयोधिनां॥मुक्तेनैकेषुणायुद्धेभेत्स्यामिचशतंशतं॥१७॥हतोभ्राताचयेषांवैयेषां
चतनयोहतः॥वधेनाद्यरिपोस्तेषांकरोम्यस्रप्रमार्जनं॥१८॥अद्यमद्बाणनिर्भिन्नैःप्रस्तीर्णैर्गत
चेतनैः॥करोमिवानरैर्युद्धेयत्नावेक्ष्यतलांमहीं॥१९॥अद्यकाकाश्चगृध्राश्चयेचमांसाशिनोपरे
सर्वांस्तांस्तर्पयिष्यामिशत्रुमांसैःशराहतैः॥२०॥कल्प्यतांमेरथःशीघ्रंक्षिप्रमानीयतांधनुः॥अनु
प्रयांतुमांयुद्धेयेत्रशिष्टानिशाचराः॥२१॥तस्यतद्वचनंश्रुत्वामहापार्श्वोब्रवीद्वचः॥बलाध्य
क्षान्स्थितांस्तत्रबलंसंत्वर्यतामिति॥२२॥बलाध्यक्षास्तुसंयुक्ताराक्षसांस्तान्गृहेगृहे॥चोद
यंतःपरिययुर्लंकांलघुपराक्रमाः॥२३॥ततोमुहूर्तान्निष्पेतूराक्षसाभीमदर्शनाः॥नदंतोभीमव
दनानानाप्रहरणैर्भुजैः॥२४॥असिभिपट्टिशैःशूलैर्गदाभिर्मुशलैर्हुलैः॥शक्तिभिस्तीक्ष्णधारा
भिर्महद्भिःकूटमुद्गरैः॥२५॥यष्टिभिर्विविधैश्चक्रैर्निशितैश्चपरश्वधैः॥भिंडिपालैःशतघ्नीभि
रन्यैश्चापिवरायुधैः॥२६॥

स्तयाभूतां॥१९॥२०॥२१॥२२॥२३॥भुजैरुपलक्षिताः॥२४॥हुलैरायुधविशेषैः॥२५॥२६॥ श्रीरामचंद्रो

292

अभग्नानरावणप्रोत्साहनेनत्यक्तभयात्।६॥७।८॥ ततोवाच-ततउवाच-प्रहस्तक्रोधजोत्रप्रहासः।९

तस्यतद्वचनंश्रुत्वाराक्षसास्तेभयार्दिताः॥ चोदयामासुरव्यग्रान्राक्षसांस्तान्नृपाज्ञया।६। तेतु
सर्वेतथेत्युक्त्वाराक्षसाभीमदर्शनाः। कृतस्वस्त्ययनाःसर्वेतेरणाभिमुखाययुः॥७॥ प्रतिपूज्यय
थान्यायंरावणंतेमहारथाः॥ तस्थुःप्रांजलयःसर्वेभर्त्तुर्विजयकांक्षिणः॥८॥ ततोवाचप्रहस्तेता
न्रावणःक्रोधमूर्छितः॥ महोदरमहापार्श्वौविरूपाक्षंचराक्षसं॥९॥ अद्यवाणैर्धनुर्मुक्तैर्युगां
तादित्यसन्निभैः॥ राघवंलक्ष्मणंचैवनेष्यामियमसादनं॥१०॥ खरस्यकुंभकर्णस्यप्रहस्तें
द्रजितस्तथा। करिष्यामिप्रतीकारमद्यशत्रुवधादहं॥११॥ नैवांतरिक्षंनदिशोनचनद्योनापि
सागराः॥ प्रकाशत्वंगमिष्यंतिमद्बाणजलदावृताः॥१२॥ अद्यवानरमुख्यानांतानियूथा
निभागशः॥ धनुषाशरजालेनवधिष्यामिपतत्रिणा॥१३॥ अद्यवानरसैन्यानिरथेनपव
नौजसा॥ धनुःसमुद्रादुद्भूतैर्मथिष्यामिशरोर्मिभिः॥१४॥ व्याकोशपद्मचक्राणिपद्मके
सरवर्चसां॥ अद्ययूथतटाकानिगजवत्प्रमथाम्यहं॥१५॥

॥१०॥११॥ प्रकाशत्वंप्रकटत्वं।१२
पतत्रिणाप्रशस्तपक्षवता॥१३॥ धनुरूपात्समुद्रात्।१४॥ व्याकोशपद्मवक्त्राणिवक्त्ररूपविकसि
तपद्मानिपद्मकेसरवर्चसांवानराणामितिशेषः यूथरूपाणितटाकानिप्रमथामिप्रमथिष्यामि॥१५

३७।।३८।।३९।।आह्वयानानांस्पर्धयाआह्वयमानानां।।३९।।४०।।४१।।४२।।४३।।क॰।८८।इतिश्रीरामाभिरा

ऽंतरिक्षात्पपातोल्कानिर्घातसमनिस्वना।।विनेदुरशिवागृध्रावायसैरभिमिश्रिताः।।३७।।एता
नचिंतयन्घोरानुत्पातान्समवस्थितान्।।निर्ययौरावणोमोहाद्वधार्थंकालचोदितः।।३८।।ते
षांतुरथघोषेणराक्षसानांमहात्मनां।।वानराणामपिचमूर्युद्धायैवाभ्यवर्त्तत।।३९।।ऽन्योन्य
माह्वयानानांक्रुद्धानांजयमिच्छतां।।३९।।ततःक्रुद्धोदशग्रीवःशरैःकांचनभूषणैः।।वानराणा
मनीकेषुचकारकदनंमहत्।।४०।।निकृत्तशिरसःकेचिद्रावणेनवलीमुखाः।।केचिद्विच्छी
न्नहृदयाःकेचिच्छ्रोत्रविवर्जिताः।।४१।।निरुच्छ्वासाहताःकेचित्केचित्पार्श्वेषुदारिताः।।केचि
द्विभिन्नशिरसःकेचिच्चक्षुर्विनाकृताः।।४२।।दशाननःक्रोधविवृत्तनेत्रोयतोयतोभ्येतिरथे
नसंख्ये।।ततस्ततस्तस्यशरप्रवेगंसोढुंनशेकुर्हरियूथपास्ते।।४३।।इत्यार्षेश्रीरामा॰यु॰
षण्णवतितमःसर्गः।।९६।।तथातैःकृत्तगात्रैस्तुदशग्रीवेणमार्गणैः।।बभूववसुधातत्रप्र
कीर्णाहरिभिस्तदा।।१।।रावणस्याप्रसह्यंतंशरसंपातमेकतः।।नशेकुःसहितुंदीप्तंपतंगा
ज्वलनंयथा।।२।।तेर्दिताःनिशितैर्बाणैःक्रोशंतोविप्रदुद्रुवुः।।पावकार्चिसमाविष्टादह्यमानाय
थागजाः।।३।।

मेश्रीरा॰रा॰ति॰यु॰षण्णवतितमःसर्गः।।९६।।तयेति।।१।।एकतःएकैकस्मिन्प्रदेशे।।२।।३।।

२७॥अमायांसूर्योदयेइदंरथारोहणं सत्वगांभीर्यत्वबलातिशयात्॥२८॥२९॥३०॥३१॥प्रजविताश्वेनप्रक

अथानयन्बलाध्यक्षाश्चत्वारोरावणाज्ञया॥द्रुतंसूतसमायुक्तंयुक्ताश्वतुरगंरथं॥२७॥आरुरोहत
दाभीमंदीप्यमानंस्वतेजसा॥ततःप्रयातःसहसाराक्षसैर्बहुभिर्वृतः॥रावणःसत्वगांभीर्याद्दा
रयन्निवमेदिनीं॥२८॥नादंघोरंविमुंचंतोनिर्ययुर्जयकांक्षिणः॥रावणेनाभ्यनुज्ञातौमहापार्श्वम
होदरौ॥विरूपाक्षश्चदुर्द्धर्षौरथानारुरुहुस्तदा॥२९॥तेनुहृष्टाभिनर्दंतोभिंदंतइवमेदिनीं॥नादं
घोरंविमुंचंतोनिर्ययुर्जयकांक्षिणः॥३०॥ततोयुद्धायतेजस्वीरक्षोगणबलैर्वृतः॥निर्ययावुद्यत
धनुःकालांतकयमोपमः॥३१॥ततःप्रजविताश्वेनरथेनसमहारथः॥द्वारेणनिर्ययौतेनयत्रतौ
रामलक्ष्मणौ॥३२॥ततोनष्टप्रभःसूर्योदिशश्चतिमिरावृताः॥द्विजाश्चनेदुर्घोराश्चसंचचालचमे
दिनी॥३३॥ववर्षरुधिरंदेवश्चस्खलुश्चतुरंगमाः॥ध्वजाग्रेन्यपतद्गृध्रोविनेदुश्चाशिवाःशिवाः॥३४॥
नयनंचास्फुरद्वामंवामोबाहुरकंपत॥विवर्णवदनश्चासीत्किंचिदभ्रश्यतस्वनः॥३५॥ततोनिष्प
ततोयुद्धेदशग्रीवस्यरक्षसः॥रणेनिधनशंसीनिरूपाण्येतानिजज्ञिरे॥३६॥ ॥ ॥

र्घणासंजातवेगाअश्वायस्यतेन॥३२॥अथरावणस्यदुर्निमित्तान्याह॥नष्टप्रभेत्यादि॥३३॥३४॥३५॥
एतानिरूपाणिनिधनसूचकानीत्यर्थः॥३६॥

१४॥१५॥ उद्विग्नान् पलायनकृतोत्साहान् स्थापयामास पलायनान्निवर्त्तयामास॥१६॥१७॥ संप्रथनः सम्प

विरूपाक्षः स्वकं नाम धन्वी विश्राव्य राक्षसः॥ रथादाप्लुत्य दुर्धर्षो गजस्कंधमुपारुहन्॥१४॥
स तं द्विपमथारुह्य विरूपाक्षो महाबलः॥ ननर्द भीमनिर्ह्रादं वानरानभ्यधावत्॥१५॥ सुग्रीवे
स शरान् घोरान्विससर्ज चमूमुखे॥ स्थापयामास चोद्विग्नान्राक्षसान्संप्रहर्षयन्॥१६॥ सो
ऽतिविद्धः शितैर्बाणैः कपींद्रस्तेन रक्षसा॥ चुक्रोश च महाक्रोधो वधे चास्य मनो दधे॥१७॥ ततः पा
दपमुद्धृत्य शूरः संप्रथनो हरिः॥ अभिपत्य जघानास्य प्रमुखे तं महागजं॥१८॥ स तु प्रहाराभि
हतः सुग्रीवेण महागजः॥ अपासर्पद्धनुर्मात्रं निषसाद ननाद च॥१९॥ गजात्तु मथितात्तूर्ण
मपक्रम्य स वीर्यवान्॥ राक्षसोऽभिमुखः शत्रुं प्रत्युद्गम्य ततः कपिं॥२०॥ आर्षभं चर्म खड्गं च
प्रगृह्य लघुविक्रमः॥ भर्त्सयन्निव सुग्रीवमाससाद व्यवस्थितं॥२१॥ स हि तस्यापि संगत्य प्र
गृह्य विपुलां शिलां॥ विरूपाक्षस्य चिक्षेप सुग्रीवो जलदोपमां॥२२॥

म्प्रथनं युद्धं यस्य सः प्रमुखे प्रकृष्टे मुखप्रदेशे इत्यर्थः॥१८॥१९॥२०॥ आर्षभं ऋषभकृत्तिपरि
वीतं चर्मफलकं॥२१॥ तस्यापि तेनापि दत्तं प्रहारं संगत्य गृहीत्वा॥२२॥ श्र

४॥५॥गुल्मेसेनासंनिवेशो॥६॥आत्मनःसदृशं आत्मतुल्यसुषेणंनिक्षिप्य॥७॥सर्वैर्वानरयूथपाःसुषेणंविने

प्लवंगानामनीकानिमहाभ्राणीवमारुतः॥संययौसमरेतस्मिन्विधमन्रावणाःशरैः॥४॥कदनंतर
साकृत्वाराक्षसेंद्रोवनौकसां॥आससादततोयुद्धेत्वरितंराघवंरणे॥५॥सुग्रीवस्तान्कपीन्दृष्ट्वा
भग्नान्विद्रावितान्रणे॥गुल्मेसुषेणंनिक्षिप्यचक्रेयुद्धेद्रुतंमनः॥६॥आत्मनःसदृशंवीरंसतंनिक्षि
प्यवानरं॥सुग्रीवोभिमुखंशत्रुंप्रतस्थेपादपायुधः॥७॥पार्श्वतःपृष्ठतश्चास्यसर्वैर्वानरयूथपाः
अनुजग्मुर्महाशैलान्विविधांश्चवनस्पतीन्॥८॥ननर्दयुधिसुग्रीवःस्वरेणमहतामहान्॥पो
थयन्विविधांश्चान्यान्ममंथोत्तमराक्षसान्॥९॥ममर्दैतमहाकायोराक्षसान्वानरेश्वरः॥युगां
न्तसमयेवायुःप्रवृद्धान्नगमानिव॥१०॥राक्षसानामनीकेषुशैलवर्षंववर्षह॥अश्मवर्षंयथामे
घःपक्षिसंघेषुकानने॥११॥कपिराजविमुक्तैस्तैःशैलवर्षैस्तुराक्षसाः॥विकीर्णशिरसःपेतुर्विकी
र्णाइवपर्वताः॥१२॥अथसंक्षीयमाणेषुराक्षसेषुसमंततः॥सुग्रीवेणप्रभग्नेषुनदत्सुचपतत्सुच॥१३॥

तिशेषःमहाशैलानित्यादेर्गृहीत्वेतिशेषः॥८॥अन्यानवशिष्टानुत्तमराक्षसान्बलाध्यक्षराक्षसान्
९॥अगमान्वृक्षान्॥१०॥११॥१२॥संक्षीयमाणेषुहिंस्यमानेषु॥१३॥ अ

रामा॰ यु॰
२९५

प्रस्रवणो निर्झरमूलस्थानं प्रस्रवत्यस्मादिति व्युत्पत्तेः ॥३२॥ विरूपाक्षतरं अतिविरूपाक्षं ॥३३॥ पार्श्वेन परिव
र्त्तंतं तदुत्पन्नवयः ॥३४॥ संप्रयुक्तौ युद्धाय संमुखतया स्थितौ ॥३५॥ उद्धत्तगंगा उद्वेलगंगेत्यर्थः वानरबल

295

पपात रुधिरक्लिन्नः शोणितं हि समुद्गिरन् ॥ स्रोतेभ्यस्तु विरूपाक्षो जलं प्रस्रवणादिव ॥३२॥ वि
वृत्तनयनं क्रोधात्सफेनं रुधिराप्लुतं ॥ ददृशुस्ते विरूपाक्षं विरूपाक्षतरं कृतं ॥३३॥ स्फुरंतं परि
वर्त्तंतं पार्श्वेन रुधिरोक्षितं ॥ करुणं च विनर्दंतं ददृशुः कपयो रिपुं ॥३४॥ तथा तु तौ संयति संप्रयुक्तौ
तरस्विनौ वानरराक्षसानां ॥ बलार्णवौ सस्वनतुश्च भीमौ महार्णवौ द्वाविव भिन्नसेतू ॥३५॥ विना
शितं प्रेक्ष्य विरूपनेत्रं महाबलं तं हरिपार्थिवेन ॥ बलं समेतं कपिराक्षसानामुद्धत्तगंगाप्रति
मं बभूव ॥३६॥ इत्यार्षे श्रीरा॰ यु॰ सप्तनवतितमः सर्गः ॥९७॥ ॥ हन्यमाने बले तूर्णमन्योन्यं ते
महामृधे ॥ सरसीव महाघर्मे सूपक्षीणो बभूवतुः ॥१॥ स्वबलस्य तु घातेन विरूपाक्षवधेन
च ॥ बभूव द्विगुणं क्रुद्धो रावणो राक्षसाधिपः ॥२॥ प्रक्षीणं स्वबलं दृष्ट्वा वध्यमानं वलीमुखैः ॥
बभूवास्य व्यथा युद्धे दृष्ट्वा दैवविपर्ययं ॥३॥

मानंदेन राक्षसबलं शोकेनेति शेषः ॥३६॥ क॰ ॥८ धी॥
इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके युद्धकांडे सप्तनवतितमः सर्गः ॥९७॥ अन्योन्यं ह
न्यमाने ते बले सूपक्षीणे सुतरामुपक्षयती बभूवतुः सरसी इव संधिरार्षः ॥१॥२॥३॥ ॥

राम॰
२९५

स तामिति अपक्रम्य शिलाप्रहारमोघीकरणार्थं पार्श्वतोपसत्य सुग्रीवं प्राहरदित्यर्थः॥२३॥२४॥२५॥२६॥
अभिहतः सुग्रीवः पद्भ्यामपतत् आकुंचितजानुरभवदित्यर्थः॥२७॥२८॥ नैपुण्यात्वंचनासामर्थ्यात्

स तां शिलामापतंतीं दृष्ट्वा राक्षसपुंगवः॥ अपक्रम्य सुविक्रांतः खड्गेन प्राहरत्तदा॥२३॥ तेन ख
ड्गप्रहारेण रक्षसा बलिना हतः॥ मुहूर्त्तमभवद्भूमौ विसंज्ञ इव वानरः॥२४॥ स हसा स तदो
त्पत्य राक्षसस्य महाहवे॥ मुष्टिं संवर्त्य वेगेन पातयामास वक्षसि॥२५॥ मुष्टिप्रहाराभिहतो
विरूपाक्षो निशाचरः॥ तेन खड्गेन संक्रुद्धः सुग्रीवस्य चमूमुखे॥२६॥ कवचं पातयामास प
द्भ्यामभिहतो पतत्॥ स समुत्थाय पतितः कपिस्तस्य व्यसर्जयत्॥२७॥ तलप्रहारमशनेः स
मानं भीमनिस्वनं॥ तलप्रहारं तद्रक्षः सुग्रीवेण समुद्यतं॥२८॥ नैपुण्यान्मोचयित्वैनं मुष्टिनोर
स्यसिताडयत्॥ ततस्तु संक्रुद्धतरः सुग्रीवो वानरेश्वरः॥२९॥ मोक्षितं चात्मनो दृष्ट्वा प्रहारं तेन
रक्षसा॥ स ददर्शांतरं तस्य विरूपाक्षस्य वानरः॥३०॥ ततो न्यपातयत्क्रोधाच्छंखदेशे महत्त
लं॥ महेंद्राशनिकल्पेन तलेनाभिहतः क्षितौ॥३१॥

मोचयित्वा मोघीकृत्य॥२९॥ अंतरं प्रहारावसरं॥३०॥ शंखदेशे ललाटास्थिप्रदेशे। तलं प्रसतकरतल
प्रहारं॥३१॥

१५॥ससुग्रीव॥१६॥दीप्तंपरिघमाविध्यभ्रामयित्वाहस्तलाघवंतस्मैदर्शयन्तद्धयान्जघान॥१७॥१८॥समीयतुःसंगतौबभूवतुः॥१९॥भास्करवदाभासतेसाभास्कराभासातां॥२०॥आपतन्तींगदांदृष्ट्वेतिशेषःस

शरैश्चविददारैनंशूरःपरबलार्दनः॥सददर्शततःक्रुद्धःपरिघंपतितंभुवि॥१६॥आविध्यतुसतंदीप्तंपरिघंतस्यदर्शयन्॥परिघेणोग्रवेगेनजघानास्यहयोत्तमान्॥१७॥तस्माद्धतहयाद्वीरःसोवप्लुत्यमहारथात्॥गदांजग्राहसंक्रुद्धोराक्षसोथमहोदरः॥१८॥गदापरिघहस्तौतौयुधिवीरौसमीयतुः॥नर्दन्तौगोवृषप्रख्यौघनाविवसविद्युतौ॥१९॥ततःक्रुद्धोगदांतस्यचिक्षेपरजनीचरः॥ज्वलन्तींभास्कराभासांसुग्रीवायमहोदरः॥२०॥गदांतांसुमहाघोरामापतन्तींमहाबलः॥सुग्रीवोरोषताम्राक्षःसमुद्यम्यमहाहवे॥२१॥आजघानगदांतस्यपरिघेणहरीश्वरः॥पपाततरसाभिन्नःपरिघस्तस्यभूतले॥२२॥ततोजग्राहतेजस्वीसुग्रीवोवसुधातलात्॥आयसंमुशलंघोरंसर्वतोहेमभूषितं॥२३॥सतमुद्यम्यचिक्षेपसोप्यस्यप्राक्षिपद्गदां॥भिन्नावन्योन्यमासाद्यपेततुस्तेमहीतले॥२४॥ततोभिन्नप्रहरणौमुष्टिभ्यांतौसमीयतुः॥तेजोबलसमाविष्टौदीप्ताविवहुताशनौ॥२५॥

मुद्यम्यपरिघमितिशेषः॥२१॥गदापपातसपरिघश्चभिन्नइत्यर्थः॥२२॥२३॥ससुग्रीवःतंमुशलं॰सोपिमहोदरोपि॥२४॥२५॥ ॥ ॥

४।भर्तृपिंडस्यस्वामिकृतान्नादिप्रदानोपकारस्यनिर्वेष्टुंप्रत्युपकारंकर्त्तुं॥५॥६॥भर्तृवाक्येनचोदितःसस्वे

उवाचचसमीपस्थंमहोदरमनंतरं॥अस्मिन्कालेमहावाहो जयाशात्वयिमेस्थिता॥४॥जहिश
त्रुचमूंवीरदर्शयाद्यपराक्रमं॥भर्तृपिंडस्यकालोयंनिर्वेष्टुं साधुयुध्यतां॥५॥एवमुक्तस्तथेत्यु-
क्त्वाराक्षसेंद्रोमहोदरः॥प्रविवेशारिसेनांसपतंगइवपावकं॥६॥ततःसकदनंचक्रेवानराणांमहाबलः॥
भर्तृवाक्येनतेजस्वीस्वेनवीर्येणचोदितः॥७॥वानराश्चमहासत्वाःप्रगृह्यविपुलाःशिलाः॥प्रविश्या
रिबलंभीमंजघ्नुस्तेसर्वराक्षसान्॥८॥महोदरःसुसंक्रुद्धःशरैःकांचनभूषणैः॥चिच्छेदपाणिपादो
रूवानराणांमहाहवे॥९॥ततस्तेवानराःसर्वेराक्षसानांमहामृधे॥दिशोदशाद्रुताःकेचित्केचित्सु-
ग्रीवमाश्रिताः॥१०॥प्रभग्नंसमरेदृष्ट्वावानराणांमहावलं॥अभिदुद्रावसुग्रीवोमहोदरमनं
तरं॥११॥प्रगृह्यविपुलांघोरांमहीधरसमांशिलां॥चिक्षेपचमहातेजास्तद्वधायहरीश्वरः॥१२॥ता
मापतंतींसहसाशिलांदृष्ट्वामहोदरः॥असंभ्रांतस्ततोवाणैर्निर्विभेदततःशिलां॥१३॥राक्षसातेन
वाणौघैर्निकृत्तासासहस्रधा॥निपपाततदाभूमौगृध्रचक्रमिवाकुलं॥१४॥तांतुभिन्नांशिलांदृष्ट्वासु
ग्रीवःक्रोधमूर्छितः॥सालमुत्पाट्यचिक्षेपतंसचिच्छेदनैकधा॥१४॥

नवीर्येणकदनंचक्रे॥७॥८॥९॥१०॥अ
नंतरंसंनिहितमित्यर्थइतितीर्थः॥११॥१२॥१३॥आकुलंगध्रचक्रमिवनिपपात·शिलायाअनेकधाभग्नत्वा

टं·तत्सादशप॥१४॥

सर्वेविषण्णवदनादीनचेतसश्चबभूवुरितिशेषः भयवित्रस्तचेतसः भयकंपितचित्ताः सर्वेविद्रवंतिव
द्रवन् ॥३५॥ कीर्णंशीर्णं ॥३६॥ हर्षपदस्थानेहरुषेतिपाठेक्रुद्धोनुरोधाद्बभूवेतिशेषः ॥३७॥ क० ॥९० ॥द्व

विषण्णवदनाः सर्वे राक्षसा दीनचेतसः ॥ विद्रवंति ततः सर्वे भयवित्रस्तचेतसः ॥३५॥ महोदरं
तं विनिपात्य भूमौ महागिरेः कीर्णमिवैकदेशं ॥ सूर्यात्मजस्तत्र रराज लक्ष्म्या सूर्यस्पतेजोभि
रिवाप्रधृष्यः ॥३६॥ अथ विजयमवाप्य वानरेंद्रः समरमुखे सुरसिद्धयक्षसंघैः ॥ अवनितलग
तैश्च भूतसंघैर्हरुषसमाकुलितैर्निरीक्ष्यमाणः ॥३७॥ इत्यार्षे श्रीरा० यु० अष्टनवतितमः स
र्गः ॥९८॥ महोदरे तु निहते महापार्श्वो महाबलः ॥ सुग्रीवेण समीक्ष्याथ क्रोधात्संरक्तलोचनः ॥
॥१॥ अंगदस्य चमूं भीमां क्षोभयामास मार्गणैः ॥ स वानराणां मुख्यानामुत्तमांगानि राक्षसः ॥२॥
पातयामास कायेभ्यः फलं वृंतादिवानिलः ॥ केषांचिदिषुभिर्बाहूंश्चिच्छेदाथ स राक्षसः ॥३॥ वान
राणां सुसंरब्धः पार्श्वं केषांचिदाक्षिपत् ॥ तेर्दिता बाणवर्षेण महापार्श्वेन वानराः ॥४॥ अ

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके युद्धकांडे अष्टनवतितमः सर्गः ॥९८॥ महोदरेति
सुग्रीवेण महोदरे निहते सति तद्वधकर्त्तारं सुग्रीवं महापार्श्वः समीक्ष्य ॥१॥ अंगदचमूं क्षोभयामास
॥२॥ वृंतप्रसवबंधनं ॥३॥४॥

५९७

२६॥२७॥जहारजघ्नतुः॥२८॥२९॥दक्षिणंमंडलंचचकाराक्षामंचसुतूर्णंसंपरीयतुरकुरुतां॥३०॥वीर्येणाश्ला
घतइतिवीर्यश्लाघी॥३१॥सुग्रीवफलकेलग्नंखड्गमुत्कर्षतोमहोदरस्यशिरःखड्गेनजहार॥३२॥निकृ

जघ्नतुस्तौतदान्योन्यंनदंतौचपुनःपुनः॥तलैश्चान्योन्यमासाद्यपेततुश्चमहीतले॥२६॥उत्पे
ततुस्तदातूर्णंजघ्नतुश्चपरस्परं॥भुजैश्चिक्षिपतुर्वीरावन्योन्यमपराजितौ॥२७॥जग्मतुस्तौश्र
मंवीरौबाहुयुद्धेपरंतपौ॥जहारचतदाखड्गमदूरपरिवर्त्तिनं॥२८॥ततोरोषपरीतांगौनदंता
वभ्यधावतां॥उद्यतासीरणेहृष्टौयुद्धेशस्त्रविशारदौ॥२९॥दक्षिणंमंडलंचोभौसतूर्णंसंपरी
यतुः॥अन्योन्यमभिसंक्रुद्धौजयेप्रणिहिताबुभौ॥३०॥सतुशूरोमहावेगोवीर्यश्लाघीमहोदरः
महावर्मणितंखड्गंपातयामासदुर्मतिः॥३१॥लग्नमुत्कर्षतःखड्गंखड्गेनकपिकुंजरः॥जहार
सशिरस्त्राणंकुंडलोपगतंशिरः॥३२॥निकृत्तशिरसस्तस्यपतितस्यमहीतले॥तद्बलंराक्षसेंद्रस्य
दृष्ट्वातत्रनदृश्यते॥३३॥हत्वातंवानरैःसार्द्धंननादमुदितोहरिः॥चुक्रोधचदशग्रीवोबभौहृष्ट
श्चराघवः॥३४॥

त्तशिरसोराक्षसेंद्रस्यबलंतत्रराक्षसेंद्रशिरोदृष्ट्वातत्रस्थानेनदृश्यतेपलायितमितियावत्॥३३॥३४

तस्यरक्षसोहस्तात्सशरंधनुश्चादेकंहस्तंशिरस्त्राणंचापातयत्· अतएववाग्रेवक्ष्यति·एकेनकरेणेति॥१५॥१६
१७॥तैलधौतं·तेनातितीक्ष्णं॥शैलसारोऽयस्तन्मयं॥१८॥मोक्षयामास·मौघीचकार॥१९॥संवर्त्तयत्·समवर्त्ती

सतुक्षिप्तोवलवतापरिघस्तस्यरक्षसः॥धनुश्चसशरंहस्ताच्छिरस्त्राणंचपातयत्॥१५॥तंसमासा
द्यवेगेनवालिपुत्रःप्रतापवान्॥तलेनाभ्यहनत्क्रुद्धःकर्णमूलेसकुंडले॥१६॥सतुक्रुद्धोमहावे
गोमहापार्श्वोमहाद्युतिः॥करेणैकेनजग्राहसुमहांतंपरस्वधं॥१७॥तंतैलधौतंविमलंशैलसार
मयंदृढं॥राक्षसःपरमक्रुद्धोवालिपुत्रेन्यपातयत्॥१८॥तेनवामांसफलकेभृशंप्रत्यवपातितं
अंगदोमोक्षयामाससरोषःसपरस्वधं॥१९॥सवीरोवज्रसंकाशमंगदोमुष्टिमात्मनः॥संवर्त्तय
त्सुसंक्रुद्धःपितुस्तुल्यपराक्रमः॥२०॥राक्षसस्यस्तनाभ्याशेमर्मज्ञोहृदयंप्रति॥इंद्राशनिसमस्प
र्शंसमुष्टिंविन्यपातयत्॥२१॥तेनतस्यनिपातेनराक्षसस्यमहामृधे॥पफालहृदयंचास्यसप
पातहतोभुवि॥२२॥तस्मिन्विनिहतेभूमौतत्सैन्यंसंप्रचुक्षुभे॥अभवच्चमहान्क्रोधःसमरेराव
णस्यतु॥२३॥वानराणांप्रहृष्टानांसिंहनादःसपुष्कलः॥स्फोटयन्निवशब्देनलंकांसाट्टालगोपुरां
महेंद्रेणेवदेवानांनादःसमभवन्महान्॥२४॥

सिंहनादःसम्भवत्॥२४॥

यत्बबंधेत्यर्थः॥२०॥२१॥पफालविशीर्णं॥२२॥२३॥वानराणां
सिंहनादोलंकांस्फोटयन्निवविदारयन्निवोदभूदितिशेषः॥इंद्रेणसहदेवानामिवांगदेनसहवानराणां

विषादेनविमुखाः॥५॥६॥ससूतस्यंदनात् हतसूतसहितरथात्इत्यर्थः॥७॥ऋक्षराजःजांबवान्॥८॥शिलां

विषादविमुखाःसर्वेबभूवुर्गतचेतसः॥निशम्यबलमुद्विग्नमंगदोराक्षसार्दितं॥५॥वेगंचक्रेम
हावेगःसमुद्रइवपर्वसु॥आयसंपरिघंगृह्यसूर्यरश्मिसमप्रभं॥६॥समरेवानरश्रेष्ठोम
हापार्श्वेन्यपातयत्॥सतुतेनप्रहारेणमहापार्श्वोविचेतनः॥७॥ससूतस्यंदनात्तस्माद्वि
संज्ञश्चापतद्भुवि॥७॥नस्पर्द्धराजतेजस्वीनीलांजनचयोपमः॥निष्पत्यसुमहावीर्यःस्वयूथा
न्मेघसन्निभात्॥८॥प्रगृह्यगिरिशृंगाभांक्रुद्धःसुविपुलांशिलां॥अश्वाञ्जघानतरसाबभंज
स्पंदनंचतत्र॥९॥मुहूर्त्तात्लब्धसंज्ञस्तुमहापार्श्वोमहाबलः॥अंगदंबहुभिर्बाणैर्भूयस्तंप्रत्य
विध्यत॥१०॥जांबवंतंत्रिभिर्बाणैराजघानस्तनांतरे॥ऋक्षराजंगवाक्षंचजघानबहुभिःशरैः
॥११॥गवाक्षंजांबवंतंचसदृष्ट्वाशरपीडितौ॥जग्राहपरिघंघोरंअंगदःक्रोधमूर्छितः॥१२॥तस्यां
गदःसरोषाक्षोराक्षसस्यतमायसं॥दूरस्थितस्यपरिघंरविरश्मिसमप्रभं॥१३॥द्वाभ्यांभुजाभ्यां
संगृह्यभ्रामयित्वाचवेगवान्॥महापार्श्वायचिक्षेपवधार्थंवालिनःसुतः॥१४॥ ॥ ॥

गृहीत्वाऽश्वसञ्जघान अनंतरंगिरिशृंगाभ्यांस्पंदनंतांबभंज॥९॥१०॥११॥१२॥दूरस्थितस्यराक्ष
सस्यवधार्थंपरिघंद्वाभ्यांभुजाभ्यांसंगृह्यगृहीत्वाभ्रामयित्वाचमहापार्श्वायचिक्षेपेत्यन्वयः॥१३॥१४

रामा-यु-
२९९

299

तामसमस्त्रं-तमोग्रहदेवताकमस्त्रं॥८॥ ब्रह्मणास्वयंनिर्मितंनामसमस्त्रंसहितुंसोढुंनशेकु॥९॥१०॥११

तामसंसुमहाघोरंचकारास्त्रंसुदारुणं॥निर्ददाहकपीन्सर्वान्तेप्रपेतुःसमंततः॥८॥उत्पपात
रजोभूमौतैर्भग्नैःसंप्रधावितैः॥नहितत्सहितुंशेकुर्ब्रह्मणानिर्मितंस्वयं॥९॥तान्यनीकान्य
नीकानिरावणस्यशरोत्तमैः॥दृष्ट्वाभग्नानिशतशोराघवःपर्यवस्थित॥१०॥ ततोराक्षसशार्दूः
लोविद्राव्यहरिवाहिनीं॥सददर्शततोरामंतिष्ठंतमपराजितं॥११॥लक्ष्मणेनसहभ्रात्राविष्णु
नावासवंयथा॥आलिखंतमिवाकाशमवष्टभ्यमहद्धनुः॥१२॥पद्मपत्रविशालाक्षंदीर्घ
बाहुमरिंदमं॥ततोरामोमहातेजाःसौमित्रिसहितोबली॥१३॥ वानरांश्चरणेभग्नानापतं
तंचरावणं॥समीक्ष्यराघवोहृष्टोमध्येजग्राहकार्मुकं॥१४॥विस्फारयितुमारेभेततःसधनु
रुत्तमं॥ महावेगंमहानादंनिर्भिंदन्निवमेदिनीं॥१५॥रावणस्यचबाणौघैरामविस्फारितेन
च॥शब्देनराक्षसास्तेनपेतुश्चशतशस्तदा॥१६॥तयोःशरपथंप्राप्यरावणोराजपुत्रयोः॥सब
भौचयथाराहुःसमीपेशशिसूर्ययोः॥१७॥तमिच्छन्प्रथमंयोद्धुंलक्ष्मणोनिशितैःशरैः॥मुमोच
धनुरायम्यशरानग्निशिखोपमान्॥१८॥

॥१२॥१३॥राघवोहृष्टःएकःशिष्टःशत्रुर्दृगोचरंप्राप्तइति
हर्षः॥१४॥१५॥ रावणबाणौघैरामविस्फारितेनचयःशरस्तेनपेतुः॥१६॥सरावणोराजपुत्रयोःसमीपे

प्राप्यचद्रसूर्ययोःसमीपेराहुर्यथाबभौ॥१७॥१०॥

राम
२९९

२५।क०॥९१॥इतिश्रीरामाभिरामेश्रीरा०रा०यु०नवनवतितमःसर्गः॥९९॥ महोदरेति॰हतौदृष्ट्वासराव
णः क्रुद्धोजातइतिशेषः॥१॥२॥रुद्धस्यनगरस्य॰वानरबलैरितिशेषः दुःखमपनेष्याम्येव॥३॥मूलोक्तेदं

अथैंद्रशत्रुस्त्रिदशालयानांवनौकसांचैवमहाप्रणादं॥श्रुत्वासरोषंयुधिराक्षसेंद्रःपुनश्चयुद्धा
भिमुखोवतस्थे॥२५॥इत्यार्षेश्रीरामायणेयुद्धकांडेनवनवतितमःसर्गः॥९९॥ महोदरमहापा
र्श्वौहतौदृष्ट्वासरावणः॥तस्मिंश्चनिहतेवीरेविरूपाक्षेमहाबले॥१॥आविवेशमहान्क्रोधो
रावणंतुमहामृधे॥सूतंसंचोदयामासवाक्यंचेदमुवाचह॥२॥निहतानाममात्यानांरुद्धस्यन
गरस्यच॥दुःखमेवापनेष्यामिहत्वातौरामलक्ष्मणौ॥३॥रामवृक्षंरणेहन्मिसीतापुष्पफल
प्रदं॥प्रशाखायस्यसुग्रीवोजांबवान्कुमुदोनलः॥४॥द्विविदश्चैवमैंदश्चअंगदोगंधमादनः
हनूमांश्चसुषेणश्चसर्वेचहरियूथपाः॥५॥सदिशोदशघोषेणरथस्यातिरथोमहान्॥ना
दयन्प्रययौतूर्णंराघवंचाभ्यधावत॥६॥पूरितातेनशब्देनसनदीगिरिकानना॥संचचालम
हीसर्वात्रस्तसिंहमृगद्विजा॥७॥

करिष्यामीत्याशयेनरामंसर्वाश्रयमहावृक्षत्वेनरूपयतिराम
वृक्षमिति॰सीतापुष्पंयस्यसः सचासौतेनैवपुष्पेणसर्वेषांवानराणांतत्तत्कर्मजफलप्रदस्त॰प्रशा
खायस्यतंप्रशाखासहितंहन्मीतिशेषः॥४॥५॥इत्युक्त्वारथस्यघोषेणदशदिशोनादयन्॥६॥७॥

गवाक्षितमिवसंजातगवाक्षमिव·गृध्रपत्रैस्तद्बंधनैःसुवाजितैःसंपर्कसंपादितवेगैः आर्षंपुंस्त्वंशरवृष्टि
विशेषणत्वात्॥२९॥तपनेसूर्येऽस्तंगतेचापिशब्दादस्ताचलंप्राप्त्योदयाद्रिंगतेपीत्यर्थः दिवापीतियाव

गवाक्षितमिवाकाशंबभूवशरवृष्टिभिः॥महावेगैःसुतीक्ष्णाग्रैर्गृध्रपत्रैःसुवाजितैः॥२९॥शरांध
कारमाकाशंचक्रतुःप्रथमंतदा॥गतेस्तंतपनेचापिमहामेघाविवोत्थितौ॥३०॥तयोरभून्महा
युद्धमन्योन्यवधकांक्षिणोः॥अनासाद्यमचिंत्यंचवृत्रवासवयोरिव॥३१॥उभौहिपरमेष्वासा
वुभौयुद्धविशारदौ॥उभावस्त्रविदांमुख्यौउभौयुद्धेविचेरतुः॥३२॥उभौहियेनव्रजतस्तेन
तेनशरोर्मयः॥ऊर्मयोवायुनाविद्धाजग्मुःसागरयोरिव॥३३॥ततःसंसक्तहस्तरावणो+
लोकरावणः॥नाराचमालांरामस्यललाटेप्रत्यमुंचत॥३४॥रौद्रचापप्रयुक्तांतांनीलोत्पल
दलप्रभां॥शिरसाधारयद्रामोनव्यथामभ्यपद्यत॥३५॥अथमंत्रानपिजपन्रौद्रमस्त्रमु
दीरयन्॥शरान्भूयःसमादायरामःक्रोधसमन्वितः॥३६॥ श्र ॥

तः यत्तुयथाश्रुतरीत्यारात्रावपीतिव्याचक्षतेतेनत्रनकश्चिच्चमत्कारः॥३०॥३१॥३२॥येनव्रजतः ये
नयेनमंडलचारेणेत्यर्थः॥३३॥संसक्तहस्तोबाणप्रयोगेआसक्तहस्तः॥३४॥३५॥उदीरयन्प्रवर्त्तयन्॥३६॥

१९।२०॥अभ्यतिक्रम्य बाणौघाकुलीकृत्य शैलमिव स्थिरमचलं राममाससाद॥२१॥२२॥२३॥२४॥राघवोरा

तान्मुक्तमात्रानाकाशे लक्ष्मणेन धनुष्मता॥बाणान्बाणैर्महातेजा रावणः प्रत्यवारयत्॥१९॥एकमे
केन बाणेन त्रिभिस्त्रीन्दशभिर्दश॥लक्ष्मणस्य प्रचिच्छेद दर्शयन्पाणिलाघवं॥२०॥अभ्यति
क्रम्य सौमित्रिं रावणः समितिंजयः॥आससाद रणे रामं स्थितं शैलमिवापरं॥२१॥स राघवं स
मासाद्य क्रोधसंरक्तलोचनः॥व्यसृजच्छरवर्षाणि रावणो राक्षसेश्वरः॥२२॥शरधारास्ततो रामो
रावणस्य धनुश्च्युताः॥दृष्ट्वैवापतिताः [illegible] शीघ्रं भल्लाञ्जग्राह सत्वरं॥२३॥तांश्छरौघांस्ततो भल्लै
स्तीक्ष्णैश्चिच्छेद राघवः॥दीप्यमानान्महाघोरां क्रूरानाशीविषोपमान्॥२४॥राघवो रावणं तूर्णं
रावणो राघवं तथा॥अन्योन्यं विविधैस्तीक्ष्णैः शरवर्षैर्ववर्षतुः॥२५॥चेरतुश्च चिरं चित्रं मंडलं स
व्यदक्षिणं॥बाणवेगात्समुत्क्षिप्तावन्योन्यमपराजितौ॥२६॥तयोर्भूतानि वित्रेसुर्युगपत्संप्रयुध्य
तोः॥रौद्रयोः सायकमुचोर्यमांतकनिकाशयोः॥२७॥संततं विविधैर्बाणैर्बभूव गगनं तदा
घनैरिवातपापाये विद्युन्मालासमाकुलैः॥२८॥

वर्णं रावणो राघवमित्यन्योन्यं शरवर्षैर्ववर्षतुर्ववर्षतुः॥२५॥अन्योन्यं बाणवेगात्समुत्क्षिप्तौ अन्योन्यं
क्षिप्तवंतौ अपराजितौ अप्रतिहतौ॥२६॥सायकं मुंचन्तीति सायकमुचौ तयोः॥२७॥संततं व्याप्तं॥२८

तमोस्त्रस्यप्रत्यस्त्रंपावकमितितत्ससर्जेत्याह॰पावकमिति॥४६॥ततोखिलज्योतिर्गणमुखबाणोत्पत्ति
रित्याह॰अग्निदीप्तमुखानिति॥४७॥विद्युज्जिह्वोपमान्विद्युदर्चिःसदृशान्कालजिह्वास्तथार्चिषइति

आसुरेणसमाविष्टःसोस्त्रेणरघुपुंगवः॥ससर्जास्त्रंमहोत्साहंपावकंपावकोपमः॥४६॥अग्नि
दीप्तमुखान्बाणान्तत्रसूर्यमुखानपि॥ग्रहनक्षत्रवर्णांश्चमहोल्कामुखसंस्थितान्॥४७॥विद्यु
ज्जिह्वोपमांश्चापिससर्जविविधान्शरान्॥तेरावणशराघोराराघवास्त्रसमाहताः॥४८॥विलयं
जग्मुराकाशेजघ्नुश्चैवसहस्रशः॥तदस्त्रंनिहतंदृष्ट्वारामेणाक्लिष्टकर्मणा॥४९॥दृष्ट्वानेदुस्त
तःसर्वेकपयःकामरूपिणः॥सुग्रीवाभिमुखावीराःसंपरिक्षिप्यराघवं॥५०॥ततस्तदस्त्रंविनि
हत्यराघवःप्रसह्यतद्रावणबाहुनिःसृतं॥मुदान्वितोदाशरथिर्महात्माविनेदुरुच्चैर्मुदिताःक
पीश्वराः॥५१॥इत्यार्षेश्रीरा॰यु॰शततमःसर्गः॥१००॥तस्मिन्प्रतिहतेस्त्रेतुरावणोराक्षसाधिपः॥
क्रोधंचद्विगुणंचक्रेक्रोधाच्चास्त्रमनंतरं॥१॥मयेनविहितंरौद्रमन्यमस्त्रंमहाद्युतिः॥उत्स्रष्टुंरावणो
भीमंराघवायप्रचक्रमे॥२॥

हलायुधः॥४८॥विलयंजग्मुस्तथापिसहस्रशोवानरान्जघ्नुः॥४९॥संप
रिक्षिप्यपरिवार्य॥५०।५१।क॰॥६२॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयु॰शततमःसर्गः
१००॥तस्मिन्प्रतिहतेइतिक्रोधाच्चास्त्रमनंतरंचक्रेइतिशेषः॥१॥तात्त्विकमस्त्रंतत्राहमयेनेति॥२॥

अच्छिन्नसायकः अव्यवच्छिन्नसायकः निरंतरंप्रवर्त्तितबाणवर्षइतियावत्॥३७॥ अवध्येअभेद्येजनयन्अजनयन॥३८॥ परमास्त्रेब्रह्मास्त्रेणयोजितैर्बाणैरभिनत्॥३९॥ बाणरूपाणिःप्रशंसायांरूपप्ःप्रशस्त

मुमोचचमहातेजाश्चापमायम्यवीर्यवान्॥ तान्शरान्राक्षसेंद्रायचिक्षेपाच्छिन्नसायकः॥३७॥ तेमहामेघसंकाशेकवचेपातिताःशराः॥ अवध्येराक्षसेंद्रस्यनव्यथांजनयंस्तदा॥३८॥ पुनरेवाथतंरामोरथस्थंराक्षसाधिपं॥ ललाटेपरमास्त्रेणसर्वास्त्रकुशलोभिनत्॥३९॥ तेभित्त्वाबाणरूपाणिपंचशीर्षाइवोरगाः॥ श्वसंतोविविशुर्भूमिंरावणप्रतिकूलिताः॥४०॥ निहत्यराघवस्यास्त्रंरावणःक्रोधमूर्छितः॥ आसुरंसुमहाघोरमन्यदस्त्रंचकारसः॥४१॥ सिंहव्याघ्रमुखांश्चापिकंककोकमुखानपि॥ गृध्रश्येनमुखांश्चापिशृगालवदनांस्तथा॥४२॥ ईहामृगमुखांश्चापिव्यादितास्यान्भयावहान्॥ पंचास्यान्लेलिहानांश्चससर्जनिशितान्शरान्॥४३॥ शरान्खरमुखांश्चान्यान्वराहमुखसंश्रितान्॥ श्वानकुक्कुटवक्त्रांश्चमकराशीविषाननान्॥४४॥ एतांश्चान्यांश्चमायाभिःससर्जनिशिताञ्छरान्॥ रामंप्रतिमहातेजाःक्रुद्धःसर्पइवश्वसन्॥४५॥

बाणाःआर्षोलिंगव्यत्ययःरावणप्रतिकूलिताःरावणेनानिवारिताअपिश्वसंतःपंचशीर्षाउरगाइवभूमिंविविशुः॥४०॥ चकारप्रादुश्चकार॥४१॥४२॥ ईहामृगोवृकःपंचास्यान्सिंहमुखान्॥४३॥४४॥ यदासुरमस्त्रंप्रादुश्चकारतदाससर्जेत्यन्वयः॥४५॥

१५ गजकरोपमंधनुश्चिच्छेद ॥१६॥१७॥ १८॥ महाशक्तिर्महावलः ॥१९॥२०॥२१॥ संभावितनतरां अमोघेनिस

सारथेश्चापि वाणेन शिरो ज्वलितकुंडलं ॥ जहार लक्ष्मणः श्रीमान्नैर्ऋतस्य महाबलः ॥१५॥ तस्य वा
णेश्च चिच्छेद धनुर्गजकरोपमं ॥ लक्ष्मणो राक्षसेंद्रस्य पंचभिर्निशितैस्तदा ॥१६॥ नीलमेघनिभान्
चास्य सदश्वान् पर्वतोपमान् ॥ जघानाप्लुत्य गदया रावणस्य विभीषणः ॥१७॥ हताश्वात्तु तदा वेगा
दवप्लुत्य महारथात् ॥ कोपमाहारयत्तीव्रं भ्रातरं प्रति रावणः ॥१८॥ ततः शक्तिं महाशक्तिः प्रदीप्ता
मशनीमिव ॥ विभीषणाय चिक्षेप राक्षसेंद्रः प्रतापवान् ॥१९॥ अप्राप्तामेव तां वाणैस्त्रिभिश्चिच्छे
द लक्ष्मणः ॥ अथोदतिष्ठत्संनादो वानराणां महारणे ॥२०॥ संपपात त्रिधा छिन्ना शक्तिः कांचन
मालिनी ॥ सविस्फुलिंगा ज्वलिता महोल्केव दिवश्च्युता ॥२१॥ ततः संभावितनतरां कालेनापि दुरा
सदां ॥ जग्राह विपुलां शक्तिं दीप्यमानां स्वतेजसा ॥२२॥ सा वेगिना वलवता रावणेन दुरात्मना
जज्वाल सुमहातेजाः दीप्ताशनिसमप्रभा ॥२३॥ एतस्मिन्नंतरे वीरो लक्ष्मणस्तं विभीषणं ॥ प्राण
संशयमापन्नं तूर्णमभ्यवपद्यत ॥२४॥ तं विमोक्षयितुं वीरश्चापमायम्य लक्ष्मणः ॥ रावणं शक्ति
हस्तं वै शरवर्षैरवाकिरत् ॥२५॥

वें विख्यातां दुरासदां दुःसहां ॥२२॥ वेगिता कृतवेगा ॥२३॥
तूर्णमभ्यवपद्यत शक्तिसंमुखं स्वयमागत्य विभीषणं रक्षितवानित्यर्थः ॥२४॥२५॥ ॥

३।४॥५॥६॥७॥८॥नानिसौरास्त्रनिःसृतचक्राणिवालवत्वादेवकेवलं चिच्छेदन प्रत्यस्त्रमपेक्षतेस्म॥९

ततःशूलानिनिश्चेरुर्गदाश्चमुसलानिच॥कार्मुकाद्दीप्यमानानिवज्रसाराणिसर्वशः॥३॥मुद्ग
राःकूटपाशाश्चदीप्ताश्चाशनयस्तथा॥निष्पेतुर्विविधास्तीक्ष्णावाताइवयुगक्षये॥४॥तदस्त्रं
राघवःश्रीमानुत्तमास्त्रविदांवरः॥जघानपरमास्त्रेणगांधर्वेणमहाद्युतिः॥५॥तस्मिन्प्रतिह
तेस्त्रेतुराघवेणमहात्मना॥रावणःक्रोधताम्राक्षःसौरमस्त्रमुदीरयत्॥६॥ततश्चक्राणिनिष्पे
तुर्भास्वराणिमहांतिच॥कार्मुकाद्भीमवेगस्यदशग्रीवस्यधीमतः॥७॥तैरासीद्गगनंदीप्तंसं
पतद्भिःसमंततः॥पतद्भिश्चदिशोदीप्तैश्चंद्रसूर्यग्रहैरिव॥८॥तानिचिच्छेदबाणौघैश्चक्रा
णितुसराघवः॥आयुधानिचचित्राणिरावणस्यचमूमुखे॥९॥तदस्त्रंतुहतंदृष्ट्वारावणो
राक्षसाधिपः॥विव्याधदशभिर्बाणैरामंसर्वेषुमर्मसु॥१०॥सविद्धोदशभिर्बाणैर्महाकार्मु
कनिःसृतैः॥रावणेनमहातेजानप्राकंपतराघवः॥११॥ततोविव्याधगात्रेषुसर्वेषुसमितिंजयः
राघवस्तुसुसंक्रुद्धोरावणंबहुभिःशरैः॥१२॥एतस्मिन्नंतरेक्रुद्धोराघवस्यानुजोबली॥लक्ष्मणः
सायकान्सप्तजग्राहपरवीरहा॥१३॥तैःसायकैर्महावेगैःरावणस्यमहाद्युतिः॥ध्वजंमनु
ष्यशीर्षंतुतस्यचिच्छेदनैकधा॥१४॥

॥१०॥११॥१२॥१३॥मनुष्यःशीर्षेयस्यतं मनुष्यशीर्षयुक्तमित्यर्थः॥१४॥

सामुक्ताशक्तिरभीतस्यभगवत्तत्वानुसंधानेननिर्भयस्यलक्ष्मणस्योरसिआशुममज्ज॥३४॥मुक्ताआशुउर
सीनिच्छेदस्यगूढत्वात्स्वरूपमेवाहकविः न्यपतदिति॥३५॥३६॥३७॥मुहूर्त्तमिवध्यात्वाकिमिदानींकर्त्त

रावणेनरणेशक्तिः क्रुद्धेनाशीविषोपमा॥मुक्ताशूरस्यभीनस्यलक्ष्मणस्यममज्जसा॥३४॥न्यप
तत्सामहावेगालक्ष्मणस्यमहोरसि॥जिह्वेवोरगराजस्यदीप्यमानामहाद्युतिः॥३५॥ततो
रावणवेगेनसुदूरमवगाढया॥शक्त्याविभिन्नहृदयः पपातभुविलक्ष्मणः॥३६॥तदवस्थंसमी
पस्थोलक्ष्मणंप्रेक्ष्यराघवः॥भ्रातस्नेहान्महातेजाविषण्णहृदयोभवत्॥३७॥समुहूर्त्तमिवध्या
त्वाबाष्पपर्याकुलेक्षणः॥बभूवसंरब्धतरोयुगांतइवपावकः॥३८॥नविषादस्यकालोय
मितिसंचिंत्यराघवः॥चक्रेसुतुमुलंयुद्धंरावणस्यवधेधृतः॥३९॥सर्वयत्नेनमहतालक्ष्म
णंपरिवीक्ष्यच॥सददर्शततोरामः शक्त्याभिन्नंमहाहवे॥लक्ष्मणंरुधिरादिग्धंसपन्नगमिवाच
लं॥४०॥

मितिपर्यालोच्येत्यर्थः॥संरब्धतरः युद्धेअधिकोत्साहवान्॥३८॥ अथविषादस्यायंकालइतिसंचिं
त्यलक्ष्मणंचसंनिरीक्ष्यमहतोत्कृष्टेनसर्वयत्नेनसहृजवलास्त्रवलेनरावणस्यवधेधृतोनिश्चि
तोभूत्वासुतुमुलंयुद्धंचक्रे॥३९॥अयंचवक्ष्यमाणार्थसंक्षेपः तमेवप्रपंचयतिददर्शेति॥४०॥ ॥

303

महात्मनालक्ष्मणेनविसृष्टेनशरौघेघनेनकीर्यमाणोऽतएवविमुखीकृतविक्रमःकुंठितभ्रातृवध
विषयोत्साहोतएवभ्रातरंप्रहर्त्तुंमनश्चक्रे॥२६॥२७॥२८॥लोहितलक्षणाःशत्रुरुधिरग्रहणस्वभावा॥२९

कीर्यमाणःशरौघेणविवृद्धेनमहात्मना॥सप्रहर्त्तुंमनश्चक्रेविमुखीकृतविक्रमः॥२६॥मो
क्षितंभ्रातरंदृष्ट्वालक्ष्मणेनसरावणः॥लक्ष्मणाभिमुखस्तिष्ठन्निदंवचनमब्रवीत्॥२७॥मो
क्षितस्तेबलश्लाघिन्यस्मादेवंविभीषणः॥विमुच्यराक्षसंशक्तिस्त्वयीयंविनिपात्यते॥२८
॥एषातेहृदयंभित्वाशक्तिर्लोहितलक्षणा॥मद्बाहुपरिघोत्सृष्टाप्राणानादाययास्यति॥२९॥
इत्येवमुक्त्वातांशक्तिमष्टघंटांमहास्वनां॥मयेनमायाविहिताममोघांशत्रुघातिनीं॥३०॥
लक्ष्मणायसमुद्दिश्यज्वलंतीमिवतेज॥सारावणःपरमक्रुद्धश्चिक्षेपचननादच॥३१॥सा
क्षिप्ताभीमवेगेनवज्राशनिसमस्वना॥शक्तिरभ्यपतद्वेगाल्लक्ष्मणंरणमूर्द्धनि॥३२॥ता
मनुव्याहरच्छक्तिमापतंतींसराघवः॥स्वस्त्यस्तुलक्ष्मणायेतिमोघाभवहतोद्यमा॥३३॥

३०॥३१॥३२॥आपतंतींतांशक्तिंशक्त्यधिष्ठातृदेवतामुद्दिश्यानुव्याहरन्नदेवाहलक्ष्मणायस्वस्त्यस्तु·
त्वंहतोद्यमाहतप्राणनाशोद्योगाअतएवमोघाप्राणापहारांशेमोघाभव·त्वच्छक्तिस्तुपीडामात्रेणाचरि
तार्थास्त्वितिभावःस्पर्शमात्रेणप्राणापहरणसामर्थ्ययुक्तायाःशक्तेरनेनस्ववाक्येनमोघीकरणात्स्वस्य
सत्यसंकल्पत्वंसूचितं॥३३॥

पापात्मायंवध्यतांमत्तोदानवधंप्राप्नोतु यतोघर्मंतिचातकस्यमेघदर्शनमिववधार्थमस्यदर्शनंममचिरंकां
क्षितंस्तोककस्येतिपाठेपिचातकस्येत्येवार्थःस्तोककःसमावित्यमरात् ॥४७॥ प्रतिश्रृणोमिप्रतिजाने

पापात्मायंदशग्रीवोवध्यतांपापनिश्चयः ॥ कांक्षितंचातकस्येवघर्मंतिमेघदर्शनं ॥४७॥ अस्मि
न्मुहूर्त्तेनचिरात्सत्यंप्रतिश्रृणोमिवः ॥ अरावणमरामंवा जगद्द्रक्ष्यथवानराः ॥४८॥ राज्यनाशंवने
वासंदंडकेपरिधावनं ॥ वैदेह्याश्चपरामर्षंरक्षोभिश्चसमागमं ॥४९॥ प्राप्तंदुःखंमहद्घोरंक्ले·
शश्चनिरयोपमः ॥ अद्यसर्वमहंत्यक्ष्येनिहत्वारावणंरणे ॥५०॥ यदर्थंवानरंसैन्यंसमानीतमि
दंमया ॥ सुग्रीवश्चकृतोराज्येनिहत्वावालिनंरणे ॥५१॥ यदर्थंसागरःक्रांतःसेतुर्बद्धश्चसागरे ॥५२॥
सोयमद्यरणेपापश्चक्षुर्विषयमागतः ॥ चक्षुर्विषयमागम्यनायंजीवितुमर्हति ॥५३॥ दृष्टिंदृष्टि
विषस्येवसर्पस्यममरावणः ॥ यथावावैनतेयस्यदृष्टिंप्राप्तोभुजंगमः ॥५४॥ सुखंपश्यतदुर्द्धर्षा
युद्धंवानरपुंगवाः ॥ आसीनाःपर्वताग्रेषुममेदंरावणस्यच ॥५५॥

नचिरादित्यस्यशीघ्रमित्यर्थो
कस्याऽरावणमित्यादिनान्वयः ॥४८॥४९॥ राज्यनाशादिकृतंघोरंदुःखंमानसंप्राप्तंनिरयोपमो·
यातनोपमःक्लेशःकायक्लेशश्चप्राप्तः ॥५०॥५१॥५२॥५३॥ दृष्टिविषस्यदर्शनमात्रेणसंहारकर
महाविषवतःसर्पस्यदृष्टिंप्राप्तोमनुष्यइवनरावणोजीवितुमर्हति ॥५४॥५५॥ ॥

तांशक्तिंलक्ष्मणगात्रादवमर्दितुंउद्धर्तुंयत्नतोनशेकुः तत्रहेतुर्वलीयसाप्रहितत्वंहेत्वंतरमपिआह अर्दि
ताइति॥४१॥रक्षसांप्रवेकेनश्रेष्ठेन॥४२॥किंचसाशक्तिःसौमित्रेर्देहंनिर्भिद्यधरणीतलंभुवंप्रविष्टास्पष्ट
वतीतांशक्तिंकराभ्यांपरामृशन्धृत्वाबलवान्वलवत्तरोरामोलक्ष्मणदेहाद्विचकर्षविकृष्यबभंजच

तामपिप्रहितांशक्तिंरावणेनबलीयसा।यत्नतस्तेहरिश्रेष्ठानशेकुरवमर्दितुं॥४१॥अर्दिता
श्चैववाणौघैस्तेप्रवेकेनरक्षसां॥सौमित्रेःसाविनिर्भिद्यप्रविष्टाधरणीतलं॥४२॥तांकराभ्यां
परामृश्यरामःशक्तिंभयावहां॥बभंजसमरेक्रुद्धोवलवान्विचकर्षच॥४३॥तस्यनिष्कर्षतः
शक्तिंरावणेनवलीयसा॥शराःसर्वेषुगात्रेषुपातितामर्मभेदिनः॥४४॥अचिंतयित्वातान्वाणा
न्समाश्लिष्यचलक्ष्मणं।अब्रवीच्चहनूमंतंसुग्रीवंचमहाकपिं॥४५॥लक्ष्मणंपरिवार्यैवंति
ष्ठध्वंवानरोत्तमाः॥पराक्रमस्यकालोयंसंप्राप्तोमेचिरेप्सितः॥४६ ॥

॥४३॥इयंशक्तिःसर्वदाश
त्रुंनिर्भिद्यरावणसमीपमेवप्राप्नोतिइदानींरामेणमोघाभवेत्पुत्रस्यासत्यसंकल्पेननाशितानिष्क्र
मणशक्तिस्तत्रैवलग्नासाचभगवताविकृष्यभग्नाएतदंतरेरंध्रविद्राक्षसःप्रजहारेत्याहः तस्ये
तिःशक्तिंनिष्कर्षतस्तस्यरामस्यरामस्यगात्रेष्वित्यन्वयः॥४४॥समाश्लिष्येतिसमाश्लेषोयंसक
लपीडानिवृत्तिफलकःस्वतादात्म्यावभासनरूपः॥४५॥४६॥ ॥ ॥

शक्तेति॥१॥वाणौघान्विसजन्रावणस्यतुमुलंयुद्धंदत्वातस्मिन्पलायितेलक्ष्मणापीडानिवृत्यर्थंसुषे
णमिदमब्रवीत्॥२॥शोकमुदीरयन्जनयन्॥३॥प्राणाःप्राणेभ्यः॥४॥५॥लज्जतीवेतिपरस्मैपदमार्षं

शक्त्यानिपातितंदृष्ट्वारावणेनबलीयसा॥लक्ष्मणंसमरेशूरंशोणितौघपरिप्लुतं॥१॥सदत्वा
तुमुलंयुद्धंरावणस्यदुरात्मनः॥विसजन्नेववाणौघान्सुषेणमिदमब्रवीत्॥२॥एषरावण॰
वीर्येणलक्ष्मणःपतितोभुवि॥सर्पवद्वेष्टतेवीरोममशोकमुदीरयन्॥३॥शोणितार्द्रमि
मंवीरंप्राणैःप्रियतरंमम॥पश्यतोममकाशक्तिर्योद्धुंपर्याकुलात्मनः॥४॥अयंससम
रश्लाघीभ्रातामेशुभलक्षणः॥यदिपंचत्वमापन्नःप्राणैर्मेकिंसुखेनवा॥५॥लज्जतीवहि॰
मेवीर्यंभ्रश्यतीवकराद्धनुः॥सायकाव्यवसीदंतिदृष्टिर्वाष्पवशंगता॥६॥अवसीदं॰
तिगात्राणिस्वप्नयानेनृणामिव॥चिंतामेवर्त्ततेतीव्रामुमूर्षापिचजायते॥७॥भ्रातरंनि
हतंदृष्ट्वारावणेनदुरात्मना॥विष्टनंतंतुदुःखार्त्तंमर्मण्यभिहतंभृशं॥८॥परंविषाद
मापन्नोविललापाकुलेंद्रियः॥भ्रातरंनिहतंदृष्ट्वालक्ष्मणंरणपांसुषु॥९॥

॥६॥स्वप्नयानेस्वप्नेइ
त्यर्थेआर्षमस्पसाधुत्वं॥७॥भ्रातरंनिहतमित्यादिसार्द्धश्लोकःकविवाक्यंविष्टनंतंविकृतशब्दंकु
र्वंतं॥८॥रणपांसुषुलुठंतमितिशेषःतादृशंभ्रातरंदृष्ट्वाविजयोपिमेनप्रिययित्यर्थः॥९॥

रामस्यरामत्वंत्रीन्लोकान्सर्षिदेवान्धर्मेणासत्येनशौर्येणाचरमयतिइत्यन्वर्थरामत्वं तदुचितकर्मा
द्यकरिष्यामीतिभावः॥५६॥यावद्भूमिर्धरिष्यतिप्राणिनस्तावद्यन्मेकर्मसचराचराःसदेवालोकाजनाः

अद्यपश्यंतुरामस्यरामत्वंममसंयुगे॥त्रयोलोकाःसगंधर्वाःसिद्धगंधर्वचारणाः॥५६॥अद्यकर्म
करिष्यामियल्लोकाःसचराचराः॥सदेवाःकथयिष्यंतियावद्भूमिर्धरिष्यति॥५७॥एवमुक्त्वाशिते
र्बाणैस्तप्तकांचनभूषणैः॥आजघानरणेरामोदशग्रीवंसमाहितः॥५८॥तथाप्रदीप्तैर्नाराचैर्मु
शलैश्चापिरावणः॥अभ्यवर्षत्तदारामंधाराभिरिवतोयदः॥५९॥रामरावणमुक्तानामन्योन्य
मभिनिघ्नतां॥वराणांसशराणांचबभूवतुमुलःस्वनः॥६०॥विच्छिन्नाश्चविकीर्णाश्चरामराव॥
णयोःशराः॥अंतरिक्षात्प्रदीप्ताग्रानिपेतुर्धरणीतले॥६१॥तयोर्ज्यातलनिर्घोषोरामरावणयो
र्महान्॥त्रासनःसर्वभूतानांबभूवाद्भुतदर्शनः॥६२॥विकीर्यमाणःशरजालवर्षिभिर्महात्म
नादीप्तधनुष्मतार्दितः॥भयात्प्रदुद्रावसमेत्यरावणोयथानिलेनाभिहतोबलाहकः॥६३॥इत्या
र्षेरामायणेयुद्धकांडेएकाधिकशततमःसर्गः॥१०१॥

कथयिष्यंतिनादृशंकर्माद्यकरिष्यामि॥५७
५८॥५९॥वराणांशराणांश्रेष्ठानांशराणांचान्मुशलनां॥६०॥६१॥६२॥भयात्भ्रातृपीडाजनितकोपेनसर्व
थामांहनिष्यतीतिभीत्येत्यर्थःइदंपलायनममसायंकाले॥६३॥क॥६३॥इतिश्रीरामाभिरामेश्रीरा०युद्ध०

॥एकाधिकशततमःसर्गः॥१०१॥

२१॥२२॥बाणैःशत्रुप्रेषितैस्त्वत्तस्त्वल्पां·नपंचत्वंमतिमापन्नःश्वासाद्यनुभवात्॥२३॥नापिमरिष्यतिलक्षणाभा
वादित्याह·नह्यस्येति॥२४॥पद्मपत्रतलोपद्मपत्रवद्रक्तवर्णाकरतलवंतौ॥२५॥भूतलेप्रसुप्तस्यमत्र

विषण्णस्यमहाबाहोसमाश्वासयितामम॥राममेवंब्रुवाणंतुशोकव्याकुलितेंद्रियं॥२१॥आश्वा
सयन्नुवाचेदंसुषेणःपरमंवचः॥त्यजेमांनरशार्दूलबुद्धिंवैक्लव्यकारिणीं॥२२॥शोकसंजननीं
चिंतांतुल्यांबाणैश्चमूमुखे॥नैवपंचत्वमापन्नोलक्ष्मणोलक्ष्मिवर्द्धनः॥२३॥नह्यस्यविकृतंव
क्त्रंनचश्यामत्वमागतं॥सुप्रभंचप्रसन्नंचमुखमस्यनिरीक्ष्यतां॥२४॥पद्मपत्रतलौहस्तौसु
प्रसन्नेचलोचने॥नेदृशंदृश्यतेरूपंगतासूनांविशांपते॥२५॥विषादंमाकृथावीरसप्राणो
यमरिंदम॥आख्यातितुप्रसुप्तस्यस्रस्तगात्रस्यभूतले॥२६॥सोच्छ्वासंहृदयंवीरकंपमानंमु
हुर्मुहुः॥एवमुक्त्वामहाप्राज्ञःसुषेणोराघवंवचः॥२७॥समीपस्थमुवाचेदंहनूमंतंमहाक
पिं॥सौम्यशीघ्रमितोगत्वापर्वतंहिमहोदयं॥२८॥पूर्वंतुकथितोयोसौवीरजांबवतातव॥द
क्षिणेशिखरेजातांमहौषधिमिहानय॥२९॥

स्तगात्रस्येवमुहुर्मुहुःकंपमानमस्यहृदयम
मुंसोच्छ्वासमाख्याति॥२६॥२७॥२८॥योसौजांबवतातेकथितस्तमोषधपर्वतंगत्वातस्यदक्षिण
शिखरेजातामोषधिमानय॥२९॥ ॥ ॥ ॥ ॥

यत्रायमितियतःकारणादित्यर्थः॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥२०॥रामराम

विजयोपिहिमेश्रूरनप्रियायोपकल्पते॥ अचक्षुर्विषयश्चंद्रःकाप्रीतिंजनयिष्यति॥१०॥
किंमेयुद्धेनकिंप्राणैःयुद्धकार्यंनविद्यते॥ यत्रायंनिहतःशेतेरणमूर्द्धनिलक्ष्मणः॥११॥
यथैवमांवनंयांतमनुयातिमहाद्युतिः॥ अहमप्यनुयास्यामितथैवैनंयमक्षयं॥११॥
इष्टबंधुजनोनित्यंमांसनित्यमनुव्रतः॥ इमामवस्थांगमितोराक्षसैःकूटयोधिभिः॥१२॥
देशेदेशेकलत्राणिदेशेदेशेचबांधवाः॥ तंतुदेशंनपश्यामियत्रभ्रातासहोदरः॥१३॥
किंतुराज्येनदुर्द्धर्षलक्ष्मणेनविनामम॥ कथंवक्ष्याम्यहंत्वंबांसुमित्रांपुत्रवत्सलां॥१४॥
उपालंभंनशक्ष्यामिसोढुंदत्तंसुमित्रया॥ किंनुवक्ष्यामिकौशल्यामातरंकिंनुकेकयी॥१५॥
भरतंकिंनुवक्ष्यामिशत्रुघ्नंचमहाबलं॥ सहतेनवनंयातोविनातेनागतःकथं॥१६॥ इहै
वमरणंश्रेयोननुबंधुविगर्हणं॥ किंमयादुष्कृतंकर्मकृतमन्यत्रजन्मनि॥१७॥ ये
नमेधार्मिकोभ्रातानिहतश्चाग्रतःस्थितः॥ हाभ्रातर्मनुजश्रेष्ठश्रूराणांप्रवरप्रभो॥१८॥ ए
काकीकिंनुमांत्यक्त्वापरलोकायगच्छसि॥ विलपंतंचमांभ्रातःकिमर्थंनावभाषसे॥१९॥
उत्तिष्ठपश्यकिंशेषेदीनंमांपश्यचक्षुषा॥ शोकार्त्तस्यप्रमत्तस्यपर्वतेषुवनेषुच॥२०॥

इत्येवमादिकंसंचिंत्यत्रिःप्रकंप्य॰स्वेनपुरास्थापितस्यापिपुनरुत्पाठनार्थंत्रिःकंपनं॰पूर्वसंगृहीतौषधीनाम्

इतिसंचिंत्यहनुमान्गत्वाक्षिप्रंमहाबलः॥आसाद्यपर्वतश्रेष्ठंत्रिःप्रकंप्यगिरेस्तटं॥३५॥फुल्लना
नातरुगणांसमुत्पाट्यमहाबलः॥गृहीत्वाहरिशार्दूलोहस्ताभ्यांसमतोलयत्॥३६॥सनीलमिव
जीमूतंतोयपूर्णंनभस्तलात्॥उत्पपातगृहीत्वातुहनूमान्शिखरंगिरेः॥३७॥समागम्यमहा॰
वेगःसंन्यस्यशिखरंगिरेः॥विश्रम्यकिंचिद्धनुमान्सुषेणमिदमब्रवीत्॥३८॥औषधीर्नावगा॰
च्छामितात्रहंहरिपुंगव॥तदिदंशिखरंकृत्स्नंगिरेस्तस्याहृतंमया॥३९॥एवंकथयमानंतु
प्रशस्यपवनात्मजं॥सुषेणोवानरश्रेष्ठोजग्राहोत्पाट्यचौषधीः॥४०॥विस्मितास्तुवभूवुस्ते॰
सर्वेवानरपुंगवाः॥दृष्ट्वातुहनुमत्कर्मसुरैरपिसुदुष्करं॥४१॥ततःसंक्षोदयित्वातामोष
धिंवानरोत्तमः॥लक्ष्मणस्यददौनस्तःसुषेणःसु[illegible]महाद्युतिः॥४२॥सशल्यःसस
माघ्रायलक्ष्मणःपरवीरहा॥विशल्योविरुजःशीघ्रमुदतिष्ठन्महीतलात्॥४३॥तमुत्थितंतु
हरयोभूतलात्प्रेक्ष्यलक्ष्मणं॥साधुसाध्वितिसुप्रीतालक्ष्मणंप्रत्यपूजयन्॥४४॥ ॥

र्द्वितयस्यपेषुव्ययात्॰पुनरस्यप्रेषणमितिबोध्यं॥३५॥३६॥गिरेःशिखरंगृहीत्वास्थलान्नभउत्प
पात॥३७॥संन्यस्यसुषेणसमीपइतिशेषः॥३८॥३९॥४०॥४१॥संक्षोदयित्वा॰संमर्द्येत्यर्थः॥४२॥४३॥४४॥

सवार्ण्यकरणीपूर्ववर्णसमानवर्णकरणी ॥३०॥ अजानंस्तामहौषधीरिति पूर्वदृष्टानामप्यपरिच
येपुराणान्तरोक्तकालनेमियुद्धकृतचित्तचाञ्चल्यंहेतुरिति वोध्यं ॥३१॥३२॥ अस्मिंस्तु शिखरे इति·
अस्मिन्नेवशिखरेजातांतामोषधींप्रतर्केणावगच्छामि हि यतः सुषेणएवमेवंलक्षणा शिखरेतामत्र

विशल्यकरणीनाम्नासावर्ण्यकरणीतथा ॥ सजीवकरणीवीरसंधानीचमहौषधी ॥३०॥ संजी
वनार्थंवीरस्यलक्ष्मणस्यत्वमानय ॥ इत्येवमुक्तोहनुमान्गत्वाचौषधिपर्वतं ॥ चिंतामभ्यगम
च्छ्रीमानजानंस्तामहौषधीः ॥३१॥ तस्यबुद्धिःसमुत्पन्नामारुतेरमितौजसः ॥ इदमेवगमिष्या
मिगृहीत्वाशिखरंगिरेः ॥३२॥ अस्मिंस्तुशिखरेजातांओषधींतांसुखावहां ॥ प्रतर्केणावग
च्छामिसुषेणोत्वेवमब्रवीत् ॥३३॥ अगृह्ययदिगच्छामिविशल्यकरणीमहं ॥ कालात्ययेनदो
षःस्याद्वैक्लव्यंचमहद्भवेत् ॥३४॥

वीत् ॥३३॥ अगृह्येति· अत्रशिखरेस्तीत्येतावन्मात्रमेव·
जानामि इयंविशल्यकरणीति विशिष्य न जानामि· अनुभवाभावात्· अतस्तांविशल्यकरणीं
लक्ष्मणस्यसप्राणत्वादवश्यमपेक्षितां यद्यगृहीत्वा अन्यां वा तदाभासां गृहीत्वा गच्छामि तदा महद्वै
क्लव्यं अचतुरत्वादिदोषः स्यात् विचारकरणे तु कालात्ययेन लक्ष्मणस्यप्राणनाशदोषः स्यात् ॥३४

कृतकर्मा अद्यतनकर्त्तव्यांशे कृतलोकानुग्रहः यावदस्तं नयातीत्यनेनाश्विनशुक्लप्रतिपद्येषा वार्त्तेति गम्यते ॥५३॥५४॥क० ॥६४॥ इति श्रीरामाभिरामे श्रीरा० रा० ति० यु० द्व्यधिकशततमः सर्गः ॥१०२॥ लक्ष्मणे

अहं तु वधमिच्छामि शीघ्रमस्य दुरात्मनः ॥ यावदस्तं न यात्येष कृतकर्मा दिवाकरः ॥५३॥ यदि वि
धमिकसि रावणस्य संख्ये यदि च कृतां तवेक्षसि प्रतिज्ञां। यदि च तव राजसुताभिलाषमार्य
कुरुष्व चो मम शीघ्रमद्य ॥५४॥ इत्यार्षे श्रीरामायणे यु० द्व्यधिकशततमः सर्गः ॥१०२॥ लक्ष्म
णेन तु तद्वाक्यमुक्तं श्रुत्वा स राघवः ॥ संदधे परवीरघ्नो धनुरादाय वीर्यवान् ॥१॥ रावणाय शरा
न्घोरान्विससर्ज चमूमुखे ॥ अथान्यं रथमास्थाय रावणो राक्षसाधिपः ॥ अभ्यधावत काकुत्स्थं स्व
र्भानुरिव भास्करं ॥२॥ दशग्रीवो रथस्थस्तु रामं वज्रोपमैः शरैः ॥ आजघान महाशैलं धाराभिरि
व तोयदः ॥३॥ दीप्तपावकसंकाशैः शरैः कांचनभूषणैः ॥ अभ्यवर्षद्रणे रामो दशग्रीवं समाहितः ॥४॥

ति॥१॥ रावणाय शरान्विससर्ज अथान्यं रथमित्यनेन न चात्र स्थाने रावणेन शुक्राश्रयाजयनिमित्तं निकुंभिलायामारब्धे होमकर्मणि वानरद्वारा हिंसनं पुराणांतरोक्तमनुसंधेयमिति सूचितं पूर्वं रणात्पलायनोत्तरा रावणोपदेशप्रकाशरविसर्गस्य रणाभिमावसंभवात्· आश्विनप्रतिपन्मध्याह्ने एतद्युद्धप्रवृत्तिः ॥२३॥४॥

एह्येहीतिउत्थितंलक्ष्मणंरामएह्येहीत्यब्रवीत्॥४५॥४६॥४७॥शिथिलयावाचाखिन्नःकोहिमेजीवितेना
र्थइत्येवंरूपयारावणवधविभीषणराज्यदानप्रतिज्ञाशैथिल्यकरयावाचाखिन्नइत्यर्थः॥४८॥तदेवा

एह्येहीत्यब्रवीद्रामोलक्ष्मणंपरवीरहा॥सस्वजेगाढमालिंग्यबाष्पपर्याकुलेक्षणः॥४५॥अ
ब्रवीच्चपरिष्वज्यसौमित्रिंराघवस्तदा॥दिष्ट्यात्वांवीरपश्यामिमरणात्पुनरागतं॥४६॥नहि
मेजीवितेनार्थःसीतयाचजयेनवा॥कोहिमेजीवितेनार्थस्त्वयिपंचत्वमागते॥४७॥इत्येवंब्रुव
तस्तस्यराघवस्यमहात्मनः॥खिन्नःशिथिलयावाचालक्ष्मणोवाक्यमब्रवीत्॥४८॥तांप्रति॰
ज्ञांप्रतिज्ञायपुरासत्यपराक्रम॥लघुःकश्चिदिवासत्त्वोनैवंत्वंवक्तुमर्हसि॥४९॥नहिप्रति
ज्ञांकुर्वंतिवितथांसत्यवादिनः॥लक्षणंहिमहत्त्वस्यप्रतिज्ञापरिपालनं॥५०॥नैराश्यमुपगं
तुंचनालंतेमत्कृतेनघ॥वधेनरावणस्याद्यप्रतिज्ञामनुपालय॥५१॥नजीवन्यास्यतेशत्रुस्त
वबाणवशंगतः॥नर्दतस्तीक्ष्णदंष्ट्रस्यसिंहस्येवमहागजः॥५२॥ ॥ ॥

ह॰तामिति॰तांमदुक्तरूपां॥४९॥५०॥मत्कृतेनैराश्यमुपगंतुंनालंनयुक्तं॰दैवाद्धिपक्षावपीति
शेषः॰प्रतिज्ञामनुपालय॰दैवगत्याममापिस्वस्थतयास्वस्थचित्तःसन्प्रतिज्ञांपालय॥५१॥५२

१३।१४।इदंदत्तमित्यनुषज्यते॥१५॥१६॥संपरिक्रम्यप्रदक्षिणीकृत्य॥१७॥द्वैरथंद्वौरथौययोस्तौद्विरथौ

अब्रवीच्चतदारामंसप्रतोदोरथेस्थितः॥प्रांजलिर्मातलिर्वाक्यंसहस्राक्षस्यसारथिः॥१३॥सहस्रा
क्षेणकाकुत्स्थरथोयंविजयायते॥दत्तस्तवमहासत्वश्रीमन्शत्रुनिवर्हण॥१४॥इदमैंद्रंमहच्
चापंकवचंचाग्निसन्निभं॥शराश्चादित्यसंकाशाःशक्तिश्चविमलाशिवा॥१५॥आरुह्येमंरथं
वीरराक्षसंजहिरावणं॥मयासारथिनादेवमहेंद्रइवदानवान्॥१६॥इत्युक्तःसंपरिक्रम्यरथंत
मभिवाद्यच॥आरुरोहतदारामोलोकान्लक्ष्म्याविराजयन्॥१७॥तद्बभौचाद्भुतंयुद्धंद्वैरथं
रोमहर्षणं॥रामस्यचमहाबाहोरावणस्यचरक्षसः॥१८॥सगांधर्वेणगांधर्वंदैवंदैवेनराघ
वः॥अस्त्रंराक्षसराजस्यजघानपरमास्त्रवित्॥१९॥अस्त्रंतुपरमंघोरंराक्षसंराक्षसाधिपः॥
ससर्जपरमक्रुद्धःपुनरेवनिशाचरः॥२०॥तेरावणधनुर्मुक्ताःशराःकांचनभूषणाः॥अभ्यवर्तंत
काकुत्स्थंसर्पाभूत्वामहाविषाः॥२१॥तेदीप्तवदनादीप्तंवमंतोज्वलनंमुखैः॥राममेवाभ्यवर्तं
तव्यादितास्याभयानकाः॥२२॥तैर्वासुकिसमस्पर्शैर्दीप्तभोगैर्महाविषैः॥दिशश्चसंततःसर्वावि
दिशश्चसमावृताः॥२३॥

तयोरिदंद्वैरथं॥१८॥१९॥२०॥२१॥व्यादितास्याव्यात्तवदना॥२२॥२३॥ श्रीरामरघुनाथायन

५॥६॥ममरथेनशीघ्रंरघूत्तमंयाहिभूतलंयातःप्राप्तश्च आहूयरघूत्तमंसंबोधनपूर्वंदेवराजरथोयमि
तिबोधयित्वामहद्देवहितंकुर्वित्यर्थः॥७॥८॥९॥कांचनापीडैःस्वर्णाभरणैःश्वेतप्रकीर्णकैःसितचाम

भूमौस्थितस्यरामस्यरथस्थस्यचरक्षसः॥नसमंयुद्धमित्याहुर्देवगंधर्वकिन्नराः॥५॥ततोदेव
वरःश्रीमान्श्रुत्वातेषांवचोमृतं॥आहूयमातलिंशक्रोवचनंचेदमब्रवीत्॥६॥रथेनममभू
मिष्ठंशीघ्रंयाहिरघूत्तमं॥आहूयभूतलंयातःकुरुदेवहितंमहत्॥७॥इत्युक्तोदेवराजे
नमातलिर्देवसारथिः॥प्रणम्यशिरसादेवंततोवचनमब्रवीत्॥८॥शीघ्रंयास्यामिदेवेंद्र
सारथ्यंचकरोम्यहं॥ततोहयैश्चसंयोज्यहरितैःस्पंदनोत्तमं॥ततःकांचनचित्रांगःकिंकि
णीशतभूषितः॥९॥तरुणादित्यसंकाशोवैडूर्यमयकूबरः॥सदश्वैःकांचनापीडैर्युक्तःश्वेत
प्रकीर्णकैः॥१०॥हरिभिःसूर्यसंकाशैर्हेमजालविभूषितैः॥रुक्मवेणुध्वजःश्रीमान्देवराजर
थोवरः॥११॥देवराजेनसंदिष्टोरथमारुह्यमातलिः॥अभ्यवर्त्ततकाकुत्स्थमवतीर्यत्रिविष्टपा
त्॥१२॥

राद्यलंकारवद्भिःचामरंतुप्रकीर्णकमित्यमरः॥१०॥देवराजरथोयोस्तीतिशेषःतमारुह्येत्युत्त
रेणसंबंधः॥११॥देवराजेनसंदिष्टःशीघ्रंगच्छेत्याज्ञप्तोमातलिरित्यन्वयःपूर्वाज्ञयावस्त्वासज्जीक
रणापुनराज्ञयामनुष्यलोकंप्रतिचलनमितिबोध्यं॥१२॥

द्दिवाकरंस्पृशन्निवोत्पपात·अत्युच्चोर्मिर्जातइत्यर्थः·शास्त्रवर्णाःकृष्णांतमंडलः॥२४॥कबंधांकःकबंधो
केयस्यसः॥२५॥विशाखंविशाखाख्यनक्षत्रं·एतेउत्पाताःरामस्यतथामनुष्यधर्मनटनसूचकाइति

उत्पपाततदाक्रुद्धस्पृशन्निवदिवाकरं।शास्त्रवर्णाःसुपरुषोमंदरश्मिर्दिवाकरः॥३४॥अदृश्य
तकबंधांकःसंसक्तोधूमकेतुना॥कोशलानांचनक्षत्रंव्यक्तमिंद्राग्निदैवतं॥३५॥आहत्यांगारक
स्तस्थौविशाखमपिचांबरे॥दशास्योविंशतिभुजःप्रगृहीतशरासनः॥३६॥अदृश्यतदशग्री
वोमैनाकइवपर्वतः॥निरस्यमानोरामस्तुदशग्रीवेणरक्षसा॥३७॥नाशक्नोदभिसंधातुंसा
यकान्रणमूर्द्धनि।सकृत्वाभ्रुकुटिंक्रुद्धःकिंचित्संरक्तलोचनः॥३८॥जगामसुमहाक्रोधं
निर्दहन्निवराक्षसान्।तस्यक्रुद्धस्यवदनंदृष्ट्वारामस्यधीमतः॥सर्वभूतानिवित्रेसुःप्राकं
पतचमेदिनी॥३९॥सिंहशार्दूलवान्शैलःसंचचालचलद्रुमः॥बभूवचापिक्षुभितःसमुद्रः
सरितांपतिः॥४०॥खराश्चखरनिर्घोषागगनेपरुषाघनाः॥औत्पातिकाश्चनर्दंतःसमंतात्परि
चक्रमुः॥४१॥रामंदृष्ट्वासुसंक्रुद्धमुत्पातांश्चैवदारुणान्॥वित्रेसुःसर्वभूतानिरावणस्याभवद्भयं
॥४२॥

वोध्यं॥३६॥३७॥३८॥क्रुद्धःसरामःसुमहाक्रोधंजगामतादृशक्रोधप्राप्तौस्वजनार्त्तिर्भर्तृवैपरीत्यंरावण
पराक्रमश्चनिमित्तं॥३९॥चलद्रुमइतिबहुव्रीहिःमहद्रुमइतिपाठांतरं॥४०॥औत्पातिकाःउत्पातप्रवनाः॥४१॥४२॥

प्रादुश्चक्रे प्रयुयुजे ॥२४॥ शिखिप्रभाः अग्निप्रभाः ॥२५॥२६॥२७॥२८॥ केतुमुद्दिश्य प्रक्षिप्तेनैकेन शरेण केतुं

तान्दृष्ट्वा पन्नगान्रामः समापतत आहवे ॥ अस्त्रं गारुत्मतं घोरं प्रादुश्चक्रे भयावहं ॥२४॥ ते राघवधनुर्मुक्ता रुक्मपुंखाः शिखीप्रभाः ॥ सुपर्णाः कांचनाभूत्वा विचेरुः सर्पशत्रवः ॥२५॥ ते तान्सर्वान्शरान्जघ्नुः सर्परूपान्महाजवान् ॥ सुपर्णरूपा रामस्य विशिखाः कामरूपिणः ॥२६॥ अस्त्रे प्रतिहते क्रुद्धो रावणो राक्षसाधिपः ॥ अभ्यवर्षत्तदा रामं घोराभिः शरवृष्टिभिः ॥२७॥ ततः शरसहस्रेण राममक्लिष्टकारिणं ॥ अर्दयित्वा शरौघेण मातलिं प्रत्यविध्यत ॥२८॥ चिच्छेद केतुमुद्दिश्य शरेणैकेन रावणः ॥ पातयित्वा रथोपस्थे रथात्केतुं च कांचनं ॥२९॥ ऐंद्रानभिजघानाश्वान्शरजालेन रावणः ॥ विषेदुर्देवगंधर्वाचारणा दानवैः सह ॥३०॥ राममार्त्तं तदा दृष्ट्वा सिद्धाश्च परमर्षयः ॥ व्यथिता वानरेंद्राश्च बभूवुः सविभीषणाः ॥३१॥ रामचंद्रमसं दृष्ट्वा ग्रस्तं रावणराहुणा ॥ प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियां ॥३२॥ समाक्रम्य बुधस्तस्थौ प्रजानामहितावहः ॥ सधूमपरिवृत्तोर्मिः प्रज्वलन्निव सागरः ॥३३॥

चिच्छेद छिन्नं च तं रथात्रथोर्ध्वदिशाद्रथोपस्थे पातयित्वा ॥२९॥ अश्वानपि जघन ॥३०॥३१॥ अथ राम भयावहानुत्पातानाह· प्राजापत्यमिति· प्रजापतिदैवत्यनक्षत्रं रोहिणीमित्यर्थः ॥३२॥३३॥

५३॥५४॥५५॥५६॥ त्वांनिहत्यरक्षसांसमंकरोमि· रक्षोभिःसमंकरिष्यामीत्यर्थः॥५७॥५८॥५९॥६०॥

पृथिवींचांतरिक्षंचदिशश्चप्रदिशस्तथा॥प्राकंपयत्तदाशब्दोराक्षसेंद्रस्यदारुणः॥५३॥अति
कायस्यनादेनतेनतस्यदुरात्मनः॥सर्वभूतानिवित्रेसुःसागरश्चप्रचुक्षुभे॥५४॥सग्रही
त्वामहावीर्यःशूलंतद्रावणोमहत्॥विनद्यसुमहानादंरामंपरुषमब्रवीत्॥५५॥शूलोयंव
ज्रसारस्तेरामरोषान्मयोद्यतः॥तवभ्रातसहायस्यसम्यक्प्राणान्हरिष्यति॥५६॥रक्षसामद्य
शूराणांनिहतानांचमूमुखे॥त्वांनिहत्यरणश्लाघीकरोमितरसासमं॥५७॥तिष्ठेदानींनि
हन्मित्वांएषशूलेनराघव॥एवमुक्त्वासचिक्षेपतच्छूलंराक्षसाधिपः॥५८॥तद्रावणकरा।
न्मुक्तंविद्युन्मालासमाकुलं॥अष्टघंटंमहानादंवियद्गतमशोभत॥५९॥तच्छूलंराघवो
दृष्ट्वाज्वलंतंघोरदर्शनं॥ससर्जविशिखान्रामःपमायम्यवीर्यवान्॥६०॥आपतंतंशरौ
घेणवारयामासराघवः॥उत्पतंतंयुगांताग्निंजलौघैरिववासवः॥६१॥निर्ददाहसतान्बाणा
न्रामकार्मुकनिस्सृतान्॥रावणस्यमहान्शूलःपतंगानिवपावकः॥६२॥तान्दृष्ट्वाभस्मसाद्भू
तान्शूलसंस्पर्शचूर्णितान्॥सायकानंतरिक्षस्थान्राघवःक्रोधमूर्छितः॥६३॥सतांमातलिनानी
तांशक्तिंवासवसंमतां॥जग्राहपरमक्रुद्धोराघवोरघुनंदनः॥६४॥

वारयामासप्रथमंवेगभंगकृतवान्नित्यर्थः॥६१॥६२॥६३॥६४॥

४३ ।लोकानांसंवर्त्तःप्रलयस्तद्वत्संस्थितंसंख्यानंयस्यतत् ॥४४॥ विग्रहमागताःरामरावणपक्षपाताद्वि

विमानस्थास्तदादेवागंधर्वाश्चमहोरगाः ॥ ऋषिदानवदैत्याश्चगरुत्मंतश्चखेचराः ॥४३॥ ददृशु
स्तेतदायुद्धंलोकसंवर्त्तसंस्थितं ॥ नानाप्रहरणैर्भीमैःशूरयोःसंप्रयुध्यतोः ॥४४॥ ऊचुःसुरासुराःस
र्वेतदाविग्रहमागताः ॥ प्रेक्षमाणामहायुद्धंवाक्यंभक्त्याप्रहृष्टवत् ॥४५॥ दशग्रीवंजयेत्याहुरसु
राःसमवस्थिताः ॥ देवाराममथोचुस्तेत्वंजयेतिपुनःपुनः ॥४६॥ एतस्मिन्नंतरेक्रोधाद्राघवस्यच
रावणः ॥ प्रहर्त्तुकामोदुष्टात्मास्पृशन्प्रहरणंमहत् ॥४७॥ वज्रसारंमहानादंसर्वशत्रुनिवर्हणं
शैलशृंगनिभैःकूटैश्चित्तंदृष्टिभयावहं ॥४८॥ सधूममिवतीक्ष्णाग्रंयुगांताग्निचयोपमं ॥
अतिरौद्रमनासाद्यंकालेनापिदुरासदं ॥४९॥ त्रासनंसर्वभूतानांदारुणंभेदनंतथा ॥ प्रदी
प्तइवरोषेणशूलंजग्राहरावणः ॥५०॥ तच्छूलंपरमक्रुद्धोजग्राहयुधिवीर्यवान् ॥ अनीकैः
समरेशूरैराक्षसेऽपरिवारितः ॥५१॥ समुद्यम्यमहाकायोननादयुधिभैरवं ॥ संरक्तनयनो
रोषात्स्वसैन्यमभिहर्षयन् ॥५२॥

रोधपूर्वकमभिनिवेशंप्राप्ताःप्रहृष्टवत्प्रहृष्टाःसंत ॥४५॥४६॥४७॥ कूटैःशूलस्यदलभ्रमशि
खरैः ॥४८॥ अग्निचयोग्निसमूहः ॥४९॥५०॥ आनीकैःअनेकानीकसंख्यैः ॥५१॥ ५२॥ ॥

४॥५॥६॥७॥८॥ अन्योन्यंनोपलक्षयतामित्यन्वयः॥९॥ प्रहस्येतिकोपविकारजोयंप्रहासः॥१०॥ अज्ञानाद

पूरितःशरजालेनधनुर्मुक्तेनसंयुगे॥ महागिरिरिवाकंप्यःकाकुत्स्थोनप्रकंपते॥४॥ सशरैः
शरजालानिवारयन्समरेस्थितः॥ गभस्तीनिवसूर्यस्यप्रतिजग्राहवीर्यवान्॥५॥ ततःशरस
हस्राणिक्षिप्रहस्तोनिशाचरः॥ निजघानोरसिक्रुद्धोराघवस्यमहात्मनः॥६॥ सशोणितस
मादिग्धःसमरेलक्ष्मणाग्रजः॥ दृष्टःफुल्लइवारण्येसुमहान्किंशुकद्रुमः॥७॥ शराभिघात
संरब्धःसोभिजग्राहसायकान्॥ काकुत्स्थःसुमहातेजायुगांतादित्यवर्चसः॥८॥ ततोन्योन्यं
सुसंरब्धौतावुभौरामरावणौ॥ शरांधकारेसमरेनोपलक्षयतांतदा॥९॥ ततःक्रोधसमाविष्टो
रामोदशरथात्मजः॥ उवाचरावणंवीरःप्रहस्यपरुषंवचः॥१०॥ ममभार्याजनस्थानादज्ञाना
द्राक्षसाधम॥ हृतातेविवशायस्मात्तस्मात्त्वंनासिवीर्यवान्॥११॥ मयाविरहितांदीनांवर्त्त
मानांमहावने॥ वैदेहींप्रसभंहृत्वाशूरोहमितिमन्यसे॥१२॥ स्त्रीषुशूरविनाथासुपरदारा
भिमर्शनं॥ कृत्वाकापुरुषंकर्मशूरोहमितिमन्यसे॥१३॥

विवेकान्मत्स्वरूपाज्ञानाच्चतस्मात्त्वंवीर्यवान्नासि· नासिच· मत्क्रोधदीपकेनतेनपापिनशी
घ्रविनंक्ष्यसीत्यर्थः॥११॥१२॥ विनाथासुअसंनिहितनाथासुस्त्रीषुशूरेत्यन्वयः॥१३॥ ॥

॥ ९५ ॥ ९६ ॥ वाणवद्भिः शव्दायमाणैः ॥ ९७ ॥ गात्रेभ्यः प्रस्रुतं शोणितं यस्य सः समूहस्थः समूहतया स्थितः बहुशिरःपाणित्वात्तथात्वं ॥ ९८ ॥ ९९ ॥ क० ९५ ॥ इति श्रीरामाभिरामे श्रीरा० रा० ति० यु० त्रिरधिकशततमः

सा तोलिता बलवता शक्तिर्घंटाकृतस्वना ॥ नभः प्रज्वालयामास युगांतोल्केव सप्रभा ॥ ९५ ॥ सा क्षिप्ता राक्षसेंद्रस्य तस्मिन् शूले पपात ह ॥ भिन्नः शक्त्या महान् शूलो निपपात गतद्युतिः ॥ ९६ ॥ निर्विभेद ततो वाणैर्हयानस्य मनोजवान् ॥ रामः क्षिप्रैर्महावेगैर्वाणवद्भिरजिह्मगैः ॥ निर्विभेदोरसि तदा रावणं निशितैः शरैः ॥ ९७ ॥ राघवः परमायत्तो ललाटे पत्रिभिस्त्रिभिः ॥ स शरैर्भिन्नसर्वांगो गात्रप्रस्रुतशोणितः ॥ राक्षसेंद्रः समूहस्थः फुल्लाशोक इवाबभौ ॥ ९८ ॥ स रामवाणैरतिविद्धगात्रो निशाचरेंद्रः क्षतजार्द्रगात्रः ॥ जगाम खेदं च समाजमध्ये क्रोधं च चक्रे सुभृशं तदानीं ॥ ९९ ॥ इत्यार्षे श्रीरामायणे युद्धकांडे त्रिरधिकशततमः सर्गः ॥ १०३ ॥ स तु तेन तदा क्रोधात्काकुत्स्थेनार्दितो भृशं ॥ रावणः समरश्लाघी महाक्रोधमुपागमत् ॥ १ ॥ स दीप्तनयनो मर्षाच्चापमुद्यम्य वीर्यवान् ॥ अभ्यर्दयत्सुसंक्रुद्धो राघवं परमाहवे ॥ २ ॥ वाणधारासहस्रैस्तु स तोयद इवांबरात् ॥ राघवं रावणो वाणैस्तटाकमिव पूरयन् ॥ ३ ॥

सर्गः ॥ १०३ ॥ स तु तेनेति ॥ १ ॥ २ ॥ अंबरात्पतिताभिर्धाराभिः तोयदस्तटाकमिव स रावणो राघवं वाणधारासहस्रैः पूरयन्नभ्यर्दयादि

रामा·यु·
३१३

313

अस्त्राणिप्रादुर्बभूवुः अस्त्रदेवताःसन्निहिताअभवन्·प्रहर्षात्अस्त्रदेवतासंनिधिजात्॥२५॥भूयोभ्य
धिकं॥२६॥राघवात्·राघवस्यराघवोन्मुक्तादित्तिवा॥विघूर्णान्हृदयः विकलन्हृदयः॥२७॥विक्लवेन
विसंज्ञेनांतरात्मनायदावीर्यंतत्कार्यंनारेभेशस्त्रंशस्त्रप्रयोगंचनारेभेतदारामोस्यनप्रत्यकरोत्

प्रादुर्बभूवुरस्त्राणिसर्वाणिविदितात्मनः॥प्रहर्षाच्चमहातेजाःशीघ्रहस्ततरोभवत्॥२५॥सु
भान्येतानिचिन्हानिविज्ञायात्मगतानिसः॥भूयएवार्दयद्रामोरावणंराक्षसांतकृत्॥२६॥
हरीणांचाश्मनिकरैःशरवर्षैश्चराघवात्॥हन्यमानोदशग्रीवोविघूर्णान्हृदयोभवत्॥२७॥
यदाचशस्त्रंनारेभेनचकर्षशरासनं॥नास्यप्रत्यकरोद्वीर्यंविक्लवेनांतरात्मना॥२८॥क्षिप्ता
श्चाशुशरास्तेनशस्त्राणिविविधानिच॥मरणार्थायवर्त्तंतेमृत्युकालोभिवर्त्तत॥२९॥सूत
स्तुरथनेनास्यतदवस्थंनिरीक्ष्यतं॥शनैर्युद्धादसंभ्रांतोरथंतस्यापवाहयत्॥३०॥रथंचत
स्याथजवेनसारथिर्निवार्यभीमंजलदस्वनंतदा॥जगामभीत्यासमरान्महीपतिंनिरस्तवी
र्यंपतितंसमीक्ष्य॥३१॥इत्यार्षेश्रीरा॰यु॰चतुराधिकशततमःसर्गः॥१०४॥

संहारायनातिवृद्दि
दितिभावः॥२८॥अपितुमृत्योतःप्रागेवक्षिप्ताःशराःअस्यरावणस्यमरणार्थायमरणरूपप्रयोजनाय
प्रवर्त्तंतेस्म·एवमस्यमृत्युकालोभ्यवर्त्ततउपस्थितः॥२९॥मृत्युकालेउपस्थितेऽस्यरथंसूतोपवाहयत्
॥३०॥३१॥इतिश्रीरामाभिरामे॰युद्धकांडेचतुराधिकशततमःसर्गः॥१०४॥

राम·
३१३

१४॥श्लाघनीयंयशस्यंचमहत्कर्मकृतंत्वयेतिव्यंग्योक्तिः॥१५॥तदेवस्पष्टमाह-उत्सेकेनेति-गर्वेणाभि

भिन्नमर्याद निर्लज्जचारित्रेष्वनवस्थित॥दर्पान्मृत्युमुपादायशूरोहमितिमन्यसे॥१४॥शूरेणध
नदभ्रात्रावलैःसमुदितेनच॥श्लाघनीयंमहत्कर्मयशस्यंचकृतंत्वया॥१५॥उत्सेकेनाभिपन्न
स्यगर्हितस्याहितस्यच॥कर्मणःप्राप्नुहीदानींतस्याद्यसुमहत्फलं॥१६॥शूरोहमितिचात्मा
नमवगच्छसिदुर्मते॥नैवलज्जास्तितेसीतांचोरवद्व्यपकर्षतः॥१७॥यदिमत्संनिधौसीताधर्षि
तास्यात्त्वयाबलात्॥भ्रातरंतुखरंपश्येस्तदामत्सायकैर्हतः॥१८॥दिष्ट्यासिमममंदात्मन्
चक्षुर्विषयमागतः॥अद्यत्वांसायकैस्तीक्ष्णैर्नयामियमसादनं॥१९॥अद्यतेमच्छरैश्छिन्नंशि
रोज्वलितकुंडलं॥क्रव्यादाव्यपकर्षंतुविकीर्णंरणपांसुषु॥२०॥निपत्योरसिगृध्रास्तेक्षितौक्षि
प्तस्यरावण॥पिबंतुरुधिरंतर्षाद्बाणशल्यांतरोत्थितं॥२१॥अद्यमद्बाणभिन्नस्यगतासोःपतित
स्यते॥कर्षंत्वंत्राणिपतगागरुत्मंतइवोरगान्॥२२॥इत्येवंसवदन्वीरोरामःशत्रुनिवर्हणः॥रा
क्षसेंद्रंसमीपस्थंशरवर्षैरवाकिरत्॥२३॥वभूवद्विगुणंवीर्यंवलंहर्षश्चसंयुगे॥रामस्यास्त्रव
लंचैवशत्रोर्निधनकांक्षिणः॥२४॥

पन्नस्यानुचितस्यअहितस्यइहामुत्रानर्थरूपस्य॥१६॥१७॥तदातदेव
१८॥१९॥तर्षात्पिपासयाबाणशल्यांतरोत्थितं-बाणानांयानिशल्यानितत्कृतादंतराच्छिद्रादुत्थितं॥२१॥

।२२।२३।रामस्यवीर्यादिद्विगुणंबभूवापकार
स्मरणादिनिशेषः।२४॥

अध्युषितश्चिरकालमत्समीपेस्थितःमेगुणाःमत्कृतोपकारइत्यर्थः॥९॥हितबुद्धिःसूतः॥१०॥नोपजप्तः
उपजापंभेदंनप्रापितःसत्क्रियात्वत्कृतेतिशेषः॥११॥यशश्चपरिरक्षता·जीवनरक्षणेनात्मीयंत्वदीयंच
यशोरक्षतेत्यर्थःस्नेहप्रसन्नमनसास्नेहोद्रीन्हृदयेनरथापवाहनंशूरत्वात्तवाप्रियमपिहितमिति

निवर्त्तयरथंशीघ्रंयावन्नापैतिमेरिपुः।यदिवाध्युषितोसित्वंस्मर्यतेयदिमेगुणाः॥९॥एवंपरु
षमुक्तस्तुहितबुद्धिरबुद्धिना।अब्रवीद्रावणंसूतोहितंसानुनयंवचः॥१०॥नभीतोस्मिन
मूढोस्मिनोपजप्तोस्मिशत्रुभिः।नप्रमत्तोननिःस्नेहोविस्मतानचसत्क्रिया॥११॥मयातु
हितकामेनयशश्चपरिरक्षता।स्नेहप्रसन्नमनसाहितमित्यप्रियंकृतं॥१२॥नास्मिन्नर्थे
महाराजत्वंमांप्रियहितेरतं।कश्चिल्लघुरिवानार्योदोषतोगंतुमर्हसि॥१३॥श्रूयतांप्रति
दास्यामियन्निमित्तंमयारथः।नदीवेगइवांभोभिःसंयुगेविनिवर्त्तितः॥१४॥ ॥ ॥

निश्चित्यकृतं॥१२॥अस्मिन्नर्थेयुद्धादयोहनरूपेकार्ये·अनार्योलघुरिव·अविमश्यकारीत्तइ
इवदोषतोगंतुंदोषवत्त्वेनज्ञातुंनार्हसिमयिदुष्टबुद्धिंकर्त्तुंनार्हसीत्यर्थः॥१३॥कुतस्तत्राह·श्रू
यतामितियदुत्तरंप्रतिदास्यामितत्श्रूयतांयन्निमित्तंचरथोनिवर्त्तितस्तच्चश्रूयतांरथोरथ
वेगः·चंद्रोदयेनप्रवद्धसमुद्रांभोभिर्नदीवेगइवसंयुगेसंयुगान्निवर्त्तितः॥१४॥ ॥

सतुमोहात्क्षितिशनैर्मोहिनमुक्त इतिशेषः॥१॥हीनवीर्यंहीनवलंअशक्तंअस्त्रादिप्रयोगसामर्थ्यहीनंलघुम
ल्पचित्तंअसत्वमधीरंतेजःपराभिभवसामर्थ्यं॥२॥अवज्ञायावमत्यस्त्वबुध्यास्वेच्छया॥३॥मच्छंदंमदभिप्रायं
४॥प्रत्ययःमद्विषयोलोकस्यशूरत्वविश्वासः॥५॥शत्रोःपश्यतःसतस्त्वयाहंकापुरुषःकुत्सितपुरुषःकृतः

सतुमोहात्सुसंक्रुद्धःकृतांतबलचोदितः॥क्रोधसंरक्तनयनोरावणःसूतमब्रवीत्॥१॥हीनवीर्यमि
वाशक्तंपौरुषेणविवर्जितं॥भीरुंलघुमिवासत्वंविहीनमिवतेजसा॥२॥विमुक्तमिवमायाभिर
स्त्रैश्चविवहिष्कृतं॥मामवज्ञायदुर्बुद्धेस्वयाबुध्याविचेष्टसे॥३॥किमर्थंमामवज्ञायमच्छंदमन
वेक्ष्यच॥त्वयाशत्रुसमक्षंमेरथोयमपवाहितः॥४॥त्वयाद्यहिममानार्यचिरकालसमुपार्जितं॥यशो
वीर्यंचतेजश्चप्रत्ययश्चविनाशितः॥५॥शत्रोःप्रख्यातवीर्यस्यरंजनीयस्यविक्रमैः॥पश्यतोयु
द्धलुब्धोहंकृतःकापुरुषस्त्वया॥६॥यत्त्वंकथमिमंमोहान्नचेद्वहसिदुर्मते॥सत्योयंप्रतितर्कोमे
परेणत्वंपुरस्कृतः॥७॥नहितद्विद्यतेकर्मसुहृदोहितकांक्षिणः॥रिपूणांसदृशंत्वेतद्यत्त्वयेतद
नुष्ठितं॥८॥

॥६॥यत् यतस्त्वमिमंरथंकथमपिचेन्नोद्वहसिमोहादपिअज्ञानादपिशत्रोरभिमुखं
नप्रापयसिसत्वंपरेणोपस्कृतः उत्कोचेनप्राप्तविकारइत्येवंमेप्रतितर्कःसत्यःउपाद्धेकृतेर्थेक
रोतेःसुट्॥७॥नहितत्त्वदनुष्ठितंकर्मसुहृदोविद्यतेभवतियत्त्वयानुष्ठितंतथापवाहनकर्मेत्यर्थः॥

स्वेच्छयानिमित्तंविनामयायदिदंकृतंतद्भर्तृस्नेहपरीतेनेनतद्ध्याप्तेनैवकृतं॥२२॥यथात्वंतत्कार्यस्व
रूपंवक्ष्यसितत्करिष्यामि·गतानृण्येन·दत्तऋणात्प्रयोगात्क्वापिमनोनबध्नतेत्यर्थः॥२३॥२४॥२५॥२६॥

स्वेच्छयानमयावीररथोयमपवाहितः॥भर्तृस्नेहपरीतेनमयेदंयत्कृतंप्रभो॥२२॥आ
ज्ञापययथातत्त्वंवक्ष्यस्यरिनिषूदन॥तत्करिष्याम्यहंवीरगतानृण्येनचेतसा॥२३॥संतु
ष्टस्तेनवाक्येनरावणस्तस्यसारथेः॥प्रशस्यैनंबहुविधंयुद्धलुब्धोब्रवीदिदं॥२४॥रथंशी
घ्रमिमंसूतराघवाभिमुखंनय॥नाहत्वासमरेशत्रून्निवर्त्तिष्यतिरावणः॥२५॥एवमुक्त्वा
रथस्थस्यरावणोराक्षसेश्वरः॥ददौतस्यशुभंह्येकंहस्ताभरणमुत्तमं॥श्रुत्वारावण
वाक्यानिसारथिःसंन्यवर्त्तत॥२६॥ततोद्रुतंरावणवाक्यचोदितःप्रचोदयामासहया
न्ससारथिः॥सराक्षसेन्द्रस्यततोमहारथःक्षणेनरामस्यरणाग्रतोभवत्॥२७॥इत्यार्षेश्री
रामायणेवाल्मीकीयेयुद्धकांडेपंचाधिकशततमःसर्गः॥१०५॥ ॥

महान्रथइतिकर्मधारयःरणाग्रतःरणेऽग्रतःसंमुखइत्यर्थःरणोऽग्रतइतिपाठांतरं२७
कतकस्तु॥६७॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेपंचाधिकश
शततमःसर्गः॥१०६॥

रणाकर्मणायुद्धेनवीर्यसौमुख्यंवीर्यकार्यंप्रतिसौमुख्यंवीर्यसौमुख्यं·प्रकर्षंशत्रोरपेक्षयाधिक्यंप्रहार
मितिपाठेशत्रुविषयकमित्यर्थः॥१५॥१६॥निमित्तानिदुर्निमित्तानिअभिपन्नेषुजातेषुअप्रदक्षिणांप्रति
कूलंलक्षयामीतिसंबंधः॥१७॥ननुसंत्तिमानिकिंतद्विचारेणेत्याशंक्याह·देशेत्यादिना·लक्षणानि

अमंतवावगच्छामिमहतारणाकर्मणा॥नहितेवीर्यसौमुख्यंप्रकर्षंनोपधारये॥१५॥रथोद्वह
नखिन्नाश्चभग्नामेरथवाजिनः॥दीनाघर्मपरिश्रांतागावोवर्षहताइव॥१६॥।निमित्तानिचभूयि
ष्ठंयानिप्रादुर्भवंतिनः॥तेषुतेष्वभिपन्नेषुलक्षयाम्यप्रदक्षिणं॥१७॥देशकालौचविज्ञेयौलक्ष
णानींगितानिच॥दैन्यंहर्षश्चखेदश्चरथिनश्चमहाबलं॥१८॥स्थलनिम्नानिभूमेश्चसमानि
विषमाणिच॥युद्धकालश्चविज्ञेयःपरस्यांतरदर्शनं॥१९॥उपयानापयानेचस्थानंप्रत्यप
सर्पणं॥सर्वमेतद्रथस्थेनज्ञेयंरथकुटुंबिना॥२०॥तवविश्रामहेतोस्तुतथैषांरथवाजिनां
रौद्रंवर्ज्जयताखेदंक्षमंकृतमिदंमया॥२१॥

शुभाशुभनिमित्तानिइंगितानिमुखप्रसादवैवर्ण्यादि
चेष्टाश्चदैन्यमनुत्साहः॥१८॥स्थलंसमं·निम्नंनीचंतस्यैवविवरणंसमानीत्यादि·अंतरदर्शनंप्रहार
यच्छिद्रदर्शनं॥१९॥उपयानापयानेरथस्यरिपुसमीपप्रापणनिवर्त्तनेतत्कालाविति·यावत्स्थानं
स्थैर्येणावस्थानं·प्रत्यपसर्पणं·अभिमुखस्थितस्यैवपश्चतोपसरणं·रथकुटुंबिनारथनिर्वाहके
णासारथिना॥२०॥रौद्रंक्रूरंखेदंवर्जययतापरि
॥२

किमब्रवीत्तदाह· रामरामेत्यादियेनस्तोत्रेणसर्वानरीन्विजेष्यसितद्गुह्यंरहस्यंसनातनंप्रवाह
नादिभूतंअनेनकस्वकल्पितत्वनिरासः शृणु॥३॥आदित्यहृदयंयएषोंतरादित्येहिरण्मयइ
त्याद्यशेषश्रुतिप्रसिद्धंब्रह्मतद्देवताकत्वात्तदात्मकंस्तोत्रंपुण्यंपुण्यजनकंअनेनपारत्रिकंफ

राम राममहाबाहोशृणुगुह्यंसनातनं॥येनसर्वानरीन्वत्ससमरेविजयिष्यसे॥३॥
आदित्यहृदयंपुण्यंसर्वशत्रुविनाशनं॥जयावहंजपंनित्यंअक्षय्यंपरमंशिवं॥४॥
सर्वमंगलमांगल्यंसर्वपापप्रणाशनं॥चिंताशोकप्रशमनमायुर्वर्द्धनमुत्तमं ॥५॥

लमुक्तंसर्वशत्रुविनाशनंजयावहमित्यैहिकंफलंजपंजप्यतइतिजपंस्तोत्रंपरमफलमा
हः अक्षयंपरमंशिवं· अपवर्गरूपंतत्प्रदमित्यर्थः कदातत्राह· नित्यंयदिनित्यंनित्यवत्फल
निरपेक्षंतदातदातत्फलमितिभावः जपेन्नित्यमितिपाठांतरं॥४॥ऐहिकानिफलांतराणिस
र्वमंगलमांगल्यंसर्वमंगलरूपाणामपिमंगलप्रदं॥५॥

अथरावणवैभवंदृष्ट्वात्रस्तमिवभगवंतंरामंभगवद्ब्रह्मदत्तरावणवैभवनिवर्त्तनस्यभगवद्ब्रह्मानुग्र
हैकसाध्यत्वात्तदनुग्रहसिद्धयेविद्यामंडलऋषिरगस्त्योब्रह्मरूपादित्यहृदयदेवताकत्वादादित्य
हृदयाख्यंस्तोत्रमुपदिशतिस्मेत्याह· ततोयुद्धेत्यादि· अस्यस्तोत्रस्यागस्त्यऋषिरनुष्टुप्छंद आदि
त्यहृदयभूतोभगवान्ब्रह्मादेवतानिरस्ताशेषविघ्नतयाब्रह्मविद्यासिद्धौसर्वत्रजयसिद्धौचवि
नियोगः· अस्यषडंगंप्रणवेनरश्मिमतेनमइत्यनेनवा· गायत्र्याषडंगमित्यन्ये· ततोयुद्धेत्यादित्वरस्वे

ततोयुद्धपरिश्रांतंसमरेचिंतयास्थितं॥रावणंचाग्रतोदृष्ट्वायुद्धायसमुपस्थितं॥१॥
दैवतैश्चसमागम्यद्रष्टुमभ्यागतोरणं॥उपगम्याब्रवीद्राममगस्त्योभगवांस्तदा॥२॥

त्यंतंस्तोत्रं· एवंभयनाटनंतन्मूलकमगस्त्यादुपदेशग्रहणंलोकानुग्रहायलोकस्यजयसाध
नवस्तुप्रकाशनार्थमितितत्त्वंयुद्धपरिश्रांतं अनेकाहोरात्रयुद्धपरिश्रांनंतामिवस्थितं· समरे
समरविषयेश्चिंतयाप्रबलोयमरिःकथंजेतव्यइतिचिंतयायुक्तंसारथिनापवाहितंरावणं
प्रातर्युद्धायाग्रतोरामसंमुखेसमुपस्थितंदृष्ट्वास्थितंधनुरवष्टभ्यास्थितंरामं॥१॥दैवतैःसमा
गम्यमिलित्वारणंद्रष्टुमभ्यागतोभगवानगस्त्योंतर्यामिभगवत्प्रेरणयादैवनियोगतश्चउ
क्तविशेषणंराममुपागम्यउद्यतिभास्करेब्रवीत्॥२॥

रश्मिमदादिशब्दप्रतिपाद्यस्यब्रह्मत्वंस्फुटयन्नाहसर्वेति· हियस्मात्सर्वदेवोपादानकारणत्वादेषसर्वदेवात्मकः इदंसर्वात्मकत्वोपलक्षणं· सर्वदेवात्मकायनमः॥७॥तेजस्वीसर्वभासनसमर्थतेजोयुक्तः तेजस्विनेनमः॥८॥रश्मिभिः ज्ञानरश्मिभिः सर्ववस्तुजातंभावयतिसत्तास्फुर्तिमत्संपादयतिसः रश्मिभिर्योगिनोभावयतिब्रह्मलोकंप्रापयतीत्यर्थः इत्यन्ये· रश्मिभाव

सर्वदेवात्मकोह्येषतेजस्वीरश्मिभावनः॥एषदेवासुरगणान्लोकान्पातिगभस्तिभिः॥७॥

नायनमः॥९॥एषएतन्मंडलवर्ती· देवासुरगणान्तेषांलोकांगभस्तिभिर्ज्ञानज्ञेयरश्मिभिःपाति· याभिरादित्यस्तपतिरश्मिभिस्ताभिःपर्जन्योवर्षतिइतिश्रुतेर्वृष्टिद्वारान्नहविरादिदानेनदेवादिगणान्लोकान्मनुष्यादींश्चयःपाति· देवासुरगणलोकपालायनमः॥१०॥अत्रैषपातीत्युक्त्यासूर्यस्यपुरस्थितत्वनिर्देशनसूर्योदयकालेएतत्स्तोत्रदानमितिलभ्यते॥७॥ ॥

रश्मिमंतंपंचेंद्रियद्वारानेकज्ञानरश्मिमंतं-ज्योतीरूपरश्मिमंतंचरश्मिशब्दोभक्तवाची-तद्वंतंतन्मध्येभासमासमित्यर्थंतीर्थश्राह-रश्मिमतेनमः॥१॥समुद्यंतं लोकान्क्रियासुप्रवर्त्तयंतं-उदयगिरावुदयंप्राप्तंच-समुद्यतेनमः॥२॥एवंनमोंताएतेऽस्यनमस्कारार्चनमंत्राइतिउच्यते-देवैःसात्विकवृत्तिभिःअसुरैराजसतामसवृत्तिभिश्चनमस्कृतंसाक्षिचैतन्यत्वेननित्यमुपजीवितं-॥इंद्रविरोचनादीनामविशेषादुपास्यंचदेवासुरनमस्कृतायनमः॥३॥विवस्वान्विशेषे

रश्मिमंतंसमुद्यंतंदेवासुरनमस्कृतं॥पूजयस्वविवस्वंतंभास्करंभुवनेश्वरं॥६॥

णवसुमान्पृषोदरादित्वादुकारलोपःवसुनिधिरित्यर्थःसकलव्यवहाराधिष्ठानत्वाद्वसुमंतंस्वोदयेनसकलव्यवहारप्रवर्त्तकत्वाद्ववसुमत्वंविवस्वतेनमः॥४॥भास्करंज्ञानज्ञेयभासःकरोतिइतिभास्करंतस्यभासासर्वमिदंविभातीतिश्रुतेःभास्करायनमः॥५॥भुवनानांमूलादिब्रह्मरंध्रांतयोगाधारभूमीनामीश्वरमधिष्ठातारं-भूराद्यशेषभुवनानांप्रकाशकतयोश्वरंच-भुवनेश्वरायनमः॥६॥

रामा·यु·
३१८

318

पितरःवीजप्रदाःतद्रुपोयंसर्वेषांवीजप्रदः तासांब्रह्ममहद्योनिरहंवीजप्रदःपितेत्युक्तेः वहुत्वंप्रजार्थंकव्य
वाहनादयःपितृदेवताश्च·पितृदेवतायनमः॥२२॥वसुरत्नमर्थःश्रेष्ठोवसवश्च·वसुमूर्त्तयेनमः॥२३॥सा
ध्याःप्राधान्येनयोगिनांप्रसाधनीयत्वात्साध्याःदेवगणविशेषाश्चसाध्याः साध्यमूर्त्तयेनमः॥२४॥अश्वि
नोःअश्नोतेर्वन्प्रत्ययांतोश्वशव्दःसर्वव्याप्तौदेवभिषजौच·अश्विमूर्त्तयेनमः॥२५॥मरुत्मृङ्·प्राणत्या
गेऽस्यधातोरुतिप्रत्ययांतंरूपंअनर्थमारकएकोनपंचाशत्संख्यमरुद्गणाश्च·मरुन्मूर्त्तयेनमः॥२६॥
मनुइतिमनुःसर्वज्ञःआदिराजश्च·मनवेनमः॥२७॥वातीतिवायुःवागतिगंधनयोःगतिज्ञानंज्ञापनं

पितरोवसवःसाध्याअश्विनौमरुतोमनुः॥वायुर्वह्निःप्रजाःप्राणःक्रतुकर्त्ताप्रभाकरः९॥

चज्ञाताज्ञापकश्चपंचवृत्तिःप्राणश्च·वायुमूर्त्तयेनमः॥२८॥वह्नेर्निःवह्निःस्वेमहिम्निस्वयंप्रतिष्ठि
तोभूत्वास्वस्मिन्सर्वंसारंवहतीतिवह्निःअग्निश्च·वह्नयेनमः॥२९॥प्रजापतयेजीवात्मनेतिप्रजाःप्र
कृष्टजनिमंतोविभूत्यध्यायोक्तदेवाश्चप्रजारूपायनमः॥३०॥प्राणपतीतिप्राणःनप्राणेननापाने
नमर्त्योजीवतिकश्चनइतरेणतुजीवंतियस्मिन्नेतावुपाश्रिताइतिश्रुतेः प्राणाख्यात्राप्रवर्त्तकःप्राणः
प्राणःप्राणायनमः॥३१॥क्रतूनांज्ञानानांकर्त्ताउपादानं·वसंताद्यृतुकर्त्तासंवत्सरात्माकालश्च·क्रतु
कर्त्रेनमः॥३२॥क्रतुःसुदर्शनंकालइतिसहस्रनामसुपाठात्क्रतुरितिपाठेभिन्नंपदमितितीर्थःकर्त्तासक
लजगत्कर्त्ता·प्रभाकरोभास्करवत्तशव्दस्यापिअर्थतादात्म्येनदेवतास्वरूपत्वात्भास्करप्रभाकरयोः
शव्दयोःशंव्दभेदेनमूर्त्यंतरत्वंज्ञेयं·प्रभाकरायनम ॥३३॥९॥

राम०
३१८

एषः एषोंतरादित्ये हिरण्मयः पुरुष इति श्रुतेर्योगजनितसाक्षात्कारविषयः पुरोदृश्यमानश्च व्रह्मा निखि
लैश्वर्यविद्यास्तस्य सत्वशक्तिः व्रह्मणे नमः ॥११॥ विष्णुः स्वस्वरूपपरिपालनप्रयोजकतया परिगृहीतविश्वमू
र्त्तिर्नारायणः विष्णवे नमः ॥१२॥ शिवोऽपरिमितकल्याणगुणस्वभावः मृगपरश्वादिचिन्हो भगवान्महादेवश्च
शिवाय नमः ॥१३॥ जीवज्योतिर्द्वारा सर्वाणींद्रियाणि स्कंदतीति स्कंदः। भगवान्मयूरवाहनश्च स्कंदाय
नमः ॥१४॥ प्रजानां जन्यवस्तूनां स्वामी स्वशक्तिद्वारा सर्वोपादानत्वात् दशायुक्तायुधचिन्हो भगवान्प
रेश्वरश्च प्रजापतये नमः ॥१५॥ महेंद्रः इति परमैश्वर्ययुक्तः सर्वथानुभ्यः परमैश्वर्यकार्यं प्राप्तः वज्र

एष व्रह्मा च विष्णुश्च शिवः स्कंदः प्रजापतिः। महेंद्रो धनदः कालो यमः सोमोप्यपांपतिः ॥८॥

हस्तत्वादिचिन्हो देवराजश्च महेंद्राय नमः ॥१६॥ धनं चैतन्यं सर्वानुग्रहाय सर्वस्यांतर्ददातीति स्थापय
तीति धनदः अन्नादो वसुदान इत्युक्तसकलफलदः कुवेरश्च धनदाय नमः ॥१७॥ कालः वुद्धिवृत्ति
जातं अपरोक्षतया कलयतीति कालः मंडलस्पंदानुमेयः क्रियापरिच्छेदकश्च कालः कालाय नमः ॥१८॥
यमयतीति यमः सर्वांतर्यामी यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः तेन चेदविवादस्ते मा गंगां मा कुरूनामः
विवादे भेदाभाव इति मनुः पितृपतिश्च यमाय नमः ॥१९॥ सोमः उमा उः केवलनिपातः मा प्रभा उ सर्वदा प्रभया स
हितः सोमः भगवानर्धनारीश्वरश्च सोमः पवते जनिता मतीनामिति श्रुतेः सर्वकारणं सोमशब्दवाच्यं उमया श
क्त्या प्रकृत्याख्यया सहित इत्यर्थमन्ये सोमाय नमः ॥२०॥ आपः सत्वं चितात्मकं तस्यानंतकरणोपाधिवशतो
नेतस्य पतिः वरुणश्च अपांपतये नमः ॥२१॥८॥

ह्रितो दिशोऽश्नोति व्याप्नोतीति हरिदश्वः श्यामवर्णाश्वश्च· हरिदश्वाय नमः ॥४४॥ सहस्राण्यनंतान्यर्चीषि रश्मीनानियस्य सः यद्वा सहस्रसंख्याकान्यर्चीषि रश्मयो यस्य· सहस्रार्चिषे नमः ॥४५॥ सप्तसप्तिः सप्तशीर्षण्याः प्राणा इन्द्रियाणि· द्वे चक्षुषी द्वे श्रोत्रे द्वे नासिके वाचैकेति सप्त प्राणाः प्रभवंति तस्मादिति श्रुतेः सप्तप्राणानां सप्तिः प्रवर्तियतः सः सप्तसंख्याश्वश्च हयसैंधवसप्तय इति कोशः सप्तसप्तये नमः ॥४६॥ मरीचिमच्छब्दो गभस्तिमच्छब्देन व्याख्यातः मरीचिमते नमः ॥४७॥ अज्ञानलक्षणं तिमिरमुन्मथ्ना

हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ॥ तिमिरोन्मथनः शंभुस्त्वष्टा मार्त्तंडकोंऽशुमान् ॥
॥११॥

तीति तिमिरोन्मथनः अंधकारनाशकश्च· तिमिरोन्मथनाय नमः ॥४८॥ शमपवर्गादिरूपं सुखमस्माद्भवतीति शंभुः शंभवे नमः ॥४९॥ त्वक्षति तनूकरोति भक्तानामुत्पत्तिप्रलयरूपानर्थप्रवाहदुःखमिति त्वष्टा देववर्धकिश्च· त्वष्ट्रे नमः ॥५०॥ मृतमचेतनमंडं ब्रह्मांडं जीवयतीति मार्त्तंडः स एव मार्त्तंडकः मार्त्तंडकाय नमः ॥५१॥ अंशुमान् मरीचिमत्पर्यायः । अंशुमान् सर्वव्यापकः अंश्व्याप्ताविति धातुः अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इति श्रुतेरिति तीर्थः अंशुमते नमः ॥५२॥ ॥११॥

यस्मात्सर्वमादत्ते।तस्मादादित्यइत्योपनिषदश्रुत्यत्याऽशेषविषयभोक्ता आदित्यः मंडलादित्यः मंडलाभिमानी
अदितिपुत्रश्च· आदित्यायनमः॥३४॥षड्प्राणिप्रसवेऽन्तःकरणोपाधिनाऽपरिमितचिदात्मवर्गस्त्रष्टा·
रश्मिभिःपर्जन्यादिप्रवर्त्यातत्तदन्नादिस्रष्टा·सवित्रैनमः॥३५॥सर्त्तेःसूर्यःसर्वगःसूर्यएकाकीचरतीतिश्रु
तेःकर्मप्रेरकोवा·सूर्यायनमः॥३६॥खंपरमाकाशंन्हृदयाकाशंचगच्छतीतिखगःखगायनमः॥३७॥पु
ष्णातीतिपूषास्थितिकर्त्ता·पूष्णेनमः॥३८॥गभस्तिमान्रश्मिवत्समानार्थःशब्दभेदान्मूर्त्तिभेदःयद्वा
गभस्तिःसर्वव्यापिनीलक्ष्मीस्तद्वान्यथासर्वगतोविष्णुस्तथैवेयंद्विजोत्तमेत्तिपराशरस्मृतेःगभस्ति

आदित्यःसवितासूर्यःखगःपूषागभस्तिमान्॥सुवर्णसदृशोभानुर्हिरण्यरेतादिवाकरः॥१०॥

मतेनमः॥३९॥सुवर्णसदृशःआत्मलाभान्नपरंविद्यतइतिश्रुतेःसुवर्णसदृशानिखिलाभतुल्य
लाभःआप्नणखात्सर्वएवसुवर्णइतिश्रुतेःसुवर्णसदृशामूर्त्तिर्यस्य·सुवर्णसदृशायनमः॥४०॥
सुपर्णस्तपनइतिपाठेवासुपर्णइतिश्रुतेःसुपर्णत्वंब्रह्मणःतपतीतितपनइत्तितीर्थःभानु
र्मासकःभानवेनमः॥४१॥हिरण्यंतेजःप्रज्ञारूपंतद्रेतोजगदुत्पत्तिवीजंयस्यसःयद्वाहिरण्यरेतो
उत्पादकंद्रव्यंयस्यसः·यद्वाहिरण्यंतत्साधनंपारदएवरेतोयस्येत्यर्थःहिरण्यरेतसेनमः॥४२॥अ
न्तराधिकमार्षंदिवेत्यव्ययंप्रकाशवाचकंप्रकाशंकरोतीतिदिवाकरःदिवाकरायनमः॥४३॥१०

व्योमनाथः आकाशकर्त्ता॰ आत्मन आकाशः संभूत इति श्रुतेः व्योमनाथायनमः ॥६२॥ नमोभेदी तिमिरोन्मथनपर्यायः तमोभेदिनेनमः ॥६३॥ ऋगादीनां पारस्तत्तदुपनिषत्तत्तस्तदेकप्रतिपाद्यः ऋग्यजुः सामपारगायनमः ॥६४॥ घनाऽधिकावृष्टिः सकलकर्मफलदानरूपा यस्मात्सः घनासंप

व्योमनाथस्तमोभेदी ऋग्यजुः सामपारगः ॥ घ
नवृष्टिरपांमित्रो विंध्यवीथीप्लवंगमः ॥१३॥

र्णोवृष्टिर्यस्मादिति च॰ घनवृष्टयेनमः ॥६५॥ अपांसात्त्विकानांमित्रश्चैतन्यप्रदानेनोपकर्त्तापांमित्रः जलानामुत्पादकश्च॰ अपांमित्रायनमः ॥६६॥ विंध्यं गहनं दुर्गं एवं च दुर्गे सौषुम्ने ब्रह्मनाडीमार्गे प्लवंगमः शीघ्रगंता॰ किंच विंध्यवीथी सूर्यमार्गस्तेन शीघ्रगंता च॰ विंध्यवीथीप्लवंगमायनमः ॥६७॥१३॥

हिरण्यगर्भः सकलजगदुत्पत्तिस्थितिलयकर्त्ता वह्मविष्णुरुद्ररूपो हिरण्यगर्भः भगवते हिरण्यगर्भायनम इति ॥५२॥ द्वादशाक्षरी आदित्यहृदयरहस्यमिति कतकः ॥५३॥ शिशिरः शीतः सुखस्वभावः शिशिरायनमः ॥५४॥ तपनः तपरोश्वर्य्यैस्वभावत एव सर्वैश्वर इत्यर्थः तपनायनमः ॥५५॥ अहस्करो दिवाकरपर्यायः अहस्करायनमः ॥५६॥ रौति उपदिशति हिरण्यगर्भादिभ्य इति रविः। यो वेदांश्च प्रहिणोति

हिरण्यगर्भः शिशिरस्तपनोऽहस्करो रविः ॥ अ
ग्निगर्भोऽदितेः पुत्रः शंखः शिशिरनाशनः ॥१२॥

तस्मा इति श्रुतेः रवयेनमः ॥५७॥ अग्निः कालाग्निरुद्रो गर्भे यस्य सोऽग्निगर्भः नारायणाद्रुद्रो जायत इति श्रुतेः अग्निगर्भायनमः ॥५८॥ दितिर्नाशो न विद्यते यस्याः सा अदितिर्ब्रह्मविद्या तस्याः पुत्रस्तत्त्वम्पत्वात् आदित्यश्च अदितेः पुत्रायनमः ॥५९॥ शं च खं च शंखः परमानंदगगनात्मेत्यर्थः शंखायनमः ६०। शिशिरं जाड्यं मंदबुद्धित्वं नाशयतीति शिशिरनाशनः हिमनाशकश्च शिशिरनाशनायनमः ६१॥

॥१२॥

पूर्वायगिरयेतदंतर्यामिणेइत्यर्थः पूर्वायगिरयेनमः॥८२॥एवंपश्चिमायाद्रयेइति पश्चिमायाद्रव
येनमः॥८३॥ज्योतिर्गणानांपतयेनक्षत्रग्रहताराधिपपर्यायःज्योतिर्गणानांपतयेनमः॥८४॥दिना
धिपतयेइतिदिवाकरपर्यायःदिनाधिपतयेनमः॥८५॥जयायब्रह्मलोकांतसकलल्लोकजयप्र
दायजयाख्यब्रह्मद्वारमूर्त्तयेच जयायजयमूर्त्तयेनमः॥८६॥जयभद्रायब्रह्मलोकादिजय

नमः पूर्वायगिरयेपश्चिमायाद्रयेनमः॥ज्योतिर्गणानांपतयेदिनाधिपतयेनमः॥१६॥
जयायजयभद्रायहर्यश्वायनमोनमः॥नमोनमःसहस्रांशोआदित्यायनमोनमः॥१७॥

प्राप्यंयद्ब्रह्मानंदस्तदात्मकायजयभद्राख्यद्वितीयद्वारपालमूर्त्तयेच जयभद्रायनमः॥८७
इमावेवशापवशात्तोऽवतीर्णौरावणकुंभकर्णौ हर्यश्वोहरिदश्वपर्यायः हर्यश्वायनमः॥८८॥स
हस्रांशोइतिसहस्रार्चिःपर्यायसहस्रंमनेनाजीवाअंशवोंशायस्यसःममैवांशोजीवलोकेजी
वभूतइतिस्मृतेः सहस्रांशवेनमः॥८९॥आदरातिशयायनमःशब्दस्पष्टिरुक्तिः आदित्येतिनाम्नः
प्राधान्यबोधनायतस्पष्टिरुक्तिः आदित्यायनमः॥९०॥१७॥

आतपी· आसमंतात्तपो जगन्निर्माणसंकल्पः सोस्यास्तीत्यातपी·तप आलोचने· आतपिनेनमः॥६८॥मंड
लं किरणसमूहस्तद्वानयद्वा मंड्यतेनेनेति मंडलं कौस्तुभादि तद्वान्·मंडलिनेनमः॥६९॥मृत्युः सर्व
मृत्युसंपादकः अमुमाहुः परं मृत्युमिति श्रुतेः मृत्यवेनमः॥७०॥पिंगलः पिंगलनाडीप्रवर्त्तनेन कर्ममार्ग
प्रवर्त्तक इत्यर्थः पीतवर्णश्च पिंगलायनमः॥७१॥सर्वतापनः सर्वसंहर्त्ता तपदाहे·सर्वतापनायनमः
॥७२॥कविः सर्वज्ञः कवयिता च·कवयेनमः॥७३॥विश्वो विश्वरूपः विश्वमेवेदं पुरुष इति श्रुतेः विश्व

आतपी मंडली मृत्युः पिंगलः सर्वतापनः॥कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ॥१४॥
नक्षत्रग्रहताराणामधिपो विश्वभावनः॥तेजसामपि तेजस्वी द्वादशात्मन्नमोस्तु ते ॥१५॥

स्मैनमः॥७४॥महत्तेजः स्वरूपं यस्य सः महातेजसेनमः॥७५॥रक्तः पालनेन सर्वरंजकः रक्तवर्ण
श्च·रक्तायनमः॥७६॥सर्वभवोद्भवः सर्वकार्यवर्गोत्पत्तिहेतुः सर्वभवोद्भवायनमः॥७७॥१४॥नक्षत्रा
दीनामंतर्यामितयाऽधिपः प्रवर्त्तकः नक्षत्रग्रहताराधिपायनमः॥७८॥विश्वभावनः सर्वोद्भवपर्या
त्तिः विश्वभावनायनमः॥७९॥तेजसामग्न्यादितेजसामपि सत्तास्फूर्त्तिसाधक चिन्मयतेजोरूपः
येन सूर्यस्तपति तेजसेद्ध इति श्रुतेः तेजसामपित्तेजस्विनेनमः॥८०॥द्वादशात्मन् द्वादशमासस्व
रूपप्रागनुक्रांत सर्वमूर्त्तिरूपायत्तुभ्यंनम इत्यर्थः द्वादशात्मनेनमः॥८१॥१५॥ ॥

रामा॰यु॰
३२२

तमोघ्नहिमोघ्नौतिमिरोन्मथनशिशिरनाशनपर्यायोःतमोघ्नायनमः॥१०२॥हिमघ्नायनमः॥१०३॥शत्रुर्देहाहंभावःनिजतत्वभगवदनुसंधानजसौख्येनतस्यशातनात्तस्यहंता॰रिपुश्चरणागदादिर्हंताच॰शत्रुघ्नायनमः॥१०४॥अमितात्मनेकालदेशपरिच्छेदरहितस्वरूपायःअमितात्मनेनमः॥१०५॥कृतघ्नघ्नायकृतंचेतनत्वलक्षणंभगवत्कृतमुपकारंघ्नंतिविस्मरंतीतिकृतघ्नाभगवद्विमुखाअज्ञाःसंसारिणस्तान्संसारानर्थप्रापणेनहंतीतितादृशाय॰कृतघ्नघ्नायनमः॥१०६॥देवायचिदानंदज्योतिः

392

तमोघ्नायहिमघ्नायशत्रुघ्नायामितात्मने॥कृतघ्नघ्नायदेवायज्योतिषांपतयेनमः॥२०॥
तप्तचामीकराभायहरयेविश्वकर्मणे॥नमस्तमोभिनिघ्नायरुचयेलोकसाक्षिणे॥२१॥

स्वरूपायजागतकृत्यस्यनिजोदयेनप्रवर्त्तनशीलस्य॰देवायनमः॥१०७॥ज्योतिषांपतयेइतिज्योतिर्गणानांपतयेइत्येतत्पर्यायः ज्योतिषांपतयेनमः॥१०८॥२०॥तप्तचामीकराभायसुवर्णसदृशायेत्येतत्पर्यायः तप्तचामीकराभायनमः॥१०९॥हरत्यशेषमज्ञानंतत्कार्यंचेतिहरिस्तस्मै॰हरयेनमः॥११०॥विश्वंसर्वंकर्मयस्यतस्मैसर्वकर्मासर्वकामइतिश्रुतेः विश्वकर्मणेनमः॥१११॥तमोभिनिघ्नस्तमोनिघ्नपर्यायःतमोभिनिघ्नायनमः॥११२॥रुचयेचिल्लक्षणादीप्तिमतेरुचयेनमः॥११३॥लोकयतइतिलोकोदृश्यप्रपंचस्तत्साक्षिणेसाक्षात्तद्द्रष्ट्रेलोकानांपापपुण्यकर्मसाक्षिणेच॰लोकसाक्षिणेनमः॥११४॥२१॥

राम॰
३२२

उग्रायइंद्रियनिग्रहकायरुद्ररूपायच·उग्रायनमः॥९१॥वीरायइंद्रियप्रवर्त्तनिस्वतंत्राय·त्रिपुरसंह
रत्तमपराक्रमयुताच·वीरायनमः॥९२॥सारंगाणांवस्तत्प्रतिपाद्याय·सारंगायनमः॥९३॥पद्मंहृदयक
मलंवात्ह्यांचपद्मंतद्बोधकाय·पद्मबोधायनमः॥९४॥प्रचंडायसर्वसमर्थायअतिकोपनयुचं·प्र
चंडायनमः॥९५॥१८॥ब्रह्मेशानाच्युतानांसृष्टिसंहारस्थितिकर्तृणामीशायस्वामिने·सृष्टिस्थित्यंत
कराणांब्रह्मविष्णुशिवात्मिकांससंज्ञांयातिभगवानेकएवजनार्दनइतिस्मृतेः प्रातरादौब्रह्माच्यु

नमउग्रायवीरायसारंगायनमोनमः॥नमःपद्मप्रबोधायप्रचंडायनमोस्तुते॥१८॥ब्र
ह्मेशानाच्युतेशायसूरायादित्यवर्चसे॥भास्वतेसर्वभक्षायरौद्रायवपुषेनमः॥१९॥

तेशानश्च·ब्रह्मेशानाच्युतेशायनमः॥९६॥सूरःसूर्यपर्यायःसूरायनमः॥९७॥आदित्यस्यांतरंब
र्चोज्ञानंतद्रूपाय·॥आदित्यवर्चसेनमः॥९८॥भास्वतेचिदचित्प्रकाशवते·भास्वतेनमः॥९९॥सर्वभ
क्षायसर्वंविषयजातंभक्षयतीतिसर्वभक्षस्तस्मैयस्यब्रह्मचक्षत्रंचोभेभवतओदनइतिश्रुतेः·स
र्वभक्षायनमः॥१००॥रुदुःखंतन्मूलंरागद्वेषौतन्मूलाज्ञानंचविद्रावयतीतिरुद्रस्तस्येदंरौद्रं
अज्ञानसंहारसमर्थज्ञानाकारायेत्यर्थः·रौद्रवपुषेनमः॥१०१॥१९॥ श्र

देवाः क्रतुदेवाः अष्टौवसवएकादशरुद्रइत्यादिक्रमेणोपदिष्टास्त्रयस्त्रिंशद्देवाः क्रतवः सोमाद्यश्वमेधां
ताः क्रतुफलंश्रुत्युक्तंस्वर्गादिकंचसर्वेषुलोकेषुप्राणिषुयानिकृत्यानिक्रियास्तत्साधनानिचक्रत्विगय
जमानसमिदाज्यपश्वादीनितैर्निजभक्तद्विजानांसंघटनेपरमप्रभुः परमसमर्थः परमसमर्थायभग
वतेब्रह्मणेनमः ॥१२५॥ एवंपंचविंशत्युत्तरशतसंख्याभगवत्पूजारहस्यनाममंत्राइतिकतकः सर्वदे

देवाश्चक्रतवश्चैवक्रतूनांफलमेवच ॥ यानिकृत्यानिलोकेषुसर्वेषुपरमप्रभुः ॥२४॥ ए
नमापत्सुकृच्छ्रेषुकांतारेषुभयेषुच ॥ कीर्त्तयन्पुरुषःकश्चिन्नावसीदतिराघव ॥२५॥

वात्मकोह्येषइत्यारभ्यलोकसाक्षिणेइत्यंताष्टोत्तरशतसंख्याएवादित्यहृदयस्तोत्रनाममंत्राइति
तीर्थः ॥२४॥ एवंकथितस्यस्तोत्रस्यफलमाह एनमिति आदित्यहृदयस्तवंकीर्त्तयन्आपदादि
षुकश्चिदपिद्विजोनावसीदतिनदुःखनिमग्नोभवति यद्वैनमादित्यहृदयार्थभूतंसूर्यमापदा
दिनिमित्तेषुउक्तैर्नाममंत्रैर्विशिष्यकीर्त्तयन्स्तवन्नावसीदति अत्रापत्कालमत्युःकृच्छ्रेज्वरा
दिदुःखंभयंचोरादिनिमित्तं ॥२५॥

एषइत्युक्तार्थःभूतंप्रपंचंप्रतिसुप्तिनाशयतिभूतंप्राणिजातंतत्तदायुरंतेनाशयतिस्वदिनांतेचनाश
यतितेनभूतनाशायनमः॥११५॥तमेवउक्तमेवभूतंजागरादौअहरादौचसृजतिभूतस्रष्ट्रेनमः॥११६॥प्रभुः
प्रकर्षेणस्वशक्तिवैभवेनसकलप्रपंचात्मनाभवतीतिप्रभुःसकलप्रपंचस्यसाक्षादधिष्ठातात्वःप्रभवेनमः
॥११७॥पायतिशोषयतिगभस्तिभिःपायतेनमः॥११८॥तपतिनाशयतितपतेनमः॥११९॥वर्षतिसृजतिवर्षते

नाशयत्येषवैभूतंतमेवसृजतिप्रभुः॥पायत्येषतपत्येषवर्षत्येषगभस्तिभिः॥२२॥एष
सुप्तेषुजागर्त्तिभूतेषुपरिनिष्ठितः॥एषचैवाग्निहोत्रंचफलंचैवाग्निहोत्रिणां॥२३॥

नमः॥१२०॥२२॥एषकरणेषुसुप्तेषुउपरतेषुस्वयमनुपरतशक्तिनित्यचिद्रूपोजागर्त्तिनिजमंडला
दर्शनतःप्राणिषुसुप्तेषुतदगोचरदेशस्थेस्वमंडलेजागर्त्तिचसुप्तेषुजाग्रतेनमः॥१२१॥भूतेषुपरिनि
ष्ठितःअंतर्यामितयास्थितःभूतेषुपरिनिष्ठितायनमः॥१२२॥अग्नयःपंचेंद्रियलक्षणाःपंचाग्नयःतेषुहो
त्रंहोमस्तत्तद्विषयानुभवरूपःअग्निहोत्रायनमः॥१२३॥अग्निहोत्रिणांबाह्याभ्यंतराग्निहोत्रानुष्ठातॄ
णांप्राप्यंयत्स्वर्गापवर्गरूपफलंतत्प्रदश्चअग्निहोत्रिणांफलदायनमः॥१२४॥२३॥ ॥

ससारथिः रावणस्य सारथिः हृष्टः सन् उच्यमानगुणं रथं चोदयामासेत्यन्वयः गंधर्वनगराकारं तद्वदा
श्चर्यदर्शनं ॥१॥ परमसंपन्नैः परमैः रथवहनोचिताश्वगुणैर्जवादिभिः संपन्नैः पताकायुक्तध्वजानां मालाः
स्मिन्नस्तीति तं अनेन ध्वजवाहुल्यमुक्तं समुच्छ्रितपताकिनमित्यनेन च तदौन्नत्यमुक्तं ॥२॥ प्रणाशं प्र

सारथिः स रथं हृष्टः परसैन्यप्रधर्षणं ॥ गंधर्वनगराकारं समुच्छ्रितपताकिनं ॥१॥ युक्तं परमसं
पन्नैर्वाजिभिर्हेममालिभिः ॥ युद्धोपकरणैः पूर्णं पताकाध्वजमालिनं ॥२॥ ग्रसंतमिव चाकाशं
नादयंतं वसुंधरां ॥ प्रणाशं परसैन्यानां स्वसैन्यस्य प्रहर्षणं ॥३॥ रावणस्य रथं क्षिप्रं चोदयामा
स सारथिः ॥ तमापतंतं सहसा स्वनवंतं महाध्वजं ॥४॥ रथं राक्षसराजस्य नरराजो ददर्श ह ॥
कृष्णवाजिसमायुक्तं युक्तं रौद्रेण वर्चसा ॥५॥ दीप्यमानमिवाकाशे विमानं सूर्यवर्चसं ॥ त
डित्पताकागहनं दर्शितेंद्रायुधायुधं ॥६॥ शरधारा विमुंचंतं धाराधरमिवांबुदं ॥ स दृष्ट्वा मेघ
संकाशमापतंतं रथं रिपोः ॥७॥

णाशकरं ॥३॥ द्वितीयरथसारथिः शब्दौ अनेकविशेषणव्य
वधानात्पूर्वोक्ताविस्मरणार्थौ तदनुवादकावेव ॥४॥५॥ तडित्पताकागहनं तडित्तुल्यपताका
भिर्गहनं संकीर्णं दर्शितेंद्रायुधप्रभं दर्शिताइंद्रायुधस्य प्रभा येन तं दर्शितेंद्रायुधायुधमिति
पाठे दर्शितानींद्रायुधेन सदृशान्यायुधानि येन तमित्यर्थः ॥६॥७॥ राम

यदेवमतः पूजयस्वैनं॥ आदित्यहृदयार्थं देवदेवं देवानां ब्रह्मविष्णुरुद्राणामपि देवं उपास्यं जगतां जनि
मतिधर्मिणां भूरादिलोकानां संसारमात्रस्य च पतिं एनदादित्यहृदयं स्तोत्रं त्रिगुणितं संजानं त्रिगुणाय
थानथाजस्मा विजयिष्यति विजेष्यति रिपून्न इतिशेषः॥२६॥२७॥ नष्टशोको नष्टो रावणाद्विषयक

पुजयस्वैनमेकाग्रो देवदेवं जगत्पतिं॥ एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यति॥२६॥ अस्मिन्क्ष
णे महाबाहो रावणं त्वं जहिष्यसि॥ एवमुक्त्वा ततोगस्त्यो जगाम स यथागतं॥२७॥ एतच्छ्रुत्वा महा
तेजा नष्टशोकोभवत्तदा॥ धारयामास सुप्रीतो राघवः प्रयतात्मवान्॥२८॥ आदित्यं प्रेक्ष्य जप्त्वे
दं परं हर्षमवाप्तवान्॥ त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान्॥२९॥ रावणं प्रेक्ष्य हृष्टा
त्मा जयार्थं समुपागमत्॥ सर्वयत्नेन महता वतस्तस्य वधेभवत्॥३०॥ अथ रविरवदन्नि
रीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः॥ निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यग
तो वचस्त्वरेति॥३१॥ इत्यार्षे श्रीरा० यु० षडुत्तरशततमः सर्गः॥१०६॥

नारूपः शोको यस्य सः॥२८॥ इदं शी
घ्रसिद्धिकरं स्तोत्रं जप्त्वा हृष्टात्मा प्रातर्युद्धायागतं रावणं प्रेक्ष्य जयार्थं मनसा भगवंतमगमत्
ध्यातवान्॥२९॥३०॥ अथ रविः रामं निरीक्ष्य निशाचरपतिसंक्षयं तत्कालं विदित्वा स्वलीलामूर्त्या
सुरगणमध्यगतः सन्साक्षात्त्वरेति वचोवदत्॥३१॥ क०॥९८॥ इति श्रीरामाभि० युद्धकांडे षडुत्तर॥१०६

१४॥अपसव्यंप्रदक्षिणंप्रचारं॰व्यवधूनयत्अकंपयत्॥१५॥रथेनप्रतिमुखंसंमुखंरथप्रतिमुखं॥१६॥
धर्षणेनामर्षितःरोषेणासद्धैर्यंयुद्धारभटींलंभयन्प्राप्नुवन्इंद्रस्येदंऐंइंशरासनंजग्राह॰किंचैंद्रप
रमैश्वरंइतिपरमैश्वर्यइत्युक्तेःनिजायुधंजग्राहेत्यर्थः॥१७॥तत्तदामहद्युद्धमुपोढमारब्धमभूत्॥१८

परितुष्टःसरामस्यतेनवाक्येनमातलिः॥प्रचोदयामासरथंसुरसारथिरुत्तमः॥१४॥अपसव्यं
ततःकुर्वन्रावणस्यमहारथं॥चक्रसंभूतरजसारावणंव्यवधूनयत्॥१५॥ततःक्रुद्धोदशग्रीव
स्ताम्रविस्फारितेक्षणः॥रथप्रतिमुखंरामंसायकैरवधूनयत्॥१६॥धर्षणामर्षितोरामोधैर्यंरो॰
षेणलंभयन्॥जग्राहसुमहावेगमैंद्रंयुधिशरासनं॥१७॥शरांश्चसुमहावेगान्सूर्यरश्मिसमप्र
भान्॥तदुपोढंमहद्युद्धमन्योन्यवधकांक्षिणोः॥परस्पराभिमुखयोर्दृप्तयोरिवसिंहयोः॥१८॥
ततोदेवाःसगंधर्वाःसिद्धाश्चपरमर्षयः॥समीयुर्द्वैरथंद्रष्टुंरावणक्षयकांक्षिणः॥१९॥समुत्पेतु
रथोत्पातादारुणारोमहर्षणाः॥रावणस्यविनाशायराघवस्योदयायच॥२०॥ववर्षरुधि
रंदेवोरावणस्यरथोपरि॥वातामंडलिनस्तीव्राव्यपसव्यंप्रचक्रमुः॥२१॥

द्वाभ्यांरथाभ्यांप्रवर्तितंद्व
योरथयोरिदंवाद्वैरथंयुद्धंद्रष्टुंसमीयुर्मिलित्वागताः॥१९॥२०॥उत्पातानाहववर्षेतिमंडलिनोवात
वात्यारूपाइत्यर्थः तीव्रास्तीव्रवेगाःव्यपसव्यंविगतमपसव्यंप्रदक्षिणंयथातथावामावर्ताइत्यर्थः॥२१

यदेवमतः पूजयस्वैनं ॥ आदित्यहृदयार्थं देवदेवं देवानांब्रह्मविष्णुरुद्राणामपि देवं उपास्यं जगतांजनि
मतिधर्मिणां भूरादिलोकानां संसारमात्रस्य च पतिं एतदादित्यहृदयं स्तोत्रं त्रिगुणितं संजातत्रिगुणंय
थातथाजप्त्वा विजयिष्यति विजेष्यति रिपूनन इतिशेषः ॥ २६ ॥ २७ ॥ नष्टशोकोनष्टोरावणोविषयश्चिं

पूजयस्वैनमेकाग्रोदेवदेवंजगत्पतिं ॥ एतत्त्रिगुणितंजप्त्वायुद्धेषुविजयिष्यति ॥ २६ ॥ अस्मिन्क्ष
णेमहाबाहोरावणंत्वंजहिष्यसि ॥ एवमुक्त्वाततोगस्त्योजगामसयथागतं ॥ २७ ॥ एतच्छ्रुत्वामहा
तेजानष्टशोकोभवत्तदा ॥ धारयामाससुप्रीतोराघवःप्रयतात्मवान् ॥ २८ ॥ आदित्यंप्रेक्ष्यजप्त्वे
दंपरंहर्षमवाप्तवान् ॥ त्रिराचम्यशुचिर्भूत्वाधनुरादायवीर्यवान् ॥ २९ ॥ रावणंप्रेक्ष्यहृष्टा
त्माजयार्थंसमुपागमत् ॥ सर्वयत्नेनमहतावतस्तस्यवधेभवत् ॥ ३० ॥ अथरविरवदन्नि
रीक्ष्यरामंमुदितमनाःपरमंप्रहृष्यमाणः ॥ निशिचरपतिसंक्षयंविदित्वासुरगणमध्यग
तोवचस्त्वरेति ॥ ३१ ॥ इत्यार्षे श्रीरा० यु० षयोत्तरशततमःसर्गः ॥ १०६ ॥

ताद्रूपः शोकोयस्यसः ॥ २८ ॥ इदंश्री
घ्रसिद्धिकरंस्तोत्रंजप्त्वाहृष्टात्माप्रातर्युद्धायागतंरावणंप्रेक्ष्यजयार्थंमनसाभगवंतमगमत्
ध्यातवान् ॥ २९ ॥ ३० ॥ अथरविःरामंनिरीक्ष्यनिशाचरपतिसंक्षयंतत्कालंविदित्वास्वलीलामूर्त्या
सुरगणमध्यगतःसन्साक्षात्त्वरेतिवचोवदत् ॥ ३१ ॥ क्रु० ॥ ९५ ॥ इतिश्रीरामाभि० युद्धकांडेषयोत्तर ॥ १०६

१४॥अपसव्यंप्रदक्षिणंप्रचारं॰व्यवधूनयत्अकंपयत्॥१५॥रथेनप्रतिमुखंसंमुखंरथप्रतिमुखं॥१६
धर्षणेनामर्षितः रोषेणसद्धैर्यंयुद्धारभटीलंभयन्प्राप्नुवन्इंद्रस्येदंऐंद्रंशरासनंजग्राह॰किंचैंद्रंपा
रमेश्वरंइतिपरमैश्वर्यइत्युक्तेः निजायुधंजग्राहेत्यर्थः॥१७॥तत्तदामहद्युद्धमुपोढमारब्धमभूत्॥१८

परितुष्टःसरामस्यतेनवाक्येनमातलिः॥प्रचोदयामासरथंसुरसारथिरुत्तमः॥१४॥अपसव्यं
ततःकुर्वन्रावणस्यमहारथं॥चक्रसंभूतरजसारावणंव्यवधूनयत्॥१५॥ततःक्रुद्धोदशग्रीव
स्ताम्रविस्फारितेक्षणः॥रथप्रतिमुखंरामंसायकैरवधूनयत्॥१६॥धर्षणामर्षितोरामोधैर्यंरो
षेणलंभयन्॥जग्राहसुमहावेगमैंद्रंयुधिशरासनं॥१७॥शरांश्चसुमहावेगान्सूर्यरश्मिसमप्र
भान्॥तदुपोढंमहद्युद्धमन्योन्यवधकांक्षिणोः॥परस्पराभिमुखयोर्दृप्तयोरिवसिंहयोः॥१८॥
ततोदेवाःसगंधर्वाःसिद्धाश्चपरमर्षयः॥समीयुर्द्वैरथंद्रष्टुंरावणक्षयकांक्षिणः॥१९॥समुत्पेतु
रथोत्पातादारुणारोमहर्षणाः॥रावणस्यविनाशायराघवस्योदयायच॥२०॥ववर्षरुधि
रंदेवोरावणस्यरथोपरि॥वातामंडलिनस्तीव्राव्यपसव्यंप्रचक्रमुः॥२१॥

द्वाभ्यांरथाभ्यांप्रवर्तितंद्व
योरथयोरिदंद्वाद्वैरथंयुद्धंद्रष्टुंसमीयुर्मिलित्वागताः॥१९॥२०॥उत्पातानाहववर्षेतिमंडलिनोवाता
वात्यारूपाइत्यर्थः तीव्रास्तीव्रवेगाःव्यपसव्यंविगतमपसव्यंप्रदक्षिणंयथातथावामावर्ताइत्यर्थः॥२१

वज्राभिमृष्टस्यवज्राभिहतस्यदीर्यतोगिरेःस्वनस्यसदृशास्वनंवालचंद्रवन्नतं॥८॥९॥यथानुभूयमान
प्रकारेणापसव्यंप्रदक्षिणंमहतारथवेगेनपततानेनरावणेनसमरेआत्मानंमांहंतुंमतिःकृत्वापृथ
मप्रादक्षिणेनरथसंचारलक्षणासुनिमित्तसंपादनेनेतिशेषः॥१०॥तत्तस्मात्अप्रमादंसावधानत्वंअ

गिरेर्वज्राभिमृष्टस्यदीर्यतःसदृशस्वनं॥विस्फारयन्नेववेगेनवालचंद्रानतंधनुः॥८॥उवाचमा
तलिंरामःसहस्राक्षस्यसारथिं॥मातलेपश्यपसंरब्धमापतंतंरथंरिपोः॥९॥यथापसव्यंपतता
वेगेनमहतापुनः॥समरेहंतुमात्मानंतथानेनकृतामतिः॥१०॥तदप्रमादमातिष्ठप्रत्युद्गच्छ
रथंरिपोः॥विध्वंसयितुमिच्छामिवायुर्मेघमिवोत्थितं॥११॥अविक्लवमसंभ्रांतमव्यग्रहृद
येक्षणं॥रश्मिसंचारनियतंप्रचोदयरथंद्रुतं॥१२॥कामंनत्वंसमाधेयःपुरंदररथोचितः॥यु
युत्सुरहमेकाग्रःस्मारयेत्वांनशिक्षये॥१३॥

तिष्ठासनस्थैर्येणारिपोःरावणस्यरथंप्रतिप्रत्युद्ग
च्छप्रादक्षिणेनैवेतिशेषः॥११॥अविक्लवत्वादिचतुर्गुणायुक्तंयथातथाद्रुतंरथंप्रचोदय।अविक्ल
वत्वमभिरूत्वं।असंभ्रांतत्वंरणात्क्षोभाद्रक्षितचित्तत्वंअव्यग्रमस्थीयत्हृदयेक्षणंयत्रःरश्मिसंचारनिय
तंरश्मिसंचारेनैपुणंतत्तत्कालानुगुणेनसंयमनमोचनव्यवस्थावत्वं॥१२॥यस्मात्पुरंदररथोचित
स्त्वंयद्यपिकामंनसमाधेयाऽनशिक्षणीयःअथापियुयुत्सुरेकाग्रोहंस्मारयेसहजंसारथ्यकर्थस्मा
रयेनशिक्षये॥१३॥

इंद्राशनयइत्यनेनअस्त्रसुधाशनिव्यावृत्तिः॥२९॥३०॥तद्रथंरावणरथंप्रति॥३१॥तुल्यमग्निंचवारिचजघ
नेभ्यइत्याद्युक्तप्रकारेणेतिशेषः॥३२॥३३॥३४॥परमसंहृष्टोलक्ष्मणोमातलिर्वेतिशेषः॥३५॥क०९६

निपेतुरिंद्राशनयःसैन्येचास्यसमंततः॥दुर्विषह्यस्वराघोरंविनाजलधरोदयं॥२९॥दिशश्च
प्रदिशःसर्वाबभूवुस्तिमिरावृताः॥पांसुवर्षेणमहतादुर्दर्शंचनभोभवत्॥३०॥कुर्वंत्यःक
लहंघोरंशारिकास्तद्रथंप्रति॥निपेतुःशतशस्तत्रदारुणादारुणारुताः॥३१॥जघनेभ्यःस्फु
लिंगाश्चनेत्रेभ्योश्रूणिसंततं॥सुस्रुवुस्तस्यतुरगास्तुल्यमग्निंचवारिच॥३२॥एवंप्रकाराबहवः
समुत्पाताभयावहाः॥रावणस्यविनाशायदारुणाःसंप्रजज्ञिरे॥३३॥रामस्यापिनिमित्तानिसौ
म्यानिचशिवानिच॥बभूवुर्जयशंसीनिप्रादुर्भूतानिसर्वशः॥३४॥निमित्तानीहसौम्यानिराघ
वस्यजयायवै॥दृष्ट्वापरमसंहृष्टोहतंमेनेचरावणं॥३५॥ततोनिरीक्ष्यात्मगतानिराघवो
रणेनिमित्तानिनिमित्तकोविदः॥जगामहर्षंचपरांचनिर्वृतिंचकारयुद्धेत्यधिकंचविक्र
मं॥३६॥इत्यार्षेश्रीरा०यु०सप्तोत्तररशततमःसर्गः॥१०७॥ततःप्रवृत्तंसुक्रूरंरामरावणयो
स्तदा॥सुमहद्द्वैरथंयुद्धंसर्वलोकभयावहं॥१॥

इतिश्रीरामाभिरामेश्रीरा०रा०ति०यु०
सप्तोत्तरशततमःसर्गः॥१०७॥ ततइतिद्वैरथंव्याख्यातंसुमहत्अनेकदिनव्यापि॥१॥

येनयेनेतिमार्गेणेत्यर्थः गृध्रकुलस्यमृतमांसभोजिनोरावणेनसहागमनेनरावणस्यासन्नमरणंसूच्यते ॥२१॥ जपापुष्पनिकाशयासंध्ययावृतालंकासंप्रदीप्तेवदृश्यते अकालेपीतिशेषः तदेवाह दिवसेपीति वसुंधरेतिलंकाविशेषणं ॥२३॥ संप्रपेतुः रावणस्यपुरस्तादितिशेषः तदातस्मिन्काले अहिताः अ

महद्गृध्रकुलंचास्यभ्रममाणंनभस्थले ॥ येनयेनरथोयातितेनतेनप्रधावति ॥२२॥ संध्ययाचावृतालंकाजपापुष्पनिकाशया ॥ दृश्यतेसंप्रदीप्तेवदिवसेपिवसुंधरा ॥२३॥ सनिर्घातामहोल्काश्चसंप्रपेतुर्महास्वनाः ॥ विषादयंस्तेरक्षांसिरावणस्यतदाहिताः ॥२४॥ रावणश्चयतस्तत्रप्रचचालवसुंधरा ॥ रक्षसांचप्रहरतांगृहीताइवबाहवः ॥२५॥ ताम्राः पीताः सिताः श्वेताः पतिताः सूर्यरश्मयः ॥ दृश्यंतेरावणस्याग्रेपर्वतस्येवधातवः ॥२६॥ गृध्रैरनुगताश्चास्यवमंत्योज्वलनं। मुखैः ॥ प्रणेदुर्मुखमीक्षंत्यः संरब्धमशिवंशिवाः ॥२७॥ प्रतिकूलंववौवायुरणेपांसून्समुत्किरन् ॥ तस्यराक्षसराजस्यकुर्वन्दृष्टिविलोपनं ॥२८॥

नर्थसूचकाः ॥२४॥ वसुंधरालंकापर्यंतभूः गृहीताइवेतिभयात्स्तब्धाइतिशेषः ॥२५॥ पर्वतस्यधातवइवताम्रादिरूपाः सूर्यस्यरश्मयोरावणस्याग्रेपतिताः संतोदृश्यंतइतिसंबंधः ॥२६॥ अस्यमुखमीक्षंत्य इत्यन्वयः ॥२७॥ दृष्टिविलोपनं अशक्योद्वीक्षणत्वं ॥२८॥

रामा॰यु॰
३२७

१०॥११॥१२॥१३॥१४॥स्खलनाद्यभावेस्वस्थहृदयत्वेतुर्दिव्याइति॥१५॥पद्मनालैःपद्मदंडैः॥१६॥१७॥गि

ततोरामोपिसंक्रुद्धश्चापमाकृष्यवीर्यवान्॥कृतप्रतिकृतंकर्त्तुंमनसासंप्रचक्रमे॥१०॥रावण
ध्वजमुद्दिश्यमुमोचनिशितंशरं॥महासर्पमिवासह्यंज्वलंतंस्वेनतेजसा॥११॥रामश्चिक्षेपतेजस्वी
केतुमुद्दिश्यसायकं॥जगामसमहींभित्वादशग्रीवध्वजंशरः॥१२॥सनिकृत्तोपतद्भूमौरावण
स्यंदनध्वजः॥ध्वजस्योन्मथनंदृष्ट्वारावणःसमहाबलः॥१३॥संप्रदीप्तोभवत्क्रोधादमर्षात्प्रद
हन्निव॥सरोषवशमापन्नःशरवर्षंववर्षह॥१४॥रामस्यतुरगान्दीप्तैःशरैर्विव्याधरावणः॥
तेदिव्याहरयस्तत्रनास्खलन्नापिबभ्रमुः॥१५॥वभूवुःस्वस्थहृदयाःपद्मनालैरिवाहताः॥ते
षामसंभ्रमंदृष्ट्वावाजिनांरावणस्तदा॥१६॥भूयएवसुसंक्रुद्धःशरवर्षंमुमोचह॥गदाश्च
परिघांश्चैवचक्राणिमुशलानिच॥१७॥गिरिशृंगाणिवृक्षांश्चतथाशूलपरश्वधान्॥मायावि
हितमेतत्तुशस्त्रवर्षमपातयत्॥सहस्रशस्तदावाणानभ्रांतहृदयोद्यमः॥१८॥तुमुलंत्रास
जननंभीमंभीमप्रतिस्वनं॥तद्वर्षमभवद्युद्धेनैकशस्त्रमयंमहत्॥१९॥

रिशृंगादीनांपातनंकुतस्त
त्राह मायाविहितमिति॥एतद्गिरिवृक्षादिवर्षंशस्त्रवर्षमुक्तगदादिशस्त्रवर्षं॥१८॥भीमःप्रति
स्वनोयस्मिन्तत्॥नैकशस्त्रमयंनानाशस्त्रप्रचुरं॥तद्वर्षंप्रागुक्तशस्त्रवर्षं॥१९॥ ॥

327

राम॰
३२७

प्रतिगृहीतप्रहरणामपिनिश्चेष्टंसमवर्त्तत निवृत्तोयोगमवतिष्ठततद्युद्धदर्शनपारवश्यादितिशेषः २॥
तदेवाहसंप्रयुद्धावितिसम्यक्युद्धारंभप्रवृत्तौ॥३भुजैरुपलक्षिताइतिशेषःनाभिजग्मुःप्रहर्तुंपरस्परमि
तिशेषः॥४॥विस्मितानांताणांविस्मयपरवशेंद्रियाणांहरिरक्षसामितिशेषःचित्तमिवचित्रलिखितमिव॥५

ततोराक्षससैन्यंचहरीणांचमहद्बलं॥प्रगृहीतप्रहरणंनिश्चेष्टंसमवर्त्तत॥२॥संप्रयुद्धौतुतौदृ
ष्ट्वाबलवन्नरराक्षसौ॥व्याक्षिप्तहृदयाःसर्वेपरंविस्मयमागताः॥३॥नानाप्रहरणैर्व्यग्रैर्भुजैर्वि
स्मितबुद्धयः॥तस्थुःप्रेक्ष्यचसर्वेतेनाभिजग्मुःपरस्परं॥४॥रक्षसांरावणंचापिवानराणांचराघ
वं॥पश्यतांविस्मितानांताणांसैन्यंचित्रमिवाबभौ॥५॥तौतुतत्रनिमित्तानिदृष्ट्वाराघवरावणौ॥।
कृतबुद्धीस्थिरामर्षौयुयुधातेह्यभीतवत्॥६॥जेतव्यमितिकाकुत्स्थोमर्त्तव्यमितिरावणः॥धृ
तौस्ववीर्यसर्वस्वंयुद्धेदर्शयतांतदा॥७॥ततःक्रोधाद्दशग्रीवःशरान्संधायवीर्यवान्॥मुमो
चध्वजमुद्दिश्यराघवस्यरथेस्थितं॥८॥तेशरास्तमनासाद्यपुरंदररथध्वजं॥रथशक्तिंपरामृश्य
निपेतुर्धरणीतले॥९॥

कृतबुद्धीयुद्धविषयेनिश्चितबुद्धीअभीतवदभीतार्हौ॥६॥निश्चयमाहजे
तव्यमिति·मर्त्तव्यमितिमत्पुरुषशत्रौप्रहर्त्तव्यमित्यर्थइतिकतकः इतिधृतौएवंनिश्चयतंतौअदर्शय
तामितिच्छेदः॥७॥८॥रथशक्तिंदिव्यरथवैभवंरथावयवविशेषंवापरामृश्यप्राप्यतन्महिम्नाकेवलंधर

णीतल्लेपेतुः॥९॥

कृतस्यानुकृतंप्रतिक्रियातत्करणशीलौ॥२७॥२८॥ तुमुलंरोमहर्षणं॥ अनंतरंप्रयुध्यमानावित्येकंश्लोकं
प्रक्षिप्यात्रसर्गविच्छेदंकुर्वंतितदयुक्तं। पश्चादपितुमुलयुद्धस्यैवसत्वादेकप्रकरणत्वाच्चात्रनव

रावणस्यहयान्रामोहयान्रामस्यरावणः॥ जघ्नतुस्तौतदान्योन्यंकृतानुकृतकारिणौ॥२७॥ एवं
तुतौसुसंक्रुद्धौचक्रतुर्युद्धमुत्तमं॥ मुहूर्त्तमभवद्युद्धंतुमुलंरोमहर्षणं॥२८॥ प्रयुध्यमानौस
मरेमहाबलौशितैःशरैरावणलक्ष्मणाग्रजौ॥ ध्वजावपातेनसराक्षसाधिपोभृशंप्रचुक्रोधतदार
घूत्तमे॥२९॥ अष्टोत्तरशततमःसर्गः॥१०८॥ तौतथायुध्यमानौतुसमरेरामरावणौ॥ ददृशुः
सर्वभूतानिविस्मितेनांतरात्मना॥२९॥ अर्दयंतौतुसमरेतयोस्तौस्यंदनोत्तमौ॥ परस्परमभि
क्रुद्धौपरस्परमभिद्रुतौ॥३०॥ परस्परवधेयुक्तौघोररूपौबभूवतुः॥ मंडलानिचवीथीश्चगा
तप्रत्यागतानिच दर्शयंतौबहुविधांस्तौसारथ्यजांगतिं॥३१॥ अर्दयन्रावणंरामोराघवं
चापिरावणः॥ गतिवेगंसमापन्नौप्रनिवेगनिवर्त्तने॥३२॥ क्षिपतोःशरजालानितयोस्तौस्यंदनो
त्तमौ॥ चेरतुःसंयुगमहींसासारौजलदाविव॥३३॥

च्छेदस्यैवबहुषुपुस्तकेषुदर्शनाच्चेतिकतकःसर्गः॥१०९॥२९॥३०॥ सारथ्यजांसूतकर्मनैपुण्यजां
३१॥ अर्दयन्नवभवेतिशेषः॥३२॥ सासारौधारासंपातप्रसारस्तत्सहितौ॥३३॥ ॥

राघवरथंविमुच्यक्रोधातिशयेनयुक्तत्वाद्व्यत्पभ्रंतंरामरथंमतिक्रम्यवानरेबलेऽपतत्॥२०॥निःसंगेनप्रा
णाशासंगरहितेन तत्परतदनंतरंव्यायच्छमानंव्यायच्छंतं प्रवर्त्तयंतं॥२१॥२२॥२३॥शरबद्धंशररचितं
द्वितीयमंबरमित्यर्थः भास्वत् भासमाने नानिमित्तः निमित्तंलक्ष्यमप्राप्यवर्त्तमानोनास्ति नविष्फलः लक्ष्य

विमुच्यराघवरथंसमंताद्वानरेबले॥सायकैरंतरिक्षंचचकारसुनिरंतरं॥२०॥मुमोचचदशग्रीवो
निःसंगेनांतरात्मना॥व्यायच्छमानंतंदृष्ट्वातत्परंरावणंरणे॥२१॥प्रहसन्निवकाकुत्स्थःसंदधे
निशितान्छरान्॥समुमोचततोबाणान्शतशोथसहस्रशः॥२२॥तान्दृष्ट्वारावणश्चक्रेस्वशरैः
खंनिरंतरं॥ताभ्यांनियुक्तेनतदाशरवर्षेणभास्वता॥२३॥शरबद्धमिवाभातिद्वितीयंभास्वदं
बरं॥नानिमित्तोभवद्बाणोनानिर्भेत्तानिष्फलः॥२४॥अन्योन्यमभिसंहत्यनिपेतुर्धरणीतले
तथाविसृजतोर्बाणान्रामरावणयोर्मृधे॥२५॥प्रायुध्येतामविच्छिन्नमस्यंतौसव्यदक्षिणं॥चक्रतुः
श्चशरैर्घोरैर्निरुच्छ्वासमिवांबरं॥२६॥

वेधपरप्रयुक्तवारणान्यतरप्रयोजनहीनोनाभवत् नानिर्भेत्ता
अभेत्तानः नातियत्नइतिपाठेपरप्रयुक्तनिवारणाययत्नातिक्रांतोननिवारणायप्रयुक्तोनिवारयत्ये
वेत्यर्थः॥२४॥बाणान्विसृजतोस्तयोर्बाणाः अन्योन्यमभिसंहत्यस्वस्वप्रयोगकार्यंकृत्वैवधरणीतले
निपेतुः॥२५॥सव्यंचदक्षिणंचसव्यदक्षिणमत्यंतसंयोगेद्वितीया उभयपार्श्वयोरवच्छिन्नशरानसंपा
तौनिरुच्छ्वासंनीरंध्रं॥२६॥

४४॥क्षुब्धानांसागराणामध्योदेशवर्त्तिपातालवासिनोव्यथिनाजाताइतिशेषः॥४५॥४६॥४७॥४८॥जपंतःवदं
तः॥४९॥वचनप्रकारमाहगंधर्वाप्सरसामिति·अनूपममितिदीर्घआर्षःदृष्ट्वायुद्धमनूपममित्युत्तरंसा
गरंचांबरप्रख्यमंबरंसागरोपममितिपाठेसागरंनैल्यवैपुल्यादिनांबरप्रख्यमाकाशतुल्यमितिव

तत्प्रवृत्तंपुनर्युद्धंतुमुलंरोमहर्षणं॥गदानांमुसलानांचपरिघानांचनिस्वनैः॥४४॥शराणां
पुंखवातैश्चक्षुभिताःसप्तसागराः॥क्षुब्धानांसागराणांचपातालतलवासिनः॥४५॥व्यथितादा
नवाःसर्वेपन्नगाश्चसहस्रशः॥चकंपेमेदिनीकृत्स्नासशैलवनकानना॥भास्करोनिष्प्रभश्चा
सीन्नववौचापिमारुतः॥४६॥ततोदेवाःसगंधर्वाःसिद्धाश्चपरमर्षयः॥चिंतामापेदिरेसर्वे
सकिन्नरमहोरगाः॥४७॥स्वस्तिगोब्राह्मणेभ्यस्तुलोकास्तिष्ठंतुशाश्वताः॥जयतांराघवः
संख्येरावणंराक्षसेश्वरं॥४८॥एवंजपंतोपश्यंस्तेदेवाःसर्षिगणास्तदा॥रामरावणयो
र्युद्धंसघोरंरामहर्षणं॥४९॥गंधर्वाप्सरसांसंघादृष्ट्वायुद्धमनूपमं॥सागरंचांबरप्रख्या
मंबरंसागरोपमं॥५०॥

क्तुंशक्यंएवमंबरमपिसागरोपपतिमिशाशंक्यंरामरावणयोर्द्धंयु
तुतदतिरिक्ततादृशयुद्धासंभवात्स्वतुल्यमित्येववक्तुंशक्यंतेनानुपमत्वंफलतीतिःअनन्वया
त्वालंकारःप्रवर्धितपमेयोयमेतिकतकाःसागरस्यदोलिंगव्यत्ययआर्षःअर्धर्चादिसःगगनंगगना
कारंसागरःसागरोपमइतिपाठेअर्द्धद्वयोप्यनन्वयएवेतिबोध्यंएतंब्रुवंतोगंधर्वादिसंघास्त
युद्धंददृशुःरामरावणांतत्वात्तत्कामित्यर्थः॥५०॥

३४ ॥ ३५ ॥ अत्यपसर्पयत् अत्यपसर्पणं नामात्यन्ताभिमुख्यानामेव पश्चार्धेनापसर्पणं ॥ ३६ ॥ ३७ ॥ ३८ ॥ चिक्षेप रा
वणः क्षिप्तवान् ॥ ३९ ॥ मातलेर्व्यथां न प्रददुः देवत्वेन दिव्यशक्तिमत्वात् अपसर्पणकाले रावणेन प्र

दर्शयित्वा तदा तौ तु गतिं बहुविधां रणे ॥ परस्पराभिमुखौ पुनरेव च तस्थतुः ॥ ३४ ॥ धुरं धुरेण
रथयोर्वक्त्रं वक्त्रेण वाजिनां ॥ पताकाश्च पताकाभिः समीयुः स्थितयोः सदा ॥ ३५ ॥ रावणस्य ततो रामो
धनुर्मुक्तैः शितैः शरैः ॥ चतुर्भिश्चतुरो दीप्तान्हयान्प्रत्यपसर्पयत् ॥ ३६ ॥ स क्रोधवशमापन्नो हया
नामपसर्पणे ॥ मुमोच निशितान्बाणान्राघवाय दशाननः ॥ ३७ ॥ सोतिविद्धो बलवता दशग्री
नचा वेण राघवः ॥ जगाम न विकारं चैपि व्यथितोभवत् ॥ ३८ ॥ चिक्षेप च पुनर्बाणान्वज्रसारसमस्वना
न् ॥ सारथिं वज्रहस्तस्य समादिश्य दशाननः ॥ ३९ ॥ मातलेस्तु महावेगाः शरीरे पतिता शराः ॥ न
सूक्ष्ममपि संमोहं व्यथां वा प्रददुर्युधि ॥ ४० ॥ तया धर्षणया क्रुद्धो मातलेर्न तथात्मनः ॥ चकार
शरजालेन राघवो विमुखं रिपुं ॥ ४१ ॥ विंशतिं त्रिंशतिं षष्टिं शतशोथ सहस्रशः ॥ मुमोच रा
घवो वीरः सायकान्स्यंदने रिपोः ॥ ४२ ॥ रावणोपि ततः क्रुद्धो रथस्थो राक्षसेश्वरः ॥ गदामुशलव
र्षेण रामं प्रत्यर्दयद्रणे ॥ ४३ ॥

क्षिप्तानामतिवेधसामर्थ्यायोगाद्वा ॥ ४० ॥ यथा मातले धर्षण
णया क्रुद्धस्तथा आत्मनो धर्षणया न क्रुद्धः अत एव रिपुं विमुखं चकार ॥ ४१ ॥ ४२ ॥ ४३ ॥

६०॥६१॥ अंतरिक्षेचेत्यादि-रथयोःकामगत्वात्तत्रतत्राकियत्कालंस्थितेरितिभावः॥६२॥ सर्वरात्रंजातावेकवचनंतेनानेकाहोरात्रानित्यर्थःवस्तुतःशवर्गेसकारस्तृतीयस्तेनत्रयंअंचंतेयवर्गेचवकारश्चतुर्थस्तेनचत्वारंअंचंतेमिलित्वासप्तरात्रमित्यर्थः सप्तरात्रमेववचनयोर्द्वैरथंयुद्धमितिवृद्धप्रमाणापन्नकाल्पिका

किंतुतत्कारणंयेनरावणोमंदतेजसाः॥ इतिचिंतापरश्चासीदप्रमत्तश्चसंयुगे॥६०॥ ववर्षशरवर्षाणिराघवोरावणोरसि॥ रावणोपिततःक्रुद्धोरथस्थोराक्षसेश्वरः॥ गदामुशलवर्षेणरामंप्रत्यर्दयद्रणे॥६१॥ तत्प्रवृत्तंमहद्युद्धंतुमुलंरोमहर्षणं॥ अंतरिक्षेचभूमौचपुनश्चगिरिमूर्द्धनि॥६२॥ देवदानवयक्षाणांपिशाचोरगरक्षसां॥ पश्यतांतन्महद्युद्धंसर्वरात्रमवर्त्तत॥६३॥ नैवरात्रिंनदिवसंनमुहूर्त्तंनचक्षणं॥ रामरावणयोर्युद्धंविराममुपगच्छति॥६४॥ दशरथसुतराक्षसेंद्रयोस्तयोर्जयमनवेक्ष्यरणेसराघवस्य॥ सुरवररथसारथिर्महात्मारणरतराममुवाचवाक्यमाशु॥६५॥ इत्यार्षेश्रीरा॰यु॰नवोत्तरशततमःसर्गः॥१०९॥ अथसंस्मारयामासमातलीराघवंतदा॥ अजानन्निवकिंवीरत्वमेनमनुवर्त्तसे॥१॥

पुराणयोःस्पष्टमितिदिक्॥६२॥ तदेवाहनैवरात्रमिति॥६४॥ रणेरतोरणरतःरणरतश्चासौरामश्चतं॥६५॥ इतिश्रीरामाभिरामेश्रीरामीरामायणति॰युद्ध॰नवोत्तरशततमःसर्गः॥१०९॥ एवमनुवर्त्तसे-एतस्मात्तिभयमनुसरसीत्यर्थः॥१॥

५१ ततस्तद्वाक्यश्रवणानंतरं ॥५२॥ शिरोच्छिंदत् एकैकश इति शेषः सकृद्दृष्टशिरसां छेदे तु न पुनःप्ररोह इति क
तकः ॥५३॥ तस्यैव सदृशं यद्भूमौ पतितं तस्यैव सदृशमित्यर्थः ॥५४॥ ५५॥ एवमेव शतं छिन्नमिति पाठः तुल्यव

रामरावणयोर्युद्धं रामरावणयोरिव ॥ एवं ब्रुवंतो ददृशुस्तद्युद्धं रामरावणं ॥५१॥ ततः क्रोधान्महाबा
हू रघूणां कीर्त्तिवर्धनः ॥ संधाय धनुषा रामः शरमाशीविषोपमं ॥५२॥ रावणस्य शिरोच्छिंदत् श्रीमज्ज्वलि
तकुंडलं ॥ तच्छिरः पतितं भूमौ दृष्टं लोकैस्त्रिभिस्तदा ॥५३॥ तस्यैव सदृशं चान्यद्रावणस्योत्थितं शिरः
तत्क्षिप्रं क्षिप्रहस्तेन रामेण क्षिप्रकारिणा ॥५४॥ द्वितीयं रावणशिरश्छिन्नं संयति सायकैः ॥ छिन्न
मात्रं च तच्छीर्षं पुनरेव प्रदृश्यते ॥५४॥ तदप्यशनिसंकाशैश्छिन्नं रामस्य सायकैः ॥ एवमेव शतं छि
न्नं शिरसां तुल्यवर्चसां ॥५५॥ न चैव रावणस्यांतो दृश्यते जीवितक्षये ॥५६॥ ततः सर्वास्त्रविद्वीरः कौ
शल्यानंदवर्द्धनः ॥ मार्गणैर्बहुभिर्युक्तश्चिंतयामास राघवः ॥५७॥ मारीचो निहतो यैस्तु खरो यैस्तु
सदूषणः ॥ क्रौंचावटे विराधस्तु कवंधो दंडकावने ॥५८॥ यैः साला गिरयो भग्ना वाली च क्षुभितोंबुधिः
त इमे सायकाः सर्वे युद्धे प्रात्ययिकमम ॥५९॥

र्चसां तुल्याकाराणां शिरसां शतं रामेण छिन्नं एवं च भगवतः
सर्वतोभद्रचक्रपदशतं रामेण रावणीयशिरःशतकमलैः पूजितमिति कतकः रावणस्य जीवितक्षयेंतो नि
श्चयो न दृश्यते ॥५६॥ ५७॥ क्रौंचावटे क्रौंचवनसंबंधिन्यवटे श्वभ्रे ॥५८॥ प्रात्ययिकाः अमोघत्वेन निश्चिताः ॥५९॥

द्वाराणांगोपुराणां॥९॥नानासमितिदारणमित्यन्वर्थंनामभगवत्कृतंरावणस्य॥१०॥११॥गरुत्मतोवाजैःपत्रैः॥१२॥इक्ष्वाकुःरामस्तत्पक्ष्याणांभयनाशनंतमुत्तमेषुमभिमंत्र्येत्यनेनान्वयः॥१३॥अभिमंत्र्यब्रह्मा

द्वाराणांपरिघानांचगिरीणांचापिभेदनं॥नानारुधिरदिग्धांगंमेदोदिग्धंसुदारुणं॥९॥वज्रसारंमहानादंनानासमितिदारुणं॥सर्ववित्रासनंभीमंश्वसंतमिवपन्नगं॥१०॥कंकगृध्रबकानांचगोमायुगणरक्षसां॥नित्यभक्षप्रदंयुद्धेयमरूपंभयावहं॥११॥नंदनंवानरेंद्राणांरक्षसामवसादनं॥वाजितंविविधैर्वाजैश्चारुचित्रैर्गरुत्मतः॥१२॥तमुत्तमेषुंलोकानामिक्ष्वाकुभयनाशनं॥द्विषतांकीर्त्तिहरणंप्रहर्षकरमात्मनः॥१३॥अभिमंत्र्यततोरामस्तंमहेषुंमहाबलः॥वेदप्रोक्तेनविधिनासंदधेकार्मुकेबली॥१४॥तस्मिन्संधीयमानेतुराघवेणशरोत्तमे॥सर्वभूतानिसंत्रेसुश्चचालचवसुंधरा॥१५॥सरावणायसंक्रुद्धोभृशमायम्यकार्मुकं॥चिक्षेपपरमायत्तःशरंमर्मविदारणं॥१६॥ ॥ ॥

स्त्रविद्ययावेदोधनुर्वेदस्तेनप्रोक्तोयोमुष्टिदृष्टिस्थितिसंधानादीनांविधिर्विधानंमार्गस्तेनेत्यर्थः॥१४॥१५॥परमायत्तःपरमयत्नवान्॥१६॥

अस्मैरानंप्रति॥२॥३॥ब्रह्मदत्तंब्रह्मणेंद्रायदत्तंइंद्रेणागस्त्यद्वारारामायदत्तं॥४॥ब्रह्मदत्तशब्दस्योक्तएवार्थः
स्पष्टीक्रियतेब्रह्मणोत्पादि॥५॥अस्यवाणस्यब्रह्मानुग्रहवैशिष्ट्यमाह·यस्येति·वाजेषुवेगसाधनप
क्षेषु·तत्रतत्रपवनादीनामधिदेवतात्वेनावस्थानंबोध्यं·शरीरंमध्यभागआकाशमयंआसमंतात्क

विसजास्मैवधायत्वमस्त्रंपैतामहंप्रभो॥विनाशकालःकथितोयःसुरैःसोद्यवर्त्तति॥२॥ततःसं
स्मारितोरामस्तेनवाक्येनमातलेः॥जग्राहसशरंदीप्तंनिश्वसंतमिवोरगं॥३॥यंतस्मैप्रथमं
प्रादादगस्त्योभगवानृषिः॥ब्रह्मदत्तंमहद्बाणममोघंयुधिवीर्यवान्॥४॥ब्रह्मणानिर्मितंपू
र्वमिंद्रार्थममितौजसा॥दत्तंसुरपतेःपूर्वंत्रिलोकजयकांक्षिणः॥५॥यस्यवाजेषुपवनःफले
पावकभास्करौ॥शरीरमाकाशमयंगौरवेमेरुमंदरौ॥६॥जाज्वल्यमानंवपुषासुपुंखंहेम
भूषितं॥तेजसासर्वभूतानांकृतंभास्करवर्चसं॥७॥सधूममिवकालाग्निंदीप्तमाशीविषोपमं
नरनागाश्ववृंदानांभेदनंक्षिप्रकारिणं॥८॥

शतेप्रकाशतेइत्याकाशोब्रह्माभगवान्भूताकाशोवा·तेनव्याप्तिसामर्थ्यंपवनवत्त्वेनगतिसामर्थ्यं
पावकादिमत्त्वेनदुःसहत्वं·तर्हिलघुःस्यात्तत्राह·गौरवेइति॥६॥सर्वभूतानांपृथिव्यादीनांतेजसा
सारांशेन॥७॥क्षिप्रकारिणंशीघ्रभेदकारिणं॥८॥

332

तद्वधंतंवधमित्यर्थः॥२५॥२६॥दुरावापा आप्तुमशक्या॥२७॥राघवस्तवसंयुक्तासाधुसाध्वितिवाक्गगनेपिशुश्रुवे॥२८॥२९॥राक्षसपुंगवंहत्वासुग्रीवादिकंसकामंसंपूर्णकामंचकार·रावणवधेनराम

ततोविनेदुःसंहृष्टावानराजितकाशिनः॥वदंतोराघवजयंरावणस्यचतद्वधं॥२५॥अथांतरिक्षेव्यनदत्सौम्यस्त्रिदशदुंदुभिः॥दिव्यगंधवहस्तत्रमारुतःसुसुखोववौ॥२६॥निपपातांतरिक्षाच्चपुष्पवृष्टिस्तदाभुवि॥किरंतीराघवरथंदुरावापामनोहरा॥२७॥राघवस्तवसंयुक्तागगनेचविशुश्रुवे॥साधुसाध्वितिवागग्र्यादेवतानांमहात्मनां॥२८॥आविवेशमहान्हर्षोदेवानांचारणैःसह॥रावणेनिहतेरौद्रेसर्वलोकभयंकरे॥२९॥ततःसकामंसुग्रीवमंगदंचविभीषणं॥चकारराघवप्रीतोहत्वाराक्षसपुंगवं॥३०॥ततःप्रजग्मुःप्रशमंमरुद्गणादिशःप्रसेदुर्विमलंनभोभवत्॥महीचकंपेनहिमारुतोववौस्थितप्रभश्चाप्यभवद्दिवाकरः॥३१॥

कार्यसिद्धेःकिलतेषांराज्यंशाश्वतंप्रतिष्ठितंभवति॥३०॥महीनचकंपेमारुतोनववौक्रुरइतिशेषः·महीचकंपेनहीतिपाठेमारुतोववौसुखइतिशेषः·स्थितप्रभश्चेति·अनेनाश्विनशुक्लनवम्यांयामावशेषदिनेइतिबोधितं॥३१॥

वज्रिवाहुरितिवज्रितुल्यवलरामवाहुविनिःसृतइत्यर्थः वज्रकवचवद्रामेत्यादिवा· वस्तुतोवज्रिवाहु।
विसर्जितोवज्रइवदुर्द्धर्षइत्यर्थः॥१७॥१८॥१९॥निभृतवत् विनीतवत्॥२०॥२१॥२२॥अभिपेतुस्तानग

सवज्रइवदुर्द्धर्षोवज्रिवाहुविसर्जितः॥कृतांतइवचावार्योन्यपतद्रावणोरसि॥१७॥सविस
ष्टोमहावेगःशरीरांतकरःपरः॥विभेदहृदयंतस्यरावणस्यदुरात्मनः॥१८॥रुधिराक्तःसवे
गेनशरीरांतकरःशरः॥रावणस्यहरन्प्राणान्विवेशधरणीतलं॥१९॥सशरोरावणंहत्वा
रुधिरार्द्रीकृतच्छविः॥कृतकर्मानिभृतवत्सतूणींपुनराविशत्॥२०॥तस्यहस्ताद्धत
स्याशुकार्मुकंचापिसायकं॥निपपातसहप्राणैर्भ्रश्यमानस्यजीवितात्॥२१॥गतासुर्भी
मवेगस्तुनैर्ऋतेंद्रोमहाद्युतिः॥पपातस्यंदनाद्भूमौवृत्रोवज्रहतोयथा॥२२॥तंदृष्ट्वाप
तितंभूमौहतशेषानिशाचराः॥हतनाथाभयत्रस्ताःसर्वतःसंप्रदुद्रुवुः॥२३॥सर्वतश्चा
भिपेतुस्तान्वानराद्रुमयोधिनः॥२३॥दशग्रीववधंदृष्ट्वाविजयंराघवस्यच॥अर्दितावा
नरैर्भग्नालंकामभ्यपतन्भयात्॥हताश्रयत्वात्करुणैर्वाष्पप्रस्नवणैर्मुखैः॥२४॥

दुतराक्षसानित्यर्थः॥२३॥हताश्रयत्वात् हतआश्रयोयेषांतत्वात् वाष्पप्रस्नवणैर्मुखैःक
रुणैःशोकवह्निरुपलक्षिताःसंतोलंकामभ्यपतन्॥२४॥

स्यप्रस्थानमितिस्पष्टमयोध्याकांडे॰ चैत्रेपुष्यश्चशुक्लपक्षएवतत्रापिनवम्यादिदिनत्रयेएवेतिस्पष्टमेव
ज्योतिषादौतत्रनवमीरिक्तात्वादभिषेकायोग्यादशम्येवतुपूर्णत्वाद्योग्याएवंचचैत्रशुक्लदशम्यांप्रस्था
नंतत्रमाघकृष्णामायांयुद्धसमाप्तेस्तदुत्तरपंचम्यांभरद्वाजाश्रमागमनं॰ पूर्णेचतुर्दशेवर्षेपंचम्यां
लक्ष्मणाग्रजः भरद्वाजाश्रमंप्राप्यववंदेनियतोमुनिमितिवक्ष्यमाणत्वात्तत्रच॰ नचतुर्दशवर्षस
माप्तिरितिभगवतःप्रतिज्ञाहानिःपूर्णेचतुर्दशेवर्षेइत्युक्तेरसंगतिश्चयुद्धोत्तरंतावत्कालंलंका
यामवस्थानस्यालाभाच्चचैत्रशुक्लपंचम्यांतत्रागमनेपिपंचदिनन्यूनतैवेतितद्धानिस्तदवस्थैवत
दुत्तरद्वितीयदिनेएवायोध्याप्रवेशस्यलाभात्॰ अमांतमानेनचैत्रकृष्णोत्तरपंचम्यांतदाश्रमग
तावपिचतुर्दशवर्षतोबहुदिनाधिक्येनचतुर्दशवर्षसमाप्तिदिनेऽयोध्यानागमेमयाप्राणादेया
भरतेनेतिप्रतिज्ञाहानिःसाचप्रतिज्ञाचित्रकूटेरामसन्निधावितिअयोध्याकांडेस्पष्टंएतेन
चैत्रकृष्णप्रतिपदियुद्धारंभस्तच्छुक्लप्रतिपदिरावणसंस्कारइतितीर्थोक्तश्चैत्रकृष्णस्येत्यप्यो
पिपरास्तःपूर्णिमांतमानेनतिथिवृद्ध्याद्वादशमासैर्वर्षगणनेपंचदिनानांन्यूनत्वात्॰ अमांतमानेनचै
त्रकृष्णग्रहणेबहुदिनाधिक्यं॰ सावनमानेनषष्ट्युत्तरत्रिशतदिनैर्वर्षगणनेतुतिथिवृद्धवर्षात्त
त्रषड्दिनाधिक्येनचतुर्दशवर्षाणांचतुरशीत्यहोरात्रवृद्ध्याबहुदिनन्यूनतैव॰ किंचमहाभार
तेयुधिष्ठिरवनवासेत्रयोदशवर्षमितेकिंचित्कालादर्वागेवतेषांप्राकट्येदुर्योधनेनतदसमाप्तेःए
षांप्राकट्यंनपुनस्तावत्पर्यंतंपुनरेतैर्वनवासःकर्त्तव्योभविष्यतीतिभीष्मंप्रत्युक्तेभीष्मवाक्यंवि

रणेभिरामंरणविषयेसर्वजगत्पूजनीयपराक्रमं॥३२॥रामःस्वजनबलाभिवृत्तोबभूव·महेंद्रश्चत्रिदशगणाभिसंवृतोबभूव॥३३॥अत्रयुद्धदिवसगणनायांकतकतीर्थैः पूर्वंसुवेलारोहणादिने ततोस्तमगमत्सूर्यःसंध्ययाप्रतिरंजितःपूर्णचंद्रप्रदीप्ताचक्षपासमतिवर्त्तते इत्युक्तेस्तद्दिनंचतुर्दशीपूर्णिमान्यतरत्इतिस्पष्टं·ततःकृष्णप्रतिपदियुद्धारंभस्तस्यामेवरात्रौ·नागपाशबंधतद्विमो

ततस्तुसुग्रीवविभीषणांगदाःसुहृद्विशिष्टाःसहलक्ष्मणास्तदा॥समेत्यहृष्टाविजयेनराघवंरणेभिरामंविधिनाभ्यपूजयन्॥३२॥सतुनिहतरिपुःस्थिरप्रतिज्ञःस्वजनबलाभिवृत्तोरणेबभूव॥रघुकुलनृपनंदनोमहौजास्त्रिदशगणैरभिसंवृतोमहेंद्रः॥३३॥इत्यार्षेश्रीरामायणेयुद्धकांडेदशाधिकशततमःसर्गः॥११०॥

क्षौद्वितीयायांधूम्राक्षवधःतृतीयायांवज्रदंष्ट्रस्यचतुर्थ्यामकंपनस्यपंचम्यांप्रहस्तस्यषष्ठ्यांरावणभंगःसप्तम्यांकुंभकर्णवधःअष्टम्यामतिकायादेःनवम्यामिंद्रजितोब्रह्मास्त्रप्रयोगःदशम्यांदिवानिकुंभवधःतद्रात्रौमकराक्षवधःएकादश्यादित्रयोदश्यंतदिनत्रयेइंद्रजिद्वधःचतुर्दश्यांमूलबलवधःअमायांरावणयुद्धारंभतद्वधाविति पंचदशदिनानिसर्वयुद्धमिति·अत्रेदंवक्तव्यं·केयंकृष्णप्रतिपत्माघकृष्णस्यवाचैत्रकृष्णस्यवा·नाद्यःचैत्रपुष्यनक्षत्रेऽयोध्यातोवनंप्रतिराम

तोमार्गकृष्णैषस्यांराघवप्रस्थानस्यान्यत्रोक्तत्वेनपौषपौर्णिमात्वमेवोचितंतत्प्राप्तिदिनस्य·ततोद
शापंचदिनानिसेनानिवेशदूतप्रेषणादिनागतानिततोयुद्धारंभस्तत्रतदारभ्यभाद्रश्रावणोभया
मांतल्लंकापुराद्वारिसेनयोःसंकुलंयुद्धंततोबहुरात्रसद्वायेणभीतारात्त्रसालंकांप्रविष्टाइति
तद्दिनेऽवहारःतदुत्तरप्रतिपदिरात्रौइंद्रजित्कृतशरबंधःइत्यादि·अतएवशरबंधबद्धराघव
दर्शनकालेसीतावाक्यंतीर्त्वासागरमक्षोभ्यंभ्रातरौगोष्पदेहताविति·अनेनबहुदिनयुद्धेन
बहुषुरात्रिसेषुव्यतीतेषुकतिकतिपयपक्षरूपेऽत्यल्पावशिष्टसैन्ययोःशरबंधइतिल
भ्यते·तथाअयंतेमहान्कालःशयानस्यमहाबलेतिकुंभकर्णंप्रतिरावणोक्त्यासांप्रततन्नि
द्रायाःषण्मासाधिकत्वप्रतीतेरप्येवमेवोचितंनिरूपितंचैतस्मात्सेतुबंधादिवृत्तांतत्वंनजा
नीषेइतिकुंभकर्णंप्रतिरावणोक्त्यापूर्वमंत्रकरणोत्तरंमध्येजागरणाभावस्यप्रतीतेःकिंच
शरबंधनादिनंकृष्णप्रतिपत्तस्याःपूर्णिमोत्तरत्वेनसंपूर्णरात्रौचंद्रसत्तयातास्मिंस्तमसिदा
रुणोइत्याद्युक्तेरसंगत्यापत्तेरतःसाशुक्लप्रतिपद्वाच्या·एवंचामांतपक्षमात्रंयुद्धमित्यस्यात्यंत
मसंगत्यापत्तिःयत्तुअमायामेवरावणवधइतितन्नयुक्तं·इंद्रजिद्वधोत्तरंअभ्युत्थानंत्वमद्यैव
कृष्णपक्षचतुर्दशीं·कृत्वानिर्याह्यमावास्यांविजयायबलैर्वृत्तइतिरावणंप्रतिसुपार्श्वस्यो
क्त्याचतुर्दश्यांरावणप्रेषितबलवधोत्तरममायांनिर्गतरावणेनरामलक्ष्मणयोर्युद्धेरात्रौल
क्ष्मणस्यशक्तिघातोत्तरंरावणलंकाप्रवेशस्योक्तनयाततोलक्ष्मणचिकित्सोत्तरंपुनाराम

रात् पर्वणि· पंचमे पंचमे वर्षे द्वौ मासावुपजायत· एषामभ्यधिका मासाः पंच च द्वादश क्षपाः त्रयोदशा
नां वर्षाणामिति मे धीयते मतिः सर्वं यथावच्चरितं यद्यदेभिः प्रतिश्रुतं एवमेतद्ध्रुवं ज्ञात्वा ततो
बीभत्सुरागतः सर्वे चैव महात्मानः सर्वे धर्मार्थकोविदाः एषां युधिष्ठिरो राजा कस्माद्धर्मे पराध्नु
युरिति· एवं चेदृशाव्यवहारे तिथिवृद्धद्वादशमासैरेव वर्षगणना अधिकमासगणना चोचिते
व· एवं चाधिकमासगणनायां धर्महानौ न्याय्यत्वे चास्थिते कस्माद्रामस्तानुपेक्षेत भरतो वा तान्न
गणयेत् एवं चामांतमानेन चतुर्दशीयाश्विनकृष्णे पूर्णिमांतमानेन कार्त्तिककृष्णे मेषस्यांतत्स
माप्तिरित्यायाति अन्यथा चैत्रशुक्लदशम्यारब्धस्य वनवासस्य पौष्यां चतुर्दशवर्षसमाप्तिर्न क
थमप्युपपद्यते तद्गणनेन तु एकादशदिनन्यूनषण्मासानां चतुर्दशवर्षेषु वृद्धावुपपद्यत एव
सा· तस्मात् द्वादशसमास्युत्तरं त्रयोदशे किंचिद्यतीते अरण्यकांडोक्ता समद्गीत्पापफाल्गुनाद्यम्पा
रावणकृतसीतापहारः ततश्चतुर्दशे किंचिद्यतीते रामस्य लंकासमीपगमनं· वर्त्तते दशमो
मासो द्वौ तु शेषौ प्लवंगमेति सीतोक्तिः सावनमानेन स्वरूपणादिनतः कालगणनया· तत्र पूर्ण
चंद्रप्रदीप्ता चेति रामोक्ता पौषशुक्लचतुर्दश्यां पूर्णिमायां वा त्रिकूटशिखरप्राप्ती रामस्य किं
च· हनूमतो लंकाप्रवेशोत्तरं सीतादर्शनकाले हिमव्यपायेन च शीतरश्मिरभ्युत्थितो नैकस
हस्ररश्मिरिति वाक्येन द्वौ मासौ रक्षितव्यौ मे योऽवधिस्ते मया कृत इति रावणवाक्येन मा
र्गशुक्लदशम्युत्तरं हनूमतो लंकाप्रवेशः दिनद्वयांतरे लभ्यते· इत्य निरूपितं सुंदरकांडे त

रत्ववर्णिनेनमंत्रादिनासप्तम्यांयुद्धासंभवाच्च॰ इंद्रजितोदिनत्रयेणवधोऽस्पयामषद्केनेत्यस्या
संगतत्वाच्च॰ एवंचभाद्रपूर्णिमायामेतद्वधः अन्येजघानलक्ष्मणोन्येद्युरतिकायंदशास्पर्शनस्य
त्सर्वमस्त्रेसमुत्थिता॰ अन्येद्युःकुजांबवंधान्येद्युरिंद्रारिर्ब्रह्मास्त्रेणनपोकपीन्॰ हनूमतासमानी
तोमहौषधमहीधरः तस्यानिलस्यस्पर्शवशात्सर्वेणतेसमुत्थिताः अन्येद्युःकपिराट्कुंभंनिकुं
भंवायुजोवधीत्॰ तस्यांनिशिरघुश्रेष्ठोजघानमकरेक्षणं॰ मायासीतावधंचक्रेशक्रजिद्रणमू
र्धनि॰ तेनखिन्नोभवद्रामश्चाश्वस्तोलक्ष्मणेनसः त्रयोदशाहसौमित्रिस्त्रिदिनंयोधयन्बली॰ज
घानशक्रजेतारंरामध्यानेनहेतुना॰ अन्येद्युः अन्येषुदिवसेषु अत्रातिकायग्रहणंत्रिशिरोदे
वांतकनरांतकमहोदरमहापार्श्वोपलक्षणं॰ लक्ष्मणग्रहणमंगदहनूमतोरप्युपलक्षणं॰ एवंचष
ड्भिर्दिनैःषण्णांवधः पूर्वक्रमेणैवतद्वधोक्तेः अन्येद्युःसप्तम्यां॰ पर्वतानयनमष्टम्यां॰ अन्येद्युःन
वम्यां॰ तस्यांनिशि॰ नवमीरात्रौ॰ तदंतेमायासीतावधः ततोदशमीचतुर्थयाममारभ्यत्रयोद
शीचतुर्थयामपर्यंतमिंद्रजिद्वधः ततोवधीन्मूलबलंचतुर्दश्यांरघूद्वहः दर्शेथनिर्ययौराजा
योद्धुंरामेणसंयुगे॰ चतुरंगबलैःसार्धमंत्रिभिर्दशकंधरः छत्रचामरसंयुक्तःसर्वाभरणभूषि
तः महारथगतोद्वारादुत्तरान्निर्ययौवहिः आगतोरक्षसांराजाब्रह्मघ्नोदेवकंटकः योद्धुंरघुवरे
णतिष्ठश्चेवेकाहलध्वनिः तत्रयुद्धंसमभवद्वानराणांचरक्षसां॰ रामरावणयोश्चैवतथासौमित्रि
णासह॰ शक्तिंचिक्षेपसंक्रुद्धः सोनुजंप्रतिरावणः वक्षसाधारयामाससौमित्रिस्तांवियद्गतां त

रावणयुद्धस्यवाल्मीकिनैवस्पष्टमुक्ततयातदसंभवात्· किंच· आदित्यहृदयस्यादित्यंप्रेक्ष्यजप्त्वेदंपरंहर्षमवाप्तवान्इत्यनेनसूर्यदर्शनोत्तरंजपस्योक्ततयारावणमरणोत्तरंस्थिरप्रभस्याप्यभवद्दिवाकरइत्युक्त्यादिवातद्वधप्रतीत्याचचिरकालयुद्धोत्तरंलक्ष्मणेशक्तिघातस्यतदर्थमौषधिपर्वतानयनस्यचोक्तत्वेनाऽमारात्रौशक्तिघातप्रतीत्यापारणाद्रावणापगमस्यप्रतीत्याचतद्विरोधात्· तथापाद्मे· ततोजज्ञेमहायुद्धंसंकुलंकपिरक्षसां मध्याह्नेप्रथमंयुद्धंप्रारब्धंप्रतिपद्यभूत्· प्रतिपदिप्रतिपदीत्यर्थः उक्तयुक्तेः ततोनिशिसमागम्यमायावीशक्रजिद्बली· बबंधनागपाशैस्तौराघवौचहरीश्वरान्· ततऽचिरकालसंकुलयुद्धोत्तरं अन्यथातस्यानिशीत्येवदेत् अग्रेद्वितीयेह्निषष्ठ्यामितिचोक्त्यादारुणेतमसी· तिरामायणोक्त्याचभाद्रश्रावणोभयामोत्तरप्रतिपद्येनतदितिबोध्यं· वैनतेयस्तदाभेत्यतानिचास्त्राण्यमोचयत्· द्वितीयेह्निधूम्राक्षंहनूमान्निजघानवैः तृतीयेह्निवज्रदंष्ट्रंखड्गाच्छिच्छेदचांगदः जघानहनूमान्भूयश्चतुर्थेह्न्यकंपनं प्रहस्तंपंचमीतिथ्यांनीलश्चिच्छेदमृधनिः रावणःपरिभूतोभूत्षष्ठ्यांरामेणाधन्विना· अथलंकेश्वरः खिन्नःकुंभकर्णंसहोदरं· शैलमुद्गरघाताश्चधावनाद्यैरबोधयत्· जघानतंकुंभकर्णंरामःसप्तमवासरे· इदंबोधनंदिनद्वयेन· तंबोधितंकुंभकर्णं· सप्तमवासरेबोधनोत्तरंसप्तमवासरेइत्यर्थः यत्तुबोधनंषष्ठ्यांरात्रौसप्तम्यांचैतद्वधइतितन्न· तदुत्थापनेउक्तस्यातिप्रयासस्यरात्रिमात्रेणासंभवात्· रावणमंदिरगमनकालेसूर्यप्रभयारावणमंदिरस्यातिभास्व

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हेतिशेषः रामरावणयोस्तत्र युद्धं चावेक्ष्य भीतिदं· तृतीयायां तु लंकायाः पूर्वोत्तर दिशि स्थितं· स्वातिनक्षत्रयुक्तायां भीतं सुरबलं महत्· शांत्यर्थं वारयामास देवेंद्रो वचनाद्धरेः शांत्यर्थं भयशांत्यर्थं· ततस्तु श्रवणे नाथ दशम्यां· चंडिकां शुभां· विसृज्य चक्रे शांत्यर्थं बलनीराजनं हरिः रिपुजनितभयशांत्यर्थमित्यर्थः नीराजितबलः शक्रस्तत्र रामं लक्ष्मणं· संभाष्य प्रययौ स्वर्गं सह देवैः शचीपतिः इति वृत्तं पुराकल्पे मनोः स्वायंभुवोंतरे· पुराकल्पे यथा वृत्तं प्रतिकल्पं तथैव तु· प्रवर्त्तते स्वयं देवी दैत्यानां नाशनाय वै· स्वायंभुवमन्वंतररूपे पुराकल्पे इत्यर्थः· प्रतिकल्पं प्रतिमन्वंतरमित्यर्थः जलप्लवसामान्येन तत्रापि कल्पव्यवहारात्· प्रतिकल्पं भवेद्रामो रावणश्चापि राक्षसः तथैव जायते युद्धं तथैव त्रिदशागमः रावं रामसहस्राणि रावणानां तथैव च· भवितव्यानि भूतानि तेषु देवी प्रवर्त्तते· तां पूजिति सुराः सर्वे बलं नीराजयंति च· तथैव वानराः सर्वे कुर्युः पूजां यथाविधि· बलनीराजनं राजा कुर्याद्बलविवृद्धये इति· इयं च ब्रह्मबोधिता महादेवी अग्रेप्रविष्यासी तैव भगवद्भक्तिरूपेति प्रतिभाति· अत एव ब्रह्मवैवर्त्ते प्रथमेंशा विभागे प्रतिकल्पं विष्णोश्चरितं कीदृशमिति नारदप्रश्ने ब्रह्मवाक्यं· साव भगवान्नूनं प्रतिमन्वंतरे मुने· वधाय दुष्टदैत्यानां भूमिभारकृतां भुवि· कलिद्वापरयोः संधौ भविष्यति न संशयः· प्रतिकल्पं त्वेवमेव भविष्यति न संशय इति· सहस्रकृत्वो रामोपि भविता ब्रह्मणो दिने इति ब्रह्मवैवर्त्त प्रथम विभागस्थ राधां प्रति ब्रह्मवाक्ये दिने इति जातावेकवचनं दिनेष्वित्य

यासवाध्यमानः सन्यपातधरणीतले· हनूमताञ्जीवितोभूदौषधानयनात्पुनः ततः क्रुद्धोमहातेजारा
घवोराक्षसांतकः जघानराक्षसान्सर्वान्शरैः कालांतकोपमैः भयात्प्रदुद्रावरणाल्लंकांप्रतिनिशा
चरः जगाद्राममयंपश्यन्निर्वेदात्स्वगृहंविशत्· निकुंभिलांततःप्राप्य होमंचक्रे जिगीषया· ध्वंसि
तंवानरैस्तद्भिचारात्मकंरिपोः पुनरुत्थायपौलस्त्योरामेणसहयोधितुं· दिव्यंस्यंदनमारुह्य
राक्षसैर्निर्ययौबहिः इदंतिर्यग्गमनमाश्विनशुक्लप्रतिपदि· ततः शतमखोदिव्यंरथंहर्यश्वसं
युतं· राघवायस्वसूतेनप्रेषयामासभक्तिमान्· तंतुमातलिनानीतमारुह्यरथसत्तमं· स्तूयमानः
सुरगणैर्युयुधेतेनरक्षसा· ततोयुद्धमभूत्घोरंरामरावणयोर्महत्· सप्ताह्निकमहोरात्रंश
स्त्रास्त्रैरतिभीषणौरिति· मातलिरथागमनदिनोत्तरं· एवंचनवम्यांतद्वधः तदुक्तंकालिका
पुराणे· रामस्यानुग्रहार्थंवैरावणस्यवधायच· रात्रावेवमहादेवीब्रह्मणाबोधितापुरा· ततस्त्
त्यक्तनिद्रासानंदायामाश्विनेसिते· जगामनगरींलंकांयत्रासीद्राघवः पुरा· आगतइतिशेषः इ
दंचागमनंरात्र्यंतेनदैवमातलिरथागमनं· तत्रगत्वामहादेवीतदातौराममलक्ष्मणौ· युद्धेनयोज
यामासस्वयमंतर्हितांविकाः राक्षसानांवानराणांचजग्धासामांसशोणिते· रामरावणयोर्युद्धं
सप्ताहंसान्ययोजयत्· व्यतीतेसप्तमेरात्रेनवम्यांरावणंततः रामेणघातयामासमहामाया
जगन्मयी· यावत्तयोःस्वयंदेवीयुद्धकेलिमुदैक्षत· तावचुत्रेय्यरात्राणिसर्वैर्देवैःसुपूजिता· निह
तेरावणेवीरेनवम्यांसकलैःसुरैः विशेषपूजांदुर्गायाश्चक्रेलोकपितामहः सकलैः सुरैरित्यस्यस

रामा॰यु॰
३३७

घोस्कंधावारनिवेशनं·पौषशुक्लप्रतिपदस्तृतीयायावदंबुधेःउपस्थानंससैन्यस्यराघवस्यतु·
वासरेसप्तमेवाघोस्कंधावारनिवेशनं·पौषशुक्लप्रतिपदस्तृतीयायावदंबुधेःउपस्थानंससै
न्यस्यराघवस्यबभूवह·विभीषणश्चतुर्थ्यांवैरामेणसहसंगतः·समुद्रत्तरणार्थीयपंचम्यां
मंत्रउद्यमः·प्रायोपवेशश्चक्रेरामोदिनचतुष्टयं·समुद्रवरलाभश्चसेत्पायप्रकीर्त्तनं·सेतोर्द
शम्यामारंभस्त्रयोदश्यांसमापनं·चतुर्दश्यांसुवेलाग्रेरामःसैन्यंन्यवेशयत्·पौर्णमास्यांद्वि
तीयांतंत्रिदिनैःसैन्यतारणं·तृतीयायादशम्यंतंमंत्रागुल्मनिवेशनेशुकसारणयोःसैन्य
प्राप्तिरेकादशोदिने·माघेऽसितायांद्वादश्यांसैन्यसंख्याकृताऽत्रवै·सारणेनकपीनांतुसा
रासारोपवर्णनं·त्रयोदश्याद्यमायांव[illegible]लंकायांदिवसैस्त्रिभिः·रावणःसैन्यसंख्यानरण
योत्साहनंतथा·यथावद्यांगदोदौत्यंमाघशुक्लादिवासरे·माघशुक्लद्वितीयादिदिनैःसप्त
भिरेवतुरक्षसांवानराणांचयुद्धमासीत्सुसंकुलं·माघशुक्लनवम्यांतुरात्राविंद्रजितारणे·रा
मलक्ष्मणयोर्नागपाशैर्बंधोबभूवह·नागपाशविमोक्षार्थंदशम्यांगरुडोभ्यगात्·अत्रावहारः
कथितोदशम्यादिदिनद्वयं·द्वादश्यामांजनेयेनधूम्राक्षस्यवधःकृतः·त्रयोदश्यांतुतेनैव
निहतोकंपनोरणे·माघशुक्लचतुर्दश्यांयावत्कृष्णादिवासरं·त्रिदिनेनप्रहस्तस्यनीलेन
विहितोवधःमाघसितद्वितीयायाश्चतुर्थ्यंतंत्रिभिर्दिनैःरामेणतुमुलेयुद्धेरावणोद्रावितोर
णात्·पंचम्यास्त्वष्टमीयावत्·रावणेनप्रबोधितःकुंभकर्णःसमुत्तस्थावत्रायुद्धंचतुर्दिनं·

337

राम॰
३३७

र्थः पूर्वप्रतिमन्वंतरमित्युक्तेः प्रतिचतुर्युगंरामाद्यवतारइतितुनयुक्तं· चतुर्विंशतितमचतुर्युग्यां
रामावतारस्याष्टाविंशतितमचतुर्युग्यांकृष्णावतारस्यहरिवंशेपुराणांतरेचप्रसिद्धत्वादिति
दिक्· आग्निवेशरामायणमितिप्रसिद्धेग्रंथेतुरामःपंचदशेवर्षेषड्वर्षामपिमैथिलीं· उपयेमे
त्वयोध्यायांद्वादशाब्दानुवाससः सप्तविंशतिमेवर्षेवनवासमकल्पयत्· अष्टादशंतुव
र्षाणिसीतायास्तुतदाभवन्· त्रिरात्रमुदकाहारश्चतुर्थेन्हिफलाशनः पंचमेचित्रकूटेतु
रामोवासमकारयत्· अथत्रयोदशेवर्षेपंचवट्यांमहात्मनाः रामोविरूपयामासवीरांशू
र्पनखांवने· ततोमाघेऽसिताष्टम्यांमुहूर्तेवृंदसंज्ञके· राघवाभ्यांविनासीतांजह्रेद २
शकंधरः· माघेशुक्लचतुर्दश्यामितिपाद्मेनरः· मार्गशुक्लेदशम्यांचवसंतीरावणालि
लये· संपातिर्दशमेमासेऽचख्यौवानरेषुतां· एकादश्यांमहेंद्राग्रात्पुप्लुवेशतयोजनं· त
द्वात्रिंशेषेसीतायांदर्शनंह्निहनूमतः· द्वादश्यांशिंशपावृक्षेहनूमान्पर्यवस्थितः· तस्यांनि
शायांसीतायाविश्वासालापसत्कथाः· अक्षादिभिस्त्रयोदश्यांततोयुद्धमवर्तत· वधोत्वक्षकु
मारस्यवनविध्वंसनंतथा· ब्रह्मास्त्रेणचतुर्दश्यांबद्धःशक्रजिताकपिः· वह्निनापुच्छयुक्तेन
लंकायादहनंतथा· पौर्णमास्यांमहेंद्राद्रौपुनरागमनंकपेः· मार्गासितप्रतिपदः पंचभिःपथि
वासरैःपुनरागम्यषष्ठेन्हिध्वस्तंमधुवनंचतैः· सप्तम्यांप्रत्यभिज्ञानदानंशुद्धनिवेदनं· अष्टम्यु
त्तरफाल्गुन्यांमुहूर्तेविजयाभिधे· मध्यंप्राप्तेसहस्रांशौप्रस्थानंराघवस्यतु· वासरेसप्तमेबो

माधवस्यतुःभरद्वाजाश्रमंरामःससीतःपुनरागमत्· नंदिग्रामेतुषष्ठ्यांवैभरतेनसमागतः सप्त
म्यामभिषिक्तोसावयोध्यायांरघूत्तमः जानकीरामस्याह्नारावणस्यनिवेशने· मन्तु॥१४॥मा
सान्स्थितापन्नदशवासरसंयुतेतित्तत्तुसवंशिश्रनिश्चितप्रामाण्यं·कालिकापुराणादि
विरोधात्·। इदंकल्पांतरविषयमितिनयुक्तंतद्विरोधादेव·तस्मात्क्रियाविरोधेपुराणे
षुउपसंहारएवन्याय्यः शारवांतरोक्तागोपसंहारवत्· यथाक्तुंभकएविधोत्ररामेणोक्तो
भारतेलक्ष्मणेनताद्दशेविषयेनतुकल्पभेदेनव्यवस्था·जन्मविषयेएवतुहरिवंशोक्ता
सेतिबोध्यं॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेदशाधिकशततमः
सर्गः॥११०॥

कुंभकर्णो दिनैः षट्भिर्नवम्यास्तु चतुर्दशी · रामेण निहतो युद्धे बहुवानरभक्षकः अमावास्यादि
नेशोकादवहारो बभूव ह · फाल्गुनादिप्रतिपदश्चतुर्थ्यंतादिनैस्ततः नरांतकप्रभतयो निहताः
पंचराक्षसाः पंचम्याः सप्तमीयावदतिकायवधस्त्र्यहात् · अष्टम्याद्द्वादशीयावन्निहतो दिनपंच
कान् · निकुंभकुंभावर्धंतु मकराक्षश्चतुर्दिनैः फाल्गुनस्य द्वितीयायां कृष्णे शक्रजिताजितं ·
ततीयायास्तु सप्तम्या हरयः पंचवासरात् · औषध्यानयने व्यग्रास्तदासीदवहारकः · त
त्रत्रयोदशीयावद्दिनैः षट्भिस्तु शक्रजित् लक्ष्मणेन हतो युद्धे विघ्नितोभिचरन्क्रमात् · च
तुर्दश्यां दशग्रीवो रणादीक्षाविधिक्रमात् · अमावास्यां ययौ वीरो युद्धाय दशकंधरः चैत्रशुक्ल
प्रतिपदः पंचमीदिनपंचकैः रावणस्य प्रधानानां युध्यतामभवत्क्षयः चैत्रषष्ठ्यष्टमीयावन्महा
पार्श्वादिमारणं · चैत्रशुक्लनवम्यां तु सौमित्रेशक्तिभेदनं · द्रोणाद्रिरांजनेयेन लक्ष्मणार्थमुपा
हृतः दशम्यामवहारोभूद्रात्रौ युद्धं नरक्षसोः एकादश्यां तु रामाय रथो मातलिसारथिः अ
ष्टादशदिने रामो रावणं द्वैरथे वधीत् · द्वादश्याः शुक्लपक्षस्य यावत्कृष्णचतुर्दशी · माघशुक्ल
द्वितीयायाश्चैत्रकृष्णचतुर्दशी · अष्टाशीतिदिनं युद्धं मध्ये पंचदशाहकं युद्धावहारं संग्रा
मस्त्रिसप्ततिदिनान्यभूत् · संस्कारो रावणादीनाममावास्यादिनेऽभवत् · वैशाखादितिथौ
रामः सुवेलं पुनरागमत् · अभिषिक्तो द्वितीयायां लंकाराज्ये विभीषणः सीताशुद्धिस्ततीया
यां देवेभ्यो वरलंभनं · वैशाखस्य चतुर्थ्यां तु रामः पुष्पकमास्थितः पूर्णे चतुर्दशे वर्षे पंचम्यां

अस्मिन्भूमौपतितेसतिआदित्यभूमिपातादितुल्यंदृश्यतेव्यवसायःप्रवृत्तिलक्षणोधर्मःनिरुद्यमः
त्वत्तुल्याश्रयाभावान्निर्व्यापारोभूदित्यर्थः॥७॥रणेत्वयिपांसुषुप्रसुप्तइवजातेइहलोकायावर्त्तमा
नस्यगतसत्वस्यगताधारत्वस्यलोकस्यरक्षोलोकस्याकिंशेषंनकिमपिसर्वंनष्टमित्यर्थः॥८
धृतिर्धैर्यमेवप्रवालायस्यसःप्रसभोहठएवाग्र्यंपुष्पंयस्यसःतपएवबलंयस्यसःशौर्यमेव

आदित्यःपतितोभूमौमग्नस्तमसिचंद्रमाः॥चित्रभानुःप्रशांतार्चिर्व्यवसायोनिरुद्यमः।
अस्मिन्निपतितेवीरेभूमौशस्त्रभृतांवरे॥७॥किंशेषमिहलोकस्यगतसत्वस्यसंप्रति॥
रणेराक्षसशार्दूलेप्रसुप्तइवपांसुषु॥८॥धृतिप्रवालःप्रसभाग्र्यपुष्पस्तपोबलःशौर्य
निबद्धमूलः॥रणेमहान्राक्षसराजवृक्षःसंमर्दितोराघवमारुतेन॥९॥तेजोविषाणः
कुलवंशवंशःकोपप्रसादापरगात्रहस्तः॥इक्ष्वाकुसिंहावगृहीतदेहःसुप्तःक्षितौराव
णगंधहस्ती॥१०॥

निबद्धंदृढावस्थितिसाधनंमूलंयस्यसः॥९॥विषाणांदंताःकुलंपितृपैता
महादयस्तेषांवंशाःसमूहाएववंशःपृष्ठावयवविशेषोयस्यसःवंशोवेणौकुलेवर्गेपृष्ठस्यावय
वेपिचेतिविश्वःकोपापरगात्रःकोपएवापरगात्रंपदाद्यवयवाःयस्यसःप्रसादहस्तःप्रसादःप्रस
न्नतैवहस्तःशुंडादंडइत्यर्थःइक्ष्वाकुसिंहेनरामरूपसिंहेनावगृहीतःपातितोदेहोयस्यसः
॥१०

अथविभीषणविलापः भ्रातरमिति ॥१॥ प्रवीणसमर्थ ॥२॥ अपवृत्तेनरामबाणैः त्याजितेनमुकुटेनोपलक्षितः ॥३॥ यन्मयापूर्वमीरितं त्वन्निधनं तत्सर्वं रक्षोनाशरूपं तदिदं संप्राप्तं उक्तस्यैव विवरणं

भ्रातरंनिहतंदृष्ट्वाशयानंनिर्जितंरणे ॥ शोकवेगपरीतात्मा विललापविभीषणः ॥१॥ वीरविक्रांतविख्यातप्रवीणनयकोविद ॥ महार्हशयनोपेतकिंशेषेनिहतोभुवि ॥२॥ निक्षिप्यदीर्घौनिश्चेष्टौभुजावंगदभूषितौ ॥ मुकुटेनापवृत्तेनभास्कराकारवर्चसा ॥३॥ तदिदंवीरसंप्राप्तंयन्मयापूर्वमीरितं ॥ काममोहपरीतस्ययत्तन्नरुचिंतंतव ॥४॥ यन्नदर्पात्प्रहस्तोवानेंद्रजिन्नापरेजनाः ॥ नकुंभकर्णोतिरथोनातिकायोनरांतकः ॥५॥ नस्वयंवहुमन्येथास्तस्योदर्कोयमागतः ॥ गतःसेतुःसुनीतानांगतोधर्मस्यविग्रहः ॥ गतःसत्वस्यसंक्षेपःसुहस्तानांगतिर्गताः ॥६॥

काममोहेतिः काममोहपरीतस्यतेयन्मेवचोनरुचितं ॥४॥ यन्नप्रहस्तादयः दर्पात् गर्वान्नबहुमन्यंत स्वयंचवचः नबहुमन्येथास्तस्योदर्कोउत्तरकालिकविपाक आगतः प्राप्तः ॥५॥ सुनीतानांधार्मिकानांसेतुर्गतिः विग्रहः स्वरूपं सत्वस्यबलस्यसंक्षेपः संग्रहस्थानंसुहस्तानांवीराणांगतिर्गताप्राप्तात्वय्येतिशेषः ॥६॥

कालसमायुक्ते कालधर्मसंबंधेः एवंदुर्गणायुक्तस्यमरणमेवसम्यगितिभावः॥१६॥नभूतपूर्वइत्येत
दोवोपपादयन्तिपरैरिति॥१७॥इयंहियागतिरनेनप्राप्ताइयंगतिःपूर्वैर्मन्वादिभिःसंदिष्टाउ
पदिष्टाक्षत्रियसंमतात्क्षत्रियपूजितोत्तमागतिरेव अतःसंख्येहतःक्षत्रियोनशोच्यइतिनिश्च

येनसेंद्रास्त्रयोलोकास्त्रासितायुधिधीमता॥अस्मिन्कालसमायुक्तेनकालःपरिशोचितुं॥१६॥
नैकांतविजयोयुद्धेभूतपूर्वःकदाचन॥परैर्वाहन्यतेवीरःपरान्वाहंतिसंयुगे॥१७॥इयंहि
पूर्वैःसंदिष्टागतिःक्षत्रियसंमता॥क्षत्रियोनिहतःसंख्येनशोच्यइतिनिश्चयः॥१८॥तदेवंनि
श्चयंदृष्ट्वातत्वमास्थायविज्वरः॥यदिहानंतरंकार्यंकल्प्यंतदनुचिंतय॥१९॥तमुक्त्वावाक्यं
विक्रांतंराजपुत्रंविभीषणः॥उवाचशोकसंतप्तोभ्रातुर्हितमनंतरं॥२०॥योयंविमर्देषुवि
भग्नपूर्वःसुरैःसमस्तैरपिवासवेन॥भवंतमासाद्यरणेविभग्नोवेलामिवासाद्ययथासमु
द्रः॥२१॥अनेनदत्तानिवनीयकेषुभुक्ताश्चभोगानिभृताश्चभृत्याः॥धनानिमित्रेषुसमर्पितानि
निवैराण्यमित्रेषुनिपातितानि॥२२॥

यः॥१८॥तत्तस्मादेवंनिश्चयंदृष्ट्वाज्ञात्वातत्वमास्थायनि
श्चितत्वमवलंब्यात्रयत्कल्प्यमनुष्ठेयंतदनुचिंतयसत्वमास्थायेतिपाठेसत्वगुणमास्थायेत्यर्थः
१९॥२०॥विमर्देषुयुद्धेषु॥२१॥वनीयकेषुयाचकेषनेनदत्तानिदानानीतिशेषःनिभृताःनितरांपोषिताः॥२२॥

पराक्रमोत्साहरूपंविजृंभितमर्चिर्यस्यसःक्रोधजोनिश्वासएवधूमोयस्यसःस्वबलमेवप्रतापोद
हशक्तिर्यस्यसःअतएवप्रतापवान्॥११॥सिंहर्क्षाःराक्षसास्तएवलांगूलककुद्विषाणोचयस्यसःसिं
हर्क्षाराक्षसाःप्रोक्तायक्षाऽरमीषिणोमनाइतिनिघंटुःपराभिजित्परजेताःगंधनेपराक्रमाद्युत्सा
हेगंधवाहोवायुतुल्यःगंधनगंधवाहइतिपांक्तःपाठःगंधहस्तीतिपाठेमत्तगजतुल्यःरक्षोवषेरा

पराक्रमोत्साहविजृंभितार्चिर्निश्वासधूमःस्वबलःप्रतापः।प्रतापवान्संयतिराक्षसाग्निर्नि
र्वापितोरामपयोधरेण॥११॥सिंहर्क्षलांगूलककुद्विषाणःपराभिजिद्गंधनगंधवाहः।रक्षोवि
षश्चापलकर्णचक्रःक्षितीश्वरव्याघ्रहतोवसन्नः॥१२॥वदंतंहेतुमद्वाक्यंपरिदृष्टार्थनिश्चयं
रामःशोकसमाविष्टमित्युवाचविभीषणं॥१३॥नायंविनष्टोनिश्चेष्टःसमरेचंडविक्रमः।अत्यु
न्नतमहोत्साहःपतितोयमशंकितः॥१४॥नैवंविनष्टाःशोच्यंतेक्षत्रधर्मव्यवस्थिताः।वृद्धिमा
शंसमानायेनिपतंतिरणाजिरे॥१५॥

वर्णःचापलंधर्मादिविषयस्खलनमेवकर्णचक्रंयस्यक्षिती
श्वरव्याघ्रोरामव्याघ्रः॥१२॥परिदृष्टःप्रकाशमानोर्थनिश्चयोयस्मात्तत्॥१३॥अयंसमरेनिश्चेष्टोऽशक्तो
भूत्वानविनष्टःअपितुचंडविक्रमत्वादिगुणएकएवायंअशंकितोमृत्युशंकारहितएवदैवात्पतितः
॥१४॥किंततस्तत्राहनैवमितिवृद्धिंजयादिकमाशंसमानाःसंतोयेरणाजिरेनिपतंतिक्षत्रधर्मास्थिताए
वंविनष्टास्तेनशोच्यंतेपुण्यलोकप्राप्तेरितिभावः ॥१५॥

हतयूथपाःकरेणवइवददृशुः॥५॥६॥७॥सुपरिवर्त्तनेलुठतिस्म॥८॥९॥स्नापयंतीमित्यस्यवैकल्पि

तावाष्पपरिपूर्णाक्ष्योभर्तृशोकपराजिताः॥करिण्यइवनर्दंत्यःकरेण्वोहतयूथपाः॥५॥ददृशु
स्तांमहाकायंमहावीर्यंमहाद्युतिं॥रावणंनिहतंभूमौनीलांजनचयोपमं॥६॥ताःपतिंसह
सादृष्ट्वाशयानंरणपांसुषु॥निपेतुस्तस्यगात्रेषुछिन्नावनलताइव॥७॥वहुमानात्परि
षज्यकाचिदेनंरुरोदह॥७॥चरणौकाचिदालंव्यकाचित्कंठेवलंव्यच॥उत्क्षिप्यचभुजौका
चिद्भूमौसुपरिवर्त्तते॥८॥हतस्यवदनंदृष्ट्वाकाचिन्मोहमुपागमत्॥काचिदंकेशिरः।

कृत्वारुरोदमुखमीक्षती॥९॥स्नापयंतीमुखंवाष्पैस्तुषारैरिवपंकजं॥एवमार्त्ताःपतिं
दृष्ट्वारावणंनिहतंभुवि॥१०॥चुक्रुशुर्वहुधाशोकाद्भूयस्ताःपर्यदिवयन्॥येनवित्रासितः
शक्रोयेनवित्रासितोयमः॥११॥येनवैश्रवणोराजापुष्पकेनवियोजितः॥गंधर्वाणामृषीणां
चसुराणांचमहात्मनां॥१२॥भयंयेनरणेदत्तंसोयंशेतेरणेहतः॥असुरेभ्यःसुरेभ्योवापन्न
गेभ्योपिवातथा॥१३॥भयंयोनविजानातितस्येदंमानुषाद्भयं॥अवध्योदेवतानांयस्तथादा
नवरक्षसां॥१४॥हतःसोयंरणेशेतेमानुषेणपदातिना॥योनशक्यःसुरैर्हंतुंनयक्षैर्नासुरैस्त
था॥१५॥

कन्यात्पदेमित्वाभावः॥१०॥११॥१२॥१३॥१४॥१५॥

एषोहिताग्निरित्यर्षसंधिः॥आहिताग्निरितिच्छेदः वेदांतगः अधीतोपनिषत्कः कर्मसु अग्निहोत्रादिषु अ
ग्र्यश्शूरः परमानुष्ठातापरमकर्मकृदित्यर्थः॥२३॥तस्यस्वर्गीयंस्वर्गार्हं आधानंविधानंप्रेतकृत्यं॥२४॥त

एषोहिताग्निश्चमहातपाश्चवेदांतगः कर्मसुचाग्र्यश्शूरः॥एतस्ययत्प्रेतगतस्यकृत्यंतत्कर्तु
मिच्छामितवप्रसादात्॥२३॥सतस्यवाक्यैः करुणैर्महात्मासंबोधितः साधुविभीषणेन॥
आज्ञापयामासनरेंद्रसूनुः स्वर्गीयमाधानमदीनसत्वः॥२४॥मरणांतानिवैराणिनिवृत्तंनः
प्रयोजनं॥क्रियतामस्यसंस्कारोममाप्येषयथातव॥२५॥इत्यार्षेश्रीरामा०युद्ध०एकाद
शाधिकशततमःसर्गः॥१११॥ रावणंनिहतंश्रुत्वाराघवेणमहात्मना॥अंतःपुराद्विनि
ष्पेतूराक्षस्यःशोककर्शिताः॥१॥वार्यमाणाः सुबहुशोवेष्टंत्योरणपांसुषु॥विमुक्तकेश्यः
शोकार्तागावोवत्सहतायथा॥२॥उत्तरेणविनिष्क्रम्यद्वारेणसहराक्षसैः॥प्रविश्यायो
धनंघोरंविचिन्वंत्योहतंपतिं॥३॥आर्यपुत्रेतिवादिन्योहानाथेतिचसर्वशः॥परियेतुः।
कबंधांकांमहींशोणितकर्दमां॥४॥

वेवमभमापिस्नेहविषयोतःसंस्कारविषयांशंकांमाकुर्वित्य
र्थः॥२५॥इतिश्रीरामाभिरामेश्रीरा०रा०ति०युद्ध०एकादशाधिकशततमःसर्गः॥१११॥ रावणमिति
१॥वार्यमाणाः पांसुवेष्टनाद्बहुशोनिवार्यमाणाअपिरणपांसुषुवेष्टंत्यः वत्सहताःहतवत्साः

अयमत्याप्तवियोगजशोकमात्रेदर्शयंतः॥२॥३॥

एवंरावणीयस्वेछाचरणस्यनाशहेतुत्वमुक्त्वेदानींतन्निरासपूर्वकंदैवस्यतत्कारणत्वंदर्शयंतिनेति
कामंपर्याप्तंतवनकामकारो· नत्वदिच्छाप्रवर्त्तितोयंव्यवहारःकुतोयतोदैवंसर्वंप्राणिजातंचेष्ट
यतेतत्तत्कर्मानुसारेणातोदैवहतमेवकेनचिन्निमित्तेनहन्यते॥२२॥तेनवरणेवानराणांराक्षसानांत

342

नकामकारःकामंवातवराक्षसपुंगव॥दैवंचेष्टयतेसर्वंहतंदैवेनहन्यते॥२२॥वानराणांवि
नाशोयंराक्षसानांचतेरणे॥नवचैवमहाबाहोदैवयोगादुपागतः॥२३॥नैवार्थेननकामेनवि
क्रमेणनचाज्ञया॥शक्यादैवगतिर्लोकेनिवर्त्तयितुमुद्यता॥२४॥विलेपुरेवंदीनास्तारा
क्षसाधिपयोषितः॥कुरर्यइवदुःखार्त्तावाष्पपर्याकुलेक्षणाः॥२५॥इत्यार्षेश्रीरा॰यु॰द्वादशा
धिकशततमःसर्गः॥११२॥ तासांविलपमानानांतदाराक्षसयोषितां॥ज्येष्ठापत्नीप्रियादी
नाभर्त्तारंसमुदैक्षत॥१॥दशग्रीवंहतंदृष्ट्वारामेणाचिंत्यकर्मणा॥पतिंमंडोदरीतत्रकृप
णापर्यदेवयत्॥२॥ननुनाममहाबाहोतववैश्रवणानुज॥क्रुद्धस्यप्रमुखेस्थातुंत्रस्य
त्यपिपुरंदरः॥३॥ऋषयश्चमहांतोपिगंधर्वाश्चयशस्विनः॥ननुनामतवोद्वेगाच्चारणाश्चदि
शोगताः॥४॥

वचायंविनाशोदैवादुपागतः२३अर्थेनधनेननकामेनेछयाआज्ञयामर्यादाव्यव
स्थापनशक्त्या·उद्यताफलोन्मुखीभूता॥२४॥२५॥क॰॥१॰३॥इतिरामाभिरामेश्रीरा॰रा॰ति॰यु॰
द्वादशाधिकशततमःसर्गः॥११२॥तासामिति॥१॥मंडोदरीमं[illegible]कृशोदरीत्यर्थःमंदोदरीति

पाठेप्ययमेवार्थः॥२॥पुरंदरोपित्रस्यति॥३॥तवोद्वेगा
तउद्वेगंप्राप्य॥४॥

असत्वःकश्चिदिवदुर्वलःप्राकृतप्राणीवलंभितःप्रापितः॥१६॥सुहृदांवाक्यमितिशेषःएतावयंआत्मा
चतेत्वयाइदानींसमंएककालएवपातितः॥१७॥इतिवाक्यंब्रुवाणोपियत्परुषितस्तत्फलंदृश्यमि

सोयंकश्चिदिवासत्वोमृत्युंमर्त्येनलंभितः॥एवंवदंत्योरुरुदुस्तस्यतादुःखितास्त्रियः॥भू
यएवचदुःखार्त्ताविलेपुश्चपुनःपुनः॥१६॥अस्माएवनानुसुहृदांसततंहितवादिनां॥मरणा
यात्हृतासीताराक्षसाश्चनिपातिताः॥एताःसममिदानींतेवयमात्माचपातितः॥१७॥ब्रुवा-
णोपिहितंवाक्यंइष्टोभ्राताविभीषणः॥दृष्टंपरुषितोमोहात्त्वयात्मवधकांक्षिणा॥१८॥यदि
निर्यातितातेस्यात्सीतारामायमैथिली॥ननःस्याद्व्यसनंघोरमिदंमूलहरंमहत्॥१९॥वृ
त्तकामोभवेद्भ्रातारामोमित्रकुलंभवेत्॥वयंचाविधवाःसर्वाःसकामानचशत्रवः॥२०॥
त्वयापुनर्नृशंसेनसीतांसंरुंधतावलात्॥राक्षसावयमात्माचत्रयंतुल्यंनिपातितं॥२१॥

त्यर्थः॥१८॥यदितित्वयासीतानिर्यातितासमर्पितास्यात्तदानःइदंव्यसनंनस्यात्॥१९॥भ्रातावृत्त
कामोनिष्पन्नमनोरथःस्ववाक्यपरणात्·मित्रकुलंमित्रपक्षःवयमविधवाःस्युःशत्रवश्चसकामानस्युः॥२०

अतो व्यक्तमित्यादि सत्यमेवमंदोदरी जानीते भगवत्कृपया महायोगी स्वाभाविकसर्वशक्तियुक्तः परमात्मा आत्मनामप्यात्मा सर्वांतर्यामीत्यर्थः य आत्मनि तिष्ठन्नात्मानमंतरो यमयती श्रुतेः सनातनः सदास्तित्वयुक्तः अनादिमध्यनिधनः जन्मवृद्धिनाशहीनः महतः परमो महान् महतो महीयान् ॥२२॥ तमसः परमः प्रकृतेः प्रवर्त्तकः तपसः परम इति पाठे सर्वतपःफलद इत्यर्थः धाता स्रष्टा यतो

व्यक्तमेष महायोगी परमात्मा सनातनः ॥ अनादिमध्यनिधनो महतः परमो महान् ॥१२॥ तमसः परमो धाता शंखचक्रगदाधरः ॥ श्रीवत्सवक्षा नित्यश्रीरजय्यः शाश्वतो ध्रुवः ॥१३॥ मानुषं रूपमास्थाय विष्णुः सत्यपराक्रमः ॥ सर्वैः परिवृतो देवैर्वानरत्वमुपागतैः ॥१४॥ सर्वलोकेश्वरः श्रीमान् लोकानां हितकाम्यया ॥ स राक्षसपरीवारं देवशत्रुं भयावहं ॥१५॥

वाङ्मानिभृता निजायंत इत्युक्तेः इदानीं विग्रहगुणानाह शंखेत्यादि ॥१३॥ नित्यं श्रीरनपायिलक्ष्मीकः अजय्यः जेतुमशक्यः शाश्वतोऽत्ययरहितः ध्रुवः परिणामशून्यः अनेन षड्भावविकारशून्यत्वमुक्तं महायोगित्वादिविशेषणविशिष्टो यो विष्णुः स एव राम इत्यर्थः ॥१४॥ स राक्षसपरीवारं राक्षसरूपपरीवारसहितं हतवानिति शेषः देवशत्रुं भयावहमित्यनेन भगवतो वैषम्यनैर्घृण्ये परिहृते अवतारप्रयोजनं रावणवधप्रयोजनं च देवभयनिवृत्तिरूपं दर्शितं ॥१५॥ ॥

वीर्येणत्रैलोक्यमाक्रम्यश्रियान्वितंत्वांमनुषोजघानेतियदत्रकिमितिनव्यपत्रयसे॥५॥६॥मानुषा
णामविषयेऽग्रगोचरेलंकाद्वीपरूपेदेशेइत्यर्थः॥७॥सर्वतःसमुपेतस्यजयोपेतस्यतवतेनरामे
णयदभिमर्शनंप्रधर्षणमेतद्रामस्यकर्मेतिनश्रद्दधामि॥८॥ननुप्रत्यक्षसिद्धेकथमश्रद्धेत्यपर

सत्वंमानुषमात्रेणरामेणायुधिनिर्जितः।नव्यपत्रयसेराजन्किमिदंराक्षसेश्वर॥५॥कथं
त्रैलोक्यमाक्रम्यश्रियावीर्येणचान्वितं।अविषह्यंजघानत्वांमानुषोवनगोचरः॥६॥
मानुषाणामविषयेचरतःकामरूपिणः॥विनाशस्तवरामेणसंयुगेनोपपद्यते॥७॥नचै
तत्कर्मरामस्यश्रद्दधामिचमसुखे॥सर्वतःसमुपेतस्यतवतेनाभिमर्शनं॥८॥अथवारा
मरूपेणकृतांतःस्वयमागतः।मायांतवविनाशायविधायाप्रतितर्कितां॥९॥अथवावास
वेनत्वंधर्षितोसिमहाबल॥१०॥वासवस्यतुकाशक्तिस्त्वांद्रष्टुमपिसंयुगे॥महाबलंम
हावीर्यंदेवशत्रुंमहौजसं॥११॥

न्यापत्तांतरमथवेति·तवनाशायाप्रतर्कितां·।अचिंतनीयोपपत्तिकांमायांविधायकृतांतोरामरू
पेणागतःइतिमन्येइतिशेषः॥९॥अथवारामरूपेणवासवेनत्वंधर्षितोसि·एतन्नोपपद्यतइ
त्याह·वासवस्येति॥१०॥महाबलत्वादिविशेषणांद्रष्टुमपिवासवस्यतुकुतःशक्तिः॥११॥

त्वांधर्षयन्तंदैवधर्षणसमयएवनदग्धइतियत्त्येनमाहात्म्येनतेदेवाविभ्यतितेनमाहात्म्येनेत्यर्थः।२५
कालेपरिपाकसमयेपर्यागतेसति।२६।शुभंसुखं·पापंदुःखं।२७।तुभ्यंतवततःसीतानेतोपि।२८।मैथिली

तदैवयन्नदग्धस्त्वंधर्षयंस्तनुमध्यमां।देवाविभ्यतितेसर्वेसेंद्राःसाग्निपुरोगमाः।२५।अव
श्यमेवलभतेफलंपापस्यकर्मणः।भर्त्तःपर्यागतेकालेकर्त्तानास्त्यत्रसंशयः।२६।शुभकृ
च्छुभमाप्नोतिपापकृत्पापमश्नुते।विभीषणःसुखंप्राप्तस्त्वंप्राप्तःपापमीदृशं।२७।संत्यन्याः
प्रमदास्तुभ्यंरूपेणाभ्यधिकास्ततः।अनंगवशमापन्नस्त्वंतुमोहान्नबुध्यसे।२८।नकुलेननरू
पेणनदाक्षिण्येनमैथिली।मयाधिकावातुल्यावात्तुमोहान्नबुध्यसे।२९।सर्वदासर्वभूतानां
नास्तिमृत्युरलक्षणः।तवतद्दयंमृत्युर्मैथिलीकृतलक्षणः।३०।सीतानिमित्तजोमृत्यु
स्त्वयादूरादुपाहृतः।मैथिलीसहरामेणविशोकाविहरिष्यति।अल्पपुण्यात्वहंघोरेपति
ताशोकसागरे।३१।कैलासेमंदरेमेरौतथाचैत्ररथेवने।देवोद्यानेषुसर्वेषुविहृत्यसहि
तात्वया।३२।विमानेनानुरूपेणयायाम्यतुलयाश्रिया।पश्यंतीविविधान्देशांस्तांस्तान्
चित्रस्रगंवरा।३३।

कुलादिनामदधिकानःमत्तुल्यापिनाथापितत्तुतथात्वंतुत्वंमोहान्नबुध्यसे।
२९।अलक्षणोऽनिमित्तःमैथिलीकृतलक्षणःमैथिलीकृतंलक्षणंनिमित्तंयस्यसःमैथिलीहेतुकइत्यर्थः।
।३०।३१।३२

पुराभगवदुद्देशेनतपोनुष्ठानकालेतद्वैरंस्वजयनिमित्तंवैरंस्मरद्भिरिंद्रियैरकर्मप्रवृत्तिसंपादनेननिर्जितः
१६॥१७॥१८॥व्युष्टिःफलं॥१९॥सीतांप्रतिअभिकामःकामुकः॥२०॥मान्यां-उपास्पदेवनां॥२१॥वसुधायाःस
र्वत्तमावन्निदर्शनभूतायाःवसुधां·निदर्शनभूमिं॥एवंसर्वसौभाग्ययुक्तानांनिदर्शभूतस्त्रियोपिनि

इंद्रियाणिपुराजित्वाजितंत्रिभुवनंत्वया॥स्मरद्भिरिवतद्वैरंइंद्रियैरेवनिर्जितः॥१६॥यदेवहि
जनस्थानेराक्षसैर्बहुभिर्वृतः॥खरस्तुनिहतोभ्रातातानदारामोनमानुषः॥१७॥यदैवनगरींलं
कांदुष्प्रवेशांसुरैरपि॥प्रविष्टोहनुमान्वीर्यात्तदैवव्यथितावयं॥१८॥क्रियतामविरोधश्चरा
घवेणेतियन्मया॥उच्यमानंनगृह्णासितस्येयंव्युष्टिरागता॥१९॥अकस्माच्चाभिकामोसिसी
तांराक्षसपुंगव॥ऐश्वर्यस्यविनाशायदेहस्वस्यजनस्यच॥२०॥अरुंधत्याविशिष्टांतांरोहि
ण्याश्चापिदुर्मते॥सीतांधर्षयतामान्यांत्वयात्यसदृशंकृतं॥२१॥वसुधायाहिवसुधांश्रियाः
श्रीभर्तृवत्सलां॥२२॥सीतांसर्वानवद्यांगीमरण्येविजनेशुभां॥आनयित्वातुतांदीनांछद्म
नात्मस्वदूषणं॥२३॥अप्राप्यतंचैवकामंमैथिलीसंगमेकृतं॥पतिव्रतायास्तपसानूनंदग्धो
सिमेप्रभो॥२४॥

दर्शनभूतां॥२२॥छद्मना-आनयित्वा-आनीय-आत्मस्वदूषणंस्वशब्दःस्वीयवाची॥
आत्मनःस्वकुलस्यनाशनंकृतमितिशेषः॥२३॥मैथिलीसंगमेकृतंतंकाममप्राप्यपतिव्रतायास्तस्या
स्तपसानूनंनिश्चयेनदग्धोसिमेप्रभोममभर्त्तः

दृप्तारिमथनत्वादिधर्मा मम नाथास्त्रातारः संतीति मम ध्रुवा दृढा मतिरासीत्॥४१॥४२॥४३॥४४॥४५ श्वाविधः शल्यकस्य शलल्लैः कंटकैरिव लग्नैर्बाणैर्निरंतरं व्याप्तमिति शेषः तथा मर्मसु स्वर्पितैर्बा

दृप्तारिमथनाः क्रुराः प्रख्यातबलपौरुषाः॥ अकुतश्चिद्भयानाथा ममेत्यासीन्मतिर्ध्रुवा॥४१
तेषामेवंप्रभावानां युष्माकं राक्षसर्षभाः॥ कथं भयमसंबुद्धं मानुषादिदमागतं॥४२॥ स्निग्धेंद्र
नीलनीलं तु प्रांशुशैलोपमं महत्॥ केयूरांगदवैडूर्यमुक्ताहारस्रगुज्ज्वलं॥४३॥ कांतं वि
हारेष्वधिकं दीप्तं संग्रामभूमिषु॥ भात्याभरणभाभिर्यद्विद्युद्भिरिव तोयदः॥४४॥ तदेवा
द्य शरीरं ते तीक्ष्णैर्नैकशरैश्चितं॥ पुनर्दुर्लभसंस्पर्शं परिष्वक्तुं न शक्यते॥४५॥ श्वाविधः श
लल्लैर्यद्वल्लग्नैर्बाणैर्निरंतरं॥ स्वर्पितैर्मर्मसु भृशं संछिन्नस्नायुबंधनं॥४६॥ क्षितौ निप
तितं राजन् श्यामं वै रुधिरछवि॥ वज्रप्रहारमभिनो विकीर्ण इव पर्वतः॥४७॥ हा स्वप्नः स
त्यमेवेदं त्वं रामेण कथं हतः॥ त्वं मृत्योरपि मृत्युः स्याः कथं मृत्युवशं गतः॥४८॥ त्रैलोक्यव
सुभोक्तारं त्रैलोक्योद्वेगदं महत्॥ जेतारं लोकपालानां क्षेप्तारं शंकरस्य च॥४९॥ दृप्तानां नि
गृहीतारमाविष्कृतपराक्रमं॥ लोकक्षोभयितारं च साधुभूतविदारणं॥५०॥

णैः संछिन्न
स्नायुबंधनं॥४६ रुधिरछवि तत्संबंधेन रक्तकांति· वज्रप्रहारमभिनो विकीर्णः पर्वत इव ते शरी
रं विकीर्णं॥४७ हे खेदे· स्वप्न इव इदं कथं सत्यमेव जातं॥४८॥ वसुरत्नं· महत् अत्यर्थं॥४९॥ साधुभू
तानां साधुजनानां विदारणं॥५०॥

पुराभगवदुद्देशेनतपोनुष्ठानकालेतद्वैरंस्वजयनिमित्तंवैरंस्मरद्भिरिंद्रियैरकर्मप्रवृत्तिसंपादनेननिर्जितः
१६॥१७॥१८॥व्युष्टिःफलं॥१९॥सीतांप्रतिअभिकामःकामुकः॥२०॥मान्या उपास्यदेवनां॥२१॥वसुधायाःस
र्वत्तमावन्निदर्शनभूतायाःवसुधां निदर्शनभूमिं एवंसर्वसौभाग्ययुक्तानांनिदर्शभूतस्त्रियोपिनि

इंद्रियाणिपुराजित्वाजितंत्रिभुवनंत्वया॥स्मरद्भिरिवतद्वैरंइंद्रियैरेवनिर्जितः॥१६॥यदैवहि
जनस्थानेराक्षसैर्बहुभिर्वृतः॥खरस्तनिहतोभ्रातातदारामोनमानुषः॥१७॥यदैवनगरींलं
कांदुष्प्रवेशांसुरैरपि॥प्रविष्टोहनुमान्वीर्यात्तदैवव्यथितावयं॥१८॥क्रियतामविरोधश्चरा
घवेणेतियन्मया॥उच्यमानंनगृह्णासितस्येयंव्युष्टिरागता॥१९॥अकस्माच्चाभिकामोसिसी
तांराक्षसपुंगव॥ऐश्वर्यस्यविनाशायदेहस्यस्वजनस्यच॥२०॥अरुंधत्याविशिष्टांतांरोहि
ण्याश्चापिदुर्मते॥सीतांधर्षयतामान्यांत्वयात्यसदृशंकृतं॥२१॥वसुधायाहिवसुधांश्रियाः
श्रींभर्तृवत्सलां॥२२॥सीतांसर्वानवद्यांगीमरण्येविजनेशुभां॥आनयित्वातुतांदीनांछद्म
नात्मस्वदूषणां॥२३॥अप्राप्यतंचैवकामंमैथिलीसंगमेकृतं॥पतिव्रतायास्तपसानूनंदग्धो
सिमेप्रभो॥२४॥

दर्शनभूतां॥२२॥छद्मनाआनयित्वाआनीयआत्मस्वदूषणांस्वशब्दःस्वीयवाची।
आत्मनःस्वकुलस्यनाशनंकृतमितिविशेषः॥२३॥मैथिलीसंगमेकृतंतंकाममप्राप्यपतिव्रतायास्तस्या
स्तपसानूनंनिश्चयेनदग्धोसिमेप्रभोममभर्त्तः

दृप्तारिमथनत्वादिधर्मा मम नाथास्त्रातारः संतीति मम धृष्टत्वाद्दृढा मतिरासीत् ॥४१॥४२॥४३॥४४॥४५
श्वाविधः शल्यकस्तस्य शलाकैः कंटकैरिव लग्नैर्बाणैर्निरंतरं कृतमिति शेषः तथा मर्मसु स्वर्पितैर्बा

दृप्तारिमथनाः क्रूराः प्रख्यातबलपौरुषाः ॥ अकुतश्चिद्भया नाथा ममेत्यासीन्मतिर्ध्रुवा ॥४१
तेषामेवंप्रभावानां युष्माकं राक्षसर्षभाः ॥ कथं भयमसंबुद्धं मानुषादिदमागतं ॥४२॥ स्निग्धेंद्र
नीलनीलं तु प्रांशुशैलोपमं महत् ॥ केयूरांगदवैडूर्यमुक्ताहारस्रगुज्वलं ॥४३॥ कांतं वि
हारेष्वधिकं दीप्तं संग्रामभूमिषु ॥ भात्याभरणभाभिर्यद्विद्युद्भिरिव तोयदः ॥४४॥ तदेवा
द्य शरीरं ते तीक्ष्णैर्नैकशरैश्चितं ॥ पुनर्दुर्लभसंस्पर्शं परिष्वक्तुं न शक्यते ॥४५॥ श्वाविधः श
लल्लैर्युक्तं लग्नैर्वाणैर्निरंतरं ॥ स्वर्पितैर्मर्मसु भृशं संछिन्नस्नायुबंधनं ॥४६॥ क्षितौ निप
तितं राजन् श्यामं वै रुधिरच्छवि ॥ वज्रप्रहारमभितो विकीर्ण इव पर्वतः ॥४७॥ हा स्वप्नः स
त्यमेवेदं त्वं रामेण कथं हतः ॥ त्वं मृत्योरपि मृत्युः स्याः कथं मृत्युवशं गतः ॥४८॥ त्रैलोक्यव
सुभोक्तारं त्रैलोक्योद्वेगदं महत् ॥ जेतारं लोकपालानां क्षेप्तारं शंकरस्य च ॥४९॥ दृप्तानां नि
गृहीतारमाविष्कृतपराक्रमं ॥ लोकक्षोभयितारं च साधुभूतविदारणं ॥५०॥

तानां साधुतनानां विदारणं ॥५०॥

णैः संछिन्न
स्नायुबंधनं ॥४६॥ रुधिरच्छवि तत्संबंधेन रक्तकांति- वज्रप्रहारमभितो विकीर्णः पर्वत इव ते शरी
रं विकीर्णं ॥४७॥ हे खेदे- स्वप्न इवेदं कथं सत्यमेव जातं ॥५५॥ वसुरत्नं- महत्- अत्यर्थं ॥४९॥ साधुभ

सैवाहंसौभाग्यलक्षणावत्येवंतववधादन्येवविधवैवसंवर्ततेत्यर्थः अत्रान्यैवेतीवकारेणादेवरस्थित्याव
स्कृत अवैधव्यंसूचितं॥३४॥सुभ्रुशोभनभ्रूयुतं सुत्वक्शोभनत्वगिंद्रियस्थानं कांतिः आल्हादकरीप्र
भातयाचंद्रतुल्यं श्रीरुज्वलताः तयापद्मवत् द्युतिःपराभिभवसमर्थंतेजस्तेनरवितुल्यं॥३५॥कूटःस

भ्रंशिताकामभोगेभ्यः सास्मिवीरवधात्तव॥सैवान्यैवास्मिसंवृत्ताधिग्राज्ञांचंचलांश्रियं॥३४॥रा
राजन्सुकुमारंतेसुभ्रुसुत्वक्सुनसं॥कांतिश्रीद्युतिभिस्तुल्यमिंदुपद्मदिवाकरैः॥३५॥किरीट
कूटोज्वलितंताम्रास्यंदीप्तकुंडलं॥मदव्याकुललोलाक्षंभूत्वायत्पानभूमिषु॥३६॥विविधस्र
ग्धरंचारुवल्गुस्मितकथंशुभं॥तदेवाद्यतवैवंहिवक्त्रंनभ्राजतेप्रभो॥३७॥रामसायकनि
र्भिन्नंरक्तंरुधिरविस्रवैः॥विशीर्णमेदोमस्तिष्कंरूक्षंस्यंदनरेणुभिः॥३८॥हापश्चिमामेसंप्राप्ता
दशावैधव्यदायिनी॥यामयासीन्नसंबुद्धाकदाचिदपिमंदया॥३९॥पितादानवराजोमेभर्तामे
राक्षसेश्वरः॥पुत्रोमेशक्रनिर्जेताइत्यहंगर्विताभृशं॥४०॥

मूहः ताम्रास्यंताम्रोष्ठं पानभूमिषुमदव्या
कुललोलाक्षंभूत्वायद्भ्राजतेतिशेषः॥३६॥चारुसुंदरंवल्गात् चंचलं स्मितकथंस्मितोपेतकथायुतं
तदेवतेवक्त्रंएवमेवमवस्थामापन्नंनभ्राजते॥३७॥नामवस्थामाह रामेति रक्तवर्णंविशीर्णमेदोस्थिम
गतमांसंमस्तिष्कंमज्जाचयस्यतत्॥३८॥सावैधव्यदापश्चिमादशामेमयासंप्राप्ता यामयासंबुद्धान
सीत्॥३९॥दानवराजोमयः अहंगर्विताविशिष्टपतिपुत्रपितृत्वात्॥४०॥ ॥

दीं॥ अनवगुंठितां अपगावगुंठनां॥६२॥ असंलज्जारहितकमवगुंठनं येषां तान्॥६३॥६४॥ नैकाः कुलस्त्रियः कृष्यादीनामिति शेषः॥६५॥ यच्छत्तस्तत्फलं त्वं परवशं शत्रुवशं गतः त्वया विप्रकृताभिः कृतापकाराभिस्त-

कस्मात्त्वं मां विहायेह कृपणां गंतुमिच्छसि॥ दीनां विलपतीं मंदां किं च मां नाभिभाषसे॥६१॥ दृष्ट्वा न खल्वभिक्रुद्धो मामिहानवगुंठितां॥ निर्गतां नगरद्वारात्पद्भ्यामेवागतां प्रभो॥६२॥ पश्येष्वदारदारांस्ते भ्रष्टलज्जावगुंठनात्॥ वहिर्निष्पतितान्सर्वान्कथं दृष्ट्वा न कुप्यसि॥६३॥ अयं क्रीडासहायस्तेऽनाथो लालप्यते जनः॥ न चैनमाश्वासयसि किं वा न बहु मन्पसे॥६४॥ यास्त्वया विधवा राजन्कृता नैकाः कुलस्त्रियः॥ पतिव्रता धर्मरता गुरुशुश्रूषणे रताः॥६५॥ ताभिः शोकाभितप्ताभिः शप्तः परवशं गतः॥ त्वया विप्रकृताभिश्च तदा शप्तं तदागतं॥६६॥ प्रवादः सत्यएवायं त्वां प्रति प्रायशो नृप॥ पतिव्रतानां नाकस्मात्पतंत्यश्रूणि भूतले॥६७॥ कथं च नाम ते राजन्लोकानाक्रम्प तेजसा॥ नारीचौर्यमिदं क्षुद्रं कृतं शौंडीर्यमानिना॥६८॥ अपनीयाश्रमाद्रामं यन्मगच्छद्मना त्वया॥ आनीता रामपत्नी साऽपनीय च लक्ष्मणं॥६९॥

दाऽपकारसमये यच्छप्तं तत्फलमागतं॥६६॥ विप्रकृतानां पतिव्रतानामश्रूण्यकस्मात्· किंचिदनर्थकारणं विना भूतले न पतंतीति योऽयं प्रवादः प्रायशो जने चरति प्रवर्त्तते स सत्यं त्वां प्रति जातः स्वानर्थकर एव जात इत्यर्थः॥६७॥ शौंडीर्यमानिना· वीरमानिना॥६८॥६९॥

ओजसा वलेन दृप्तवाक्यानां गर्वितश्च सां ॥५१॥ आहवे निगृहीतारं जेतारमिति यावत् ॥५२॥५३॥५४॥५५॥

ओजसा दृप्तवाक्यानां वक्तारं रिपुसन्निधौ ॥ स्वयं रथभृत्यगोप्तारं हंतारं भीमकर्मणां ॥५१॥ हं
तारं दानवेंद्राणां यक्षाणां च सहस्रशः ॥ निवातकवचानां तु निग्रहीतारमाहवे ॥५२॥ नैकय
ज्ञविलोप्तारं त्रातारं स्वजनस्य च धर्मव्यवस्थाभेत्तारं मायास्त्रशूरमाहवे ॥५३॥ देवासुर
नकन्यानामाहर्त्तारं ततस्ततः ॥ शत्रुस्त्रीशोकदातारं नेतारं स्ववलस्य च ॥५४॥ लंकाद्वीप
स्य गोप्तारं कर्त्तारं भीमकर्मणां ॥ अस्माकं कामभोगानां दातारं रथिनां वरं ॥५५॥ एवं प्रभा वं भ
र्त्तारं दृष्ट्वा रामेण पातितं ॥ स्थिरास्मि यादेहमिमं धा [illegible] रयामि हतप्रिया ॥५६॥ श
यानेषु महार्हेषु शयित्वा राक्षसेश्वर ॥ इह कस्मात्प्रसुप्तोसि धरण्यां रेणुगुंठितः ॥५७॥ य
दा मे तनयः शस्तो लक्ष्मणेनेंद्रजिद्युधि ॥ तदा त्वभिहतास्तीव्रं मद्य त्वस्मि निपातिता ॥५८॥
ही साहं वंधुजनैर्हीना नाथेन च त्वया ॥ वि हीना ना कामभोगैश्च शोचिष्ये शाश्वतीः ॥५९॥ प्र समाः
पन्नो दीर्घमध्वानं राजन्नद्य सुदुर्गमं ॥ नय मामपि दुःखार्त्तां न वर्त्तिष्ये त्वया विना ॥६०॥

एवं प्रभावं त्वां हतं दृष्ट्वा हतप्रियाद्यमं देहं धारयामि · अतः स्थिरा कठिनहृदयास्मीति जाने
५६ ॥५७॥ तदा त्वभिहता अभिघातमात्रं प्राप्ता अद्य तु निपातितास्मि ॥५८॥५९॥६०॥

मारीचकुंभकर्णाभ्याममभिहितमितिशेषः ॥७५॥ विनिक्षिप्यभूतलेइतिशेषः ॥७९॥ यातुधानस्यसुमालेः ॥८॥

मारीचकुंभकर्णाभ्यांवाक्यंममपितुस्तथा ॥ नकृतंवीर्यमत्तेनतस्येदंफलमीदृशं ॥७५॥ नीलजीमूतसंकाशपीतांबरशुभांगद ॥ स्वगात्राणिविनिक्षिप्यकिंशेषेरुधिरावृतः ॥७९॥ प्रसुप्तइवशोकार्त्तांकिंमांनप्रतिभाषसे ॥७९॥ महावीर्यस्यदक्षस्यसंयुगेष्वपलायिनः ॥ यातुधानस्यदौहित्रीकिंमांनप्रतिभाषसे ॥८०॥ उत्तिष्ठोत्तिष्ठकिंशेषेनवेपरिभवेकृते ॥ अद्यवैनिर्भयालंकांप्रविष्टाःसूर्यरश्मयः ॥८१॥ येनसूदयसेशत्रून्समरेसूर्यवर्चसा ॥ वज्रंवज्रधरस्येवसोयंतेसततार्चितः ॥८२॥ रणेबहुप्रहरणोहेमजालपरिष्कृतः ॥ परिघोव्यवकीर्णस्तेबाणैश्छिन्नःसहस्रधा ॥८३॥ प्रियामिवोपसंगृह्यकिंशेषेरणमेदिनी ॥ अप्रियामिवकस्माच्चमांनेच्छस्यभिभाषितुं ॥८४॥ धिगस्तुहृदयंयस्याममेदंनसहस्रधा ॥ त्वयिपंचत्वमापन्नेफलतेशोकपीडितं ॥८५॥ इत्येवंविलपंतीसावाष्पपर्याकुलेक्षणा ॥ स्नेहोपस्कन्नहृदयातदामोहमुपागमत् ॥८६॥ कश्मलाभिहतासन्नाबभौसारावणोरसि ॥ संध्यानुरक्तेजलदेदीप्ताविद्युदिवोज्ज्वला ॥८७॥

३४७

॥८१॥ तेत्वया॰ सततमर्चितःपूजितः ॥८२॥ बहुप्रहरणोबहुहंता ॥८३॥८४॥ फलतेस्फुटति ॥८५॥८६॥ कश्मलोमूर्छासन्नापीडिता ॥८७॥

अ

कातर्यं कातरत्वं पक्वलक्षणं पक्वस्य आसन्नविनाशस्य लक्षणमित्यर्थः ॥७०॥७१॥ मे देवरो विभीषणो राक्षसानां विनाश आगत इति यदब्रवीत्तदागतमिति शेषः ॥७२॥ व्यसनेन स्त्रीप्रसक्तलक्षणे

कातर्यं च न ते युद्धे कदाचित्संस्मराम्यहं ॥ तत्तु भाग्यविपर्यासान्नूनं ते पक्वलक्षणं ॥७०॥ अतीतानागतार्थज्ञो वर्त्तमानविचक्षणः ॥ मैथिलीमाहृतां दृष्ट्वा ध्यात्वा निश्वस्य चायतं ॥७१॥ सत्यवाक्स महाबाहो देवरो मे यदब्रवीत् ॥ अयं राक्षसमुख्यानां विनाशः प्रत्युपस्थितः ॥७२॥ कामक्रोधसमुत्थेन व्यसनेन प्रसंगिना ॥ निवृत्तस्त्वत्कृते नाथः सोयं मूलहरो महान् ॥७३॥ त्वया कृतमिदं सर्वमनाथं राक्षसंकुलं ॥ न हि त्वं शोचितव्यो मे प्रख्यातबलपौरुषः ॥७४॥ स्त्रीस्वभावात्तु मे बुद्धिः कारुण्ये परिवर्त्तते ॥ सुकृतं दुःकृतं च त्वं गृहीत्वा स्वां गतिं गतः ॥७५॥ आत्मानमनुशोचामि त्वद्विनाशेन दुःखितां । सुहृदां हितकामानां न श्रुतं वचनं त्वया ॥७६॥ भ्रातॄणां चैव कार्त्स्न्येन हितमुक्तं दशानन । हेत्वर्थयुक्तं विधिवच्छ्रेयस्करमदारुणं ॥ विभीषणेनाभिहितं न कृतं हेतुमत्त्वया ॥७७॥

न प्रसंगिना प्रसक्तिमता त्वत्कृते नाथोशेषैश्वर्यलक्षणो निवृत्तः यतः सोयं परस्त्रीप्रसक्तिरूपो मूलहरो नर्थः इति शेषः ॥७३॥७४॥७५॥ दुःखितां संप्राप्तदुःखां सुहृदां मारीचादीनां ॥७६॥ अदारुणां सौम्यं हेत्वर्थयुक्तं हेतुप्रयोजनाभ्यां सहितं हेतुमत्त्वत्कृतफलवत्त्वानुतिष्ठत मित्यर्थः ॥७७॥

तवापीतिसुग्रीवस्येवतवापिप्रियंराज्याभिषेकलक्षणंमयाकार्यंकर्त्तव्यंहियतस्त्वत्प्रभावान्मयाजितंत
स्मादवश्यंत्वमंअभिषेकसंपादनयोग्यंयत्कृत्यंप्रेतनिर्हारलक्षणंतन्मयात्वंवाच्यः॥९७॥यद्यप्ययंत्वदु
क्तदोषवान्तथापिगुणबाहुल्यात्संस्कार्यएवेत्याह॥अधर्मेत्यादि॥९८॥९९॥त्वच्छत्रुत्वादसंस्कार्यइति
चेत्तत्राह॥मरणान्तानीति॥नःसात्विकानामस्माकंप्रयोजनंवैरनिर्यातनरूपंनिवत्तंसंपन्नमतःपरं

तवापिमेप्रियंकार्यंत्वत्प्रभावान्मयाजितं॥अवश्यंतुक्षमंवाच्योमयात्वंराक्षसेश्वर॥९७॥अ
धर्मानृतसंयुक्तःकामंत्वेषनिशाचरः॥तेजस्वीवलवांछूरःसंग्रामेषुचनित्यशः॥९८॥शतक्रतु
मुखैर्देवैःश्रूयतेनपराजितः॥महात्मावलसंपन्नोरावणोलोकरावणः॥९९॥मरणान्तानिवैरा
णिनिवत्तंनःप्रयोजनं॥क्रियतामस्यसंस्कारोममाप्येषयथातव॥१००॥

नवैरप्रयोजनमस्तिय
देवमतोस्यसंस्कारःक्रियतामिति॥एषयथातवभ्रातासंस्कारादिनात्वयानुग्राह्यःतथाममाप्यनुग्रा
ह्यएव॥चतुर्विधमुक्तिष्वेकापिनास्य॥तदुक्तंविष्णुपुराणे॥हिरण्यकशिपोर्विष्णुरयमित्येवंनमनस्य
भूत्दशाननत्वेपिअनंगपराधीनतयाजानकीसमासक्तचेतसोदाशरथिरूपदर्शनमेवासीन्ना
यमच्युतइत्यासक्तिर्विपद्यतोंतःकरणस्यमानुषबुद्धिरेवकेवलमभूदितिअतएवरावणकुंभकर्ण
योःशिशुपालदंतवक्ररूपेणजन्मश्रूयते॥नहिभगवत्सालोक्यंप्राप्तयोरपिजन्मभवतिकिंतुब्रह्मणा
सहमुक्तिरेवेतिसिद्धांतः॥१००॥

८८॥दिशाविभागस्यपुण्यपरिपाकदशाविशेषस्यपर्यायेविनाशेराज्ञांचंचलाःश्रियस्तेनविदिताःकिंएवंलो
कानांस्थितिरध्रुवाचंचलेत्यपितेकिंनविदितं॥८९॥९०॥९१॥प्रश्रितंराममनोनुकूलंयथातथारामंप्र

तथागतांसमुत्थाप्यसपत्न्यस्तांभृशातुराः॥पर्यवस्थापयामासरुदंत्योरुदतींभृशं॥८८॥किंतेन
विदितादेविलोकानांस्थितिरध्रुवा॥दिशाविभागपर्यायेराज्ञांवैचंचलाःश्रियः॥८९॥इत्ये
वमुच्यमानासासशब्दंप्ररुरोदह॥स्नपयंतीतदास्रेणस्तनौवक्त्रंसुनिर्मलं॥९०॥एतस्मिन्नंत
रेरामोविभीषणमुवाचह॥संस्कारःक्रियतांभ्रातुःस्त्रीगणःपरिसांत्व्यतां॥९१॥तमुवाचततो
धीमान्विभीषणइदंवचः॥विमृश्यबुद्ध्याप्रश्रितंधर्मार्थसहितंहितं॥९२॥त्यक्तधर्मव्रतं
क्रूरंनृशंसमनृतंतथा॥नाहमर्हामिसंस्कर्तुंपरदाराभिमर्शनं॥९३॥भ्रातृरूपोहिमेशत्रुरे
षसर्वाहितेरतः॥रावणोनार्हतेपूजांपूज्योपिगुरुगौरवात्॥९४॥नृशंसइतिमांरामवक्ष्यं
तिमनुजाभुवि॥श्रुत्वातस्यगुणान्सर्वेवक्ष्यंतिसुकृतंपुनः॥९५॥तच्छ्रुत्वापरमप्रीतोरामोधर्म
भृतांवरः॥विभीषणमुवाचेदंवाक्यज्ञोवाक्यकोविदः॥९६॥

समुवाच॥९२॥त्यक्तोधर्मोव्रतंचयेनतंक्रू
नृतमनृतवादिनं॥९३॥गुरुगौरवात्पूज्योपिउक्तदोषान्मत्तःपूजांनार्हतिनार्हति॥९४॥हेरामसर्वेमनुजाः
पूर्वंभ्रातुरसंस्कारश्रवणान्मांनृशंसइतिवक्ष्यंतिपश्चात्तस्यागुणान्श्रुत्वापुनःसुकृतंसम्यक्कृत
मित्यपिवक्ष्यंति॥९५॥९६॥

शरणाभिगताः आधारस्थानकुंडस्थाः ॥९॥ प्लवमाना निश्चलनाभ्यासाभावात्त्वरया च प्लवमानानीव ॥१०॥
पद्मको गंधवृक्षः ब्राह्म्या वेदमार्गानुगतक्रियया रंकुः कृष्णसारमृगस्तत्संबंधि रांकवं तेनास्तरणेना
वृत्तां चितां संवर्त्तयामासुः चक्रुः ॥११॥ पितृमेधं पितृमेधविहितं कर्म प्रचक्रुः तत्प्रकारः वेदिं चेत्या
दिः दक्षिणप्राचीं चितायाः दक्षिणप्राक्देशे इत्यर्थः यथास्थानं पावकं च प्रचक्रुः दक्षिणपूर्ववेदे

शरणाभिगताः सर्वे पुरस्तात्तस्य ते ययुः ॥ अंतःपुराणि सर्वाणि रुदमानानि सत्वरं ॥९॥
पृष्ठतोऽनुययुस्तानि प्लवमानानि सर्वतः ॥ रावणं प्रयते देशे स्थाप्य ते भृशदुःखिताः ॥१०॥
चितां चंदनकाष्ठैश्च पद्मकोशीरचंदनैः ॥ ब्राह्म्यां संवर्त्तयामासू राङ्कवास्तरणावृतां ॥११॥ प्र
चक्रू राक्षसेंद्रस्य पितृमेधमनुत्तमं ॥ वेदिं च दक्षिणप्राचीं यथास्थानं च पावकं ॥१२॥ पृषदा
ज्येन संपूर्णं स्रुवं स्कंधे प्रचिक्षिपुः ॥ पादयोः शकटं प्रापुरूर्वोरुलूखलं तदा ॥१३॥

शे आहवनीयं निदधाति उत्तरपश्चिमे गार्हपत्यं दक्षिणपश्चिमे दक्षिणाग्निमिति सूत्रोक्तस्थान
मनतिक्रम्येत्यर्थः पृषदाज्येन सदध्याज्येन संपूर्णो नोपलक्षितं स्रुवं स्कंधदेशे प्रचिक्षिपुः यद्यपि
नासिके स्रुवावित्यापस्तंबेनोक्तं तथापि सूत्रांतरात्स्कंधेपि निक्षेपः स्रुवस्य बोध्यः तथा पादयोः
शकटं ऊर्वोरुलूखलमिति च सूत्रांतरादेव बोध्यं ॥१३॥

यशोभागिति रामवाक्येनत्यक्तवैरोभ्रातरंसंस्कृतवानितिख्यातिरेवभविष्यतीत्यर्थः ॥१॥२॥निर्यापयतिस्मेतिशेषः ॥३॥४॥५॥ द्विजाः राक्षसद्विजाः सूक्तवद्भिः वंदीजनैः अभिनंदितं अभिनंदितमिव रावणं शि

त्वत्सकाशान्महावाहो संस्कारंविधिपूर्वकं ॥ क्षिप्रमर्हति धर्मेण त्वंयशोभाग्भविष्यसि ॥१॥ राघवस्यवचःश्रुत्वा त्वरमाणो विभीषणः ॥ संस्कारयितुमारेभे भ्रातरंरावणंहतं ॥२॥ सप्रविश्यपुरींलंकांराक्षसेंद्रो विभीषणः ॥ रावणस्याग्निहोत्रंतु निर्यापयतिसत्वरं ॥ शकटान्दारुपात्राणि अग्नीर्वैयाजकांस्तथा ॥ तथाचंदनकाष्ठानि काष्ठानि विविधानिच ॥३॥ अगरूणि सुगंधीनि गंधांश्चसुरभींस्तथा ॥ मणिमुक्ताप्रवालानि निर्यापयतिराक्षसः ॥४॥ आजगाममुहूर्त्तेन राक्षसैःपरिवारितः ॥ ततोमाल्यवतासार्द्धं क्रियामेवचकारसः ॥ सौवर्णींशिविकांदिव्यामारोप्यक्षौमवाससं ॥५॥ रावणंराक्षसाधीशमश्रुपूर्णमुखाद्विजाः ॥ तूर्यघोषैश्चविविधैःसूक्तवद्भिश्चाभिनंदितं ॥६॥ पताकाभिश्चचित्राभिः सुमनोभिश्चचित्रितां ॥ उत्क्षिप्यशिविकांतांतु विभीषणपुरोगमाः ॥७॥ दक्षिणाभिमुखाःसर्वे गृह्यकाष्ठानिभेजिरे ॥ अग्नयोदीप्यमानास्ते तदाध्वर्युसमीरिताः ॥८॥

विकामारोप्यद्विजाययुरितिशेषः ॥६॥ पताकादिभिश्चित्रितांशिविकांवाहकेरुत्थाप्यविभीषणादयः ॥७॥ काष्ठानिगृहीत्वादक्षिणामुखाःश्मशानमार्गंभेजिरे ॥८॥

विधिपूर्वकंप्रदायस्थितइतिशेषः ननुनिहतंरावणंदृष्ट्वारामेणाक्लिष्टकर्मणा॰ तत्प्रमुक्तंमहाभा
गंपंचभूतानिरावणं॰शरीरधातवोह्यस्यमांसंरुधिरमेवच नेशुर्ब्रह्मास्त्रनिर्दग्धानचभस्माप्य
दृश्यतेतिमहाभारतेउक्तत्वेनकस्यवाल्मीकिनाश्मशानानयनपूर्वकंदाहउक्तइतिचेन्नतस्य

उदकेनचसंमिश्रान्प्रदायविधिपूर्वकं॥ तांस्त्रियोनुनयामाससांत्वयित्वापुनःपुनः॥१८॥
गम्यतामितिताःसर्वाविविशुर्नगरंततः॥प्रविष्टासुपुरींस्त्रीषुराक्षसेंद्रोविभीषणः॥राम
पार्श्वमुपागम्यसमतिष्ठद्विनीतवत्॥१९॥रामोपिसहसैन्येनससुग्रीवःसलक्ष्मणः॥हर्षं
लेभेरिपुंहत्वावृत्रंवज्रधरोयथा॥२०॥ततोविमुक्त्वासशरंशरासनंमहेंद्रदत्तंकवचंस
तन्महत्॥विमुच्यरोषंरिपुनिग्रहात्ततोरामःससौम्यत्वमुपागतोरिहा॥२१॥इत्यार्षेश्रीरा
मायणेयुद्धकांडेत्रयोदशाधिकशततमःसर्गः॥११३॥तेरावणवधंदृष्ट्वादेवगंधर्वदानवाः॥
जग्मुःस्वैस्वैर्विमानैस्तेकथयंतःशुभाःकथाः॥१॥

रामबाणतेजोवर्णनविषयेऽत्युक्त्यलंकारपरत्वात् इतिवदंति॥१८॥गम्यतामितिनिजवाचेत्यर्थः॥
रावणपत्नीरितिशेषः॥१९॥२०॥२०॥अयंसंस्कारोनवम्यामेवसायं॥कतकस्तु॥१०४॥इतिश्री
रामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेत्रयोदशाधिकशततमःसर्गः॥११३॥तेरावणेति

दारुपात्रादिसर्वंसूत्रोक्तंतत्तत्स्थानेदत्वाऽन्यंमुसलंचातुर्मास्यमुसलंचयथास्थानंदत्वाचविच
क्रमुःपितृमेधंचक्रुः॥१४॥शास्त्रदृष्टेनश्रुतिदृष्टेनमहर्षिविहितेनकल्पसूत्रकृदृषिविहितेन
परिस्तीर्यतेमुखमयेतिपरिस्तरणिकावपातां॰राक्षसेंद्रस्यमुखेसमवेशयन्॰वपास्यमुखंप्रोर्णो॰

दारुपात्राणिसर्वाणिअरणींचोत्तरारणीं।दत्वानुमुसलंचान्यंयथास्थानंविचक्रमुः॥१४॥
शास्त्रदृष्टेनविधिनामहर्षिविहितेनच।तत्रमेध्यंपशुंहत्वाराक्षसेंद्रस्यराक्षसाः॥परिस्त
रणिकांराज्ञोघृताक्तांसमवेशयन्॥१५॥गंधैर्माल्यैरलंकृत्यरावणंदीनमानसाः॥विभी
षणसहायास्तेवस्त्रैश्चविविधैरपि॥लाजैरवकिरंतिस्मबाष्पपूर्णमुखास्तथा॥१६॥।
सददौपावकंतस्यविधियुक्तंविभीषणः॥स्नात्वाचैवार्द्रवस्त्रेणतिलान्दर्भविमिश्रितान्॥१७॥

नीतिसूत्रात्॰तीर्थस्थअनुस्तरणिकींराज्ञइतिपठित्वानुस्तरणिकींराजगवींनामालभ्यतच्चर्म
णायजमानमास्तनवंतइत्यर्थः॰मृतायानुस्तरणींघ्नंतीतिश्रुतेरित्याह॥१५॥वस्त्रैश्चेतिचालंकृत्ये
त्यनुकर्षः॥१६॥१७॥

लंकायामभिषेचयरावणसिंहासनेसाक्षादितिशेषः॥९॥१०॥११॥नंघटंहस्तेइतिजातावेकवचनं
मनोजवान्वानरान्व्यादिदेश·समुद्रसलिलंतदानयनं॥१२॥समुद्रात्चतुःसमुद्रेभ्यइत्यर्थः॥१२

विभीषणमिमंसौम्यलंकायामभिषेचय॥अनुरक्तंचभक्तंचतथापूर्वोपकारिणं॥९॥एषमेपर
मःकामोयदिमंरावणानुजं॥लंकायांसौम्यपश्येयमभिषिक्तंविभीषणं॥१०॥एवमुक्तस्तु।
सौमित्रीराघवेणमहात्मना॥तथेत्युक्त्वासुसंहृष्टःसौवर्णंघटमाददे॥११॥तंघटंवा
नरेंद्राणांहस्तेदत्वामनोजवान्॥व्यादिदेशमहासत्वोसमुद्रसलिलंतदा॥१२॥अतिशी
घ्रंततोगत्वावानरास्तेमनोजवाः॥आगतास्तुजलंगृह्यसमुद्राद्वानरोत्तमाः॥१३॥ततस्त्वे
कंघटंगृह्यसंस्थाप्यपरमासने॥घटेनतेनसौमित्रिरभ्यषिंचद्विभीषणं॥१४॥लंकायांर
क्षसांमध्येराजानंरामशासनात्॥विधिनामंत्रदृष्टेनसुहृद्गणसमावृतं॥१५॥अभ्यषिंचं
स्तदासर्वेराक्षसावानरास्तथा॥प्रहर्षमतुलंगत्वातुष्टुवूराममेवहि॥१६॥तस्यामात्याज
हृषिरेभक्तायेचास्यराक्षसाः॥१६॥दृष्ट्वाभिषिक्तंलंकायांराक्षसेंद्रंविभीषणं॥राघवःपरमांप्रीतिं
जगामसहलक्ष्मणः॥१७॥

परमासनेविभीषणंसंस्थाप्यतमभ्यषिंचत्॥१४॥मंत्रदृष्टेनवेददृ
ष्टेन॥१५॥भक्ताःयेचास्यविभीषणस्यामात्यातिरिक्ताभक्तास्तेपीत्यर्थः॥१६॥१७॥ ॥

सुग्रीवस्यमंत्रितं सेनासंमेलनं सीतान्वेषणादिसर्वकार्यसाधकंमंत्रसामर्थ्यं ॥२॥ मारुतिलक्ष्मणयो रामेनुरागंवीर्यंच ॥३॥ इंद्रदत्तंइंद्रप्रेषितं अनुज्ञाप्यरथंनयेत्याज्ञांदत्वा ॥४॥५॥ यद्यपिभारतेसीतायाआगमनोत्तरंरथादवतरणंभगवत्तउक्तंतथापितत्रपौर्वापर्यक्रमेतात्पर्याभावान्नक्षतिः ॥६॥

रावणस्यवधंघोरंराघवस्यपराक्रमं ॥ सुयुद्धंवानराणांचसुग्रीवस्यचमंत्रितं ॥२॥ अनुरागंचवीर्यंचमारुतेर्लक्ष्मणस्यच ॥ पतिव्रतात्वंसीतायाहनूमतिपराक्रमं ॥३॥ कथयंतोमहाभागाजग्मुर्हृष्टायथागतं ॥३॥ राघवस्तुरथंदिव्यमिंद्रदत्तंशिखिप्रभं ॥ अनुज्ञाप्यमहाबाहुर्मातलिंप्रत्यपूजयत् ॥४॥ राघवेणाभ्यनुज्ञातोमातलिशक्रसारथिः ॥ दिव्यंतंरथमास्थायदिवमेवोत्पपातह ॥५॥ तस्मिंस्तुदिवमारूढे सरथेरथिनांवरः ॥ राघवःपरमप्रीतःसुग्रीवंपरिषस्वजे ॥६॥ परिष्वज्यचसुग्रीवंलक्ष्मणेनाभिवादितः ॥ पूज्यमानोहरिगणैराजगामबलालयं ॥७॥ अथोवाचसकाकुत्स्थःसमीपपरिवर्त्तिनं ॥ सौमित्रिंमित्रसंपन्नंलक्ष्मणंशुभलक्षणं ॥८॥

लक्ष्मणेनाभिवादितोराघवःबलालयंसेनानिवेशस्थानं ॥७॥ अथत्रिभिर्दिनैःदशरात्रैकादशाहद्वादशाहकर्त्तव्यक्रियासमाप्तौचतुर्थेहनीत्यर्थः नात्रदशाहमाशौचंमितिभ्रमितव्यंउद्यतैराहवेशस्त्रैःक्षत्रधर्महतस्यतुसद्यःसंतिष्ठतेयज्ञस्तथाशौचमितिस्थितिरि

त्रिभिर्दिनैः ॥८॥

इतिप्रतीतिः सीतांप्रतिसमादिष्टइत्यर्थः॥१॥२॥मृजयास्नानादिसंस्कारेणसातंकांग्रहपीडासहितां
३॥निभृतोनिश्चलःप्रह्वोनम्रःअभिवाद्यचस्थितइतिशेषः॥४॥५॥६॥कुशलंत्वात्वामाहेत्यर्थः॥७॥८॥

इतिप्रतिसमादिष्टोहनूमान्मारुतात्मजः॥प्रविवेशपुरींलंकांपूज्यमानोनिशाचरैः॥१॥प्रवि
श्यचपुरींलंकामनुज्ञाप्यविभीषणं॥ततस्तेनाभ्यनुज्ञातोहनूमान्वृक्षवाटिकां॥२॥सप्रविश्य
यथान्यायंसीतयाविदितोहरिः॥ददर्शमृजयाहीनांसातंकांरोहिणीमिव॥३॥वृक्षमूलेनिरानं
दांराक्षसीभिःपरीवृतां॥निभृतःप्रणतःप्रह्वःसोभिगम्याभिवाद्यच॥४॥दृष्ट्वासमागतंदेवीह
नूमंतंमहाबलं॥तूष्णीमास्ततदादृष्ट्वास्मृत्वाहृष्टाभवत्तदा॥५॥सौम्यंतस्यामुखंदृष्ट्वाहनू
मान्प्लवगोत्तमः॥रामस्यवचनंसर्वमाख्यातुमुपचक्रमे॥६॥वैदेहीकुशलीरामःसुग्रीवःस
हलक्ष्मणः॥कुशलंत्वाहसिद्धार्थोहतशत्रुरमित्रजित्॥७॥विभीषणसहायेनरामेणहरि
भिःसह॥निहतोरावणोदेविलक्ष्मणेनचवीर्यवान्॥८॥प्रियमाख्यामितेदेविभूयश्चत्वांसभा
जये॥तवप्रभावाद्धर्मज्ञेमहान्रामेणसंयुगे॥९॥लब्धोयंविजयःसीतेस्वस्थाभवगतज्वरा॥रा
वणश्चहतःशत्रुर्लंकाचैववशीकृता॥१०॥

कोसौसंदेशस्तत्राह प्रियमितिहेदेविते प्रियमाख्यामि
त्वांभूयःसभाजये प्रीणयामितवप्रभावात् तवपातिव्रत्यवैभवात्संयुगेरामेणायंमहान्विजयोलब्धः॥९॥१०॥

प्रकृतयःप्रकृतीःस्वपुरराष्ट्रप्रजाः॥१८॥पौरास्तस्मैविभीषणायाजन्हुःममसमीपगमनवेलाया
मितिशेषःतानुपहृतान्पदार्थान्॥१९॥लक्ष्मणायचन्यवेदयत्प्रतिकाम्याइच्छा॥२०॥ततः
अभिषेकोत्तरंदिनद्वयेतस्यप्रजासान्त्वनोत्तरंरामपूजार्थमागतेविभीषणेनत्पुजांकृत्वान

सांत्वयित्वाप्रकृतयस्ततोराममुपागमत्॥दध्यक्षतान्मोदकांश्चलाजाःसुमनसस्तथा
॥१८॥आजन्हुरथसंहृष्टाःपौरास्तस्मैनिशाचराः॥सतान्गृहीत्वादुर्द्धर्षोराघवायन्यवेद
यत्॥१९॥मांगल्यंमंगलंसर्वंलक्ष्मणायचवीर्यवान्॥कृतकार्यंसमृद्धार्थंदृष्ट्वारामोवि
भीषणं॥२०॥प्रतिजग्राहतत्सर्वंतस्यैवप्रतिकाम्यया॥ततःशैलोपमंवीरंप्रांजलिंप्र
णतंस्थितं॥उवाचेदंवचोरामोहनूमंतंप्लवंगमं॥२१॥अनुज्ञाप्यमहाराजमिमंसौम्य
विभीषणं॥प्रविश्यनगरींलंकांकौशलंब्रूहिमैथिलीं॥२२॥वैदेह्यामांचकुशलंसुग्री
वंचसलक्ष्मणं॥आचक्ष्ववदतांश्रेष्ठरावणंचहतंरणे॥२३॥प्रियमेतदिहाख्याहिवैदेह्या
स्त्वंहरीश्वर॥प्रतिगृह्यतुसंदेशमुपावर्तितुमर्हसि॥२४॥इत्यार्षेश्रीरा॰यु॰चतुर्दशोत्त
रशततमःसर्गः॥११४॥

गरंगतेसतिसप्तमेदिनेइत्यर्थः॥२१॥अनुज्ञाप्यपुराधिपतित्वात्वात्कर्त्तव्ये
र्थंतदनुज्ञापेक्षणं·आदौसीतांप्रतिकुशलप्रश्नस्ततःस्वकुशलनिवेदनं॥२२॥२३॥संदेशंवैदेह्याः
प्रतिसंदेशमित्यर्थः॥२४॥कतक॥ [illegible] ॥इतिश्रीरामाभिरामे [illegible] चतुर्दशोत्तरशततमःसर्गः॥११४॥

रामा॰यु॰
३५३

353

उक्तमेवानंदवशात्पुनराह॰ नचेति॰ ईदृशप्रियाख्यानेयत्तस्यसदृशंसमंतवदातुंयोग्यंतत्पृथिव्याम
पिनपश्यामि॥२०॥ एतद्भाषितंत्वदुक्तंप्रत्यभिनंदत्वेनहिरण्यादिकंनार्हतीति॰ अतएवतत्रिप्रियवच
नदेयंवस्तुलोकेनास्तीत्यर्थः॥२१॥२१॥ स्निग्धंस्नेहोपेतंएवंविधंअशक्यप्रीतिदानमित्येवरूपंत्व

नचपश्यामिसदृशंपृथिव्यांतवकिंचन॥सदृशंयत्प्रियाख्यानेनवदत्वाभवेत्सुखं॥१९॥हि
रण्यंवासुवर्णंवारत्नानिविविधानिच॥राज्यंवात्रिषुलोकेषुएतन्नार्हतिभाषितं॥२०॥एवमु
क्तस्तुवैदेह्याप्रत्युवाचप्लवंगमः॥प्रगृहीतांजलिर्हर्षात्सीतायाःप्रमुखेस्थितः॥२१॥भर्तुः
प्रियाहितेयुक्तेभर्तुर्विजयकांक्षिणि॥स्निग्धमेवंविधंवाक्यंत्वमेवार्हस्यनिंदिते॥२२॥तवैत
द्वचनंदेवित्वत्तोर्हामिप्रियंमहत्॥रत्नौघाद्विविधाद्वापिदेवराज्याद्विशिष्यते॥अर्थत
श्चमयाप्राप्तादेवराज्यादयोगुणाः॥हतशत्रुंविजयिनंरामंपश्यसिसुस्थिरं।तस्यतद्वच
नंश्रुत्वामैथिलीजनकात्मजा।ततःशुभतरंवाक्यमुवाचपवनात्मजं॥अतिलक्षणसंपन्नंमा
धुर्यगुणभूषणं।बुध्यात्यष्टांगयायुक्तंत्वमेवार्हसिभाषितुं॥२३॥

मेवभाषितुमर्हसिनान्याअ
तस्त्वयासर्वोत्तरंयदिदंवचनमुक्तंतदेवपरमंप्रत्यभिनंदनमितिशेषः॥२२॥एतदुत्तरंतवैतद्वचनमि
त्यादिश्लोकद्वयंप्रक्षिप्तमितिकतकः॰ अतिलक्षणसंपन्नंआकांक्षायोग्यतादिलक्षणसंपन्नंव्याकरणलक्ष
णसंपन्नंचमाधुर्यंश्रवणमात्रेणआनंदजनकत्वंतद्गुणस्तदेवभूषणंयस्यतत्॰ अष्टांगयाःशुश्रूषाश्रव

णंचैवग्रहणंधारणंतथा॰ ऊहापोहोर्थविज्ञानंतत्त्वज्ञा
नंचधीगुणाः॰ इत्युक्ताष्टांगबुध्यायुक्तं॥२३॥

तवनिर्जयेशत्रोरितिशेषः धृतेनकृतनिश्चयेन·एषाप्रतिज्ञा·शत्रुंहत्वासीतांप्रत्यानेष्यामीत्येवंरूपा
११॥संभ्रमो भयंवर्त्तत्या·वर्त्तमानया·यतोविभीषणाविधेयंलंकैश्वर्यंकृतंतस्मात्त्वंस्वगृहएवपरि

मयात्यलब्धनिद्रेण·धृतेनतवनिर्जये॥प्रतिज्ञैषाविनिस्तीर्णाबध्वासेतुंमहोदधौ॥११॥संभ्रम
श्चनकर्त्तव्योवर्त्तत्यारावणालये॥विभीषणाविधेयंहिलंकैश्वर्यमिदंकृतं॥१२॥तदाश्वसि-
हिविस्रब्धंस्वगृहेपरिवर्त्तसे॥अयंचाभ्येतिसंहृष्टस्त्वद्दर्शनसमुत्सुकः॥१३॥एवमुक्तातुसा
देवीसीताशशिनिभानना॥प्रहर्षेणावरुद्धासाव्याहर्त्तुंनशशाकह॥१४॥ततोब्रवीद्धरिवरः
सीतामप्रतिजल्पतीं॥किंत्वंचिंतयसेदेविकिंचमांनाभिभाषसे॥१५॥एवमुक्ताहनुमतासीता
धर्मपथेस्थिता॥अब्रवीत्परमप्रीताबाष्पगद्गदयागिरा॥१६॥प्रियमेतदुपश्रुत्यभर्त्तुर्विजय
संश्रितं॥प्रहर्षवशमापन्नानिर्वाक्यास्मिक्षणांतरं॥१७॥नहिपश्यामिसदृशंचिंतयंतीप्लवं
गम॥आख्यानकस्यभवतोदातुंप्रत्यभिनंदनं॥१८॥

वर्त्तसेअतआश्वसिहि॥१२॥अयंचाभ्ये
तिसंहृष्टइतिपाठः·अयंविभीषणः॥१३॥१४॥१५॥१६॥क्षणांतरंक्षणरूपकालावकाशमात्रं
१७॥नकेवलंहर्षवशादेवनिर्वाक्याकिंतुप्रियाख्यातुस्तवतत्सदृशदेयवस्त्वभावादपीत्याह
नहीति·प्रत्यभिनंदनंदेयवस्तु·आख्यानकस्यत्वत्कृतप्रियाख्यानस्यसदृशंनास्तीत्यर्थः स्वार्थेकः॥१८

राजसंश्रयादेवराजवश्यानां·पराज्ञयाकुर्वतीनांशुभंवेत्तिशेषः॥३५॥पुरस्ताद्दुष्कृतेनचपूर्वकृते
नदुष्कृतेनेत्यर्थः॥३६॥रावणस्यदासीनामेतत्तर्जनादिकंदशायोगात्कर्मपरिपाककालसंबंधात्

राजसंश्रयवश्यानांकुर्वतीनांपराज्ञया॥विधेयानांचदासीनांकःकुप्येद्वानरोत्तम॥३५॥
भाग्यवैषम्यदोषेणपुरस्ताद्दुष्कृतेनच॥मयैतत्प्राप्यतेसर्वंस्वकृतंह्युपभुज्यते॥मैवं
वदमहावाहोदैवीह्येषापरागतिः॥३६॥प्राप्तव्यंतुदशायोगान्मयैतदितिनिश्चितं
दासीनांरावणस्याहंमर्षयामीहदुर्वला॥३७॥आज्ञप्ताराक्षसेनेहराक्षस्यस्तर्जयं
तिमां॥हतेतस्मिन्नकुर्वंतितर्जनंमारुतात्मज॥३८॥अयंव्याघ्रसमीपेतुपुराणोध
र्मसंहितः॥ऋक्षेणगीतःश्लोकोस्तितंनिवोधप्लवंगम॥३९॥

प्राप्तव्यमितिमयानिश्चितं·अतस्तत्कालसंबंधादेवदुर्बलेवाहंतन्मर्षयामीत्यर्थः॥३७॥राक्ष
सीतर्जनेराजाज्ञाम्मूलत्वमन्वयव्यतिरेकाभ्यांदर्शयति·आज्ञप्ताइति॥३८॥ईदृशेविषयेक्ष
मैवोचितेतिइतिहासमुखेनाह·अयमिति॥३९॥

वलमायाससहिष्णुताशौर्यंयुद्धोत्साहःसत्वंशारीरःसारः॥१४॥तेजःपराभिभवसामर्थ्यंरावमाद्यावह

श्लाघनीयोनिलस्यत्वंसुतःपरमधार्मिकः॥वलंशौर्यंश्रुतंसत्वंविक्रमोदाक्ष्यमुत्तमं॥२४॥तेजः
क्षमाधृतिःस्थैर्यंविनीतत्वंनसंशयः॥एतेचान्येचवहवोगुणास्त्वय्येवशोभनाः॥२५॥अथोवाच
पुनःसीतामसंभ्रांतोविनीतवत्॥प्रगृहीतांजलिर्हर्षात्सीतायाःप्रमुखेस्थितः॥२६॥इमास्तुखलु
राक्षस्योयदित्वमनुमन्यसे॥हंतुमिच्छामिताःसर्वायाभिस्त्वंतर्जितापुरा॥२७॥क्लिश्यंतींपतिदेवां
त्वामशोकवनिकांगतां॥घोररूपसमाचाराःक्रूराःक्रूरतरेक्षणाः॥२८॥इहश्रुतामयादेविराक्ष
स्योविकृताननाः॥असकृत्परुषैर्वाक्यैर्वदंत्योरावणाज्ञया॥२९॥विकृताविकृताकाराःक्रूराःक्रू
रकचेक्षणाः॥इच्छामिविविधैर्घातैर्हंतुमेताःसुदारुणाः॥३०॥जंघाजानुप्रहारैश्चदंतानांचैवपी
डनैः॥भक्षणैःकर्णनासानांकेशानांलुंचनैस्तथा॥३२॥निपात्यहंतुमिच्छामितवविप्रियकारिणीः
एवंप्रहारैर्वहुभिःसंप्रहार्ययशस्विनि॥३३॥घातयेतीव्ररूपाभिर्याभिस्त्वंतर्जितापुरा॥इत्यु
क्तासाहनुमताऽकृपणादीनवत्सला॥हनूमंतमुवाचेदंचिंतयित्वाविमृश्यच॥३४॥

वोगुणास्त्वय्येवसंतिनान्यत्र॥२५॥असंभ्रांतःस्तत्याऽविकृतचित्तःविनीतवत्विनीतार्हं॥२६॥
२७॥२८॥२९॥३०॥एतद्दूरंअपकारिराक्षसीगणवधरूपं॥३१॥३२॥३३॥३४॥ ॥

॥४३॥४४॥४५॥४६॥४७॥४८॥४९॥क०॥१०६॥इतिश्रीरामाभिरामेश्रीरा०रा०ति०यु०पंचदशाधिक

355

एवमुक्तस्तुहनुमान्सीतयावाक्यकोविदः॥प्रत्युवाचततःसीतांरामपत्नीमनिंदितां॥४३॥यु
क्तारामस्यभवतीधर्मपत्नीगुणान्विता॥प्रतिसंदिशमांदेविगमिष्येयत्रराघवः॥४४॥एवमु
क्ताहनुमतावैदेहीजनकात्मजा॥साब्रवीद्द्रष्टुमिच्छामिभर्त्तारंभक्तवत्सलं॥४५॥तस्यास्तुद्व
चनंश्रुत्वाहनूमान्मारुतात्मज॥हर्षयन्मैथिलींवाक्यमुवाचेदंमहामतिः॥४६॥पूर्णचंद्रमुखं
रामंद्रक्ष्यस्यद्यसलक्ष्मणं॥स्थितमित्रंहतामित्रंशचीवेंद्रंसुरेश्वरं॥४७॥तामेवमुक्त्वाभ्राजंतीं
सीतांसाक्षादिवश्रियं॥आजगाममहातेजाहनूमान्यत्रराघवः॥४८॥सपदिहरिवरस्ततोहनू
मान्प्रतिवचनंजनकेश्वरात्मजायाः॥कथितमकथयद्यथाक्रमेणत्रिदशवरप्रतिमायरा
घवाय॥४९॥इत्यार्षेश्रीरामायणेयुद्धकांडेपंचादशाधिकशततमःसर्गः॥११५॥ तमुवाच
महाप्राज्ञःसोभिवाद्यप्लवंगमः॥रामंकमलपत्राक्षंवरंसर्वधनुष्मतां॥१॥यन्निमित्तोयमारं
भःकर्मणांयःफलोदयः॥तांदेवींशोकसंतप्तांद्रष्टुमर्हसिमैथिलीं॥२॥साहिशोकसमाविष्टा
बाष्पपर्याकुलेक्षणा॥मैथिलीविजयंश्रुत्वाद्रष्टुंत्वामभिकांक्षति॥३॥

शततमःसर्गः॥११५॥
तमुवाचेति॥१॥आरंभ०उद्योगःकर्मणांसेतुबंधरावणवधादीनांयःफलोदयःफलरूपः॥२॥३॥

श्लोकमेवाह· न पर इति· कश्चिदरण्ये व्याघ्राद्द्रुतः कश्चिद्व्याधो ऋक्षारूढं वृक्षमारुहत् वृक्षमूलगश्च
व्याघ्रो वृक्षस्थं ऋक्षं वन्यानामस्माकं शत्रुममुं व्याधं वृक्षात्पातयेत्यब्रवीत्· एवमुक्तो ऋक्षः स्वावस्था-
नगतमेनं न पातयिष्यामि तथा त्वधर्महानिः स्यादित्युक्त्वा सुष्वाप सुप्तं ऋक्षं पातयेति व्याघ्रेणोदितो व्या-
धो ऋक्षमपातयत्स ऋक्षोऽभ्यासवत्त्वेन शाखांतरमवलंब्य नापतत् तदनंतरं कृतापराधमेनं पातये-
ति पुनर्व्याघ्रेणोक्तोऽपि ऋक्षो बहुशः कृतापराधमप्येनं तुभ्यं न दास्यामीत्यभिधाय ररक्षेति पौराणिकी।

न परः पापमादत्ते परेषां पापकर्मणां॥ समयो रक्षितव्यस्तु संतश्चारित्रभूषणाः॥४०॥ पापा-
नां वाशुभानां वा वधार्हाणामथापि वा॥ कार्यं कारुण्यमार्येण न कश्चिन्नापराध्यति॥४१॥ लोकहिं-
साविहाराणां क्रूराणां पापकर्मणां॥ कुर्वतामपि पापानि नैव कार्यमशोभनं॥४२॥ श्री

गाथेति तीर्थस्तु त्वत्योयं श्लोकः· परेषां पापकर्मणां परानुद्दिश्य पापं कुर्वतां परः प्राज्ञः पुरुषः पापं प्रत्य-
पकाररूपं नादत्तेन करोति समयः अपकर्तृष्वपि प्रत्यपकारवर्जनरूप आचारो रक्षितव्यस्तु रक्षित-
व्य एव· हि यतः संतश्चारित्रभूषणाः॥४०॥ पापानां वाशुभानां वेति शुभेष्विव पापेषु वधार्हेष्वपि आर्येण का-
रुण्यं कार्यं कर्तव्यं इतरौ वाशब्दौ वाक्यालंकारे ननु सापराधेषु वश्यं दंडः कार्येत आह· न कश्चिदिति कश्चि-
दपि नापराध्यतीति न सर्वोऽप्यपराध्यत्येवेत्यर्थः तस्मात्सर्वत्र दयैवोचितेति भावः॥४१॥ राक्षसानां परहिंसै-
कस्वभाव इत्यतोपि न वध्या इत्याह लोकेति· अशोभ-
इनं ४

तस्यास्तद्वचनं· स्नानाद्यनंगीकारवचनं यथा राम आह· तथा कर्त्तुमर्हति· तां दृष्ट्वा चारुसर्वांगी यान
स्थां शोककर्शितां मलोपचितसर्वांगीं जटिलां कृष्णवाससं उवाच रामो वैदेहीपरामर्शविशंकित इति
भारते तु मलोपचितेत्यर्धे पूर्वमिति शेषः ॥१२॥ भर्तृभक्त्या आवृत्ता अन्विता ॥१३॥१४॥ स्त्रीयुक्तवाहनवहनो

तस्यास्तद्वचनं श्रुत्वा प्रत्युवाच विभीषणः ॥ यथाह रामो भर्त्तेति तत्तथा कर्त्तुमर्हसि ॥१२॥ तस्य त
द्वचनं श्रुत्वा मैथिली पतिदेवता ॥ भर्तृभक्त्यावृता साध्वी तथेति प्रत्यभाषत ॥१३॥ ततः सीतां शिरःस्ना
तां संयुक्तां प्रतिकर्मणा ॥ महार्हाभरणोपेतां महार्हाम्बरधारिणीं ॥१४॥ आरोप्य शिबिकां सी
तां राक्षसैर्वहनोचितैः ॥ रक्षैर्बहुभिर्गुप्तामाजहार विभीषणः ॥१५॥ सोभिगम्य महात्मानं ज्ञा॰
त्वापि ध्यानमास्थितं ॥ प्रणतश्च प्रहृष्टश्च प्राप्तां सीतां न्यवेदयत् ॥१६॥ तामागतामुपश्रुत्य रक्षो
गृहचिरोषितां ॥ रोषं हर्षं च दैन्यं च राघवः प्राप शत्रुहा ॥१७॥

चितैः ॥ परीक्षितैरित्यर्थः ॥१५॥ ज्ञात्वापि वि
भीषणागमनं ज्ञात्वापि ध्यानमास्थितं अतः परं किं वक्तव्यं किं कर्त्तव्यमिति चिंतायुक्तमित्यर्थः ॥१६॥ रो
षं सर्वानर्थमूलयाऽनया किल ससुहृज्ज्ञातिकेनेदं बहु दुःखमनुभूतमिति रोषः यद्वा रावणगृ
ह चिरोषितत्वनिमित्तक आरोपितो रोषो भाविशपथोपयोगी· चिरवियुक्ताया अस्या दर्शनमि
ति हर्षः चिरकालं मत्पत्नी त्वयानया बहु दुःखमनुभूतमिति दैन्यं ॥१७॥ ॥

पूर्वकात्प्रत्ययात्संदेशकालिकादात्मीयोयमितिविश्वासात्तं भर्त्तारंद्रष्टुमिच्छामीत्यहमुक्तस्ततःपर्याकुले
क्षणा आसीदितिशेषः॥४॥ध्यानमागच्छत्परगृहोषितापरस्त्रहेमहान्लोकापवादः निर्दोषायाःपरि
त्यागेचमहान्दोषइतिकार्यदौस्थ्यात्किंकर्त्तव्यमितिचिंतयामासेत्यर्थः वस्त्रतोमुखस्यसीतान्नाभो५

पूर्वकात्प्रत्ययाच्चाहमुक्तोविश्वस्तयातया॥द्रष्टुमिच्छामिभर्त्तारमितिपर्याकुलेक्षणा॥४॥एवमु
क्तोहनुमतारामोधर्मभृतांवरः॥आगच्छत्सहसाध्यानमीषद्बाष्पपरिप्लुतः॥५॥सदीर्घमभिनिश्व
स्यजगतीमवलोकयन्॥उवाचमेघसंकाशंविभीषणमुपस्थितं॥६॥दिव्यांगरागांवैदेहींदि
व्याभरणभूषितां॥इहसीतांशिरःस्नातामुपस्थापयमाचिरं॥७॥एवमुक्तस्तुरामेणत्वरमा॥
णोविभीषणः॥प्रविश्यांतःपुरंसीतांस्त्रीभिःस्वाभिरचोदयत्॥८॥ततःसीतांमहाभागांदृष्ट्वो
वाचविभीषणः॥मूर्ध्निबद्धांजलिःश्रीमान्विनीतोराक्षसेश्वरः॥९॥दिव्यांगरागावैदेहिदिव्या
भरणभूषिता॥यानमारोहभद्रंतेभर्त्तात्वांद्रष्टुमिच्छति॥१०॥एवमुक्तातुवैदेहीप्रत्युवाचवि
भीषणं॥अस्नात्वाद्रष्टुमिच्छामिभर्त्तारंराक्षसेश्वर॥११॥

गेःकथंस्यादितिचिंतात्र॥५॥६॥दिव्यांगरा
गामित्यैतैस्तस्यारूपाधिक्याभिव्यक्तोरीदृशपथेंऽयंमेउद्यमइतिसर्वाञ्ज्ञापयितुमेवंवादः॥७॥८॥ततः
स्वस्त्रीणांतत्समीपगमनानंतरं॥९॥१०॥अस्नात्वाद्रष्टुमिच्छामिभर्त्राज्ञांविनापिस्नानंकृत्वैवद्र

किंचव्यर्थोयंजनापसरणप्रयासइत्याहनगृहाणीतिगृहादित्रयंतिरस्क्रिया॰आवरणं॰ईदृशा॰जनापसरणादिव्यापारा॰नस्त्रियाआवरणं॰किंतुराजसत्कारारावकेवलं छत्रचामरादिवत्॰किंतर्ह्यावरणं तत्राहवृत्तमेवावरणमिति॥२७॥अपिचेदानींदर्शनमपिनास्यादोषायेत्याह॰व्यसनेष्विति॰व्यसनंविपत्तिकालः॰कृच्छ्रंपीडा॥२८॥प्रकृतेदर्शनस्यादोषत्वसाधकंधर्ममाहसैषेति॥२९॥पश्यंतुवैदेहीमित्यनुकर्षः॥३०॥सविमर्शःएवंवादादस्यांप्रणयाभियानोनास्तिजिघत्ताचनास्तियदितोस्यातांतदाराजपत्न्युचितमुपचारमनुमन्येनैवेतिचिंतायुक्तइत्यर्थः॥३१॥अनयैवबुध्यालक्ष्मणादेरपिव्यथा॥३२॥लज्जयावलीयंतीजनसमक्षंभर्तृसमीपस्थितेर्लज्जयावलीयती संकोचंगच्छंती॥३३॥

नगृहाणिनवस्त्राणिनप्राकारास्तिरस्क्रिया॥नेदृशाराजसत्कारावृत्तमावरणंस्त्रियः॥२७॥व्यसनेषुनकृच्छ्रेषुनयुद्धेषुस्वयंवरे॥नक्रतौनोविवाहेवादर्शनंदुष्यतेस्त्रियः॥२८॥सैषाविपद्गता चैवकृच्छ्रेणचसमन्विता॥दर्शनेनास्तिदोषोस्यामत्समपिविशेषतः॥२९॥विसृज्यशिबिकांतस्मात्पद्भ्यामेवापसर्पतु॥समीपेममवैदेहींपश्यंत्वेतेवनौकसः॥३०॥एवमुक्तस्तुरामेणसविमर्शोविभीषणः॥रामस्यापानयत्सीतांसन्निकर्षंविनीतवत्॥३१॥ततोलक्ष्मणसुग्रीवौहनुमांश्चप्लवंगमः॥निशम्यवाक्यंरामस्यबभूवुर्व्यथिताभृशं॥३२॥लज्जयात्ववलीयंतीस्वेषुगात्रेषुमैथिली॥विभीषणेनानुगताभर्तारंसाभ्यवर्त्तत॥३३॥

ग्रन्दयः उक्तधर्मत्रयाक्रांतत्वात्प्रकटहर्षरहितः॥१८॥१९॥उत्सारणंजनस्येतिशेषः॥२०॥वेत्रैर्वेत्रग्रहणै झर्झरास्ताद्दशशब्दवंतः पाणयोयेषां॥२१॥उत्तस्थुः उत्थायजग्मुः॥२२॥२३॥दाक्षिण्यात्स्वभक्तवानरसे

ततोयानगतांसीतांसविमर्शोविचारयन्॥विभीषणमिदंवाक्यमहृष्टोराघवोब्रवीत्॥१८॥राक्षसाधिपतेसौम्यनित्यंमद्विजयेरत॥वैदेहीसंनिकर्षंमेक्षिप्रंसमभिगच्छतु॥१९॥तस्यतद्वचनंश्रुत्वाराघवस्यविभीषणः॥तूर्णमुत्सारणंतत्रकारयामासधर्मवित्॥२०॥कंचुकोष्णीषिणस्तत्रवेत्रझर्झरपाणयः॥उत्सारयंतस्तान्योधान्समंतात्परिचक्रमुः॥२१॥ऋक्षाणांवानराणांचराक्षसानांचसर्वशः॥वृंदान्युत्सार्यमाणानिदुरमुत्तस्थुरंततः॥२२॥तेषामुत्सार्यमाणानांनिःस्वनःसुमहानभूत्॥वायुनोद्धूयमानस्यसागरस्येवनिस्वनः॥२३॥उत्सार्यमाणान्दृष्ट्वाथजगत्यांजातसंभ्रमान्॥दाक्षिण्यात्तदमर्षाच्चवारयामासराघवः॥२४॥संरंभाच्चाब्रवीद्रामश्चक्षुषाप्रदहन्निव॥विभीषणंमहाप्राज्ञंसोपालंभमिदंवचः॥२५॥किमर्थंमामनादृत्यक्लिश्यतेयंत्वयाजनः॥निवर्त्तयैनमुद्वेगंजनोयंस्वजनोमम॥२६॥

नासुदाक्षिण्यात् कृपाविशेषात्तदमर्षात्मदाज्ञांविनोत्सारयतीतिविभीषणोऽमर्षः॥२४॥संरंभात्कोपात्॥२५॥एनमुद्वेगंनिवर्त्तयास्यजनस्येतिशेषः कथमेवंयुज्यतेतत्राह।जनोयमितिस्वजनः भ्रात्रादिस्वजनसदृशएव॥२६॥

६॥ अद्यसफलमित्यन्वयः॥७॥८॥९॥ इत्येवंवदतइतिअर्थात्त्वयामेप्रयोजनंनास्तीतिप्रतिफलना
द्दुःखेनाश्रुपरिप्लुताबभूव॥१०॥ तद्रूपदर्शनादंगीकारबुद्धिः जनवादभयात्त्यागबुद्धिः भावसंधि

संप्राप्तमवमानंयस्तेजसानप्रमार्जति॥ कस्तस्यपौरुषेणार्थोमहताप्यल्पचेतसः॥६॥ लंघ
नंचसमुद्रस्यलंकायाश्चापिमर्दनं॥ सफलंतस्यचश्लाघ्यमद्यकर्महनूमतः॥७॥ युद्धेविक्र
मतश्चैवहितंमंत्रयतस्तथा॥ सुग्रीवस्यससैन्यस्यसफलोद्यपरिश्रमः॥८॥ विभीषणस्यच
तथासफलोद्यपरिश्रमः॥ विगुणंभ्रातरंत्यक्त्वायोमांस्वयमुपस्थितः॥९॥ इत्येवंवदतःश्रुत्वा
सीतारामस्यतद्वचः॥ मृगीवोत्फुल्लनयनाबभूवाश्रुपरिप्लुता॥१०॥ पश्यतस्तांतुरामस्यस-
मीपेहृदयप्रियां॥ जनवादभयाद्राज्ञोबभूवहृदयंद्विधा॥११॥ सीतामुत्पलपत्राक्षींनीलकुं
चितमूर्द्धजां॥ अवदद्वैवरारोहांमध्येवानररक्षसां॥१२॥ यत्कर्तव्यंमनुष्येणधर्षणांप्रति
मार्जता॥ तत्कृतंरावणंहत्वामयेदंमानकांक्षिणा॥१३॥ निर्जिताजीवलोकस्यतपसाभावि
तात्मना॥ अगस्त्येनदुराधर्षामुनिनादक्षिणादिक्॥१४॥ विदितश्चास्तुभद्रंतेयोयंरणपरि
श्रमः॥ सुतीर्णःसुहृदांवीर्यान्नत्वदर्थंमयाकृतः॥१५॥

रक्ष॥११॥१२॥१३॥ जीवलोकस्यदुराध
र्षेत्यन्वयः इल्वलवातापिभयादितिशेषः रावणभयात्त्राणमात्रस्यदुराधर्षायुद्धेननिर्जिता॥१४॥१५॥

विस्मयादितिवहुमित्रपरिवारसंपत्तिदर्शनजोविस्मयःप्रियदर्शनजोहर्षः॥३४॥समपनुदत्समयपनुद
त्॥३५॥क०१०७॥इतिश्रीरामाभिरामेश्रीरा०रा०नि०यु०षोडशाधिकशततमःसर्गः॥११६॥तांत्विति१ए
षात्वंशत्रुंजित्वानिर्जिताशत्रोःपत्याद्धृता पौरुषात्पुरुषयत्नात्॥२॥अमर्षस्यक्रोधस्यांतंगतःधर्षणाश

विस्मयाच्चप्रहर्षाच्चस्नेहाच्चपतिदेवता॥उदैक्षतमुखंभर्त्तुःसौम्यंसौम्यतरानना॥३४॥समपनु
दन्मनःक्लमंसासुचिरदृष्टमुदीक्ष्यवैप्रियस्य वदनमुदितपू र्णचंद्रकांतविमलशशा
कनिभाननातदासीत्॥३५॥इत्यार्षेश्रीरा०यु०षोडशाधिकशततमःसर्गः॥११६॥ तांतुपा
र्श्वेस्थितांप्रह्वांरामःसंप्रेक्ष्यमैथिलीं॥हृदयांतर्गतंभावंव्याहर्तुमुपचक्रमे॥१॥एषासिनिर्जि
ताभद्रेशत्रुंजित्वारणाजिरे॥पौरुषाद्यदनुष्ठेयंमयैतदुपपादितं॥२॥गतोस्म्यंतममर्षस्यधर्ष
णासंप्रमार्जिता॥अवमानश्चशत्रुश्चयुगपन्निहतौमया॥३॥अद्यमेपौरुषंदृष्टमद्यमेसफ
लश्रमः॥अद्यतीर्णप्रतिज्ञोहंप्रभवाम्यद्यचात्मनः॥४॥यात्वंविरहितानीताचलचित्तेनर
क्षसा॥दैवसंपादितोदोषोमानुषेणमयाजितः॥५॥

त्रुकृतस्वदारहरणलक्षणाभिभवः॥३॥अ
द्यमेपौरुषंदृष्टंलोकेइतिशेषःतीर्णप्रतिज्ञःतीर्णारावणवधविषयाप्रतिज्ञायेनसः॥४॥मयाविर
हितायात्वंचलचित्तेनरक्षसानीताअसौदैवसंपादितस्तवदोषःमानुषेणमनुष्यसाध्यपराक्रमेणमया

लंकाकांडः॥५॥

सर्वलोकस्यममचत्वयिवृत्तसंदेहोदुर्निवारनहित्वामित्यादि॥२४॥ प्रियार्हंश्रवणा· प्रियश्रवणा
र्हेत्यर्थः गजेंद्रहस्ताभिहताबल्लरीयथाबाष्पंमुमुचेत्यर्थः॥२५॥ क०॥१०८॥ इतिश्रीरामाभिरामेश्रीरा·

नहित्वांरावणोदृष्ट्वा दिव्यरूपांमनोरमां॥ मर्षयत्यचिरंसीतेस्वगृहेपर्यवस्थितां॥२४॥ ततः
प्रियार्हश्रवणातदप्रियंप्रियादुपश्रुत्यचिरस्यमानिनी॥ मुमोचबाष्पंरुदतीतदाभृशं
गजेंद्रहस्ताभिहतेववल्लरी॥२५॥ इत्यार्षेश्रीरामायणेयुद्धकांडेसप्तदशाधिकशतत
मः सर्गः॥११७॥ एवमुक्तातुवैदेही परुषंरोमहर्षणं॥ राघवेणसरोषेणश्रुत्वाप्रव्यथि
ताभवत्॥१॥ सातदाऽश्रुतपूर्वंहिजनेमहतिमैथिली॥ श्रुत्वाभर्त्तुर्वचोघोरंलज्जयावन
ताभवत्॥२॥ प्रविशंतीवगात्राणिस्वानिसाजनकात्मजा॥ वाक्शरैस्तैःसशल्येवभृशाम
श्रूण्यवर्त्तयत्॥३॥ ततोवाष्पपरिक्लिन्नंप्रमार्जंतीस्वमाननं॥ शनैर्गद्गदयावाचाभर्त्ता
रमिदमब्रवीत्॥४॥ किंमामसदृशंवाक्यमीदृशंश्रोत्रदारुणं॥ रूक्षंश्रावयसेवीरप्राकृतः
प्राकृतामिव॥५॥

रा०ति०यु० सप्तादशाधिकशततमःसर्गः॥११७॥ एवमिति॥१॥ जने
महतिमहाजनसंनिधावित्यर्थ॥२॥३॥४॥ असदृशंत्वयावक्तुंमयाश्रोतुंचायोग्यं रूक्षंपरु
षमतएवश्रोत्रदारुणंश्रवणाकटु॥५॥ ॥ ॥ ॥

अपवादंस्वदारापहारिणंहंतुंनाशक्नोदित्यपवादंपरिमार्जता॰न्यंगंनीचत्वंपरिमार्जनिदंकृतमितिशेषः॥१६
नेत्रातुरस्यनेत्ररोगिणः॥१७॥१८॥सुहृल्लोभेनसुहृदाचिरकालस्निग्धेतिलोभोजिघत्सायस्यतेन॥१९॥राव

रक्षतातुमयावृत्तमपवादंचसर्वतः॥प्रख्यातस्यात्मवंशस्यन्यंगंचपरिमार्जता॥१६॥प्राप्तचारि
त्रसंदेहामममप्रतिमुखेस्थिता॥दीपोनेत्रातुरस्येवप्रतिकूलासिमेदृढा॥१७॥तद्गच्छत्वानुजाने
द्ययथेष्टंजनकात्मजे॥एतादशदिशोभद्रेकार्यमस्तिनमेत्वया॥१८॥कःपुमांस्तुकुलेजातःस्त्रि
यंपरगृहोषितां॥तेजस्वीपुनरादद्यात्सुहृल्लोभेनचेतसा॥१९॥रावणांकपरिक्लिष्टांदृष्टांदु
ष्टेनचक्षुषा॥कथंत्वांपुनरादद्यांकुलंव्यपदिशन्महत्॥२०॥यदर्थंनिर्जितामेत्वंसोयमा
सादितोमया॥नास्तिमेत्वय्यभिष्वंगोयथेष्टंगम्यतामिति॥२१॥तदद्यव्याहृतंभद्रेमयैतत्कृ
तबुद्धिना॥लक्ष्मणेवाथभरतेकुरुबुद्धिंयथासुखं॥२२॥शत्रुघ्नेवाथसुग्रीवेराक्षसेवा।विभी
षणे॥निवेशयमनःसीतेयथावासुखमात्मनः॥२३॥

णस्यदुष्टेनचक्षुषाकामोपहतनेत्रेणदृष्टांएवंचविषान्नवदग्राह्यामित्यर्थः॥२०॥२१॥कृतबु
द्धिनानिश्चितबुद्धिना॰अस्मदीयेषुयत्रकुत्रापितिष्ठेत्याहलक्ष्मणइत्यादि॥२२॥यथावासुखंस्व
मातृपितृकुलेवेत्यर्थः॥२३॥

सहयुगपत्संवद्धोभावःपरस्परानुरागलक्षणस्तेनःसंसर्गेणचिरंकालसहवासेनचयद्यहंतेत्वया
गुणवत्वेननविज्ञातातेनत्वदज्ञानेनहेतुनाहंशाश्वतंहताचिरकालंदुःखमस्याकृता॥१०॥अवलो
ककःअवलोकितुमन्वेष्टुमित्यर्थःतदाकिंनत्वयाविसर्जितापुनरंगीकाराभावंकिमितिनम्रा

सहसंवद्धभावेनसंसर्गेणचमानद॥यदितेहंनविज्ञाताहतातेनास्मिशाश्वतं॥१०॥प्रेषि
तस्तेमहावीरोहनूमानवलोककः॥लंकास्थाहंत्वयाराजन्किंतदानविसर्जिता॥११॥प्रत्यक्षं
वानरस्यास्यतद्वाक्यसमनंतरं॥त्वयासंत्यक्तयावीरत्यक्तंस्याज्जीवितंमया॥१२॥नवृथाते
श्रमोयंस्यात्संशयेन्यस्यजीवितं॥सुहृज्जनपरिक्लेशोनचायंविफलस्तव॥१३॥त्वयातुन
रशार्दूलरोषमेवानुवर्त्तता॥लघुनेवमनुष्येणस्त्रीत्वमेवपुरस्कृतं॥१४॥ ॥

विता॥११॥नदोक्तौकोविशेषस्तत्राह·प्रत्यक्षमिति-एवचैतदेवजीवत्यागेणतावत्पर्यंतंमद्धत्ती
त्वाद्वियोगव्यथानस्यादितिभावः॥१३॥जीवितंसंशयेन्यस्ययुद्धेजयस्यसंदिग्धत्वात्संशयेप्र
तिष्ठाप्ययोयंवृथाश्रमःकृतःसनकर्त्तव्यःस्यात्तथाविफलःसुहृज्जनपरिक्लेशश्चनकर्त्त
व्योभवेत्॥१३॥स्त्रीत्वमेव·प्राकृतसाधारणस्त्रीजातिरेवपुरस्कृतंचिंतिता॥१४॥ ॥

यथात्वमवगच्छसिदुष्टेयमितितथानास्मिस्वेनचारित्रेणपातिव्रत्यलक्षणेनतेशपेशपथेनतव
प्रत्ययंसंपादयिष्येततोमेप्रत्ययंगच्छ॥६॥पृथक्स्त्रीणांप्रचारेणचरित्रदर्शनेनहेतुनाजाति
स्त्रीजातिंपरिशंकसेदुष्टांमन्यसेइदमनुचितमितिशेषः यदितेत्वयाऽहंपरीक्षितातदेशंका
त्यज॥७॥ननुकान्तेपरीक्षितोरक्षोगास्पर्शस्त्वयेत्याहयदहमिति·विवशाऽस्वाधीनासतीगात्रस्पर्शंग

नतथास्मिमहावाहोयथामामवगच्छसि॥प्रत्ययंगच्छमेस्वेनचारित्रेणैवतेशपे॥६॥पृथ
क्स्त्रीणांप्रचारेणजातिंत्वंपरिशंकसे॥परित्यजेमांशंकांतुयदितेऽहंपरीक्षिता॥७॥यद
हंगात्रसंस्पर्शंगतास्मिविवशाप्रभो॥कामकारोनमेतत्रदैवंतत्रापराध्यति॥८॥मद
धीनंतुयत्तन्मेहृदयंत्वयिवर्त्तते॥पराधीनेषुगात्रेषुकिंकरिष्याम्यनीश्वरी॥९॥

तास्मिप्राप्तास्मितत्रमेकामकारोनइच्छापूर्वकतानंनत्रवलात्स्पर्शेदैवमेवापराध्यति॰अपरा
धंकारितवत्दैवमेवाऽकारणान्नमेत्रापराधइतिभावः॥८॥स्वतोदोषजनकंकर्मतुमेनास्ती
त्याहमदधीनमिति·परैर्ग्रहीतुमशक्यमित्यर्थः·पराधीनेषु·परैर्ग्रहीतुंशक्येषु·दैवाधीनेषुचय।
स्याःकायास्मितदधीनानीगात्राणीतियेनतदर्थमेवैषांनिर्माणात्हृदयंतुतदीयमेवात्रापीतिभावः॥९॥

२३॥२४॥२५॥राघवःशुद्धचारित्रामदुष्टामेवमांयदिदुष्टांजानाति·अहंतथाचेत्·अदुष्टाचेत्पाव
कोमांसर्वतःपातुकेशांवरादिकमपिमाधाक्षीदित्यर्थः॥२६॥२७॥२८॥सातप्तेत्यादि·एतद्दर्शमिवस्ना

अधोमुखंस्थितंरामंततःकृत्वाप्रदक्षिणां॥उपावर्त्तत्तवैदेहीदीप्यमानंहुताशनं॥२३॥प्र
णम्यदैवतेभ्यश्चब्राह्मणेभ्यश्चमैथिली॥बद्धांजलिपुटाचेदमुवाचाग्निसमीपतः॥२४॥यथा
मेहृदयंनित्यंनापसर्पतिराघवात्॥तथालोकस्यसाक्षीमांसर्वतःपातुपावकः॥२५॥यथामांशु
द्धचारित्रांदुष्टांजानातिराघवः॥तथालोकस्यसाक्षीमांसर्वतःपातुपावकः॥२६॥एवमुक्त्वातु
वैदेहीपरिक्रम्यहुताशनं॥विवेशज्वलनंदीप्तंनिःशंकेनांतरात्मना॥२७॥जनश्चसुमहांस्तत्र
बालवृद्धःसमाकुलः॥ददर्शमैथिलींदीप्तांप्रविशंतींहुताशनं॥२८॥सातप्तनवहेमाभातप्तकां
चनभूषणा॥पपातज्वलनंदीप्तंसर्वलोकस्यसन्निधौ॥२९॥ददृशुस्तांविशालाक्षींपतंतींहव्यवा
हनं॥सीतांसर्वाणिरूपाणिरुक्मवेदिनिभांतदा॥३०॥ददृशुस्तांमहाभागांप्रविशंतींहुताशनं
ऋषयोदेवगंधर्वायज्ञेपूर्णांहुतामिव॥३१॥प्रचुक्रुशुस्त्रियःसर्वास्तांदृष्ट्वाहव्यवाहने॥पतंतीं
संस्कृतांमंत्रैर्वसोर्धारामिवाध्वरे॥३२॥

नायाअलंकारयुतायाआनयनंकारितं॥२९॥सर्वाणिरू
पाणि·सर्वाणिभूतानिसर्वाणिरूपाणिविजित्यधीरइत्यादौतद्बोधकतयाप्रसिद्धोरूपशब्दः॥३०

॥३१॥वसोर्धारासंततांघृतधारा॥३२॥

मेऽपदेशोवैदेहीत्यादिव्यवहारोजनकात्जनकयज्ञभूमिसंबंधमात्रात्· नोत्पत्तिर्जनकादित्युत्कर्षः
कुतस्तर्हिसातत्राह·वसुधातलात्·एवंमनुष्ययोन्यनुत्पत्तिरप्राकृतस्त्रीत्वोपपादिकोक्ता तथामेवहुमा
नार्हंवृत्तंचारित्रंचतेत्वयानपुरस्कृतं· अपरित्यागेहेतुत्वेननविचारितं॥१५॥किंचवाल्येकृतंधर्मेप्र

अपदेशोमेजनकान्नोत्पत्तिर्वसुधातलात्॥ममवृत्तंचवृत्तज्ञवहुतेनपुरस्कृतं॥१५॥नप्रमाणीकृ
तःपाणिर्वाल्येममनिपीडितः॥ममभक्तिश्चशीलंचसर्वंनेपृष्ठतःकृतं॥१६॥इतिब्रुवंतीरुद
तीवाष्पगद्गदभाषिणी॥उवाचलक्ष्मणंसीतानादीनंध्यानपरायणं॥१७॥चिंतांमेकुरुसौमित्रे
व्यसनस्यास्यभेषजं॥मिथ्यापवादोपहतानाहंजीवितुमुत्सहे॥१८॥अप्रीतेनगुणैर्भर्त्रात्य
क्तायाजनसंसदियातुमामेगतिर्गंतुंप्रवेक्ष्येहव्यवाहनं॥१९॥एवमुक्तस्तुवैदेह्यालक्ष्मणः
परवीरहा॥अमर्षवशमापन्नोराघवंसमुदैक्षत॥२०॥सविज्ञायमनश्छंदंरामस्याकारसू
म चितं॥चिंतांचकारसौमित्रिर्मतिरांस्यवीर्यवान्॥२१॥नहिरामंतदाकश्चित्कालांतकयमोप
मं॥अनुनेतुमथोवक्तुंद्रष्टुंवाप्यशकत्सुहृत्॥२२॥

जोद्देश्यकंपाणिग्रहणमपित्वयाऽपरित्यागेन
प्रमाणीकृतं॥१६॥१७॥१८॥ गुणैरप्रीतेनभर्त्राजनसंसदित्यक्तायायागतिःक्षमानांगतिंगंतुंहव्यवाहनं
प्रवेक्ष्ये· अप्रीतस्यगुणैर्भर्तुरितिपाठांतरंतत्रापिशेषेषष्ठी॥१९॥२०॥मनश्छंदंमनोभिप्रायंआकारसू
चितंभ्रुभंगाद्याकारसूचितं॥२१॥२२॥

षडर्धनयनःश्रीमान्षडर्धनयनस्त्रिनेत्रइत्यर्थःसर्वलोकस्यब्रह्मलोकपर्यंतंसर्वलोकवर्त्तिपदार्थानांस्रष्टा·ब्रह्मविदां·चतुर्मुखप्रजापतिविष्णुदेवराजादिदिक्पालवसिष्ठाद्यृषितत्संतानजब्राह्मणाब्रह्मविदस्तेषांवरोज्येष्ठोहिरण्यगर्भःयोवैब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मैइतिश्रुतेर्हिरण्यगर्भःसमवर्त्तताग्रेइतिश्रुतेश्च॥३॥एतेसर्वेविमानैर्लंकामागत्यराघव

षडर्धनयनःश्रीमान्महादेवोवृषध्वजः॥कर्त्तासर्वस्यलोकस्यब्रह्माब्रह्मविदांवरः॥३॥एते
सर्वेसमागम्यविमानैःसूर्यसन्निभैः॥आगम्यनगरींलंकामभिजग्मुश्चराघवं॥४॥ततः
सहस्ताभरणान्प्रगृह्यविपुलान्भुजान्॥अब्रुवंस्त्रिदशश्रेष्ठाराघवंप्रांजलिंस्थितं
कर्त्तासर्वस्यलोकस्यश्रेष्ठोज्ञानविदांविभुः॥उपेक्षसेकथंसीतांपतंतींहव्यवाहने॥क
थंदेवगणश्रेष्ठमात्मानंनावबुध्यसे॥६॥

मभिजग्मुः॥४॥प्रगृह्यउद्यम्य·भारतेत्वग्निप्रवेशंसीतायाअनुक्त्वारामस्यचारित्रसंदेहेसीतादुःखंदृष्ट्वावाय्वग्निवरुणाद्युक्तैर्वसीतांगीकारउक्तस्तत्रानुक्तोप्यग्निप्रवेशोमध्येद्रष्टव्यइत्याहुः·पाद्मेतु·सातेनगर्हितासाध्वीविवेशज्वलनंतदेत्युक्तं॥५॥कर्त्तासर्वस्येति·मनुष्यदेहेराघवेसर्वलोककर्तृत्वाद्युक्तिर्मूलस्वरूपाभिप्रायेण।ज्ञानविदांश्रौपनिषदज्ञानवतां॥६॥

शप्तांशापंप्राप्तामतएवत्रिदिवान्निरयेमनुष्ययोन्पादोपततीः ॥३३॥ अद्भुतोपमः आश्चर्यमित्युप
माज्ञानंयस्मिन्वृत्तोसः ॥३४॥ क० ॥१०९॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडे अ
ष्टादशाधिकशततमः सर्गः ॥११८॥ ततोहीति- एवंवदतांहाहेतिवदतांसर्वेषामार्त्तागिरः श्रुत्वा

ददृशुस्तांत्रयोल्लोकादेवगंधर्वदानवाः ॥ शप्तांपतंतीनिरयेत्रिदिवाद्देवतामिव ॥३३॥
तस्यामग्निंविशत्यांतुहाहेतिविपुलःस्वनः ॥ रक्षसांवानराणांचसंबभूवाद्भुतोपमः ॥३४॥
इत्यार्षेश्रीरामायणेयुद्धकांडेअष्टादशाधिकशततमः सर्गः ॥११८॥ ततोहिदुर्मनारा
मः श्रुत्वैवंवदतांवरः ॥ दध्यौमुहूर्त्तंधर्मात्मावाष्पव्याकुललोचनः ॥१॥ ततोवैश्रवणो
राजायमश्चपितृभिःसह ॥ सहस्राक्षश्चदेवेशोवरुणश्चजलेशयः ॥२॥ ॥

ततोहीति ततएवदुर्मनाखिन्नचित्तोरामोवाष्पव्याकुललोचनःप्राकृतस्त्रीवत्सीताएतदनर्हेति
तद्वियोगतोवाष्पव्याकुललोचनोभूत्वामुहूर्त्तंदध्यौकिमुक्तंकिंचातःपरंकर्त्तव्यमितिचिंतापरो
बभूव ॥१॥ अत्रावसरेदिक्पालसहितोरुद्रोहिरण्यगर्भश्चरामानुग्रहायसमागताइत्याहततइत्या
दि ॥२॥

अथब्रह्मानुग्रहाद्देवब्रह्मविद्योन्मुख्यस्यपक्षत्वादिसिद्धतयातदोन्मुख्यस्यात्मानंनावबुधसेइतिब्रह्मणोवक्तृत्वात्तज्जिज्ञासुरिवस्वीयानांस्वस्वरूपबोधनायब्रह्माणंगुरुमज्ञइवोपासददित्याहात्मानमिति· अहमात्मानमात्मानमात्मस्वरूपसामान्यतोऽहंत्वेनप्रतीयमानंदशरथपुत्रंरामनामकंमनुष्यजातीयपिंडमेवमन्ये· नतुततोतिरिक्तंकिंचिदितिभवद्भिरप्युक्तंस्वात्मानंनावबुध्यसेइति· एवंचसोऽहमेवंभूताहंबुद्धिमान्यश्चपरमार्थतोयत्तत्वः यतश्चयस्मत्कृतिकश्चतत्सर्वंभगवा

आत्मानंमानुषंमन्येरामंदशरथात्मजं॥सोऽहंयश्चयतश्चाहंभगवांस्तद्ब्रवीतुमे॥११॥ इतिब्रुवाणंकाकुत्स्थंब्रह्माब्रह्मविदांवरः॥अब्रवीच्छृणुमेवाक्यंसत्यंसत्यपराक्रम॥१२॥भवान्नारायणोदेवःश्रीमांश्चक्रायुधःप्रभुः॥एकशृंगोवराहस्त्वंभूतभव्यसपत्नजित्॥१३॥

न्सर्वज्ञःपरमगुरुर्मेमह्यमज्ञायजिज्ञासवेब्रवीतूपदिशतु अयमेवब्रह्मविद्योपदेशमार्गःसर्वत्रश्रुतिस्मृतिषुप्रसिद्धः॥११॥इतिब्रुवाणंजिज्ञासवेमह्यंब्रवीत्विति ब्रुवाणं·वाक्यं·वाक्यं·देहदेहित्वोपदेशरूपं॥१२॥नारंजीवसमूहोऽयनंस्थानंयस्यसविराड्रूपोनारायणपदवाच्योयःसत्वमसिदेवःस्वप्रकाशःविराट्चिन्हान्याह·चक्रेति·इदंशंखगदादेरप्युपलक्षणं·एकशृंगोवराहएकदंष्ट्रोधरणीवराहः·अयंविराड्विष्णुमूर्त्तेर्भेदः·भूतभव्यसपत्नजित्भूतभव्यकालरूपोयःसपत्नोजनिमृतिहेतुत्वात्तंजयतिसःनित्यइतियावत्॥१३॥

देवगणाइंद्रादयस्तेषांश्रेष्ठः विभुमुखावैदेवाइतिश्रुतेः ऋतधामेत्यादिश्लोकत्रयंकृतकासंमतंतीर्थस्त्वेवंव्याचख्ये पूर्वंपूर्वस्मिन्कल्पेसख्येः पूर्वंवावसूनांमध्येऋतधामानामावसुः आदिकर्त्ता।

ऋतधामावसुःपूर्वंवसूनांचप्रजापतिः॥ त्रयाणामपिलोकानामादिकर्त्तास्वयंप्रभुः॥७॥ रुद्राणामष्टमोरुद्रः साध्यानामपिपंचमः॥ अश्विनौचापिकर्णौतेसूर्याचंद्रमसौदृशौ॥८॥ अंतेचादौचमध्येचदृश्यसेचपरंतप॥ उपेक्षसेचवैदेहीमामानुषःप्राकृतोयथा॥९॥ इत्युक्तो लोकपालैस्तैःस्वामीलोकस्यराघवः॥ अब्रवीत्त्रिदशश्रेष्ठान्रामोधर्मभृतांवरः॥१०॥

अंडाद्याधिपतिरूपादिसर्गस्यकर्त्ताः स्वयंप्रभुः इतरानियम्यः॥७॥ अष्टमोरुद्रोमहादेवः साध्यानामपिपंचमः वीर्यवान्नामा विराट्रूपंवर्णयति अश्विनौचेत्यादि॥८॥ अंतेचादौचेत्यनेनसर्वभूततत्त्वंत्वमेवेतिसूचितं॥९॥ लोकपालैरिंद्रादिब्रह्मांतैःपूर्वोक्तैःलोकस्यभूलोकस्येदानींसाक्षात्स्वामीराघवःरघुकुलजः॥१०॥

रामा·यु
३६४

प्रजापतिरिंद्रमसृजतेत्युक्तेः इंद्रः कर्मसाध्यिर्यस्य स इंद्रकर्मा· महेंद्रः सकलोशिता· पद्मंवै राजं नाभौ य
स्य सः रणांतकृत्· रक्षस्सत्रुणां नाशकर्त्ता· शरण्यं शरणत्वेन प्राप्यं शरणं रक्षकं च त्वामेवाहुः परित्रा
णाय साधूनामित्युक्तेः ॥१७॥ सहस्रशृंगोऽनेकशाखामयशृंगवान्· वेदात्मा वेदस्वरूपः शतशीर्षो ने
कविधिमयशिरोयुक्तः महर्षभः श्रेष्ठतमः शिशुमारप्रजापतिरूप इत्यर्थ इतिकतकः त्रयाणां

इंद्रकर्मा महेंद्रस्त्वं पद्मनाभो रणांतकृत् ॥ शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः ॥१७॥ स
हस्रशृंगो वेदात्मा शतशीर्षो महर्षभः ॥ त्वं त्रयाणां हि लोकानामादिकर्त्ता स्वयंप्रभुः ॥१८॥
सिद्धानामपि साध्यानामाश्रयश्चासि पूर्वजः ॥ त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारः परात्परः ॥
॥१९॥ प्रभवं निधनं चापि नो विदुः को भवानिति ॥ दृश्यसे सर्वभूतेषु गोषु च ब्राह्मणेषु च ॥२०॥
दिक्षु सर्वासु गगने पर्वतेषु नदीषु च ॥ सहस्रचरणः श्रीमान् शतशीर्षः सहस्रदृक् ॥२१॥

लोकानां सर्वप्रजानामित्यर्थः स्वयंप्रभुः अनन्यप्रेर्यः ॥१८॥ सिद्धानामारूढानां साध्यानामारुरुक्षू
णामाश्रयः प्राप्यः पूर्वजश्चासि· अहमस्मि प्रथमजा ऋतस्येत्यादिश्रुतेः ॥१९॥ तव प्रभवाद्यपि
न जानंति को भवानिति चेदं न यान जानंति· सार्वात्म्येन स्थौति दृश्यस इति· सर्वभूतेषु गोष्वि
त्यादि उक्तम् अचेतनेष्वपीत्यर्थः दृश्यसे अंतर्यामितया आश्रयसे ॥२०॥ अत्यंतमचेतनेष्वपि त्वमंतर्या
मीत्याह दिक्ष्विति ॥२१॥

364

राम
३६४

तदेवाह· अक्षरमिति· यदक्षरंमध्येचांतेचचादादौचसत्यमप्रच्युतस्वतत्वंयत्ब्रह्मतदेवत्वमसिइति
शेषः लोकानांधर्माधिकृतप्राणिनांत्वमेवपरमोधर्मः यज्ञोवैविष्णुरित्यादिश्रुतेरश्वमेधांतधर्मस्त्वमे
व· विष्वंचः सर्वगताः सेनानियामकगणायस्य· चतुर्भुजः शत्रुनिरसनदक्षभुजचतुष्टयवान्॥१४॥शा
र्ङ्गंधन्वाकालरूपंशार्ङ्गंधनुर्यस्य· हृषीकेश इति हृषीकाणामिंद्रियाणामीशोनियंता· पुरुषइति· पुरू
णिफलानिसनोतिददातिसपुरुषः पुरिहृदयपुंडरीकेशेत इतिवा· पूर्णत्वाद्वापुरुषः तेनेदंपूर्णंपुरु

अक्षरंब्रह्मसत्यंचमध्येचांतेचराघव॥ लोकानांत्वंपरोधर्मोविष्वक्सेनश्चतुर्भुजः॥१४॥शार्ङ्गध
न्वाहृषीकेशः पुरुषः पुरुषोत्तमः॥ अजितःखड्गधृग्विष्णुःकृष्णश्चैवबृहद्बलः॥१५॥सेनानीः
ग्रामणीः सर्वंत्वंबुद्धिस्त्वंक्षमादमः॥ प्रभवश्चाप्ययश्चत्वमुपेंद्रोमधुसूदनः॥१६॥

षेणसर्वमिति
श्रुतेः पुरुषोत्तमः यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः अतोस्मिलोकेवेदेचप्रथितः पुरुषोत्तम इ
तिस्मृतेः अजितः पाप्मनारिभिश्चाजितः खड्गधृक्· विद्याख्यनंदनखड्गधृक्· विष्णुः सर्वव्यापकः कृष्णः
तद्वर्णः बृहद्बल इति· अशेषब्रह्मांडस्यलीलाकंदुकवद्धारणात्महद्बलः॥१५॥ सेनानीराजासेनापति
श्चग्रामणीर्मंत्रीसर्वंजगत्त्वमेव· बुद्धिर्निश्चयात्मिका· क्षमा· भक्तापराधसहिष्णुता· दमइंद्रियनिग्रहः
तद्धर्मकत्वात्तदात्मत्वव्यपदेशः प्रभवाप्ययौसृष्टिप्रलयौतत्कारणत्वात्तत्त्वव्यपदेशः उपेंद्रादयस्तवैवमूर्तिभे

तिकोपोग्निःतेप्रसादःसोमःत्वयावामनात्मनावतीर्णेनपुरापूर्वंत्रिभिर्विक्रमैस्त्रयोलोकाभूर्भुवः
स्वःस्वरूपाःक्रांताः॥२६॥बलिंबध्वामहेंद्रश्चराजाकृतःसीतालक्ष्मीःप्रसिद्धविष्णुपत्न्यभिन्नत्वात्त्वं
विष्णुःसभवान्देवःप्रकाशरूपःकृष्णःकृष्णवर्णःप्रजापतिस्तदभिन्नतत्वः॥२७॥सएवत्वंराव
णस्यवधायमानुषींतनुंप्रविष्टोसिमाययेतिशेषः।एवंतत्वेनत्वयातदिदंरावणवधरूपंनः

अग्निःकोपःप्रसादस्तेसोमःश्रीवत्सलक्षणः॥त्वयालोकास्त्रयःक्रांताःपुरास्वैर्विक्रमैस्त्रिभिः॥२६॥
महेंद्रश्चकृतोराजाबलिंबध्वासुदारुणं॥सीतालक्ष्मीर्भवान्विष्णुर्देवःकृष्णःप्रजापतिः॥२७॥
वधार्थंरावणस्येहप्रविष्टोमानुषींतनुं॥तदिदंनस्त्वयाकार्यंकृतंधर्मभृतांवर॥२८॥नि
हतोरावणोरामप्रहृष्टोदिवमाक्रम॥अमोघंदेववीर्यंतेनतेमोघाःपराक्रमाः॥२९॥

सर्वेषांदेवानांकार्यंकृतं॥२८॥अथवृत्तानुष्ठानानुवादपूर्वंवर्त्तिष्यमाणकर्त्तव्यमाहःनिहतइति
रावणोहतः।एवंचावतारकार्यंनिवृत्तमतःपरंमाहाराज्येनकिंचित्कालंप्रत्यक्षःसन्दिवं·पर
नाकाख्यंब्रह्मलोकमाक्रमप्राप्नुहि।एवंसिद्धकार्यत्वात्तेवीर्यंबलममोघंतन्मलाःपराक्रमा
श्चनमोघाननिष्फलाःअपितुसफला।इत्यर्थः॥२९॥

तमेवसहस्रचरणत्वादिविशिष्टानंतरूपोभूत्वा·पृथिव्यादीन्तद्वर्त्तिभूतानिचधारयति·तथांते·
अहंते·पृथिव्याउपरिवर्त्तिनिसलिलेत्वंमहोरगशायनोदशपसे·एवंचपृथिव्याअधउपरिचप्र
तिष्ठितस्वशक्तिस्त्वमित्युक्तं॥२२॥हेरामत्रीन्लोकान्धारयन्त्वंविराट्नारायणोसीत्यर्थः एतेन
यतश्चाहमुत्पन्नइतिप्रश्नस्योत्तरंदत्तं·एवंदेहत्वमुपदिश्यदेहित्वमुपदिशति· अहंतेहृदयमिति·
हेरामरामोपग्रहस्यतवहृदयंसर्वाधारभूतमांतरंत्वदात्मतत्त्वमहमेवज्ञानस्वरूपःमहाकाशइ

त्वंधारयसिभूतानिपृथिवींसर्वपर्वतान्॥अंतेपृथिव्याःसलिलेदशपसेत्वंमहोरगः॥२२॥त्रीन्लो
काधारयन्रामदेवगंधर्वदानवान्॥अहंतेहृदयंरामजिह्वादेवीसरस्वती॥२३॥देवारोमाणिगात्रे
षुब्रह्मणानिर्मिताःप्रभो॥निमेषस्तेस्मृतारात्रिरुन्मेषोदिवसस्तथा॥२४॥संस्कारास्त्वभवन्वेदा
नैतदस्तित्वयाविना॥जगत्सर्वंशरीरंतेस्थैर्यंतेवसुधातलम्॥२५॥

वघटाकाशस्य·तवजिह्वामन्नि
र्मितावाग्देवीसरस्वती॥२३॥देवाइंद्रियदेवादिग्वातार्कादयस्तवगात्रेषुश्रोत्रादिषुब्रह्मणामयानि
र्मिताःरोमाणिचनिर्मितान्योषधिवनस्पत्यादिनेतिशेषः·निमेषोन्मेषौचरात्रिदिवसत्वेनप्रसिद्धौ॥२४॥
संस्काराःसंस्क्रियंतेवोध्यंतएभिर्लोकाइतिसंस्काराःप्रवृत्तिनिवृत्तिव्यवस्थावोधकाःनैतदस्तीति·त्व
याविनायदस्तितत्किमपीत्यर्थः·कार्यकारणरूपंसर्वंजगत्तेशरीरं·स्थैर्यमशेषप्रजानित्यधारण
सामर्थ्यंवसुधातलमेव॥२५॥

इदानींतत्परैतत्स्तोत्रपाठफलमुपदिशन्ति इममिति· ऋषिर्वेदस्तदुक्तसगुणनिर्गुणब्रह्मविद्याप्रति
·पादकत्वादार्षः सचासौस्तवश्चेत्यार्षस्तवस्तं· अतएव दिव्यंपुरातनंपुरावृत्तप्रतिपादकं· इतिहा
संअनादिसिद्धपुरातनब्रह्मविद्याप्रतिपादकत्वात् एवंभूतंब्रह्मविद्यास्तवंयेकीर्त्तयिष्यंतिते
षांपराभवःपरैरिहामुत्रलोकशत्रुभिःपुत्रदारादिभिःपापैश्चाभिभवआक्रमणंनास्तिनभविष्य

इममार्षस्तवंदिव्यमितिहासंपुरातनं॥येनराःकीर्त्तयिष्यंतिनास्तितेषांपराभवः॥३२॥इत्या
र्षेश्रीरा॰यु॰एकोनविंशाधिकशततमःसर्गः॥११९॥एतच्छ्रुत्वाशुभंवाक्यंपितामहसमीरितं।
अंकेनादायवैदेहीमुत्पपातविभावसुः॥१॥विधूयाथचितांतांतुवैदेहींहव्यवाहनः॥उत्तस्थौ
मूर्त्तिमानाशुगृहीत्वाजनकात्मजां॥२॥तरुणादित्यसंकाशांतप्तकांचनभूषणां॥रक्तांवरधरां
वालांनीलकुंचितमूर्द्धजां॥३॥अक्लिष्टमाल्याभरणांतथारूपामनिंदितां॥ददौरामायवैदेहींमं
केकृत्वाविभावसुः॥४॥

तिच॥३२॥इतिश्रीरामाभिरामेश्रीरा॰एकोनविंशोत्तराधिकशततमःसर्गः
११९॥कं॰११०॥एतदिति·पितामहसमीरितं·शुभंपरमशोभनंनिजब्रह्मत्वप्रतिपादकंवाक्यंश्रुत्वा
ध्यात्वाचप्रसन्नतयावस्थानकालेइतिशेषः अंकेनादाय·रयिंचपुत्रांश्चादादग्निर्मर्त्यमितिश्रुत्यर्थ
मपरोक्षमेवसंपादयन्नित्यर्थः॥१॥मूर्त्तिमान्·स्रुक्स्रुवादिचिन्हनिजमूर्त्तियुक्तः॥२३॥अक्लिष्टेति·अ
ग्निसंवंधेपीतिशेषःतथारूपापूर्वानुभूतशोभायुक्ता

अथरामस्यसर्वोपास्यत्वंसर्वाभीष्टसिद्धिप्रदत्वंचाहामोघमितिहेरामतेदर्शनमेवंमूर्त्तेस्तेद
र्शनंसुग्रीवादीनाममोघं·एवंकालांतरेकृत्वाचिंतितइष्टूणामप्यमोघंएहिकामुष्मिकसकल
साधनंतवसंस्तवःरामनारायणेत्येवंरूपोऽमोघःसकलेष्टदःयेचत्वयिभक्तिमंतःसोहमेवेति

अमोघंदर्शनंरामअमोघस्तवसंस्तवः॥अमोघास्तेभविष्यंतिभक्तिमंतोनराभुवि॥३०॥
येत्वांदेवंध्रुवंभक्ताःपुराणंपुरुषोत्तमं॥प्राप्नुवंतितथाकामानिहलोकेपरत्रच॥३१॥

गौणत्वात्वदुपासकास्त्वाहमितिवोपासकास्तेप्यमोघंसंसारमार्गमतिक्रांताःसत्यसंकल्पत्वा
दिमंतःसंतोमल्लोकप्राप्तिरूपामोघफलाभविष्यंतिकिंपुनर्येसर्वात्मनात्वदभेदध्यानवंतइत्यर्थः
॥३०॥उक्तमर्थमुपसंहरति·दार्ढ्याययेत्वामिति॥३१॥

तदुक्तोनाचिंतयत॰नागणयत॰ तत्रहेतुंरंतरात्मनस्तद्गतत्वं एवंचयत्प्रतिविंवस्याप्येवंव्यवस्थातद्विंवस्य शुद्धत्वेकिंवक्तव्यमितिध्वनिः॰विशुद्धभावांविशुद्धांतरां॰अतएवनिष्पापांनकिंचिदितिमन्नियोगानंतरं प्रतिग्राह्यानवेतिसंदेहोनगृह्णामीतिनिषेधश्चनकर्त्तव्यइत्यर्थः॰कुतएवंतत्राह॰आज्ञापयामितेइति॰

नाचिंतयततद्वृत्तस्त्वद्गतेनांतरात्मना॥ विशुद्धभावांनिष्पापांप्रतिगृह्णीष्वमैथिलीं॥ नकिंचिदभिधातव्याअहमाज्ञापयामिते॥९॥ ततःप्रीतमनारामःश्रुत्वैवंवदतांवरः॥ दध्यौमुहूर्त्तंधर्मात्माहर्षव्याकुललोचनः॥१०॥ एवमुक्तोमहातेजाधृतिमानुरुविक्रमः॥ उवाचत्रिदशश्रेष्ठंरामोधर्मभृतांवरः॥११॥ अवश्यंचापिलोकेषुसीतापावनमर्हति॥ दीर्घकालोषिताहीयंरावणांतःपुरेशुभा॥१२॥ बालिशोवतकामात्मारामोदशरथात्मजः॥ इतिवक्ष्यतिमांलोकोजानकीमविशोध्यहि॥१३॥

एवमुक्तिस्तुरामेणास्वस्वरूपाज्ञाननाटनात्तदनुसारेणारुद्रमूर्त्तेर्भगवतोग्नेरपीतिमंतव्यं॥९॥ दध्यौकिमिहोचितंवक्तव्यमितिध्यानवानितिशेषः॥१०॥११॥ पावनंस्वार्थेण्यंतात्॰भावेल्युट्शुद्धिमित्यर्थः॥१२॥ जानकीमविशोध्यग्राहिणंमांरावणांतःपुरेदीर्घकालोषितांतांदशरथात्मजोयत्नगृहीतवान् तत्सकामात्माकामपरतंत्रचित्तः॰बालिशोभूलोकव्यवहारापरिज्ञोयनोनइतिलोकोमांवक्ष्यति॰ततःशुद्ध्यर्थमग्निप्रवेशोमयानुमतइतिशेषः॥१३॥

तदादानसमये· लोकस्यमनोवाक्कायैर्लोककृतपुण्यपापकर्मणः साक्षीसाक्षाद्द्रष्टासर्वदेहांतर्वैश्वानरात्मा
नानित्यप्रतिष्ठितत्वादितिभावः एषायामयिरावणाहरणकालेप्रविष्टासैषाएवंहिकूर्मपुराणानुसारे
णव्याख्यातंतच्चप्राक्निरूपितं पापंरावणस्पर्शरूपमपि ॥५॥ सुवृत्तावृत्तशौंडीर्येत्वांमनआदिभिः

अब्रवीच्चतदारामंसाक्षीलोकस्यपावकः ॥ एषातेरामवैदेहीपापमस्यांनविद्यते ॥५॥ नैववाचा
नमनसानैवबुद्ध्यानचक्षुषा ॥ सुवृत्तावृत्तशौंडीर्यंनत्वामत्यचरच्छुभा ॥ रावणेनापनीतैषावी
र्योत्सिक्तेनरक्षसा ॥६॥ त्वयाविरहितादीनाविवशानिर्जनेसती ॥ रुद्धाचांतःपुरेगुप्तात्वच्चिंता
त्वत्परायणा ॥७॥ रक्षिताराक्षसीभिश्चघोराभिर्घोरबुद्धिभिः ॥ प्रलोभ्यमानाविविधंतर्ज्यमा
नाचमैथिली ॥८॥

प्रत्येकंसंमुदितैश्चनात्यचरत्· एषायाइदानींमयिप्रविष्टा ॥६॥ रुद्धानिरुद्धस्वच्छंदगमनादिव्य
वद्वारागुप्तापरिहृतस्वजनदर्शनात्वच्चिंतात्वयिचिंतायस्याःसा· अतएवत्वत्परायणात्वद्गतिः ॥७।८

एतद्वाक्यं श्रुत्वा युष्मदाज्ञयासीतामंगीकरोम्येवेत्युक्तं वाक्यं श्रुत्वा ततः सीताग्रहणानियोगानुष्ठाना
नंतरं ॥१॥ महावक्षः हेमहोरस्कः ॥२॥ तमो दुःखं ॥३॥ आश्वास्येति अयोध्यां गत्वेति शेषः ॥४॥ कुले कुलप
रिपालननिमित्तं वंशसंतानं दशवर्षसहस्राणि दशवर्षशतानि च वत्स्यामि मानुषे लोक इति ॥ अ

एतच्छ्रुत्वा शुभं वाक्यं राघवेणानुभाषितं ॥ ततः शुभतरं वाक्यं व्याजहार महेश्वरः ॥१॥ पुष्कराक्ष
महाबाहो महावक्षः परंतप ॥ दिष्ट्या कृतमिदं कर्म त्वया धर्मभृतां वर ॥२॥ दिष्ट्या सर्वस्य लोक॰
स्य प्रवृद्धं दारुणं तमः ॥ अपवृत्तं त्वया संख्ये राम रावणजं भयं ॥३॥ आश्वास्य भरतं दीनं कौ
सल्यां च यशस्विनीं ॥ कैकेयीं च सुमित्रां च दृष्ट्वा लक्ष्मणमातरं ॥४॥ प्राप्य राज्यमयोध्यां च
नंदयित्वा सुहृज्जनं ॥ इक्ष्वाकूणां कुले वंशं स्थापयित्वा महाबल ॥५॥ इष्ट्वा तुरगमेधेन प्राप्य
चानुत्तमं यशः ॥ ब्राह्मणेभ्यो धनं दत्वा त्रिदिवं गंतुमर्हसि ॥६॥ अ ॥

वतारात्पूर्वं प्रतिज्ञासत्वात्प्राप्य राज्यमित्याद्युक्तं ॥५॥ तुरगमेधेनेष्ट्वा भगवंतं प्रजापतिमिति शेषः ॥
अनुत्तमं यशो महद्यश इत्यादिकं प्रजापतिनाम ॥ तस्य नाम महद्यश इति श्रुतेः ॥ अश्वमेधफलं च तत्प्रा
प्तिरेव प्रजापतिं वा एष ईप्सति योऽश्वमेधेन यजत इति श्रुतेरिति कतकः ॥ त्रिदिवं भूः स्वः पदापेक्षया
तृतीयं दिवं ब्रह्मलोकं ॥६॥

इयंशुद्धेतिहृदयेजानाम्येवेत्याहानन्येति॰ मच्चित्तपरिरक्षिणी॰ मद्गतचित्तत्वेनात्मनोदोषपरिरक्षणशीलां॥१३॥स्वेनतेजसापातिव्रत्येन॥१४॥प्रधर्षयितुंनशक्तः अतएवाप्राप्यां॰ अशक्यग्रहांतत्रनिदर्शनंदीप्तामिति॥१५॥वैक्लव्यंकातर्यं॰पीडांअनन्याहीति॰ अधैर्याएव आत्मनोपत्नीनिष्कृते॰ शक्तिशक्ति

अनन्यहृदयांसीतांमच्चित्तपरिरक्षिणीं॥अहमप्यवगच्छामिमैथिलींजनकात्मजां॥१३॥इमामपिविशालाक्षींरक्षितांस्वेनतेजसा॥रावणोनातिवर्त्तेतवेलामिवमहोदधिः॥१४॥नचशक्तःसुदुष्टात्मामनसापिहिमैथिलीं॥प्रधर्षयितुमप्राप्यांदीप्तामग्निशिखामिव॥१५॥नेयमर्हतिवैक्लव्यंरावणांतःपुरेसती॥अनन्याहिमयासीताभास्करस्यप्रभायथा॥१६॥विशुद्धात्रिषुलोकेषुमैथिलीजनकात्मजा॥नविहातुंमयाशक्याकीर्त्तिरात्मवतायथा॥१७॥अवश्यंचमयाकार्यंसर्वेषांवोवचोहितं॥स्निग्धानांलोकनाथानामेवंचवदतांहितं॥१८॥इत्येवमुक्त्वाविजयीमहाबलःप्रशस्यमानः॥स्वकृतेनकर्मणा॥समेत्यरामःप्रिययामहायशाःसुखंसुखार्होनुबभूवराघवः॥१९॥

इत्यार्षेश्रीरा॰यु॰विंशोत्तरशततमःसर्गः॥१२१॥

मनोरभेदाश्च॰ अनेनाग्निदत्तायारावणस्पर्शाद्यभावः स्पष्टमेवोक्तः॥१६॥१७॥सर्वेषांवोवचः सीताग्रहणविषयंमेहितंमयावश्यंकार्यंकर्त्तुंयो॰ग्यं स्निग्धानांमयिस्नेहवतांलोकमान्यानामशेषजगत्पूज्यानांएवंपूर्वोक्तप्रकारेणहितंवदतां॥१८॥१९॥ क॰ १११॥इतिश्री

१८॥१९॥इसुमिक्केयंस्वत्लोकस्थाएवसन्निति शेषः॥२०॥२१॥२२॥२३॥२४॥घोरःसशापःसपुत्रांकैके

सिद्धार्थाखलुकौसल्यायात्वांरामगृहंगतं॥वनान्निवृत्तंसंदृष्ट्वाद्रक्ष्यतेशत्रुसूदनं॥१८॥सि
द्धार्थाःखलुतेरामनरायेत्वांपुरीगतं॥राज्येचैवाभिषिक्तंचद्रक्ष्यंतेवसुधाधिपं॥१९॥अनुरक्ते
नबलिनाशुचिनाधर्मचारिणा॥इच्छेयंत्वामहंद्रष्टुंभरतेनसमागतं॥२०॥चतुर्दशसमाःसौ
म्यवनेनिर्यापितास्त्वया॥वसतासीतयासार्द्धंमत्प्रीत्यालक्ष्मणेनच॥२१॥निवृत्तवनवासोसि
प्रतिज्ञापूरितात्वया॥रावणंचरणेहत्वादेवताःपरितोषिताः॥२२॥कृतंकर्मयशःश्लाघ्यंप्रा
प्तंतेशत्रुसूदन॥भ्रातृभिःसहराज्यस्थोदीर्घमायुरवाप्नुहि॥२३॥इतिब्रुवाणंराजानंरामः
प्रांजलिरब्रवीत्॥कुरुप्रसादंधर्मज्ञकैकेय्याभरतस्यच॥२४॥सपुत्रांत्वांत्यजामीतियदु
क्ताकेकयीत्वया॥सशापःकेकयींघोरःसपुत्रांनस्पृशेत्प्रभो॥२५॥तथेतिसमहाराजोराम
मुक्त्वाकृतांजलिं॥लक्ष्मणंचपरिष्वज्यपुनर्वाक्यमुवाचह॥२६॥धर्मंप्राप्स्यसिधर्मज्ञयश
श्चविपुलंभुवि॥रामेप्रसन्नेस्वर्गंचमहिमानंतथोत्तमं॥२७॥रामंशुश्रूषभद्रंतेसुमित्रानंदवर्ध
न॥रामःसर्वस्यलोकस्यहितेषभिरतःसदा॥२८॥एतेसेंद्रास्त्रयोलोकाःसिद्धाश्चपरमर्षयः॥अभि
वाद्यमहात्मानमर्चंतिपुरुषोत्तमं॥२९॥

यीयथानास्पृशेत्तथाप्रसादंकुरु॥२५॥२६॥स्वर्गमहिमानंच

ताप्स्यसित्वकर्मः॥२७॥२८॥२९॥

एषइतिपुरःस्थस्यापिदेववदेहपरिग्रहेणाज्ञायमानतयांगुल्यानिर्देशः ॥७॥८॥ विमानशिखरस्थस्यविमानो

एषराजादशरथोविमानस्थःपितातव ॥ काकुत्स्थमानुषेलोकेगुरुस्तवमहायशाः ॥७॥ इंद्रलोकंगतःश्रीमान्त्वयापुत्रेणतारितः ॥ लक्ष्मणेनसहभ्रात्रात्वमेनमभिवादय ॥८॥ महादेववचःश्रुत्वाराघवःसहलक्ष्मणः ॥ ~~भि~~विमानशिखरस्थस्यप्रणाममकरोत्पितुः ॥९॥ दीप्यमानंस्वयालक्ष्म्याविरजोंबरधारिणं ॥ लक्ष्मणेनसहभ्रात्राददर्शपितरंप्रभुः ॥१०॥ हर्षेणमहताविष्टोविमानस्थोमहीपतिः ॥ प्राणैःप्रियतरंदृष्ट्वापुत्रंदशरथस्तदा ॥११॥ आरोप्यांकेमहाबाहुर्वरासनगतःप्रभुः ॥ बाहुभ्यांसंपरिष्वज्यततोवाक्यंसमाददे ॥१२॥ नमेस्वर्गोबहुमतःसंमानश्चसुरर्षभैः ॥ त्वयारामविहीनस्यसत्यंप्रतिशृणोमिते ॥१३॥ कैकेय्यायानिचोक्तानिवाक्यानिवदतांवर ॥ नचप्रव्राजनार्थानिस्थितानिहृदयेमम ॥१४॥ त्वांतुदृष्ट्वाकुशलिनंपरिष्वज्यसलक्ष्मणं ॥ अद्यदुःखाद्विमुक्तोस्मिनीहारादिवभास्करः ॥१५॥ तारितोहंत्वयापुत्रसुपुत्रेणमहात्मना ॥ अष्टावक्रेणधर्मात्माकहोलोब्राह्मणोयथा ॥१६॥ इदानींचविजानामियथासौम्यसुरेश्वरैः ॥ वधार्थंरावणस्येहपिहितंपुरुषोत्तम ॥१७॥ ॥

परिप्रतिष्ठितस्य ॥९॥१०॥११॥१२॥ सुरर्षभैःसमानोपिस्वर्गोनबहुमतः ॥१३॥१४॥१५॥ अष्टावक्रपिताकहोलनामर्षिःपुत्रेणस्वधर्मेणतारितइतिपौराणिकीकथा ॥१६॥ पिहितंपुरुषोत्तमंआह्लादितंमत्पुत्रत्वेनेतिशेषः ॥१७॥

३७। क०। ११२। इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयुद्धकांडेएकविंशाधिकशततमःसर्गः१२१
काकुत्स्थेदशरथेमहेंद्रस्तत्सन्निहितोब्रह्माइत्यप्यर्थःसत्यसंकल्पत्वस्यतस्मिन्नेवप्रसिद्धेःवानराणांसंक-
ल्पमात्रेणोत्थानस्यवक्ष्यमाणत्वात्भारतेपि·ततस्तेब्रह्मणाप्रोक्तेतथेतिवचनेनदा·समुत्तस्थुर्महारा-

विमानमास्थायमहानुभावःश्रियाचसंदृष्टतनुर्नृपोत्तमः॥ आमंत्र्यपुत्रौसहसीतयाचजगाम
देवप्रवरस्यलोकं॥३७॥ इत्यार्षेश्रीरामायणेयुद्धकांडेएकविंशाधिकशततमःसर्गः॥१२१॥ ।
प्रतिप्रयातेकाकुत्स्थेमहेंद्रःपाकशासनः॥ अब्रवीत्परमप्रीतोराघवंप्रांजलिंस्थितं॥१॥ अमो-
घंदर्शनंरामतस्माकंनरर्षभ॥ प्रीतियुक्ताःस्मतेनत्वंब्रूहियन्मनसेप्सितं॥२॥ एवमुक्तोमहेंद्रेण
प्रसन्नेनमहात्मना॥ सुप्रसन्नमनाहृष्टोवचनंप्राहराघवः॥३॥ यदिप्रीतिःसमुत्पन्नामयितेविबु-
धेश्वरवक्ष्यामिकुरुमेसत्यंवचनंवदतांवर॥४॥ ममहेतोःपराक्रांतायेगतायमसादनं॥ तेसर्वेजी-
वितंप्राप्यसमुत्तिष्ठंतुवानराः॥५॥

जवानराल्लब्धचेतसइत्युक्तं·पाद्मेपि·पितामहवरात्तूर्णंजी-
वयामासतान्नृपइतिप्रांजलिंस्थितंराघवंप्रतीतिशेषः॥१॥ अस्माकंदर्शनंकृतोपकारस्यतवामोघं
·प्रत्युपकारेणाचरितार्थंभवत्वीतिशेषःतेनयतःप्रीतियुक्तास्तेनेत्यर्थः॥२॥३॥ यद्वचनंवक्ष्यामिसत्स-
त्यंकुरु॥४॥ पराक्रांताःकृतपराक्रमाः॥५॥ ॥ ॥ ॥ ॥

एतद्वामरूपंवस्तुतज्जानीहीतिशेषः यत्तद्देवानांहृदयमुक्तं देवानांहृदयंब्रह्मान्वविंदति अस्मादेव
हृदयत्वेनोपदिष्टं तथादेवानांगुह्यंएतद्वैमहोपनिषद्देवानांगुह्यत्वेनोपदिष्टंब्रह्मसंमितं ब्रह्मणा
अंतरस्मिनिमेलोकाइत्यादिश्रुत्याप्रतिपादितं॥ अक्षरं अशेषजगत्कारणंतयानित्यं यद्ब्रह्मास्तिब्र

एतत्तदुक्तमव्यक्तमक्षरंब्रह्मसंमितं॥ देवानांहृदयंसौम्यरगुह्यंरामःपरंतपः॥३०॥अवाप्तंधर्म
चरणंयशश्चविपुलंत्वया॥एनंशुश्रूषताव्यग्रंवैदेह्यासहसीतया॥३१॥इत्युक्त्वोत्तमांराज्ञा
स्नुषावद्धांजलिंस्थितां॥पुत्रीत्याभाष्यमधुरंशनैरेनामुवाचह॥३२॥कर्त्तव्योनतुवैदेहिमन्यु
स्त्यागमिमंप्रति॥रामेणेदंविशुद्ध्यर्थंकृतंवैत्वद्धितैषिणा॥३३॥सुदुष्करमिदंपुत्रितवचा
रित्रलक्षणं॥कृतंयत्तेन्यनारीणांयशोह्यभिभविष्यति॥३४॥नत्वंकामंसमाधेयाभर्तृशुश्रूष
णंप्रति॥अवश्यंतुमयावाच्यमेषतेदैवतंपरं॥३५॥इतिप्रतिसमादिश्यपुत्रौसीतांचराघवः
इंद्रलोकंविमानेनययौदशरथोनृपः॥३६॥

ह्मशब्देतंत्रे॥३०॥यतएवंभूतोरामोब्रह्मादिभिस्त्वत्सम
क्षमेवोक्तोतएवंशुश्रूषतात्वयासर्वंधर्मचरणंप्राप्तंब्रह्मज्ञधर्मेसर्वधर्मांतरभावस्यसंवर्गविद्याया
मुक्तात्वादितिभावः॥३१॥३२॥इमंत्यागंप्रति यथेष्टंगम्यतामित्युक्तरूपं॥३३॥३४॥यद्यपिभर्तृशुश्रूषां
प्रतित्वंनसमाधेयानप्रार्थनापूर्वंनियोज्या तत्रतेस्वतःप्रवृत्तिसत्त्वात् अथापिममागुरुत्वादवश्यव

कांडेटवाहंतौदेवतंपरमिति॥५६॥६३॥

ततःसमुत्थिताःदेवराजस्यानुग्रहरूपसंकल्पानंतरं॥१७॥१८॥१९॥२०॥२१॥२२॥वासमाज्ञापय

सव्रणैःप्रथमंगात्रैरिदानींनिर्व्रणैःसमैः॥ततःसमुत्थिताःसर्वेसुप्त्वेवहरिसत्तमाः॥बभू
वुर्वानराःसर्वेकिंत्वेतदितिविस्मिताः॥१७॥काकुत्स्थंपरिपूर्णार्थंदृष्ट्वासर्वेसुरोत्तमाः
अब्रुवन्परमप्रीताःस्तुत्वारामंसलक्ष्मणं॥१८॥गच्छायोध्यामितोराजन्विसर्जयचवान
रान्॥मैथिलींसांत्वयस्वैनामनुरक्तांयशस्विनीं॥१९॥भ्रातरंभरतंपश्यत्वच्छोकाद्व्रतचा
रिणं॥शत्रुघ्नंचमहात्मानंमातॄःसर्वाःपरंतप॥२०॥अभिषेचयचात्मानंपौरान्गत्वाप्र
हर्षय॥२१॥एवमुक्त्वासहस्राक्षोरामंसौमित्रिणासह॥विमानैःसूर्यसंकाशैर्ययौहृ
ष्टःसुरैःसह॥२२॥अभिवाद्यचकाकुत्स्थःसर्वांस्तांस्त्रिदशोत्तमान्॥लक्ष्मणेनसहभ्रा
त्रावासमाज्ञापयत्तदा॥२३॥

न्यथापूर्वमाज्ञापयदित्यर्थः॥२३॥श्रीरामायरामभद्रायरामचंद्रायवेधसेरघुनाथायनाथा

विप्रयुक्ताःजीवितनाशेनेतिभावः॥६॥७॥मत्प्रियेषुमत्प्रियकृत्येषुत्वत्प्रसादात्समेयुस्तेस्वजनैरितिशेषः॥८॥

मत्कृतेविप्रयुक्तायेपुत्रैर्दारैश्चवानराः॥तान्प्रीतमनसःसर्वान्द्रष्टुमिच्छामिमानद॥६॥विक्रांता
श्चापिशूराश्चनमृत्युंगणयंतिच॥कृतयत्नाविपन्नाश्चजीवयैतान्पुरंदर॥७॥मत्प्रियेष्वभिर
क्ताश्चनमृत्युंगणयंतिये॥त्वत्प्रसादात्समेयुस्तेवरमेतमहंवृणे॥८॥नीरुजोनिर्व्रणांश्चैवसं
पन्नबलपौरुषान्॥गोलांगूलांस्तथार्क्षांश्चद्रष्टुमिच्छामिमानद॥९॥अकालेचापिपुष्पाणिमूला
निचफलानिच॥नद्यश्चविमलास्तत्रतिष्ठेयुर्यत्रवानराः॥१०॥श्रुत्वातुवचनंतस्यराघवस्यम
हात्मनः॥महेंद्रःप्रत्युवाचेदंवचनंप्रीतिसंयुतं॥११॥महानयंवरस्तातयस्त्वयोक्तोरघूत्तम॥द्वि
र्मयानोक्तपूर्वंचतस्मादेतद्भविष्यति॥१२॥समुत्तिष्ठंतुतेसर्वेहतायेयुधिराक्षसैः॥ऋक्षाश्चस
हगोपुच्छैर्निकृत्ताननबाहवः॥१३॥नीरुजोनिर्व्रणाश्चैवसंपन्नबलपौरुषाः॥समुत्थास्यंतिहर
यःसुप्तानिद्राक्षयेयथा॥१४॥सुहृद्भिर्बांधवैश्चैवज्ञातिभिःस्वजनेनच॥सर्वएवसमेष्यंतिसं
युक्ताःपरयामुदा॥१५॥अकालेपुष्पशबलाःफलवंतश्चपादपाः॥भविष्यंतिमहेष्वासनद्यश्चसलि
लायुताः॥१६॥

॥९॥उत्थितानांसर्वदासुखलाभायवरांतरं॥अकालेचापीति॥१०॥११॥महानिति॥एक
स्यापिमृतस्यपुनरुज्जीवनंदुष्करमपरिमितमृतजीवनंतुमदतिरिक्ताशक्यमितिभावः॥१२॥१३॥१४॥१५॥१६॥

६॥ प्रतिगन्तुकामोतिलोट्॥७॥८॥९॥ त्वदर्थंपालितंचे।दंतिष्ठतातिहन्तेपिरावणोद्गतिशेषः॥१०॥ तदिद
मिति·त्वत्कार्यावर्त्तमानस्यामिपुष्पकस्यात्युन्नततया·शिविर॥रपिदृश्यमानत्वादिदमितिप्रत्यक्ष

तंविनाकैकेयीपुत्रंभरतंधर्मचारिणं॥ नमेस्नानंबहुमतंवस्त्राण्याभरणानिच॥६॥ एतत्प
श्यपथाक्षिप्रंप्रतिगन्तुकामतांपुरीं॥ अयोध्यांगच्छतोह्येषपंथाःपरमदुर्गमः॥७॥ एवमुक्त
स्तुकाकुत्स्थंप्रत्युवाचविभीषणः॥ अन्हात्वांप्रापयिष्यामितांपुरींपार्थिवात्मज॥८॥ पुष्प
कंनामभद्रंतेविमानंसूर्यसन्निभं॥ ममभ्रातुःकुबेरस्यरावणेनवलीयसा॥९॥ हृतंनि
र्जित्यसंग्रामेकामगंदिव्यमुत्तमं॥ त्वदर्थंपालितंचैवतिष्ठत्यतुलविक्रम॥१०॥ तदिदं
मेघसंकाशंविमानमिहतिष्ठति॥ तेनयास्यसियानेनत्वमयोध्यांगतज्वरः॥११॥ अहंते
यद्यनुग्राह्योयदिस्मरसिमेगुणान्॥ वसतावदिहप्राज्ञयद्यस्तिमयिसौहृदं॥१२॥ लक्ष्म
णेनसहभ्रात्रावैदेह्याभार्ययासह॥ अर्चितःसर्वकामैस्त्वंततोरामगमिष्यसि॥१३॥ प्रीति
युक्तस्यविहितांससैन्यःससुहृद्गणः॥ सत्क्रियांराममेतावद्गृहाणत्वंमयोद्यतां॥१४॥ प्र
णयाद्बहुमानाच्चसौहार्देनचराघव॥ प्रसादयाम्यहंप्रेष्योहंनखल्वाज्ञापयामिते॥१५॥

वन्निर्देशः इहलंकायां॥११॥ वसतावदिहेति एकदिवसमितिशेषः॥१२॥१३॥ विहितांशास्त्रवि
हितांमयोपक्लृप्तांमेमत्तः॥१४॥ नखल्वाज्ञापयामिते अत्रहेतुःप्रेष्योहमिति॥१५॥

372

यद्यपिरामेणापीक्षामात्रेणैतत्सुकरंतथापिगृहीतमानुष्यदेहत्वात्तत्स्वरूपगोपनायसेंद्रब्रह्मद्वारातथाकृ
तमितिध्येयं·येप्यमृतवर्षाद्इंद्रेणसर्वसमुत्थानंकृतमितिवदंतितत्पक्षेपिरावणसंस्काराद्दिनेसर्वे
रक्षसांदाहादिसंस्कारपूर्वकंभस्मनःसमुद्रप्रक्षेपात्तदुत्थानशंकापूर्वंयुद्धकालएवमृतानांसमु
द्रप्रक्षेपइतिमूलएवपूर्वमुक्तत्वाच्च अन्येतुसश्लोकस्तत्राधुनिकप्रक्षिप्तः नत्वौषधगंधमात्रेणसर्वे

ततस्तुसालक्ष्मणरामपालितामहाचमूर्हृष्टजनायशस्विनी॥ श्रियाज्वलंतीविरराजसर्वतो
निशाप्रणीतेवहिशीतरश्मिना॥२४॥ इत्यार्षेश्रीरा॰ यु॰ द्वाविंशाधिकशततमःसर्गः॥१२२॥ ।
तांरात्रिमुषितंरामंसुखोदितमरिंदमं॥ अब्रवीत्प्रांजलिर्वाक्यंजयंपृष्ट्वाविभीषणः॥१॥ स्नाना
निचांगरागाणिवस्त्राण्याभरणानिच॥ चंदनानिचमाल्यानिदिव्यानिविविधानिच॥२॥ अलंकार
विदश्चैताःनार्यःपद्मनिभेक्षणः॥ उपस्थितास्त्वांविधिवत्स्नापयिष्यंतिराघव॥३॥ एवमुक्तस्तु
काकुत्स्थःप्रत्युवाचविभीषणंः॥ हरीन्सुग्रीवमुख्यांस्त्वंस्नानेनोपनिमंत्रय॥४॥ सतुताम्यतिधर्मा
त्माममहेतोःसुखोचितः॥ सुकुमारोमहाबाहुर्भरतःसत्यसंश्रयः॥५॥

षांविशल्यता·किंतुव्रणीकृत
तस्यपदानेनेतिप्रागेवोक्तंतथाचतदभावान्नतेषांविशल्यतामृतानांगंधाघ्राणाभावाच्चरावणस्यतथात्वाया
अश्रवणाच्चेत्याहुः॥२४॥ क॰॥११३॥ इतिश्रीरा॰ यु॰ द्वाविंशाधिकशततमःसर्गः॥१२२॥ गतांरात्रिमिति·यत्र
दिनेब्रह्मादयोजग्मुस्तत्संबंधिनींरात्रावित्यर्थः·सुखोदितं·सुखप्रबुद्धं·जयंपृष्ट्वाजयशब्दंप्रयुज्य॥१॥ स्ना
नानिस्नानसाधनसुगंधतैलादीनि॥२॥ अलंकार
अलंकरणक्रियासमर्थाः॥३॥४॥५॥

पताकाःसूक्ष्मध्वजाःहेमकृतपद्मभूषितैःकांचनैर्हर्म्यैःकांचनंकांचनमयमिव॥२५॥मुक्तामणिभिःकृतागवाक्षायस्मिन्तत्॥२६॥२७॥२८॥उपस्थितंविमानंनिवेदयित्वाविज्ञाप्य॥२९॥३०॥क॰११४॥इतिश्री

पांडुराभिःपताकाभिर्ध्वजैश्चसमलंकृतं॥कांचनंकांचनैर्हर्म्यैर्हेमपद्मविभूषितैः॥२५॥प्रकीर्णंकिंकिणीजालैर्मुक्तामणिगवाक्षकं॥घंटाजालैःपरिक्षिप्तंसर्वतोमधुरस्वनं॥२६॥तंमेरुशिखराकारंनिर्मितंविश्वकर्मणा॥वृहद्भिर्भूषितंहर्म्यैर्मुक्तारजतशोभितैः॥२७॥तलैःस्फटिकचित्रांगैर्वैडूर्यैश्चवरासनैः॥महार्हास्तरणोपेतैरुपपन्नंमहाधनैः॥२८॥उपस्थितमनाधृष्यंतद्विमानंमनोजवं॥निवेदयित्वारामायतस्थौतत्रविभीषणः॥२९॥तत्पुष्पकंकामगमंविमानमुपस्थितंभूधरसंनिकाशं॥दृष्ट्वातदाविस्मयमाजगामरामःससौमित्रिरुदारसत्वः॥३०॥इत्यार्षेश्रीरा॰यु॰त्रयोविंशाधिकशततमःसर्गः॥१२३॥

उपस्थितंतुतंकृत्वापुष्पकंपुष्पभूषितं॥अविदूरेस्थितोराममित्युवाचविभीषणः॥१॥सतुबद्धांजलिपुटोविनीतोराक्षसेश्वरः॥अब्रवीत्त्वरयोपेतःकिंकरोमितिराघवं॥२॥तमब्रवीन्महातेजालक्ष्मणस्योपशृण्वतः॥विमृश्यराघवोवाक्यमिदंस्नेहपुरस्कृतं॥३॥

रामाभिरामेश्रीरा॰रा॰ति॰यु॰त्रयोविंशाधिकशततमःसर्गः॥१२३॥अविदूरेस्थित्वत्वादिविशेषणोविभीषणःपुष्पकमुपस्थितमासन्नंकृत्वाराममित्युवाच॥१॥कथमुवाचेत्यतःअब्रवीदिति॥२॥तंकिंकरोमीत्युक्तवंतंउपशृण्वतोलक्ष्मणस्यअग्रेइतिशेषः॥३॥

रा
३७

१६ साचिव्यंमंत्रसाहाय्यंसर्वात्मनाचचेष्टाभिरिति कायवाङ्मनोभिःकृतसुहृच्चेष्टाभिःपरेणोत्तमेन सौ
हार्द्देनोत्तमेनचत्यैवक्वचित्पाठः॥१७॥अथाप्येनत् अत्रस्थित्वा त्वत्सत्कारस्वीकारंनकुर्यामितिनविशि

एवमुक्तस्ततोरामःप्रत्युवाचभिवैषणं॥रक्षसांवानराणांचसर्वेषामेवसृण्वतां॥१६॥पूजितोस्मि
त्वयावीरसाचिव्येनपरेणच॥सर्वात्मनाचचेष्टाभिःसौहार्द्देनपरेणच॥१७॥नखल्वेतन्नकु
र्यांनिवचनंराक्षसेश्वर॥तंतुमेभ्रातरंद्रष्टुंभरतंत्वरतेमनः॥१८॥मांनिवर्त्तयितुंयोसौचित्रकू
टमुपागतः॥शिरसायाचतोयस्यनकृतंवचनंमया॥१९॥कौसल्यांचसुमित्रांचकैकेयींचे
यशस्विनीं॥गुहंचसुहृदंचैवपौराञ्जानपदैःसह॥२०॥अनुजानीहिमांसौम्यपूजितोस्मि
विभीषण॥मन्युर्नखलुकर्त्तव्यःसखेत्वोचानुमानये॥२१॥उपस्थापयमेशीघ्रंविमानंराक्षसे
श्वर॥कृतकार्यस्यमेवासःकथंस्यादिहसम्मतः॥२२॥एवमुक्तस्तुरामेणराक्षसेंद्रोविभीषण-
विमानंसूर्यसंकाशमाजुहावत्वरान्वितः॥२३॥ततःकांचनचित्रांगंवैडूर्यमणिवेदिकं॥
कूटागारैःपरिक्षिप्तंसर्वतोरततप्रभं॥२४॥

ष्यकार्यमेवपरंत्वस्वीकारेहेतुमाहतंत्विति यस्यव
चनंमयानकृतंतंत्विति योजना॥१८॥१९॥सहद्रष्टुंत्वरतेमन इत्यनुषंगः॥२०॥अनुमानये कृतानु
मतिकोयथाभवसितथाप्रार्थयेइत्यर्थः॥२१॥२२॥एवमुक्त इति राघवस्यवचःश्रुत्वाराक्षसेंद्रोविभी
षणःतद्विमानंसमादायत्वरांप्रतिनिवर्त्तनेति [illegible]॥२३॥कूटागारैः शालागृहैः॥२४॥

रत्नार्थैःरत्नैरर्थैर्धनैश्चसंविभागेनयथार्हमंशकल्पनयेत्यर्थःसर्ववानरपूजार्थंदिनद्वयंह्रासःभारतेपिततस्ती
रेसमुद्रस्ययत्रशिश्येसपार्थिवःतत्रैवोवासधर्मात्मासहितस्तत्रवानरैःअथतान्वारन्दृष्ट्वाससंमान्याभि

एवमुक्तस्तुरामेणवानरांस्तान्विभीषणः।रत्नार्थसंविभागेनसर्वानेवाभ्यपूजयत्॥१०॥ततस्तान्
पूजितान्दृष्ट्वारत्नार्थैर्हरियूथपान्॥आरुरोहतदारामस्तद्विमानमनुत्तमं॥११॥अंकेनादाय
वैदेहींलज्जमानांमनस्विनीं॥लक्ष्मणेनसहभ्रात्राविक्रांतेनधनुष्मता॥१२॥अब्रवीत्सविमानस्थः
पूजयन्सर्ववानरान्॥सुग्रीवंचमहावीर्यंकाकुत्स्थःसविभीषणं॥१३॥मित्रकार्यंकृतमिदंभ
वद्भिर्वानरर्षभाः॥अनुज्ञातामयासर्वेयथेष्टंप्रतिगच्छत॥१४॥यत्तुकार्यंवयस्येनस्निग्धेनच
हितेनच॥कृतंसुग्रीवतत्सर्वंभवताधर्मभीरुणा॥१५॥किष्किंधांप्रतियात्याशुस्वसैन्येनाभिसं
वृतः॥स्वराज्येवसलंकायांमयादत्तेविभीषण॥१६॥नत्वांधर्षयितुंशक्ताःसेंद्राअपिदिवौकसः
अयोध्यांप्रतियास्यामिराजधानींपितुर्मम॥अभ्यनुज्ञातुमिच्छामिसर्वानामंत्रयामिवः॥१७॥एव
मुक्तास्तुरामेणहरींद्राहरयस्तथा॥ऊचुःप्रांजलयःसर्वेराक्षसश्चाविभीषणः॥१८॥

पूजयच·विस

र्जयामासतदारत्नैःसंतोष्यसत्कृत्येत्युक्तं॥१०॥११॥१२॥१३॥१४॥अधर्मभीरुणेतिछेदः॥१५॥सेंद्रा
दिवौकसोपित्वांधर्षयितुंशक्तामत्प्रसादादितिभावःतेभ्यपयवक्तिलराक्षसानांभयं॥१७॥१८॥

कृतप्रयत्नेनकार्मयुद्धकर्मयैस्त। अर्थैः विचित्रान्नपानवस्त्रादिभिः ४ अमीभिः सह लंका निर्जिते
त्यनेनतवलंकाप्राप्तिर्वानरपराक्रमादेवेति उक्तं प्राणभयंत्यक्त्वाहृष्टैः युद्धोत्साहवद्भिः ॥५॥६॥ य
थायथान्यायंत्वयाकृतज्ञेननंद्यमानानिर्वृत्ताः सुखिनोभविष्यंति ॥७॥ त्वांतत्सत्कारसमर्थंतेषां

कृतप्रयत्नकर्माणः सर्वएववनौकसः ॥ रत्नैरर्थैश्च विविधैः संपूज्यंतां विभीषण ॥४॥ स
हामीभिस्त्वयालंका निर्जिताराक्षसेश्वर ॥ हृष्टैः प्राणभयंत्यक्त्वा संग्रामेष्वनिवर्त्तिभिः ॥५॥
तदिमेकृतकर्माणः सर्वएववनौकसः ॥ धनरत्नप्रदानैश्च कर्मैषां सफलं कुरु ॥६॥ एवं स
म्मानिताश्चैते नंद्यमानायथात्वया ॥ भविष्यंति कृतज्ञेन निर्वृता हरियूथपाः ॥७॥ त्यागिनं
संग्रहीतारं सानुक्रोशं जितेंद्रियं ॥ सर्वेत्वामभिगच्छंति ततः संवोधयामिते ॥८॥ हीनं रतिगु
णैः सर्वैरभिहंतारमाहवे ॥ सेनात्यजति संविग्ना नृपतिं तं नरेश्वर ॥९॥ ॥ ॥

चसत्कारप्रियत्वं ज्ञात्वैव त्वांतत्सत्कारेनियुंजइत्याह त्यागिनमिति उचितविषयेदइतिशेषः सं
ग्रहीतारं यथाकालं यथान्यायं रत्नादेरिति शेषः ॥८॥ सर्वैः रतिगुणैर्दानमानादिलक्षणैः सेनार
मणगुणैर्हीनं वथैवाहवेऽभिहंतारं घातयंतं नृपतिं संविग्ना सेना हे नरेश्वर त्यजति त्यजत्येव
अतो दानादिनैनेसत्कार्या एवेति भाव ॥९॥

असंबाधमित्यनेनविमानस्यवैपुल्यमुक्तं॥२७॥ क॰॥११५॥ इतिश्रीरामाभिरामेश्रीरा॰रा॰ति॰यु॰॥१२४॥
अनुज्ञामिति॥१॥पातयित्वासंचार्य॥२॥३॥ आयोधनंयुद्धभूमिं॰ महाद्विशसनं॰ वधसाधनरुमितं॥४॥ प्रमा

तेसर्वेवानरर्क्षाश्चराक्षसाश्चमहाबलाः॥यथासुखमसंबाधंदिव्येतस्मिन्नुपाविशन्॥२७॥इत्या
र्षेश्रीरा॰यु॰चतुर्विंशाधिकशततमःसर्गः॥१२४॥ अनुज्ञातंतुरामेणतद्विमानमनुत्तमं॥
हंसयुक्तंमहानादमुत्पपातविहायसं॥१॥पातयित्वाततश्चक्षुःसर्वतोरघुनंदनः॥अब्रवीन्मै
थिलींसीतांरामःशशिनिभाननां॥२॥कैलासशिखराकारेत्रिकूटशिखरेस्थितां॥लंकामीक्ष
स्ववैदेहिनिर्मितांविश्वकर्मणा॥३॥एतदायोधनंपश्यमांसशोणितकर्दमं॥हरीणांराक्षसा
नांचसीतेविशसनंमहत्॥४॥एषदत्तवरःशेतेप्रमाथीराक्षसेश्वरः॥तवहेतोर्विशालाक्षि
निहतोरावणोमया॥५॥कुंभकर्णोत्रनिहतःप्रहस्तश्चनिशाचरः॥धूम्राक्षश्चात्रनिहतोवान
रेणहनूमता॥६॥विद्युन्मालीहतश्चात्रसुषेणेनमहात्मना॥लक्ष्मणेनेंद्रजिच्चात्ररावणिर्नि
हतोरणे॥७॥अंगदेनात्रनिहतोविकटोनामराक्षसः॥विरूपाक्षश्चदुःप्रेक्षोमहापार्श्वमहोदरौ॥८॥

थीप्रमथनशीलः एषइतितद्वाहभूमिप्रदर्शनं॰ अग्रेपिसर्वत्रतत्रयुद्धभूमिप्रदर्शनमेवअत्रतुच्चस्थत्वा
द्विमानस्यसर्वयुद्धभूमिप्रत्यक्षंयुगपत्॥५॥६॥७॥ अंगदेनविकटोहतइत्यनुवादात्तदपिज्ञातमिति

१९ मुद्युक्ताः हर्षयुताः ॥ १९ ॥ अभिषेकार्द्रं त्वां दृष्ट्वा तवैव सर्वेषामस्माकं मातरं कौशल्यामभिवाद्य च ॥ २०
२१ ॥ प्रियात्प्रियतरं प्रथमतः कृतं कृत्यस्यायोध्याप्रवेशनमेव प्रियं तत्रापि सुहृद्भिर्भवद्भिः सहितो भ

अयोध्यां गंतुमिच्छामः सर्वान्नयतु नो भवान् ॥ मुद्युक्ता विचरिष्यामो वनान्युपवनानि च ॥ १९ ॥
दृष्ट्वा त्वामभिषेकार्द्रं कौशल्यामभिवाद्य च ॥ अचिरादागमिष्यामः स्वगृहान्नृपसत्तम ॥ २० ॥ एव
मुक्तस्तु धर्मात्मा वानरैः सविभीषणैः ॥ अब्रवीद्वानरान् रामः ससुग्रीवविभीषणान् ॥ २१ ॥ प्रि
यात्प्रियतरं लब्धं यदहं ससुहृज्जनः ॥ सर्वैर्भवद्भिः सहितः प्रीतिं लप्स्ये पुरीं गतः ॥ २२ ॥ क्षिप्रमा
रोह सुग्रीव विमानं सह वानरैः ॥ त्वमप्यारोह सामात्यो राक्षसेंद्र विभीषण ॥ २३ ॥ ततः स पुष्पा
कं दिव्यं सुग्रीवः सह वानरैः ॥ आरुरोह मुदा युक्तः सामात्यश्च विभीषणः ॥ २४ ॥ तेष्वारूढेषु स
र्वेषु कौबेरं परमासनं ॥ राघवेणाभ्यनुज्ञातमुत्पपात विहायसं ॥ २५ ॥ खगतेन विमानेन हं
सयुक्तेन भास्वता ॥ प्रहृष्टश्च प्रतीतश्च बभौ रामः कुबेरवत् ॥ २६ ॥ ॥ ॥

रतादिभिः सह प्रीतिं लप्स्ये राज्याभिषेकसंतोषं लप्स्ये इत्यर्थः ॥ २२ ॥ २३ ॥ २४ ॥ परमासनं उत्तमया
नं ॥ २५ ॥ हंसयुक्तेनेति हंसयुक्तेनेति शब्देन वाहकत्वाकारेण निर्मितहंसप्रतिमा उच्यंत इति व्या
ख्यातारः प्रहृष्टो हृष्टरोमा प्रतीतः प्रहृष्टचित्तः ॥ २६ ॥

अथसागरमध्यप्रदेशागमनकालेमैनाकंदर्शयति॰ हिरण्यनाभमिति॰ कांचनंकांचनप्रचुरंतद्वर्णंच
एतत्मैनाकपर्वतस्वरूपंसमुद्रस्यकुक्षौवर्त्ततइतिशेषः। एतदित्यावर्त्तता। एतत्स्कंधावारनिवेशनंसे
नानिवेशनंसमुद्रोत्तरतीरस्थमितिशेषः॥१८॥ अत्रपूर्वमिति॰ अत्रसेतुमूले॰ पूर्वंसेतुवंधनात्।

हिरण्यनाभंशैलेंद्रंकांचनंपश्यमैथिलि॥ विश्रमार्थंहनुमतोभित्वासागरमुत्थितं॥
एतत्कुक्षौसमुद्रस्यस्कंधावारनिवेशनं॥१८॥ अत्रपूर्वंमहादेवःप्रसादमकरोद्वि
भुः॥एतत्तुदृश्यतेतीर्थंसागरस्यमहात्मनः॥सेतुवंधइतिख्यातंत्रैलोक्येनचपूजितं॥
॥१९॥

पूर्वंविभुर्महादेवोममरामस्यप्रसादमकरोत्। मत्स्थापितत्वेनात्रस्थितोभूत्। सेतोर्निर्विघ्नता।
सिद्ध्यैसमुद्रप्रसादानंतरंशिवस्थापनंरामेणकृतमितिगम्यते॰ अत्रस्थलेमहात्मनःसागरस्य
तीर्थंसेतुनिर्माणमूलप्रदेशत्वात्सेतुवंधइतिख्यातंभविष्यतीतिशेषः। तथात्रैलोक्येनपूजितंच
भविष्यति॥१९॥

९।१०॥बली॰बलिनौदंष्ट्रोनामकश्चित्अनुवादात्॥११।१२॥१३॥१४॥साग्रेणसहस्राद्अप्यधिकयुक्तेन॰

अकंपनश्चनिहतोबलिनोन्येचराक्षसाः॥त्रिशिराश्चातिकायश्चदेवांतकनरांतकौ॥९॥यु
द्धोन्मत्तश्चमत्तश्चराक्षसप्रवरावुभौ॥निकुंभश्चैवकुंभश्चकुंभकर्णात्मजौबली॥१०॥वज्रदं
ष्ट्रश्चदंष्ट्रश्चबहवोराक्षसाहताः॥मकराक्षश्चदुर्द्धर्षोमयायुधिनिपातितः॥अकंपनश्चनि
हतःशोणिताक्षश्चवीर्यवान्॥यूपाक्षश्चप्रजंघश्चनिहतौतुमहाहवे॥१२॥विद्युजिह्वोत्र
निहतोराक्षसोभीमदर्शनः॥यज्ञशत्रुश्चनिहतःसुप्तघ्नश्चमहाबलः॥१३॥सूर्यशत्रुश्च
निहतोब्रह्मशत्रुस्तथापरः॥अत्रमंदोदरीनामभार्यातंपर्यदेवयत्॥१४॥सपत्नीनांस
हस्रेणसाग्रेणपरिवारिता॥एतत्तुदृश्यतेतीर्थंसमुद्रस्यवरानने॥यत्रसागरमुत्तीर्यतां
रात्रिमुषितावयं॥१५॥एषसेतुर्मयाबद्धःसागरेलवणार्णवे॥तवहेतोर्विशालाक्षिनलसे
तुःसुदुष्करः॥१६॥पश्यसागरमक्षोभ्यंवैदेहिवरुणालयं॥अपारमिवगर्जंतंशंखशुक्ति
समाकुलं॥१७॥

तीर्थमवतारःयत्रावतारेतांरात्रिंसमुद्रोत्तरणादिवसरात्रिं॥१५॥नलसेतुर्मन्त्रियुक्तनलकृतःसेतु
र्नलसेतुः॥सुदुष्करस्तदतिरिक्तेनेतिभावः॥१६॥अक्षोभ्यवरुणालयत्वादिविशेषणंसागरंपश्य॥१७॥

एवमस्त्विति तामुक्त्वा किष्किंधां प्राप्य तत्र विमानं संस्थाप्य सुग्रीवं प्रेक्ष्य एतद्वक्ष्यमाणमुवाच ॥२५॥ त
देवाह ब्रूहीति ॥२६॥ अभित्वरय गंतुमिति शेषः ॥२७॥२८॥ वानराणां सह ताभिः सहेत्यर्थः आर्षी षष्ठी

एवमस्त्विति किष्किंधां प्राप्य संस्थाप्य राघवः ॥ विमानं प्रेक्ष्य सुग्रीवं वाक्यमेतदुवाच ह ॥२५॥ ब्रू
हि वानरशार्दूल सर्वान्वानरपुंगवान् ॥ स्त्रीभिः परिवृताः सर्वे ह्ययोध्यां यान्तु सीतया ॥२६॥ तथा
त्वमेभिः सर्वाभिः स्त्रीभिः सह महाबल ॥ अभित्वरय सुग्रीव गच्छामः प्लवगाधिप ॥२७॥ एवमु
क्तस्तु सुग्रीवो रामेणामिततेजसा ॥ वानराधिपतिः श्रीमांस्तैश्च सर्वैः समावृतः ॥२८॥ प्रविश्यां
तःपुरं शीघ्रं तारामुद्वीक्ष्य सोऽब्रवीत् ॥ प्रिये त्वं सह नारीणां वानराणां महात्मनां ॥२९॥ राघवेणा
भ्यनुज्ञाता मैथिलीप्रियकाम्यया ॥ त्वर त्वमभिगच्छामो गृह्य वानरयोषितः ॥ अयोध्यां दर्शयि
ष्यामो सर्वा दशरथस्त्रियः ॥३०॥ सुग्रीवस्य वचः श्रुत्वा तारा सर्वांगशोभना ॥ आहूय चाब्रवीत्स
र्वा वानराणां तु योषितः ॥३१॥ सुग्रीवेणाभ्यनुज्ञाता गंतुं सर्वैश्च वानरैः ॥ मम चापि प्रियं कार्यमयो
ध्यादर्शनेन च ॥३२॥

॥२९॥ वानरयोषितो गृह्य गृहीत्वा गंतुं त्वरां कुरु सर्वाभिः सह गच्छामः तासाम
योध्यां दर्शयिष्यामः ॥३०॥३१॥ सुग्रीवेणाभ्यनुज्ञाता युयं सर्वैर्वानरैः स्वस्वभर्तृभिः सह गंतुं त्वरय
तेति शेषः किंच भवतीभिरयोध्यादर्शनेन ममापि प्रियं कार्यं तद्दर्शनं ममापि प्रियमिति भावः ॥३२॥

एतत्पवित्रंदर्शनात्सर्वपापविशोधनं·विशिष्यमहापातकस्यापिनाशनंसेतुंदृष्ट्वासमुद्रस्यब्रह्महत्याव्य
पोहतीतिस्मृतेःकूर्मपुराणेरामचरितेतुअत्रस्थानेस्पष्टमेवलिंगस्थापनमुक्तंतस्यापितल्लिंगदर्श
नेनब्रह्महत्यादिपापक्षयोभविष्यतीतिमहादेववरदानंचस्पष्टमेवोक्तंततएवावधार्यंपूर्वंमहादेव
प्रसादमकरोत्ततःसेतुवंधनंजातमित्यक्षरार्थः॥अत्रराक्षसराजश्चाजगामअत्रसेतुवंधतीर्थे॥२०

एतत्पवित्रंपरमंमहापातकनाशनं॥अत्रराक्षसराजोयमाजगामविभीषणः॥२०॥एषासा
दृश्यतेसीतेकिष्किंधाचित्रकानना॥सुग्रीवस्यपुरीरम्यायत्रवालीमयाहतः॥२१॥अथदृष्ट्वा
पुरींसीताकिंष्किंधांवालिपालितां॥अब्रवीत्प्रश्रितंवाक्यंरामंप्रणयसाध्वसा॥२२॥सुग्रीव
प्रियभार्याभिस्ताराप्रमुखतोनृप॥अन्येषांवानरेंद्राणांस्त्रीभिःपरिवृतात्वहं॥२३॥गंतुमिच्छे
सहायोध्यांराजधानींत्वयासह॥एवमुक्तोथवैदेह्याराघवःप्रत्युवाचतां॥२४॥ ॥

चित्रकानना·मधुवनादिदिव्यकाननोपेतांयादृश्यतेएषासुग्रीवस्यपुरीकिष्किंधां॥२१॥प्रणय·
साप्रणयःसाध्वसंचभर्तुःस्वेच्छेप्रवर्त्तननिमित्तंयस्याःसा॥२२॥ताराप्रमुखतःताराप्रमुखाभिःसु
ग्रीवस्यप्रियाभिर्भार्याभिःपरिवृतोगंतुमिच्छेइच्छामि·अत्रैतदर्थमेकदिनवासःअतएवभारतेंग
दस्ययौवराज्याभिषेकोप्येतद्दिनेउक्तः॥२३॥२४॥ राम श्र

एतत्तदाश्रमपदंपंचवट्याश्रमस्थानमित्यर्थः॥४२॥यत्रयस्यांपर्णशालायां॥४३॥अगस्त्यस्याश्रमोदृश्यतेए
तत्समीपएवप्रागुपदिष्टःस्वाश्रमः॥४४॥एतेतेतापसाःपूर्वानुभूताइत्यर्थः॥४५॥कुलपतिराश्रमस्वामीकु

एतत्तदाश्रमपदमस्माकंवरवर्णिनि॥पर्णशालातथाचित्रादृश्यतेशुभदर्शने॥४२॥यत्रत्वंराक्षसें
द्रेणरावणेनहृताबलात्॥एषागोदावरीरम्याप्रसन्नसलिलाशुभा॥४३॥अगस्त्यस्याश्रमश्चैवदृ
श्यतेकदलीवृतः॥दृश्यतेचैववैदेहिशरभंगाश्रमोमहान्॥४४॥उपयातःसहस्राक्षोयत्रशक्रः
पुरंदरः॥एतेतेतापसादेविदृश्यन्तेतनुमध्यमे॥४५॥अत्रिःकुलपतिर्यत्रसूर्यवैश्वानरोपमः॥अ
स्मिन्देशेमहाकायोविराधोनिहतोमया॥४६॥अत्रसीतेत्वयादृष्टातापसीधर्मचारिणी॥अ
सौसुतनुशैलेंद्रश्चित्रकूटःप्रकाशते॥४७॥अत्रमांकैकयीपुत्रःप्रसादयितुमागतः॥एषासा
यमुनारम्यादृश्यतेचित्रकानना॥४८॥भरद्वाजाश्रमःश्रीमान्दृश्यतेचैषमैथिलि॥इयंचदृश्य
तेगंगापुण्यात्रिपथगानदी॥४९॥शृंगवेरपुरंचैतद्गुहोयत्रसखामम॥एषासादृश्यतेसीतेराज
धानीपितुर्मम॥अयोध्यांकुरुवैदेहिप्रणामंपुनरागता॥५०॥

लमन्वयसंघातग्रहोत्पत्याश्रमे
षुचेत्यजपः॥४६॥तापसीअत्रिपत्नी॥४७॥४८॥४९॥यत्रममसखागुहस्तच्छृंगवेरपुरमेतद्दृश्यतइतिशे
षः एषासाममपितुराजधानीअयोध्यादृश्यते॰गंगातीरवर्त्तिभरद्वाजाश्रमप्रदेशाग्रेविमानेनतस्मात्पुन

तव्योमप्रदेशवर्त्तित्वादयोध्यादिदर्शनं॰अयोध्या
प्रतिप्रणामंकुरु॥५०॥

प्रवेशंचेतिपश्यामइतिशेषः दशरथस्त्रीणांविभूतिमैश्वर्यंचपश्यामः॥३३॥नेपथ्यविधिरलंकारविधिःप्रदक्षिणाकरणंविमानस्यअत्रताभिःसहोत्थितमित्यनेनाश्विनचतुर्थ्यांकिष्किंधायामुषित्वापंचम्यांततःप्रस्थान

॥

प्रवेशंचैवरामस्यपौरजानपदैःसह॥विभूतिंचैवसर्वासांस्त्रीणांदशरथस्यच॥३३॥तारयाचाभ्यनुज्ञाताःसर्वावानरयोषितः॥नेपथ्यविधिपूर्वंतुकृत्वाचापिप्रदक्षिणं॥३४॥अध्यारोहन्विमानंतत्सीतादर्शनकांक्षया॥ताभिःसहोत्थितंशीघ्रंविमानंप्रेक्ष्यराघवः॥३५॥ऋष्यमूकसमीपेतुवैदेहींपुनरब्रवीत्॥दृश्यतेसौमहान्सीतेसविद्युदिवतोयदः॥३६॥ऋष्यमूकोगिरिवरःकांचनैर्धातुभिर्वृतः॥अत्राहंवानरेंद्रेणसुग्रीवेणसमागतः॥३७॥समयश्चकृतःसीतेवधार्थंवालिनोमया॥एषासादृश्यतेपम्पानलिनीचित्रकानना॥३८॥त्वयाविहीनोयत्राहंविललापसुदुःखितः॥अस्यास्तीरेमयादृष्टाशबरीधर्मचारिणी॥३९॥अत्रयोजनबाहुश्चकबंधोनिहतोमया॥दृश्यतेसौजनस्थानेश्रीमान्सीतेवनस्पतिः॥४०॥जटायुश्चमहातेजास्तवहेतोर्विलासिनि॥रावणेनहतोयत्रपक्षिणांप्रवरोबली॥४१॥

मितिगम्यते॰उपरिपंचम्यांभरद्वाजाश्रमप्रवेशस्यवक्ष्यमाणत्वात्॥३४॥३५॥३६॥३७॥३८॥अस्यास्तीरेपंपायास्तीरे॥३९॥अत्रपंपोत्तरदेशेवनस्पतिःजटायोरावासन्यग्रोधः॥४०॥४१॥ ॥ ॥

५॥६॥उच्यमानविशेषणांत्वांदृष्ट्वाममपुराकरुणादैन्यमासीत्॥७॥सांप्रतंतुसमृद्धत्वादिगुणांसमीक्ष्य
ममउत्तमाप्रीतिरभूज्जातेत्यर्थः॥८॥सर्वंतिसुखंदुःखंविदितमित्येतत्प्रकाशयति॰यत्त्वयेति॰जन
स्थाननिवासिनात्वयायद्विपुलंखरवधादिनादुःखंप्राप्तंतन्मयाविदितं॥९॥तदनंतरंब्राह्मणार्थे

त्वांपुराचीरवसनंप्रविशंतंमहावनं॥स्त्रीतृतीयंच्युतंराज्याद्धर्मकामंचकेवलं॥५॥पदा
तिंत्यक्तसर्वस्वंपितृनिर्देशकारिणं॥सर्वभोगैःपरित्यक्तंस्वर्गच्युतमिवामरं॥६॥दृष्ट्वातुकरु
णापूर्वंममासीत्समितिंजय॥कैकेयीवचनेयुक्तंवन्यमूलफलाशनं॥७॥सांप्रतंतुसमृ-
द्धार्थंसमित्रगणबांधवं॥समीक्ष्यविजितारिंचममाभूत्प्रीतिरुत्तमा॥८॥सर्वंचसुखदुःखंते
विदितंममराघव॥यत्त्वयाविपुलंप्राप्तंजनस्थाननिवासिना॥९॥ब्राह्मणार्थेनियुक्तस्य
रक्षतःसर्वतापसान्॥रावणेनहृताभार्याबभूवेयमनिंदिता॥१०॥मारीचदर्शनंचैवसी
तोन्मथनमेवच॥कवंधदर्शनंचैवपंपाभिगमनंतथा॥११॥सुग्रीवेणचतेसख्यंयत्रवाली
हतस्त्वया॥मार्गणंचैववैदेह्याःकर्मवातात्मजस्यच॥१२॥

ब्रह्मविदांब्रह्मर्षीणांप्रयोजनेनियु
क्तस्यातएवसर्वतापसान्रक्षतस्तवभार्येयंहृताबभूवेत्येतत्त्वमेविदितं॥१०॥मारीचदर्शनंराव
णस्यसीतापहारार्थमितिशेषःसीतोन्मथनंसीतायाराक्षसीभिर्लंकायांक्लेशनं॥११॥वातात्मजस्यक

र्मसमुद्रलंघनादिकं॥१२॥

५१ ॥ विशालकक्ष्यां विशालरथ्यां ॥ ५२ ॥ क० ॥ १६ ॥ इति श्रीरामाभिरामे श्रीरामीये रा० ति० यु० पंचविंशाधिकशततमः सर्गः ॥ १२५ ॥ पूर्णे इति । पंचम्यां चतुर्दशे वर्षे पूर्णे सति तद्दिने भरद्वाजाश्रमं प्राप्य मुनिं भरद्वाजं ववंदे ॥ १ ॥ पुरेऽयोध्यायां सुभीक्षं चानामयं च सुभिक्षानामयं सुभिक्षमन्नसमृद्धिः ॥ अनामयं स्यादारोग्यं ॥ अ

ततस्ते वानराः सर्वे राक्षसाः सविभीषणाः ॥ उत्पत्योत्पत्य संहृष्टास्तां पुरीं ददृशुस्तदा ॥ ५१ ॥ ततस्तु तां पांडुरहर्म्यमालिनीं विशालकक्ष्यां गजवाजिभिर्वृतां ॥ पुरीमपश्यन्प्लवगाः सराक्षसाः पुरीं महेन्द्रस्य यथामरावती ॥ ५२ ॥ इत्यार्षे श्रीरा० यु० पंचविंशाधिकशततमः सर्गः ॥ १२५ ॥
पूर्णे चतुर्दशे वर्षे पंचम्यां लक्ष्मणाग्रजः ॥ भरद्वाजाश्रमं प्राप्य ववंदे नियतो मुनिं ॥ १ ॥ सोऽपृच्छदभिवाद्यैनं भरद्वाजं तपोधनं ॥ शृणोषि कच्चिद्भगवन्सुभिक्षानामयं पुरे ॥ २ ॥ कच्चित्सुयुक्तो भरतो जीवंत्यपि च मातरः ॥ एवमुक्तस्तु रामेण भरद्वाजो महामुनिः ॥ प्रत्युवाच रघुश्रेष्ठं स्मितपूर्वं प्रहृष्टवत् ॥ ३ ॥ आज्ञावशस्ते भरतो जटिलस्त्वां प्रतीक्षते ॥ पादुके ते पुरस्कृत्य सर्वं च कुशलं गृहे ॥ ४ ॥

णोषि कच्चित् शिष्यादिमुखेनेति शेषः ॥ २ ॥ स भरतो युक्तः पालने समाहित इत्यर्थः ॥ स्मितपूर्वं सर्वज्ञोऽपि भगवानजानन्निव मां पृच्छतीति स्मितकरणं ॥ प्रहृष्टवत् प्रहृष्टार्हं ॥ ३ ॥ ते पादुके पुरस्कृत्य सर्वं कुशलं गृहे च पुरे च संपादयन् भरतस्त्वां प्रतीक्षते ॥ ४ ॥

अ

२१॥२२॥जयंतीतिजितःस्वर्गस्यजितःस्वर्गजितइवमुदान्वितास्तेप्रसिद्धावानराःकामाद्यथेष्टमुपाश्नंतिस्म।
२३॥क॰॥११९॥इतिश्रीरामाभिरामेश्रीरा॰यु॰॥१२६॥ पंचम्यांचतुर्दशावर्षस्यपूर्णत्वात्तद्दिनेभरद्वा
जाश्रमेविलंबस्यप्राप्तत्वात्· चतुर्दशसमाप्तौयदित्वांनपश्यामितदाहुताशनंप्रवेक्ष्यामीतिभरतोक्ते
र्भरतस्यस्वागमननिवेदनायहनूमत्प्रेषणंकृतवानित्याह· अयोध्यांत्विति· समालोक्यभरद्वाजा

अभवन्पादपास्तत्रस्वर्गपादपसन्निभाः॥निःफलाःफलिनश्चासन्विपुष्पाःपुष्पशालिनः॥२१॥
शुष्काःसमग्रपत्रास्तेनगाश्चैवमधुस्रवाः॥सर्वतोयोजनास्तिस्रोगच्छतामभवंस्तदा॥२२॥ततः
प्रहृष्टाःप्लवगर्षभास्तेबहूनिदिव्यानिफलानिचैव॥कामादुपाश्नंतिसहस्रशस्तेमुदान्विताः।
स्वर्गजितोमुदेव॥२३॥इत्यार्षेश्रीरा॰यु॰षड्विंशाकिकशततमःसर्गः॥१२६॥ अयोध्यांतुसमा
लोक्यचिंतयामासराघवः॥प्रियकामःप्रियंरामस्ततस्त्वरितविक्रमः॥१॥

अमेविमानादवतरण
समयेइतिभावःसुग्रीवादीनांसंम्यक्शिष्टाचारकरणायसुहृदृष्टरूपतदाकारज्ञानायचपूर्वंहनू
मत्प्रेषणं· अतएवपाद्मे· पंचम्यामेवविसृष्टहनूमत्·प्रवेशसमयेभरतवर्णनमेवंकृतःअग्नि
प्रवेशेसोद्योगंकालेभ्रातुरनागमात्·न्यवेदयत्तदातस्मैश्रीरामागमनोत्सवमिति· किंचप्रियका
मइतिसुग्रीवादीनांप्रियकामःअयोध्यायांसर्वतत्प्रियपूरणकामस्तेषांप्रियंयथाभवतितथाचिंत
यामास· कर्त्तव्यजातमितिशेषः ।१॥

पत्रस्थैर्हरियूथपैर्लंकादीपितेतियत्इंद्रजिद्वधानंतरंकृतंतच्चविदितं॥१३॥१४॥१५॥इतोमदाश्रमान्मे
शिष्याःप्रवृत्याख्याःतवप्रवृत्तिमुदंतमाचक्षतेप्रवृत्याख्यास्तथाभूताःसंतस्तवपुरीमयोध्यांसंपत
तिष्यंतस्त्वत्पुरीवृत्तांतोपिज्ञायतइतिशेषः॥१६॥अहमपीति·त्रिदशाइवेतिभावः·दद्मिददामि·

विदितायांचवैदेह्यांनलसेतुर्यथाकृतः॥यथाचादीपितालंकाप्लवङ्गैर्हरियूथपैः॥१३॥स
पुत्रबांधवामात्यःसबलःसहवाहनः॥यथाचनिहतःसंख्येरावणोबलदर्पितः॥१४॥यथाच
निहतेतस्मिन्रावणेदेवकंटके॥समागमश्चत्रिदशैर्यथादत्तश्चतेवरः॥१५॥सर्वंममैत
द्विदितंतपसाधर्मवत्सल॥संपतंतिचमेशिष्याःप्रवृत्याख्यापुरीमतः॥१६॥अहमप्यत्रते
दद्मिवरंशस्त्रभृतांवर॥अर्घ्यंप्रतिगृहाणेदमयोध्यांश्वोगमिष्यसि॥१७॥तस्यतच्छिरसा
वाक्यंप्रतिगृह्यनृपात्मजः॥बाढमित्येवसंहृष्टःश्रीमान्वरमयाचत॥१८॥अकालफलिनो
वृक्षाःसर्वेचापिमधुस्रवाः॥फलान्यमृतगंधानिबहूनिविविधानिच॥१९॥भवंतुमार्गेभग
वन्नयोध्यांप्रतिगच्छतः॥तथेतिचप्रतिज्ञातेवचनात्समनंतरं॥२०॥

अर्घ्यंप्रतिगृहाणमयादत्तं
प्रतिज्ञातस्यवरस्यवरणात्पूर्वमितिशेषः॥१७॥बाढमित्येवप्रतिगृह्येतिशेषः॥१८॥वरमाहाका
लेति॥१९॥अयोध्यांप्रतिगच्छतोममार्गेएवंवृक्षादयोभवंतुवानराणांविश्रमार्थमितिशेषः॥२०

महेंद्रादिकर्तृकंवरदानंवानरसमुत्थानरूपं·अत्रब्रह्मवरुणयोरपिवरदानकर्तृत्वोक्तेःपूर्वंमहें
द्रसहितोब्रह्मेतिव्याख्यातं॥११॥उपयातंनगरसमीपमागतं॥१२॥१३॥एतच्छ्रुत्वाएवंप्रकारंमदागमनं
श्रुत्वायमाकारंसञ्ज्ञाकारःयच्चापिभरतस्यमांप्रतिकर्त्तव्यंतच्चवेदितव्यं॥१४॥तदेवाहज्ञेयाइति·

वरदानंमहेंद्रेणब्रह्मणावरुणेनच॥महादेवप्रसादाच्चपित्राममसमागमं॥११॥उपया
तंचमांसौम्यभरतायनिवेदय॥सहराक्षसराजेनहरीणामीश्वरेणच॥१२॥जित्वाशत्रुग
णान्रामःप्राप्यचानुत्तमंयशः॥उपायातिसमृद्धार्थःसहमित्रैर्महाबलैः॥१३॥एतच्छ्रुत्वा
यमाकारंभजतेभरतस्ततः॥सचतेवेदितव्यःस्यात्सर्वंयच्चापिमांप्रति॥१४॥ज्ञेयाःस
र्वेचवृत्तांताःभरतस्येंगितानिच॥तत्त्वेनमुखवर्णेननदृष्ट्याव्याभाषितेनच॥१५॥सर्व
कामसमृद्धंहिहस्त्यश्वरथसंकुलं॥पितृपैतामहंराज्यंकस्यनावर्त्तयेन्मनः॥१६॥

मुखवर्णेनप्रीतिखेदोचितविकाससंकोचाद्याकारेणेत्यर्थः·तत्त्वेन·यथार्थ्येणवृत्तांताज्ञे
याइत्यन्वयः॥१५॥ननुतादृशसौहृदवतिभरतेकोन्यथाशंकायाःप्रसंगोऽतआह·सर्वका
मेत्यादि·पितृपैतामहं·तत्क्रमेणागतंनावर्त्तयेत्नापकर्षयेत्·॥अनेनभ्रातरएवंशं
क्याइतिलोकान्बोधयति॥१६॥

२॥यथाक्षिप्रमयोध्यांप्राप्तेनत्वया त्वरितःसन्नयोध्यांगच्छन्पतिमंदिरेवर्त्तमानःसर्वोपिजनःकुशलीति
जानीहि॥३॥गहनंकाननंगोचरोदेशोयस्यतंममकुशलंमद्वचनात्ब्रूहि॥४॥आत्मसमःस्वसदृश

चिंतयित्वाततोदृष्टिंवानरेषुन्यपातयत्॥उवाचधीमांस्तेजस्वीहनूमंतंप्लवंगमं॥२॥अयो
ध्यांत्वरितोगच्छशीघ्रंप्लवगसत्तम॥जानीहिकच्चित्कुशलीजनोनृपतिमंदिरे॥३॥शृंगवेरपु
रंप्राप्यगुहंगहनगोचरं॥निषादाधिपतिंब्रूहिकुशलंवचनान्मम॥४॥श्रुत्वातुमांकुशलिन
मरोगंविगतज्वरं॥भविष्यतिगुहःप्रीतःसममात्मसमःसखा॥५॥अयोध्यायाश्चतेमार्गंप्र
वृत्तिंभरतस्यच॥निवेदयिष्यतिप्रीतोनिषादाधिपतिर्गुहः॥६॥भरतस्तुत्वयावाच्यःकुशलं
वचनान्मम॥सिद्धार्थंशंसमांतस्मैसभार्यंसहलक्ष्मणं॥७॥हरणंचापिवैदेह्यारावणेन
बलीयसा॥सुग्रीवेणचसंवादंवालिनश्चवधंरणे॥८॥मैथिल्यन्वेषणंचैवयथाचाधिगता
त्वया॥लंघयित्वामहातोयमापगापतिमव्ययं॥९॥उपयानंसमुद्रस्यसागरस्यचदर्शनं॥य
थाचकारितःसेतूरावणश्चयथाहतः॥१०॥

स्तत्त्वज्ञानत्वात्॥५॥६॥सिद्धार्थंनिर्व्यूढपितृवचनपरि
पालनरूपप्रयोजनं॥७॥८॥यथात्वयाधिगताअस्खलितब्रूतायथादृष्टेत्यर्थः॥९॥उपयानंपु
नःस्वयमस्मत्समीपागमनं वानरसेनयासहसमुद्रनीरगमनंवा सागरस्यस्वरूपेणप्रत्यक्षतोदर्शनंदर्शनदा
॥१०

रामा·यु· अद्यपंचमीपंचमीसंवंधिनींरजनीमुषित्वाअद्यस्थित्वाश्वोगमिष्यसीतिभरद्वाजानुज्ञातंराघवं
३८२ श्वःप्रातरेवंद्रक्ष्यसि॥२४॥संप्रहृष्टतनूरुहःजगदानंदरामसेवकत्वलाभेनेतिभावःअविचा

382

पंचमीमद्यरजनीमुषित्वावचनान्मुनेः॥भरद्वाजाभ्यनुज्ञातंद्रक्ष्यस्यत्रैवराघवं॥२४॥एव
मुत्क्रामन्महातेजाःसंप्रहृष्टतनूरुहः॥उत्पपातमहावेगाद्वेगवानविचारयन्॥२५॥सोप
श्यद्रामतीर्थंचनदींवालुकिनीतथा॥वरूथींगोमतींचैवभीमंशालवनंतथा॥२६॥प्रजा
श्चवहुसाहस्त्रीःस्फीतान्जनपदानपि॥सगत्वादूरमध्वानंत्वरितःकपिकुंजरः॥२७॥आ
ससाद्द्रुमान्फुल्लान्नंदिग्रामसमीपगान्॥सुराधिपस्योपवनेयथाचैत्ररथेद्रुमान्।
२८॥स्त्रीभिःसपुत्रैःपौत्रैश्चरममाणैःस्वलंकृतैः॥क्रोशमात्रेत्वयोध्यायाश्चीरकृष्णा
जिनांवरं॥२९॥ददर्शभरतंदीनंकृशमाश्रमवासिनं॥जटिलंमलदिग्धांगंभ्रातृव्यसन
कर्षितं॥३०॥फलमूलाशिनंदांतंतापसंधर्मचारिणं॥समुन्नतजटाभारंवल्कलाजिनवा
ससं॥३१॥

रयन्अध्वश्रममितिशेषः॥२५॥रामतीर्थंपरशुरामतीर्थंवालुकिनी·तदाख्या·शाल राम·
वनंशालवृक्षवनं॥२६॥२७॥सुराधिपस्योपवनेनंदनाख्येचैत्ररथंकुवेरोद्यानंचोत्रद्रष्टव्यः॥२८ ३८२
स्वलंकृतैरममाणैःपुत्रैःपौत्रैःसहिताभिःस्त्रीभिर्गृह्यमाणपुष्पाणिद्रुमविशेषणं॥२९॥३०॥३१॥

तस्यराज्याकांक्षाचेत्किंकरिष्यसीत्याशंक्यसएवराज्यंप्रशास्त्वित्याह॰संगत्येति॰संगत्याचिरकालपरिच
येनकैकेयीसंगत्यावा॰यदिकैकयीवत्स्वयमपिराज्येनार्थीभवेत्॰तर्हिसएववसुधांशास्तुवयंय
त्रक्वापितपसाकालंनेष्यामइतिशेषः॥१७॥यावत्अस्मादाश्रमाद्दूरयातानस्म॰अयोध्यायाअति

संगत्याभरतःश्रीमान्राज्येनार्थीस्वयंभवेत्॥प्रशास्तुवसुधांसर्वामखिलांरघुनंदनः॥१७॥त
स्यबुद्धिंचविज्ञायव्यवसायंचवानर॥यावन्नदूरयाताःस्मक्षिप्रमागंतुमर्हसि॥१८॥इतिप्रति
समादिष्टोहनूमान्मारुतात्मजः॥मानुषंधारयन्रूपमयोध्यांत्वरितोययौ॥१९॥अथोत्पपा
तवेगेनहनूमान्मारुतात्मजः॥गरुत्मानिववेगेनजिघृक्षन्नुरगोत्तमं॥२०॥लंघयित्वापितृप
थंविहगेंद्रालयंशुभं॥गंगायमुनयोर्भीमंसमतीत्यसमागमं॥२१॥शृंगवेरपुरंप्राप्यगुहमा
साद्यवीर्यवान्॥सवाचाशुभयाहृष्टोहनूमानिदमब्रवीत्॥२२॥सखातुतवकाकुत्स्थोरामः
सत्यपराक्रमः॥ससीतःसहसौमित्रिःसत्वांकुशलमब्रवीत्॥२३॥ श्र ॥

समीपंनप्राप्ताःस्मइतियावत्॰क्षिप्रमागंतुमर्हसितावदितिशेषः॥१८॥मानुषमित्यर्धसंक्षेपः॥
१९॥तस्यैवप्रपंचउत्पपातेत्यादि॥२०॥पितृपथंवायुमार्गमंतरिक्षमित्यर्थः॰तद्विशेषंविहगेंद्राल
यंश्रेष्ठविहगानांसंचारस्थानं॥२१॥२२॥२३॥

रामा॰यु॰
३८३

383

उत्कटहर्षोपिचित्तवैवश्यहेतुरितिकृत्वापपातेत्यादि॥४०॥४१॥अशोकजैर्हर्षजैरित्यश्रुभिरित्यनेनान्वि
तं॥४२॥अनुक्रोशात्कृपया॰प्रियाख्यानस्यकर्त्तरित्युट्प्रियाख्यानकर्त्तुः किंप्रियंददामि॰एतस्मि॰

एवमुक्तोहनुमताभरतःकैकयीसुतः॥पपातसहसाहृष्टोहर्षान्मोहमुपागमत्॥४०॥ततोमुहु
र्त्तादुत्थायप्रत्याश्वस्यचराघवः॥हनूमंतमुवाचेदंभरतःप्रियवादिनं॥४१॥अशोकजैःप्री
तिमयैःकपिमालिंग्यसंभ्रमात्॥सिषेचभरतःश्रीमान्विपुलैरस्रुबिंदुभिः॥४२॥देवोवामानुषो
वात्वमनुक्रोशादिहागतः॥प्रियाख्यानस्यतेसौम्यददामिब्रुवतःप्रियं॥४३॥गवांशतसहस्रंच
ग्रामाणांचशतंपरं॥सकुंडलाःशुभाचाराभार्याःकन्यास्तुषोडश॥४४॥हेमवर्णाःसुनासोरूःश
शिसौम्याननाःस्त्रियः॥सर्वाभरणसंपन्नाःसंपन्नाःकुलजातिभिः॥४५॥निशम्यरामागमनं
नृपात्मजःकपिप्रवीरस्यतदाद्भुतोपमं॥प्रहर्षितोरामदिदृक्षयाभवत्पुनश्चहर्षादिदम
ब्रवीद्वचः॥४६॥इत्यार्षेश्रीरामा॰यु॰सप्तविंशाधिकशततमःसर्गः॥१२७॥ बहूनिनाम
वर्षाणिगतस्यसुमहद्वनं॥श्रणोम्यहंप्रीतिकरंममनाथस्यकीर्त्तनं॥१॥

याख्यानसमंनकिंचि॰
त्पश्यामीतिभावः॥४३॥४४॥४५॥निशम्यप्रहर्षितोरामदिदृक्षयान्वयुक्तोभवदितिशेषः॥४६॥क॰॥१८॥
इतिश्रीरामाभिरामेश्रीरा॰यु॰सप्तविंशाधिकशततमःसर्गः॥बहूनिवर्षाणिसुमहद्वनंगतस्यम
मनाथस्यकीर्त्तनंश्रणोम्यहं॥१॥

राम॰
३८३

भावितात्मानंध्यातपरमात्मानंअतएवब्रह्मर्षिसमतेजसं॥३२॥चातुर्वर्ण्यस्यलोकस्यस्वार्थेष्यञ्चतुर्वर्ण
रूपस्यलोकस्य॥३३॥वल्कमुख्यैर्वल्काद्यैःयुक्तैःकाषायांबरधारिभिःयथाराजातथाप्रजेतिन्यायात्

नियतंभावितात्मानंब्रह्मर्षिसमतेजसं॥पादुकेतेपुरस्कृत्यप्रशासंतंवसुंधरां॥३२॥चातुर्व
र्ण्यस्यलोकस्यत्रातारंसर्वतोभयात्॥उपस्थितममात्यैश्चशुचिभिश्चपुरोहितैः॥३३॥वल्कमुख्यै
श्चयुक्तैश्चकाषायांबरधारिभिः॥नहितेराजपुत्रंतंचीरकृष्णाजिनांबरं॥३४॥परिभोक्तुंव्यव
स्यंतिपौरावैधर्मवत्सलाः॥तंधर्ममिवधर्मज्ञंदेहवंधमिवापरं॥३५॥उवाचप्रांजलिर्वाक्यंह
नूमान्मारुतात्मजः॥वसंतंदंडकारण्येयंत्वंचीरजटाधरं॥३६॥अनुशोचसिकाकुत्स्थंसत्वा
कौशल्यमब्रवीत्॥प्रियमाख्यामितेदेवशोकंत्यजसुदारुणं॥३७॥अस्मिन्मुहूर्त्तेभ्रात्रात्वंरामे
णसहसंगतः॥निहत्यरावणंरामःप्रतिलभ्यचमैथिलीं॥३८॥उपयातिसमृद्धार्थःसहमित्रैर्म
हाबलैः॥लक्ष्मणश्चमहातेजावैदेहीचयशस्विनी॥सीतासमग्रारामेणमहेंद्रेणशचीयथा॥३९

तदेवाहनहितेइति॥३४॥परिभोक्तुंपरित्यज्यभोक्तुंद्वितीयइवशब्दोवाक्यालंकारेइहेतिवैकत्रपाठः
देहवंधंमनुष्यदेहसंबंधवंतं॥३५॥३६॥शोकंत्यजसुदारुणामित्यनेनास्यपाद्योक्तोग्निप्रवेशोद्य
मःसूचितइतिबोध्यं॥३७॥अस्मिन्मुहूर्त्ते-अचिरादित्यर्थःसंगतोभविष्यसीतिशेषः॥३८॥३९॥

तत्तदनंतरं ॥११॥१२॥ निखाते गर्त्ते प्राक्षिपं तस्मिन्प्रक्षिप्तवंतावित्यर्थः ॥१३॥१४॥१५॥१६॥ अन्हश्चतुर्थभागेन इ
दं च राक्षसदर्शनयुद्धसंनादसीतागुहाप्रेषणादिसर्वव्यापारापेक्षया युद्धकालस्त्वर्धाधिकमुहूर्त्तेनेत्य

तद्धस्तिमदितं घोरं सिंहव्याघ्रमृगाकुलं ॥ प्रविवेशाथ विजनं समहद्दंडकावनं ॥११॥ तेषां पुर
स्ताद्बलवान्गच्छतां गहने वने ॥ विनदन्सुमहानादं विराधः प्रत्यदृश्यत ॥१२॥ तमुत्क्षिप्य महाना
दमूर्ध्वबाहुमधोमुखं ॥ निखाते प्रक्षिपं तस्मिन्नदंतमिव कुंजरं ॥१३॥ तत्कृत्वा दुष्करं कर्म भ्रातरौ रा
मलक्ष्मणौ ॥ सायान्हे शरभंगस्य रम्यमाश्रममीयतुः ॥१४॥ शरभंगे दिवं प्राप्ते रामः सत्यपराक्रमः
अभिवाद्य मुनीन्सर्वाञ्जनस्थानमुपागमत् ॥१५॥ चतुर्दशसहस्राणि जनस्थाननिवासि
नां ॥ हता निवसता तत्र राघवेण महात्मना ॥१६॥ एकेन सह संगम्य रामेण रणमूर्धनि ॥ अ
न्हश्चतुर्थभागेन निःशेषाः राक्षसाः कृताः ॥१७॥ महाबला महावीर्यास्तपसो विघ्नकारिणः ॥
निहता राघवेणाजौ दंडकारण्यवासिनः ॥१८॥ राक्षसाश्च विनिष्पिष्टाः खरश्च निहतो रणे ॥
दूषणं चाग्रतो हत्वा त्रिशिरास्तदनंतरं ॥१९॥ पश्चाच्छूर्पनखा नाम रामपार्श्वमुपागता ॥ ततो रामेण सं
दिष्टो लक्ष्मणः सहसोत्थितः ॥ प्रगृह्य खड्गं चिच्छेद कर्णनासे महाबलः ॥२०॥

रण्यकांडे उक्तः ॥१७॥१८॥१९॥ ननु
रक्षसां वधे को हेतुस्तत्राह पश्चादिति । जनस्थानोपागमनंतरमित्यर्थः कर्णनासे चिच्छेद ततस्तत्प्रेरितखरचतुर्द
शसहस्ररक्षसां वध इति शेषः ॥२०॥

अतइयंल्लौकिकीगाथाकल्याणीतिमांप्रतिभाति·वतेतिहर्षेतांगाथामाह·एतीति॥२॥सहमित्रैरित्यस्यसुग्री
वादिमित्रसहितैरित्यर्थःतन्मुखादवगत्यप्रवृत्तिराघवस्येति·किमाश्रित्याकेंनिमित्तमाश्रित्येत्यर्थः॥३॥च

कल्याणीवतगाथेयंल्लौकिकीप्रतिभातिमां॥एतिजीवंतमानंदोनरंवर्षशतादपि॥२॥राघवस्यहरीणां
चकथमासीत्समागमं॥कस्मिन्देशेकिमाश्रित्यतत्वमाख्याहिपृच्छतः॥३॥सपृष्टोराजपुत्रेणवसां
समुपवेशितः॥आचचक्षेततःसर्वंरामस्यचरितंवने॥४॥यथाप्रव्राजितोरामोमातुर्दत्तौवरौतव
यथाचपुत्रशोकेनराजादशरथोमृतः॥५॥यथादूतैस्त्वमानीतस्तूर्णंराजगृहात्प्रभो॥त्वया
योध्यांप्रविष्टेनयथाराज्यंनचेप्सितं॥६॥चित्रकूटगिरिंगत्वाराज्येनामित्रकर्शनः॥निमंत्रितस्त्व
याभ्राताधर्ममाचरतांसतां॥७॥स्थितेनराज्ञोवचनेयथाराज्यंविसर्जितं॥आर्यस्यपादुकेगृ
त्वयथास्मिपुनरागतः॥८॥सर्वमेतन्महावाहोयथावद्विदितंतव॥त्वयिप्रतिप्रयातेतुयद्वृ
त्तंतन्निवोधमे॥९॥अपयातेत्वयितदासमुद्भ्रांतमृगद्विजं॥परिद्यूनमिवात्यर्थंतद्वनंसमपद्यत॥१०

स्यांतापसास्मने॥४॥यथाशाब्दानांनवानुभवसिद्धइत्यर्थःमातृराज्ञावरौदत्तौनतएवराज्ञासमःप्रव्राजि
तइति·यथानवानुभवसिद्धमित्यर्थः॥५॥एवमग्रेपि·राजगृहात्तदाख्यात्केकयपुरात्॥६॥७॥वि
सर्जितंरामेणेतिशेषः॥८॥९॥परिद्यूनंपरिक्षीणंपीडितमितियावत्॥१०॥ ॥

३१॥ तणवदचिंतयंती अगणयंती॥३२॥३३॥३४॥ कवंधवचनान्निहतदग्धकवंधवचनादित्यर्थः॥३५॥ त
योः पूर्वंपरस्परसान्निध्यात्पूर्वंरामस्यश्रवणेनसुग्रीवस्यदूराद्दर्शनेनहार्दःसमागमःमानसंसख्यं

प्रवेशयमैथिलीवाक्यैः सांत्वयामासरावणः॥ त्रणवद्भाषितंतस्यतंचनैर्ऋतपुंगवं॥३१॥ अ
चिंतयंतीवैदेहीत्वशोकवनिकांगता॥ न्यवर्त्ततदारामोमृगंहत्वातदावने॥३२॥ निवर्त्त
मानःकाकुत्स्थोदृष्ट्वागृध्रंसविव्यथे॥ गृध्रंहतंतदादृष्ट्वारामःप्रियतरंपितुः॥३३॥ मार्गमा
णस्तुवैदेहींराघवःसहलक्ष्मणः॥ गोदावरीमनुचरन्वनोद्देशांश्चपुष्पितान्॥३४॥ आसेद
तुर्महारण्येकवंधंनामराक्षसं॥ ततःकवंधवचनाद्रामःसत्यपराक्रमः॥ ऋष्यमूकगिरिंगत्वा
सुग्रीवेणसमागतः॥३५॥ ततःसमागतःपूर्वंप्रीत्याहार्दोव्यजायत॥ भ्रात्रानिरस्तःक्रुद्धेनसु
ग्रीवोवालिनापुरा॥३६॥ इतरेतरसंवादात्प्रगाढःप्रणयस्तयोः॥ रामःस्वबाहुवीर्येणस्वराज्यं
प्रत्यपादयन्॥३७॥ वालिनंसमरेहत्वामहाकायंमहाबलं॥ सुग्रीवःस्थापितोराज्येसहितःस
र्ववानरैः॥३८॥ रामायप्रतिजानीतेराजपुत्र्यास्तुमार्गणं॥ आदिष्टावानरेंद्रेणसुग्रीवेणम
हात्मना॥ दशकोट्यःप्लवंगानांसर्वाःप्रस्थापितादिशः॥३९॥

जातमित्यर्थःतत्रहेतुमाहभ्रातेति॥३६॥
अतस्तयोःपरस्परसंवादात्प्रगाढःप्रणयश्चासीत्॥३७॥३८॥ रामायेति· अत्रक्रमोनविवक्षितःआदिष्टाः नियुक्ताः॥३९॥

ततःखरादिवधानंतरंतेनलक्ष्मणेनपूर्वमर्दितासावालामूर्खारावणमुपागमत्॥२१॥२२॥मृगमितिशेषः दृष्ट्वा
रामब्रवीत् तदेवाह अयंमृगोगृह्यतां गृहीतेनानेनआश्रमोमनोहरोभविष्यति॥२३॥अनुधावति अनु

ततस्तेनार्दितावालारावणंसमुपागता॥रावणानुचरोघोरोमारीचोनामराक्षसः॥२०॥लोभयामास
वैदेहींभूत्वारत्नमयोमृगः॥साराममब्रवीद्दृष्ट्वावैदेहीगृह्यतामिति॥अयंमनोहरःकांतआश्रमो
नोभविष्यति॥२३॥ततोरामोधनुष्पाणिर्मृगंतमनुधावति॥सतंजघानधावंतंशरेणनतपर्वणा॥
२४॥अथसौम्यदशग्रीवोमृगयांयातिराघवे॥लक्ष्मणेचापिनिष्क्रांतेप्रविवेशाश्रमंतदा॥२५॥ज
ग्राहतरसासीतांग्रहःखेरोहिणीमिव॥त्रातुकामंततोयुद्धेहत्वागृध्रंजटायुषं॥२६॥प्रगृह्यसहसा
सीतांजगामाशुसराक्षसः॥ततस्त्वद्भुतसंकाशाःस्थिताःपर्वतमूर्धनि॥२७॥सीतांगृहीत्वागच्छंतंवा
नराःपर्वतोपमाः॥ददृशुर्विस्मिताकारारावणंराक्षसाधिपं॥२८॥ततःशीघ्रतरंगत्वातद्विमानंम
नोजवं॥आरुह्यसहवैदेह्यापुष्पकंसमहाबलः॥२९॥प्रविवेशतदालंकांरावणोराक्षसेश्वरः
तांसुवर्णपरिष्कारेशुभेमहतिवेश्मनि॥३०॥

धावतिस्म॥२४॥२५॥२६॥सहसाबलात्कारेण॥२७
विस्मितादद्दृशुःसुग्रीवादयइतिभावः॥२८॥ततइति-अनेनमार्गेक्वचित्स्थापितंगुप्तेदेशेआसीत्
स्मृतिमात्रेणवातदुपस्थानंवोध्यं॥२९॥तदाततइत्यर्थःसुवर्णपरिष्कारेसुवर्णप्राकारे॥३०॥

५१॥५२॥५३॥मुनिसंनिधावद्यवसंतंश्वोऽद्रष्टुमर्हसि·आश्विनशुक्लचतुर्दश्यामश्विनीतद्वर्षे इतिषयंसं
पुष्पस्यसंभवःपूर्णिमायामश्विन्यामपिपाणिकार्त्तिक्येणवा॥५४॥कृतांजलिः रामंस्मृत्वेतिशेषः मेमनोर

सशक्रेणसमागम्ययमेनवरुणेनच॥महेश्वरस्वयंभूभ्यांतथादशरथेनच॥५१॥तैश्चद
त्तवरःश्रीमानृषिभिश्चसमागतैः॥सुरर्षिभिश्चकाकुत्स्थोवरान्लेभेपरंतपः॥५२॥सवुद
त्तवरःप्रीत्यावानरैश्चसमागतः॥पुष्पकेनविमानेनकिष्किंधामभ्युपागमत्॥५३॥तांगंगांपु
नरासाद्यवसंतंमुनिसन्निधौ॥अविघ्नंपुष्ययोगेनश्वोरामंद्रष्टुमर्हसि॥५४॥ततःसवा
क्यैर्मधुरैर्हनुमतोनिशम्यहृष्टोभरतःकृतांजलिः॥उवाचवाणींमनसःप्रहर्षणींचिरस्यपू
र्णःखलुमेमनोरथः॥५५॥इत्यार्षेश्रीरामायणेयुद्धकांडेअष्टाविंशाधिकशततमःसर्गः॥१२८
श्रुत्वातुपरमानंदंभरतःसत्यविक्रमः॥हृष्टमाज्ञापयामासशत्रुघ्नंपरवीरहा॥१॥दैवता
निचसर्वाणिचैत्यानिनगरस्यच॥सुगंधमाल्यैर्वादित्रैरर्चंतुशुचयोनराः॥२॥ ॥

थःपूर्णःखल्वित्युवाच॥५५॥कत०॥११९॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेयु
द्धकांडेअष्टाविंशाधिकशततमःसर्गः॥१२८॥ परमानंदंतत्कारंवचइतिशेषः॥१॥दैवतानि
कुलदेवतानि·नगरस्यचैत्यानिसाधारणदेवायतनानि·अर्चंतु·अर्चयंतु॥२॥ ॥

विप्रनष्टानांबिलप्रवेशानंतरंनिर्गममार्गमजानतां-विघ्नरुष्टानामितिपाठेऽतीतकालनामित्यर्थः॥४०॥४१

तेषांनोविप्रनष्टानांविंध्येपर्वतसत्तमे॥भृशंशोकाभितप्तानांमहान्कालोत्यवर्त्तत॥४०॥भ्राता
तुगृध्रराजस्यसंपातिर्नामवीर्यवान्॥समाख्यातिस्मवसतींसीतांरावणमंदिरे॥४१॥सोहंदुः
खपरीतानांदुःखंतज्ज्ञातिनांनुदन्॥आत्मवीर्यंसमास्थाययोजनानांशतंप्लुतः॥४२॥तत्राहमे
कामद्राक्षमशोकवनिकांगतां॥कौशेयवस्त्रांमलिनांनिरानंदांदृढव्रतां॥४३॥तयासमेत्यविधि
वत्पृष्ट्वासर्वमनिंदितां॥४४॥अभिज्ञानंमयादत्तंरामनामांगुलीयकं॥अभिज्ञानंमणिंलब्ध्वा
चरितार्थोहमागतः॥४५॥मयाचपुनरागम्यरामस्याक्लिष्टकर्मणः॥अभिज्ञानंमयादत्तमर्चि
ष्मान्समहामणिः॥४६॥श्रुत्वातांमैथिलीं-रामस्त्वशशंसेचजीवितं॥जीवितांतमनुप्राप्तः
पीत्वामृतमिवातुरः॥४७॥उद्योजयिष्यन्नुद्योगंदध्रेलंकावधेमनः॥जिघांसुरिवलोकांतेसर्वां
ल्लोकान्विभावसुः॥४८॥ततःसमुद्रमासाद्यनलंसेतुमकारयन्॥अतरत्कपिवीराणांवाहिनी
तेनसेतुना॥४९॥प्रहस्तमवधीन्नीलःकुंभकर्णंतुराघवः॥लक्ष्मणोरावणसुतंस्वयंरामस्तुराव
णं॥५०॥

ज्ञातिनामित्यत्रदीर्घाभावआर्षः॥४२॥४३॥४४॥मणिंसीतासकाशाल्लब्ध्वामणिंलब्ध्वेत्यर्थः॥४५॥४६॥४७
उद्युज्यतेजयोनेनेतिउद्योगंबलंतदुद्योजयिष्यन्प्रोत्साहयिष्यन्॥४८॥४९॥५०॥

१०॥धृष्ट्यादयोऽष्टमंत्रिणःनिर्ययुःउदयात्पूर्वंयथोक्तंराजमार्गसत्कारंकृत्वाप्रातर्निर्ययुरित्यर्थः
११॥१२॥१३॥१४॥१५॥नैगमाःवणिजःवैदेहिकःसार्थवाहोनैगमोवाणिजोवणिगित्यमरः॥१६॥आर्य

राजमार्गमसंवाधंकिरंतुशतशोनराः॥ततस्तच्छासनंश्रुत्वाशत्रुघ्नस्यप्रमुदान्विताः॥१०॥धृ
ष्टिर्जयंतोविजयःसिद्धार्थश्चार्थसाधकः॥अशोकोमंत्रपालश्चसुमंत्रश्चापिनिर्ययुः॥११॥म
त्तैर्नागसहस्रैश्चसध्वजैःसुविभूषितैः॥अपरेहेमकक्ष्याभिःसगजाभिःकरेणुभिः॥१२॥निर्ययु
स्तुरगाक्रांतारथैश्चसुमहारथाः॥शक्त्यृष्टिपाशहस्तानांसध्वजानांपताकिनां॥१३॥तुरणांगो
सहस्रैश्चमुख्यैर्मुख्यतरान्वितैः॥पदातीनांसहस्रैश्चवीराःपरिवृत्ताययुः॥१४॥ततोयानान्यु
पारूढाःसर्वाःदशरथस्त्रियः॥कौसल्यांप्रमुखेकृत्वासुमित्रांचापिनिर्ययुः॥१५॥द्विजातिमु
ख्यैर्धर्मात्माश्रेणीमुख्यैःसनैगमैः॥माल्यमोदकहस्तैश्चमंत्रिभिर्भरतोवृतः॥१६॥शंखभेरी
निनादैश्चवंदिभिश्चाभिनंदितः॥आर्यपादौगृहीत्वातुशिरसाधर्मकोविदः॥१७॥पांडुरंछत्र
मादायशुक्लमाल्योपशोभितं॥शुक्लेचवालव्यजनेराजार्हेहेमभूषिते॥१८॥उपवासकृ
शोदीनश्चीरकृष्णाजिनांवरः॥भ्रातुरागमनंश्रुत्वातत्पूर्वंहर्षमागतः॥१९॥

पादौश्रीरामपादुके
१७॥१८॥उपवासकृशइत्यनेनरामादेरपिकिंचित्कालमुपवासोनुमेयःतत्पूर्वंआगमनश्रवणपूर्वकं॥१९॥

स्तुतिपुराणज्ञाइतिसूतलक्षणंरूपंसूतविशेषणं·वैतालिकाःवंशावलीकीर्त्तकाः॥३॥राजदारामातरःसैन्याः
राजभवनात्प्रभृतिमत्तोभ्यंतराःसेनागणाःआटविकांतसेनाभेदास्तथांगश्रेणीनानाजातीयसंघः॥४॥५
विष्टीर्भृतिकरान्भागशोविभज्येतिशेषः·विषमाणिस्थलानिअत्युन्नतदेशाःसमानिचस्थानानि

सूताःस्तुतिपुराणज्ञाःसर्वेवैतालिकास्तथा॥सर्वेवादित्रकुशलाःगणिकाश्चैवसर्वशः॥३॥रा
जदारास्तथामात्याःसैन्याःसेनांगनागणाः॥ब्राह्मणाश्चसराजन्याःश्रेणीमुख्यास्तथागणाः॥४॥
अभिनिर्यांतुरामस्यद्रष्टुंशशिनिभंमुखं॥भरतस्यवचःश्रुत्वाशत्रुघ्नःपरवीरहा॥५॥विष्टीरनेक
साहस्रीश्चोदयामासभागशः॥समीकुरुतनिम्नानिविषमाणिसमानिच॥६॥स्थानानिचनिरः
स्यंतांनंदिग्रामादितःपरं॥सिंचंतुपृथिवींकृत्स्नांहिमशीतेनवारिणा॥७॥ततोभ्यवकिरंत्वन्येला
जैःपुष्पैश्चसर्वतः॥समुच्छ्रितपताकास्तुरथ्याःपुरवरोत्तमे॥८॥शोभयंतुचवेश्मानिसूर्यस्योद
यनंप्रति॥स्रग्दाममुक्तपुष्पैश्चसुवर्णैःपंचवर्णकैः॥९॥

निरस्यंतां·अयंभेदोनिराक्रियतांसर्वं
समंक्रियतामितियावत्॥६॥इतीनंदिग्रामात्परंयावदयोध्यांतावतएवगंतव्यदेशत्वादितिभावः॥७
समुच्छ्रितपताकारथ्याकर्म॥८॥सूर्योदयनंप्रतिम्वःसूर्योदयकालेयथासर्वंसज्जंभवतितथाकुरुंते
त्वर्थः·विरलपुष्पबंधाःप्रस्रजः·निबिडपुष्पबंधंदाम·मुक्तपुष्पाणिबंधरहितानिपुष्प
विशेषणंसुवर्णैरितिपंचवर्णकैःपंचवर्णकलि
तैरलंकारैः॥९॥

वत्ताणांतथाविधत्वंकुतस्तत्राहभरद्वाजप्रसादेनेति·तेनापिकथमेवंशक्यंतत्राह·तस्यचेतिभरद्वा
जस्यचेत्यर्थः·वासवेनेतितत्तपःप्रसादितेनेत्यर्थः॥२६॥यदेवमतःससैन्यस्यतत्ररामस्यचभरद्वाजेन
सर्वगुणान्वितमातिथ्यंकृतं॥२७॥यतोध्वनिःश्रूयतेतत्ऽसासेनागोमतींतरतीतिमन्येवालुकीतिपाठं

ससैन्यस्यतदातिथ्यंकृतंसर्वगुणान्वितं॥निस्वनःश्रूयतेभीमःप्रहृष्टानांवनौकसां॥२७॥
मन्येवानरसेनासानदींतरतिगोमतीं॥रजोवर्षंसमुद्भूतंपश्यसालवनंप्रति॥२८॥मन्येसाल
वनंरम्यंलोलयंतिप्लवंगमाः।तदेतद्दृश्यतेदूराद्विमानंचंद्रसन्निभं॥२९॥विमानंपुष्पकं।
दिव्यंमनसाब्रह्मनिर्मितं।रावणंबांधवैःसार्द्धंहत्वालब्धंमहात्मना॥३०॥तरुणादित्यसंका
शंविमानंरामवाहनं।धनदस्यप्रसादेनदिव्यमेतन्मनोजवं॥३१॥एतस्मिन्भ्रातरौवीरौवै
देह्यासहराघवौ॥सुग्रीवश्चमहातेजाराक्षसश्चविभीषणः॥३२॥ततोहर्षसमुद्भूतोनिः।
स्वनोदिवमस्पृशत्।स्त्रीबालयुववृद्धानांरामोयमितिकीर्तिते॥३३॥

तरं·ज्ञानानंतरमाह·

रजोवर्षमिति॥२८॥ज्ञानोत्तरमाह·तदेतदिति॥२९॥मनसाब्रह्मनिर्मितं·ब्रह्मणास्वस्रष्टृत्वसाम्याद्विश्व
कर्मणानिर्मितं॥३०॥एतद्दिव्यंमनोजवंविमानं·प्रसादेनब्रह्मणःप्रसादेनधनदस्यभवतीतिशेषःप
रणातपसालेभेयत्कुवेरःपितामहादितिसुंदरकांडोक्तेः॥३१॥एतस्मिन्विमानेराघवौसुग्रीवोविभीष
णश्चात्तिष्ठन्तीतिशेष॥३२॥३३॥

२०॥२१॥२२॥यावन्नदूरयातोस्मिक्षिप्रमागंतुमर्हसीतिहनूमंतंप्रतिरामोक्तेर्भरतेसर्वांकथामुक्त्वापुनारा
मसमीपंगत्वारामंप्रतिभरतवृत्तांतंनिवेद्यपुनर्नंदिग्रामंप्रतिरामाज्ञयागतेएतद्भरतवचस्तंप्र
तीनिवेदयं·कापेयीकपिस्वभावप्रयुक्ताचलचित्ततानसेव्यतेनानुष्ठीयतेकच्चित्·मिथ्यानोच्य

प्रत्युद्ययौतदारामंमहात्मासचिवैःसह॥अश्वानांखुरशब्दैश्चरथनेमिस्वनेनच॥२०॥
शंखदुंदुभिनादेनसंचचालेवमेदिनी॥गजानांबृंहितैश्चापिशंखदुंदुभिनिस्वनैः॥२१॥
कृत्स्नंतुनगरंतत्तुनंदिग्राममुपागमत्॥समीक्ष्यभरतोवाक्यमुवाचपवनात्मजं॥२२॥क
च्चिन्नखलुकापेयीसेव्यतेचलचित्तता॥नहिपश्यामिकाकुत्स्थंराममार्यंपरंतपं॥२३॥॥
कच्चिन्नचानुदृश्यंतेकपयःकामरूपिणः॥अथैवमुक्तेवचनेहनूमानिदमब्रवीत्॥२४॥
अर्थ्यंविज्ञापयन्नेवभरतंसत्यविक्रमं॥सदाफलान्कुसुमितान्वृक्षान्प्राप्यमधुस्रवान्॥२५॥

तेकच्चिदित्यर्थः·कुतएवंशंकातत्राहनहीति॥२३॥२४॥एवंमिथ्यावादित्वशंकायांतन्निवृत्तयेऽ
र्थ्यमर्थादनपेतंविज्ञापयनिदमब्रवीत्·सदाफलत्वादिविशिष्टान्वृक्षान्प्राप्यप्रहृष्टानांव
नौकसांभ्रमौनिस्वनःश्रूयतेऽतस्त्वंप्रयाहीतिशेषः॥२५॥

लक्ष्मणमासाद्यवंदमानंलक्ष्मणंपरिष्वंगादिनासंभाव्य·अन्येद्युःपांचजन्यात्माकैकेय्यांभरतोभवत्·तदन्येद्युःसुमित्रायामनंतात्माचलक्ष्मणःसुदर्शनात्माशत्रुघ्नोद्वौजातौयुगपत्प्रियेइतिपाद्मेशिवोक्तेःवैदेहीमभ्यवादयत्अभ्यवंदत्·परेतुयद्यपिलक्ष्मणोभरतात्कनिष्ठोवयसास्पष्टंचेदंजन्मप्रकरणोक्तंतथापिज्येष्ठानुवर्त्तनेनस्वापेक्षयाधिकगुणत्वेनस्वव्यवहारेणज्येष्ठानुवृत्तिरेवंकर्त्तव्येतिभरतंप्रत्युप

ततोलक्ष्मणमासाद्यवैदेहींचपरंतपः॥अथाभ्यवादयत्प्रीतोभरतोनामचाब्रवीत्॥४१॥सुग्रीवं
कैकयीपुत्रोजांबवंतमथांगदं॥मैंदंचद्विविदंनीलमृषभंचैवसस्वजे॥४२॥सुषेणंचनलं
चैवगवाक्षंगंधमादनं॥शरभंपनसंचैवपरितःपरिषस्वजे॥४३॥तेकृत्वामानुषंरूपंवान
राःकामरूपिणः॥कुशलंपर्यपृच्छंस्तेप्रहृष्टाभरतंतदा॥४४॥ ॥ ॥

देशदानेनचगुरुत्वबुध्यातस्यनतिरुचितैव किंचकौशल्यायैप्रथमंदत्तपायसांशजत्वाल्लक्ष्मणस्यज्येष्ठत्वंततोहिकैकेय्यैपायसार्धदानंतदंशजश्चशत्रुघ्नइतिसएवभरतात्कनिष्ठअतएववैदेहींचेतिचकारःस्वरसतःसंगच्छते।अतएवचशत्रुघ्नकृतोलक्ष्मणनमस्कारउपपद्यतेतेनतयोर्युगपदुत्पन्नत्वादित्याहुः॥४१॥४२॥४३॥४४॥

ततआसन्नेभरतादयस्तंददृशुरित्याह·ददृशुरिति॥३४॥यथार्थेनस्वागतेनअन्वर्थेनस्वागतेनेत्यर्थःय

रथकुंजरवाजिभ्यस्तेवतीर्यमहींगताः॥ददृशुस्तंविमानस्थंनराःसोममिवांबरे॥३४॥प्रां
जलिर्भरतोभूत्वाप्रहृष्टोराघवोन्मुखः॥यथार्थेनार्घ्यपाद्यैस्ततोरामपूजयत्॥३५॥
मनसाब्रह्मणासृष्टेविमानेभरताग्रजः॥रराजपृथुदीर्घाक्षोवज्रपाणिरिवामरः॥३६॥
ततोविमानाग्रगतंभरतोभ्रातरंतदा॥ववंदेप्रणतोरामंमेरुस्थमिवभास्करं॥३७॥
ततोरामाभ्यनुज्ञातंतद्विमानमनुत्तमं॥हंसयुक्तंमहावेगंनिपपातमहीतलं॥३८॥आ
रोपितोविमानंतद्भरतःसत्यविक्रमः॥राममासाद्यमुदितःपुनरेवाभ्यवादयत्॥३९॥
तंसमुत्थायकाकुत्स्थश्चिरस्याक्षिपथंगतं॥अंकेभरतमारोप्यमुदितःपरिषस्वजे॥४०॥

स्यागमनंपरमकल्याणंतत्स्वागतमित्यर्थानुगतिमतेत्यर्थः॥३५॥३६॥३७॥३८॥अभ्यवादयत्अ
भ्यवंददित्यर्थः॥३९॥४०॥

आक्रोशानिविकसितानि॥५२॥५३॥एतत्एतावत्कालंमयारक्षितंन्यासभूतंमयिस्थितंराज्यंमयातेनि

तान्यंजलिसहस्राणिप्रगृहीतानिनागरैः॥आक्रोशानीवपद्मानिददर्शभरताग्रजः॥५२॥पा
दुकेतेतुरामस्यगृहीत्वाभरतःस्वयं॥चरणाभ्यांनरेंद्रस्ययोजयामासधर्मवित्॥५३॥रामंभ
रतःसकृतांजलिः॥एतत्तेसकलंराज्यंन्यासंनिर्यातितंमया॥५४॥अद्यजन्मकृतार्थंमेसं
वृत्तश्चमनोरथः॥यत्त्वांपश्यामिराजानमयोध्यांपुनरागतं॥५५॥अवेक्षतांभवान्कोशं
कोष्ठागारंगृहंबलं॥भवतस्तेजसासर्वंकृतंदशगुणंमया॥५६॥तथाब्रुवाणंभरतंदृष्ट्वा
तंभ्रातवत्सलं॥मुमुचुर्वानराबाष्पंराक्षसश्चविभीषणः॥५७॥ततःप्रहर्षाद्भरतमंक
मारोप्यराघवः॥ययौतेनविमानेनससैन्योभरताश्रमं॥५८॥भरताश्रममासाद्यससै
न्योराघवस्तदा॥अवतीर्यविमानाग्रादवतस्थेमहीतले॥५९॥ ॥ ॥

अब्रवीच्च
तदा २

र्यातितंतुभ्यंनिवेदितं॥५४॥५५॥५६॥विभीषणश्चबाष्पंमुमोच·ईदृशाअपिभ्रातरःसंतीत्यानंदे
नस्वस्यतद्द्वेषपरीत्यजशोकेनच॥५७॥५८॥५९॥

४५ पंचमोभ्राताभ्रातविषयकपंचत्वसंख्यापूरणः सौहृदात्तत्पूर्वकोपकारात् ।४६।।४७।।४८।।४९

अथाब्रवीद्राजपुत्रःसुग्रीवंवानरर्षभं ।। परिष्वज्यमहातेजा भरतोधर्मिणांवरः ।।४५।। त्व
मस्माकंचतुर्णांवैभ्रातासुग्रीवपंचमः ।। सौहृदाज्जायतेमित्रमपकारोरिलक्षणं ।।४६।।
विभीषणंचभरतोसांत्ववाक्यमथाब्रवी ।। दिष्ट्यात्वयासहायेनकृतंकर्मसुदुष्करं ।।४७।।
शत्रुघ्नश्चतदाराममभिवाद्यसलक्ष्मणं ।। सीतायाश्चरणौवीरोविनयादभ्यवादयत् ।।४८
रामोमातरमासाद्यविवर्णांशोककर्षितां ।। जग्राहप्रणतःपादौमनोमातुःप्रहर्षयन् ।।
।।४९।। अभिवाद्यसुमित्रांचकेकेयींचयशस्विनीं ।। समातृश्चततःसर्वाःपुरोहितमुपाग
मत् ।।५०।। स्वागतंतेमहाबाहोकौसल्यानंदवर्द्धन ।। इतिप्रांजलयःसर्वेनागराराममब्रुव
न् ।।५१।

कैकेयींचयशस्विनीं · अस्यामनोदार्ढ्येनराजानरकात्तारितः देवाब्रह्मर्षयश्चपरमंसुखंप्राप्ताः राम
स्यचयशोजातमतएषायशस्विन्येव ।।५०।।५१।।

ननुत्वद्दत्तराज्यभोगमहंकरिष्यामिराज्यंतुत्वमेवपालयेत्त्राह-धुरमितिएकाकिनास्वसमानधुर्वहवली
वर्द्धतरवहितेनवलीयसावृषेणावलीवर्द्देनन्यस्तांदत्तांकिशोरवत्पार्श्ववर्त्तिवडवावालवत्सोयथा
वोढुंनोत्सहतेतथागुरुंराज्यस्यभारंवोढुंनाहमुत्सहे॥३॥नोत्सहेइत्यत्रहेतुमाहवारीति·महतावारिवे
गेनभिन्नःक्षरन्सेतुर्यथादुर्निवधोद्धुमशक्यएवमसंवृत्तमशक्यसंवरणंराज्यछिद्रंचोरादिनिवंधनंदु

धुरमेकाकिनान्यस्तांवृषभेणवलीयसा॥किशोरवद्गुरुंभारंनवोढुमहमुत्सहे॥३॥वारिवे
गेनमहताभिन्नःसेतुरिवक्षरन्॥दुर्वंधनमिदंमन्येराज्यछिद्रमसंवृतं॥४॥गतिंखरइवाश्वस्य
हंसस्येवचवायसः॥नान्वेतुमुत्सहेवीरतवमार्गमरिंदम॥५॥यथाचारोपितोवृक्षोजातश्चां
तर्निवेशने॥महानपिदुरारोहोमहास्कंधःप्रशाखवान्॥६॥शीर्येतपुष्पितोभूत्वानफलानि
प्रदर्शयन्॥तस्यनानुभवेदर्थंयस्यहेतोःसरोपितः॥७॥

र्निवंधनंवद्धुमशक्यमित्येवमन्येइद
मितिशेषः॥४॥तवमार्गंरक्षणीयरक्षणचातुर्यं॥५॥अंतर्निवेशनेगृहारामेकश्चिद्वृक्षआरो
पितःसमहत्त्वादिगुणविशिष्टश्चजातस्ततःसपुष्पितोभूत्वाफलान्यप्रदर्शयन्यदिवि
शीर्येतविशीर्णपुष्पोवास्वरूपतोविशीर्णोवाभवतितर्हितस्यफलस्यहेतोर्येनरोपितःस
तदारोपणादिक्लेशस्यार्थंफलंनानुभवेदितिसर्वथाव्यर्थप्रयासः॥६॥७॥ ॥

६०॥६१॥६२॥पुरोहितस्यात्मसखस्येति वसिष्ठपुत्रस्य सुयज्ञस्येत्यर्थः आत्मसमस्येति पाठांतरं ब्रह्मज्ञ
त्वादितिभावः वसिष्ठस्येत्यर्थ इतितीर्थः ॥६३॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके युद्ध
कांडे एकोनत्रिंशाधिकशततमः सर्गः ॥१२९॥ शिरसीति ॥१॥ त्वया मामिका माता पूजिता तद्दत्तं

अब्रवीत्तु तदा रामस्तद्विमानमनुत्तमं ॥ वह वैश्रवणं देवमनुजानामि गम्यतां ॥६०॥ ततो
रामाभ्यनुज्ञातं तद्विमानमनुत्तमं ॥ उत्तरां दिशमुद्दिश्य जगाम धनदालयं ॥६१॥ विमानं पुष्प
कं दिव्यं संगृहीतं तु रक्षसा ॥ अगमद्धनदं वेगाद्रामवाक्यप्रचोदितं ॥६२॥ पुरोहितस्यात्म
सखस्य राघवो बृहस्पतेः ॥ शक्र इवामराधिपः निपीड्य पादौ पृथगासने शुभे सहैव तेनो
पविवेश वीर्यवान् ॥६३॥ इत्यार्षे श्रीरा० यु० एकोनत्रिंशाधिकशततमः सर्गः ॥१३९॥ ।
शिरस्यंजलिमादाय कैकेयीनंदवर्द्धनः ॥ बभाषे भरतो ज्येष्ठं रामं सत्यपराक्रमं ॥१॥ पूजि
ता मामिका माता दत्तं राज्यमिदं मम ॥ तद्ददामि पुनस्तुभ्यं यथा त्वमददा मम ॥२॥ ॥

वनवासानुष्ठानात् मया चित्रकूटे तव समर्पितमिदं राज्यं त्वं पुनश्चित्रकूट एव मम दत्तवान्
तत् पुनस्तुभ्यमहं ददामि ननु कथं दत्तस्य पुनर्दानं तत्राह यथेति यथा त्वं मद्दत्तं राज्यं मह्य
मददास्तथा मयापि त्वद्दत्तं तुभ्यं दीयत इत्यर्थः ॥२॥

५१॥इक्ष्वाकुकुलवर्द्धनःशत्रुघ्नः॥१६॥प्रतिकर्मालंकरणं-आत्मनैवनसैरंध्रीहस्तेनेत्यर्थः॥१७॥शोभनम
लंकरणं॥१८॥अभिचक्रामसमीपमाजगाम॥१९।२०॥दिव्यनिभैर्दिव्यकांतिभिःवस्त्रैर्युक्तौजग्मतुःरथ

विशोधितजटःस्नातश्चित्रमाल्यानुलेपनः॥महार्हवसनोपेतस्तस्थौतत्रश्रियाज्वलन्॥१५॥
प्रतिकर्मचरामस्यकारयामासवीर्यवान्॥लक्ष्मणस्यचलक्ष्मीवानिक्ष्वाकुकुलवर्धनः॥१६॥
प्रतिकर्मचसीतायाःसर्वादशरथस्त्रियः॥आत्मनैवतदाचक्रुर्मनस्विन्योमनोहरं॥१७॥ततोवा
नरपत्नीनांसर्वासामेवशोभनं॥चकारयत्नात्कौसल्याप्रहृष्टापुत्रवत्सला॥१८॥ततःशत्रुघ्नवच
नात्सुमंत्रोनामसारथिः॥योजयित्वाभिचक्रामरथंसर्वांगशोभनं॥१९॥अग्न्यर्कामलसंकाशंदि
व्यंदृष्ट्वारथंस्थितं॥आरुरोहमहाबाहूरामःपरपुरंजयः॥२०॥सुग्रीवोहनुमांश्चैवमहेंद्रसदृश
द्युती॥स्नातौदिव्यनिभैर्वस्त्रैर्जग्मतुःशुभकुंडलौ॥२१॥सर्वाभरणजुष्टाश्चययुस्ताःशुभ
कुंडलाः॥सुग्रीवपत्न्यःसीताचद्रष्टुंनगरमुत्सुकाः॥२२॥अयोध्यायांचसचिवाराज्ञोदशरथ
स्यच॥पुरोहितंपुरस्कृत्यमंत्रयामासुरर्थवत्॥२३॥

स्थंराममनुजग्मतुरित्यर्थः॥२१॥२२॥अयोध्यायांचेति-तस्मिन्ननंतरेइत्यादिः॥पुरोहितंवसिष्ठंअ
र्थवत्प्रयोजनोत्तमवत्॥रामाभिषेकोपयुक्तमशेषविचारंचक्रुरित्यर्थः॥२३॥ ॥

एषोपमातद्वदे महावाहो यदित्वंभक्तान्भृत्यानस्मान्प्रशाधि तद्वदेतिशेषः तमर्थंत्वंवेत्तुमर्हसि· अन्यापदेशवचनार्थ
मित्यर्थः राज्ञाप्रजापालनार्थंमहतायत्नेनोत्पाद्यसंवर्द्धितिनत्वयाप्रजापालनंसंपादनीयंतदकरणेतुता
दृशावस्तुतुल्यस्त्वमितिभावः॥८॥ यदेवमतोजगदद्येत्यादि॥९॥ तूर्यघोषादिभीराजोपचारैःप्रतिबुध्य

एषोपमामहावाहोत्वमर्थंवेत्तुमर्हसि॥ यद्यस्मान्मनुजेंद्रत्वंभर्त्ताभृत्यान्नशाधिहि॥८॥ जगद
द्याभिषिक्तंत्वामनुपश्यतुराघव॥ प्रतपंतमिवादित्यंमध्यान्हेदीप्ततेजसं॥९॥ तूर्यसंघातनि
र्घोषैःकांचीनूपुरनिस्वनैः॥ मधुरैर्गीतशब्दैश्चप्रतिवुध्यस्वशेषच॥१०॥ यावदावर्त्ततेच
क्रंयावतीचवसुंधरा॥ तावत्त्वमिहलोकस्यस्वामित्वमनुवर्त्तय॥११॥ भरतस्यवचःश्रुत्वा
रामःपरपुरंजयः॥ तथेतिप्रतिजग्राहनिषसादासनेशुभे॥१२॥ ततःशत्रुघ्नवचनान्नि।
पुणाःश्मश्रुवर्द्धनाः॥ सुखहस्ताःसुशीघ्राश्चराघवंपर्यवारयन्॥१३॥ पूर्वंतुभरतेस्नाते
लक्ष्मणेचमहावले॥ सुग्रीवेवानरेंद्रेचराक्षसेंद्रविभीषणे॥१४॥

स्वशेषचेत्यर्थः॥१०॥ चक्रं।
ज्योतिश्चक्रं· यावदावर्त्तते· अनेनकालावधिरुच्यते यावतीचवसुंधरेतिदेशावधिरुच्यते॥११॥ प्रतिजग्रा
ह· भरतस्यवचइतिशेषः॥१२॥ श्मश्रुवर्द्धनाःस्तच्छेदकानापिताइत्यर्थः·वर्धनंछेदनेवध्येआनंदनसभाजन
इत्यमरः॥१३॥ पूर्वंत्विति· अत्रभरतलक्ष्मणयोस्नानाद्यभिधानकालेशत्रुघ्नस्यतदनभिधानंतुस्नानकारयि
त्वात्·उपलक्षणंवा॥१४॥

शंखशब्दप्रणादैः शंखशब्दैः जनानां हर्षप्रणादैश्चेत्यर्थः तदुक्तं पाद्मे· आगतो रावणद्वेषी कुंभकर्णखरां
तकः अतिकायेंद्रजिच्छेत्ता महर्षिजनरक्षकः समाप्तदेवताकार्यः सीतेशो लक्ष्मणानुजः सत्यैकनिरतः
शास्ता परदारसहोदरः सुग्रीवराज्यदो धन्वी रावणानुजराज्यदः शरणागतसंत्राता धर्मस्थापनतत्प

शंखशब्दप्रणादैश्च दुंदुभीनां च निस्वनैः ॥ प्रययौ पुरुषव्याघ्रस्तां पुरीं हर्म्यमालिनीं ॥३३॥ द
दृशुस्ते समायांतं राघवं सपुरस्सरं ॥ विराजमानं वपुषा रथेनातिरथं तदा ॥३४॥ ते वर्द्धयित्वा का
कुत्स्थं रामेण प्रतिनंदिताः ॥ अनुजग्मुर्महात्मानं भ्रातृभिः परिवारितं ॥३५॥ अमात्यैर्ब्राह्मणैश्चै
व तथा प्रकृतिभिर्वृतः ॥ श्रिया विरुरुचे रामो नक्षत्रैरिव चंद्रमाः ॥३६॥ स पुरोगामिभिस्तूर्यै
स्तालस्वस्तिकपाणिभिः ॥ प्रव्याहरद्भिर्मुदितैर्मंगलानि वृतो ययौ ॥३७॥ अक्षतं जातरूपं च गा
वः कन्याः सह द्विजाः ॥ नरा मोदकहस्ताश्च रामस्य पुरतो ययुः ॥३८॥ ॥ ॥

रः रामो दाशरथिः श्रीमान्भगवान्भरताग्रजः शरण्यो राम इत्येवं शुश्रुवे काहलध्वनिरिति ॥३३॥ तेनाग
राः ॥३४॥ तेनागराः वर्द्धयित्वा आशीर्भिरिति शेषः ॥३५॥३६॥ तूर्यैस्तूर्यवादकैः स्वस्तिकश्च तालवदे
वकरतलधार्यः मंगलानि प्रव्याहरद्भिरित्यन्वयः ॥३७॥ अक्षतादिकं मंगलार्थं जातरूपमक्षतं सं
पादितहरिद्रावर्णविशेषमित्यर्थः अक्षतादीनां पुरतो यानं तत्तग्राटिपुरुषद्वारा ॥३८॥

तदेवाह अशोक इत्यादि॥ अशोकादयो रामवृद्ध्यर्थं नगरस्य च वृत्त्यर्थं संगताः मंत्रयन् अमंत्रयन् ॥२४॥ तदेवाह सर्वमेवेति कर्तुमर्हथेति भक्त्यानुरक्तिः ॥२५॥ मंत्रिणः पुरोहितश्चैव संदिश्य निर्ययुः ॥२६॥ ॥२७॥ लक्ष्म

अशोको विजयश्चैव सिद्धार्थश्च समाहिताः॥ मंत्रयन् रामवृद्ध्यर्थं वृत्त्यर्थं नगरस्य च ॥२४॥ सर्वमेवाभिषेकार्थं जयार्हस्य महात्मनः॥ कर्तुमर्हथ रामस्य यद्यन्मंगलपूर्वकं ॥२५॥ इति ते मंत्रिणः सर्वे संदिश्य च पुरोहितं॥ नगरान्निर्ययुस्तूर्णं रामदर्शनबुद्धयः ॥२६॥ हरियुक्तं सहस्राक्षो रथमिंद्र इवानघः॥ प्रययौ रथमास्थाय रामो नगरमुत्तमं ॥२७॥ जग्राह भरतो रश्मीञ्छत्रुघ्नः छत्रमाददे॥ लक्ष्मणो व्यजनं तस्य मूर्ध्नि संवीजयंस्तदा ॥२८॥ श्वेतं च वालव्यजनं जगृहे परितः स्थितः॥ अपरं चंद्रसंकाशं राक्षसेंद्रो विभीषणः ॥२९॥ ऋषिसंघैस्तदाकाशे देवैश्च समरुद्गणैः॥ स्तूयमानस्य रामस्य शुश्रुवे मधुरध्वनिः ॥३०॥ ततः शत्रुंजयं नाम कुंजरं पर्वतोपमं॥ आरुरोह महातेजाः सुग्रीवः प्लवगर्षभः ॥३१॥ नवनागसहस्राणि ययुरास्थाय वानराः॥ मानुषं विग्रहं कृत्वा सर्वाभरणभूषिताः ॥३२॥

णो व्यजनं तालवृंतमयं ॥२८॥ अपरं श्वेतं वालव्यजनं विभीषणो जगृहे ॥२९॥ ॥३०॥ ॥३१॥ नवनागसहस्राणि नवसहस्रसंख्याकगजानित्यर्थः ॥३२॥

ततःशत्रुघ्नेनप्रचोदिताराजभवनरक्षकाअभ्यंतरंप्रदेशप्रदर्शनार्थंतैलप्रदीपान्गृहीत्वाभरतसुग्रीवयोः
पुरःप्रविविशुः॥४७॥ उवाचेतिरामभवनप्रदर्शनानंतरमितिशेषः राघवानुजःभरतः॥४८॥ चतुर्णांचतुः

ततस्तैलप्रदीपांश्चपर्यंकास्तरणानिच॥ गृहीत्वाविविशुःक्षिप्रंशत्रुघ्नेनप्रचोदिताः॥४७॥ उवाच
चमहातेजाःसुग्रीवंराघवानुजः॥ अभिषेकायरामस्यदूतानाज्ञापयप्रभो॥४८॥ सौवर्णान्वानरें
द्राणांचतुर्णांचतुरोघटान्॥ ददौक्षिप्रंससुग्रीवःसर्वरत्नविभूषितान्॥४९॥ यथाप्रत्यूषसमये
चतुर्णांसागरांभसांपूर्णैर्घटैःप्रतीक्षध्वंतथाकुरुतवानराः॥५०॥ एवमुक्तामहात्मानोवानरावारणो
पमाः॥ उत्पेतुर्गगनंशीघ्रंगरुडाइवशीघ्रगाः॥५१॥ जांबवांश्चहनुमांश्चवेगदर्शीचवानरः॥ ऋष
भश्चैवकलशान्जलपूर्णानथानयन्॥५२॥ नदीशतानांपंचानांजलंकुंभैरुपाहरन्॥ पूर्वात्स
मुद्रात्कलशंजलपूर्णमथानयत्॥५३॥ सुषेणःसत्वसंपन्नःसर्वरत्नविभूषितं॥ ऋषभोदक्षिणा
त्तूर्णंसमुद्राज्जलमानयत्॥५४॥ रक्तचंदनकपूरैःसंवृत्तंकांचनघटं॥ गवयःपश्चिमात्तोयमाज
हारमहार्णवात्॥५५॥

सागरगामिनांजांबवदादीनां॥४९॥ चतुर्णांसागरांभसांतैःपूर्णैर्घटैःसहिता
प्रत्यूषसमयेयथाऽस्मान्प्रतीक्षध्वंप्रतीक्षिष्यध्वंतथाकुरुतेतियोजना॥५०॥५१॥ जांबवांश्चैवेति·अत्र
चैकैकैःसुषेणगवयादिपंचशतवानरपरिवृतैःतदुत्पत्तिनदीशतानांपंचानामिति·अतएवसुषेणगवय
योःसमुद्रजलाहर्तृत्वेनकल्पमात्रेणनविरोधः॥५२॥
॥५३॥५४॥५५॥

३९॥४०॥४१॥अभ्युक्षयम्अभ्युदश्रयन्॥४२॥४३॥पितुर्भवनमासाद्यतत्रमहात्मनःसुग्रीवादीन्मुख्यान्प्र
वेश्यकौशल्याद्याअभिवादय·वानरैरितिशेषःइति·॥भरतमब्रवीदितिसंबंधःतत्रपूर्वंसुग्रीवादि

सख्यंचरामःसुग्रीवेप्रभावंचानिलात्मजे॥वानराणांचतत्कर्मव्याचचक्षेथमंत्रिणां॥३९॥श्रुत्वा
चविस्मयंजग्मुरयोध्यापुरवासिनः॥वानराणांचतत्कर्मराक्षसानांचतद्बलं॥४०॥द्युतिमाने
तदाख्यायरामोवानरसंयुतः॥हृष्टपुष्टजनाकीर्णामयोध्यांप्रविवेशसः॥४१॥ततोत्वभ्यु-
क्षयन्पौराःपताकाश्चगृहेगृहे॥ऐक्ष्वाकाध्युषितंरम्यमाससादपितुर्गृहं॥४२॥अथाब्रवी
द्राजपुत्रोभरतंधर्मिणांवरं॥अर्थोपहितयावाचामधुरंरघुनंदनः॥४३॥पितुर्भवनमासाद्य-
प्रवेश्यचमहात्मनः॥कौशल्यांचसुमित्रांचकैकयीमभिवादय॥४४॥तच्चमद्भवनंश्रेष्ठंसाशोक
वनिकंमहत्॥मुक्तावैडूर्यसंकीर्णंसुग्रीवायनिवेदय॥४५॥तस्यतद्वचनंश्रुत्वाभरतःसत्य
विक्रमः॥हस्तेगृहीत्वासुग्रीवंप्रविवेशतमालयं॥४६॥ श्री ॥

प्रवेशाबीजमुक्तंपाद्मेस्वंश्रीमद्भवनंरामोभक्तपादाब्जरेणुभिःशुद्धीकर्तुमनाराजाहनूमंतमकल्म
षं·विभीषणंचसुग्रीवंगृहंप्रावेशयत्तदेति·आपाततस्तुकौशल्यादिप्रणाममकरणंफलमितिभा
ति·आंतरंमुख्यंतुपाद्मोक्तंबोध्यं·पूर्वंतुरामेणएकांतरावनद्दं दनंकृतंनतत्सर्वसमक्षमितिगम्यते ४४॥४५॥

६४।अन्ववायोवंशःयेनकिरीटेनमनुरभिषिक्तोयुक्तःयेनवसिष्ठेनतद्वंशोराजानउच्यमानागुणाढ्यायांसभा
यामभिषेचिताः॥६५।तस्यांसभायांपीठेदीप्ततेजसंरामंकल्पयित्वोपवेश्ययथायथाविध्यभिषिच्य।६६
पश्चादभिषेकानंतरंतेनकिरीटेनतेनवसिष्ठेनराघवःसमयोज्यतसंयुक्तःकृतःऋत्विग्भिश्चभू

ब्रह्मणानिर्मितंपूर्वंकिरीटंरत्नशोभितं॥अभिषिक्तःपुरायेनमनुस्तंदीप्ततेजसं॥६४॥त
स्यान्ववायेराजानःक्रमाद्येनाभिषेचिताः॥सभायांहेमक्लृप्तायांशोभितायांमहाधनैः॥६५॥
रत्नैर्नानाविधैश्चैवचित्रितायांसुशोभनैः॥नानारत्नमयेपीठेकल्पयित्वायथाविधि॥६६॥कि
रीटेनततःपश्चाद्वसिष्ठेनमहात्मना॥ऋत्विग्भिर्भूषणैश्चैवसमयोक्ष्यतराघवः॥६७॥छत्रंत
स्यचजग्राहशत्रुघ्नःपांडुरंशुभं॥श्वेतंचवालव्यजनंसुग्रीवोवानरेश्वरः॥६८॥अपरंचंद्रसंका
शंराक्षसेंद्रोविभीषणः॥मालांज्वलंतींवपुषाकांचनींशतपुष्करां॥राघवायददौवायुर्वास
वेनप्रचोदितः॥६९॥सर्वरत्नसमायुक्तंमणिभिश्चविभूषितं॥मुक्ताहारंनरेंद्रायददौशक्रप्र
चोदितः॥७०॥प्रजगुर्देवगंधर्वाननृतुश्चाप्सरोगणाः।अभिषेकेतदर्हस्यतदारामस्यधीमतः॥७१॥

षणैःसंयुक्तःकृतःआर्षोलङ्।६७॥६८॥शतपुष्करांशतपद्मनिर्मितां।६९।शक्रप्रचोदितइतिवायुरित्य
नुकृष्यतेवायुद्वारादिव्यांस्वीयांचनमालांमुक्ताहारंचभगवान्महेंद्रोददावित्यर्थः॥७०॥तदर्हस्यदेवगी

तनत्तायदर्हस्यअभिषेकेसतीत्यर्थः॥७१॥

५६॥आनिलोहनूमान्‌तत्रसिद्धंनदीतीर्थसागराणांजलं॥५७॥श्रेष्ठायपुरोहितायवसिष्ठाय॥५८॥भरतःप्र
यत्नवान्‌ःरत्नमयेपीठेरत्नसिंहासनेससीतंसीतासहितं॥५९॥६०॥प्रसन्नेनानिर्मलेनसकलवैदिकमंत्र

रत्नकुंभेनमहताशीतंमारुतविक्रमः॥उत्तराच्चजलंशीघ्रंगरुडानिलविक्रमः॥५६॥आजहारस
धर्मात्मानिलःसर्वगुणान्वितः॥ततस्तैर्वानरश्रेष्ठैरानीतंप्रेक्ष्यतज्जलं॥५७॥अभिषेकायरामस्य
शत्रुघ्नःसचिवैःसह॥पुरोहितायश्रेष्ठायसुहृद्भ्यश्चन्यवेदयत्‌॥५८॥ततःसप्रयतोवृद्धोव
सिष्ठोब्राह्मणैःसह॥रामंरत्नमयेपीठेससीतंसंन्यवेशयत्‌॥५९॥वसिष्ठोविजयश्चैवजा
बालिरथकाश्यपः॥कात्यायनोगौतमश्चवामदेवस्तथैवच॥६०॥अभिषिंचन्नरव्याघ्रंप्रसन्ने
नसुगंधिना॥सलिलेनसहस्राक्षंवसवोवासवंयथा॥६१॥ऋत्विग्भिर्ब्राह्मणैःपूर्वंकन्याभिर्मं
त्रिभिस्तथा॥योधैश्चैवाभ्यषिंचंस्तेसंप्रहृष्टैःसनैगमैः॥६२॥सर्वौषधिरसैश्चापिदैवतैर्नभसि
स्थितैः॥चतुर्भिर्लोकपालैश्चसर्वैर्देवैश्चसंगतैः॥६३॥

मंत्रितत्वादतिपवित्रेणाचसलिलेननरव्याघ्रमभ्यषिंचन्‌॥६१॥ऋत्विग्भिरित्यादिअत्रवसिष्ठाद
यःप्रयोजककर्त्तारःकन्याभिःषोडशसंख्याभिःअभ्यषिंचन्‌अभ्यषेचयन्‌तेवसिष्ठादयःनैगमाव
णिजः॥६२॥नभसिस्थितैःसर्वदेवसहितैर्लोकपालदैवतैःसर्वौषधिरसैरभ्यषेचयन्वसिष्ठादयः॥६३॥

तत्रहेतुःपौरुषादित्तेजश्चादिश्चयत्रहनूमतिनित्यदानित्यं· आर्षोदाप्रत्ययः॥८२॥८३॥८४॥८५॥कामैःस्व

तेजोधृतिर्यशोदाक्ष्यंसामर्थ्यंविनयोनयः॥पौरुषंविक्रमोबुद्धिर्यस्मिन्नेतानिनित्यदा॥८२॥ह
नूमांस्तेनहारेणशुशुभेवानरर्षभः॥चंद्रांशुचयगौरेणश्वेताभ्रेणयथाचलः॥८३॥सर्वेवानर
वृद्धाश्चयेचान्येवानरोत्तमाः॥वासोभिर्भूषणैश्चैवयथार्हंप्रतिपूजिता॥८४॥विभीषणः
थसुग्रीवोहनूमान्जांबवांस्तथा॥सर्वेवानरमुख्याश्चरामेणाक्लिष्टकर्मणा॥८५॥यथार्हं
पूजिताःसर्वेकामैरत्नैश्चपुष्कलैः॥प्रहृष्टमनसःसर्वेजग्मुरेवयथागतं॥८६॥ततोद्विविद
मैंदाभ्यांनीलायचपरंतपः॥सर्वान्कामगुणान्वीक्ष्यप्रददौवसुधाधिपः॥८७॥दृष्ट्वासर्वे
महात्मानस्ततस्तेवानरर्षभाः॥विसृष्टाःपार्थिवेंद्रेणकिष्किंधांसमुपागमन्॥८८॥सुग्रीवो
वानरश्रेष्ठोदृष्ट्वारामाभिषेचनं॥पूजितश्चैवरामेणकिष्किंधांप्राविशत्पुरीं॥८९॥

कंदनान्नपानाद्यैः॥८६॥वीक्ष्यमैंदद्विविदनीलान्दृष्ट्वातेभ्योसर्वान्कामगुणान्श्रेष्ठमुत्तमान्रत्ना
दीन्ददौ॥८७॥८८॥८९॥

सहस्रशतंलक्षंधेनूनांगवां·नवप्रसूतगवामित्यर्थः शतशब्दोऽनंतवाचीवा॥७३॥पूर्वंगवादिदानानिकृ
त्वातदनंतरंभूयसीत्वेनत्रिंशत्कोटीर्हिरण्यंददौ॥७४॥७५॥७६॥७७॥अवेक्षमाणा·तत्कृतमुपकारंचिं

भूमिःसस्यवतीचैवफलवंतश्चपादपाः॥गंधवंतिचपुष्पाणिबभूवूराघवोत्सवे॥७२॥सह
स्रशतमश्वानांधेनूनांचगवांतथा॥ददौशतवृषान्पूर्वंद्विजेभ्योमनुजर्षभः॥७३॥त्रिंशत्कोटीः
हिरण्यस्यब्राह्मणेभ्योददौपुनः॥नानाभरणवस्त्राणिमहार्हाणिचराघवः॥७४॥अर्करश्मिप्र
तीकाशांकांचनींमणिविग्रहां॥सुग्रीवायस्रजंदिव्यांप्रायच्छन्मनुजाधिपः॥७५॥वैडूर्यमयचि
त्रेचचंद्ररश्मिविभूषिते॥वालिपुत्रायधृतिमानंगदायांगदेददौ॥७६॥मणिप्रवरजुष्टंतंमु
क्ताहारमनुत्तमं॥सीतायैप्रददौरामश्चंद्ररश्मिसमप्रभं॥७७॥अरजेवाससीदिव्येशुभान्या
भरणानिच॥अवेक्षमाणावैदेहीप्रददौवायुसूनवे॥७८॥अवमुच्यात्मनःकंठाद्धारंजनक
नंदिनी॥अवैक्षतहरीन्सर्वान्भर्तारंचमुहुर्मुहुः॥७९॥तामिंगितज्ञःसंप्रेक्ष्यबभाषेजनकात्म
जां॥प्रदेहिसुभगेहारंयस्यतुष्टासिभामिनि॥८०॥अथसावायुपुत्रायतंहारमसितेक्षणा ८१

तयंतीप्रददौप्रदातुमियेषेत्यर्थः॥७८॥आत्मनःकंठाद्धारमवमुच्यदित्सयाभर्त्रनुमतयेभर्त्तारम
वैक्षत॥७९॥८०॥अथभर्त्रनुमत्यनंतरंसावायुपुत्रायददावितिशेषः॥८१॥ ॥

सर्वात्मनापर्यनुनीयमानःज्येष्ठेभरतेविद्यमानेऽहंयौवराज्यानर्हइतिनिषेधेक्रियमाणेपिपुनःपुनःअनु
नीयमानइत्यर्थः।नियुज्यमानोपीति·न्यायप्राप्तस्वीययौवराज्येनभरतेनानीयमानोपियोगंयौवराज्य

सर्वात्मनापर्यनुनीयमानोयदानसौमित्रिरुपैतियोगं॥नियुज्यमानोभुवियौवराज्येततोभ्यषिं
चद्भरतंमहात्मा॥९३॥पौंडरीकाश्वमेधाभ्यांवाजिमेधेनचासकृत्॥अन्यैश्चविविधैर्यज्ञैरयज
त्पार्थिवात्मजः॥९४॥राज्यंदशसहस्राणिप्राप्यवर्षाणिराघवः॥दशाश्वमेधानाजह्रेसदश्वा
न्भूरिदक्षिणान्॥९५॥आजानुलंबिबाहुःसमहावक्षाःप्रतापवान्॥लक्ष्मणानुचरोरामःश
शासपृथिवीमिमां॥९६॥राघवश्चापिधर्मात्माप्राप्यराज्यमनुत्तमं॥ईजेबहुविधैर्यज्ञैःससु
तभ्रातृबांधवः॥९७॥नपर्यदेवन्विधवानचव्यालकृतभयं॥नव्याधिजंभयंचासीद्रामेराज्यंप्र
शासति॥९८॥निर्दस्युरभवल्लोकोनानर्थंकश्चिदस्पृशत्॥नचस्मवृद्धाबालानांप्रेतकार्याणि
कुर्वते॥९९॥सर्वंमुदितमेवासीत्सर्वोधर्मपरोभवत्॥राममेवानुपश्यंतोनाभ्यहिंसन्परस्परं॥१००

संसर्गनोपैति·नेच्छतिततोभरतंयौवराज्येभ्यषेचयत्॥९३॥पौंडरीकाश्वमेधेत्यादिरुत्तरकांडार्थसं
क्षेपः·पौंडरीकाश्वमेधाभ्यामितिसामान्यतउक्त्वातत्रैवविशेषमाह·वाजिमेधेनचासकृदिति॥९४॥९५
॥९६॥९७॥९८॥९९॥१००॥

लब्ध्वाकुलधनमिति·स्वकुलधनंलंकाराज्यमित्यर्थः यत्तुइक्ष्वाकुकुलदैवतंरंगविमानमितितत्पाद्मेवतार
समाप्तिसमयेनदानस्योक्तत्वात्तथाचतत्रविभीषणंप्रतिरामवचनंयावच्चंद्रश्चसूर्यश्चयावत्तिष्ठति
मेदिनी।तावद्रमस्वराज्यस्थःकालेममपदंव्रजः इत्युक्त्वाप्रददौतस्मैस्वविश्लेषासहिष्णवे·श्रीरंगस्वा
मिनंस्वार्चामिक्ष्वाकुकुलदैवतं·रंगविमानमादायलंकांप्रायाद्विभीषणइति॥६०॥शासन्दुष्टनि

विभीषणोपिधर्मात्मासहतैर्नैरृतर्षभैः॥लब्ध्वाकुलधनंराजालंकांप्रायान्महायशाः॥६०॥
सराज्यमखिलंशासन्निहतारिर्महायशाः॥राघवःपरमोदारोशशासपरयामुदा॥उवाच
लक्ष्मणंरामोधर्मज्ञंधर्मवत्सलः॥६१॥आतिष्ठधर्मज्ञमयासहेमांगांपूर्वराजाध्युषितांब
लेन॥तुल्यंयथात्वंपितृभिःपुरस्तात्तैर्यौवराज्येधुरमुद्वहस्व॥६२॥ ॥ ॥

ग्रहंकुर्वन्सशशासपालयामास॥६१॥बलेनचतुरंगबलेनसहपूर्वराजाध्युषितामिमांगांमया
सहातिष्ठ·पूर्वराजामन्वादयस्तैरध्युषितांपालितांकीदृशमास्थानंमयाभुवः कर्तव्यंभवतासहे
त्यत्राह·तुल्यमित्यादिपुरस्तान्महाराज्याभिषेकात्पूर्वंपितृभिःस्वपितृभिस्तुल्यंयथाभवतितथा
तैर्यायौवराज्येधृतातांधुरमुद्वहस्व·आत्मनासहवनवासेदुःखानुभवाद्राज्येसहसुखानुभ
वार्थंलक्ष्मणंप्रतियौवराज्यप्रार्थनेतिभावः॥६२॥

विनायकाःविघ्नकारिणोदेवगणविशेषाः॥१३॥स्त्रियोरजस्वलाःशुद्धस्नानानंतरंषोडशदिनावधिः॥१४॥१५
सदेत्यनेनकालत्रयेपीत्यर्थः॥१६॥१७॥१८॥येऋषिणाकृतांमुनिनाकृतांरामस्यसंहितांरामायणमित्यर्थः

विनायकाश्चशाम्यंतिगृहेतिष्ठतियस्यवै॥विजयेतमहींराजाप्रवासीस्वस्तिमान्भवेत्॥१३॥स्त्रि
योरजस्वलाःश्रुत्वापुत्रान्सूयुरनुत्तमान्॥पूजयंश्चपठंश्चैवमितिहासंपुरातनं॥१४॥सर्वपापैःप्र
मुच्येतदीर्घमायुरवाप्नुयात्॥प्रणम्यशिरसानित्यंश्रोतव्यंक्षत्रियेद्विजात्॥१५॥ऐश्वर्यंपुत्रलाभ
श्चभविष्यतिनसंशयः॥रामायणमिदंकृत्स्नंशृण्वतःपठतःसदा॥१६॥प्रीयतेसततंरामःसहि
विष्णुःसनातनः॥आदिदेवोमहाबाहुर्हरिर्नारायणःप्रभुः॥१६॥एवमेतत्पुरावृत्तमाख्यानंभद्र
मस्तुवः॥प्रव्याहरतविस्रब्धंबलंविष्णोःप्रवर्द्धतां॥१७॥देवाश्चसर्वेतुष्यंतिग्रहणाच्छ्रवणात्तथा
रामायणस्यश्रवणेतुष्यंतिपितरःसदा॥१८॥भक्त्यारामस्ययेचेमांसंहितामृषिणाकृतां॥ये
लिखंतीहचनरास्तेषांवासस्त्रिविष्टपे॥१९॥कुटुंबवृद्धिंधनधान्यवृद्धिंस्त्रियश्चमुख्याःसुख
मुत्तमंच॥श्रुत्वाशुभंकाव्यमिदंमहार्थंप्राप्नोतिसर्वांभुविचार्थसिद्धिं॥२०॥

लिखंतिच·चात्रश्लोकाएवं
ति·त्रिविष्टपेब्रह्मलोके·श्रावणन्रामायणंभक्त्यायःपादंपादमेववाःसयातिब्रह्मणःस्थानंब्रह्मणा
प्रजप्यतेसदेतिवचनात् [illegible] ते॥१९॥२०॥रामराम

वर्षसहस्राणिआसन्जनाइतिशेषः॥१॥२॥३॥४॥आर्षंऋषिर्वेदस्तत्संबंधिवेदोपबृंहणमितियावत् पुरापु

आसन्वर्षसहस्राणितथापुत्रसहस्रिणः॥निरामयाविशोकाश्चरामेराज्यंप्रशासति॥१॥नित्यमू
लानित्यफलास्तरवस्तत्रपुष्पिताः॥कामवर्षीचपर्जन्यःसुखस्पर्शश्चमारुतः॥२॥स्वकर्मसुप्रव
र्तंतेतुष्टाःस्वैरेवकर्मभिः॥आसन्प्रजाधर्मपरारामेशासतिनानृताः॥३॥सर्वेलक्षणसंपन्नाःस
र्वेधर्मपरायणाः॥दशवर्षसहस्राणिरामोराज्यमकारयत्॥४॥धर्म्यंयशस्यमायुष्यंराज्ञांचवि
जयावहं॥आदिकाव्यमिदंचार्षंपुरावाल्मीकिनाकृतं॥५॥यःशृणोतिसदालोकेनरःपापात्प्रमु
च्यते॥पुत्रकामश्चपुत्रान्वैधनकामोधनानिच॥६॥लभतेमनुजोलोकेश्रुत्वारामाभिषेचनं॥म
हींविजयतेराजारिपूंश्चाप्यधितिष्ठति॥७॥राघवेणयथामातासुमित्रालक्ष्मणेनच॥भरते
नचकैकेयीजीवपुत्रास्तथास्त्रियः॥८॥श्रुत्वारामायणमिदंदीर्घमायुश्चविंदति॥रामस्यवि
जयंचेमंसर्वमक्लिष्टकर्मणः॥९॥शृणोतियइदंकाव्यंपुरावाल्मीकिनाकृतं॥श्रद्दधानोजितक्रो
धोदुर्गाण्यतितरत्यसौ॥१०॥समागम्यप्रवासांतेरमंतेसहबांधवैः॥शृण्वंतियइदंकाव्यंपुरावा
ल्मीकिनाकृतं॥११॥तेप्रार्थितान्वरान्सर्वान्प्राप्नुवंतीहराघवात्॥श्रवणेनसुराःसर्वेप्रीयंतेसंप्र
शृण्वतां॥१२॥

रातनं॥५॥६॥७रामाभिषेचनंतदवधिकमित्यर्थः।रिपूनधितिष्ठतितान्विजयतइत्यर्थः

॥८।९।१०॥११॥संप्रशृण्वतामितिपाठः।१२॥

२१। इतिश्रीरामाभिरामोश्रीरामीये रामायणतिलके युद्धकांडे त्रिंशदधिकशततमः सर्गः॥१२१॥१३०॥ निर्मलंकतक्षोदादपि रामायणार्णवं। अत्यंतनिर्मलं चक्रे रामः स्वमतिवाससा॥१॥ भट्टनागेशपूज्येनसे

आयुष्यमारोग्यकरंयशस्यंसौभ्रातकंबुद्धिकरंशुभंच। श्रोतव्यमेतन्नियमेनसद्भिराख्यानमोजस्करमद्धिकामैः॥२१॥ इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे चतुर्विंशत्सहस्त्रिकायांसंहितायां सर्वजनपरिवृत्तस्य राजाधिराजस्य श्रीरामभद्रस्य पट्टाभिषेकभद्राख्यानंनाम त्रिंशदधिकशततमः सर्गः॥२१॥ १३०॥ हरिः ॐम् इतिश्रीगोमतीतीरनैमिषारण्याश्वमेधसप्ततंतुवारगतमुनीन्द्रद्विजेंद्रादिवसुधाधिपेंद्रपरिवृत्तस्य मुनिवृंदारकवंद्यमानकोरकाकारचरणयुगलस्य सद्भ्रातसन्मंत्रिसहितस्य साकेतपुरवराधीश्वरस्य दीनानांदैन्यहरणच्छदीर्णवीर्योत्सिक्तरावणवधार्थंदेवैः प्रार्थितस्य रघुकुलतिलकसंभृतस्य श्रीसीताविशेषस्य लक्ष्मीपतेः साम्पांशस्य लक्ष्मीवतो राजाधिराजस्य लोकाभिरामस्य निकरोक्तयोः॥ श्रीरामात्मजयोरादिकवेः शिष्ययोः कुशलवयोराख्याने श्रीमद्वाल्मीकीये आदिकाव्ये श्रीमद्रामायणे चतुर्विंशत्सहस्त्रिकायां श्रीमद्युद्धकांडे पंचविंशोऽह्नि वर्त्तमानकथाप्रसंगः समाप्तः॥

तुः श्रीरामशर्मणा। कृतः सर्वोपकृतये श्रीमद्रामायणांनुबुधैः॥२॥ बुधेहमोद[illegible] [illegible]॥ [illegible]रामात्मकं विश्वंस्वयंरामोब[illegible]॥३॥

२५९ पत्र. ३९९

ई.

400

श्रीयुद्धकाँडसमाप्तम्   श्री
कातंकसर्गसंख्या १२१ १३०
मूलग्रंथसंख्या ५५५०
आ व्याख्यानग्रंथसंख्या ४६००